THE

MAHĀBHĀRATA

TEXT AS CONSTITUTED IN ITS CRITICAL EDITION

VOLUME IV

ANUŚĀSANA-, ĀŚVAMEDHIKA-, ĀŚRAMAVĀSIKA-, MAUSALA-, MAHĀPRASTHĀNIKA-, AND SVARGĀROHAṆA-PARVANS.

तेजस्वि नावधीतमस्तु

PUBLISHED BY

THE BHANDARKAR ORIENTAL RESEARCH INSTITUTE

POONA

1975

All rights reserved

Printed by Dr. R. N. Dandekar, at the Bhandarkar Institute Press, Poona 4

and

Published by Dr. R. N. Dandekar, Hon. Secretary, Bhandarkar Oriental Research Institute,

Poona 411 004 (India).

चिकित्सितपाठात्मिका

महाभारत-संहिता

चतुर्थः खण्डः

अनुशासन - आश्वमेधिक - आश्रमवासिक - मौसल -
महाप्रस्थानिक - स्वर्गारोहण-पर्वाणि

भाण्डारकरप्राच्यविद्यासंशोधनमन्दिरेण

प्रकाशिता

पुण्यपत्तनम्

शकाब्दाः १८९७

अनुक्रमणिका

१३ अनुशासनपर्व अध्यायाः १–१५४	pp. 2493–2749
८७ दानधर्मपर्व १–१५२	2493–2746
मृत्युगौतम्यादिसंवादः १	2493–2496
सुदर्शनोपाख्यानम् २	2496–2499
विश्वामित्रोपाख्यानम् ३–४	2499–2502
शुकवासवसंवादः ५	2502–2503
दैवपुरुषकारबलाबलम् ६	2503–2505
कर्मफलवर्णनम् ७	2505–2506
पूज्यवर्णनम् ८	2506–2507
सृगालवानरसंवादः ९	2507–2508
नीचस्योपदेशनिषेधः १०	2508–2511
श्रियो निवासस्थानानि ११	2511–2512
भङ्गाश्वनोपाख्यानम् १२	2512–2514
शुभाशुभकर्मफलम् १३	2514–2515
उपमन्यूपाख्यानम् १४–१७	2515–2533
शिवस्तवः १४	2520–2521
शिवसहस्रनाम १७	2528–2532
शिवस्तुतिमाहात्म्यम् १८	2533–2536
अष्टावक्रदिक्संवादः १९–२२	2536–2541
पात्रपरीक्षा २३	2541–2543
दैवपित्र्यदानफलम् २४	2543–2547
ब्रह्मघातिस्वरूपम् २५	2547
तीर्थप्रशंसा २६	2547–2550
गङ्गाप्रशंसनम् २७	2550–2554
मतङ्गोपाख्यानम् २८	2554–2555
इन्द्रमतङ्गसंवादः २९–३०	2555–2556
वीतहव्योपाख्यानम् ३१	2556–2559
पूज्यपुरुषवर्णनम् ३२	2559–2560
ब्राह्मणप्रशंसा ३३–३६	2560–2564
पृथिवीवासुदेवसंवादः ३४	2561–2562
पात्रपरीक्षा ३७	2564
स्त्रीस्वभावकथनम् ३८–३९	2564–2566
विपुलोपाख्यानम् ४०–४३	2566–2572
विवाहधर्माः ४४–४६	2572–2575
रिक्थविभागः ४७	2575–2577

वर्णसंकरः ४८	2577–2579
पुत्रप्रविधिः ४९	2579–2580
च्यवनोपाख्यानम् ५०	2580–2581
च्यवननहुषसंवादः ५१	2581–2583
च्यवनकुशिकसंवादः ५२–५६	2583–2591
यमनियमफलानि ५७	2591–2593
ब्राह्मणप्रशंसा ५८	2593–2594
अतिथियज्ञः ५९	2595
क्षत्रियधर्माः ६०	2595–2596
भूमिदानप्रशंसा ६१	2596–2599
अन्नदानप्रशंसा ६२	2599–2601
नक्षत्रयोगदानम् ६३	2601–2603
काञ्चनादिदानम् ६४	2603
तिलादिदानफलम् ६५	2603–2606
पानीयदानफलम् ६६	2606
तिलादिदानप्रशंसा ६७	2606–2608
गोदानफलम् ६८	2608–2609
नृगोपाख्यानम् ६९	2609–2610
नाचिकेतोपाख्यानम् ७०	2610–2613
गोप्रदानिकम् ७१–७३	2613–2616
व्रतनियमफलम् ७४	2617–2618
गोप्रदानिकम् ७५–८०	2618–2626
श्रीगोसंवादः ८१	2626–2627
गोलोकप्रश्नः ८२	2627–2629
सुवर्णोत्पत्तिः ८३–८५	2629–2637
कार्त्तिकेयोत्पत्तिः ८४	2631–2634
तारकवधः ८६	2637–2638
श्राद्धकल्पः ८७–९२	2638–2644
व्रतविशेषाः ९३	2644–2645
प्रतिग्रहदोषाः ९४	2645–2647
शपथाध्यायः ९५–९६	2647–2654
छत्रोपानहोत्पत्तिः ९७	2654–2655
छत्रोपानहदानम् ९८	2655–2656
आरामादिनिर्माणम् ९९	2656–2657
बलिप्रदानम् १००	2657–2658
दीपादिदानम् १०१	2658–2661
पुष्पादिदानफलम् १०२	2661–2662
दीपादिदानफलम् १०३	2662–2663
ब्रह्मस्वहरणम् १०४	2663–2664
हस्तिकूटम् १०५	2664–2668

	अनशनमाहात्म्यम् १०६	2669–2671
	आयुष्याख्यानम् १०७	2671–2676
	ज्येष्ठकनिष्ठवृत्तिः १०८	2676
	उपवासविधिः १०९	2677–2679
	उपवासफलम् ११०	2679–2684
	शौचानुपृच्छा १११	2684–2685
	संसारचक्रम् ११२–११४	2685–2690
	अहिंसाफलम् ११५–११७	2690–2695
	कीटोपाख्यानम् ११८–१२०	2695–2698
	मैत्रेयभिक्षा १२१–१२३	2698–2700
	शाण्डिलीसुमनासंवादः १२४	2700–2701
	साम्त्वप्रशंसा १२५	2701–2702
	उमामहेश्वरसंवादः१२६–१३४	2702–2721
	विष्णुसहस्रनाम १३५	2721–2726
	ब्राह्मणप्रशंसा १३६	2726–2727
	पवनार्जुनसंवादः १३७–१४२	2727–2733
	कृष्णमाहात्म्यम् १४३	2733–2736
	दुर्वासोमाहात्म्यम् १४४	2736–2738
	ईश्वरप्रशंसा १४५–१४६	2738–2740
	धर्मनिर्णयः १४७–१४८	2740–2743
	युधिष्ठिरप्रश्नः १४९	2743
	धर्मसंशयः १५०	2743
	वंशानुकीर्तनम् १५१	2744–2745
	युधिष्ठिरप्रतिप्रयाणम् १५२	2745–2746
८८	भीष्मस्वर्गारोहणपर्व १५३–१५४	2746–2749
	भीष्मस्वर्गानुज्ञा १५३	2746–2748
	भीष्मस्वर्गगमनम् १५४	2748–2749
१४	आश्वमेधिकपर्व अध्यायाः १–९६	2750–2859
८९	अश्वमेधपर्व १–९६	2750–2859
	युधिष्ठिरसांत्वनम् १	2750
	व्यासवाक्यम् २	2750–2751
	संवर्तमरुत्तीयम् ३–१०	2751–2764
	वासुदेववाक्यम् ११–१३	2764–2766
	हास्तिनपुरप्रवेशः १४	2766–2767
	इन्द्रप्रस्थे कृष्णार्जुनयोः सभाविहारः १५	2767–2768
	अनुगीता १६–५०	2768–2807
	श्रीकृष्णस्य द्वारकां प्रति प्रस्थानम् ५१	2807–2809

उत्तङ्कोपाख्यानम् ५२–५७	2810–2818
वासुदेवेन वसुदेवं प्रति युद्धाख्यानम् ५८–६०	2818–2821
वसुदेवेन अभिमन्योः श्राद्धदानम् ६१	2821–2822
पाण्डवानां मरुत्तनिधिलाभः ६२–६४	2822–2824
परिक्षित्संजीवनम् ६५–६९	2825–2829
युधिष्ठिरस्य यज्ञदीक्षा ७०–७१	2829–2831
अर्जुनस्य अश्वानुसरणम् ७२–७९	2831–2844
त्रैगर्तविजयः ७३	2832–2833
वज्रदत्तपराजयः ७४–७५	2833–2835
सैन्धवपराजयः ७६–७७	2835–2838
बभ्रुवाहनयुद्धम् ७८–८२	2838–2842
मागधपराजयः ८३	2842–2843
चकलव्यसुतपराजयः ८४	2843–2848
गान्धारपराजयः ८५	2844–2845
यज्ञायतननिर्माणम् ८६	2845–2846
यज्ञसमृद्धिः ८७	2846–2847
अर्जुनप्रत्यागमनम् ८८–८९	2847–2848
यूपोच्छ्रयः ९०	2848–2850
यज्ञसमाप्तिः ९१	2850–2851
नकुलोपाख्यानम् ९१–९६	2851–2859
१५ आश्रमवासिकपर्व अध्यायाः १–४७	2860–2901
९० आश्रमवासपर्व १–३५	2860–2888
धृतराष्ट्रशुश्रूषा १–३	2860–2862
भीमापनयः ४	2862
धृतराष्ट्रस्य वनगमनसंकल्पः ५–६	2862–2864
व्यासागमनम् ७	2864–2865
व्यासवाक्यम् ८	2865–2866
युधिष्ठिरानुशासनम् ९–१२	2866–2869
धृतराष्ट्रवाक्यम् १३–१६	2869–2873
भीमसेनवाक्यम् १७	2873–2874
अर्जुनयुधिष्ठिरयोः वाक्ये १८	2874
विदुरवाक्यम् १९	2874–2875
श्राद्धयज्ञः २०	2875
धृतराष्ट्रस्य वनगमनम् २१	2875–2876
कुन्तीवाक्यम् २२–२३	2876–2878
धृतराष्ट्रादीनां व्यासाश्रमगमनम् २५	2879–2880

शतयूपाश्रमः २७	2881
पाण्डवशोकः २८	2881–2882
पाण्डवानां धृतराष्ट्राश्रमाभिगमनम् २९–३१	2882–2884
पाण्डववर्णनम् ३२	2884–2885
विदुरसायुज्यम् ३३	2885–2887
व्यासागमनम् ३४	2887–2888
व्यासवाक्यम् ३५	2888
११ पुत्रदर्शनपर्व ३६–४४	2889–2897
कर्णजन्मकथनम् ३८	2890
दुर्योधनादिदर्शनम् ४०–४१	2892–2894
वैशंपायनवाक्यम् ४२	2894–2895
जनमेजयस्य परिक्षिद्दर्शनम् ४३	2895
युधिष्ठिरनिवर्तनम् ४४	2895–2897
१२ नारदागमनपर्व ४५–४७	2897–2901
धृतराष्ट्रादीनां दावाग्नौ दाहः ४५	2897–2899
युधिष्ठिरशोकः ४६	2899–2900
धृतराष्ट्रश्राद्धकरणम् ४७	2900–2901
मौसलपर्व अध्यायाः १–९	2902–2913
१३ मौसलपर्व १–९	2902–2913
मुनिशापात्साम्बस्य मुसलप्रसवः २	2902–2903
उत्पातदर्शनम् ३	2903–2904
वृष्ण्यन्धकादिविनाशः ४	2904–2905
रामकृष्णावतारसमाप्तिः ५	2905–2907
अर्जुनागमनम् ६	2907–2908
वसुदेवविलापः ७	2908–2909
वसुदेवनिधनम् । वज्राभिषेकः ८	2909–2911
व्यासार्जुनसमागमः ९	2911–2913
महाप्रस्थानिकपर्व अध्यायाः १–३	2914–2918
१४ महाप्रस्थानिकपर्व १–३	2914–2918
पाण्डवप्रव्रजनम् १	2914–2915
भीमादिपतनम् २	2915–2916
इन्द्रयुधिष्ठिरसंवादः ३	2916–2918

१८ स्वर्गारोहणपर्व	अध्यायाः १–५	2919–2926
९५ स्वर्गारोहणपर्व १–५		2919–2926
स्वर्गे नारदवाक्यम् १		2919–2920
देवदूतविसर्जनम् २		2920–2922
युधिष्ठिरस्वर्गारोहणम् ३–५		2922–2926

चतुर्थः खण्डः

१३

अनुशासनपर्व

१

युधिष्ठिर उवाच ।

शमो बहुविधाकारः सूक्ष्म उक्तः पितामह ।
न च मे हृदये शान्तिरस्ति कृत्वेदमीदृशम् ॥ १
अस्मिन्नर्थे बहुविधा शान्तिरुक्ता त्वयानघ ।
स्वकृते का नु शान्तिः स्याच्छमाद्बहुविधादपि ॥ २
शराचितशरीरं हि तीव्रव्रणमुदीक्ष्य च ।
शमं नोपलभे वीर दुष्कृतान्येव चिन्तयन् ॥ ३
रुधिरेणावसिक्ताङ्गं प्रस्रवन्तं यथाचलम् ।
त्वां दृष्ट्वा पुरुषव्याघ्र सीदे वर्षास्विवाम्बुजम् ॥ ४
अतः कष्टतरं किं नु मत्कृते यत्पितामहः ।
इमामवस्थां गमितः प्रत्यमित्रै रणाजिरे ।
तथैवान्ये नृपतयः सहपुत्राः सबान्धवाः ॥ ५
वयं हि धार्तराष्ट्राश्च कालमन्युवशानुगाः ।
कृत्वेदं निन्दितं कर्म प्राप्स्यामः कां गतिं नृप ॥६
अहं तव ह्यन्तकरः सुहृद्वधकरस्तथा ।
न शान्तिमधिगच्छामि पश्यंस्त्वां दुःखितं क्षितौ ॥

भीष्म उवाच ।

परतन्त्रं कथं हेतुमात्मानमनुपश्यसि ।
कर्मण्यस्मिन्महाभाग सूक्ष्मं ह्येतदतीन्द्रियम् ॥ ८
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
संवादं मृत्युगौतम्योः काललुब्धकपन्नगैः ॥ ९
गौतमी नाम कौन्तेय स्थविरा शमसंयुता ।
सर्पेण दष्टं स्वं पुत्रमपश्यद्गतचेतनम् ॥ १०
अथ तं स्नायुपाशेन बद्ध्वा सर्पममर्षितः ।
लुब्धकोऽर्जुनको नाम गौतम्याः समुपानयत् ॥११
तां चाब्रवीदयं ते स पुत्रहा पन्नगाधमः ।
ब्रूहि क्षिप्रं महाभागे वध्यतां केन हेतुना ॥ १२
अग्नौ प्रक्षिप्यतामेष च्छिद्यतां खण्डशोऽपि वा ।
न ह्ययं बालहा पापश्चिरं जीवितुमर्हति ॥ १३

गौतम्युवाच ।

विसृजैनमबुद्धिस्त्वं न वध्योऽर्जुनक त्वया ।
को ह्यात्मानं गुरुं कुर्यात्प्राप्तव्ये सति चिन्तयन् ॥
प्लवन्ते धर्मलघवो लोकेऽम्भसि यथा प्लवाः ।
मज्जन्ति पापगुरवः शस्त्रं स्कन्नमिवोदके ॥ १५
न चामृत्युर्भविता वै हतेऽस्मि-
न्को वात्ययः स्यादहतेऽस्मिञ्जनस्य ।
अस्योत्सर्गे प्राणयुक्तस्य जन्तो-
र्मृत्योर्लोकं को नु गच्छेदनन्तम् ॥ १६

लुब्धक उवाच ।

जानाम्येवं नेह गुणागुणज्ञाः
सर्वे नियुक्ता गुरवो वै भवन्ति ।
स्वस्थस्यैते तूपदेशा भवन्ति
तस्मात्क्षुद्रं सर्पमेनं हनिष्ये ॥ १७
समीप्सन्तः कालयोगं त्यजन्ति
सद्यः शुचं त्वर्थविदस्त्यजन्ति ।
श्रेयः क्षयः शोचतां नित्यशो हि
तस्मात्त्याज्यं जहि शोकं हतेऽस्मिन् ॥१८

गौतम्युवाच ।

न चैवार्तिर्विद्यतेऽस्मद्विधानां
धर्मारामः सततं सज्जनो हि ।
नित्यायस्तो बालजनो न चास्ति
धर्मो ह्येष प्रभवाम्यस्य नाहम् ॥ १९

न ब्राह्मणानां कोपोऽस्ति कुतः कोपाच्च यातना ।
मार्दवात्क्षम्यतां साधो मुच्यतामेष पन्नगः ॥ २०

लुब्धक उवाच ।

हत्वा लाभः श्रेय एवाव्ययं स्या-
त्सद्यो लाभो बलवद्भिः प्रशस्तः ।
कालाल्लाभो यस्तु सद्यो भवेत
हते श्रेयः कुत्सिते त्वीदृशे स्यात् ॥ २१

गौतम्युवाच ।

कार्थप्राप्तिर्गृह्य शत्रुं निहत्य
का वा शान्तिः प्राप्य शत्रुं नमुक्त्वा ।
कस्मात्सौम्य भुजगे न क्षमेयं
मोक्षं वा किं कारणं नास्य कुर्याम् ॥ २२

लुब्धक उवाच ।

अस्मादेकस्माद्बहवो रक्षितव्या
नैको बहुभ्यो गौतमि रक्षितव्यः ।
कृतागसं धर्मविदस्त्यजन्ति
सरीसृपं पापमिमं जहि त्वम् ॥ २३

गौतम्युवाच ।

नास्मिन्हते पन्नगे पुत्रको मे
संप्राप्स्यते लुब्धक जीवितं वै ।
गुणं चान्यं नास्य वधे प्रपश्ये
तस्मात्सर्पं लुब्धक मुञ्च जीवम् ॥ २४

लुब्धक उवाच ।

वृत्रं हत्वा देवराट् श्रेष्ठभाग्वै
यज्ञं हत्वा भागमवाप चैव ।
शूली देवो देववृत्तं कुरु त्वं
क्षिप्रं सर्पं जहि मा भूद्विशङ्का ॥ २५

भीष्म उवाच ।

असकृत्प्रोच्यमानापि गौतमी भुजगं प्रति ।
लुब्धकेन महाभागा पापे नैवाकरोन्मतिम् ॥ २६

ईषदुच्छ्वसमानस्तु कृच्छ्रात्संस्तभ्य पन्नगः ।
उत्ससर्ज गिरं मन्दां मानुषीं पाशपीडितः ॥ २७

को न्वर्जुनक दोषोऽत्र विद्यते मम बालिश ।
अस्वतन्त्रं हि मां मृत्युर्विवशं यदचूचुदत् ॥ २८

तस्यायं वचनाद्दष्टो न कोपेन न काम्यया ।
तस्य तत्किल्बिषं लुब्ध विद्यते यदि किल्बिषम् ॥

लुब्धक उवाच ।

यद्यन्यवशगेनेदं कृतं ते पन्नगाशुभम् ।
कारणं वै त्वमप्यत्र तस्मात्त्वमपि किल्बिषी ॥ ३०

मृत्पात्रस्य क्रियायां हि दण्डचक्रादयो यथा ।
कारणत्वे प्रकल्प्यन्ते तथा त्वमपि पन्नग ॥ ३१

किल्बिषी चापि मे वध्यः किल्बिषी चासि पन्नग ।
आत्मानं कारणं ह्यत्र त्वमाख्यासि भुजंगम ॥ ३२

सर्प उवाच ।

सर्व एते ह्यस्ववशा दण्डचक्रादयो यथा ।
तथाहमपि तस्मान्मे नैष हेतुर्मतस्तव ॥ ३३

अथ वा मतमेतत्ते तेऽप्यन्योन्यप्रयोजकाः ।
कार्यकारणसंदेहो भवत्यन्योन्यचोदनात् ॥ ३४

एवं सति न दोषो मे नास्मि वध्यो न किल्बिषी ।
किल्बिषं समवाये स्यान्मन्यसे यदि किल्बिषम् ॥

लुब्धक उवाच ।

कारणं यदि न स्याद्वै न कर्ता स्यास्त्वमप्युत ।
विनाशे कारणं त्वं च तस्माद्वध्योऽसि मे मतः ॥

असत्यपि कृते कार्ये नेह पन्नग लिप्यते ।
तस्मान्नात्रैव हेतुः स्याद्वध्यः किं बहु भाषसे ॥३७

सर्प उवाच ।

कार्याभावे क्रिया न स्यात्सत्यसत्यपि कारणे ।
तस्मात्त्वमस्मिन्हेतौ मे वाच्यो हेतुर्विशेषतः ॥३८
यद्यहं कारणत्वेन मतो लुब्धक तत्त्वतः ।
अन्यः प्रयोगे स्यादत्र किल्बिषी जन्तुनाशने॥ ३९

लुब्धक उवाच ।

वध्यस्त्वं मम दुर्बुद्धे बालघाती नृशंसकृत् ।
भाषसे किं बहु पुनर्वध्यः सन्पन्नगाधम ॥ ४०

सर्प उवाच ।

यथा हवींषि जुह्वाना मखे वै लुब्धकर्त्विजः ।
न फलं प्राप्नुवन्त्यत्र परलोके तथा ह्यहम् ॥ ४१

भीष्म उवाच ।

तथा ब्रुवति तस्मिंस्तु पन्नगे मृत्युचोदिते ।
आजगाम ततो मृत्युः पन्नगं चाब्रवीदिदम् ॥ ४२
कालेनाहं प्रणुदितः पन्नग त्वामचूचुदम् ।
विनाशहेतुर्नास्य त्वमहं वा प्राणिनः शिशोः ॥ ४३
यथा वायुर्जलधरान्विकर्षति ततस्ततः ।
तद्वज्जलदवत्सर्प कालस्याहं वशानुगः ॥ ४४
सात्त्विका राजसाश्चैव तामसा ये च केचन ।
भावाः कालात्मकाः सर्वे प्रवर्तन्ते हि जन्तुषु ॥४५
जङ्गमाः स्थावराश्चैव दिवि वा यदि वा भुवि ।
सर्वे कालात्मकाः सर्प कालात्मकमिदं जगत् ॥४६
प्रवृत्तयश्च या लोके तथैव च निवृत्तयः ।
तासां विकृतयो याश्च सर्वं कालात्मकं स्मृतम् ॥४७
आदित्यश्चन्द्रमा विष्णुरापो वायुः शतक्रतुः ।
अग्निः खं पृथिवी मित्र ओषध्यो वसवस्तथा ॥४८
सरितः सागराश्चैव भावाभावौ च पन्नग ।
सर्वे कालेन सृज्यन्ते ह्रियन्ते च तथा पुनः ॥ ४९
एवं ज्ञात्वा कथं मां त्वं सदोषं सर्प मन्यसे ।
अथ चैवंगते दोषो मयि त्वमपि दोषवान् ॥ ५०

सर्प उवाच ।

निर्दोषं दोषवन्तं वा न त्वा मृत्यो ब्रवीम्यहम् ।
त्वयाहं चोदित इति ब्रवीम्येतावदेव तु ॥ ५१
यदि काले तु दोषोऽस्ति यदि तत्रापि नेष्यते ।
दोषो नैव परीक्ष्यो मे न ह्यत्राधिकृता वयम् ॥ ५२
निर्मोक्षस्त्वस्य दोषस्य मया कार्यो यथा तथा ।
मृत्यो विदोषः स्यामेव यथा तन्मे प्रयोजनम् ॥५३

भीष्म उवाच ।

सर्पोऽथार्जुनकं प्राह श्रुतं ते मृत्युभाषितम् ।
नानागसं मां पाशेन संतापयितुमर्हसि ॥ ५४

लुब्धक उवाच ।

मृत्योः श्रुतं मे वचनं तव चैव भुजंगम ।
नैव तावद्विदोषत्वं भवति त्वयि पन्नग ॥ ५५
मृत्युस्त्वं चैव हेतुर्हि जन्तोरस्य विनाशने ।
उभयं कारणं मन्ये न कारणमकारणम् ॥ ५६
धिङ्मृत्युं च दुरात्मानं क्रूरं दुःखकरं सताम् ।
त्वां चैवाहं वधिष्यामि पापं पापस्य कारणम् ॥५७

मृत्युरुवाच ।

विवशौ कालवशगावावां तद्दिष्टकारिणौ ।
नावां दोषेण गन्तव्यौ यदि सम्यक्प्रपश्यसि ॥५८

लुब्धक उवाच ।

युवामुभौ कालवशौ यदि वै मृत्युपन्नगौ ।
हर्षक्रोधौ कथं स्यातामेतदिच्छामि वेदितुम् ॥ ५९

मृत्युरुवाच ।

याः काश्चिदिह चेष्टाः स्युः सर्वाः कालप्रचोदिताः ।
पूर्वमेवैतदुक्तं हि मया लुब्धक कालतः ॥ ६०

तस्मादुभौ कालवशावावां तद्दिष्टकारिणौ ।
नावां दोषेण गन्तव्यौ त्वया लुब्धक कर्हिचित् ॥

भीष्म उवाच ।

अथोपगम्य कालस्तु तस्मिन्धर्मार्थसंशये ।
अब्रवीत्पन्नगं मृत्युं लुब्धमर्जुनकं च तम् ॥ ६२

काल उवाच ।

नैवाहं नाप्ययं मृत्युर्नायं लुब्धक पन्नगः ।
किल्बिषी जन्तुमरणे न वयं हि प्रयोजकाः ॥ ६३
अकरोद्यदयं कर्म तन्नोऽर्जुनक चोदकम् ।
प्रणाशहेतुर्नान्योऽस्य वध्यतेऽयं स्वकर्मणा ॥ ६४
यदनेन कृतं कर्म तेनायं निधनं गतः ।
विनाशहेतुः कर्मास्य सर्वे कर्मवशा वयम् ॥ ६५
कर्मदायादवाँल्लोकः कर्मसंबन्धलक्षणः ।
कर्माणि चोदयन्तीह यथान्योन्यं तथा वयम् ॥६६
यथा मृत्पिण्डतः कर्ता कुरुते यद्यदिच्छति ।
एवमात्मकृतं कर्म मानवः प्रतिपद्यते ॥ ६७
यथा छायातपौ नित्यं सुसंबद्धौ निरन्तरम् ।
तथा कर्म च कर्ता च संबद्धावात्मकर्मभिः ॥ ६८
एवं नाहं न वै मृत्युर्न सर्पो न तथा भवान् ।
न चेयं ब्राह्मणी वृद्धा शिशुरेवात्र कारणम् ॥ ६९
तस्मिंस्तथा ब्रुवाणे तु ब्राह्मणी गौतमी नृप ।
स्वकर्मप्रत्ययाँल्लोकान्मत्वार्जुनकमब्रवीत् ॥ ७०
नैव कालो न भुजगो न मृत्युरिह कारणम् ।
स्वकर्मभिरयं बालः कालेन निधनं गतः ॥ ७१
मया च तत्कृतं कर्म येनायं मे मृतः सुतः ।
यातु कालस्तथा मृत्युर्मुञ्चार्जुनक पन्नगम् ॥ ७२

भीष्म उवाच ।

ततो यथागतं जग्मुर्मृत्युः कालोऽथ पन्नगः ।
अभूद्विरोषोऽर्जुनको विशोका चैव गौतमी ॥ ७३
एतच्छ्रुत्वा शमं गच्छ मा भूश्चिन्तापरो नृप ।
स्वकर्मप्रत्ययाँल्लोकांस्त्रीन्विद्धि मनुजर्षभ ॥ ७४
न तु त्वया कृतं पार्थ नापि दुर्योधनेन वै ।
कालेन तत्कृतं विद्धि विहता येन पार्थिवाः ॥ ७५

वैशंपायन उवाच ।

इत्येतद्वचनं श्रुत्वा बभूव विगतज्वरः ।
युधिष्ठिरो महातेजाः पप्रच्छेदं च धर्मवित् ॥ ७६

इति श्रीमहाभारते अनुशासनपर्वणि
प्रथमोऽध्यायः ॥ १ ॥

२

युधिष्ठिर उवाच ।

पितामह महाप्राज्ञ सर्वशास्त्रविशारद ।
श्रुतं मे महदाख्यानमिदं मतिमतां वर ॥ १
भूयस्तु श्रोतुमिच्छामि धर्मार्थसहितं नृप ।
कथ्यमानं त्वया किंचित्तन्मे व्याख्यातुमर्हसि ॥ २
केन मृत्युर्गृहस्थेन धर्ममाश्रित्य निर्जितः ।
इत्येतत्सर्वमाचक्ष्व तत्त्वेन मम पार्थिव ॥ ३

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
यथा मृत्युर्गृहस्थेन धर्ममाश्रित्य निर्जितः ॥ ४
मनोः प्रजापते राजन्निक्ष्वाकुरभवत्सुतः ।
तस्य पुत्रशतं जज्ञे नृपतेः सूर्यवर्चसः ॥ ५
दशमस्तस्य पुत्रस्तु दशाश्वो नाम भारत ।
माहिष्मत्यामभूद्राजा धर्मात्मा सत्यविक्रमः ॥ ६
दशाश्वस्य सुतस्त्वासीद्राजा परमधार्मिकः ।
सत्ये तपसि दाने च यस्य नित्यं रतं मनः ॥ ७
मदिराश्व इति ख्यातः पृथिव्यां पृथिवीपतिः ।
धनुर्वेदे च वेदे च निरतो योऽभवत्सदा ॥ ८
मदिराश्वस्य पुत्रस्तु द्युतिमान्नाम पार्थिवः ।
महाभागो महातेजा महासत्त्वो महाबलः ॥ ९

पुत्रो द्युतिमतस्त्वासीत्सुवीरो नाम पार्थिवः ।
धर्मात्मा कोशवांश्चापि देवराज इवापरः ॥ १०
सुवीरस्य तु पुत्रोऽभूत्सर्वसंग्रामदुर्जयः ।
दुर्जयेत्यभिविख्यातः सर्वशास्त्रविशारदः ॥ ११
दुर्जयस्येन्द्रवपुषः पुत्रोऽग्निसदृशद्युतिः ।
दुर्योधनो नाम महान्राजासीद्राजसत्तम ॥ १२
तस्येन्द्रसमवीर्यस्य संग्रामेष्वनिवर्तिनः ।
विषयश्च प्रभावश्च तुल्यमेवाभ्यवर्तत ॥ १३
रत्नैर्धनैश्च पशुभिः सस्यैश्चापि पृथग्विधैः ।
नगरं विषयश्चास्य प्रतिपूर्णं तदाभवत् ॥ १४
न तस्य विषये चाभूत्कृपणो नापि दुर्गतः ।
व्याधितो वा कृशो वापि तस्मिन्नाभून्नरः क्वचित् ॥
सुदक्षिणो मधुरवागनसूयुर्जितेन्द्रियः ।
धर्मात्मा चानृशंसश्च विक्रान्तोऽथाविकत्थनः ॥१६
यज्वा वदान्यो मेधावी ब्रह्मण्यः सत्यसंगरः ।
न चावमन्ता दाता च वेदवेदाङ्गपारगः ॥ १७
तं नर्मदा देवनदी पुण्या शीतजला शिवा ।
चकमे पुरुषश्रेष्ठं स्वेन भावेन भारत ॥ १८
तस्य जज्ञे तदा नद्यां कन्या राजीवलोचना ।
नाम्ना सुदर्शना राजन्रूपेण च सुदर्शना ॥ १९
तादृग्रूपा न नारीषु भूतपूर्वा युधिष्ठिर ।
दुर्योधनसुता यादृगभवद्वरवर्णिनी ॥ २०
तामग्निश्चकमे साक्षाद्राजकन्यां सुदर्शनाम् ।
भूत्वा च ब्राह्मणः साक्षाद्वरयामास तं नृपम् ॥२१
दरिद्रश्चासवर्णश्च ममायमिति पार्थिवः ।
न दित्सति सुतां तस्मै तां विप्राय सुदर्शनाम् ॥२२
ततोऽस्य वितते यज्ञे नष्टोऽभूद्धव्यवाहनः ।
ततो दुर्योधनो राजा वाक्यमाहर्त्विजस्तदा ॥ २३
दुष्कृतं मम किं न स्याद्भवतां वा द्विजर्षभाः ।
येन नाशं जगामाग्निः कृतं कुपुरुषेष्विव ॥ २४
न ह्यल्पं दुष्कृतं नोऽस्ति येनाग्निर्नाशमागतः ।
भवतां वाथ वा मह्यं तत्त्वेनैतद्विमृश्यताम् ॥ २५
एतद्राज्ञो वचः श्रुत्वा विप्रास्ते भरतर्षभ ।
नियता वाग्यताश्चैव पावकं शरणं ययुः ॥ २६
तान्दर्शयामास तदा भगवान्हव्यवाहनः ।
स्वं रूपं दीप्तिमत्कृत्वा शरदर्कसमद्युतिः ॥ २७
ततो महात्मा तानाह दहनो ब्राह्मणर्षभान् ।
वरयाम्यात्मनोऽर्थाय दुर्योधनसुतामिति ॥ २८
ततस्ते काल्यमुत्थाय तस्मै राज्ञे न्यवेदयन् ।
ब्राह्मणा विस्मिताः सर्वे यदुक्तं चित्रभानुना ॥२९
ततः स राजा तच्छ्रुत्वा वचनं ब्रह्मवादिनाम् ।
अवाप्य परमं हर्षं तथेति प्राह बुद्धिमान् ॥ ३०
प्रायाचत नृपः शुल्कं भगवन्तं विभावसुम् ।
नित्यं सांनिध्यमिह ते चित्रभानो भवेदिति ।
तमाह भगवानग्निरेवमस्त्विति पार्थिवम् ॥ ३१
ततः सांनिध्यमद्यापि माहिष्मत्यां विभावसोः ।
दृष्टं हि सहदेवेन दिशो विजयता तदा ॥ ३२
ततस्तां समलंकृत्य कन्यामहतवाससम् ।
ददौ दुर्योधनो राजा पावकाय महात्मने ॥ ३३
प्रतिजग्राह चाग्निस्तां राजपुत्रीं सुदर्शनाम् ।
विधिना वेददृष्टेन वसोर्धारामिवाध्वरे ॥ ३४
तस्या रूपेण शीलेन कुलेन वपुषा श्रिया ।
अभवत्प्रीतिमानग्निर्गर्भं तस्यां समादधे ॥ ३५
तस्यां समभवत्पुत्रो नाम्नाग्नेयः सुदर्शनः ।
शिशुरेवाध्यगात्सर्वं स च ब्रह्म सनातनम् ॥ ३६
अथौघवान्नाम नृपो नृगस्यासीत्पितामहः ।
तस्याप्योघवती कन्या पुत्रश्चौघरथोऽभवत् ॥ ३७
तामोघवान्ददौ तस्मै स्वयमोघवतीं सुताम् ।
सुदर्शनाय विदुषे भार्यार्थे देवरूपिणीम् ॥ ३८
स गृहस्थाश्रमरतस्तया सह सुदर्शनः ।

कुरुक्षेत्रेऽवसद्राजन्नोघवत्या समन्वितः ॥ ३९
गृहस्थश्चावजेष्यामि मृत्युमित्येव स प्रभो ।
प्रतिज्ञामकरोद्धीमान्दीप्ततेजा विशां पते ॥ ४०
तामथौघवतीं राजन्स पावकसुतोऽब्रवीत् ।
अतिथेः प्रतिकूलं ते न कर्तव्यं कथंचन ॥ ४१
येन येन च तुष्येत नित्यमेव त्वयातिथिः ।
अप्यात्मनः प्रदानेन न ते कार्या विचारणा ॥ ४२
एतद्व्रतं मम सदा हृदि संपरिवर्तते ।
गृहस्थानां हि सुश्रोणि नातिथेर्विद्यते परम् ॥ ४३
प्रमाणं यदि वामोरु वचस्ते मम शोभने ।
इदं वचनमव्यग्रा हृदि त्वं धारयेः सदा ॥ ४४
निष्क्रान्ते मयि कल्याणि तथा संनिहितेऽनघे ।
नातिथिस्तेऽवमन्तव्यः प्रमाणं यद्यहं तव ॥ ४५
तमब्रवीदोघवती यता मूर्ध्नि कृताञ्जलिः ।
न मे त्वद्वचनात्किंचिदकर्तव्यं कथंचन ॥ ४६
जिगीषमाणं तु गृहे तदा मृत्युः सुदर्शनम् ।
पृष्ठतोऽन्वगमद्राजन्रन्ध्रान्वेषी तदा सदा ॥ ४७
इध्मार्थं तु गते तस्मिन्नग्निपुत्रे सुदर्शने ।
अतिथिर्ब्राह्मणः श्रीमांस्तामाहौघवतीं तदा ॥ ४८
आतिथ्यं दत्तमिच्छामि त्वयाद्य वरवर्णिनि ।
प्रमाणं यदि धर्मस्ते गृहस्थाश्रमसंमतः ॥ ४९
इत्युक्ता तेन विप्रेण राजपुत्री यशस्विनी ।
विधिना प्रतिजग्राह वेदोक्तेन विशां पते ॥ ५०
आसनं चैव पाद्यं च तस्मै दत्त्वा द्विजातये ।
प्रोवाचौघवती विप्रं केनार्थः किं ददामि ते ॥ ५१
तामब्रवीत्ततो विप्रो राजपुत्रीं सुदर्शनाम् ।
त्वया ममार्थः कल्याणि निर्विशङ्के तदाचर ॥ ५२
यदि प्रमाणं धर्मस्ते गृहस्थाश्रमसंमतः ।
प्रदानेनात्मनो राज्ञि कर्तुमर्हसि मे प्रियम् ॥ ५३
तथा संछन्द्यमानोऽन्यैरीप्सितैर्नृपकन्यया ।
नान्यमात्मप्रदानात्स तस्या वव्रे वरं द्विजः ॥ ५४
सा तु राजसुता स्मृत्वा भर्तुर्वचनमादितः ।
तथेति लज्जमाना सा तमुवाच द्विजर्षभम् ॥ ५५
ततो रहः स विप्रर्षिः सा चैवोपविवेश ह ।
संस्मृत्य भर्तुर्वचनं गृहस्थाश्रमकाङ्क्षिणः ॥ ५६
अथेध्मान्समुपादाय स पावकिरुपागमत् ।
मृत्युना रौद्रभावेन नित्यं बन्धुरिवान्वितः ॥ ५७
ततस्त्वाश्रममागम्य स पावकसुतस्तदा ।
तामाजुहावौघवतीं क्वासि यातेति चासकृत् ॥ ५८
तस्मै प्रतिवचः सा तु भर्त्रे न प्रददौ तदा ।
कराभ्यां तेन विप्रेण स्पृष्टा भर्तृव्रता सती ॥ ५९
उच्छिष्टास्मीति मन्वाना लज्जिता भर्तुरेव च ।
तूष्णींभूताभवत्साध्वी न चोवाचाथ किंचन ॥ ६०
अथ तां पुनरेवेदं प्रोवाच स सुदर्शनः ।
क्व सा साध्वी क्व सा याता गरीयः किमतो मम ॥
पतिव्रता सत्यशीला नित्यं चैवार्जवे रता ।
कथं न प्रत्युदेत्यद्य स्मयमाना यथा पुरा ॥ ६२
उटजस्थस्तु तं विप्रः प्रत्युवाच सुदर्शनम् ।
अतिथिं विद्धि संप्राप्तं पावके ब्राह्मणं च माम् ॥
अनया छन्द्यमानोऽहं भार्यया तव सत्तम ।
तैस्तैरतिथिसत्कारैरार्जवेऽस्या दृढं मनः ॥ ६४
अनेन विधिना सेयं मामर्चति शुभानना ।
अनुरूपं यदत्राद्य तद्भवान्वक्तुमर्हति ॥ ६५
कूटमुद्गरहस्तस्तु मृत्युस्तं वै समन्वयात् ।
हीनप्रतिज्ञमत्रैनं वधिष्यामीति चिन्तयन् ॥ ६६
सुदर्शनस्तु मनसा कर्मणा चक्षुषा गिरा ।
त्यक्तेर्ष्यस्त्यक्तमन्युश्च स्मयमानोऽब्रवीदिदम् ॥ ६७
सुरतं तेऽस्तु विप्राग्र्य प्रीतिर्हि परमा मम ।
गृहस्थस्य हि धर्मोऽग्र्यः संप्राप्तातिथिपूजनम् ॥ ६८
अतिथिः पूजितो यस्य गृहस्थस्य तु गच्छति ।

नान्यस्तस्मात्परो धर्म इति प्राहुर्मनीषिणः ॥ ६९
प्राणा हि मम दाराश्च यच्चान्यद्विद्यते वसु ।
अतिथिभ्यो मया देयमिति मे व्रतमाहितम् ॥७०
निःसंदिग्धं मया वाक्यमेतत्ते समुदाहृतम् ।
तेनाहं विप्र सत्येन स्वयमात्मानमालभे ॥ ७१
पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमम् ।
बुद्धिरात्मा मनः कालो दिशश्चैव गुणा दश ॥ ७२
नित्यमेते हि पश्यन्ति देहिनां देहसंश्रिताः ।
सुकृतं दुष्कृतं चापि कर्म धर्मभृतां वर ॥ ७३
यथैषा नानृता वाणी मयाद्य समुदाहृता ।
तेन सत्येन मां देवाः पालयन्तु दहन्तु वा ॥ ७४
ततो नादः समभवद्दिक्षु सर्वासु भारत ।
असकृत्सत्यमित्येव नैतन्मिथ्येति सर्वशः ॥ ७५
उटजात्तु ततस्तस्मान्निश्चक्राम स वै द्विजः ।
वपुषा खं च भूमिं च व्याप्य वायुरिवोद्यतः ॥७६
स्वरेण विप्रः शैक्षेण त्रींल्लोकाननुनादयन् ।
उवाच चैनं धर्मज्ञं पूर्वमामन्त्र्य नामतः ॥ ७७
धर्मोऽहमस्मि भद्रं ते जिज्ञासार्थं तवानघ ।
प्राप्तः सत्यं च ते ज्ञात्वा प्रीतिर्मे परमा त्वयि ॥
विजितश्च त्वया मृत्युर्योऽयं त्वामनुगच्छति ।
रन्ध्रान्वेषी तव सदा त्वया धृत्या वशीकृतः ॥ ७९
न चास्ति शक्तिस्त्रैलोक्ये कस्यचित्पुरुषोत्तम ।
पतिव्रतामिमां साध्वीं तवोद्वीक्षितुमप्युत ॥ ८०
रक्षिता त्वद्गुणैरेषा पतिव्रतगुणैस्तथा ।
अधृष्या यदियं ब्रूयात्तथा तन्नान्यथा भवेत् ॥८१
एषा हि तपसा स्वेन संयुक्ता ब्रह्मवादिनी ।
पावनार्थं च लोकस्य सरिच्छ्रेष्ठा भविष्यति ॥ ८२
अर्धेनौघवती नाम त्वामर्धेनानुयास्यति ।
शरीरेण महाभागा योगो ह्यस्या वशे स्थितः ॥८३
अनया सह लोकांश्च गन्तासि तपसार्जितान् ।
यत्र नावृत्तिमभ्येति शाश्वतांस्तान्सनातनान् ॥ ८४
अनेन चैव देहेन लोकांस्त्वमभिपत्स्यसे ।
निर्जितश्च त्वया मृत्युरैश्वर्यं च तवोत्तमम् ॥ ८५
पञ्च भूतान्यतिक्रान्तः स्ववीर्याच्च मनोभवः ।
गृहस्थधर्मेणानेन कामक्रोधौ च ते जितौ ॥ ८६
स्नेहो रागश्च तन्द्री च मोहो द्रोहश्च केवलः ।
तव शुश्रूषया राजन्राजपुत्र्या विनिर्जिताः ॥ ८७

भीष्म उवाच ।

शुक्लानां तु सहस्रेण वाजिनां रथमुत्तमम् ।
युक्तं प्रगृह्य भगवान्व्यवसायो जगाम तम् ॥ ८८
मृत्युरात्मा च लोकाश्च जिता भूतानि पञ्च च ।
बुद्धिः कालो मनो व्योम कामक्रोधौ तथैव च ॥
तस्माद्गृहाश्रमस्थस्य नान्यद्दैवतमस्ति वै ।
ऋतेऽतिथिं नरव्याघ्र मनसैतद्विचारय ॥ ९०
अतिथिः पूजितो यस्य ध्यायते मनसा शुभम् ।
न तत्क्रतुशतेनापि तुल्यमाहुर्मनीषिणः ॥ ९१
पात्रं त्वतिथिमासाद्य शीलाढ्यं यो न पूजयेत् ।
स दत्त्वा सुकृतं तस्य क्षपयेत ह्यनर्चितः ॥ ९२
एतत्ते कथितं पुत्र मयाख्यानमनुत्तमम् ।
यथा हि विजितो मृत्युर्गृहस्थेन पुराभवत् ॥ ९३
धन्यं यशस्यमायुष्यमिदमाख्यानमुत्तमम् ।
बुभूषताभिमन्तव्यं सर्वदुश्चरितापहम् ॥ ९४
य इदं कथयेद्विद्वानहन्यहनि भारत ।
सुदर्शनस्य चरितं पुण्याँल्लोकानवाप्नुयात् ॥ ९५

इति श्रीमहाभारते अनुशासनपर्वणि
द्वितीयोऽध्यायः ॥ २ ॥

३

युधिष्ठिर उवाच ।

ब्राह्मण्यं यदि दुष्प्रापं त्रिभिर्वर्णैर्नराधिप ।
कथं प्राप्तं महाराज क्षत्रियेण महात्मना ॥ १

विश्वामित्रेण धर्मात्मन्ब्राह्मणत्वं नरर्षभ ।
श्रोतुमिच्छामि तत्त्वेन तन्मे ब्रूहि पितामह ॥ २
तेन ह्यमितवीर्येण वसिष्ठस्य महात्मनः ।
हतं पुत्रशतं सद्यस्तपसा प्रपितामह ॥ ३
यातुधानाश्च बहवो राक्षसास्तिग्मतेजसः ।
मन्युनाविष्टदेहेन सृष्टाः कालान्तकोपमाः ॥ ४
महान्कुशिकवंशश्च ब्रह्मर्षिशतसंकुलः ।
स्थापितो नरलोकेऽस्मिन्विद्वान्ब्राह्मणसंस्तुतः ॥ ५
ऋचीकस्यात्मजश्चैव शुनःशेपो महातपाः ।
विमोक्षितो महासत्रात्पशुतामभ्युपागतः ॥ ६
हरिश्चन्द्रक्रतौ देवांस्तोषयित्वात्मतेजसा ।
पुत्रतामनुसंप्राप्तो विश्वामित्रस्य धीमतः ॥ ७
नाभिवादयते ज्येष्ठं देवरातं नराधिप ।
पुत्राः पञ्चशताश्चापि शप्ताः श्वपचतां गताः ॥ ८
त्रिशङ्कुर्बन्धुसंत्यक्त इक्ष्वाकुः प्रीतिपूर्वकम् ।
अवाक्शिरा दिवं नीतो दक्षिणामाश्रितो दिशम् ॥
विश्वामित्रस्य विपुला नदी राजर्षिसेविता ।
कौशिकीति शिवा पुण्या ब्रह्मर्षिगणसेविता ॥ १०
तपोविघ्नकरी चैव पञ्चचूडा सुसंमता ।
रम्भा नामाप्सराः शापाद्यस्य शैलत्वमागता ॥ ११
तथैवास्य भयाद्बद्ध्वा वसिष्ठः सलिले पुरा ।
आत्मानं मज्जयामास विपाशः पुनरुत्थितः ॥ १२
तदाप्रभृति पुण्या हि विपाशाभून्महानदी ।
विख्याता कर्मणा तेन वसिष्ठस्य महात्मनः ॥ १३
वाग्भिश्च भगवान्येन देवसेनाग्रगः प्रभुः ।
स्तुतः प्रीतमनाश्चासीच्छापाच्चैनममोचयत् ॥ १४
ध्रुवस्यौत्तानपादस्य ब्रह्मर्षीणां तथैव च ।
मध्ये ज्वलति यो नित्यमुदीचीमाश्रितो दिशम् ॥ १५
तस्यैतानि च कर्माणि तथान्यानि च कौरव ।
क्षत्रियस्येत्यतो जातमिदं कौतूहलं मम ॥ १६
किमेतदिति तत्त्वेन प्रब्रूहि भरतर्षभ ।
देहान्तरमनासाद्य कथं स ब्राह्मणोऽभवत् ॥ १७
एतत्तत्त्वेन मे राजन्सर्वमाख्यातुमर्हसि ।
मतंगस्य यथातत्त्वं तथैवैतद्ब्रवीहि मे ॥ १८
स्थाने मतंगो ब्राह्मण्यं नालभद्भरतर्षभ ।
चण्डालयोनौ जातो हि कथं ब्राह्मण्यमाप्नुयात् ॥ १९

इति श्रीमहाभारते अनुशासनपर्वणि
तृतीयोऽध्यायः ॥ ३ ॥

४

भीष्म उवाच ।

श्रूयतां पार्थ तत्त्वेन विश्वामित्रो यथा पुरा ।
ब्राह्मणत्वं गतस्तात ब्रह्मर्षित्वं तथैव च ॥ १
भरतस्यान्वये चैवाजमीढो नाम पार्थिवः ।
बभूव भरतश्रेष्ठ यज्वा धर्मभृतां वरः ॥ २
तस्य पुत्रो महानासीज्जह्नुर्नाम नरेश्वरः ।
दुहितृत्वमनुप्राप्ता गङ्गा यस्य महात्मनः ॥ ३
तस्यात्मजस्तुल्यगुणः सिन्धुद्वीपो महायशाः ।
सिन्धुद्वीपाच्च राजर्षिर्बलाकाश्वो महाबलः ॥ ४
वल्लभस्तस्य तनयः साक्षाद्धर्म इवापरः ।
कुशिकस्तस्य तनयः सहस्राक्षसमद्युतिः ॥ ५
कुशिकस्यात्मजः श्रीमान्गाधिर्नाम जनेश्वरः ।
अपुत्रः स महाबाहुर्वनवासमुदावसत् ॥ ६
कन्या जज्ञे सुता तस्य वने निवसतः सतः ।
नाम्ना सत्यवती नाम रूपेणाप्रतिमा भुवि ॥ ७
तां वव्रे भार्गवः श्रीमांश्च्यवनस्यात्मजः प्रभुः ।
ऋचीक इति विख्यातो विपुले तपसि स्थितः ॥ ८
स तां न प्रददौ तस्मै ऋचीकाय महात्मने ।
दरिद्र इति मत्वा वै गाधिः शत्रुनिबर्हणः ॥ ९
प्रत्याख्याय पुनर्यान्तमब्रवीद्राजसत्तमः ।
शुल्कं प्रदीयतां मह्यं ततो वेत्स्यसि मे सुताम् ॥

ऋचीक उवाच ।

किं प्रयच्छामि राजेन्द्र तुभ्यं शुल्कमहं नृप ।
दुहितुर्ब्रूह्यसंसक्तो मात्राभूत्ते विचारणा ॥ ११

गाधिरुवाच ।

चन्द्ररश्मिप्रकाशानां हयानां वातरंहसाम् ।
एकतः श्यामकर्णानां सहस्रं देहि भार्गव ॥ १२

भीष्म उवाच ।

ततः स भृगुशार्दूलश्च्यवनस्यात्मजः प्रभुः ।
अब्रवीद्वरुणं देवमादित्यं पतिमम्भसाम् ॥ १३
एकतः श्यामकर्णानां हयानां चन्द्रवर्चसाम् ।
सहस्रं वातवेगानां भिक्षे त्वां देवसत्तम ॥ १४
तथेति वरुणो देव आदित्यो भृगुसत्तमम् ।
उवाच यत्र ते छन्दस्तत्रोत्स्थास्यन्ति वाजिनः ॥१५
ध्यातमात्रे ऋचीकेन हयानां चन्द्रवर्चसाम् ।
गङ्गाजलात्समुत्तस्थौ सहस्रं विपुलौजसाम् ॥ १६
अदूरे कन्यकुब्जस्य गङ्गायास्तीरमुत्तमम् ।
अश्वतीर्थं तदद्यापि मानवाः परिचक्षते ॥ १७
ततस्तदा गाधये तात सहस्रं वाजिनां शुभम् ।
ऋचीकः प्रददौ प्रीतः शुल्कार्थं जपतां वरः ॥
ततः स विस्मितो राजा गाधिः शापभयेन च ।
ददौ तां समलंकृत्य कन्यां भृगुसुताय वै ॥ १९
जग्राह पाणिं विधिना तस्या ब्रह्मर्षिसत्तमः ।
सा च तं पतिमासाद्य परं हर्षमवाप ह ॥ २०
स तुतोष च विप्रर्षिस्तस्या वृत्तेन भारत ।
छन्दयामास चैवैनां वरेण वरवर्णिनीम् ॥ २१
मात्रे तत्सर्वमाचख्यौ सा कन्या राजसत्तमम् ।
अथ तामब्रवीन्माता सुतां किंचिदवाङ्मुखीम् ॥२२
ममापि पुत्रि भर्ता ते प्रसादं कर्तुमर्हति ।
अपत्यस्य प्रदानेन समर्थः स महातपाः ॥ २३
ततः सा त्वरितं गत्वा तत्सर्वं प्रत्यवेदयत् ।
मातुश्चिकीर्षितं राजन्नृचीकस्तामथाब्रवीत् ॥ २४
गुणवन्तमपत्यं वै त्वं च सा जनयिष्यथः ।
जनन्यास्तव कल्याणि मा भूद्वै प्रणयोऽन्यथा ॥
तव चैव गुणश्लाघी पुत्र उत्पत्स्यते शुभे ।
अस्मद्वंशकरः श्रीमांस्तव भ्राता च वंशकृत् ॥ २६
ऋतुस्नाता च साश्वत्थं त्वं च वृक्षमुदुम्बरम् ।
परिष्वजेथाः कल्याणि तत इष्टमवाप्स्यथः ॥ २७
चरुद्वयमिदं चैव मन्त्रपूतं शुचिस्मिते ।
त्वं च सा चोपयुञ्जीथां ततः पुत्राववाप्स्यथः ॥२८
ततः सत्यवती हृष्टा मातरं प्रत्यभाषत ।
यदृचीकेन कथितं तच्चाचख्यौ चरुद्वयम् ॥ २९
तामुवाच ततो माता सुतां सत्यवतीं तदा ।
पुत्रि मूर्ध्ना प्रपन्नायाः कुरुष्व वचनं मम ॥ ३०
भर्त्रा य एष दत्तस्ते चरुर्मन्त्रपुरस्कृतः ।
एतं प्रयच्छ मह्यं त्वं मदीयं त्वं गृहाण च ॥ ३१
व्यत्यासं वृक्षयोश्चापि करवाव शुचिस्मिते ।
यदि प्रमाणं वचनं मम मातुरनिन्दिते ॥ ३२
व्यक्तं भगवता चात्र कृतमेवं भविष्यति ।
ततो मे त्वच्चरौ भावः पादपे च सुमध्यमे ।
कथं विशिष्टो भ्राता ते भवेदित्येव चिन्तय ॥ ३३
तथा च कृतवत्यौ ते माता सत्यवती च सा ।
अथ गर्भावनुप्राप्ते उभे ते वै युधिष्ठिर ॥ ३४
दृष्ट्वा गर्भमनुप्राप्तां भार्यां स च महानृषिः ।
उवाच तां सत्यवतीं दुर्मना भृगुसत्तमः ॥ ३५
व्यत्यासेनोपयुक्तस्ते चरुर्व्यक्तं भविष्यति ।
व्यत्यासः पादपे चापि सुव्यक्तं ते कृतः शुभे ॥३६
मया हि विश्वं यद्ब्रह्म त्वच्चरौ संनिवेशितम् ।
क्षत्रवीर्यं च सकलं चरौ तस्या निवेशितम् ॥ ३७
त्रिलोकविख्यातगुणं त्वं विप्रं जनयिष्यसि ।

सा च क्षत्रं विशिष्टं वै तत एतत्कृतं मया ॥ ३८
व्यत्यासस्तु कृतो यस्मात्त्वया मात्रा तथैव च ।
तस्मात्सा ब्राह्मणश्रेष्ठं माता ते जनयिष्यति ॥ ३९
क्षत्रियं तूग्रकर्माणं त्वं भद्रे जनयिष्यसि ।
न हि ते तत्कृतं साधु मातृस्नेहेन भामिनि ॥ ४०
सा श्रुत्वा शोकसंतप्ता पपात वरवर्णिनी ।
भूमौ सत्यवती राजंश्छिन्नेव रुचिरा लता ॥ ४१
प्रतिलभ्य च सा संज्ञां शिरसा प्रणिपत्य च ।
उवाच भार्या भर्तारं गाधेयी ब्राह्मणर्षभम् ॥ ४२
प्रसादयन्त्यां भार्यायां मयि ब्रह्मविदां वर ।
प्रसादं कुरु विप्रर्षे न मे स्यात्क्षत्रियः सुतः ॥४३
कामं ममोग्रकर्मा वै पौत्रो भवितुमर्हति ।
न तु मे स्यात्सुतो ब्रह्मन्नेष मे दीयतां वरः ॥ ४४
एवमस्त्विति होवाच स्वां भार्यां सुमहातपाः ।
ततः सा जनयामास जमदग्निं सुतं शुभम् ॥ ४५
विश्वामित्रं चाजनयद्गाधेर्भार्या यशस्विनी ।
ऋषेः प्रभावाद्राजेन्द्र ब्रह्मर्षिं ब्रह्मवादिनम् ॥ ४६
ततो ब्राह्मणतां यातो विश्वामित्रो महातपाः ।
क्षत्रियः सोऽप्यथ तथा ब्रह्मवंशस्य कारकः ॥ ४७
तस्य पुत्रा महात्मानो ब्रह्मवंशविवर्धनाः ।
तपस्विनो ब्रह्मविदो गोत्रकर्तार एव च ॥ ४८
मधुच्छन्दश्च भगवान्देवरातश्च वीर्यवान् ।
अक्षीणश्च शकुन्तश्च बभ्रुः कालपथस्तथा ॥ ४९
याज्ञवल्क्यश्च विख्यातस्तथा स्थूणो महाव्रतः ।
उलूको यमदूतश्च तथर्षिः सैन्धवायनः ॥ ५०
कर्णजङ्घश्च भगवान्गालवश्च महानृषिः ।
ऋषिर्वज्रस्तथाख्यातः शालङ्कायन एव च ॥ ५१
लालाट्यो नारदश्चैव तथा कूर्चमुखः स्मृतः ।
वादुलिर्मुसलश्चैव रक्षोग्रीवस्तथैव च ॥ ५२
अङ्घ्रिको नैकभृच्चैव शिलायूपः सितः शुचिः ।
चक्रको मारुतन्तव्यो वातघ्नोऽथाश्वलायनः ॥ ५३
श्यामायनोऽथ गार्ग्यश्च जाबालिः सुश्रुतस्तथा ।
कारीषिरथ संश्रुत्यः परपौरवतन्तवः ॥ ५४
महानृषिश्च कपिलस्तथर्षिस्तारकायनः ।
तथैव चोपगहनस्तथर्षिश्चार्जुनायनः ॥ ५५
मार्गमित्रिर्हिरण्याक्षो जङ्घारिर्बभ्रुवाहनः ।
सूतिर्विभूतिः सूतश्च सुरङ्गश्च तथैव हि ॥ ५६
आराद्धिर्नामयश्चैव चाम्पेयोज्जयनौ तथा ।
नवतन्तुर्बकनखः शयोनरतिरेव च ॥ ५७
शयोरुहश्चारुमत्स्यः शिरीषी चाथ गार्दभिः ।
उज्जयोनिरदापेक्षी नारदी च महानृषिः ।
विश्वामित्रात्मजाः सर्वे मुनयो ब्रह्मवादिनः ॥ ५८
तन्नैष क्षत्रियो राजन्विश्वामित्रो महातपाः ।
ऋचीकेनाहितं ब्रह्म परमेतद्युधिष्ठिर ॥ ५९
एतत्ते सर्वमाख्यातं तत्त्वेन भरतर्षभ ।
विश्वामित्रस्य वै जन्म सोमसूर्याग्नितेजसः ॥ ६०
यत्र यत्र च संदेहो भूयस्ते राजसत्तम ।
तत्र तत्र च मां ब्रूहि च्छेत्तास्मि तव संशयान् ॥

इति श्रीमहाभारते अनुशासनपर्वणि
चतुर्थोऽध्यायः ॥ ४ ॥

५

युधिष्ठिर उवाच ।

आनृशंस्यस्य धर्मस्य गुणान्भक्तजनस्य च ।
श्रोतुमिच्छामि कार्त्स्न्येन तन्मे ब्रूहि पितामह ॥ १

भीष्म उवाच ।

विषये काशिराजस्य ग्रामान्निष्क्रम्य लुब्धकः ।
सविषं काण्डमादाय मृगयामास वै मृगम् ॥ २
तत्र चामिषलुब्धेन लुब्धकेन महावने ।
अविदूरे मृगं दृष्ट्वा बाणः प्रतिसमाहितः ॥ ३
तेन दुर्वारितास्त्रेण निमित्तचपलेषुणा ।

महान्वनतरुर्विद्धो मृगं तत्र जिघांसता ॥ ४
स तीक्ष्णविषदिग्धेन शरेणातिबलात्कृतः ।
उत्सृज्य फलपत्राणि पादपः शोषमागतः ॥ ५
तस्मिन्वृक्षे तथाभूते कोटरेषु चिरोषितः ।
न जहाति शुको वासं तस्य भक्त्या वनस्पतेः ॥ ६
निष्प्रचारो निराहारो ग्लानः शिथिलवागपि ।
कृतज्ञः सह वृक्षेण धर्मात्मा स व्यशुष्यत ॥ ७
तमुदारं महासत्त्वमतिमानुषचेष्टितम् ।
समदुःखसुखं ज्ञात्वा विस्मितः पाकशासनः ॥ ८
ततश्चिन्तामुपगतः शक्रः कथमयं द्विजः ।
तिर्यग्योनावसंभाव्यमानृशंस्यं समास्थितः ॥ ९
अथ वा नात्र चित्रं हीत्यभवद्वासवस्य तु ।
प्राणिनामिह सर्वेषां सर्वं सर्वत्र दृश्यते ॥ १०
ततो ब्राह्मणवेषेण मानुषं रूपमास्थितः ।
अवतीर्य महीं शक्रस्तं पक्षिणमुवाच ह ॥ ११
शुक भोः पक्षिणां श्रेष्ठ दाक्षेयी सुप्रजास्त्वया ।
पृच्छे त्वा शुष्कमेतं वै कस्मान्न त्यजसि द्रुमम् ॥
अथ पृष्टः शुकः प्राह मूर्ध्ना समभिवाद्य तम् ।
स्वागतं देवराजाय विज्ञातस्तपसा मया ॥ १३
ततो दशशताक्षेण साधु साध्विति भाषितम् ।
अहो विज्ञानमित्येवं तपसा पूजितस्ततः ॥ १४
तमेवं शुभकर्माणं शुकं परमधार्मिकम् ।
विजानन्नपि तां प्राप्तिं पप्रच्छ बलसूदनः ॥ १५
निष्पत्रमफलं शुष्कमशरण्यं पतत्रिणाम् ।
किमर्थं सेवसे वृक्षं यदा महदिदं वनम् ॥ १६
अन्येऽपि बहवो वृक्षाः पत्रसंछन्नकोटराः ।
शुभाः पर्याप्तसंचारा विद्यन्तेऽस्मिन्महावने ॥ १७
गतायुषमसामर्थ्यं क्षीणसारं हतश्रियम् ।
विमृश्य प्रज्ञया धीर जहीमं ह्यस्थिरं द्रुमम् ॥ १८
तदुपश्रुत्य धर्मात्मा शुकः शक्रेण भाषितम् ।
सुदीर्घमभिनिःश्वस्य दीनो वाक्यमुवाच ह ॥ १९
अनतिक्रमणीयानि दैवतानि शचीपते ।
यत्राभवस्तत्र भवस्तन्निबोध सुराधिप ॥ २०
अस्मिन्नहं द्रुमे जातः साधुभिश्च गुणैर्युतः ।
बालभावे च संगुप्तः शत्रुभिश्च न धर्षितः ॥ २१
किमनुक्रोशवैफल्यमुत्पादयसि मेऽनघ ।
आनृशंस्येऽनुरक्तस्य भक्तस्यानुगतस्य च ॥ २२
अनुक्रोशो हि साधूनां सुमहद्धर्मलक्षणम् ।
अनुक्रोशश्च साधूनां सदा प्रीतिं प्रयच्छति ॥ २३
त्वमेव दैवतैः सर्वैः पृच्छ्यसे धर्मसंशयान् ।
अतस्त्वं देव देवानामाधिपत्ये प्रतिष्ठितः ॥ २४
नार्हसि त्वं सहस्राक्ष त्याजयित्वेह भक्तितः ।
समर्थमुपजीव्येमं त्यजेयं कथमद्य वै ॥ २५
तस्य वाक्येन सौम्येन हर्षितः पाकशासनः ।
शुकं प्रोवाच धर्मज्ञमानृशंस्येन तोषितः ॥ २६
वरं वृणीष्वेति तदा स च वव्रे वरं शुकः ।
आनृशंस्यपरो नित्यं तस्य वृक्षस्य संभवम् ॥ २७
विदित्वा च दृढां शक्रस्तां शुके शीलसंपदम् ।
प्रीतः क्षिप्रमथो वृक्षममृतेनावसिक्तवान् ॥ २८
ततः फलानि पत्राणि शाखाश्चापि मनोरमाः ।
शुकस्य दृढभक्तित्वाच्छ्रीमत्त्वं चाप स द्रुमः ॥२९
शुकस्य कर्मणा तेन आनृशंस्यकृतेन ह ।
आयुषोऽन्ते महाराज प्राप शक्रसलोकताम् ॥ ३०
एवमेव मनुष्येन्द्र भक्तिमन्तं समाश्रितः ।
सर्वार्थसिद्धिं लभते शुकं प्राप्य यथा द्रुमः ॥ ३१

इति श्रीमहाभारते अनुशासनपर्वणि
पञ्चमोऽध्यायः ॥ ५ ॥

६

युधिष्ठिर उवाच ।

पितामह महाप्राज्ञ सर्वशास्त्रविशारद ।

दैवे पुरुषकारे च किंस्विच्छ्रेष्ठतरं भवेत् ।। १

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
वसिष्ठस्य च संवादं ब्रह्मणश्च युधिष्ठिर ।। २
दैवमानुषयोः किंस्वित्कर्मणोः श्रेष्ठमित्युत ।
पुरा वसिष्ठो भगवान्पितामहमपृच्छत ।। ३
ततः पद्मोद्भवो राजन्देवदेवः पितामहः ।
उवाच मधुरं वाक्यमर्थवद्धेतुभूषितम् ।। ४
नाबीजं जायते किंचिन्न बीजेन विना फलम् ।
बीजाद्बीजं प्रभवति बीजादेव फलं स्मृतम् ।। ५
यादृशं वपते बीजं क्षेत्रमासाद्य कर्षकः ।
सुकृते दुष्कृते वापि तादृशं लभते फलम् ।। ६
यथा बीजं विना क्षेत्रमुप्तं भवति निष्फलम् ।
तथा पुरुषकारेण विना दैवं न सिध्यति ।। ७
क्षेत्रं पुरुषकारस्तु दैवं बीजमुदाहृतम् ।
क्षेत्रबीजसमायोगात्ततः सस्यं समृध्यते ।। ८
कर्मणः फलनिर्वृत्तिं स्वयमश्नाति कारकः ।
प्रत्यक्षं दृश्यते लोके कृतस्याप्यकृतस्य च ।। ९
शुभेन कर्मणा सौख्यं दुःखं पापेन कर्मणा ।
कृतं सर्वत्र लभते नाकृतं भुज्यते क्वचित् ।। १०
कृती सर्वत्र लभते प्रतिष्ठां भाग्यविक्षतः ।
अकृती लभते भ्रष्टः क्षते क्षारावसेचनम् ।। ११
तपसा रूपसौभाग्यं रत्नानि विविधानि च ।
प्राप्यते कर्मणा सर्वं न दैवादकृतात्मना ।। १२
तथा स्वर्गश्च भोगश्च निष्ठा या च मनीषिता ।
सर्वं पुरुषकारेण कृतेनेहोपपद्यते ।। १३
ज्योतींषि त्रिदशा नागा यक्षाश्चन्द्रार्कमारुताः ।
सर्वे पुरुषकारेण मानुष्याद्देवतां गताः ।। १४
अर्थो वा मित्रवर्गो वा ऐश्वर्यं वा कुलान्वितम् ।
श्रीश्चापि दुर्लभा भोक्तुं तथैवाकृतकर्मभिः ।। १५
शौचेन लभते विप्रः क्षत्रियो विक्रमेण च ।
वैश्यः पुरुषकारेण शूद्रः शुश्रूषया श्रियम् ।। १६
नादातारं भजन्त्यर्था न क्लीबं नापि निष्क्रियम् ।
नाकर्मशीलं नाशूरं तथा नैवातपस्विनम् ।। १७
येन लोकास्त्रयः सृष्टा दैत्याः सर्वाश्च देवताः ।
स एष भगवान्विष्णुः समुद्रे तप्यते तपः ।। १८
स्वं चेत्कर्मफलं न स्यात्सर्वमेवाफलं भवेत् ।
लोको दैवं समालम्ब्य उदासीनो भवेन्न तु ।। १९
अकृत्वा मानुषं कर्म यो दैवमनुवर्तते ।
वृथा श्राम्यति संप्राप्य पतिं क्लीबमिवाङ्गना ।। २०
न तथा मानुषे लोके भयमस्ति शुभाशुभे ।
यथा त्रिदशलोके हि भयमल्पेन जायते ।। २१
कृतः पुरुषकारस्तु दैवमेवानुवर्तते ।
न दैवमकृते किंचित्कस्यचिद्दातुमर्हति ।। २२
यदा स्थानान्यनित्यानि दृश्यन्ते दैवतेष्वपि ।
कथं कर्म विना दैवं स्थास्यते स्थापयिष्यति ।। २३
न दैवतानि लोकेऽस्मिन्व्यापारं यान्ति कस्यचित् ।
व्यासङ्गं जनयन्त्युग्रमात्माभिभवशङ्कया ।। २४
ऋषीणां देवतानां च सदा भवति विग्रहः ।
कस्य वाचा ह्यदैवं स्याद्यतो दैवं प्रवर्तते ।। २५
कथं चास्य समुत्पत्तिर्यथा दैवं प्रवर्तते ।
एवं त्रिदशलोकेऽपि प्राप्यन्ते बहवश्छलाः ।। २६
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ।
आत्मैव चात्मनः साक्षी कृतस्याप्यकृतस्य च ।।२७
कृतं च विकृतं किंचित्कृते कर्मणि सिध्यति ।
सुकृते दुष्कृतं कर्म न यथार्थं प्रपद्यते ।। २८
देवानां शरणं पुण्यं सर्वं पुण्यैरवाप्यते ।
पुण्यशीलं नरं प्राप्य किं दैवं प्रकरिष्यति ।। २९
पुरा ययातिर्विभ्रष्टश्च्यावितः पतितः क्षितौ ।
पुनरारोपितः स्वर्गं दौहित्रैः पुण्यकर्मभिः ।। ३०

पुरूरवाश्च राजर्षिर्द्विजैरभिहितः पुरा ।
ऐल इत्यभिविख्यातः स्वर्गं प्राप्तो महीपतिः ॥ ३१
अश्वमेधादिभिर्यज्ञैः सत्कृतः कोसलाधिपः ।
महर्षिशापात्सौदासः पुरुषादत्वमागतः ॥ ३२
अश्वत्थामा च रामश्च मुनिपुत्रौ धनुर्धरौ ।
न गच्छतः स्वर्गलोकं सुकृतेनेह कर्मणा ॥ ३३
वसुर्यज्ञशतैरिष्ट्वा द्वितीय इव वासवः ।
मिथ्याभिधानेनैकेन रसातलतलं गतः ॥ ३४
बलिर्वैरोचनिर्बद्धो धर्मपाशेन दैवतैः ।
विष्णोः पुरुषकारेण पातालशयनः कृतः ॥ ३५
शक्रस्योदस्य चरणं प्रस्थितो जनमेजयः ।
द्विजस्त्रीणां वधं कृत्वा किं दैवेन न वारितः ॥ ३६
अज्ञानाद्ब्राह्मणं हत्वा स्पृष्टो बालवधेन च ।
वैशंपायनविप्रर्षिः किं दैवेन निवारितः ॥ ३७
गोप्रदानेन मिथ्या च ब्राह्मणेभ्यो महामखे ।
पुरा नृगश्च राजर्षिः कृकलासत्वमागतः ॥ ३८
धुन्धुमारश्च राजर्षिः सत्रेष्वेव जरां गतः ।
प्रीतिदायं परित्यज्य सुष्वाप स गिरिव्रजे ॥ ३९
पाण्डवानां हृतं राज्यं धार्तराष्ट्रैर्महाबलैः ।
पुनः प्रत्याहृतं चैव न दैवाद्भुजसंश्रयात् ॥ ४०
तपोनियमसंयुक्ता मुनयः संशितव्रताः ।
किं ते दैवबलाच्छापमुत्सृजन्ते न कर्मणा ॥ ४१
पापमुत्सृजते लोके सर्वं प्राप्य सुदुर्लभम् ।
लोभमोहसमापन्नं न दैवं त्रायते नरम् ॥ ४२
यथाग्निः पवनोद्धूतः सूक्ष्मोऽपि भवते महान् ।
तथा कर्मसमायुक्तं दैवं साधु विवर्धते ॥ ४३
यथा तैलक्षयाद्दीपः प्रम्लानिमुपगच्छति ।
तथा कर्मक्षयाद्दैवं प्रम्लानिमुपगच्छति ॥ ४४
विपुलमपि धनौघं प्राप्य भोगान्स्त्रियो वा
पुरुष इह न शक्तः कर्महीनोऽपि भोक्तुम् ।
सुनिहितमपि चार्थं दैवतै रक्ष्यमाणं
व्ययगुणमपि साधुं कर्मणा संश्रयन्ते ॥ ४५
भवति मनुजलोकाद्देवलोको विशिष्टो
बहुतरसुसमृद्ध्या मानुषाणां गृहाणि ।
पितृवनभवनाभं दृश्यते चामराणां
न च फलति विकर्मा जीवलोकेन दैवम् ॥
व्यपनयति विमार्गं नास्ति दैवे प्रभुत्वं
गुरुमिव कृतमग्र्यं कर्म संयाति दैवम् ।
अनुपहतमदीनं कामकारेण दैवं
नयति पुरुषकारः संचितस्तत्र तत्र ॥ ४७
एतत्ते सर्वमाख्यातं मया वै मुनिसत्तम ।
फलं पुरुषकारस्य सदा संदृश्य तत्त्वतः ॥ ४८
अभ्युत्थानेन दैवस्य समारब्धेन कर्मणा ।
विधिना कर्मणा चैव स्वर्गमार्गमवाप्नुयात् ॥ ४९

इति श्रीमहाभारते अनुशासनपर्वणि
षष्ठोऽध्यायः ॥ ६ ॥

७

युधिष्ठिर उवाच ।

कर्मणां मे समस्तानां शुभानां भरतर्षभ ।
फलानि महतां श्रेष्ठ प्रब्रूहि परिपृच्छतः ॥ १

भीष्म उवाच ।

रहस्यं यदृषीणां तु तच्छृणुष्व युधिष्ठिर ।
या गतिः प्राप्यते येन प्रेत्यभावे चिरेप्सिता ॥ २
येन येन शरीरेण यद्यत्कर्म करोति यः ।
तेन तेन शरीरेण तत्तत्फलमुपाश्नुते ॥ ३
यस्यां यस्यामवस्थायां यत्करोति शुभाशुभम् ।
तस्यां तस्यामवस्थायां भुङ्क्ते जन्मनि जन्मनि ॥ ४
न नश्यति कृतं कर्म सदा पञ्चेन्द्रियैरिह ।
ते ह्यस्य साक्षिणो नित्यं षष्ठ आत्मा तथैव च ॥५
चक्षुर्दद्यान्मनो दद्याद्वाचं दद्याच्च सूनृताम् ।

अनुव्रजेदुपासीत स यज्ञः पञ्चदक्षिणः ॥ ६
यो दद्यादपरिक्लिष्टमन्नमध्वनि वर्तते ।
श्रान्तायादृष्टपूर्वाय तस्य पुण्यफलं महत् ॥ ७
स्थण्डिले शयमानानां गृहाणि शयनानि च ।
चीरवल्कलसंवीते वासांस्याभरणानि च ॥ ८
वाहनासनयानानि योगात्मनि तपोधने ।
अग्नीनुपशयानस्य राजपौरुषमुच्यते ॥ ९
रसानां प्रतिसंहारे सौभाग्यमनुगच्छति ।
आमिषप्रतिसंहारे पशून्पुत्रांश्च विन्दति ॥ १०
अवाक्शिरास्तु यो लम्बेदुदवासं च यो वसेत् ।
सततं चैकशायी यः स लभेतेप्सितां गतिम् ॥ ११
पाद्यमासनमेवाथ दीपमन्नं प्रतिश्रयम् ।
दद्यादतिथिपूजार्थं स यज्ञः पञ्चदक्षिणः ॥ १२
वीरासनं वीरशय्यां वीरस्थानमुपासतः ।
अक्षयास्तस्य वै लोकाः सर्वकामगमास्तथा ॥ १३
धनं लभेत दानेन मौनेनाज्ञां विशां पते ।
उपभोगांश्च तपसा ब्रह्मचर्येण जीवितम् ॥ १४
रूपमैश्वर्यमारोग्यमहिंसाफलमश्नुते ।
फलमूलाशिनां राज्यं स्वर्गः पर्णाशिनां तथा ॥१५
प्रायोपवेशनाद्राज्यं सर्वत्र सुखमुच्यते ।
स्वर्गं सत्येन लभते दीक्षया कुलमुत्तमम् ॥ १६
गवाढ्यः शाकदीक्षायां स्वर्गगामी तृणाशनः ।
स्त्रियस्त्रिषवणं स्नात्वा वायुं पीत्वा क्रतुं लभेत् ॥
सलिलाशी भवेद्यश्च सदाग्निः संस्कृतो द्विजः ।
मरुं साधयतो राज्यं नाकपृष्ठमनाशके ॥ १८
उपवासं च दीक्षां च अभिषेकं च पार्थिव ।
कृत्वा द्वादशवर्षाणि वीरस्थानाद्विशिष्यते ॥ १९
अधीत्य सर्ववेदान्वै सद्यो दुःखात्प्रमुच्यते ।
मानसं हि चरन्धर्मं स्वर्गलोकमवाप्नुयात् ॥ २०
या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्यतः ।
योऽसौ प्राणान्तिको रोगस्तां तृष्णां त्यजतः सुखम् ॥
यथा धेनुसहस्रेषु वत्सो विन्दति मातरम् ।
एवं पूर्वकृतं कर्म कर्तारमनुगच्छति ॥ २२
अचोद्यमानानि यथा पुष्पाणि च फलानि च ।
स्वकालं नातिवर्तन्ते तथा कर्म पुराकृतम् ॥ २३
जीर्यन्ति जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः ।
चक्षुःश्रोत्रे च जीर्येते तृष्णैका तु न जीर्यते ॥ २४
येन प्रीणाति पितरं तेन प्रीतः प्रजापतिः ।
प्रीणाति मातरं येन पृथिवी तेन पूजिता ।
येन प्रीणात्युपाध्यायं तेन स्याद्ब्रह्म पूजितम् ॥ २५
सर्वे तस्यादृता धर्मा यस्यैते त्रय आदृताः ।
अनादृतास्तु यस्यैते सर्वास्तस्याफलाः क्रियाः ॥२६

वैशंपायन उवाच ।

भीष्मस्य तद्वचः श्रुत्वा विस्मिताः कुरुपुंगवाः ।
आसन्प्रहृष्टमनसः प्रीतिमन्तोऽभवंस्तदा ॥ २७
यन्मन्त्रे भवति वृथा प्रयुज्यमाने
यत्सोमे भवति वृथाभिषूयमाणे ।
यच्चाग्नौ भवति वृथाभिहूयमाने
तत्सर्वं भवति वृथाभिधीयमाने ॥ २८
इत्येतदृषिणा प्रोक्तमुक्तवानस्मि यद्विभो ।
शुभाशुभफलप्राप्तौ किमतः श्रोतुमिच्छसि ॥ २९

इति श्रीमहाभारते अनुशासनपर्वणि
सप्तमोऽध्यायः ॥ ७ ॥

८

युधिष्ठिर उवाच ।

के पूज्याः के नमस्कार्याः कान्नमस्यसि भारत ।
एतन्मे सर्वमाचक्ष्व येषां स्पृहयसे नृप ॥ १
उत्तमापद्गतस्यापि यत्र ते वर्तते मनः ।
मनुष्यलोके सर्वस्मिन्यदमुत्रेह चाप्युत ॥ २

भीष्म उवाच ।

स्पृहयामि द्विजातीनां येषां ब्रह्म परं धनम् ।
येषां स्वप्रत्ययः स्वर्गस्तपःस्वाध्यायसाधनः ।। ३
येषां वृद्धाश्च बालाश्च पितृपैतामहीं धुरम् ।
उद्वहन्ति न सीदन्ति तेषां वै स्पृहयाम्यहम् ।। ४
विद्यास्वभिविनीतानां दान्तानां मृदुभाषिणाम् ।
श्रुतवृत्तोपपन्नानां सदाक्षरविदां सताम् ।। ५
संसत्सु वदतां येषां हंसानामिव संघशः ।
मङ्गल्यरूपा रुचिरा दिव्यजीमूतनिःस्वनाः ।। ६
सम्यगुच्चारिता वाचः श्रूयन्ते हि युधिष्ठिर ।
शुश्रूषमाणे नृपतौ प्रेत्य चेह सुखावहाः ।। ७
ये चापि तेषां श्रोतारः सदा सदसि संमताः ।
विज्ञानगुणसंपन्नास्तेषां च स्पृहयाम्यहम् ।। ८
सुसंस्कृतानि प्रयताः शुचीनि गुणवन्ति च ।
ददत्यन्नानि तृप्त्यर्थं ब्राह्मणेभ्यो युधिष्ठिर ।
ये चापि सततं राजंस्तेषां च स्पृहयाम्यहम् ।। ९
शक्यं ह्येवाहवे योद्धुं न दातुमनसूयितम् ।
शूरा वीराश्च शतशः सन्ति लोके युधिष्ठिर ।
तेषां संख्यायमानानां दानशूरो विशिष्यते ।। १०
धन्यः स्यां यद्यहं भूयः सौम्य ब्राह्मणकोऽपि वा ।
कुले जातो धर्मगतिस्तपोविद्यापरायणः ।। ११
न मे त्वत्तः प्रियतरो लोकेऽस्मिन्पाण्डुनन्दन ।
त्वत्तश्च मे प्रियतरा ब्राह्मणा भरतर्षभ ।। १२
यथा मम प्रियतरास्त्वत्तो विप्राः कुरूद्वह ।
तेन सत्येन गच्छेयं लोकान्यत्र स शंतनुः ।। १३
न मे पिता प्रियतरो ब्राह्मणेभ्यस्तथाभवत् ।
न मे पितुः पिता वापि ये चान्येऽपि सुहृज्जनाः ।।
न हि मे वृजिनं किंचिद्विद्यते ब्राह्मणेष्विह ।
अणु वा यदि वा स्थूलं विदितं साधुकर्मभिः ।।१५
कर्मणा मनसा वापि वाचा वापि परंतप ।
यन्मे कृतं ब्राह्मणेषु तेनाद्य न तपाम्यहम् ।। १६
ब्रह्मण्य इति मामाहुस्तया वाचास्मि तोषितः ।
एतदेव पवित्रेभ्यः सर्वेभ्यः परमं स्मृतम् ।। १७
पश्यामि लोकानमलाञ्छुचीन्ब्राह्मणयायिनः ।
तेषु मे तात गन्तव्यमह्नाय च चिराय च ।। १८
यथा पत्याश्रयो धर्मः स्त्रीणां लोके युधिष्ठिर ।
स देवः सा गतिर्नान्या क्षत्रियस्य तथा द्विजाः ।।
क्षत्रियः शतवर्षी च दशवर्षी च ब्राह्मणः ।
पितापुत्रौ च विज्ञेयौ तयोर्हि ब्राह्मणः पिता ।।२०
नारी तु पत्यभावे वै देवरं कुरुते पतिम् ।
पृथिवी ब्राह्मणालाभे क्षत्रियं कुरुते पतिम् ।। २१
पुत्रवच्च ततो रक्ष्या उपास्या गुरुवच्च ते ।
अग्निवच्चोपचर्या वै ब्राह्मणाः कुरुसत्तम ।। २२
ऋजून्सतः सत्यशीलान्सर्वभूतहिते रतान् ।
आशीविषानिव क्रुद्धान्द्विजानुपचरेत्सदा ।। २३
तेजसस्तपसश्चैव नित्यं बिभ्येद्युधिष्ठिर ।
उभे चैते परित्याज्ये तेजश्चैव तपस्तथा ।। २४
व्यवसायस्तयोः शीघ्रमुभयोरेव विद्यते ।
हन्युः क्रुद्धा महाराज ब्राह्मणा ये तपस्विनः ।।२५
भूयः स्यादुभयं दत्तं ब्राह्मणाद्यदकोपनात् ।
कुर्यादुभयतःशेषं दत्तशेषं न शेषयेत् ।। २६
दण्डपाणिर्यथा गोषु पालो नित्यं स्थिरो भवेत् ।
ब्राह्मणान्ब्रह्म च तथा क्षत्रियः परिपालयेत् ।। २७
पितेव पुत्रान्रक्षेथा ब्राह्मणान्ब्रह्मतेजसः ।
गृहे चैषामवेक्षेथाः कच्चिदस्तीह जीवनम् ।। २८

इति श्रीमहाभारते अनुशासनपर्वणि
अष्टमोऽध्यायः ॥ ८ ॥

९

युधिष्ठिर उवाच ।

ब्राह्मणानां तु यो लोके प्रतिश्रुत्य पितामह ।

न प्रयच्छन्ति मोहात्ते के भवन्ति महामते ॥ १
एतन्मे तत्त्वतो ब्रूहि धर्मं धर्मभृतां वर ।
प्रतिश्रुत्य दुरात्मानो न प्रयच्छन्ति ये नराः ॥ २

भीष्म उवाच ।

यो न दद्यात्प्रतिश्रुत्य स्वल्पं वा यदि वा बहु ।
आशास्तस्य हताः सर्वाः क्लीबस्येव प्रजाफलम् ॥ ३
यां रात्रिं जायते पापो यां च रात्रिं विनश्यति ।
एतस्मिन्नन्तरे यद्यत्सुकृतं तस्य भारत ।
यच्च तस्य हुतं किंचित्सर्वं तस्योपहन्यते ॥ ४
अत्रैतद्वचनं प्राहुर्धर्मशास्त्रविदो जनाः ।
निशम्य भरतश्रेष्ठ बुद्ध्या परमयुक्तया ॥ ५
अपि चोदाहरन्तीमं धर्मशास्त्रविदो जनाः ।
अश्वानां श्यामकर्णानां सहस्रेण स मुच्यते ॥ ६
अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
सृगालस्य च संवादं वानरस्य च भारत ॥ ७
तौ सखायौ पुरा ह्यास्तां मानुषत्वे परंतप ।
अन्यां योनिं समापन्नौ सार्गालीं वानरीं तथा ॥८
ततः परासून्खादन्तं सृगालं वानरोऽब्रवीत् ।
श्मशानमध्ये संप्रेक्ष्य पूर्वजातिमनुस्मरन् ॥ ९
किं त्वया पापकं कर्म कृतं पूर्वं सुदारुणम् ।
यस्त्वं श्मशाने मृतकान्पूतिकानत्सि कुत्सितान् ॥
एवमुक्तः प्रत्युवाच सृगालो वानरं तदा ।
ब्राह्मणस्य प्रतिश्रुत्य न मया तदुपाकृतम् ॥ ११
तत्कृते पापिकां योनिमापन्नोऽस्मि प्लवंगम ।
तस्मादेवंविधं भक्ष्यं भक्षयामि बुभुक्षितः ॥ १२
इत्येतद्ब्रुवतो राजन्ब्राह्मणस्य मया श्रुतम् ।
कथां कथयतः पुण्यां धर्मज्ञस्य पुरातनीम् ॥ १३
श्रुतं चापि मया भूयः कृष्णस्यापि विशां पते ।
कथां कथयतः पूर्वं ब्राह्मणं प्रति पाण्डव ॥ १४
एवमेव च मां नित्यं ब्राह्मणाः संदिशन्ति वै ।
प्रतिश्रुत्य भवेद्देयं नाशा कार्या हि ब्राह्मणैः ॥ १५
ब्राह्मणो ह्याशया पूर्वं कृतया पृथिवीपते ।
सुसमिद्धो यथा दीप्तः पावकस्तद्विधः स्मृतः ॥ १६
यं निरीक्षेत संक्रुद्ध आशया पूर्वजातया ।
प्रदहेत हि तं राजन्कक्षमक्षय्यभुग्यथा ॥ १७
स एव हि यदा तुष्टो वचसा प्रतिनन्दति ।
भवत्यगदसंकाशो विषये तस्य भारत ॥ १८
पुत्रान्पौत्रान्पशूंश्चैव बान्धवान्सचिवांस्तथा ।
पुरं जनपदं चैव शान्तिरिष्टेव पुष्यति ॥ १९
एतद्धि परमं तेजो ब्राह्मणस्येह दृश्यते ।
सहस्रकिरणस्येव सवितुर्धरणीतले ॥ २०
तस्माद्दातव्यमेवेह प्रतिश्रुत्य युधिष्ठिर ।
यदीच्छेच्छोभनां जातिं प्राप्तुं भरतसत्तम ॥ २१
ब्राह्मणस्य हि दत्तेन ध्रुवं स्वर्गो ह्यनुत्तमः ।
शक्यं प्राप्तुं विशेषेण दानं हि महती क्रिया ॥२२
इतो दत्तेन जीवन्ति देवताः पितरस्तथा ।
तस्माद्दानानि देयानि ब्राह्मणेभ्यो विजानता ॥ २३
महद्धि भरतश्रेष्ठ ब्राह्मणस्तीर्थमुच्यते ।
वेलायां न तु कस्यांचिद्गच्छेद्विप्रो ह्यपूजितः ॥ २४

इति श्रीमहाभारते अनुशासनपर्वणि
नवमोऽध्यायः ॥ ९ ॥

१०

युधिष्ठिर उवाच ।

मित्रसौहृदभावेन उपदेशं करोति यः ।
जात्यावरस्य राजर्षे दोषस्तस्य भवेन्न वा ॥ १
एतदिच्छामि तत्त्वेन व्याख्यातुं वै पितामह ।
सूक्ष्मा गतिर्हि धर्मस्य यत्र मुह्यन्ति मानवाः ॥ २

भीष्म उवाच ।

अत्र ते वर्तयिष्यामि शृणु राजन्यथागमम् ।
ऋषीणां वदतां पूर्वं श्रुतमासीद्यथा मया ॥ ३

उपदेशो न कर्तव्यो जातिहीनस्य कस्यचित् ।
उपदेशे महान्दोष उपाध्यायस्य भाष्यते ॥ ४
निदर्शनमिदं राजञ्शृणु मे भरतर्षभ ।
दुरुक्तवचने राजन्यथा पूर्वं युधिष्ठिर ।
ब्रह्माश्रमपदे वृत्तं पार्श्वे हिमवतः शुभे ॥ ५
तत्राश्रमपदं पुण्यं नानावृक्षगणायुतम् ।
बहुगुल्मलताकीर्णं मृगद्विजनिषेवितम् ॥ ६
सिद्धचारणसंघुष्टं रम्यं पुष्पितकाननम् ।
व्रतिभिर्बहुभिः कीर्णं तापसैरुपशोभितम् ॥ ७
ब्राह्मणैश्च महाभागैः सूर्यज्वलनसंनिभैः ।
नियमव्रतसंपन्नैः समाकीर्णं तपस्विभिः ।
दीक्षितैर्भरतश्रेष्ठ यताहारैः कृतात्मभिः ॥ ८
वेदाध्ययनघोषैश्च नादितं भरतर्षभ ।
वालखिल्यैश्च बहुभिर्यतिभिश्च निषेवितम् ॥ ९
तत्र कश्चित्समुत्साहं कृत्वा शूद्रो दयान्वितः ।
आगतो ह्याश्रमपदं पूजितश्च तपस्विभिः ॥ १०
तांस्तु दृष्ट्वा मुनिगणान्देवकल्पान्महौजसः ।
वहतो विविधा दीक्षाः संप्रहृष्यत भारत ॥ ११
अथास्य बुद्धिरभवत्तपस्ये भरतर्षभ ।
ततोऽब्रवीत्कुलपतिं पादौ संगृह्य भारत ॥ १२
भवत्प्रसादादिच्छामि धर्मं चर्तुं द्विजर्षभ ।
तन्मां त्वं भगवन्वक्तुं प्रव्राजयितुमर्हसि ॥ १३
वर्णावरोऽहं भगवञ्शूद्रो जात्यास्मि सत्तम ।
शुश्रूषां कर्तुमिच्छामि प्रपन्नाय प्रसीद मे ॥ १४

कुलपतिरुवाच ।

न शक्यमिह शूद्रेण लिङ्गमाश्रित्य वर्तितुम् ।
आस्यतां यदि ते बुद्धिः शुश्रूषानिरतो भव ॥ १५

भीष्म उवाच ।

एवमुक्तस्तु मुनिना स शूद्रोऽचिन्तयन्नृप ।
कथमत्र मया कार्यं श्रद्धा धर्मे परा च मे ।
विज्ञातमेवं भवतु करिष्ये प्रियमात्मनः ॥ १६
गत्वाश्रमपदाद्दूरमुटजं कृतवांस्तु सः ।
तत्र वेदिं च भूमिं च देवतायतनानि च ।
निवेश्य भरतश्रेष्ठ नियमस्थोऽभवत्सुखम् ॥ १७
अभिषेकांश्च नियमान्देवतायतनेषु च ।
बलिं च कृत्वा हुत्वा च देवतां चाप्यपूजयत् ॥ १८
संकल्पनियमोपेतः फलाहारो जितेन्द्रियः ।
नित्यं संनिहिताभिश्च ओषधीभिः फलैस्तथा ॥ १९
अतिथीन्पूजयामास यथावत्समुपागतान् ।
एवं हि सुमहान्कालो व्यत्यक्रामत्स तस्य वै ॥ २०
अथास्य मुनिरागच्छत्संगत्या वै तमाश्रमम् ।
संपूज्य स्वागतेनर्षिं विधिवत्पर्यतोषयत् ॥ २१
अनुकूलाः कथाः कृत्वा यथावत्पर्यपृच्छत ।
ऋषिः परमतेजस्वी धर्मात्मा संयतेन्द्रियः ॥ २२
एवं स बहुशस्तस्य शूद्रस्य भरतर्षभ ।
सोऽगच्छदाश्रममृषिः शूद्रं द्रष्टुं नरर्षभ ॥ २३
अथ तं तापसं शूद्रः सोऽब्रवीद्भरतर्षभ ।
पितृकार्यं करिष्यामि तत्र मेऽनुग्रहं कुरु ॥ २४
बाढमित्येव तं विप्र उवाच भरतर्षभ ।
शुचिर्भूत्वा स शूद्रस्तु तस्यर्षेः पाद्यमानयत् ॥ २५
अथ दर्भांश्च वन्याश्च ओषधीर्भरतर्षभ ।
पवित्रमासनं चैव बृसीं च समुपानयत् ॥ २६
अथ दक्षिणमावृत्य बृसीं परमशीर्षिकाम् ।
कृतामन्यायतो दृष्ट्वा ततस्तमृषिरब्रवीत् ॥ २७
कुरुष्वैतां पूर्वशीर्षां भव चोदङ्मुखः शुचिः ।
स च तत्कृतवाञ्शूद्रः सर्वं यदृषिरब्रवीत् ॥ २८
यथोपदिष्टं मेधावी दर्भादींस्तान्यथातथम् ।
हव्यकव्यविधिं कृत्स्नमुक्तं तेन तपस्विना ॥ २९
ऋषिणा पितृकार्ये च स च धर्मपथे स्थितः ।
पितृकार्ये कृते चापि विसृष्टः स जगाम ह ॥ ३०

अथ दीर्घस्य कालस्य स तप्यञ्शूद्रतापसः ।
वने पञ्चत्वमगमत्सुकृतेन च तेन वै ।
अजायत महाराज राजवंशे महाद्युतिः ॥ ३१
तथैव स ऋषिस्तात कालधर्ममवाप्य ह ।
पुरोहितकुले विप्र आजातो भरतर्षभ ॥ ३२
एवं तौ तत्र संभूतावुभौ शूद्रमुनी तदा ।
क्रमेण वर्धितौ चापि विद्यासु कुशलावुभौ ॥ ३३
अथर्ववेदे वेदे च बभूवर्षिः सुनिश्चितः ।
कल्पप्रयोगे चोत्पन्ने ज्योतिषे च परं गतः ।
सख्ये चापि परा प्रीतिस्तयोश्चापि व्यवर्धत ॥३४
पितर्युपरते चापि कृतशौचः स भारत ।
अभिषिक्तः प्रकृतिभी राजपुत्रः स पार्थिव ।
अभिषिक्तेन स ऋषिरभिषिक्तः पुरोहितः ॥ ३५
स तं पुरोधाय सुखमवसद्भरतर्षभ ।
राज्यं शशास धर्मेण प्रजाश्च परिपालयन् ॥ ३६
पुण्याहवाचने नित्यं धर्मकार्येषु चासकृत् ।
उत्स्मयन्प्राहसच्चापि दृष्ट्वा राजा पुरोहितम् ।
एवं स बहुशो राजन्पुरोधसमुपाहसत् ॥ ३७
लक्षयित्वा पुरोधास्तु बहुशस्तं नराधिपम् ।
उत्स्मयन्तं च सततं दृष्ट्वासौ मन्युमानभूत् ॥ ३८
अथ शून्ये पुरोधास्तु सह राज्ञा समागतः ।
कथाभिरनुकूलाभी राजानमभिरामयत् ॥ ३९
ततोऽब्रवीन्नरेन्द्रं स पुरोधा भरतर्षभ ।
वरमिच्छाम्यहं त्वेकं त्वया दत्तं महाद्युते ॥ ४०

राजोवाच ।

वराणां ते शतं दद्यां किमुतैकं द्विजोत्तम ।
स्नेहाच्च बहुमानाच्च नास्त्यदेयं हि मे तव ॥ ४१

पुरोहित उवाच ।

एकं वै वरमिच्छामि यदि तुष्टोऽसि पार्थिव ।
यद्ददासि महाराज सत्यं तद्वद मानृतम् ॥ ४२

भीष्म उवाच ।

बाढमित्येव तं राजा प्रत्युवाच युधिष्ठिर ।
यदि ज्ञास्यामि वक्ष्यामि अजानन्न तु संवदे ॥४३

पुरोहित उवाच ।

पुण्याहवाचने नित्यं धर्मकृत्येषु चासकृत् ।
शान्तिहोमेषु च सदा किं त्वं हससि वीक्ष्य माम् ॥
सव्रीडं वै भवति हि मनो मे हसता त्वया ।
कामया शापितो राजन्नान्यथा वक्तुमर्हसि ॥ ४५
भाव्यं हि कारणेनात्र न ते हास्यमकारणम् ।
कौतूहलं मे सुभृशं तत्त्वेन कथयस्व मे ॥ ४६

राजोवाच ।

एवमुक्ते त्वया विप्र यदवाच्यं भवेदपि ।
अवश्यमेव वक्तव्यं शृणुष्वैकमना द्विज ॥ ४७
पूर्वदेहे यथा वृत्तं तन्निबोध द्विजोत्तम ।
जातिं स्मराम्यहं ब्रह्मन्नवधानेन मे शृणु ॥ ४८
शूद्रोऽहमभवं पूर्वं तापसो भृशसंयुतः ।
ऋषिरुग्रतपास्त्वं च तदाभूर्द्विजसत्तम ॥ ४९
प्रीयता हि तदा ब्रह्मन्ममानुग्रहबुद्धिना ।
पितृकार्ये त्वया पूर्वमुपदेशः कृतोऽनघ ।
बृस्यां दर्भेषु हव्ये च कव्ये च मुनिसत्तम ॥ ५०
एतेन कर्मदोषेण पुरोधास्त्वमजायथाः ।
अहं राजा च विप्रेन्द्र पश्य कालस्य पर्ययम् ।
मत्कृते ह्युपदेशेन त्वया प्राप्तमिदं फलम् ॥ ५१
एतस्मात्कारणाद्ब्रह्मन्प्रहसे त्वां द्विजोत्तम ।
न त्वां परिभवन्ब्रह्मन्प्रहसामि गुरुर्भवान् ॥ ५२
विपर्ययेण मे मन्युस्तेन संतप्यते मनः ।
जातिं स्मराम्यहं तुभ्यमतस्त्वां प्रहसामि वै ॥ ५३
एवं तवोग्रं हि तप उपदेशेन नाशितम् ।
पुरोहितत्वमुत्सृज्य यतस्व त्वं पुनर्भवे ॥ ५४

इतस्त्वमधमामन्यां मा योनिं प्राप्स्यसे द्विज ।
गृह्यतां द्रविणं विप्र पूतात्मा भव सत्तम ॥ ५५

भीष्म उवाच ।

ततो विसृष्टो राज्ञा तु विप्रो दानान्यनेकशः ।
ब्राह्मणेभ्यो ददौ वित्तं भूमिं ग्रामांश्च सर्वशः ॥५६
कृच्छ्राणि चीर्त्वा च ततो यथोक्तानि द्विजोत्तमः ।
तीर्थानि चाभिगत्वा वै दानानि विविधानि च ॥५७
दत्त्वा गाश्चैव विप्राणां पूतात्मा सोऽभवद्द्विजः ।
तमेव चाश्रमं गत्वा चचार विपुलं तपः ॥ ५८
ततः सिद्धिं परां प्राप्तो ब्राह्मणो राजसत्तम ।
संमतश्चाभवत्तेषामाश्रमेऽऽश्रमवासिनाम् ॥ ५९
एवं प्राप्तो महत्कृच्छ्रमृषिः स नृपसत्तम ।
ब्राह्मणेन न वक्तव्यं तस्माद्वर्णावरे जने ॥ ६०
वर्जयेदुपदेशं च सदैव ब्राह्मणो नृप ।
उपदेशं हि कुर्वाणो द्विजः कृच्छ्रमवाप्नुयात् ॥ ६१
एषितव्यं सदा वाचा नृपेण द्विजसत्तमात् ।
न प्रवक्तव्यमिह हि किंचिद्वर्णावरे जने ॥ ६२
ब्राह्मणाः क्षत्रिया वैश्यास्त्रयो वर्णा द्विजातयः ।
एतेषु कथयन्राजन्ब्राह्मणो न प्रदुष्यति ॥ ६३
तस्मात्सद्भिर्न वक्तव्यं कस्यचित्किंचिदग्रतः ।
सूक्ष्मा गतिर्हि धर्मस्य दुर्ज्ञेया ह्यकृतात्मभिः ॥ ६४
तस्मान्मौनानि मुनयो दीक्षां कुर्वन्ति चादृताः ।
दुरुक्तस्य भयाद्राजन्नानुभाषन्ति किंचन ॥ ६५
धार्मिका गुणसंपन्नाः सत्यार्जवपरायणाः ।
दुरुक्तवाचाभिहताः प्राप्नुवन्तीह दुष्कृतम् ॥ ६६
उपदेशो न कर्तव्यः कदाचिदपि कस्यचित् ।
उपदेशाद्धि तत्पापं ब्राह्मणः समवाप्नुयात् ॥ ६७
विमृश्य तस्मात्प्राज्ञेन वक्तव्यं धर्ममिच्छता ।
सत्यानृतेन हि कृत उपदेशो हिनस्ति वै ॥ ६८
वक्तव्यमिह पृष्टेन विनिश्चित्य विपर्ययम् ।
स चोपदेशः कर्तव्यो येन धर्ममवाप्नुयात् ॥ ६९
एतत्ते सर्वमाख्यातमुपदेशे कृते सति ।
महान्क्लेशो हि भवति तस्मान्नोपदिशेत्कचित् ॥ ७०

इति श्रीमहाभारते अनुशासनपर्वणि
दशमोऽध्यायः ॥ १० ॥

११

युधिष्ठिर उवाच ।

कीदृशे पुरुषे तात स्त्रीषु वा भरतर्षभ ।
श्रीः पद्मा वसते नित्यं तन्मे ब्रूहि पितामह ॥ १

भीष्म उवाच

अत्र ते वर्तयिष्यामि यथादृष्टं यथाश्रुतम् ।
रुक्मिणी देवकीपुत्रसंनिधौ पर्यपृच्छत ॥ २
नारायणस्याङ्कगतां ज्वलन्तीं
दृष्ट्वा श्रियं पद्मसमानवक्त्राम् ।
कौतूहलाद्विस्मितचारुनेत्रा
पप्रच्छ माता मकरध्वजस्य ॥ ३
कानीह भूतान्युपसेवसे त्वं
संतिष्ठती कानि न सेवसे त्वम् ।
तानि त्रिलोकेश्वरभूतकान्ते
तत्त्वेन मे ब्रूहि महर्षिकन्ये ॥ ४
एवं तदा श्रीरभिभाष्यमाणा
देव्या समक्षं गरुडध्वजस्य ।
उवाच वाक्यं मधुराभिधानं
मनोहरं चन्द्रमुखी प्रसन्ना ॥ ५
वसामि सत्ये सुभगे प्रगल्भे
दक्षे नरे कर्मणि वर्तमाने ।
नाकर्मशीले पुरुषे वसामि
न नास्तिके सांकरिके कृतघ्ने ।
न भिन्नवृत्ते न नृशंसवृत्ते

न चापि चौरे न गुरुष्वसूये ॥ ६
ये चाल्पतेजोबलसत्त्वसारा
ह्रुष्यन्ति कुप्यन्ति च यत्र तत्र ।
न देवि तिष्ठामि तथाविधेषु
नरेषु संसुप्तमनोरथेषु ॥ ७
यश्चात्मनि प्रार्थयते न किंचि-
द्यश्च स्वभावोपहतान्तरात्मा ।
तेष्वल्पसंतोषरतेषु नित्यं
नरेषु नाहं निवसामि देवि ॥ ८
वसामि धर्मशीलेषु धर्मज्ञेषु महात्मसु ।
वृद्धसेविषु दान्तेषु सत्त्वज्ञेषु महात्मसु ॥ ९
स्त्रीषु क्षान्तासु दान्तासु देवद्विजपरासु च ।
वसामि सत्यशीलासु स्वभावनिरतासु च ॥ १०
प्रकीर्णभाण्डामनवेक्ष्यकारिणीं
सदा च भर्तुः प्रतिकूलवादिनीम् ।
परस्य वेश्माभिरतामलज्जा-
मेवंविधां स्त्रीं परिवर्जयामि ॥ ११
लोलामचोक्षामवलेहिनीं च
व्यपेतधैर्यां कलहप्रियां च ।
निद्राभिभूतां सततं शयाना-
मेवंविधां स्त्रीं परिवर्जयामि ॥ १२
सत्यासु नित्यं प्रियदर्शनासु
सौभाग्ययुक्तासु गुणान्वितासु ।
वसामि नारीषु पतिव्रतासु
कल्याणशीलासु विभूषितासु ॥ १३
यानेषु कन्यासु विभूषणेषु
यज्ञेषु मेघेषु च वृष्टिमत्सु ।
वसामि फुल्लासु च पद्मिनीषु
नक्षत्रवीथीषु च शारदीषु ॥ १४
शैलेषु गोष्ठेषु तथा वनेषु
सरःसु फुल्लोत्पलपङ्कजेषु ।
नदीषु हंसस्वननादितासु
क्रौञ्चावघुष्टस्वरशोभितासु ॥ १५
विस्तीर्णकूलह्रदशोभितासु
तपस्विसिद्धद्विजसेवितासु ।
वसामि नित्यं सुबहूदकासु
सिंहैर्गजैश्चाकुलितोदकासु ।
मत्ते गजे गोवृषभे नरेन्द्रे
सिंहासने सत्पुरुषे च नित्यम् ॥ १६
यस्मिन्गृहे हूयते हव्यवाहो
गोब्राह्मणश्चार्च्यते देवताश्च ।
काले च पुष्पैर्बलयः क्रियन्ते
तस्मिन्गृहे नित्यमुपैमि वासम् ॥ १७
स्वाध्यायनित्येषु द्विजेषु नित्यं
क्षत्रे च धर्माभिरते सदैव ।
वैश्ये च कृष्याभिरते वसामि
शूद्रे च शुश्रूषणनित्ययुक्ते ॥ १८
नारायणे त्वेकमना वसामि
सर्वेण भावेन शरीरभूता ।
तस्मिन्हि धर्मः सुमहान्निविष्टो
ब्रह्मण्यता चात्र तथा प्रियत्वम् ॥ १९
नाहं शरीरेण वसामि देवि
नैवं मया शक्यमिहाभिधातुम् ।
यस्मिंस्तु भावेन वसामि पुंसि
स वर्धते धर्मयशोर्थकामैः ॥ २०

इति श्रीमहाभारते अनुशासनपर्वणि
एकादशोऽध्यायः ॥ ११ ॥

१२

युधिष्ठिर उवाच ।

स्त्रीपुंसयोः संप्रयोगे स्पर्शः कस्याधिको भवेत् ।

एतन्मे संशयं राजन्यथावद्वक्तुमर्हसि ॥ १

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
भङ्गाश्वनेन शक्रस्य यथा वैरमभूत्पुरा ॥ २
पुरा भङ्गाश्वनो नाम राजर्षिरतिधार्मिकः ।
अपुत्रः स नरव्याघ्र पुत्रार्थं यज्ञमाहरत् ॥ ३
अग्निष्टुं नाम राजर्षिरिन्द्रद्विष्टं महाबलः ।
प्रायश्चित्तेषु मर्त्यानां पुत्रकामस्य चेष्यते ॥ ४
इन्द्रो ज्ञात्वा तु तं यज्ञं महाभागः सुरेश्वरः ।
अन्तरं तस्य राजर्षेरन्विच्छन्नियतात्मनः ॥ ५
कस्यचित्त्वथ कालस्य मृगयामटतो नृप ।
इदमन्तरमित्येव शक्रो नृपममोहयत् ॥ ६
एकाश्वेन च राजर्षिर्भ्रान्त इन्द्रेण मोहितः ।
न दिशोऽविन्दत नृपः क्षुत्पिपासार्दितस्तदा ॥ ७
इतश्चेतश्च वै धावञ्श्रमतृष्णार्दितो नृपः ।
सरोऽपश्यत्सुरुचिरं पूर्णं परमवारिणा ।
सोऽवगाह्य सरस्तात पाययामास वाजिनम् ॥ ८
अथ पीतोदकं सोऽश्वं वृक्षे बद्ध्वा नृपोत्तमः ।
अवगाह्य ततः स्नातो राजा स्त्रीत्वमवाप ह ॥ ९
आत्मानं स्त्रीकृतं दृष्ट्वा व्रीडितो नृपसत्तमः ।
चिन्तानुगतसर्वात्मा व्याकुलेन्द्रियचेतनः ॥ १०
आरोहिष्ये कथं त्वश्वं कथं यास्यामि वै पुरम् ।
अग्निष्टुं नाम इष्टं मे पुत्राणां शतमौरसम् ॥ ११
जातं महाबलानां वै तान्प्रवक्ष्यामि किं त्वहम् ।
दारेषु चास्मदीयेषु पौरजानपदेषु च ॥ १२
मृदुत्वं च तनुत्वं च विक्लवत्वं तथैव च ।
स्त्रीगुणा ऋषिभिः प्रोक्ता धर्मतत्त्वार्थदर्शिभिः ।
व्यायामः कर्कशत्वं च वीर्यं च पुरुषे गुणाः ॥१३
पौरुषं विप्रनष्टं मे स्त्रीत्वं केनापि मेऽभवत् ।
स्त्रीभावात्कथमश्वं तु पुनरारोढुमुत्सहे ॥ १४
महता त्वथ खेदेन आरुह्याश्वं नराधिपः ।
पुनरायात्पुरं तात स्त्रीभूतो नृपसत्तम ॥ १५
पुत्रा दाराश्च भृत्याश्च पौरजानपदाश्च ते ।
किं न्विदं त्विति विज्ञाय विस्मयं परमं गताः ॥१६
अथोवाच स राजर्षिः स्त्रीभूतो वदतां वरः ।
मृगयामस्मि निर्यातो बलैः परिवृतो दृढम् ।
उद्भ्रान्तः प्राविशं घोरामटवीं दैवमोहितः ॥ १७
अटव्यां च सुघोरायां तृष्णार्तो नष्टचेतनः ।
सरः सुरुचिरप्रख्यमपश्यं पक्षिभिर्वृतम् ॥ १८
तत्रावगाढः स्त्रीभूतो व्यक्तं दैवान्न संशयः ।
अतृप्त इव पुत्राणां दाराणां च धनस्य च ॥ १९
उवाच पुत्रांश्च ततः स्त्रीभूतः पार्थिवोत्तमः ।
संप्रीत्या भुज्यतां राज्यं वनं यास्यामि पुत्रकाः ।
अभिषिच्य स पुत्राणां शतं राजा वनं गतः ॥२०
तामाश्रमे स्त्रियं तात तापसोऽभ्यवपद्यत ।
तापसेनास्य पुत्राणामाश्रमेऽप्यभवच्छतम् ॥ २१
अथ सा तान्सुतान्गृह्य पूर्वपुत्रानभाषत ।
पुरुषत्वे सुता यूयं स्त्रीत्वे चेमे शतं सुताः ॥ २२
एकत्र भुज्यतां राज्यं भ्रातृभावेन पुत्रकाः ।
सहिता भ्रातरस्तेन राज्यं बुभुजिरे तदा ॥ २३
तान्दृष्ट्वा भ्रातृभावेन भुञ्जानान्राज्यमुत्तमम् ।
चिन्तयामास देवेन्द्रो मन्युनाभिपरिप्लुतः ।
उपकारोऽस्य राजर्षेः कृतो नापकृतं मया ॥ २४
ततो ब्राह्मणरूपेण देवराजः शतक्रतुः ।
भेदयामास तान्गत्वा नगरं वै नृपात्मजान् ॥ २५
भ्रातृणां नास्ति सौभ्रात्रं येऽप्येकस्य पितुः सुताः ।
राज्यहेतोर्विवदिताः कश्यपस्य सुरासुराः ॥ २६
यूयं भङ्गाश्वनापत्यास्तापसस्येतरे सुताः ।
कश्यपस्य सुराश्चैव असुराश्च सुतास्तथा ।
युष्माकं पैतृकं राज्यं भुज्यते तापसात्मजैः ॥ २७

इन्द्रेण भेदितास्ते तु युद्धेऽन्योन्यमपातयन् ।
तच्छ्रुत्वा तापसी चापि संतप्ता प्ररुरोद ह ॥ २८
ब्राह्मणच्छद्मनाभ्येत्य तामिन्द्रोऽथान्वपृच्छत ।
केन दुःखेन संतप्ता रोदिषि त्वं वरानने ॥ २९
ब्राह्मणं तु ततो दृष्ट्वा सा स्त्री करुणमब्रवीत् ।
पुत्राणां द्वे शते ब्रह्मन्कालेन विनिपातिते ॥ ३०
अहं राजाभवं विप्र तत्र पुत्रशतं मया ।
समुत्पन्नं सुरूपाणां विक्रान्तानां द्विजोत्तम ॥ ३१
कदाचिन्मृगयां यात उद्भ्रान्तो गहने वने ।
अवगाढश्च सरसि स्त्रीभूतो ब्राह्मणोत्तम ।
पुत्रान्राज्ये प्रतिष्ठाप्य वनमस्मि ततो गतः ॥ ३२
स्त्रियाश्च मे पुत्रशतं तापसेन महात्मना ।
आश्रमे जनितं ब्रह्मन्नीतास्ते नगरं मया ॥ ३३
तेषां च वैरमुत्पन्नं कालयोगेन वै द्विज ।
एतच्छोचामि विप्रेन्द्र दैवेनाभिपरिप्लुता ॥ ३४
इन्द्रस्तां दुःखितां दृष्ट्वा अब्रवीत्परुषं वचः ।
पुरा सुदुःसहं भद्रे मम दुःखं त्वया कृतम् ॥ ३५
इन्द्रद्विष्टेन यजता मामनादृत्य दुर्मते ।
इन्द्रोऽहमस्मि दुर्बुद्धे वैरं ते यातितं मया ॥ ३६
इन्द्रं तु दृष्ट्वा राजर्षिः पादयोः शिरसा गतः ।
प्रसीद त्रिदशश्रेष्ठ पुत्रकामेन स क्रतुः ।
इष्टस्त्रिदशशार्दूल तत्र मे क्षन्तुमर्हसि ॥ ३७
प्रणिपातेन तस्येन्द्रः परितुष्टो वरं ददौ ।
पुत्रा वै कतमे राजञ्जीवन्तु तव शंस मे ।
स्त्रीभूतस्य हि ये जाताः पुरुषस्याथ येऽभवन् ॥ ३८
तापसी तु ततः शक्रमुवाच प्रयताञ्जलिः ।
स्त्रीभूतस्य हि ये जातास्ते मे जीवन्तु वासव ॥ ३९
इन्द्रस्तु विस्मितो हृष्टः स्त्रियं पप्रच्छ तां पुनः ।
पुरुषोत्पादिता ये ते कथं द्वेष्याः सुतास्तव ॥ ४०
स्त्रीभूतस्य हि ये जाताः स्नेहस्तेभ्योऽधिकः कथम् ।
कारणं श्रोतुमिच्छामि तन्मे वक्तुमिहार्हसि ॥ ४१

स्त्र्युवाच ।

स्त्रियास्त्वभ्यधिकः स्नेहो न तथा पुरुषस्य वै ।
तस्मात्ते शक्र जीवन्तु ये जाताः स्त्रीकृतस्य वै ॥ ४२

भीष्म उवाच ।

एवमुक्ते ततस्त्विन्द्रः प्रीतो वाक्यमुवाच ह ।
सर्व एवेह जीवन्तु पुत्रास्ते सत्यवादिनि ॥ ४३
वरं च वृणु राजेन्द्र यं त्वमिच्छसि सुव्रत ।
पुरुषत्वमथ स्त्रीत्वं मत्तो यदभिकाङ्क्षसि ॥ ४४

स्त्र्युवाच ।

स्त्रीत्वमेव वृणे शक्र प्रसन्ने त्वयि वासव ॥ ४५
एवमुक्तस्तु देवेन्द्रस्तां स्त्रियं प्रत्युवाच ह ।
पुरुषत्वं कथं त्यक्त्वा स्त्रीत्वं रोचयसे विभो ॥ ४६
एवमुक्तः प्रत्युवाच स्त्रीभूतो राजसत्तमः ।
स्त्रियाः पुरुषसंयोगे प्रीतिरभ्यधिका सदा ।
एतस्मात्कारणाच्छक्र स्त्रीत्वमेव वृणोम्यहम् ॥ ४७
रमे चैवाधिकं स्त्रीत्वे सत्यं वै देवसत्तम ।
स्त्रीभावेन हि तुष्टोऽस्मि गम्यतां त्रिदशाधिप ॥ ४८
एवमस्त्विति चोक्त्वा तामापृच्छ्य त्रिदिवं गतः ।
एवं स्त्रिया महाराज अधिका प्रीतिरुच्यते ॥ ४९

इति श्रीमहाभारते अनुशासनपर्वणि
द्वादशोऽध्यायः ॥ १२ ॥

१३

युधिष्ठिर उवाच ।

किं कर्तव्यं मनुष्येण लोकयात्राहितार्थिना ।
कथं वै लोकयात्रां तु किंशीलश्च समाचरेत् ॥ १

भीष्म उवाच ।

कायेन त्रिविधं कर्म वाचा चापि चतुर्विधम् ।
मनसा त्रिविधं चैव दश कर्मपथांस्त्यजेत् ॥ २

प्राणातिपातं स्तैन्यं च परदारमथापि च ।
त्रीणि पापानि कायेन सर्वतः परिवर्जयेत् ॥ ३
असत्प्रलापं पारुष्यं पैशुन्यमनृतं तथा ।
चत्वारि वाचा राजेन्द्र न जल्पेन्नानुचिन्तयेत् ॥ ४
अनभिध्या परस्वेषु सर्वसत्त्वेषु सौहृदम् ।
कर्मणा फलमस्तीति त्रिविधं मनसा चरेत् ॥ ५
तस्माद्वाक्कायमनसा नाचरेदशुभं नरः ।
शुभाशुभान्याचरन्हि तस्य तस्याश्नुते फलम् ॥ ६

इति श्रीमहाभारते अनुशासनपर्वणि
त्रयोदशोऽध्यायः ॥ १३ ॥

१४

युधिष्ठिर उवाच ।

पितामहेशाय विभो नामान्याचक्ष्व शंभवे ।
बभ्रवे विश्वमादाय महाभाग्यं च तत्त्वतः ॥ १

भीष्म उवाच ।

सुरासुरगुरो देव विष्णो त्वं वक्तुमर्हसि ।
शिवाय विश्वरूपाय यन्मां पृच्छद्युधिष्ठिरः ॥ २
नाम्नां सहस्रं देवस्य तण्डिना ब्रह्मयोनिना ।
निवेदितं ब्रह्मलोके ब्रह्मणो यत्पुराभवत् ॥ ३
द्वैपायनप्रभृतयस्तथैवेमे तपोधनाः ।
ऋषयः सुव्रता दान्ताः शृण्वन्तु गदतस्तव ॥ ४
ध्रुवाय नन्दिने होत्रे गोप्त्रे विश्वसृजेऽग्नये ।
महाभाग्यं विभो ब्रूहि मुण्डिनेऽथ कपर्दिने ॥ ५

वासुदेव उवाच ।

न गतिः कर्मणां शक्या वेत्तुमीशस्य तत्त्वतः ॥ ६
हिरण्यगर्भप्रमुखा देवाः सेन्द्रा महर्षयः ।
न विदुर्यस्य निधनमादिं वा सूक्ष्मदर्शिनः ।
स कथं नरमात्रेण शक्यो ज्ञातुं सतां गतिः ॥ ७
तस्याहमसुरघ्नस्य कांश्चिद्भगवतो गुणान् ।
भवतां कीर्तयिष्यामि व्रतेशाय यथातथम् ॥ ८

वैशंपायन उवाच ।

एवमुक्त्वा तु भगवान्गुणांस्तस्य महात्मनः ।
उपस्पृश्य शुचिर्भूत्वा कथयामास धीमतः ॥ ९

वासुदेव उवाच ।

शुश्रूषध्वं ब्राह्मणेन्द्रास्त्वं च तात युधिष्ठिर ।
त्वं चापगेय नामानि निशामय जगत्पतेः ॥ १०
यदवाप्तं च मे पूर्वं साम्बहेतोः सुदुष्करम् ।
यथा च भगवान्दृष्टो मया पूर्वं समाधिना ॥ ११
शम्बरे निहते पूर्वं रौक्मिणेयेन धीमता ।
अतीते द्वादशे वर्षे जाम्बवत्यब्रवीद्धि माम् ॥ १२
प्रद्युम्नचारुदेष्णादीन्रुक्मिण्या वीक्ष्य पुत्रकान् ।
पुत्रार्थिनी मामुपेत्य वाक्यमाह युधिष्ठिर ॥ १३
शूरं बलवतां श्रेष्ठं कान्तरूपमकल्मषम् ।
आत्मतुल्यं मम सुतं प्रयच्छाच्युत माचिरम् ॥ १४
न हि तेऽप्राप्यमस्तीह त्रिषु लोकेषु किंचन ।
लोकान्सृजेस्त्वमपरानिच्छन्यदुकुलोद्वह ॥ १५
त्वया द्वादश वर्षाणि वायुभूतेन शुष्यता ।
आराध्य पशुभर्तारं रुक्मिण्या जनिताः सुताः ॥ १६
चारुदेष्णः सुचारुश्च चारुवेषो यशोधरः ।
चारुश्रवाश्चारुयशाः प्रद्युम्नः शंभुरेव च ॥ १७
यथा ते जनिताः पुत्रा रुक्मिण्याश्चारुविक्रमाः ।
तथा ममापि तनयं प्रयच्छ बलशालिनम् ॥ १८
इत्येवं चोदितो देव्या तामवोचं सुमध्यमाम् ।
अनुजानीहि मां राज्ञि करिष्ये वचनं तव ।
सा च मामब्रवीद्गच्छ विजयाय शिवाय च ॥ १९
ब्रह्मा शिवः काश्यपश्च नद्यो देवा मनोनुगाः ।
क्षेत्रौषध्यो यज्ञवाहाच्छन्दांस्यृषिगणा धरा ॥ २०
समुद्रा दक्षिणा स्तोभा ऋक्षाणि पितरो ग्रहाः ।
देवपत्न्यो देवकन्या देवमातर एव च ॥ २१

मन्वन्तराणि गावश्च चन्द्रमाः सविता हरिः ।
सावित्री ब्रह्मविद्या च ऋतवो वत्सराः क्षपाः ॥ २२
क्षणा लवा मुहूर्ताश्च निमेषा युगपर्ययाः ।
रक्षन्तु सर्वत्र गतं त्वां यादव सुखावहम् ।
अरिष्टं गच्छ पन्थानमप्रमत्तो भवानघ ॥ २३
एवं कृतस्वस्त्ययनस्तयाहं
तामभ्यनुज्ञाय कपीन्द्रपुत्रीम् ।
पितुः समीपे नरसत्तमस्य
मातुश्च राज्ञश्च तथाहुकस्य ॥ २४
तमर्थमावेद्य यदब्रवीन्मां
विद्याधरेन्द्रस्य सुता भृशार्ता ।
तानभ्यनुज्ञाय तदातिदुःखा-
द्गदं तथैवातिबलं च रामम् ॥ २५
प्राप्यानुज्ञां गुरुजनादहं तार्क्ष्यमचिन्तयम् ।
सोऽवहद्धिमवन्तं मां प्राप्य चैनं व्यसर्जयम् ॥ २६
तत्राहमद्भुतान्भावानपश्यं गिरिसत्तमे ।
क्षेत्रं च तपसां श्रेष्ठं पश्याम्याश्रममुत्तमम् ॥ २७
दिव्यं वैयाघ्रपद्यस्य उपमन्योर्महात्मनः ।
पूजितं देवगन्धर्वैर्ब्राह्म्या लक्ष्म्या समन्वितम् ॥ २८
धवककुभकदम्बनारिकेलैः
कुरबककेतकजम्बुपाटलाभिः ।
वटवरुणकवत्सनाभबिल्वैः
सरलकपित्थप्रियालसालतालैः ॥ २९
बदरीकुन्दपुंनागैरशोकाम्रातिमुक्तकैः ।
भल्लातकैर्मधूकैश्च चम्पकैः पनसैस्तथा ॥ ३०
वन्यैर्बहुविधैर्वृक्षैः फलपुष्पप्रदैर्युतम् ।
पुष्पगुल्मलताकीर्णं कदलीषण्डशोभितम् ॥ ३१
नानाशकुनिसंभोज्यैः फलैर्वृक्षैरलंकृतम् ।
यथास्थानविनिक्षिप्तैर्भूषितं वनराजिभिः ॥ ३२
रुरुवारणशार्दूलसिंहद्वीपिसमाकुलम् ।
कुरङ्गबर्हिणाकीर्णं मार्जारभुजगावृतम् ।
पूगैश्च मृगजातीनां महिषर्क्षनिषेवितम् ॥ ३३
नानापुष्परजोमिश्रो गजदानाधिवासितः ।
दिव्यस्त्रीगीतबहुलो मारुतोऽत्र सुखो ववौ ॥ ३४
धारानिनादैर्विहगप्रणादैः
शुभैस्तथा बृंहितैः कुञ्जराणाम् ।
गीतैस्तथा किंनराणामुदारैः
शुभैः स्वनैः सामगानां च वीर ॥ ३५
अचिन्त्यं मनसाप्यन्यैः सरोभिः समलंकृतम् ।
विशालैश्चाग्निशरणैर्भूषितं कुशसंवृतम् ॥ ३६
विभूषितं पुण्यपवित्रतोयया
सदा च जुष्टं नृप जह्नुकन्यया ।
महात्मभिर्धर्मभृतां वरिष्ठै-
र्महर्षिभिर्भूषितमग्निकल्पैः ॥ ३७
वाय्वाहारैरम्बुपैर्जप्यनित्यैः
संप्रक्षालैर्यतिभिर्ध्याननित्यैः ।
धूमाशनैरूष्मपैः क्षीरपैश्च
विभूषितं ब्राह्मणेन्द्रैः समन्तात् ॥ ३८
गोचारिणोऽथाश्मकुट्टा दन्तोलूखलिनस्तथा ।
मरीचिपाः फेनपाश्च तथैव मृगचारिणः ॥ ३९
सुदुःखान्नियमांस्तांस्तान्वहतः सुतपोन्वितान् ।
पश्यन्नुत्फुल्लनयनः प्रवेष्टुमुपचक्रमे ॥ ४०
सुपूजितं देवगणैर्महात्मभिः
शिवादिभिर्भारत पुण्यकर्मभिः ।
रराज तच्चाश्रममण्डलं सदा
दिवीव राजन्रविमण्डलं यथा ॥ ४१
क्रीडन्ति सर्पैर्नकुला मृगैर्व्याघ्राश्च मित्रवत् ।
प्रभावाद्दीप्ततपसः संनिकर्षगुणान्विताः ॥ ४२
तत्राश्रमपदे श्रेष्ठे सर्वभूतमनोरमे ।
सेविते द्विजशार्दूलैर्वेदवेदाङ्गपारगैः ॥ ४३

नानानियमविख्यातैर्ऋषिभिश्च महात्मभिः ।
प्रविशन्नेव चापश्यं जटाचीरधरं प्रभुम् ॥ ४४
तेजसा तपसा चैव दीप्यमानं यथानलम् ।
शिष्यमध्यगतं शान्तं युवानं ब्राह्मणर्षभम् ।
शिरसा वन्दमानं मामुपमन्युरभाषत ॥ ४५
स्वागतं पुण्डरीकाक्ष सफलानि तपांसि नः ।
यत्पूज्यः पूजयसि नो द्रष्टव्यो द्रष्टुमिच्छसि ॥ ४६
तमहं प्राञ्जलिर्भूत्वा मृगपक्षिष्वथाग्निषु ।
धर्मे च शिष्यवर्गे च समपृच्छमनामयम् ॥ ४७
ततो मां भगवानाह साम्ना परमवल्गुना ।
लप्स्यसे तनयं कृष्ण आत्मतुल्यमसंशयम् ॥ ४८
तपः सुमहदास्थाय तोषयेशानमीश्वरम् ।
इह देवः सपत्नीकः समाक्रीडत्यधोक्षज ॥ ४९
इहैव देवताश्रेष्ठं देवाः सर्षिगणाः पुरा ।
तपसा ब्रह्मचर्येण सत्येन च दमेन च ।
तोषयित्वा शुभान्कामान्प्राप्नुवंस्ते जनार्दन ॥ ५०
तेजसां तपसां चैव निधिः स भगवानिह ।
शुभाशुभान्वितान्भावान्विसृजन्संक्षिपन्नपि ।
आस्ते देव्या सहाचिन्त्यो यं प्रार्थयसि शत्रुहन् ॥
हिरण्यकशिपुर्योऽभूद्दानवो मेरुकम्पनः ।
तेन सर्वामरैश्वर्यं शर्वात्प्राप्तं समार्बुदम् ॥ ५२
तस्यैव पुत्रप्रवरो मन्दरो नाम विश्रुतः ।
महादेववराच्छक्रं वर्षार्बुदमयोधयत् ॥ ५३
विष्णोश्चक्रं च तद्घोरं वज्रमाखण्डलस्य च ।
शीर्णं पुराभवत्तात ग्रहस्याङ्गेषु केशव ॥ ५४
अर्द्यमानाश्च विबुधा ग्रहेण सुबलीयसा ।
शिवदत्तवराञ्जघ्नुरसुरेन्द्रान्सुरा भृशम् ॥ ५५
तुष्टो विद्युत्प्रभस्यापि त्रिलोकेश्वरतामदात् ।
शतं वर्षसहस्राणां सर्वलोकेश्वरोऽभवत् ।
ममैवानुचरो नित्यं भवितासीति चाब्रवीत् ॥ ५६
तथा पुत्रसहस्राणामयुतं च ददौ प्रभुः ।
कुशद्वीपं च स ददौ राज्येन भगवानजः ॥ ५७
तथा शतमुखो नाम धात्रा सृष्टो महासुरः ।
येन वर्षशतं साग्रमात्ममांसैर्हुतोऽनलः ।
तं प्राह भगवांस्तुष्टः किं करोमीति शंकरः ॥ ५८
तं वै शतमुखः प्राह योगो भवतु मेऽद्भुतः ।
बलं च दैवतश्रेष्ठ शाश्वतं संप्रयच्छ मे ॥ ५९
स्वायंभुवः क्रतुश्चापि पुत्रार्थमभवत्पुरा ।
आविश्य योगेनात्मानं त्रीणि वर्षशतान्यपि ॥ ६०
तस्य देवोऽददत्पुत्रान्सहस्रं क्रतुसंमितान् ।
योगेश्वरं देवगीतं वेत्थ कृष्ण न संशयः ॥ ६१
वालखिल्या मघवता अवज्ञाताः पुरा किल ।
तैः क्रुद्धैर्भगवान्रुद्रस्तपसा तोषितो ह्यभूत् ॥ ६२
तांश्चापि दैवतश्रेष्ठः प्राह प्रीतो जगत्पतिः ।
सुपर्णं सोमहर्तारं तपसोत्पादयिष्यथ ॥ ६३
महादेवस्य रोषाच्च आपो नष्टाः पुराभवन् ।
ताश्च सप्तकपालेन देवैरन्याः प्रवर्तिताः ॥ ६४
अत्रेर्भार्यापि भर्तारं संत्यज्य ब्रह्मवादिनी ।
नाहं तस्य मुनेर्भूयो वशगा स्यां कथंचन ।
इत्युक्त्वा सा महादेवमगच्छच्छरणं किल ॥ ६५
निराहारा भयादत्रेस्त्रीणि वर्षशतान्यपि ।
अशेत मुसलेष्वेव प्रसादार्थं भवस्य सा ॥ ६६
तामब्रवीद्धसन्देवो भविता वै सुतस्तव ।
वंशे तवैव नाम्ना तु ख्यातिं यास्यति चेप्सिताम् ॥
शाकल्यः संशितात्मा वै नव वर्षशतान्यपि ।
आराधयामास भवं मनोयज्ञेन केशव ॥ ६८
तं चाह भगवांस्तुष्टो ग्रन्थकारो भविष्यसि ।
वत्साक्षया च ते कीर्तिस्त्रैलोक्ये वै भविष्यति ।
अक्षयं च कुलं तेऽस्तु महर्षिभिरलंकृतम् ॥ ६९
सावर्णिश्चापि विख्यात ऋषिरासीत्कृते युगे ।

इह तेन तपस्तप्तं षष्टिं वर्षशतान्यथ ॥ ७०
तमाह भगवान्रुद्रः साक्षात्तुष्टोऽस्मि तेऽनघ ।
ग्रन्थकृल्लोकविख्यातो भवितास्यजरामरः ॥ ७१
मयापि च यथा दृष्टो देवदेवः पुरा विभुः ।
साक्षात्पशुपतिस्तात तच्चापि शृणु माधव ॥ ७२
यदर्थं च महादेवः प्रयतेन मया पुरा ।
आराधितो महातेजास्तच्चापि शृणु विस्तरम् ॥ ७३
यदवाप्तं च मे पूर्वं देवदेवान्महेश्वरात् ।
तत्सर्वमखिलेनाद्य कथयिष्यामि तेऽनघ ॥ ७४
पुरा कृतयुगे तात ऋषिरासीन्महायशाः ।
व्याघ्रपाद इति ख्यातो वेदवेदाङ्गपारगः ।
तस्याहमभवं पुत्रो धौम्यश्चापि ममानुजः ॥ ७५
कस्यचित्त्वथ कालस्य धौम्येन सह माधव ।
आगच्छमाश्रमं क्रीडन्मुनीनां भावितात्मनाम् ॥ ७६
तत्रापि च मया दृष्टा दुह्यमाना पयस्विनी ।
लक्षितं च मया क्षीरं स्वादुतो ह्यमृतोपमम् ॥ ७७
ततः पिष्टं समालोड्य तोयेन सह माधव ।
आवयोः क्षीरमित्येव पानार्थमुपनीयते ॥ ७८
अथ गव्यं पयस्तात कदाचित्प्राशितं मया ।
ततः पिष्टरसं तात न मे प्रीतिमुदावहत् ॥ ७९
ततोऽहमब्रुवं बाल्याज्जननीमात्मनस्तदा ।
क्षीरोदनसमायुक्तं भोजनं च प्रयच्छ मे ॥ ८०
ततो मामब्रवीन्माता दुःखशोकसमन्विता ।
पुत्रस्नेहात्परिष्वज्य मूर्ध्नि चाघ्राय माधव ॥ ८१
कुतः क्षीरोदनं वत्स मुनीनां भावितात्मनाम् ।
वने निवसतां नित्यं कन्दमूलफलाशिनाम् ॥ ८२
अप्रसाद्य विरूपाक्षं वरदं स्थाणुमव्ययम् ।
कुतः क्षीरोदनं वत्स सुखानि वसनानि च ॥ ८३
तं प्रपद्य सदा वत्स सर्वभावेन शंकरम् ।
तत्प्रसादाच्च कामेभ्यः फलं प्राप्स्यसि पुत्रक ॥ ८४
जनन्यास्तद्वचः श्रुत्वा तदाप्रभृति शत्रुहन् ।
मम भक्तिर्महादेवे नैष्ठिकी समपद्यत ॥ ८५
ततोऽहं तप आस्थाय तोषयामास शंकरम् ।
दिव्यं वर्षसहस्रं तु पादाङ्गुष्ठाग्रविष्ठितः ॥ ८६
एकं वर्षशतं चैव फलाहारस्तदाभवम् ।
द्वितीयं शीर्णपर्णाशी तृतीयं चाम्बुभोजनः ।
शतानि सप्त चैवाहं वायुभक्षस्तदाभवम् ॥ ८७
ततः प्रीतो महादेवः सर्वलोकेश्वरः प्रभुः ।
शक्ररूपं स कृत्वा तु सर्वैर्देवगणैर्वृतः ।
सहस्राक्षस्तदा भूत्वा वज्रपाणिर्महायशाः ॥ ८८
सुधावदातं रक्ताक्षं स्तब्धकर्णं मदोत्कटम् ।
आवेष्टितकरं रौद्रं चतुर्दंष्ट्रं महागजम् ॥ ८९
समास्थितश्च भगवान्दीप्यमानः स्वतेजसा ।
आजगाम किरीटी तु हारकेयूरभूषितः ॥ ९०
पाण्डुरेणातपत्रेण ध्रियमाणेन मूर्धनि ।
सेव्यमानोऽप्सरोभिश्च दिव्यगन्धर्वनादितः ॥ ९१
ततो मामाह देवेन्द्रः प्रीतस्तेऽहं द्विजोत्तम ।
वरं वृणीष्व मत्तस्त्वं यत्ते मनसि वर्तते ॥ ९२
शक्रस्य तु वचः श्रुत्वा नाहं प्रीतमनाभवम् ।
अब्रुवं च तदा कृष्ण देवराजमिदं वचः ॥ ९३
नाहं त्वत्तो वरं काङ्क्षे नान्यस्मादपि दैवतात् ।
महादेवादृते सौम्य सत्यमेतद्ब्रवीमि ते ॥ ९४
पशुपतिवचनाद्भवामि सद्यः
कृमिरथ वा तरुरप्यनेकशाखः ।
अपशुपतिवरप्रसादजा मे
त्रिभुवनराज्यविभूतिरप्यनिष्टा ॥ ९५
अपि कीटः पतंगो वा भवेयं शंकराज्ञया ।
न तु शक्र त्वया दत्तं त्रैलोक्यमपि कामये ॥ ९६
यावच्छशाङ्कशकलामलबद्धमौलि-
र्न प्रीयते पशुपतिर्भगवान्ममेशः ।

तावज्जरामरणजन्मशताभिघातै-
र्दुःखानि देहविहितानि समुद्वहामि ॥ ९७
दिवसकरशशाङ्कवह्निदीप्तं
त्रिभुवनसारमपारमाद्यमेकम् ।
अजरममरमप्रसाद्य रुद्रं
जगति पुमानिह को लभेत शान्तिम् ॥ ९८

शक्र उवाच ।

कः पुनस्तव हेतुर्वै ईशे कारणकारणे ।
येन देवादृतेऽन्यस्मात्प्रसादं नाभिकाङ्क्षसि ॥ ९९

उपमन्युरुवाच ।

हेतुभिर्वा किमन्यैस्ते ईशः कारणकारणम् ।
न शुश्रुम यदन्यस्य लिङ्गमभ्यर्च्यते सुरैः ॥ १००
कस्यान्यस्य सुरैः सर्वैर्लिङ्गं मुक्त्वा महेश्वरम् ।
अर्च्यतेऽर्चितपूर्वं वा ब्रूहि यद्यस्ति ते श्रुतिः ॥ १०१
यस्य ब्रह्मा च विष्णुश्च त्वं चापि सह दैवतैः ।
अर्चयध्वं सदा लिङ्गं तस्माच्छ्रेष्ठतमो हि सः ॥ १०२
तस्माद्वरमहं काङ्क्षे निधनं वापि कौशिक ।
गच्छ वा तिष्ठ वा शक्र यथेष्टं बलसूदन ॥ १०३
काममेष वरो मेऽस्तु शापो वापि महेश्वरात् ।
न चान्यां देवतां काङ्क्षे सर्वकामफलान्यपि ॥ १०४
एवमुक्त्वा तु देवेन्द्रं दुःखादाकुलितेन्द्रियः ।
न प्रसीदति मे रुद्रः किमेतदिति चिन्तयन् ।
अथापश्यं क्षणेनैव तमेवैरावतं पुनः ॥ १०५
हंसकुन्देन्दुसदृशं मृणालकुमुदप्रभम् ।
वृषरूपधरं साक्षात्क्षीरोदमिव सागरम् ॥ १०६
कृष्णपुच्छं महाकायं मधुपिङ्गललोचनम् ।
जाम्बूनदेन दाम्ना च सर्वतः समलंकृतम् ॥ १०७
रक्ताक्षं सुमहानासं सुकर्णं सुकटीतटम् ।
सुपार्श्वं विपुलस्कन्धं सुरूपं चारुदर्शनम् ॥ १०८
ककुदं तस्य चाभाति स्कन्धमापूर्य विष्ठितम् ।
तुषारगिरिकूटाभं सिताभ्रशिखरोपमम् ॥ १०९
तमास्थितश्च भगवान्देवदेवः सहोमया ।
अशोभत महादेवः पौर्णमास्यामिवोडुराट् ॥ ११०
तस्य तेजोभवो वह्निः समेघः स्तनयित्नुमान् ।
सहस्रमिव सूर्याणां सर्वमावृत्य तिष्ठति ॥ १११
ईश्वरः सुमहातेजाः संवर्तक इवानलः ।
युगान्ते सर्वभूतानि दिधक्षुरिव चोद्यतः ॥ ११२
तेजसा तु तदा व्याप्ते दुर्निरीक्ष्ये समन्ततः ।
पुनरुद्विग्नहृदयः किमेतदिति चिन्तयम् ॥ ११३
मुहूर्तमिव तत्तेजो व्याप्य सर्वा दिशो दश ।
प्रशान्तं च क्षणेनैव देवदेवस्य मायया ॥ ११४
अथापश्यं स्थितं स्थाणुं भगवन्तं महेश्वरम् ।
सौरभेयगतं सौम्यं विधूममिव पावकम् ।
सहितं चारुसर्वाङ्ग्या पार्वत्या परमेश्वरम् ॥ ११५
नीलकण्ठं महात्मानमसक्तं तेजसां निधिम् ।
अष्टादशभुजं स्थाणुं सर्वाभरणभूषितम् ॥ ११६
शुक्लाम्बरधरं देवं शुक्लमाल्यानुलेपनम् ।
शुक्लध्वजमनाधृष्यं शुक्लयज्ञोपवीतिनम् ॥ ११७
गायद्भिर्नृत्यमानैश्च उत्पतद्भिरितस्ततः ।
वृतं पारिषदैर्दिव्यैरात्मतुल्यपराक्रमैः ॥ ११८
बालेन्दुमुकुटं पाण्डुं शरच्चन्द्रमिवोदितम् ।
त्रिभिर्नेत्रैः कृतोद्द्योतं त्रिभिः सूर्यैरिवोदितैः ॥
अशोभत च देवस्य माला गात्रे सितप्रभे ।
जातरूपमयैः पद्मैर्ग्रथिता रत्नभूषिता ॥ १२०
मूर्तिमन्ति तथास्त्राणि सर्वतेजोमयानि च ।
मया दृष्टानि गोविन्द भवस्यामिततेजसः ॥ १२१
इन्द्रायुधसहस्राभं धनुस्तस्य महात्मनः ।
पिनाकमिति विख्यातं स च वै पन्नगो महान् ॥
सप्तशीर्षो महाकायस्तीक्ष्णदंष्ट्रो विषोल्बणः ।
ज्यावेष्टितमहाग्रीवः स्थितः पुरुषविग्रहः ॥ १२३

शरश्च सूर्यसंकाशः कालानलसमद्युतिः ।
यत्तदस्त्रं महाघोरं दिव्यं पाशुपतं महत् ॥ १२४
अद्वितीयमनिर्देश्यं सर्वभूतभयावहम् ।
सस्फुलिङ्गं महाकायं विसृजन्तमिवानलम् ॥ १२५
एकपादं महादंष्ट्रं सहस्रशिरसोदरम् ।
सहस्रभुजजिह्वाक्षमुद्गिरन्तमिवानलम् ॥ १२६
ब्राह्मान्नारायणादैन्द्रादाग्नेयादपि वारुणात् ।
यद्विशिष्टं महाबाहो सर्वशस्त्रविघातनम् ॥ १२७
येन तत्त्रिपुरं दग्ध्वा क्षणाद्भस्मीकृतं पुरा ।
शरेणैकेन गोविन्द महादेवेन लीलया ॥ १२८
निर्ददाह जगत्कृत्स्नं त्रैलोक्यं सचराचरम् ।
महेश्वरभुजोत्सृष्टं निमेषार्धान्न संशयः ॥ १२९
नावध्यो यस्य लोकेऽस्मिन्ब्रह्मविष्णुसुरेष्वपि ।
तदहं दृष्टवांस्तात आश्चर्याद्भुतमुत्तमम् ॥ १३०
गुह्यमस्त्रं परं चापि तत्तुल्याधिकमेव वा ।
यत्तच्छूलमिति ख्यातं सर्वलोकेषु शूलिनः ॥१३१
दारयेद्यन्महीं कृत्स्नां शोषयेद्वा महोदधिम् ।
संहरेद्वा जगत्कृत्स्नं विसृष्टं शूलपाणिना ॥ १३२
यौवनाश्वो हतो येन मांधाता सबलः पुरा ।
चक्रवर्ती महातेजास्त्रिलोकविजयी नृपः ॥ १३३
महाबलो महावीर्यः शक्रतुल्यपराक्रमः ।
करस्थेनैव गोविन्द लवणस्येह रक्षसः ॥ १३४
तच्छूलमतितीक्ष्णाग्रं सुभीमं लोमहर्षणम् ।
त्रिशिखां भ्रुकुटीं कृत्वा तर्जमानमिव स्थितम् ॥
विधूमं सार्चिषं कृष्णं कालसूर्यमिवोदितम् ।
सर्पहस्तमनिर्देश्यं पाशहस्तमिवान्तकम् ।
दृष्टवानस्मि गोविन्द तदस्त्रं रुद्रसंनिधौ ॥ १३६
परशुस्तीक्ष्णधारश्च दत्तो रामस्य यः पुरा ।
महादेवेन तुष्टेन क्षत्रियाणां क्षयंकरः ।
कार्तवीर्यो हतो येन चक्रवर्ती महामृधे ॥ १३७
त्रिःसप्तकृत्वः पृथिवी येन निःक्षत्रिया कृता ।
जामदग्न्येन गोविन्द रामेणाक्लिष्टकर्मणा ॥ १३८
दीप्तधारः सुरौद्रास्यः सर्पकण्ठाग्रवेष्टितः ।
अभवच्छूलिनोऽभ्याशे दीप्तवह्निशिखोपमः ॥ १३९
असंख्येयानि चास्त्राणि तस्य दिव्यानि धीमतः ।
प्राधान्यतो मयैतानि कीर्तितानि तवानघ ॥ १४०
सव्यदेशे तु देवस्य ब्रह्मा लोकपितामहः ।
दिव्यं विमानमास्थाय हंसयुक्तं मनोजवम् ॥१४१
वामपार्श्वमतश्चैव तथा नारायणः स्थितः ।
वैनतेयं समास्थाय शङ्खचक्रगदाधरः ॥ १४२
स्कन्दो मयूरमास्थाय स्थितो देव्याः समीपतः ।
शक्तिं कण्ठे समादाय द्वितीय इव पावकः ॥१४३
पुरस्ताच्चैव देवस्य नन्दिं पश्याम्यवस्थितम् ।
शूलं विष्टभ्य तिष्ठन्तं द्वितीयमिव शंकरम् ॥ १४४
स्वायंभुवाद्या मनवो भृग्वाद्या ऋषयस्तथा ।
शक्राद्या देवताश्चैव सर्व एव समभ्ययुः ॥ १४५
तेऽभिवाद्य महात्मानं परिवार्य समन्ततः ।
अस्तुवन्विविधैः स्तोत्रैर्महादेवं सुरास्तदा ॥ १४६
ब्रह्मा भवं तदा स्तुन्वन्रथन्तरमुदीरयन् ।
ज्येष्ठसाम्ना च देवेशं जगौ नारायणस्तदा ।
गृणञ्शक्रः परं ब्रह्म शतरुद्रीयमुत्तमम् ॥ १४७
ब्रह्मा नारायणश्चैव देवराजश्च कौशिकः ।
अशोभन्त महात्मानस्त्रयस्त्रय इवाग्नयः ॥ १४८
तेषां मध्यगतो देवो रराज भगवाञ्शिवः ।
शरद्घनविनिर्मुक्तः परिविष्ट इवांशुमान् ।
ततोऽहमस्तुवं देवं स्तवेनानेन सुव्रतम् ॥ १४९
नमो देवाधिदेवाय महादेवाय वै नमः ।
शक्राय शक्ररूपाय शक्रवेषधराय च ॥ १५०
नमस्ते वज्रहस्ताय पिङ्गलायारुणाय च ।
पिनाकपाणये नित्यं खड्गशूलधराय च ॥ १५१

नमस्ते कृष्णवासाय कृष्णकुञ्चितमूर्धजे ।
कृष्णाजिनोत्तरीयाय कृष्णाष्टमिरताय च ॥ १५२
शुक्लवर्णाय शुक्लाय शुक्लाम्बरधराय च ।
शुक्लभस्मावलिप्ताय शुक्लकर्मरताय च ॥ १५३
त्वं ब्रह्मा सर्वदेवानां रुद्राणां नीललोहितः ।
आत्मा च सर्वभूतानां सांख्ये पुरुष उच्यसे ॥१५४
ऋषभस्त्वं पवित्राणां योगिनां निष्कलः शिवः ।
आश्रमाणां गृहस्थस्त्वमीश्वराणां महेश्वरः ।
कुबेरः सर्वयक्षाणां क्रतूना विष्णुरुच्यसे ॥ १५५
पर्वतानां महामेरुर्नक्षत्राणां च चन्द्रमाः ।
वसिष्ठस्त्वमृषीणां च ग्रहाणां सूर्य उच्यसे ॥ १५६
आरण्यानां पशूनां च सिंहस्त्वं परमेश्वरः ।
ग्राम्याणां गोवृषश्चासि भगवाँल्लोकपूजितः ॥१५७
आदित्यानां भवान्विष्णुर्वसूनां चैव पावकः ।
पक्षिणां वैनतेयश्च अनन्तो भुजगेषु च ॥ १५८
सामवेदश्च वेदानां यजुषां शतरुद्रियम् ।
सनत्कुमारो योगीनां सांख्यानां कपिलो ह्यसि ॥
शक्रोऽसि मरुतां देव पितृणां धर्मराडसि ।
ब्रह्मलोकश्च लोकानां गतीनां मोक्ष उच्यसे ॥१६०
क्षीरोदः सागराणां च शैलानां हिमवान्गिरिः ।
वर्णानां ब्राह्मणश्चासि विप्राणां दीक्षितो द्विजः ।
आदिस्त्वमसि लोकानां संहर्ता काल एव च ॥
यच्चान्यदपि लोकेषु सत्त्वं तेजोधिकं स्मृतम् ।
तत्सर्वं भगवानेव इति मे निश्चिता मतिः ॥१६२
नमस्ते भगवन्देव नमस्ते भक्तवत्सल ।
योगेश्वर नमस्तेऽस्तु नमस्ते विश्वसंभव ॥ १६३
प्रसीद मम भक्तस्य दीनस्य कृपणस्य च ।
अनैश्वर्येण युक्तस्य गतिर्भव सनातन ॥ १६४
यं चापराधं कृतवानज्ञानात्परमेश्वर ।
मद्भक्त इति देवेश तत्सर्वं क्षन्तुमर्हसि ॥ १६५
मोहितश्चास्मि देवेश तुभ्यं रूपविपर्ययात् ।
तेन नार्घ्यं मया दत्तं पाद्यं चापि सुरेश्वर ॥१६६
एवं स्तुत्वाहमीशानं पाद्यमर्घ्यं च भक्तितः ।
कृताञ्जलिपुटो भूत्वा सर्वं तस्मै न्यवेदयम् ॥१६७
ततः शीताम्बुसंयुक्ता दिव्यगन्धसमन्विता ।
पुष्पवृष्टिः शुभा तात पपात मम मूर्धनि ॥ १६८
दुन्दुभिश्च ततो दिव्यस्ताडितो देवकिंकरैः ।
ववौ च मारुतः पुण्यः शुचिगन्धः सुखावहः ॥
ततः प्रीतो महादेवः सपत्नीको वृषध्वजः ।
अब्रवीत्त्रिदशांस्तत्र हर्षयन्निव मां तदा ॥ १७०
पश्यध्वं त्रिदशाः सर्वे उपमन्योर्महात्मनः ।
मयि भक्तिं परां दिव्यामेकभावादवस्थिताम् ॥१७१
एवमुक्तास्ततः कृष्ण सुरास्ते शूलपाणिना ।
ऊचुः प्राञ्जलयः सर्वे नमस्कृत्वा वृषध्वजम् ॥१७२
भगवन्देवदेवेश लोकनाथ जगत्पते ।
लभतां सर्वकामेभ्यः फलं त्वत्तो द्विजोत्तमः ॥१७३
एवमुक्तस्ततः शर्वः सुरैर्ब्रह्मादिभिस्तथा ।
आह मां भगवानीशः प्रहसन्निव शंकरः ॥ १७४
वत्सोपमन्यो प्रीतोऽस्मि पश्य मां मुनिपुंगव ।
दृढभक्तोऽसि विप्रर्षे मया जिज्ञासितो ह्यसि ॥१७५
अनया चैव भक्त्या ते अत्यर्थं प्रीतिमानहम् ।
तस्मात्सर्वान्ददाम्यद्य कामांस्तव यथेप्सितान् ॥
एवमुक्तस्य चैवात्र महादेवेन मे विभो ।
हर्षादश्रूण्यवर्तन्त लोमहर्षश्च जायते ॥ १७७
अब्रुवं च तदा देवं हर्षगद्गदया गिरा ।
जानुभ्यामवनिं गत्वा प्रणम्य च पुनः पुनः ॥१७८
अद्य जातो ह्यहं देव अद्य मे सफलं तपः ।
यन्मे साक्षान्महादेवः प्रसन्नस्तिष्ठतेऽग्रतः ॥ १७९
यं न पश्यन्ति चाराध्य देवा ह्यमितविक्रमम् ।
तमहं दृष्टवान्देवं कोऽन्यो धन्यतरो मया ॥ १८०

एवं ध्यायन्ति विद्वांसः परं तत्त्वं सनातनम् ।
षड्विंशकमिति ख्यातं यत्परात्परमक्षरम् ॥ १८१
स एष भगवान्देवः सर्वतत्त्वादिरव्ययः ।
सर्वतत्त्वविधानज्ञः प्रधानपुरुषेश्वरः ॥ १८२
योऽसृजद्दक्षिणादङ्गाद्ब्रह्माणं लोकसंभवम् ।
वामपार्श्वात्तथा विष्णुं लोकरक्षार्थमीश्वरः ।
युगान्ते चैव संप्राप्ते रुद्रमङ्गात्सृजत्प्रभुः ॥ १८३
स रुद्रः संहरन्कृत्स्नं जगत्स्थावरजङ्गमम् ।
कालो भूत्वा महातेजाः संवर्तक इवानलः ॥१८४
एष देवो महादेवो जगत्सृष्ट्वा चराचरम् ।
कल्पान्ते चैव सर्वेषां स्मृतिमाक्षिप्य तिष्ठति ॥१८५
सर्वगः सर्वभूतात्मा सर्वभूतभवोद्भवः ।
आस्ते सर्वगतो नित्यमदृश्यः सर्वदैवतैः ॥ १८६
यदि देयो वरं मह्यं यदि तुष्टश्च मे प्रभुः ।
भक्तिर्भवतु मे नित्यं शाश्वती त्वयि शंकर ॥१८७
अतीतानागतं चैव वर्तमानं च यद्विभो ।
जानीयामिति मे बुद्धिस्त्वत्प्रसादात्सुरोत्तम ॥ १८८
क्षीरोदनं च भुञ्जीयामक्षयं सह बान्धवैः ।
आश्रमे च सदा मह्यं सांनिध्यं परमस्तु ते ॥१८९
एवमुक्तः स मां प्राह भगवाँल्लोकपूजितः ।
महेश्वरो महातेजाश्चराचरगुरुः प्रभुः ॥ १९०
अजरश्चामरश्चैव भव दुःखविवर्जितः ।
शीलवान्गुणसंपन्नः सर्वज्ञः प्रियदर्शनः ॥ १९१
अक्षयं यौवनं तेऽस्तु तेजश्चैवानलोपमम् ।
क्षीरोदः सागरश्चैव यत्र यत्रेच्छसे मुने ॥ १९२
तत्र ते भविता कामं सांनिध्यं पयसो निधेः ।
क्षीरोदनं च भुङ्क्ष्व त्वममृतेन समन्वितम् ॥ १९३
बन्धुभिः सहितः कल्पं ततो मामुपयास्यसि ।
सांनिध्यमाश्रमे नित्यं करिष्यामि द्विजोत्तम ॥ १९४
तिष्ठ वत्स यथाकामं नोत्कण्ठां कर्तुमर्हसि ।
स्मृतः स्मृतश्च ते विप्र सदा दास्यामि दर्शनम् ॥
एवमुक्त्वा स भगवान्सूर्यकोटिसमप्रभः ।
ममेशानो वरं दत्त्वा तत्रैवान्तरधीयत ॥ १९६
एवं दृष्टो मया कृष्ण देवदेवः समाधिना ।
तदवाप्तं च मे सर्वं यदुक्तं तेन धीमता ॥ १९७
प्रत्यक्षं चैव ते कृष्ण पश्य सिद्धान्व्यवस्थितान् ।
ऋषीन्विद्याधरान्यक्षान्गन्धर्वाप्सरसस्तथा ॥ १९८
पश्य वृक्षान्मनोरम्यान्सदा पुष्पफलान्वितान् ।
सर्वर्तुकुसुमैर्युक्तान्स्निग्धपत्रान्सुशाखिनः ।
सर्वमेतन्महाबाहो दिव्यभावसमन्वितम् ॥ १९९

इति श्रीमहाभारते अनुशासनपर्वणि
चतुर्दशोऽध्यायः ॥ १४ ॥

१५

उपमन्युरुवाच ।

एतान्सहस्रशश्चान्यान्समनुध्यातवान्हरः ।
कस्मात्प्रसादं भगवान्न कुर्यात्तव माधव ॥ १
त्वादृशेन हि देवानां श्लाघनीयः समागमः ।
ब्रह्मण्येनानृशंसेन श्रद्दधानेन चाप्युत ।
जप्यं च ते प्रदास्यामि येन द्रक्ष्यसि शंकरम् ॥ २

कृष्ण उवाच ।

अब्रुवं तमहं ब्रह्मंस्त्वत्प्रसादान्महामुने ।
द्रक्ष्ये दितिजसंघानां मर्दनं त्रिदशेश्वरम् ॥ ३
दिनेऽष्टमे च विप्रेण दीक्षितोऽहं यथाविधि ।
दण्डी मुण्डी कुशी चीरी घृताक्तो मेखली तथा ॥
मासमेकं फलाहारो द्वितीयं सलिलाशनः ।
तृतीयं च चतुर्थं च पञ्चमं चानिलाशनः ॥ ५
एकपादेन तिष्ठंश्च ऊर्ध्वबाहुरतन्द्रितः ।
तेजः सूर्यसहस्रस्य अपश्यं दिवि भारत ॥ ६
तस्य मध्यगतं चापि तेजसः पाण्डुनन्दन ।
इन्द्रायुधपिनद्धाङ्गं विद्युन्मालागवाक्षकम् ।

नीलशैलचयप्रख्यं बलाकाभूषितं घनम् ॥ ७
तस्मास्थितश्च भगवान्देव्या सह महाद्युतिः ।
तपसा तेजसा कान्त्या दीप्तया सह भार्यया ॥ ८
राज भगवांस्तत्र देव्या सह महेश्वरः ।
सोमेन सहितः सूर्यो यथा मेघस्थितस्तथा ॥ ९
संहृष्टरोमा कौन्तेय विस्मयोत्फुल्ललोचनः ।
अपश्यं देवसंघानां गतिमार्तिहरं हरम् ॥ १०

किरीटिनं गदिनं शूलपाणिं
व्याघ्राजिनं जटिलं दण्डपाणिम् ।
पिनाकिनं वज्रिणं तीक्ष्णदंष्ट्रं
शुभाङ्गदं व्यालयज्ञोपवीतम् ॥ ११
दिव्यां मालामुरसानेकवर्णां
समुद्वहन्तं गुल्फदेशावलम्बाम् ।
चन्द्रं यथा परिविष्टं ससंध्यं
वर्षात्यये तद्वदपश्यमेनम् ॥ १२

प्रमथानां गणैश्चैव समन्तात्परिवारितम् ।
शरदीव सुदुष्प्रेक्ष्यं परिविष्टं दिवाकरम् ॥ १३
एकादश तथा चैनं रुद्राणां वृषवाहनम् ।
अस्तुवन्नियतात्मानः कर्मभिः शुभकर्मिणम् ॥ १४
आदित्या वसवः साध्या विश्वेदेवास्तथाश्विनौ ।
विश्वाभिः स्तुतिभिर्देवं विश्वेदेवं समस्तुवन् ॥ १५
शतक्रतुश्च भगवान्विष्णुश्चादितिनन्दनौ ।
ब्रह्मा रथन्तरं साम ईरयन्ति भवान्तिके ॥ १६
योगीश्वराः सुबहवो योगदं पितरं गुरुम् ।
ब्रह्मर्षयश्च ससुतास्तथा देवर्षयश्च वै ॥ १७
पृथिवी चान्तरिक्षं च नक्षत्राणि ग्रहास्तथा ।
मासार्धमासा ऋतवो रात्र्यः संवत्सराः क्षणाः ॥१८
मुहूर्ताश्च निमेषाश्च तथैव युगपर्ययाः ।
दिव्या राजन्नमस्यन्ति विद्याः सर्वा दिशस्तथा ॥
सनत्कुमारो वेदाश्च इतिहासास्तथैव च ।
मरीचिरङ्गिरा अत्रिः पुलस्त्यः पुलहः क्रतुः ॥ २०
मनवः सप्तसोमश्च अथर्वा सबृहस्पतिः ।
भृगुर्दक्षः कश्यपश्च वसिष्ठः काश्य एव च ॥ २१
छन्दांसि दीक्षा यज्ञाश्च दक्षिणाः पावको हविः ।
यज्ञोपगानि द्रव्याणि मूर्तिमन्ति युधिष्ठिर ॥ २२
प्रजानां पतयः सर्वे सरितः पन्नगा नगाः ।
देवानां मातरः सर्वा देवपत्न्यः सकन्यकाः ॥ २३
सहस्राणि मुनीनां च अयुतान्यर्बुदानि च ।
नमस्यन्ति प्रभुं शान्तं पर्वताः सागरा दिशः ॥ २४
गन्धर्वाप्सरसश्चैव गीतवादित्रकोविदाः ।
दिव्यतानेन गायन्तः स्तुवन्ति भवमद्भुतम् ।
विद्याधरा दानवाश्च गुह्यका राक्षसास्तथा ॥ २५
सर्वाणि चैव भूतानि स्थावराणि चराणि च ।
नमस्यन्ति महाराज वाङ्मनःकर्मभिर्विभुम् ।
पुरस्ताद्धिष्ठितः शर्वो ममासीत्त्रिदशेश्वरः ॥ २६
पुरस्ताद्धिष्ठितं दृष्ट्वा ममेशानं च भारत ।
सप्रजापतिशक्रान्तं जगन्मामभ्युदैक्षत ॥ २७
ईक्षितुं च महादेवं न मे शक्तिरभूत्तदा ।
ततो मामब्रवीद्देवः पश्य कृष्ण वदस्व च ॥ २८
शिरसा वन्दिते देवे देवी प्रीता उमाभवत् ।
ततोऽहमस्तुवं स्थाणुं स्तुतं ब्रह्मादिभिः सुरैः ॥ २९

नमोऽस्तु ते शाश्वत सर्वयोने
ब्रह्माधिपं त्वामृषयो वदन्ति ।
तपश्च सत्त्वं च रजस्तमश्च
त्वामेव सत्यं च वदन्ति सन्तः ॥ ३०

त्वं वै ब्रह्मा च रुद्रश्च वरुणोऽग्निर्मनुर्भवः ।
धाता त्वष्टा विधाता च त्वं प्रभुः सर्वतोमुखः ॥३१
त्वत्तो जातानि भूतानि स्थावराणि चराणि च ।
त्वमादिः सर्वभूतानां संहारश्च त्वमेव हि ॥ ३२

ये चेन्द्रियार्थाश्च मनश्च कृत्स्नं

ये वायवः सप्त तथैव चाग्निः ।
ये वा दिविस्था देवताश्चापि पुंसां
तस्मात्परं त्वामृषयो वदन्ति ॥ ३३
वेदा यज्ञाश्च सोमश्च दक्षिणा पावको हविः ।
यज्ञोपगं च यत्किंचिद्भगवांस्तदसंशयम् ॥ ३४
इष्टं दत्तमधीतं च व्रतानि नियमाश्च ये ।
ह्रीः कीर्तिः श्रीर्द्युतिस्तुष्टिः सिद्धिश्चैव त्वदर्पणा ॥
कामः क्रोधो भयं लोभो मदः स्तम्भोऽथ मत्सरः ।
आधयो व्याधयश्चैव भगवंस्तनयास्तव ॥ ३६
कृतिर्विकारः प्रलयः प्रधानं प्रभवोऽव्ययः ।
मनसः परमा योनिः स्वभावश्चापि शाश्वतः ।
अव्यक्तः पावन विभो सहस्रांशो हिरण्मयः ॥ ३७
आदिर्गुणानां सर्वेषां भवान्वै जीवनाश्रयः ।
महानात्मा मतिर्ब्रह्मा विश्वः शंभुः स्वयंभुवः ॥३८
बुद्धिः प्रज्ञोपलब्धिश्च संवित्ख्यातिर्धृतिः स्मृतिः ।
पर्यायवाचकैः शब्दैर्महानात्मा विभाव्यसे ॥ ३९
त्वां बुद्ध्वा ब्राह्मणो विद्वान्न प्रमोहं निगच्छति ।
हृदयं सर्वभूतानां क्षेत्रज्ञस्त्वमृषिष्टुतः ॥ ४०
सर्वतःपाणिपादस्त्वं सर्वतोक्षिशिरोमुखः ।
सर्वतःश्रुतिमाँल्लोके सर्वमावृत्य तिष्ठसि ॥ ४१
फलं त्वमसि तिग्मांशो निमेषादिषु कर्मसु ।
त्वं वै प्रभार्चिः पुरुषः सर्वस्य हृदि संस्थितः ।
अणिमा लघिमा प्राप्तिरीशानो ज्योतिरव्ययः ॥४२
त्वयि बुद्धिर्मतिर्लोकाः प्रपन्नाः संश्रिताश्च ये ।
ध्यानिनो नित्ययोगाश्च सत्यसंधा जितेन्द्रियाः ॥४३
यस्त्वां ध्रुवं वेदयते गुहाशयं
प्रभुं पुराणं पुरुषं विश्वरूपम् ।
हिरण्मयं बुद्धिमतां परां गतिं
स बुद्धिमान्बुद्धिमतीत्य तिष्ठति ॥ ४४
विदित्वा सप्त सूक्ष्माणि षडङ्गं त्वां च मूर्तितः ।
प्रधानविधियोगस्थस्त्वामेव विशते बुधः ॥ ४५
एवमुक्ते मया पार्थ भवे चार्तिविनाशने ।
चराचरं जगत्सर्वं सिंहनादमथाकरोत् ॥ ४६
सविप्रसंघाश्च सुरासुराश्च
नागाः पिशाचाः पितरो वयांसि ।
रक्षोगणा भूतगणाश्च सर्वे
महर्षयश्चैव तथा प्रणेमुः ॥ ४७
मम मूर्ध्नि च दिव्यानां कुसुमानां सुगन्धिनाम् ।
राशयो निपतन्ति स्म वायुश्च सुसुखो ववौ ॥ ४८
निरीक्ष्य भगवान्देवीमुमां मां च जगद्धितः ।
शतक्रतुं चाभिवीक्ष्य स्वयं मामाह शंकरः ॥ ४९
विद्मः कृष्ण परां भक्तिमस्मासु तव शत्रुहन् ।
क्रियतामात्मनः श्रेयः प्रीतिर्हि परमा त्वयि ॥ ५०
वृणीष्वाष्टौ वरान्कृष्ण दातास्मि तव सत्तम ।
ब्रूहि यादवशार्दूल यानिच्छसि सुदुर्लभान् ॥ ५१

इति श्रीमहाभारते अनुशासनपर्वणि
पञ्चदशोऽध्यायः ॥ १५ ॥

१६

कृष्ण उवाच ।

मूर्ध्ना निपत्य नियतस्तेजःसंनिचये ततः ।
परमं हर्षमागम्य भगवन्तमथाब्रुवम् ॥ १
धर्मे दृढत्वं युधि शत्रुघातं
यशस्तथाग्र्यं परमं बलं च ।
योगप्रियत्वं तव संनिकर्षं
वृणे सुतानां च शतं शतानि ॥ २
एवमस्त्विति तद्वाक्यं मयोक्तः प्राह शंकरः ॥ ३
ततो मां जगतो माता धरणी सर्वपावनी ।
उवाचोमा प्रणिहिता शर्वाणी तपसां निधिः ॥ ४
दत्तो भगवता पुत्रः साम्बो नाम तवानघ ।
मत्तोऽप्यष्टौ वरानिष्टान्गृहाण त्वं ददामि ते ।

णम्य शिरसा सा च मयोक्ता पाण्डुनन्दन ।। ५
द्विजेष्वकोपं पितृतः प्रसादं
शतं सुतानामुपभोगं परं च ।
कुले प्रीतिं मातृतश्च प्रसादं
शमप्राप्तिं प्रवृणे चापि दाक्ष्यम् ।। ६

देव्युवाच ।

एवं भविष्यत्यमरप्रभाव
नाहं मृषा जातु वदे कदाचित् ।
भार्यासहस्राणि च षोडशैव
तासु प्रियत्वं च तथाक्षयत्वम् ।। ७
प्रीतिं चाग्र्यां बान्धवानां सकाशा-
द्ददामि ते वपुषः काम्यतां च ।
भोक्ष्यन्ते वै सप्ततिर्वै शतानि
गृहे तुभ्यमतिथीनां च नित्यम् ।। ८

वासुदेव उवाच ।

एवं दत्त्वा वरान्देवो मम देवी च भारत ।
अन्तर्हितः क्षणे तस्मिन्सगणो भीमपूर्वज ।। ९
एतदत्यद्भुतं सर्वं ब्राह्मणायातितेजसे ।
उपमन्यवे मया कृत्स्नमाख्यातं कौरवोत्तम ।। १०
नमस्कृत्वा तु स प्राह देवदेवाय सुव्रत ।
नास्ति शर्वसमो दाने नास्ति शर्वसमो रणे ।
नास्ति शर्वसमो देवो नास्ति शर्वसमा गतिः।।११
ऋषिरासीत्कृते तात तण्डिरित्येव विश्रुतः ।
दश वर्षसहस्राणि तेन देवः समाधिना ।
आराधितोऽभूद्भक्तेन तस्योदर्कं निशामय ।। १२
स दृष्टवान्महादेवमस्तौषीच्च स्तवैर्विभुम् ।
पवित्राणां पवित्रस्त्वं गतिर्गतिमतां वर ।
अत्युग्रं तेजसां तेजस्तपसां परमं तपः ।। १३
विश्वावसुहिरण्याक्षपुरुहूतनमस्कृत ।
भूरिकल्याणद विभो पुरुसत्य नमोऽस्तु ते ।। १४
जातीमरणभीरूणां यतीनां यततां विभो ।
निर्वाणद सहस्रांशो नमस्तेऽस्तु सुखाश्रय ।। १५
ब्रह्मा शतक्रतुर्विष्णुर्विश्वेदेवा महर्षयः ।
न विदुस्त्वां तु तत्त्वेन कुतो वेत्स्यामहे वयम् ।।१६
त्वत्तः प्रवर्तते कालस्त्वयि कालश्च लीयते ।
कालाख्यः पुरुषाख्यश्च ब्रह्माख्यश्च त्वमेव हि ।।१७
तनवस्ते स्मृतास्तिस्रः पुराणज्ञैः सुरर्षिभिः ।
अधिपौरुषमध्यात्ममधिभूताधिदैवतम् ।
अधिलोक्याधिविज्ञानमधियज्ञस्त्वमेव हि ।। १८
त्वां विदित्वात्मदेहस्थं दुर्विदं दैवतैरपि ।
विद्वांसो यान्ति निर्मुक्ताः परं भावमनामयम् ।।१९
अनिच्छतस्तव विभो जन्ममृत्युरनेकतः ।
द्वारं त्वं स्वर्गमोक्षाणामाक्षेप्ता त्वं ददासि च ।।२०
त्वमेव मोक्षः स्वर्गश्च कामः क्रोधस्त्वमेव हि ।
सत्त्वं रजस्तमश्चैव अधश्चोर्ध्वं त्वमेव हि ।। २१
ब्रह्मा विष्णुश्च रुद्रश्च स्कन्देन्द्रौ सविता यमः ।
वरुणेन्दू मनुर्धाता विधाता त्वं धनेश्वरः ।। २२
भूर्वायुर्ज्योतिरापश्च वाग्बुद्धिस्त्वं मतिर्मनः ।
कर्म सत्यानृते चोभे त्वमेवास्ति च नास्ति च ।।२३
इन्द्रियाणीन्द्रियार्थाश्च तत्परं प्रकृतेर्ध्रुवम् ।
विश्वाविश्वपरो भावश्चिन्त्याचिन्त्यस्त्वमेव हि ।।२४
यच्चैतत्परमं ब्रह्म यच्च तत्परमं पदम् ।
या गतिः सांख्ययोगानां स भवान्नात्र संशयः ।।२५
नूनमद्य कृतार्थाः स्म नूनं प्राप्ताः सतां गतिम् ।
यां गतिं प्राप्नुवन्तीह ज्ञाननिर्मलबुद्धयः ।। २६
अहो मूढाः स्म सुचिरमिमं कालमचेतसः ।
यन्न विद्मः परं देवं शाश्वतं यं विदुर्बुधाः ।। २७
सोऽयमासादितः साक्षाद्बहुभिर्जन्मभिर्मया ।
भक्तानुग्रहकृद्देवो यं ज्ञात्वामृतमश्नुते ।। २८
देवासुरमनुष्याणां यच्च गुह्यं सनातनम् ।

गुहायां निहितं ब्रह्म दुर्विज्ञेयं सुरैरपि ॥ २९
स एष भगवान्देवः सर्वकृत्सर्वतोमुखः ।
सर्वात्मा सर्वदर्शी च सर्वगः सर्ववेदिता ॥ ३०
प्राणकृत्प्राणभृत्प्राणी प्राणदः प्राणिनां गतिः ।
देहकृद्देहभृद्देही देहभुग्देहिनां गतिः ॥ ३१
अध्यात्मगतिनिष्ठानां ध्यानिनामात्मवेदिनाम् ।
अपुनर्मारकामानां या गतिः सोऽयमीश्वरः ॥ ३२
अयं च सर्वभूतानां शुभाशुभगतिप्रदः ।
अयं च जन्ममरणे विदध्यात्सर्वजन्तुषु ॥ ३३
अयं च सिद्धिकामानामृषीणां सिद्धिदः प्रभुः
अयं च मोक्षकामानां द्विजानां मोक्षदः प्रभुः ॥
भूराद्यान्सर्वभुवनानुत्पाद्य सदिवौकसः ।
बिभर्ति देवस्तनुभिरष्टाभिश्च ददाति च ॥ ३५
अतः प्रवर्तते सर्वमस्मिन्सर्वं प्रतिष्ठितम् ।
अस्मिंश्च प्रलयं याति अयमेकः सनातनः ॥ ३६
अयं स सत्यकामानां सत्यलोकः परः सताम् ।
अपवर्गश्च मुक्तानां कैवल्यं चात्मवादिनाम् ॥ ३७
अयं ब्रह्मादिभिः सिद्धैर्गुहायां गोपितः प्रभुः ।
देवासुरमनुष्याणां न प्रकाशो भवेदिति ॥ ३८
तं त्वां देवासुरनरास्तत्त्वेन न विदुर्भवम् ।
मोहिताः खल्वनेनैव हृच्छयेन प्रवेशिताः ॥ ३९
ये चैनं संप्रपद्यन्ते भक्तियोगेन भारत ।
तेषामेवात्मनात्मानं दर्शयत्येष हृच्छयः ॥ ४०
यं ज्ञात्वा न पुनर्जन्म मरणं चापि विद्यते ।
यं विदित्वा परं वेद्यं वेदितव्यं न विद्यते ॥ ४१
यं लब्ध्वा परमं लाभं मन्यते नाधिकं पुनः ।
प्राणसूक्ष्मां परां प्राप्तिमागच्छत्यक्षयावहाम् ॥ ४२
यं सांख्या गुणतत्त्वज्ञाः सांख्यशास्त्रविशारदाः ।
सूक्ष्मज्ञानरताः पूर्वं ज्ञात्वा मुच्यन्ति बन्धनैः ॥४३
यं च वेदविदो वेद्यं वेदान्तेषु प्रतिष्ठितम् ।
प्राणायामपरा नित्यं यं विशन्ति जपन्ति च ॥ ४४
अयं स देवयानानामादित्यो द्वारमुच्यते ।
अयं च पितृयानानां चन्द्रमा द्वारमुच्यते ॥ ४५
एष कालगतिश्चित्रा संवत्सरयुगादिषु ।
भावाभावौ तदात्वे च अयने दक्षिणोत्तरे ॥ ४६
एवं प्रजापतिः पूर्वमाराध्य बहुभिः स्तवैः ।
वरयामास पुत्रत्वे नीललोहितसंज्ञितम् ॥ ४७
ऋग्भिर्यमनुशंसन्ति तन्त्रे कर्मणि बह्वृचः ।
यजुर्भिर्यं त्रिधा वेद्यं जुह्वत्यध्वर्यवोऽध्वरे ॥ ४८
सामभिर्यं च गायन्ति सामगाः शुद्धबुद्धयः ।
यज्ञस्य परमा योनिः पतिश्चायं परः स्मृतः ॥ ४९
रात्र्यहःश्रोत्रनयनः पक्षमासशिरोभुजः ।
ऋतुवीर्यस्तपोधैर्यो ह्यब्दगुह्योरुपादवान् ॥ ५०
मृत्युर्यमो हुताशश्च कालः संहारवेगवान् ।
कालस्य परमा योनिः कालश्चायं सनातनः ॥ ५१
चन्द्रादित्यौ सनक्षत्रौ सग्रहौ सह वायुना ।
ध्रुवः सप्तर्षयश्चैव भुवनाः सप्त एव च ॥ ५२
प्रधानं महदव्यक्तं विशेषान्तं सवैकृतम् ।
ब्रह्मादि स्तम्बपर्यन्तं भूतादि सदसच्च यत् ॥ ५३
अष्टौ प्रकृतयश्चैव प्रकृतिभ्यश्च यत्परम् ।
अस्य देवस्य यद्भागं कृत्स्नं संपरिवर्तते ॥ ५४
एतत्परममानन्दं यत्तच्छाश्वतमेव च ।
एषा गतिर्विरक्तानामेष भावः परः सताम् ॥ ५५
एतत्पदमनुद्विग्नमेतद्ब्रह्म सनातनम् ।
शास्त्रवेदाङ्गविदुषामेतद्ध्यानं परं पदम् ॥ ५६
इयं सा परमा काष्ठा इयं सा परमा कला ।
इयं सा परमा सिद्धिरियं सा परमा गतिः ॥ ५७
इयं सा परमा शान्तिरियं सा निर्वृतिः परा ।
यं प्राप्य कृतकृत्याः स्म इत्यमन्यन्त वेधसः ॥ ५८
इयं तुष्टिरियं सिद्धिरियं श्रुतिरियं स्मृतिः ।

अध्यात्मगतिनिष्ठानां विदुषां प्राप्तिरव्यया ॥ ५९
यजतां यज्ञकामानां यज्ञैर्विपुलदक्षिणैः ।
या गतिर्दैवतैर्दिव्या सा गतिस्त्वं सनातन ॥ ६०
जप्यहोमव्रतैः कृच्छ्रैर्नियमैर्देहपातनैः ।
तप्यतां या गतिर्देव वैराजे सा गतिर्भवान् ॥ ६१
कर्मन्यासकृतानां च विरक्तानां ततस्ततः ।
या गतिर्ब्रह्मभवने सा गतिस्त्वं सनातन ॥ ६२
अपुनर्मारकामानां वैराग्ये वर्ततां परे ।
विकृतीनां लयानां च सा गतिस्त्वं सनातन ॥ ६३
ज्ञानविज्ञाननिष्ठानां निरुपाख्या निरञ्जना ।
कैवल्या या गतिर्देव परमा सा गतिर्भवान ॥ ६४
वेदशास्त्रपुराणोक्ताः पञ्चैता गतयः स्मृताः ।
त्वत्प्रसादाद्धि लभ्यन्ते न लभ्यन्तेऽन्यथा विभो ॥
इति तण्डिस्तपोयोगात्तुष्टावेशानमव्ययम् ।
जगौ च परमं ब्रह्म यत्पुरा लोककृज्जगौ ॥ ६६
ब्रह्मा शतक्रतुर्विष्णुर्विश्वेदेवा महर्षयः ।
न विदुस्त्वामिति ततस्तुष्टः प्रोवाच तं शिवः ॥ ६७
अक्षयश्चाव्ययश्चैव भविता दुःखवर्जितः ।
यशस्वी तेजसा युक्तो दिव्यज्ञानसमन्वितः ॥ ६८
ऋषीणामभिगम्यश्च सूत्रकर्ता सुतस्तव ।
मत्प्रसादाद्द्विजश्रेष्ठ भविष्यति न संशयः ॥ ६९
कं वा कामं ददाम्यद्य ब्रूहि यद्वत्स काङ्क्षसे ।
प्राञ्जलिः स उवाचेदं त्वयि भक्तिर्दृढास्तु मे ॥७०
एवं दत्त्वा वरं देवो वन्द्यमानः सुरर्षिभिः ।
स्तूयमानश्च विबुधैस्तत्रैवान्तरधीयत ॥ ७१
अन्तर्हिते भगवति सानुगे यादवेश्वर ।
ऋषिराश्रममागम्य ममैतत्प्रोक्तवानिह ॥ ७२
यानि च प्रथितान्यादौ तण्डिराख्यातवान्मम ।
नामानि मानवश्रेष्ठ तानि त्वं शृणु सिद्धये ॥ ७३
दश नामसहस्राणि वेदेष्वाह पितामहः ।
शर्वस्य शास्त्रेषु तथा दश नामशतानि वै ॥ ७४
गुह्यानीमानि नामानि तण्डिर्भगवतोऽच्युत ।
देवप्रसादाद्देवेश पुरा प्राह महात्मने ॥ ७५

इति श्रीमहाभारते अनुशासनपर्वणि
षोडशोऽध्यायः ॥ १६ ॥

१७

वासुदेव उवाच ।

ततः स प्रयतो भूत्वा मम तात युधिष्ठिर ।
प्राञ्जलिः प्राह विप्रर्षिर्नामसंहारमादितः ॥ १

उपमन्युरुवाच ।

ब्रह्मप्रोक्तैरृषिप्रोक्तैर्वेदवेदाङ्गसंभवैः ।
सर्वलोकेषु विख्यातैः स्थाणुं स्तोष्यामि नामभिः ॥
महद्भिर्विहितैः सत्यैः सिद्धैः सर्वार्थसाधकैः ।
ऋषिणा तण्डिना भक्त्या कृतैर्देवकृतात्मना ॥ ३
यथोक्तैर्लोकविख्यातैर्मुनिभिस्तत्त्वदर्शिभिः ।
प्रवरं प्रथमं स्वर्ग्यं सर्वभूतहितं शुभम् ।
श्रुतैः सर्वत्र जगति ब्रह्मलोकावतारितैः ॥ ४
यत्तद्रहस्यं परमं ब्रह्मप्रोक्तं सनातनम् ।
वक्ष्ये यदुकुलश्रेष्ठ शृणुष्वावहितो मम ॥ ५
परत्वेन भवं देवं भक्तस्त्वं परमेश्वरम् ।
तेन ते श्रावयिष्यामि यत्तद्ब्रह्म सनातनम ॥ ६
न शक्यं विस्तरात्कृत्स्नं वक्तुं शर्वस्य केनचित् ।
युक्तेनापि विभूतीनामपि वर्षशतैरपि ॥ ७
यस्यादिर्मध्यमन्तश्च सुरैरपि न गम्यते ।
कस्तस्य शक्नुयाद्वक्तुं गुणान्कार्त्स्न्येन माधव ॥ ८
किं तु देवस्य महतः संक्षिप्तार्थपदाक्षरम ।
शक्तितश्चरितं वक्ष्ये प्रसादात्तस्य चैव हि ॥ ९
अप्राप्येह ततोऽनुज्ञां न शक्यः स्तोतुमीश्वरः ।
यदा तेनाभ्यनुज्ञातः स्तुत एव सदा भवम् ॥ १०
अनादिनिधनस्याहं सर्वयोनेर्महात्मनः ।

नाम्नां कंचित्समुद्देशं वक्ष्ये ह्यव्यक्तयोनिनः ॥ ११
वरदस्य वरेण्यस्य विश्वरूपस्य धीमतः ।
शृणु नामसमुद्देशं यदुक्तं पद्मयोनिना ॥ १२
दश नामसहस्राणि यान्याह प्रपितामहः ।
तानि निर्मथ्य मनसा दध्नो घृतमिवोद्धृतम् ॥ १३
गिरेः सारं यथा हेम पुष्पात्सारं यथा मधु ।
घृतात्सारं यथा मण्डस्तथैतत्सारमुद्धृतम् ॥ १४
सर्वपाप्मापहमिदं चतुर्वेदसमन्वितम् ।
प्रयत्नेनाधिगन्तव्यं धार्यं च प्रयतात्मना ।
शान्तिदं पौष्टिकं चैव रक्षोघ्नं पावनं महत् ॥ १५
इदं भक्ताय दातव्यं श्रद्दधानास्तिकाय च ।
नाश्रद्दधानरूपाय नास्तिकायाजितात्मने ॥ १६
यश्चाभ्यसूयते देवं भूतात्मानं पिनाकिनम् ।
स कृष्ण नरकं याति सह पूर्वैः सहानुगैः ॥ १७
इदं ध्यानमिदं योगमिदं ध्येयमनुत्तमम् ।
इदं जप्यमिदं ज्ञानं रहस्यमिदमुत्तमम् ।
इदं ज्ञात्वान्तकालेऽपि गच्छेद्धि परमां गतिम् ॥१८
पवित्रं मङ्गलं पुण्यं कल्याणमिदमुत्तमम् ।
निगदिष्ये महाबाहो स्तवानामुत्तमं स्तवम् ॥ १९
इदं ब्रह्मा पुरा कृत्वा सर्वलोकपितामहः ।
सर्वस्तवानां दिव्यानां राजत्वे समकल्पयत् ॥ २०
तदाप्रभृति चैवायमीश्वरस्य महात्मनः ।
स्तवराजेति विख्यातो जगत्यमरपूजितः ।
ब्रह्मलोकादयं चैव स्तवराजोऽवतारितः ॥ २१
यस्मात्तण्डिः पुरा प्राह तेन तण्डिकृतोऽभवत् ।
स्वर्गाच्चैवात्र भूलोकं तण्डिना ह्यवतारितः ॥ २२
सर्वमङ्गलमङ्गल्यं सर्वपापप्रणाशनम् ।
निगदिष्ये महाबाहो स्तवानामुत्तमं स्तवम् ॥ २३
ब्रह्मणामपि यद्ब्रह्म पराणामपि यत्परम् ।
तेजसामपि यत्तेजस्तपसामपि यत्तपः ॥ २४
शान्तीनामपि या शान्तिर्द्युतीनामपि या द्युतिः ।
दान्तानामपि यो दान्तो धीमतामपि या च धीः ॥
देवानामपि यो देवो मुनीनामपि यो मुनिः ।
यज्ञानामपि यो यज्ञः शिवानामपि यः शिवः ॥२६
रुद्राणामपि यो रुद्रः प्रभुः प्रभवतामपि ।
योगिनामपि यो योगी कारणानां च कारणम् ॥२७
यतो लोकाः संभवन्ति न भवन्ति यतः पुनः ।
सर्वभूतात्मभूतस्य हरस्यामिततेजसः ॥ २८
अष्टोत्तरसहस्रं तु नाम्नां शर्वस्य मे शृणु ।
यच्छ्रुत्वा मनुजश्रेष्ठ सर्वान्कामानवाप्स्यसि ॥ २९

* * * *

स्थिरः स्थाणुः प्रभुर्भानुः प्रवरो वरदो वरः ।
सर्वात्मा सर्वविख्यातः सर्वः सर्वकरो भवः ॥३०
जटी चर्मी शिखण्डी च सर्वाङ्गः सर्वभावनः ।
हरिश्च हरिणाक्षश्च सर्वभूतहरः प्रभुः ॥ ३१
प्रवृत्तिश्च निवृत्तिश्च नियतः शाश्वतो ध्रुवः ।
श्मशानचारी भगवान्खचरो गोचरोऽर्दनः ॥ ३२
अभिवाद्यो महाकर्मा तपस्वी भूतभावनः ।
उन्मत्तवेशप्रच्छन्नः सर्वलोकप्रजापतिः ॥ ३३
महारूपो महाकायः सर्वरूपो महायशाः ।
महात्मा सर्वभूतश्च विरूपो वामनो मनुः ॥ ३४
लोकपालोऽन्तर्हितात्मा प्रसादो हयगर्दभिः ।
पवित्रश्च महांश्चैव नियमो नियमाश्रयः ॥ ३५
सर्वकर्मा स्वयंभूश्च आदिरादिकरो निधिः ।
सहस्राक्षो विरूपाक्षः सोमो नक्षत्रसाधकः ॥ ३६
चन्द्रसूर्यगतिः केतुर्ग्रहो ग्रहपतिर्वरः ।
अद्रिरद्र्यालयः कर्ता मृगबाणार्पणोऽनघः ॥ ३७
महातपा घोरतपा अदीनो दीनसाधकः ।
संवत्सरकरो मन्त्रः प्रमाणं परमं तपः ॥ ३८
योगी योज्यो महाबीजो महारेता महातपाः ।

सुवर्णरेताः सर्वज्ञः सुबीजो वृषवाहनः ॥ ३९
दशबाहुस्त्वनिमिषो नीलकण्ठ उमापतिः ।
विश्वरूपः स्वयंश्रेष्ठो बलवीरो बलो गणः ॥ ४०
गणकर्ता गणपतिर्दिग्वासाः काम्य एव च ।
पवित्रं परमं मन्त्रः सर्वभावकरो हरः ॥ ४१
कमण्डलुधरो धन्वी बाणहस्तः कपालवान् ।
अशनी शतघ्नी खड्गी पट्टिशी चायुधी महान् ॥४२
स्रुवहस्तः सुरूपश्च तेजस्तेजस्करो निधिः ।
उष्णीषी च सुवक्त्रश्च उदग्रो विनतस्तथा ॥ ४३
दीर्घश्च हरिकेशश्च सुतीर्थः कृष्ण एव च ।
सृगालरूपः सर्वार्थो मुण्डः कुण्डी कमण्डलुः ॥४४
अजश्च मृगरूपश्च गन्धधारी कपर्द्यपि ।
ऊर्ध्वरेता ऊर्ध्वलिङ्ग ऊर्ध्वशायी नभस्तलः ॥ ४५
त्रिजटश्चीरवासाश्च रुद्रः सेनापतिर्विभुः ।
अहश्चरोऽथ नक्तं च तिग्ममन्युः सुवर्चसः ॥ ४६
गजहा दैत्यहा लोको लोकधाता गुणाकरः ।
सिंहशार्दूलरूपश्च आर्द्रचर्माम्बरावृतः ॥ ४७
कालयोगी महानादः सर्ववासश्चतुष्पथः ।
निशाचरः प्रेतचारी भूतचारी महेश्वरः ॥ ४८
बहुभूतो बहुधनः सर्वाधारोऽमितो गतिः ।
नृत्यप्रियो नित्यनर्तो नर्तकः सर्वलासकः ॥ ४९
घोरो महातपाः पाशो नित्यो गिरिचरो नभः ।
सहस्रहस्तो विजयो व्यवसायो ह्यनिन्दितः ॥ ५०
अमर्षणो मर्षणात्मा यज्ञहा कामनाशनः ।
दक्षयज्ञापहारी च सुसहो मध्यमस्तथा ॥ ५१
तेजोपहारी बलहा मुदितोऽर्थो जितो वरः ।
गम्भीरघोषो गम्भीरो गम्भीरबलवाहनः ॥ ५२
न्यग्रोधरूपो न्यग्रोधो वृक्षकर्णस्थितिर्विभुः ।
तीक्ष्णतापश्च हर्यश्वः सहायः कर्मकालवित् ॥ ५३
विष्णुप्रसादितो यज्ञः समुद्रो वडवामुखः ।
हुताशनसहायश्च प्रशान्तात्मा हुताशनः ॥ ५४
उग्रतेजा महातेजा जयो विजयकालवित् ।
ज्योतिषामयनं सिद्धिः संधिर्विग्रह एव च ॥ ५५
शिखी दण्डी जटी ज्वाली मूर्तिजो मूर्धगो बली ।
वैणवी पणवी ताली कालः कालकटंकटः ॥ ५६
नक्षत्रविग्रहविधिर्गुणवृद्धिर्लयोऽगमः ।
प्रजापतिर्दिशाबाहुर्विभागः सर्वतोमुखः ॥ ५७
विमोचनः सुरगणो हिरण्यकवचोद्भवः ।
मेढ्रजो बलचारी च महाचारी स्तुतस्तथा ॥ ५८
सर्वतूर्यनिनादी च सर्ववाद्यपरिग्रहः ।
व्यालरूपो बिलावासी हेममाली तरंगवित् ॥ ५९
त्रिदशस्त्रिकालधृक्कर्मसर्वबन्धविमोचनः ।
बन्धनस्त्वसुरेन्द्राणां युधि शत्रुविनाशनः ॥ ६०
सांख्यप्रसादो दुर्वासाः सर्वसाधुनिषेवितः ।
प्रस्कन्दनो विभागश्च अतुल्यो यज्ञभागवित् ॥ ६१
सर्वावासः सर्वचारी दुर्वासा वासवोऽमरः ।
हैमो हेमकरो यज्ञः सर्वधारी धरोत्तमः ॥ ६२
लोहिताक्षो महाक्षश्च विजयाक्षो विशारदः ।
संग्रहो निग्रहः कर्ता सर्पचीरनिवासनः ॥ ६३
मुख्योऽमुख्यश्च देहश्च देहर्द्धिः सर्वकामदः ।
सर्वकालप्रसादश्च सुबलो बलरूपधृक् ॥ ६४
आकाशनिधिरूपश्च निपाती उरगः खगः ।
रौद्ररूपोंऽशुरादित्यो वसुरश्मिः सुवर्चसी ॥ ६५
वसुवेगो महावेगो मनोवेगो निशाचरः ।
सर्वावासी श्रियावासी उपदेशकरो हरः ॥ ६६
मुनिरात्मपतिर्लोके संभोज्यश्च सहस्रदः ।
पक्षी च पक्षिरूपी च अतिदीप्तो विशां पतिः ॥६७
उन्मादो मदनाकारो अर्थार्थकररोमशः ।
वामदेवश्च वामश्च प्राग्दक्षिण्यश्च वामनः ॥ ६८
सिद्धयोगापहारी च सिद्धः सर्वार्थसाधकः ।

भिक्षुश्च भिक्षुरूपश्च विषाणी मृदुरव्ययः ॥ ६९
महासेनो विशाखश्च षष्टिभागो गवां पतिः ।
वज्रहस्तश्च विष्कम्भी चमूस्तम्भन एव च ॥ ७०
ऋतुर्ऋतुकरः कालो मधुर्मधुकरोऽचलः ।
वानस्पत्यो वाजसेनो नित्यमाश्रमपूजितः ॥ ७१
ब्रह्मचारी लोकचारी सर्वचारी सुचारवित् ।
ईशान ईश्वरः कालो निशाचारी पिनाकधृक् ॥७२
नन्दीश्वरश्च नन्दी च नन्दनो नन्दिवर्धनः ।
भगस्याक्षिनिहन्ता च कालो ब्रह्मविदां वरः ॥ ७३
चतुर्मुखो महालिङ्गश्चारुलिङ्गस्तथैव च ।
लिङ्गाध्यक्षः सुराध्यक्षो लोकाध्यक्षो युगावहः ॥७४
बीजाध्यक्षो बीजकर्ता अध्यात्मानुगतो बलः ।
इतिहासकरः कल्पो गौतमोऽथ जलेश्वरः ॥ ७५
दम्भो ह्यदम्भो वैदम्भो वश्यो वश्यकरः कविः ।
लोककर्ता पशुपतिर्महाकर्ता महौषधिः ॥ ७६
अक्षरं परमं ब्रह्म बलवाञ्शक्र एव च ।
नीतिर्ह्यनीतिः शुद्धात्मा शुद्धो मान्यो मनोगतिः ॥
बहुप्रसादः स्वपनो दर्पणोऽथ त्वमित्रजित् ।
वेदकारः सूत्रकारो विद्वान्समरदर्शनः ॥ ७८
महामेघनिवासी च महाघोरो वशीकरः ।
अग्निज्वालो महाज्वालो अतिधूम्रो हुतो हविः ॥७९
वृषणः शंकरो नित्यो वर्चस्वी धूमकेतनः ।
नीलस्तथाङ्गलुब्धश्च शोभनो निरवग्रहः ॥ ८०
स्वस्तिदः स्वस्तिभावश्च भागी भागकरो लघुः ।
उत्सङ्गश्च महाङ्गश्च महागर्भः परो युवा ॥ ८१
कृष्णवर्णः सुवर्णश्च इन्द्रियः सर्वदेहिनाम् ।
महापादो महाहस्तो महाकायो महायशाः ॥ ८२
महामूर्धा महामात्रो महानेत्रो दिगालयः ।
महादन्तो महाकर्णो महामेढ्रो महाहनुः ॥ ८३
महानासो महाकम्बुर्महाग्रीवः श्मशानधृक् ।
महावक्षा महोरस्को अन्तरात्मा मृगालयः ॥ ८४
लम्बनो लम्बितोष्ठश्च महामायः पयोनिधिः ।
महादन्तो महादंष्ट्रो महाजिह्वो महामुखः ॥ ८५
महानखो महारोमा महाकेशो महाजटः ।
असपत्नः प्रसादश्च प्रत्ययो गिरिसाधनः ॥ ८६
स्नेहनोऽस्नेहनश्चैव अजितश्च महामुनिः ।
वृक्षाकारो वृक्षकेतुरनलो वायुवाहनः ॥ ८७
मण्डली मेरुधामा च देवदानवदर्पहा ।
अथर्वशीर्षः सामास्य ऋक्सहस्रामितेक्षणः ॥ ८८
यजुःपादभुजो गुह्यः प्रकाशो जङ्गमस्तथा ।
अमोघार्थः प्रसादश्च अभिगम्यः सुदर्शनः ॥ ८९
उपहारप्रियः शर्वः कनकः काञ्चनः स्थिरः ।
नाभिर्नन्दिकरो भाव्यः पुष्करस्थपतिः स्थिरः ॥९०
द्वादशस्त्रासनश्चाद्यो यज्ञो यज्ञसमाहितः ।
नक्तं कलिश्च कालश्च मकरः कालपूजितः ॥ ९१
सगणो गणकारश्च भूतभावनसारथिः ।
भस्मशायी भस्मगोप्ता भस्मभूतस्तरुर्गणः ॥ ९२
अगणश्चैव लोपश्च महात्मा सर्वपूजितः ।
शङ्कुस्त्रिशङ्कुः संपन्नः शुचिर्भूतनिषेवितः ॥ ९३
आश्रमस्थः कपोतस्थो विश्वकर्मा पतिर्वरः ।
शाखो विशाखस्ताम्रोष्ठो ह्यम्बुजालः सुनिश्चयः ॥
कपिलोऽकपिलः शूर आयुश्चैव परोऽपरः ।
गन्धर्वो ह्यदितिस्तार्क्ष्यः सुविज्ञेयः सुसारथिः ॥९५
परश्वधायुधो देव अर्थकारी सुबान्धवः ।
तुम्बवीणी महाकोप ऊर्ध्वरेता जलेशयः ॥ ९६
उग्रो वंशकरो वंशो वंशनादो ह्यनिन्दितः ।
सर्वाङ्गरूपो मायावी सुहृदो ह्यनिलोऽनलः ॥ ९७
बन्धनो बन्धकर्ता च सुबन्धनविमोचनः ।
स यज्ञारिः स कामारिर्महादंष्ट्रो महायुधः ॥ ९८
बाहुस्त्वनिन्दितः शर्वः शंकरः शंकरोऽधनः ।

अमरेशो महादेवो विश्वदेवः सुरारिहा ॥ ९९
अहिर्बुध्न्यो निर्ऋतिश्च चेकितानो हरिस्तथा ।
अजैकपाच्च कापाली त्रिशङ्कुरजितः शिवः ॥ १००
धन्वन्तरिर्धूमकेतुः स्कन्दो वैश्रवणस्तथा ।
धाता शक्रश्च विष्णुश्च मित्रस्त्वष्टा ध्रुवो धरः ॥ १०१
प्रभावः सर्वगो वायुरर्यमा सविता रविः ।
उदग्रश्च विधाता च मान्धाता भूतभावनः ॥ १०२
रतितीर्थश्च वाग्मी च सर्वकामगुणावहः ।
पद्मगर्भो महागर्भश्चन्द्रवक्त्रो मनोरमः ॥ १०३
बलवांश्चोपशान्तश्च पुराणः पुण्यचञ्चुरी ।
कुरुकर्ता कालरूपी कुरुभूतो महेश्वरः ॥ १०४
सर्वाशयो दर्भशायी सर्वेषां प्राणिनां पतिः ।
देवदेवमुखोऽसक्तः सदसत्सर्वरत्नवित् ॥ १०५
कैलासशिखरावासी हिमवद्गिरिसंश्रयः ।
कूलहारी कूलकर्ता बहुविद्यो बहुप्रदः ॥ १०६
वणिजो वर्धनो वृक्षो नकुलश्चन्दनश्छदः ।
सारग्रीवो महाजत्रुरलोलश्च महौषधः ॥ १०७
सिद्धार्थकारी सिद्धार्थश्छन्दोव्याकरणोत्तरः ।
सिंहनादः सिंहदंष्ट्रः सिंहगः सिंहवाहनः ॥ १०८
प्रभावात्मा जगत्कालस्तालो लोकहितस्तरुः ।
सारङ्गो नवचक्राङ्गः केतुमाली सभावनः ॥ १०९
भूतालयो भूतपतिरहोरात्रमनिन्दितः ।
वाहिता सर्वभूतानां निलयश्च विभुर्भवः ॥ ११०
अमोघः संयतो ह्यश्वो भोजनः प्राणधारणः ।
धृतिमान्मतिमान्दक्षः सत्कृतश्च युगाधिपः ॥ १११
गोपालिर्गोपतिर्ग्रामो गोचर्मवसनो हरः ।
हिरण्यबाहुश्च तथा गुहापालः प्रवेशिनाम् ॥ ११२
प्रतिष्ठायी महाहर्षो जितकामो जितेन्द्रियः ।
गन्धारश्च सुरालश्च तपःकर्मरतिर्धनुः ॥ ११३
महागीतो महानृत्तो ह्यप्सरोगणसेवितः ।
महाकेतुर्धनुर्धातुर्नैकसानुचरश्चलः ॥ ११४
आवेदनीय आवेशः सर्वगन्धसुखावहः ।
तोरणस्तारणो वायुः परिधावति चैकतः ॥ ११५
संयोगो वर्धनो वृद्धो महावृद्धो गणाधिपः ।
नित्य आत्मसहायश्च देवासुरपतिः पतिः ॥ ११६
युक्तश्च युक्तबाहुश्च द्विविधश्च सुपर्वणः ।
आषाढश्च सुषाढश्च ध्रुवो हरिहणो हरः ॥ ११७
वपुरावर्तमानेभ्यो वसुश्रेष्ठो महापथः ।
शिरोहारी विमर्शश्च सर्वलक्षणभूषितः ॥ ११८
अक्षश्च रथयोगी च सर्वयोगी महाबलः ।
समाम्नायोऽसमाम्नायस्तीर्थदेवो महारथः ॥ ११९
निर्जीवो जीवनो मन्त्रः शुभाक्षो बहुकर्कशः ।
रत्नप्रभूतो रक्ताङ्गो महार्णवनिपानवित् ॥ १२०
मूलो विशालो ह्यमृतो व्यक्ताव्यक्तस्तपोनिधिः ।
आरोहणो निरोहश्च शैलहारी महातपाः ॥ १२१
सेनाकल्पो महाकल्पो युगायुगकरो हरिः ।
युगरूपो महारूपः पवनो गहनो नगः ॥ १२२
न्यायनिर्वापणः पादः पण्डितो ह्यचलोपमः ।
बहुमालो महामालः सुमालो बहुलोचनः ॥ १२३
विस्तारो लवणः कूपः कुसुमः सफलोदयः ।
वृषभो वृषभाङ्काङ्गो मणिबिल्वो जटाधरः ॥ १२४
इन्दुर्विसर्गः सुमुखः सुरः सर्वायुधः सहः ।
निवेदनः सुधाजातः सुगन्धारो महाधनुः ॥ १२५
गन्धमाली च भगवानुत्थानः सर्वकर्मणाम् ।
मन्थानो बहुलो बाहुः सकलः सर्वलोचनः ॥ १२६
तरस्ताली करस्ताली ऊर्ध्वसंहननो वहः ।
छत्रं सुच्छत्रो विख्यातः सर्वलोकाश्रयो महान् ॥
मुण्डो विरूपो विकृतो दण्डिमुण्डो विकुर्वणः ।
हर्यक्षः ककुभो वज्री दीप्तजिह्वः सहस्रपात् ॥ १२८
सहस्रमूर्धा देवेन्द्रः सर्वदेवमयो गुरुः ।

सहस्रबाहुः सर्वाङ्गः शरण्यः सर्वलोककृत् ॥१२९
पवित्रं त्रिमधुर्मन्त्रः कनिष्ठः कृष्णपिङ्गलः ।
ब्रह्मदण्डविनिर्माता शतघ्नी शतपाशधृक् ॥ १३०
पद्मगर्भो महागर्भो ब्रह्मगर्भो जलोद्भवः ।
गभस्तिर्ब्रह्मकृद्ब्रह्मा ब्रह्मविद्ब्राह्मणो गतिः ॥ १३१
अनन्तरूपो नैकात्मा तिग्मतेजाः स्वयंभुवः ।
ऊर्ध्वगात्मा पशुपतिर्वातरंहा मनोजवः ॥ १३२
चन्दनी पद्ममालाग्र्यः सुरभ्युत्तरणो नरः ।
कर्णिकारमहास्रग्वी नीलमौलिः पिनाकधृक् ॥
उमापतिरुमाकान्तो जाह्नवीधृगुमाधवः ।
वरो वराहो वरदो वरेशः सुमहास्वनः ॥ १३४
महाप्रसादो दमनः शत्रुहा श्वेतपिङ्गलः ।
प्रीतात्मा प्रयतात्मा च संयतात्मा प्रधानधृक् ॥
सर्वपार्श्वसुतस्तार्क्ष्यो धर्मसाधारणो वरः ।
चराचरात्मा सूक्ष्मात्मा सुवृषो गोवृषेश्वरः ॥ १३६
साध्यर्षिर्वसुरादित्यो विवस्वान्सविता मृडः ।
व्यासः सर्वस्य संक्षेपो विस्तरः पर्ययो नयः ॥१३७
ऋतुः संवत्सरो मासः पक्षः संख्यासमापनः ।
कला काष्ठा लवो मात्रा मुहूर्तोऽहः क्षपाः क्षणाः ॥
विश्वक्षेत्रं प्रजाबीजं लिङ्गमाद्यस्त्वनिन्दितः ।
सदसद्व्यक्तमव्यक्तं पिता माता पितामहः ॥ १३९
स्वर्गद्वारं प्रजाद्वारं मोक्षद्वारं त्रिविष्टपम् ।
निर्वाणं ह्लादनं चैव ब्रह्मलोकः परा गतिः ॥१४०
देवासुरविनिर्माता देवासुरपरायणः ।
देवासुरगुरुर्देवो देवासुरनमस्कृतः ॥ १४१
देवासुरमहामात्रो देवासुरगणाश्रयः ।
देवासुरगणाध्यक्षो देवासुरगणाग्रणीः ॥ १४२
देवातिदेवो देवर्षिर्देवासुरवरप्रदः ।
देवासुरेश्वरो देवो देवासुरमहेश्वरः ॥ १४३
सर्वदेवमयोऽचिन्त्यो देवतात्मात्मसंभवः ।
उद्भिदस्त्रिक्रमो वैद्यो विरजो विरजोम्बरः ॥ १४४
ईड्यो हस्ती सुरव्याघ्रो देवसिंहो नरर्षभः ।
विबुधाग्रवरः श्रेष्ठः सर्वदेवोत्तमोत्तमः ॥ १४५
प्रयुक्तः शोभनो वज्र ईशानः प्रभुरव्ययः ।
गुरुः कान्तो निजः सर्गः पवित्रः सर्ववाहनः ॥
शृङ्गी शृङ्गप्रियो बभ्रू राजराजो निरामयः ।
अभिरामः सुरगणो विरामः सर्वसाधनः ॥ १४७
ललाटाक्षो विश्वदेहो हरिणो ब्रह्मवर्चसः ।
स्थावराणां पतिश्चैव नियमेन्द्रियवर्धनः ॥ १४८
सिद्धार्थः सर्वभूतार्थोऽचिन्त्यः सत्यव्रतः शुचिः ।
व्रताधिपः परं ब्रह्म मुक्तानां परमा गतिः ॥ १४९
विमुक्तो मुक्ततेजाश्च श्रीमाञ्श्रीवर्धनो जगत् ।
यथाप्रधानं भगवानिति भक्त्या स्तुतो मया ॥ १५०
यं न ब्रह्मादयो देवा विदुर्यं न महर्षयः ।
तं स्तव्यमर्च्यं वन्द्यं च कः स्तोष्यति जगत्पतिम् ॥
भक्तिमेव पुरस्कृत्य मया यज्ञपतिर्वसुः ।
ततोऽभ्यनुज्ञां प्राप्यैव स्तुतो मतिमतां वरः ॥१५२
शिवमेभिः स्तुवन्देवं नामभिः पुष्टिवर्धनैः ।
नित्ययुक्तः शुचिर्भूत्वा प्राप्नोत्यात्मानमात्मना ॥ १५३
एतद्धि परमं ब्रह्म स्वयं गीतं स्वयंभुवा ।
ऋषयश्चैव देवाश्च स्तुवन्त्येतेन तत्परम् ॥ १५४
स्तूयमानो महादेवः प्रीयते चात्मनामभिः ।
भक्तानुकम्पी भगवानात्मसंस्थान्करोति तान् ॥१५५
तथैव च मनुष्येषु ये मनुष्याः प्रधानतः ।
आस्तिकाः श्रद्दधानाश्च बहुभिर्जन्मभिः स्तवैः ॥
जाग्रतश्च स्वपन्तश्च व्रजन्तः पथि संस्थिताः ।
स्तुवन्ति स्तूयमानाश्च तुष्यन्ति च रमन्ति च ।
जन्मकोटिसहस्रेषु नानासंसारयोनिषु ॥ १५७
जन्तोर्विशुद्धपापस्य भवे भक्तिः प्रजायते ।
उत्पन्ना च भवे भक्तिरनन्या सर्वभावतः ॥ १५८

कारणं भावितं तस्य सर्वमुक्तस्तु सर्वतः ।
एतद्देवेषु दुष्प्रापं मनुष्येषु न लभ्यते ॥ १५९
निर्विघ्ना निश्चला रुद्रे भक्तिरव्यभिचारिणी ।
तस्यैव च प्रसादेन भक्तिरुत्पद्यते नृणाम् ।
यया यान्ति परां सिद्धिं तद्भावगतचेतसः ॥ १६०
ये सर्वभावोपगताः परत्वेनाभवन्नराः ।
प्रपन्नवत्सलो देवः संसारात्तान्समुद्धरेत् ॥ १६१
एवमन्ये न कुर्वन्ति देवाः संसारमोचनम् ।
मनुष्याणां महादेवादन्यत्रापि तपोबलात् ॥ १६२
इति तेनेन्द्रकल्पेन भगवान्संदसत्पतिः ।
कृत्तिवासाः स्तुतः कृष्ण तण्डिना शुद्धबुद्धिना॥१६३
स्तवमेतं भगवतो ब्रह्मा स्वयमधारयत् ।
ब्रह्मा प्रोवाच शक्राय शक्रः प्रोवाच मृत्यवे ॥ १६४
मृत्युः प्रोवाच रुद्राणां रुद्रेभ्यस्तण्डिमागमत् ।
महता तपसा प्राप्तस्तण्डिना ब्रह्मसद्मनि ॥ १६५
तण्डिः प्रोवाच शुक्राय गौतमायाह भार्गवः ।
वैवस्वताय मनवे गौतमः प्राह माधव ॥ १६६
नारायणाय साध्याय मनुरिष्टाय धीमते ।
यमाय प्राह भगवान्साध्यो नारायणोऽच्युतः ॥१६७
नाचिकेताय भगवानाह वैवस्वतो यमः ।
मार्कण्डेयाय वार्ष्णेय नाचिकेतोऽभ्यभाषत ॥१६८
मार्कण्डेयान्मया प्राप्तं नियमेन जनार्दन ।
तवाप्यहममित्रघ्न स्तवं दद्मयद्य विश्रुतम् ।
स्वर्ग्यमारोग्यमायुष्यं धन्यं बल्यं तथैव च ॥१६९
न तस्य विघ्नं कुर्वन्ति दानवा यक्षराक्षसाः ।
पिशाचा यातुधानाश्च गुह्यका भुजगा अपि ॥१७०
यः पठेत शुचिर्भूत्वा ब्रह्मचारी जितेन्द्रियः ।
अभग्नयोगो वर्षं तु सोऽश्वमेधफलं लभेत् ॥१७१

इति श्रीमहाभारते अनुशासनपर्वणि
सप्तदशोऽध्यायः ॥ १७ ॥

१८

वैशंपायन उवाच ।

महायोगी ततः प्राह कृष्णद्वैपायनो मुनिः ।
पठस्व पुत्र भद्रं ते प्रीयतां ते महेश्वरः ॥ १
पुरा पुत्र मया मेरौ तप्यता परमं तपः ।
पुत्रहेतोर्महाराज स्तव एषोऽनुकीर्तितः ॥ २
लब्धवानस्मि तान्कामानहं वै पाण्डुनन्दन ।
तथा त्वमपि शर्वाद्धि सर्वान्कामानवाप्स्यसि ॥ ३
चतुःशीर्षस्ततः प्राह शक्रस्य दयितः सखा ।
आलम्बायन इत्येव विश्रुतः करुणात्मकः ॥ ४
मया गोकर्णमासाद्य तपस्तप्त्वा शतं समाः ।
अयोनिजानां दान्तानां धर्मज्ञानां सुवर्चसाम् ॥ ५
अजराणामदुःखानां शतवर्षसहस्रिणाम् ।
लब्धं पुत्रशतं शर्वात्पुरा पाण्डुनृपात्मज ॥ ६
वाल्मीकिश्चापि भगवान्युधिष्ठिरमभाषत ।
विवादे साम्नि मुनिभिर्ब्रह्मघ्नो वै भवानिति ।
उक्तः क्षणेन चाविष्टस्तेनाधर्मेण भारत ॥ ७
सोऽहमीशानमनघमस्तौषं शरणं गतः ।
मुक्तश्चास्म्यवशः पापात्ततो दुःखविनाशनः ।
आह मां त्रिपुरघ्नो वै यशस्तेऽग्र्यं भविष्यति ॥ ८
जामदग्न्यश्च कौन्तेयमाह धर्मभृतां वरः ।
ऋषिमध्ये स्थितस्तात तपन्निव विभावसुः ॥ ९
पितृविप्रवधेनाहमार्तो वै पाण्डवाग्रज ।
शुचिर्भूत्वा महादेवं गतवाञ्शरणं नृप ॥ १०
नामभिश्चास्तुवं देवं ततस्तुष्टोऽभवद्भवः ।
परशुं च ददौ देवो दिव्यान्यस्त्राणि चैव मे ॥११
पापं न भविता तेऽद्य अजेयश्च भविष्यसि ।
न ते प्रभविता मृत्युरजरश्च भविष्यसि ॥ १२
आह मां भगवानेवं शिखण्डी शिवविग्रहः ।
यदवाप्तं च मे सर्वं प्रसादात्तस्य धीमतः ॥ १३

असितो देवलश्चैव प्राह पाण्डुसुतं नृपम् ।
शापाच्छक्रस्य कौन्तेय चितो धर्मोऽनशन्मम ।
तन्मे धर्मं यशश्चाग्र्यमायुश्चैवाददद्भवः ॥ १४
ऋषिर्गृत्समदो नाम शक्रस्य दयितः सखा ।
प्राहाजमीढं भगवान्बृहस्पतिसमद्युतिः ॥ १५
वसिष्ठो नाम भगवांश्चाक्षुषस्य मनोः सुतः ।
शतक्रतोरचिन्त्यस्य सत्रे वर्षसहस्रिके ।
वर्तमानेऽब्रवीद्वाक्यं साम्नि ह्युच्चारिते मया ॥ १६
रथन्तरं द्विजश्रेष्ठ न सम्यगिति वर्तते ।
समीक्षस्व पुनर्बुद्ध्या हर्षं त्यक्त्वा द्विजोत्तम ।
अयज्ञवाहिनं पापमकार्षीस्त्वं सुदुर्मते ॥ १७
एवमुक्त्वा महाक्रोधात्प्राह रुष्टः पुनर्वचः ।
प्रज्ञया रहितो दुःखी नित्यं भीतो वनेचरः ।
दश वर्षसहस्राणि दशाष्टौ च शतानि च ॥ १८
नष्टपानीययवसे मृगैरन्यैश्च वर्जिते ।
अयज्ञीयद्रुमे देशे रुरुसिंहनिषेविते ।
भविता त्वं मृगः क्रूरो महादुःखसमन्वितः ॥ १९
तस्य वाक्यस्य निधने पार्थ जातो ह्यहं मृगः ।
ततो मां शरणं प्राप्तं प्राह योगी महेश्वरः ॥ २०
अजरश्चामरश्चैव भविता दुःखवर्जितः ।
साम्यं समस्तु ते सौख्यं युवयोर्वर्धतां क्रतुः ॥२१
अनुग्रहानेवमेष करोति भगवान्विभुः ।
परं धाता विधाता च सुखदुःखे च सर्वदा ॥२२
अचिन्त्य एष भगवान्कर्मणा मनसा गिरा ।
न मे तात युधिश्रेष्ठ विद्यया पण्डितः समः ॥ २३

जैगीषव्य उवाच ।

ममाष्टगुणमैश्वर्यं दत्तं भगवता पुरा ।
यत्नेनाल्पेन बलिना वाराणस्यां युधिष्ठिर ॥ २४

गार्ग्य उवाच ।

चतुःषष्ट्यङ्गमददात्कालज्ञानं ममाद्भुतम् ।
सरस्वत्यास्तटे तुष्टो मनोयज्ञेन पाण्डव ॥ २५
तुल्यं मम सहस्रं तु सुतानां ब्रह्मवादिनाम् ।
आयुश्चैव सपुत्रस्य संवत्सरशतायुतम् ॥ २६

पराशर उवाच ।

प्रसाद्याहं पुरा शर्वं मनसाचिन्तयं नृप ।
महातपा महातेजा महायोगी महायशाः ।
वेदव्यासः श्रियावासो ब्रह्मण्यः करुणात्मकः ॥२७
अपि नामेप्सितः पुत्रो मम स्याद्वै महेश्वरात् ।
इति मत्वा हृदि मतं प्राह मां सुरसत्तमः ॥ २८
मयि संभवतस्तस्य फलात्कृष्णो भविष्यति ।
सावर्णस्य मनोः सर्गे सप्तर्षिश्च भविष्यति ॥ २९
वेदानां च स वै व्यस्ता कुरुवंशकरस्तथा ।
इतिहासस्य कर्ता च पुत्रस्ते जगतो हितः ॥ ३०
भविष्यति महेन्द्रस्य दयितः स महामुनिः ।
अजरश्चामरश्चैव पराशर सुतस्तव ॥ ३१
एवमुक्त्वा स भगवांस्तत्रैवान्तरधीयत ।
युधिष्ठिर महायोगी वीर्यवानक्षयोऽव्ययः ॥ ३२

माण्डव्य उवाच ।

अचौरश्चौरशङ्कायां शूले भिन्नो ह्यहं यदा ।
तत्रस्थेन स्तुतो देवः प्राह मां वै महेश्वरः ॥ ३३
मोक्षं प्राप्स्यसि शूलाच्च जीविष्यसि समार्बुदम् ।
रुजा शूलकृता चैव न ते विप्र भविष्यति ।
आधिभिर्व्याधिभिश्चैव वर्जितस्त्वं भविष्यसि ॥३४
पादाच्चतुर्थात्संभूत आत्मा यस्मान्मुने तव ।
त्वं भविष्यस्यनुपमो जन्म वै सफलं कुरु ॥ ३५
तीर्थाभिषेकं सफलं त्वमविघ्नेन चाप्स्यसि ।
स्वर्गं चैवाक्षयं विप्र विदधामि तवोर्जितम् ॥ ३६
एवमुक्त्वा तु भगवान्वरेण्यो वृषवाहनः ।
महेश्वरो महाराज कृत्तिवासा महाद्युतिः ।
सगणो दैवतश्रेष्ठस्तत्रैवान्तरधीयत ॥ ३७

गालव उवाच ।
विश्वामित्राभ्यनुज्ञातो ह्यहं पितरमागतः ।
अब्रवीन्मां ततो माता दुःखिता रुदती भृशम् ॥ ३८
कौशिकेनाभ्यनुज्ञातं पुत्रं वेदविभूषितम् ।
न तात तरुणं दान्तं पिता त्वां पश्यतेऽनघ ॥ ३९
श्रुत्वा जनन्या वचनं निराशो गुरुदर्शने ।
नियतात्मा महादेवमपश्यं सोऽब्रवीच्च माम् ॥ ४०
पिता माता च ते त्वं च पुत्र मृत्युविवर्जिताः ।
भविष्यथ विश क्षिप्रं द्रष्टासि पितरं क्षये ॥ ४१
अनुज्ञातो भगवता गृहं गत्वा युधिष्ठिर ।
अपश्यं पितरं तात इष्टिं कृत्वा विनिःसृतम् ॥ ४२
उपस्पृश्य गृहीत्वेध्मं कुशांश्च शरणाद्गुरून् ।
तान्विसृज्य च मां प्राह पिता सास्राविलेक्षणः ॥ ४३
प्रणमन्तं परिष्वज्य मूर्ध्नि चाघ्राय पाण्डव ।
दिष्ट्या दृष्टोऽसि मे पुत्र कृतविद्य इहागतः ॥ ४४
वैशंपायन उवाच ।
एतान्यत्यद्भुतान्येव कर्माण्यथ महात्मनः ।
प्रोक्तानि मुनिभिः श्रुत्वा विस्मयामास पाण्डवः ॥
ततः कृष्णोऽब्रवीद्वाक्यं पुनर्मतिमतां वरः ।
युधिष्ठिरं धर्मनित्यं पुरुहूतमिवेश्वरः ॥ ४६
आदित्यचन्द्रावनिलानलौ च
द्यौर्भूमिरापो वसवोऽथ विश्वे ।
धातार्यमा शुक्रबृहस्पती च
रुद्राः ससाध्या वरुणो वित्तगोपः ॥ ४७
ब्रह्मा शक्रो मारुतो ब्रह्म सत्यं
वेदा यज्ञा दक्षिणा वेदवाहाः ।
सोमो यष्टा यच्च हव्यं हविश्च
रक्षा दीक्षा नियमा ये च केचित् ॥ ४८
स्वाहा वषड्ब्राह्मणाः सौरभेया
धर्मं चक्रं कालचक्रं चरं च ।
यशो दमो बुद्धिमती स्थितिश्च
शुभाशुभं मुनयश्चैव सप्त ॥ ४९
अग्र्या बुद्धिर्मनसा दर्शने च
स्पर्शे सिद्धिः कर्मणां या च सिद्धिः ।
गणा देवानामूष्मपाः सोमपाश्च
लेखाः सुयामास्तुषिता ब्रह्मकायाः ॥ ५०
आभास्वरा गन्धपा दृष्टिपाश्च
वाचा विरुद्धाश्च मनोविरुद्धाः ।
शुद्धाश्च निर्वाणरताश्च देवाः
स्पर्शाशिना दर्शपा आज्यपाश्च ॥ ५१
चिन्तागता ये च देवेषु मुख्या
ये चाप्यन्ये देवताश्चाजमीढ ।
सुपर्णगन्धर्वपिशाचदानवा
यक्षास्तथा पन्नगाश्चारणाश्च ॥ ५२
सूक्ष्मं स्थूलं मृदु यच्चाप्यसूक्ष्मं
सुखं दुःखं सुखदुःखान्तरं च ।
सांख्यं योगं यत्पराणां परं च
शर्वाज्जातं विद्धि तत्कीर्तितं मे ॥ ५३
तत्संभूता भूतकृतो वरेण्याः
सर्वे देवा भुवनस्यास्य गोपाः ।
आविश्येमां धरणीं येऽभ्यरक्ष-
न्पुरातनीं तस्य देवस्य सृष्टिम् ॥ ५४
विचिन्वन्तं मनसा तोष्टुवीमि
किंचित्तत्त्वं प्राणहेतोर्नतोऽस्मि ।
ददातु देवः स वरानिहेष्टा-
नभिष्टुतो नः प्रभुरव्ययः सदा ॥ ५५
इमं स्तवं संनियम्येन्द्रियाणि
शुचिर्भूत्वा यः पुरुषः पठेत ।
अभग्नयोगो नियतोऽब्दमेकं
स प्राप्नुयादश्वमेधे फलं यत् ॥ ५६

वेदान्कृत्स्नान्ब्राह्मणः प्राप्नुयाच्च
जयेद्राजा पृथिवीं चापि कृत्स्नाम् ।
वैश्यो लाभं प्राप्नुयान्नैपुणं च
शूद्रो गतिं प्रेत्य तथा सुखं च ॥ ५७
स्तवराजमिमं कृत्वा रुद्राय दधिरे मनः ।
सर्वदोषापहं पुण्यं पवित्रं च यशस्विनम् ॥ ५८
यावन्त्यस्य शरीरेषु रोमकूपाणि भारत ।
तावद्वर्षसहस्राणि स्वर्गे वसति मानवः ॥ ५९

इति श्रीमहाभारते अनुशासनपर्वणि
अष्टादशोऽध्यायः ॥ १८ ॥

१९

युधिष्ठिर उवाच ।

यदिदं सहधर्मेति प्रोच्यते भरतर्षभ ।
पाणिग्रहणकाले तु स्त्रीणामेतत्कथं स्मृतम् ॥ १
आर्ष एष भवेद्धर्मः प्राजापत्योऽथ वासुरः ।
यदेतत्सहधर्मेति पूर्वमुक्तं महर्षिभिः ॥ २
संदेहः सुमहानेष विरुद्ध इति मे मतिः ।
इह यः सहधर्मो वै प्रेत्यायं विहितः क नु ॥ ३
स्वर्गे मृतानां भवति सहधर्मः पितामह ।
पूर्वमेकस्तु म्रियते क चैकस्तिष्ठते वद ॥ ४
नानाकर्मफलोपेता नानाकर्मनिवासिनः ।
नानानिरयनिष्ठान्ता मानुषा बहवो यदा ॥ ५
अनृताः स्त्रिय इत्येवं सूत्रकारो व्यवस्यति ।
यदानृताः स्त्रियस्तात सहधर्मः कुतः स्मृतः ॥ ६
अनृताः स्त्रिय इत्येवं वेदेष्वपि हि पठ्यते ।
धर्मोऽयं पौर्विकी संज्ञा उपचारः क्रियाविधिः ॥७
गह्वरं प्रतिभात्येतन्मम चिन्तयतोऽनिशम् ।
निःसंदेहमिदं सर्वं पितामह यथा श्रुतिः ॥ ८
यदेतद्यादृशं चैतद्यथा चैतत्प्रवर्तितम् ।
निखिलेन महाप्राज्ञ भवानेतद्ब्रवीतु मे ॥ ९

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
अष्टावक्रस्य संवादं दिशया सह भारत ॥ १०
निवेष्टुकामस्तु पुरा अष्टावक्रो महातपाः ।
ऋषेरथ वदान्यस्य कन्यां वव्रे महात्मनः ॥ ११
सुप्रभां नाम वै नाम्ना रूपेणाप्रतिमां भुवि ।
गुणप्रबर्हां शीलेन साध्वीं चारित्रशोभनाम् ॥ १२
सा तस्य दृष्ट्वैव मनो जहार शुभलोचना ।
वनराजी यथा चित्रा वसन्ते कुसुमाचिता ॥ १३
ऋषिस्तमाह देया मे सुता तुभ्यं शृणुष्व मे ।
गच्छ तावद्दिशं पुण्यामुत्तरां द्रक्ष्यसे ततः ॥ १४

अष्टावक्र उवाच ।

किं द्रष्टव्यं मया तत्र वक्तुमर्हति मे भवान् ।
तथेदानीं मया कार्यं यथा वक्ष्यति मां भवान् ॥

वदान्य उवाच ।

धनदं समतिक्रम्य हिमवन्तं तथैव च ।
रुद्रस्यायतनं दृष्ट्वा सिद्धचारणसेवितम् ॥ १६
प्रहृष्टैः पार्षदैर्जुष्टं नृत्यद्भिर्विविधाननैः ।
दिव्याङ्गरागैः पैशाचैर्वन्यैर्नानाविधैस्तथा ॥ १७
पाणितालसतालैश्च शम्यातालैः समैस्तथा ।
संप्रहृष्टैः प्रनृत्यद्भिः शर्वस्तत्र निषेव्यते ॥ १८
इष्टं किल गिरौ स्थानं तद्दिव्यमनुशुश्रुम ।
नित्यं संनिहितो देवस्तथा पारिषदाः शुभाः ॥ १९
तत्र देव्या तपस्तप्तं शंकरार्थं सुदुश्चरम् ।
अतस्तदिष्टं देवस्य तथोमाया इति श्रुतिः ॥ २०
तत्र कूपो महान्पार्श्वे देवस्योत्तरतस्तथा ।
ऋतवः कालरात्रिश्च ये दिव्या ये च मानुषाः ॥२१
सर्वे देवमुपासन्ते रूपिणः किल तत्र ह ।
तदतिक्रम्य भवनं त्वया यातव्यमेव हि ॥ २२

ततो नीलं वनोद्देशं द्रक्ष्यसे मेघसंनिभम् ।
रमणीयं मनोग्राहि तत्र द्रक्ष्यसि वै स्त्रियम् ॥ २३
तपस्विनीं महाभागां वृद्धां दीक्षामनुष्ठिताम् ।
द्रष्टव्या सा त्वया तत्र संपूज्या चैव यत्नतः ॥२४
तां दृष्ट्वा विनिवृत्तस्त्वं ततः पाणिं ग्रहीष्यसि ।
यद्येष समयः सत्यः साध्यतां तत्र गम्यताम् ॥२५

इति श्रीमहाभारते अनुशासनपर्वणि
एकोनविंशोऽध्यायः ॥ १९ ॥

२०

अष्टावक्र उवाच ।

तथास्तु साधयिष्यामि तत्र यास्याम्यसंशयम् ।
यत्र त्वं वदसे साधो भवान्भवतु सत्यवाक् ॥ १

भीष्म उवाच ।

ततोऽगच्छत्स भगवानुत्तरामुत्तमां दिशम् ।
हिमवन्तं गिरिश्रेष्ठं सिद्धचारणसेवितम् ॥ २
स गत्वा द्विजशार्दूलो हिमवन्तं महागिरिम् ।
अभ्यगच्छन्नदीं पुण्यां बाहुदां धर्मदायिनीम् ॥ ३
अशोके विमले तीर्थे स्नात्वा तर्प्य च देवताः ।
तत्र वासाय शयने कौश्ये सुखमुवास ह ॥ ४
ततो रात्र्यां व्यतीतायां प्रातरुत्थाय स द्विजः ।
स्नात्वा प्रादुश्चकाराग्निं हुत्वा चैव विधानतः ॥ ५
रुद्राणीकूपमासाद्य ह्रदे तत्र समाश्वसत् ।
विश्रान्तश्च समुत्थाय कैलासमभितो ययौ ॥ ६
सोऽपश्यत्काञ्चनद्वारं दीप्यमानमिव श्रिया ।
मन्दाकिनीं च नलिनीं धनदस्य महात्मनः ॥ ७
अथ ते राक्षसाः सर्वे येऽभिरक्षन्ति पद्मिनीम् ।
प्रत्युत्थिता भगवन्तं मणिभद्रपुरोगमाः ॥ ८
स तान्प्रत्यर्चयामास राक्षसान्भीमविक्रमान् ।
निवेदयत मां क्षिप्रं धनदायेति चाब्रवीत् ॥ ९

ते राक्षसास्तदा राजन्भगवन्तमथाब्रुवन् ।
असौ वैश्रवणो राजा स्वयमायाति तेऽन्तिकम् ॥
विदितो भगवानस्य कार्यमागमने च यत् ।
पश्यैनं त्वं महाभागं ज्वलन्तमिव तेजसा ॥ ११
ततो वैश्रवणोऽभ्येत्य अष्टावक्रमनिन्दितम् ।
विधिवत्कुशलं पृष्ट्वा ततो ब्रह्मर्षिमब्रवीत् ॥ १२
सुखं प्राप्तो भवान्कच्चित्किं वा मत्तश्चिकीर्षसि ।
ब्रूहि सर्वं करिष्यामि यन्मां त्वं वक्ष्यसि द्विज ॥
भवनं प्रविश त्वं मे यथाकामं द्विजोत्तम ।
सत्कृतः कृतकार्यश्च भवान्यास्यत्यविघ्नतः ॥ १४
प्राविशद्भवनं स्वं वै गृहीत्वा तं द्विजोत्तमम् ।
आसनं स्वं ददौ चैव पाद्यमर्घ्यं तथैव च ॥ १५
अथोपविष्टयोस्तत्र मणिभद्रपुरोगमाः ।
निषेदुस्तत्र कौबेरा यक्षगन्धर्वराक्षसाः ॥ १६
ततस्तेषां निषण्णानां धनदो वाक्यमब्रवीत् ।
भवच्छन्दं समाज्ञाय नृत्येरन्नप्सरोगणाः ॥ १७
आतिथ्यं परमं कार्यं शुश्रूषा भवतस्तथा ।
संवर्ततामित्युवाच मुनिर्मधुरया गिरा ॥ १८
अथोर्वरा मिश्रकेशी रम्भा चैवोर्वशी तथा ।
अलम्बुसा घृताची च चित्रा चित्राङ्गदा रुचिः ॥
मनोहरा सुकेशी च सुमुखी हासिनी प्रभा ।
विद्युता प्रशमा दान्ता विद्योता रतिरेव च ॥ २०
एताश्चान्याश्च वै बह्व्यः प्रनृताप्सरसः शुभाः ।
अवादयंश्च गन्धर्वा वाद्यानि विविधानि च ॥ २१
अथ प्रवृत्ते गान्धर्वे दिव्ये ऋषिरुपावसत् ।
दिव्यं संवत्सरं तत्र रमन्वै सुमहातपाः ॥ २२
ततो वैश्रवणो राजा भगवन्तमुवाच ह ।
साग्रः संवत्सरो यातस्तव विप्रेह पश्यतः ॥ २३
हार्योऽयं विषयो ब्रह्मन्गान्धर्वो नाम नामतः ।
छन्दतो वर्ततां विप्र यथा वदति वा भवान् ॥२४

अतिथिः पूजनीयस्त्वमिदं च भवतो गृहम् ।
सर्वमाज्ञाप्यतामाशु परवन्तो वयं त्वयि ॥ २५
अथ वैश्रवणं प्रीतो भगवान्प्रत्यभाषत ।
अर्चितोऽस्मि यथान्यायं गमिष्यामि धनेश्वर ॥२६
प्रीतोऽस्मि सदृशं चैव तव सर्वं धनाधिप ।
तव प्रसादाद्भगवन्महर्षेश्च महात्मनः ।
नियोगादद्य यास्यामि वृद्धिमानृद्धिमान्भव ॥ २७
अथ निष्क्रम्य भगवान्प्रययावुत्तरामुखः ।
कैलासं मन्दरं हैमं सर्वाननुचचार ह ॥ २८
तानतीत्य महाशैलान्कैरातं स्थानमुत्तमम् ।
प्रदक्षिणं ततश्चक्रे प्रयतः शिरसा नमन् ।
धरणीमवतीर्याथ पूतात्मासौ तदाभवत् ॥ २९
स तं प्रदक्षिणं कृत्वा त्रिः शैलं चोत्तरामुखः ।
समेन भूमिभागेन ययौ प्रीतिपुरस्कृतः ॥ ३०
ततोऽपरं वनोद्देशं रमणीयमपश्यत ।
सर्वर्तुभिर्मूलफलैः पक्षिभिश्च समन्वितम् ।
रमणीयैर्वनोद्देशैस्तत्र तत्र विभूषितम् ॥ ३१
तत्राश्रमपदं दिव्यं ददर्श भगवानथ ।
शैलांश्च विविधाकारान्काञ्चनान्रत्नभूषितान् ।
मणिभूमौ निविष्टाश्च पुष्करिण्यस्तथैव च ॥ ३२
अन्यान्यपि सुरम्याणि ददर्श सुबहून्यथ ।
भृशं तस्य मनो रेमे महर्षेर्भावितात्मनः ॥ ३३
स तत्र काञ्चनं दिव्यं सर्वरत्नमयं गृहम् ।
ददर्शाद्भुतसंकाशं धनदस्य गृहाद्वरम् ॥ ३४
महान्तो यत्र विविधाः प्रासादाः पर्वतोपमाः ।
विमानानि च रम्याणि रत्नानि विविधानि च ॥
मन्दारपुष्पैः संकीर्णा तथा मन्दाकिनी नदी ।
स्वयंप्रभाश्च मणयो वज्रैर्भूमिश्च भूषिता ॥ ३६
नानाविधैश्च भवनैर्विचित्रमणितोरणैः ।
मुक्ताजालपरिक्षिप्तैर्मणिरत्नविभूषितैः ।
मनोदृष्टिहरै रम्यैः सर्वतः संवृतं शुभैः ॥ ३७
ऋषिः समन्ततोऽपश्यत्तत्र तत्र मनोरमम् ।
ततोऽभवत्तस्य चिन्ता क्व मे वासो भवेदिति ॥३८
अथ द्वारं समभितो गत्वा स्थित्वा ततोऽब्रवीत् ।
अतिथिं मामनुप्राप्तमनुजानन्तु येऽत्र वै ॥ ३९
अथ कन्यापरिवृता गृहात्तस्माद्विनिःसृताः ।
नानारूपाः सप्त विभो कन्याः सर्वा मनोहराः ॥
यां यामपश्यत्कन्यां स सा सा तस्य मनोऽहरत् ।
नाशक्नुवद्धारयितुं मनोऽथास्यावसीदति ॥ ४१
ततो धृतिः समुत्पन्ना तस्य विप्रस्य धीमतः ।
अथ तं प्रमदाः प्राहुर्भगवान्प्रविशत्विति ॥ ४२
स च तासां सुरूपाणां तस्यैव भवनस्य च ।
कौतूहलसमाविष्टः प्रविवेश गृहं द्विजः ॥ ४३
तत्रापश्यज्जरायुक्तामरजोम्बरधारिणीम् ।
वृद्धां पर्यङ्कमासीनां सर्वाभरणभूषिताम् ॥ ४४
स्वस्तीति चाथ तेनोक्ता सा स्त्री प्रत्यवदत्तदा ।
प्रत्युत्थाय च तं विप्रमास्यतामित्युवाच ह ॥ ४५

अष्टावक्र उवाच ।

सर्वाः स्वानालयान्यान्तु एका मामुपतिष्ठतु ।
सुप्रज्ञाता सुप्रशान्ता शेषा गच्छन्तु च्छन्दतः ॥ ४६
ततः प्रदक्षिणीकृत्य कन्यास्तास्तमृषिं तदा ।
निराक्रामन्गृहात्तस्मात्सा वृद्धाथ व्यतिष्ठत ॥ ४७
अथ तां संविशन्प्राह शयने भास्वरे तदा ।
त्वयापि सुप्यतां भद्रे रजनी ह्यतिवर्तते ॥ ४८
संलापात्तेन विप्रेण तथा सा तत्र भाषिता ।
द्वितीये शयने दिव्ये संविवेश महाप्रभे ॥ ४९
अथ सा वेपमानाङ्गी निमित्तं शीतजं तदा ।
व्यपदिश्य महर्षेर्वै शयनं चाध्यरोहत ॥ ५०
स्वागतं स्वागतेनास्तु भगवांस्तामभाषत ।
सोपागूहद्भुजाभ्यां तु ऋषिं प्रीत्या नरर्षभ ॥ ५१

निर्विकारमृषिं चापि काष्ठकुड्योपमं तदा ।
दुःखिता प्रेक्ष्य संजल्पमकार्षीदृषिणा सह ॥ ५२
ब्रह्मन्न कामकारोऽस्ति स्त्रीणां पुरुषतो धृतिः ।
कामेन मोहिता चाहं त्वां भजन्तीं भजस्व माम् ॥
प्रहृष्टो भव विप्रर्षे समागच्छ मया सह ।
उपगूह च मां विप्र कामार्ताहं भृशं त्वयि ॥ ५४
एतद्धि तव धर्मात्मंस्तपसः पूज्यते फलम् ।
प्रार्थितं दर्शनादेव भजमानां भजस्व माम् ॥ ५५
सद्म चेदं वनं चेदं यच्चान्यदपि पश्यसि ।
प्रभुत्वं तव सर्वत्र मयि चैव न संशयः ॥ ५६
सर्वान्कामान्विधास्यामि रमस्व सहितो मया ।
रमणीये वने विप्र सर्वकामफलप्रदे ॥ ५७
त्वद्वशाहं भविष्यामि रंस्यसे च मया सह ।
सर्वान्कामानुपाश्नानो ये दिव्या ये च मानुषाः ॥
नातः परं हि नारीणां कार्यं किंचन विद्यते ।
यथा पुरुषसंसर्गः परमेतद्धि नः फलम् ॥ ५९
आत्मच्छन्देन वर्तन्ते नार्यो मन्मथचोदिताः ।
न च दह्यन्ति गच्छन्त्यः सुतप्तैरपि पांसुभिः ॥ ६०

अष्टावक्र उवाच ।

परदारानहं भद्रे न गच्छेयं कथंचन ।
दूषितं धर्मशास्त्रेषु परदाराभिमर्शनम् ॥ ६१
भद्रे निवेष्टुकामं मां विद्धि सत्येन वै शपे ।
विषयेष्वनभिज्ञोऽहं धर्मार्थं किल संततिः ॥ ६२
एवं लोकान्गमिष्यामि पुत्रैरिति न संशयः ।
भद्रे धर्मं विजानीष्व ज्ञात्वा चोपरमस्व ह ॥ ६३

स्त्र्युवाच ।

नानिलोऽग्निर्न वरुणो न चान्ये त्रिदशा द्विज ।
प्रियाः स्त्रीणां यथा कामो रतिशीला हि योषितः ॥
सहस्रैका यता नारी प्राप्नोतीह कदाचन ।
तथा शतसहस्रेषु यदि काचित्पतिव्रता ॥ ६५
नैता जानन्ति पितरं न कुलं न च मातरम् ।
न भ्रातॄन्न च भर्तारं न पुत्रान्न च देवरान् ॥ ६६
लीलायन्त्यः कुलं घ्नन्ति कूलानीव सरिद्वराः ।
दोषांश्च मन्दान्मन्दासु प्रजापतिरभाषत ॥ ६७

भीष्म उवाच ।

ततः स ऋषिरेकाग्रस्तां स्त्रियं प्रत्यभाषत ।
आस्यतां रुचिरं छन्दः किं वा कार्यं ब्रवीहि मे ॥
सा स्त्री प्रोवाच भगवन्द्रक्ष्यसे देशकालतः ।
वस तावन्महाप्राज्ञ कृतकृत्यो गमिष्यसि ॥ ६९
ब्रह्मर्षिस्तामथोवाच स तथेति युधिष्ठिर ।
वत्स्येऽहं यावदुत्साहो भवत्या नात्र संशयः ॥ ७०
अथर्षिरभिसंप्रेक्ष्य स्त्रियं तां जरयान्विताम् ।
चिन्तां परमिकां भेजे संतप्त इव चाभवत् ॥ ७१
यद्यदङ्गं हि सोऽपश्यत्तस्या विप्रर्षभस्तदा ।
नारमत्तत्र तत्रास्य दृष्टी रूपपराजिता ॥ ७२
देवतेयं गृहस्यास्य शापान्नूनं विरूपिता ।
अस्याश्च कारणं वेत्तुं न युक्तं सहसा मया ॥ ७३
इति चिन्ताविषक्तस्य तमर्थं ज्ञातुमिच्छतः ।
व्यगमत्तदहःशेषं मनसा व्याकुलेन तु ॥ ७४
अथ सा स्त्री तदोवाच भगवन्पश्य वै रवेः ।
रूपं संध्याभ्रसंयुक्तं किमुपस्थाप्यतां तव ॥ ७५
स उवाच तदा तां स्त्रीं स्नानोदकमिहानय ।
उपासिष्ये ततः संध्यां वाग्यतो नियतेन्द्रियः ॥ ७६

इति श्रीमहाभारते अनुशासनपर्वणि
विंशतितमोऽध्यायः ॥ २० ॥

२१

भीष्म उवाच ।

अथ सा स्त्री तमुक्त्वा तु विप्रमेवं भवत्विति ।
तैलं दिव्यमुपादाय स्नानशाटीमुपानयत् ॥ १
अनुज्ञाता च मुनिना सा स्त्री तेन महात्मना ।

अथास्य तैलेनाङ्गानि सर्वाण्येवाभ्यमृक्षयत् ॥ २
शनैश्चोत्सादितस्तत्र स्नानशालामुपागमत् ।
भद्रासनं ततश्चित्रं ऋषिरन्वाविशन्नवम् ॥ ३
अथोपविष्टश्च यदा तस्मिन्भद्रासने तदा ।
स्नापयामास शनकैस्तमृषिं सुखहस्तवत् ।
दिव्यं च विधिवच्चक्रे सोपचारं मुनेस्तदा ॥ ४
स तेन सुसुखोष्णेन तस्या हस्तसुखेन च ।
व्यतीतां रजनीं कृत्स्नां नाजानात्स महाव्रतः ॥ ५
तत उत्थाय स मुनिस्तदा परमविस्मितः ।
पूर्वस्यां दिशि सूर्यं च सोऽपश्यदुदितं दिवि ॥ ६
तस्य बुद्धिरियं किं नु मोहस्तत्त्वमिदं भवेत् ।
अथोपास्य सहस्रांशुं किं करोमीत्युवाच ताम् ॥ ७
सा चामृतरसप्रख्यमृषेरन्नमुपाहरत् ।
तस्य स्वादुतयान्नस्य न प्रभूतं चकार सः ।
व्यगमच्चाप्यहःशेषं ततः संध्यागमत्पुनः ॥ ८
अथ स्त्री भगवन्तं सा सुप्यतामित्यचोदयत् ।
तत्र वै शयने दिव्ये तस्य तस्याश्च कल्पिते ॥ ९

अष्टावक्र उवाच ।

न भद्रे परदारेषु मनो मे संप्रसज्जति ।
उत्तिष्ठ भद्रे भद्रं ते स्वप वै विरमस्व च ॥ १०

भीष्म उवाच ।

सा तदा तेन विप्रेण तथा धृत्या निवर्तिता ।
स्वतन्त्रास्मीत्युवाचैनं न धर्मच्छलमस्ति ते ॥ ११

अष्टावक्र उवाच ।

नास्ति स्वतन्त्रता स्त्रीणामस्वतन्त्रा हि योषितः ।
प्रजापतिमतं ह्येतन्न स्त्री स्वातन्त्र्यमर्हति ॥ १२

स्त्र्युवाच ।

बाधते मैथुनं विप्र मम भक्तिं च पश्य वै ।
अधर्मं प्राप्स्यसे विप्र यन्मां त्वं नाभिनन्दसि ॥ १३

अष्टावक्र उवाच ।

हरन्ति दोषजातानि नरं जातं यथेच्छकम् ।
प्रभवामि सदा धृत्या भद्रे स्वं शयनं व्रज ॥ १४

स्त्र्युवाच ।

शिरसा प्रणमे विप्र प्रसादं कर्तुमर्हसि ।
भूमौ निपतमानायाः शरणं भव मेऽनघ ॥ १५
यदि वा दोषजातं त्वं परदारेषु पश्यसि ।
आत्मानं स्पर्शयाम्यद्य पाणिं गृह्णीष्व मे द्विज ॥ १६
न दोषो भविता चैव सत्येनैतद्ब्रवीम्यहम् ।
स्वतन्त्रां मां विजानीहि योऽधर्मः सोऽस्तु वै मयि ॥ १७

अष्टावक्र उवाच ।

स्वतन्त्रा त्वं कथं भद्रे ब्रूहि कारणमत्र वै ।
नास्ति लोके हि काचित्स्त्री या वै स्वातन्त्र्यमर्हति ॥ १८
पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
पुत्राश्च स्थविरीभावे न स्त्री स्वातन्त्र्यमर्हति ॥ १९

स्त्र्युवाच ।

कौमारं ब्रह्मचर्यं मे कन्यैवास्मि न संशयः ।
कुरु मा विमतिं विप्र श्रद्धां विजहि मा मम ॥ २०

अष्टावक्र उवाच ।

यथा मम तथा तुभ्यं यथा तव तथा मम ।
जिज्ञासेयमृषेस्तस्य विघ्नः सत्यं नु किं भवेत् ॥ २१
आश्चर्यं परमं हीदं किं नु श्रेयो हि मे भवेत् ।
दिव्याभरणवस्त्रा हि कन्येयं मामुपस्थिता ॥ २२
किं त्वस्याः परमं रूपं जीर्णमासीत्कथं पुनः ।
कन्यारूपमिहाद्यैव किमिहात्रोत्तरं भवेत् ॥ २३
यथा परं शक्तिधृतेर्न व्युत्थास्ये कथंचन ।
न रोचये हि व्युत्थानं धृत्यैवं साधयाम्यहम् ॥ २४

इति श्रीमहाभारते अनुशासनपर्वणि
एकविंशतितमोऽध्यायः ॥ २१ ॥

२२

युधिष्ठिर उवाच ।

न बिभेति कथं सा स्त्री शापस्य परमद्युतेः ।
कथं निवृत्तो भगवांस्तद्भवान्प्रब्रवीतु मे ॥ १

भीष्म उवाच ।

अष्टावक्रोऽन्वपृच्छत्तां रूपं विकुरुषे कथम् ।
न चानृतं ते वक्तव्यं ब्रूहि ब्राह्मणकाम्यया ॥ २

स्त्र्युवाच ।

द्यावापृथिवीमात्रैषा काम्या ब्राह्मणसत्तम ।
शृणुष्वावहितः सर्वं यदिदं सत्यविक्रम ॥ ३
उत्तरां मां दिशं विद्धि दृष्टं स्त्रीचापलं च ते ।
अव्युत्थानेन ते लोका जिताः सत्यपराक्रम ॥ ४
जिज्ञासेयं प्रयुक्ता मे स्थिरीकर्तुं तवानघ ।
स्थविराणामपि स्त्रीणां बाधते मैथुनज्वरः ॥ ५
तुष्टः पितामहस्तेऽद्य तथा देवाः सवासवाः ।
स त्वं येन च कार्येण संप्राप्तो भगवानिह ॥ ६
प्रेषितस्तेन विप्रेण कन्यापित्रा द्विजर्षभ ।
तवोपदेशं कर्तुं वै तच्च सर्वं कृतं मया ॥ ७
क्षेमी गमिष्यसि गृहाञ्श्रमश्च न भविष्यति ।
कन्यां प्राप्स्यसि तां विप्र पुत्रिणी च भविष्यति ॥
काम्यया पृष्टवांस्त्वं मां ततो व्याहृतमुत्तरम् ।
अनतिक्रमणीयैषा कृत्स्नैर्लोकैस्त्रिभिः सदा ॥ ९
गच्छस्व सुकृतं कृत्वा किं वान्यच्छ्रोतुमिच्छसि ।
यावद्ब्रवीमि विप्रर्षे अष्टावक्र यथातथम् ॥ १०
ऋषिणा प्रसादिता चास्मि तव हेतोर्द्विजर्षभ ।
तस्य संमाननार्थं मे त्वयि वाक्यं प्रभाषितम् ॥ ११
श्रुत्वा तु वचनं तस्याः स विप्रः प्राञ्जलिः स्थितः ।
अनुज्ञातस्तया चापि स्वगृहं पुनराव्रजत् ॥ १२
गृहमागम्य विश्रान्तः स्वजनं प्रतिपूज्य च ।
अभ्यगच्छत तं विप्रं न्यायतः कुरुनन्दन ॥ १३
पृष्टश्च तेन विप्रेण दृष्टं त्वेतन्निदर्शनम् ।
प्राह विप्रं तदा विप्रः सुप्रीतेनान्तरात्मना ॥ १४
भवताहमनुज्ञातः प्रस्थितो गन्धमादनम् ।
तस्य चोत्तरतो देशे दृष्टं तद्दैवतं महत् ॥ १५
तया चाहमनुज्ञातो भवांश्चापि प्रकीर्तितः ।
श्रावितश्चापि तद्वाक्यं गृहमभ्यागतः प्रभो ॥ १६
तमुवाच ततो विप्रः प्रतिगृह्णीष्व मे सुताम् ।
नक्षत्रतिथिसंयोगे पात्रं हि परमं भवान् ॥ १७

भीष्म उवाच ।

अष्टावक्रस्तथेत्युक्त्वा प्रतिगृह्य च तां प्रभो ।
कन्यां परमधर्मात्मा प्रीतिमांश्चाभवत्तदा ॥ १८
कन्यां तां प्रतिगृह्यैव भार्यां परमशोभनाम् ।
उवास मुदितस्तत्र आश्रमे स्वे गतज्वरः ॥ १९

इति श्रीमहाभारते अनुशासनपर्वणि
द्वाविंशतितमोऽध्यायः ॥ २२ ॥

२३

युधिष्ठिर उवाच ।

किमाहुर्भरतश्रेष्ठ पात्रं विप्राः सनातनम् ।
ब्राह्मणं लिङ्गिनं चैव ब्राह्मणं वाप्यलिङ्गिनम् ॥ १

भीष्म उवाच ।

स्ववृत्तिमभिपन्नाय लिङ्गिने चेतराय वा ।
देयमाहुर्महाराज उभावेतौ तपस्विनौ ॥ २

युधिष्ठिर उवाच ।

श्रद्धया परया पूतो यः प्रयच्छेद्द्विजातये ।
हव्यं कव्यं तथा दानं को दोषः स्यात्पितामह ॥३

भीष्म उवाच ।

श्रद्धापूतो नरस्तात दुर्दान्तोऽपि न संशयः ।
पूतो भवति सर्वत्र किं पुनस्त्वं महीपते ॥ ॥ ४

युधिष्ठिर उवाच ।
न ब्राह्मणं परीक्षेत दैवेषु सततं नरः ।
कव्यप्रदाने तु बुधाः परीक्ष्यं ब्राह्मणं विदुः ॥ ५
भीष्म उवाच ।
न ब्राह्मणः साधयते हव्यं दैवात्प्रसिध्यति ।
देवप्रसादादिज्यन्ते यजमाना न संशयः ॥ ६
ब्राह्मणा भरतश्रेष्ठ सततं ब्रह्मवादिनः ।
मार्कण्डेयः पुरा प्राह इह लोकेषु बुद्धिमान् ॥ ७
युधिष्ठिर उवाच ।
अपूर्वोऽप्यथ वा विद्वान्संबन्धी वाथ यो भवेत् ।
तपस्वी यज्ञशीलो वा कथं पात्रं भवेत्तु सः ॥ ८
भीष्म उवाच ।
कुलीनः कर्मकृद्वैद्यस्तथा चाप्यानृशंस्यवान् ।
ह्रीमानृजुः सत्यवादी पात्रं पूर्वे च ते त्रयः ॥ ९
तत्रेदं शृणु मे पार्थ चतुर्णां तेजसां मतम् ।
पृथिव्याः काश्यपस्याग्नेर्मार्कण्डेयस्य चैव हि ॥१०
पृथिव्युवाच ।
यथा महार्णवे क्षिप्तः क्षिप्रं लोष्टो विनश्यति ।
तथा दुश्चरितं सर्वं त्रय्यावृत्त्या विनश्यति ॥ ११
काश्यप उवाच ।
सर्वे च वेदाः सह षड्भिरङ्गैः
सांख्यं पुराणं च कुले च जन्म ।
नैतानि सर्वाणि गतिर्भवन्ति
शीलव्यपेतस्य नरस्य राजन् ॥ १२
अग्निरुवाच ।
अधीयानः पण्डितं मन्यमानो
यो विद्यया हन्ति यशः परेषाम् ।
ब्रह्मन्स तेनाचरते ब्रह्महत्यां
लोकास्तस्य ह्यन्तवन्तो भवन्ति ॥ १३
मार्कण्डेय उवाच ।
अश्वमेधसहस्रं च सत्यं च तुलया धृतम् ।
नाभिजानामि यद्यस्य सत्यस्यार्धमवाप्नुयात् ॥ १४
भीष्म उवाच ।
इत्युक्त्वा ते जग्मुराशु चत्वारोऽमिततेजसः ।
पृथिवी काश्यपोऽग्निश्च प्रकृष्टायुश्च भार्गवः ॥ १५
युधिष्ठिर उवाच ।
यदिदं ब्राह्मणा लोके व्रतिनो भुञ्जते हविः ।
भुक्तं ब्राह्मणकामाय कथं तत्सुकृतं भवेत् ॥ १६
भीष्म उवाच ।
आदिष्टिनो ये राजेन्द्र ब्राह्मणा वेदपारगाः ।
भुञ्जते ब्रह्मकामाय व्रतलुप्ता भवन्ति ते ॥ १७
युधिष्ठिर उवाच ।
अनेकान्तं बहुद्वारं धर्ममाहुर्मनीषिणः ।
किं निश्चितं भवेत्तत्र तन्मे ब्रूहि पितामह ॥ १८
भीष्म उवाच ।
अहिंसा सत्यमक्रोध आनृशंस्यं दमस्तथा ।
आर्जवं चैव राजेन्द्र निश्चितं धर्मलक्षणम् ॥ १९
ये तु धर्मं प्रशंसन्तश्चरन्ति पृथिवीमिमाम् ।
अनाचरन्तस्तद्धर्मं संकरे निरताः प्रभो ॥ २०
तेभ्यो रत्नं हिरण्यं वा गामश्वान्वा ददाति यः ।
दश वर्षाणि विष्ठां स भुङ्क्ते निरयमाश्रितः ॥ २१
मेदानां पुल्कसानां च तथैवान्तावसायिनाम् ।
कृतं कर्माकृतं चापि रागमोहेन जल्पताम् ॥ २२
वैश्वदेवं च ये मूढा विप्राय ब्रह्मचारिणे ।
ददतीह न राजेन्द्र ते लोकान्भुञ्जतेऽशुभान् ॥ २३
युधिष्ठिर उवाच ।
किं परं ब्रह्मचर्यस्य किं परं धर्मलक्षणम् ।
किं च श्रेष्ठतमं शौचं तन्मे ब्रूहि पितामह ॥ २४

भीष्म उवाच ।

ब्रह्मचर्यं परं तात मधुमांसस्य वर्जनम् ।
मर्यादायां स्थितो धर्मः शमः शौचस्य लक्षणम् ॥

युधिष्ठिर उवाच ।

कस्मिन्काले चरेद्धर्मं कस्मिन्कालेऽर्थमाचरेत् ।
कस्मिन्काले सुखी च स्यात्तन्मे ब्रूहि पितामह ॥ २६

भीष्म उवाच ।

काल्यमर्थं निषेवेत ततो धर्ममनन्तरम् ।
पश्चात्कामं निषेवेत न च गच्छेत्प्रसङ्गिताम् ॥२७
ब्राह्मणांश्चाभिमन्येत गुरूंश्चाप्यभिपूजयेत् ।
सर्वभूतानुलोमश्च मृदुशीलः प्रियंवदः ॥ २८
अधिकारे यदनृतं राजगामि च पैशुनम् ।
गुरोश्चालीककरणं समं तद्ब्रह्महत्यया ॥ २९
प्रहरेन्न नरेन्द्रेषु न गां हन्यात्तथैव च ।
भ्रूणहत्यासमं चैतदुभयं यो निषेवते ॥ ३०
नाग्निं परित्यजेज्जातु न च वेदान्परित्यजेत् ।
न च ब्राह्मणमाक्रोशेत्समं तद्ब्रह्महत्यया ॥ ३१

युधिष्ठिर उवाच ।

कीदृशाः साधवो विप्राः केभ्यो दत्तं महाफलम् ।
कीदृशानां च भोक्तव्यं तन्मे ब्रूहि पितामह ॥ ३२

भीष्म उवाच ।

अक्रोधना धर्मपराः सत्यनित्या दमे रताः ।
तादृशाः साधवो विप्रास्तेभ्यो दत्तं महाफलम् ॥
अमानिनः सर्वसहा दृष्टार्था विजितेन्द्रियाः ।
सर्वभूतहिता मैत्रास्तेभ्यो दत्तं महाफलम् ॥ ३४
अलुब्धाः शुचयो वैद्या ह्रीमन्तः सत्यवादिनः ।
स्वकर्मनिरता ये च तेभ्यो दत्तं महाफलम् ॥ ३५
साङ्गांश्च चतुरो वेदान्योऽधीयीत द्विजर्षभः ।
षड्भ्यो निवृत्तः कर्मभ्यस्तं पात्रमृषयो विदुः ॥३६
ये त्वेवंगुणजातीयास्तेभ्यो दत्तं महाफलम् ।
सहस्रगुणमाप्नोति गुणार्हाय प्रदायकः ॥ ३७
प्रज्ञाश्रुताभ्यां वृत्तेन शीलेन च समन्वितः ।
तारयेत कुलं कृत्स्नमेकोऽपीह द्विजर्षभः ॥ ३८
गामश्वं वित्तमन्नं वा तद्विधे प्रतिपादयेत् ।
द्रव्याणि चान्यानि तथा प्रेत्यभावे न शोचति ॥३९
तारयेत कुलं कृत्स्नमेकोऽपीह द्विजोत्तमः ।
किमङ्ग पुनरेकं वै तस्मात्पात्रं समाचरेत् ॥ ४०
निशम्य च गुणोपेतं ब्राह्मणं साधुसंमतम् ।
दूरादानाययेत्कृत्ये सर्वतश्चाभिपूजयेत् ॥ ४१

इति श्रीमहाभारते अनुशासनपर्वणि
त्रयोविंशोऽध्यायः ॥ २३ ॥

२४

युधिष्ठिर उवाच ।

श्राद्धकाले च दैवे च धर्मे चापि पितामह ।
इच्छामीह त्वयाख्यातं विहितं यत्सुरर्षिभिः ॥ १

भीष्म उवाच ।

दैवं पूर्वाह्णिके कुर्यादपराह्णे तु पैतृकम् ।
मङ्गलाचारसंपन्नः कृतशौचः प्रयत्नवान् ॥ २
मनुष्याणां तु मध्याह्ने प्रदद्यादुपपत्तितः ।
कालहीनं तु यद्दानं तं भागं रक्षसां विदुः ॥ ३
लङ्घितं चावलीढं च कलिपूर्वं च यत्कृतम् ।
रजस्वलाभिर्दृष्टं च तं भागं रक्षसां विदुः ॥ ४
अवघुष्टं च यद्भुक्तमव्रतेन च भारत ।
परामृष्टं शुना चैव तं भागं रक्षसां विदुः ॥ ५
केशकीटावपतितं क्षुतं श्वभिरवेक्षितम् ।
रुदितं चावधूतं च तं भागं रक्षसां विदुः ॥ ६
निरोंकारेण यद्भुक्तं सशस्त्रेण च भारत ।
दुरात्मना च यद्भुक्तं तं भागं रक्षसां विदुः ॥ ७
परोच्छिष्टं च यद्भुक्तं परिभुक्तं च यद्भवेत् ।

दैवे पित्र्ये च सततं तं भागं रक्षसां विदुः ॥ ८
गर्हितं निन्दितं चैव परिविष्टं समन्युना ।
दैवं वाप्यथ वा पैत्र्यं तं भागं रक्षसां विदुः ॥ ९
मन्त्रहीनं क्रियाहीनं यच्छ्राद्धं परिविष्यते ।
त्रिभिर्वर्णैर्नरश्रेष्ठ तं भागं रक्षसां विदुः ॥ १०
आज्याहुतिं विना चैव यत्किंचित्परिविष्यते ।
दुराचारैश्च यद्भुक्तं तं भागं रक्षसां विदुः ॥ ११
ये भागा रक्षसां प्रोक्तास्त उक्ता भरतर्षभ ।
अत ऊर्ध्वं विसर्गस्य परीक्षां ब्राह्मणे शृणु ॥ १२
यावन्तः पतिता विप्रा जडोन्मत्तास्तथैव च ।
दैवे वाप्यथ वा पित्र्ये राजन्नार्हन्ति केतनम् ॥ १३
श्वित्री कुष्ठी च क्लीबश्च तथा यक्ष्महतश्च यः ।
अपस्मारी च यश्चान्धो राजन्नार्हन्ति सत्कृतिम् ॥
चिकित्सका देवलका वृथानियमधारिणः ।
सोमविक्रयिणश्चैव श्राद्धे नार्हन्ति केतनम् ॥ १५
गायना नर्तकाश्चैव प्लवका वादकास्तथा ।
कथका योधकाश्चैव राजन्नार्हन्ति केतनम् ॥ १६
होतारो वृषलानां च वृषलाध्यापकास्तथा ।
तथा वृषलशिष्याश्च राजन्नार्हन्ति केतनम् ॥ १७
अनुयोक्ता च यो विप्रो अनुयुक्तश्च भारत ।
नार्हतस्तावपि श्राद्धं ब्रह्मविक्रयिणौ हि तौ ॥ १८
अग्रणीर्यः कृतः पूर्वं वर्णावरपरिग्रहः ।
ब्राह्मणः सर्वविद्योऽपि राजन्नार्हति केतनम् ॥ १९
अनग्नयश्च ये विप्रा मृतनिर्यातकाश्च ये ।
स्तेनाश्च पतिताश्चैव राजन्नार्हन्ति केतनम् ॥ २०
अपरिज्ञातपूर्वाश्च गणपूर्वाश्च भारत ।
पुत्रिकापूर्वपुत्राश्च श्राद्धे नार्हन्ति केतनम् ॥ २१
ऋणकर्ता च यो राजन्यश्च वार्धुषिको द्विजः ।
प्राणिविक्रयवृत्तिश्च राजन्नार्हन्ति केतनम् ॥ २२
स्त्रीपूर्वाः काण्डपृष्ठाश्च यावन्तो भरतर्षभ ।
अजपा ब्राह्मणाश्चैव श्राद्धे नार्हन्ति केतनम् ॥ २३
श्राद्धे दैवे च निर्दिष्टा ब्राह्मणा भरतर्षभ ।
दातुः प्रतिग्रहीतुश्च शृणुष्वानुग्रहं पुनः ॥ २४
चीर्णव्रता गुणैर्युक्ता भवेयुर्येऽपि कर्षकाः ।
सावित्रीज्ञाः क्रियावन्तस्ते राजन्केतनक्षमाः ॥ २५
क्षात्रधर्मिणमप्याजौ केतयेत्कुलजं द्विजम् ।
न त्वेव वणिजं तात श्राद्धेषु परिकल्पयेत् ॥ २६
अग्निहोत्री च यो विप्रो ग्रामवासी च यो भवेत् ।
अस्तेनश्चातिथिज्ञश्च स राजन्केतनक्षमः ॥ २७
सावित्रीं जपते यस्तु *त्रिकालं भरतर्षभ ।*
भिक्षावृत्तिः क्रियावांश्च स राजन्केतनक्षमः ॥ २८
उदितास्तमितो यश्च तथैवास्तमितोदितः ।
अहिंस्रश्चाल्पदोषश्च स राजन्केतनक्षमः ॥ २९
अकल्कको ह्यतर्कश्च ब्राह्मणो भरतर्षभ ।
ससंज्ञो भैक्ष्यवृत्तिश्च स राजन्केतनक्षमः ॥ ३०
अव्रती कितवः स्तेनः प्राणिविक्रय्यथो वणिक् ।
पश्चाच्च पीतवान्सोमं स राजन्केतनक्षमः ॥ ३१
अर्जयित्वा धनं पूर्वं दारुणैः कृषिकर्मभिः ।
भवेत्सर्वातिथिः पश्चात्स राजन्केतनक्षमः ॥ ३२
ब्रह्मविक्रयनिर्दिष्टं स्त्रिया यच्चार्जितं धनम् ।
अदेयं पितृदेवेभ्यो यच्च क्लैब्यादुपार्जितम् ॥ ३३
क्रियमाणेऽपवर्गे तु यो द्विजो भरतर्षभ ।
न व्याहरति यद्युक्तं तस्याधर्मो गवानृतम् ॥ ३४
श्राद्धस्य ब्राह्मणः कालः प्राप्तं दधि घृतं तथा ।
सोमक्षयश्च मांसं च यदारण्यं युधिष्ठिर ॥ ३५
श्राद्धापवर्गे विप्रस्य स्वधा वै स्वदिता भवेत् ।
क्षत्रियस्याप्यथो ब्रूयात्प्रीयन्तां पितरस्त्विति ॥ ३६
अपवर्गे तु वैश्यस्य श्राद्धकर्मणि भारत ।
अक्षय्यमभिधातव्यं स्वस्ति शूद्रस्य भारत ॥ ३७
पुण्याहवाचनं दैवे ब्राह्मणस्य विधीयते ।

एतदेव निराकारं क्षत्रियस्य विधीयते ।
वैश्यस्य चैव वक्तव्यं प्रीयन्तां देवता इति ॥ ३८
कर्मणामानुपूर्वीं च विधिपूर्वकृतं शृणु ।
जातकर्मादिकान्सर्वांस्त्रिषु वर्णेषु भारत ।
ब्रह्मक्षत्रे हि मन्त्रोक्ता वैश्यस्य च युधिष्ठिर ॥ ३९
विप्रस्य रशना मौञ्जी मौर्वी राजन्यगामिनी ।
बाल्वजीत्येव वैश्यस्य धर्म एष युधिष्ठिर ॥ ४०
दातुः प्रतिग्रहीतुश्च धर्माधर्माविमौ शृणु ।
ब्राह्मणस्यानृतेऽधर्मः प्रोक्तः पातकसंज्ञितः ।
चतुर्गुणः क्षत्रियस्य वैश्यस्याष्टगुणः स्मृतः ॥ ४१
नान्यत्र ब्राह्मणोऽश्नीयात्पूर्वं विप्रेण केतितः ।
यवीयान्पशुहिंसायां तुल्यधर्मा भवेत्स हि ॥ ४२
अथ राजन्यवैश्याभ्यां यद्यश्नीयात्तु केतितः ।
यवीयान्पशुहिंसायां भागार्धं समवाप्नुयात् ॥ ४३
दैवं वाप्यथ वा पित्र्यं योऽश्नीयाद्ब्राह्मणादिषु ।
अस्नातो ब्राह्मणो राजंस्तस्याधर्मो गवानृतम् ॥ ४४
आशौचो ब्राह्मणो राजन्योऽश्नीयाद्ब्राह्मणादिषु ।
ज्ञानपूर्वमथो लोभात्तस्याधर्मो गवानृतम् ॥ ४५
अन्येनान्नं च यो लिप्सेत्कर्मार्थं चैव भारत ।
आमन्त्रयति राजेन्द्र तस्याधर्मोऽनृतं स्मृतम् ॥ ४६
अवेदव्रतचारित्रास्त्रिभिर्वर्णैर्युधिष्ठिर ।
मन्त्रवत्परिविष्यन्ते तेष्वधर्मो गवानृतम् ॥ ४७

युधिष्ठिर उवाच ।

पित्र्यं वाप्यथ वा दैवं दीयते यत्पितामह ।
एतदिच्छाम्यहं श्रोतुं दत्तं येषु महाफलम् ॥ ४८

भीष्म उवाच ।

येषां दाराः प्रतीक्षन्ते सुवृष्टिमिव कर्षकाः ।
उच्छेषपरिशेषं हि तान्भोजय युधिष्ठिर ॥ ४९
चारित्रनियता राजन्ये कृशाः कृशवृत्तयः ।
अर्थिनश्चोपगच्छन्ति तेषु दत्तं महाफलम् ॥ ५०
तद्भक्तास्तद्गृहा राजंस्तद्धनास्तदपाश्रयाः ।
अर्थिनश्च भवन्त्यर्थे तेषु दत्तं महाफलम् ॥ ५१
तस्करेभ्यः परेभ्यो वा ये भयार्ता युधिष्ठिर ।
अर्थिनो भोक्तुमिच्छन्ति तेषु दत्तं महाफलम् ॥ ५२
अकल्ककस्य विप्रस्य भैक्षोत्करकृतात्मनः ।
बटवो यस्य भिक्षन्ति तेभ्यो दत्तं महाफलम् ॥ ५३
हृतस्वा हृतदाराश्च ये विप्रा देशसंप्लवे ।
अर्थार्थमभिगच्छन्ति तेभ्यो दत्तं महाफलम् ॥ ५४
व्रतिनो नियमस्थाश्च ये विप्राः श्रुतसंमताः ।
तत्समाप्त्यर्थमिच्छन्ति तेषु दत्तं महाफलम् ॥ ५५
अव्युत्क्रान्ताश्च धर्मेषु पाषण्डसमयेषु च ।
कृशप्राणाः कृशधनास्तेषु दत्तं महाफलम् ॥ ५६
कृतसर्वस्वहरणा निर्दोषाः प्रभविष्णुभिः ।
स्पृहयन्ति च भुक्तान्नं तेषु दत्तं महाफलम् ॥ ५७
तपस्विनस्तपोनिष्ठास्तेषां भैक्षचराश्च ये ।
अर्थिनः किंचिदिच्छन्ति तेषु दत्तं महाफलम् ॥ ५८
महाफलविधिर्दाने श्रुतस्ते भरतर्षभ ।
निरयं येन गच्छन्ति स्वर्गं चैव हि तच्छृणु ॥ ५९
गुर्वर्थं वाभयार्थं वा वर्जयित्वा युधिष्ठिर ।
येऽनृतं कथयन्ति स्म ते वै निरयगामिनः ॥ ६०
परदाराभिहर्तारः परदाराभिमर्शिनः ।
परदारप्रयोक्तारस्ते वै निरयगामिनः ॥ ६१
ये परस्वापहर्तारः परस्वानां च नाशकाः ।
सूचकाश्च परेषां ये ते वै निरयगामिनः ॥ ६२
प्रपाणां च सभानां च संक्रमाणां च भारत ।
अगाराणां च भेत्तारो नरा निरयगामिनः ॥ ६३
अनाथां प्रमदां बालां वृद्धां भीतां तपस्विनीम् ।
वञ्चयन्ति नरा ये च ते वै निरयगामिनः ॥ ६४
वृत्तिच्छेदं गृहच्छेदं दारच्छेदं च भारत ।
मित्रच्छेदं तथाशायास्ते वै निरयगामिनः ॥ ६५

सूचकाः संधिभेत्तारः परवृत्त्युपजीवकाः ।
अकृतज्ञाश्च मित्राणां ते वै निरयगामिनः ॥ ६६
पाषण्डा दूषकाश्चैव समयानां च दूषकाः ।
ये प्रत्यवसिताश्चैव ते वै निरयगामिनः ॥ ६७
कृताशं कृतनिर्वेशं कृतभक्तं कृतश्रमम् ।
भेदैर्ये व्यपकर्षन्ति ते वै निरयगामिनः ॥ ६८
पर्यश्नन्ति च ये दारानग्निभृत्यातिथींस्तथा ।
उत्सन्नपितृदेवेज्यास्ते वै निरयगामिनः ॥ ६९
वेदविक्रयिणश्चैव वेदानां चैव दूषकाः ।
वेदानां लेखकाश्चैव ते वै निरयगामिनः ॥ ७०
चातुराश्रम्यबाह्याश्च श्रुतिबाह्याश्च ये नराः ।
विकर्मभिश्च जीवन्ति ते वै निरयगामिनः ॥ ७१
केशविक्रयिका राजन्विषविक्रयिकाश्च ये ।
क्षीरविक्रयिकाश्चैव ते वै निरयगामिनः ॥ ७२
ब्राह्मणानां गवां चैव कन्यानां च युधिष्ठिर ।
येऽन्तरं यान्ति कार्येषु ते वै निरयगामिनः ॥ ७३
शस्त्रविक्रयकाश्चैव कर्तारश्च युधिष्ठिर ।
शल्यानां धनुषां चैव ते वै निरयगामिनः ॥ ७४
शल्यैर्वा शङ्कुभिर्वापि श्वभ्रैर्वा भरतर्षभ ।
ये मार्गमनुरुन्धन्ति ते वै निरयगामिनः ॥ ७५
उपाध्यायांश्च भृत्यांश्च भक्तांश्च भरतर्षभ ।
ये त्यजन्त्यसमर्थांस्तांस्ते वै निरयगामिनः ॥ ७६
अप्राप्तदमकाश्चैव नासानां वेधकास्तथा ।
बन्धकाश्च पशूनां ये ते वै निरयगामिनः ॥ ७७
अगोप्तारश्छलद्रव्या बलिषड्भागतत्पराः ।
समर्थाश्चाप्यदातारस्ते वै निरयगामिनः ॥ ७८
क्षान्तान्दान्तांस्तथा प्राज्ञान्दीर्घकालं सहोषितान् ।
त्यजन्ति कृतकृत्या ये ते वै निरयगामिनः ॥ ७९
बालानामथ वृद्धानां दासानां चैव ये नराः ।
अदत्त्वा भक्षयन्त्यग्रे ते वै निरयगामिनः ॥ ८०
एते पूर्वर्षिभिर्दृष्टाः प्रोक्ता निरयगामिनः ।
भागिनः स्वर्गलोकस्य वक्ष्यामि भरतर्षभ ॥ ८१
सर्वेष्वेव तु कार्येषु दैवपूर्वेषु भारत ।
हन्ति पुत्रान्पशून्कृत्स्नान्ब्राह्मणातिक्रमः कृतः ॥८२
दानेन तपसा चैव सत्येन च युधिष्ठिर ।
ये धर्ममनुवर्तन्ते ते नराः स्वर्गगामिनः ॥ ८३
शुश्रूषाभिस्तपोभिश्च श्रुतमादाय भारत ।
ये प्रतिग्रहनिःस्नेहास्ते नराः स्वर्गगामिनः ॥ ८४
भयात्पापात्तथाबाधाद्दारिद्र्याद्व्याधिधर्षणात् ।
यत्कृते प्रतिमुच्यन्ते ते नराः स्वर्गगामिनः ॥ ८५
क्षमावन्तश्च धीराश्च धर्मकार्येषु चोत्थिताः ।
मङ्गलाचारयुक्ताश्च ते नराः स्वर्गगामिनः ॥ ८६
निवृत्ता मधुमांसेभ्यः परदारेभ्य एव च ।
निवृत्ताश्चैव मद्येभ्यस्ते नराः स्वर्गगामिनः ॥ ८७
आश्रमाणां च कर्तारः कुलानां चैव भारत ।
देशानां नगराणां च ते नराः स्वर्गगामिनः ॥ ८८
वस्त्राभरणदातारो भक्षपानान्नदास्तथा ।
कुटुम्बानां च दातारस्ते नराः स्वर्गगामिनः ॥ ८९
सर्वहिंसानिवृत्ताश्च नराः सर्वसहाश्च ये ।
सर्वस्याश्रयभूताश्च ते नराः स्वर्गगामिनः ॥ ९०
मातरं पितरं चैव शुश्रूषन्ति जितेन्द्रियाः ।
भ्रातॄणां चैव सस्नेहास्ते नराः स्वर्गगामिनः ॥ ९१
आढ्याश्च बलवन्तश्च यौवनस्थाश्च भारत ।
ये वै जितेन्द्रिया धीरास्ते नराः स्वर्गगामिनः ॥९२
अपराद्धेषु सस्नेहा मृदवो मित्रवत्सलाः ।
आराधनसुखाश्चापि ते नराः स्वर्गगामिनः ॥ ९३
सहस्रपरिवेष्टारस्तथैव च सहस्रदाः ।
त्रातारश्च सहस्राणां पुरुषाः स्वर्गगामिनः ॥९४
सुवर्णस्य च दातारो गवां च भरतर्षभ ।
यानानां वाहनानां च ते नराः स्वर्गगामिनः ॥९५

वैवाहिकानां कन्यानां प्रेष्याणां च युधिष्ठिर ।
दातारो वाससां चैव ते नराः स्वर्गगामिनः ॥ ९६
विहारावसथोद्यानकूपारामसभाप्रदाः ।
वप्राणां चैव कर्तारस्ते नराः स्वर्गगामिनः ॥ ९७
निवेशनानां क्षेत्राणां वसतीनां च भारत ।
दातारः प्रार्थितानां च ते नराः स्वर्गगामिनः ॥९८
रसानामथ बीजानां धान्यानां च युधिष्ठिर ।
स्वयमुत्पाद्य दातारः पुरुषाः स्वर्गगामिनः ॥ ९९
यस्मिन्कस्मिन्कुले जाता बहुपुत्राः शतायुषः ।
सानुक्रोशा जितक्रोधाः पुरुषाः स्वर्गगामिनः ॥१००
एतदुक्तममुत्रार्थं दैवं पित्र्यं च भारत ।
धर्माधर्मौ च दानस्य यथा पूर्वर्षिभिः कृतौ ॥१०१

इति श्रीमहाभारते अनुशासनपर्वणि
चतुर्विंशतितमोऽध्यायः ॥ २४ ॥

२५

युधिष्ठिर उवाच ।

इदं मे तत्त्वतो राजन्वक्तुमर्हसि भारत ।
अहिंसयित्वा केनेह ब्रह्महत्या विधीयते ॥ १

भीष्म उवाच ।

व्यासमामन्त्र्य राजेन्द्र पुरा यत्पृष्टवानहम् ।
तत्तेऽहं संप्रवक्ष्यामि तदिहैकमनाः शृणु ॥ २
चतुर्थस्त्वं वसिष्ठस्य तत्त्वमाख्याहि मे मुने ।
अहिंसयित्वा केनेह ब्रह्महत्या विधीयते ॥ ३
इति पृष्टो महाराज पराशरशरीरजः ।
अब्रवीन्निपुणो धर्मे निःसंशयमनुत्तमम् ॥ ४
ब्राह्मणं स्वयमाहूय भिक्षार्थे कृशवृत्तिनम् ।
ब्रूयान्नास्तीति यः पश्चात्तं विद्याद्ब्रह्मघातिनम् ॥ ५
मध्यस्थस्येह विप्रस्य योऽनूचानस्य भारत ।
वृत्तिं हरति दुर्बुद्धिस्तं विद्याद्ब्रह्मघातिनम् ॥ ६
गोकुलस्य तृषार्तस्य जलार्थे वसुधाधिप ।
उत्पादयति यो विघ्नं तं विद्याद्ब्रह्मघातिनम् ॥ ७
यः प्रवृत्तां श्रुतिं सम्यक्शास्त्रं वा मुनिभिः कृतम् ।
दूषयत्यनभिज्ञाय तं विद्याद्ब्रह्मघातिनम् ॥ ८
आत्मजां रूपसंपन्नां महतीं सदृशे वरे ।
न प्रयच्छति यः कन्यां तं विद्याद्ब्रह्मघातिनम् ॥ ९
अधर्मनिरतो मूढो मिथ्या यो वै द्विजातिषु ।
दद्यान्मर्मातिगं शोकं तं विद्याद्ब्रह्मघातिनम् ॥ १०
चक्षुषा विप्रहीनस्य पङ्गुलस्य जडस्य वा ।
हरेत यो वै सर्वस्वं तं विद्याद्ब्रह्मघातिनम् ॥ ११
आश्रमे वा वने वा यो ग्रामे वा यदि वा पुरे ।
अग्निं समुत्सृजेन्मोहात्तं विद्याद्ब्रह्मघातिनम् ॥ १२

इति श्रीमहाभारते अनुशासनपर्वणि
पञ्चविंशतितमोऽध्यायः ॥ २५ ॥

२६

युधिष्ठिर उवाच ।

तीर्थानां दर्शनं श्रेयः स्नानं च भरतर्षभ ।
श्रवणं च महाप्राज्ञ श्रोतुमिच्छामि तत्त्वतः ॥ १
पृथिव्यां यानि तीर्थानि पुण्यानि भरतर्षभ ।
वक्तुमर्हसि मे तानि श्रोतास्मि नियतः प्रभो ॥ २

भीष्म उवाच ।

इममङ्गिरसा प्रोक्तं तीर्थवंशं महाद्युते ।
श्रोतुमर्हसि भद्रं ते प्राप्स्यसे धर्ममुत्तमम् ॥ ३
तपोवनगतं विप्रमभिगम्य महामुनिम् ।
पप्रच्छाङ्गिरसं वीर गौतमः संशितव्रतः ॥ ४
अस्ति मे भगवन्कश्चित्तीर्थेभ्यो धर्मसंशयः ।
तत्सर्वं श्रोतुमिच्छामि तन्मे शंस महामुने ॥ ५
उपस्पृश्य फलं किं स्यात्तेषु तीर्थेषु वै मुने ।
प्रेत्यभावे महाप्राज्ञ तद्यथास्ति तथा वद ॥ ६

अङ्गिरा उवाच ।

सप्ताहं चन्द्रभागां वै वितस्तामूर्मिमालिनीम् ।

विगाह्य वै निराहारो निर्ममो मुनिवद्भवेत् ॥ ७
काश्मीरमण्डले नद्यो याः पतन्ति महानदम् ।
ता नदीः सिन्धुमासाद्य शीलवान्स्वर्गमाप्नुयात् ॥ ८
पुष्करं च प्रभासं च नैमिषं सागरोदकम् ।
देविकामिन्द्रमार्गं च स्वर्णबिन्दुं विगाह्य च ।
विबोध्यते विमानस्थः सोऽप्सरोभिरभिष्टुतः ॥ ९
हिरण्यबिन्दुं विक्षोभ्य प्रयतश्चाभिवाद्य तम् ।
कुशेशयं च देवत्वं पूयते तस्य किल्बिषम् ॥ १०
इन्द्रतोयां समासाद्य गन्धमादनसंनिधौ ।
करतोयां कुरङ्गेषु त्रिरात्रोपोषितो नरः ।
अश्वमेधमवाप्नोति विगाह्य नियतः शुचिः ॥ ११
गङ्गाद्वारे कुशावर्ते बिल्वके नेमिपर्वते ।
तथा कनखले स्नात्वा धूतपाप्मा दिवं व्रजेत् ॥ १२
अपां ह्रद उपस्पृश्य वाजपेयफलं लभेत् ।
ब्रह्मचारी जितक्रोधः सत्यसंधस्त्वहिंसकः ॥ १३
यत्र भागीरथी गङ्गा भजते दिशमुत्तराम् ।
महेश्वरस्य निष्ठाने यो नरस्त्वभिषिच्यते ।
एकमासं निराहारः स्वयं पश्यति देवताः ॥ १४
सप्तगङ्गे त्रिगङ्गे च इन्द्रमार्गे च तर्पयन् ।
सुधां वै लभते भोक्तुं यो नरो जायते पुनः ॥ १५
महाश्रम उपस्पृश्य योऽग्निहोत्रपरः शुचिः ।
एकमासं निराहारः सिद्धिं मासेन स व्रजेत् ॥ १६
महाह्रद उपस्पृश्य भृगुतुङ्गे त्वलोलुपः ।
त्रिरात्रोपोषितो भूत्वा मुच्यते ब्रह्महत्यया ॥ १७
कन्याकूप उपस्पृश्य बलाकायां कृतोदकः ।
देवेषु कीर्तिं लभते यशसा च विराजते ॥ १८
देशकाल उपस्पृश्य तथा सुन्दरिकाह्रदे ।
अश्विभ्यां रूपवर्चस्यं प्रेत्य वै लभते नरः ॥ १९
महागङ्गामुपस्पृश्य कृत्तिकाङ्गारके तथा ।
पक्षमेकं निराहारः स्वर्गमाप्नोति निर्मलः ॥ २०
वैमानिक उपस्पृश्य किङ्किणीकाश्रमे तथा ।
निवासेऽप्सरसां दिव्ये कामचारी महीयते ॥ २१
कालिकाश्रममासाद्य विपाशायां कृतोदकः ।
ब्रह्मचारी जितक्रोधस्त्रिरात्रान्मुच्यते भवात् ॥ २२
आश्रमे कृत्तिकानां तु स्नात्वा यस्तर्पयेत्पितॄन् ।
तोषयित्वा महादेवं निर्मलः स्वर्गमाप्नुयात् ॥ २३
महापुर उपस्पृश्य त्रिरात्रोपोषितो नरः ।
त्रसानां स्थावराणां च द्विपदानां भयं त्यजेत् ॥२४
देवदारुवने स्नात्वा धूतपाप्मा कृतोदकः ।
देवलोकमवाप्नोति सप्तरात्रोषितः शुचिः ॥ २५
कौशन्ते च कुशस्तम्बे द्रोणशर्मपदे तथा ।
आपःप्रपतने स्नातः सेव्यते सोऽप्सरोगणैः ॥ २६
चित्रकूटे जनस्थाने तथा मन्दाकिनीजले ।
विगाह्य वै निराहारो राजलक्ष्मीं निगच्छति ॥२७
श्यामायास्त्वाश्रमं गत्वा उष्य चैवाभिषिच्य च ।
त्रींस्त्रिरात्रान्स संधाय गन्धर्वनगरे वसेत् ॥ २८
रमण्यां च उपस्पृश्य तथा वै गन्धतारिके ।
एकमासं निराहारस्त्वन्तर्धानफलं लभेत् ॥ २९
कौशिकीद्वारमासाद्य वायुभक्षस्त्वलोलुपः ।
एकविंशतिरात्रेण स्वर्गमारोहते नरः ॥ ३०
मतङ्गवाप्यां यः स्नायादेकरात्रेण सिध्यति ।
विगाहति ह्यनालम्बमन्धकं वै सनातनम् ॥ ३१
नैमिषे स्वर्गतीर्थे च उपस्पृश्य जितेन्द्रियः ।
फलं पुरुषमेधस्य लभेन्मासं कृतोदकः ॥ ३२
गङ्गाह्रद उपस्पृश्य तथा चैवोत्पलावने ।
अश्वमेधमवाप्नोति यत्र मासं कृतोदकः ॥ ३३
गङ्गायमुनयोस्तीर्थे तथा कालंजरे गिरौ ।
षष्टिह्रद उपस्पृश्य दानं नान्यद्विशिष्यते ॥ ३४
दश तीर्थसहस्राणि तिस्रः कोट्यस्तथापराः ।
समागच्छन्ति माघ्यां तु प्रयागे भरतर्षभ ॥ ३५

माघमासं प्रयागे तु नियतः संशितव्रतः ।
स्नात्वा तु भरतश्रेष्ठ निर्मलः स्वर्गमाप्नुयात् ॥ ३६
मरुद्गण उपस्पृश्य पितॄणामाश्रमे शुचिः ।
वैवस्वतस्य तीर्थे च तीर्थभूतो भवेन्नरः ॥ ३७
तथा ब्रह्मशिरो गत्वा भागीरथ्यां कृतोदकः ।
एकमासं निराहारः सोमलोकमवाप्नुयात् ॥ ३८
कपोतके नरः स्नात्वा अष्टावक्रे कृतोदकः ।
द्वादशाहं निराहारो नरमेधफलं लभेत् ॥ ३९
मुञ्जपृष्ठं गयां चैव निर्ऋतिं देवपर्वतम् ।
तृतीयां क्रौञ्चपादीं च ब्रह्महत्या विशुध्यति ॥ ४०
कलश्यां वाप्युपस्पृश्य वेद्यां च बहुशोजलाम् ।
अग्नेः पुरे नरः स्नात्वा विशालायां कृतोदकः ।
देवह्रद उपस्पृश्य ब्रह्मभूतो विराजते ॥ ४१
पुरापवर्तनं नन्दां महानन्दां च सेव्य वै ।
नन्दने सेव्यते दान्तस्त्वप्सरोभिरहिंसकः ॥ ४२
उर्वशीकृत्तिकायोगे गत्वा यः सुसमाहितः ।
लौहित्ये विधिवत्स्नात्वा पुण्डरीकफलं लभेत् ॥४३
रामह्रद उपस्पृश्य विशालायां कृतोदकः ।
द्वादशाहं निराहारः कल्मषाद्विप्रमुच्यते ॥ ४४
महाह्रद उपस्पृश्य शुद्धेन मनसा नरः ।
एकमासं निराहारो जमदग्निगतिं लभेत् ॥ ४५
विन्ध्ये संताप्य चात्मानं सत्यसंधस्त्वहिंसकः ।
षण्मासं पदमास्थाय मासेनैकेन शुध्यति ॥ ४६
नर्मदायामुपस्पृश्य तथा सूर्पारकोदके ।
एकपक्षं निराहारो राजपुत्रो विधीयते ॥ ४७
जम्बूमार्गे त्रिभिर्मासैः संयतः सुसमाहितः ।
अहोरात्रेण चैकेन सिद्धिं समधिगच्छति ॥ ४८
कोकामुखे विगाह्यापो गत्वा चण्डालिकाश्रमम् ।
शाकभक्षश्चीरवासाः कुमारीर्विन्दते दश ॥ ४९
वैवस्वतस्य सदनं न स गच्छेत्कदाचन ।
यस्य कन्याह्रदे वासो देवलोकं स गच्छति ॥५०
प्रभासे त्वेकरात्रेण अमावास्यां समाहितः ।
सिध्यतेऽत्र महाबाहो यो नरो जायते पुनः ॥५१
उज्जानक उपस्पृश्य आर्ष्टिषेणस्य चाश्रमे ।
पिङ्गायाश्चाश्रमे स्नात्वा सर्वपापैः प्रमुच्यते ॥ ५२
कुल्यायां समुपस्पृश्य जप्त्वा चैवाघमर्षणम् ।
अश्वमेधमवाप्नोति त्रिरात्रोपोषितः शुचिः ॥ ५३
पिण्डारक उपस्पृश्य एकरात्रोषितो नरः ।
अग्निष्टोममवाप्नोति प्रभातां शर्वरीं शुचिः ॥ ५४
तथा ब्रह्मसरो गत्वा धर्मारण्योपशोभितम् ।
पुण्डरीकमवाप्नोति प्रभातां शर्वरीं शुचिः ॥ ५५
मैनाके पर्वते स्नात्वा तथा संध्यामुपास्य च ।
कामं जित्वा च वै मासं सर्वमेधफलं लभेत् ॥५६
विख्यातो हिमवान्पुण्यः शंकरश्वशुरो गिरिः ।
आकरः सर्वरत्नानां सिद्धचारणसेवितः ॥ ५७
शरीरमुत्सृजेत्तत्र विधिपूर्वमनाशके ।
अध्रुवं जीवितं ज्ञात्वा यो वै वेदान्तगो द्विजः ॥
अभ्यर्च्य देवतास्तत्र नमस्कृत्य मुनींस्तथा ।
ततः सिद्धो दिवं गच्छेद्ब्रह्मलोकं सनातनम् ॥ ५९
कामं क्रोधं च लोभं च यो जित्वा तीर्थमावसेत् ।
न तेन किंचिन्न प्राप्तं तीर्थाभिगमनाद्भवेत् ॥ ६०
यान्यगम्यानि तीर्थानि दुर्गाणि विषमाणि च ।
मनसा तानि गम्यानि सर्वतीर्थसमासतः ॥ ६१
इदं मेध्यमिदं धन्यमिदं स्वर्ग्यमिदं सुखम् ।
इदं रहस्यं देवानामाप्लाव्यानां च पावनम् ॥ ६२
इदं दद्याद्द्विजातीनां साधूनामात्मजस्य वा ।
सुहृदां च जपेत्कर्णे शिष्यस्यानुगतस्य वा ॥ ६३
दत्तवान्गौतमस्येदमङ्गिरा वै महातपाः ।
गुरुभिः समनुज्ञातः काश्यपेन च धीमता ॥ ६४
महर्षीणामिदं जप्यं पावनानां तथोत्तमम् ।

जपंश्चाभ्युत्थितः शश्वन्निर्मलः स्वर्गमाप्नुयात् ॥ ६५
इदं यश्चापि शृणुयाद्रहस्यं त्वङ्गिरोमतम् ।
उत्तमे च कुले जन्म लभेज्जातिं च संस्मरेत् ॥ ६६

इति श्रीमहाभारते अनुशासनपर्वणि
षड्विंशोऽध्यायः ॥ २६ ॥

२७

वैशंपायन उवाच ।

बृहस्पतिसमं बुद्ध्या क्षमया ब्रह्मणः समम् ।
पराक्रमे शक्रसममादित्यसमतेजसम् ॥ १
गाङ्गेयमर्जुनेनाजौ निहतं भूरिवर्चसम् ।
भ्रातृभिः सहितोऽन्यैश्च पर्युपास्ते युधिष्ठिरः ॥ २
शयानं वीरशयने कालाकाङ्क्षिणमच्युतम् ।
आजग्मुर्भरतश्रेष्ठं द्रष्टुकामा महर्षयः ॥ ३
अत्रिर्वसिष्ठोऽथ भृगुः पुलस्त्यः पुलहः क्रतुः ।
अङ्गिरा गौतमोऽगस्त्यः सुमतिः स्वायुरात्मवान् ॥
विश्वामित्रः स्थूलशिराः संवर्तः प्रमतिर्दमः ।
उशना बृहस्पतिर्व्यासश्च्यवनः काश्यपो ध्रुवः ॥ ५
दुर्वासा जमदग्निश्च मार्कण्डेयोऽथ गालवः ।
भरद्वाजश्च रैभ्यश्च यवक्रीतस्त्रितस्तथा ॥ ६
स्थूलाक्षः शकलाक्षश्च कण्वो मेधातिथिः कृशः ।
नारदः पर्वतश्चैव सुधन्वाथैकतो द्वितः ॥ ७
नितंभूर्भुवनो धौम्यः शतानन्दोऽकृतव्रणः ।
जामदग्न्यस्तथा रामः काम्यश्चेत्येवमादयः ।
समागता महात्मानो भीष्मं द्रष्टुं महर्षयः ॥ ८
तेषां महात्मनां पूजामागतानां युधिष्ठिरः ।
भ्रातृभिः सहितश्चक्रे यथावदनुपूर्वशः ॥ ९
ते पूजिताः सुखासीनाः कथाश्चक्रुर्महर्षयः ।
भीष्माश्रिताः सुमधुराः सर्वेन्द्रियमनोहराः ॥ १०
भीष्मस्तेषां कथाः श्रुत्वा ऋषीणां भावितात्मनाम् ।
मेने दिविस्थमात्मानं तुष्ट्या परमया युतः ॥ ११
ततस्ते भीष्ममामन्त्र्य पाण्डवांश्च महर्षयः ।
अन्तर्धानं गताः सर्वे सर्वेषामेव पश्यताम् ॥ १२
तानृषीन्सुमहाभागानन्तर्धानगतानपि ।
पाण्डवास्तुष्टुवुः सर्वे प्रणेमुश्च मुहुर्मुहुः ॥ १३
प्रसन्नमनसः सर्वे गाङ्गेयं कुरुसत्तमाः ।
उपतस्थुर्यथोद्यन्तमादित्यं मन्त्रकोविदाः ॥ १४
प्रभावात्तपसस्तेषामृषीणां वीक्ष्य पाण्डवाः ।
प्रकाशन्तो दिशः सर्वा विस्मयं परमं ययुः ॥ १५
महाभाग्यं परं तेषामृषीणामनुचिन्त्य ते ।
पाण्डवाः सह भीष्मेण कथाश्चक्रुस्तदाश्रयाः ॥ १६
कथान्ते शिरसा पादौ स्पृष्ट्वा भीष्मस्य पाण्डवः ।
धर्म्यं धर्मसुतः प्रश्नं पर्यपृच्छद्युधिष्ठिरः ॥ १७
के देशाः के जनपदा आश्रमाः के च पर्वताः ।
प्रकृष्टाः पुण्यतः काश्च ज्ञेया नद्यः पितामह ॥ १८

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
शिलोञ्छवृत्तेः संवादं सिद्धस्य च युधिष्ठिर ॥ १९
इमां कश्चित्परिक्रम्य पृथिवीं शैलभूषिताम् ।
असकृद्द्विपदां श्रेष्ठः श्रेष्ठस्य गृहमेधिनः ॥ २०
शिलवृत्तेर्गृहं प्राप्तः स तेन विधिनार्चितः ।
कृतकृत्य उपातिष्ठत्सिद्धं तमतिथिं तदा ॥ २१
तौ समेत्य महात्मानौ सुखासीनौ कथाः शुभाः ।
चक्रतुर्वेदसंबद्धास्तच्छेषकृतलक्षणाः ॥ २२
शिलवृत्तिः कथान्ते तु सिद्धमामन्त्र्य यत्नतः ।
प्रश्नं पप्रच्छ मेधावी यन्मां त्वं परिपृच्छसि ॥ २३

शिलवृत्तिरुवाच ।

के देशाः के जनपदाः केऽऽश्रमाः के च पर्वताः ।
प्रकृष्टाः पुण्यतः काश्च ज्ञेया नद्यस्तदुच्यताम् ॥ २४

सिद्ध उवाच ।

ते देशास्ते जनपदास्तेऽऽश्रमास्ते च पर्वताः ।

येषां भागीरथी गङ्गा मध्येनैति सरिद्वरा ॥ २५
तपसा ब्रह्मचर्येण यज्ञैस्त्यागेन वा पुनः ।
गतिं तां न लभेज्जन्तुर्गङ्गां संसेव्य यां लभेत् ॥२६
स्पृष्टानि येषां गाङ्गेयैस्तोयैर्गात्राणि देहिनाम् ।
न्यस्तानि न पुनस्तेषां त्यागः स्वर्गाद्विधीयते ॥२७
सर्वाणि येषां गाङ्गेयैस्तोयैः कृत्यानि देहिनाम् ।
गां त्यक्त्वा मानवा विप्र दिवि तिष्ठन्ति तेऽचलाः ॥
पूर्वे वयसि कर्माणि कृत्वा पापानि ये नराः ।
पश्चाद्गङ्गां निषेवन्ते तेऽपि यान्त्युत्तमां गतिम् ॥२९
स्नातानां शुचिभिस्तोयैर्गाङ्गेयैः प्रयतात्मनाम् ।
व्युष्टिर्भवति या पुंसां न सा क्रतुशतैरपि ॥ ३०
यावदस्थि मनुष्यस्य गङ्गातोयेषु तिष्ठति ।
तावद्वर्षसहस्राणि स्वर्गं प्राप्य महीयते ॥ ३१
अपहत्य तमस्तीव्रं यथा भात्युदये रविः ।
तथापहत्य पाप्मानं भाति गङ्गाजलोक्षितः ॥ ३२
विसोमा इव शर्वर्यो विपुष्पास्तरवो यथा ।
तद्वद्देशा दिशश्चैव हीना गङ्गाजलैः शुभैः ॥ ३३
वर्णाश्रमा यथा सर्वे स्वधर्मज्ञानवर्जिताः ।
क्रतवश्च यथासोमास्तथा गङ्गां विना जगत् ॥ ३४
यथा हीनं नभोऽर्केण भूः शैलैः खं च वायुना ।
तथा देशा दिशश्चैव गङ्गाहीना न संशयः ॥ ३५
त्रिषु लोकेषु ये केचित्प्राणिनः सर्व एव ते ।
तर्प्यमाणाः परां तृप्तिं यान्ति गङ्गाजलैः शुभैः ॥३६
यस्तु सूर्येण निष्टप्तं गाङ्गेयं पिबते जलम् ।
गवां निर्हारनिर्मुक्ताद्यावकात्तद्विशिष्यते ॥ ३७
इन्दुव्रतसहस्रं तु चरेद्यः कायशोधनम् ।
पिबेद्यश्चापि गङ्गाम्भः समौ स्यातां न वा समौ ॥
तिष्ठेद्युगसहस्रं तु पादेनैकेन यः पुमान् ।
मासमेकं तु गङ्गायां समौ स्यातां न वा समौ ॥
लम्बेतावाक्शिरा यस्तु युगानामयुतं पुमान् ।
तिष्ठेद्यथेष्टं यश्चापि गङ्गायां स विशिष्यते ॥ ४०
अग्नौ प्रास्तं प्रधूयेत यथा तूलं द्विजोत्तम ।
तथा गङ्गावगाढस्य सर्वं पापं प्रधूयते ॥ ४१
भूतानामिह सर्वेषां दुःखोपहतचेतसाम् ।
गतिमन्वेषमाणानां न गङ्गासदृशी गतिः ॥ ४२
भवन्ति निर्विषाः सर्पा यथा तार्क्ष्यस्य दर्शनात् ।
गङ्गाया दर्शनात्तद्वत्सर्वपापैः प्रमुच्यते ॥ ४३
अप्रतिष्ठाश्च ये केचिदधर्मशरणाश्च ये ।
तेषां प्रतिष्ठा गङ्गेह शरणं शर्म वर्म च ॥ ४४
प्रकृष्टैरशुभैर्ग्रस्ताननेकैः पुरुषाधमान् ।
पततो नरके गङ्गा संश्रितान्प्रेत्य तारयेत् ॥ ४५
ते संविभक्ता मुनिभिर्नूनं देवैः सवासवैः ।
येऽभिगच्छन्ति सततं गङ्गामभिगतां सुरैः ॥ ४६
विनयाचारहीनाश्च अशिवाश्च नराधमाः ।
ते भवन्ति शिवा विप्र ये वै गङ्गां समाश्रिताः ॥
यथा सुराणाममृतं पितॄणां च यथा स्वधा ।
सुधा यथा च नागानां तथा गङ्गाजलं नृणाम् ॥४८
उपासते यथा बाला मातरं क्षुधयार्दिताः ।
श्रेयस्कामास्तथा गङ्गामुपासन्तीह देहिनः ॥ ४९
स्वायंभुवं यथा स्थानं सर्वेषां श्रेष्ठमुच्यते ।
स्नातानां सरितां श्रेष्ठा गङ्गा तद्वदिहोच्यते ॥ ५०
यथोपजीविनां धेनुर्देवादीनां धरा स्मृता ।
तथोपजीविनां गङ्गा सर्वप्राणभृतामिह ॥ ५१
देवाः सोमार्कसंस्थानि यथा सत्रादिभिर्मखैः ।
अमृतान्युपजीवन्ति तथा गङ्गाजलं नराः ॥ ५२
जाह्नवीपुलिनोत्थाभिः सिकताभिः समुक्षितः ।
मन्यते पुरुषोऽऽत्मानं दिविष्ठमिव शोभितम् ॥५३
जाह्नवीतीरसंभूतां मृदं मूर्ध्ना बिभर्ति यः ।
बिभर्ति रूपं सोऽर्कस्य तमोनाशात्सुनिर्मलम् ॥५४
गङ्गोर्मिभिरथो दिग्धः पुरुषं पवनो यदा ।

स्पृशते सोऽपि पाप्मानं सद्य एवापमार्जति ॥ ५५
व्यसनैरभितप्तस्य नरस्य विनशिष्यतः ।
गङ्गादर्शनजा प्रीतिर्व्यसनान्यपकर्षति ॥ ५६
हंसारावैः कोकरवै रवैरन्यैश्च पक्षिणाम् ।
पस्पर्धे गङ्गा गन्धर्वान्पुलिनैश्च शिलोच्चयान् ॥ ५७
हंसादिभिः सुबहुभिर्विविधैः पक्षिभिर्वृताम् ।
गङ्गां गोकुलसंबाधां दृष्ट्वा स्वर्गोऽपि विस्मृतः ॥५८
न सा प्रीतिर्दिविष्ठस्य सर्वकामानुपाश्नतः ।
अभवद्या परा प्रीतिर्गङ्गायाः पुलिने नृणाम् ॥ ५९
वाङ्मनःकर्मजैर्ग्रस्तः पापैरपि पुमानिह ।
वीक्ष्य गङ्गां भवेत्पूतस्तत्र मे नास्ति संशयः ॥६०
सप्तावरान्सप्त परान्पितॄंस्तेभ्यश्च ये परे ।
पुमांस्तारयते गङ्गां वीक्ष्य स्पृष्ट्वावगाह्य च ॥ ६१
श्रुताभिलषिता दृष्टा स्पृष्टा पीतावगाहिता ।
गङ्गा तारयते नृणामुभौ वंशौ विशेषतः ॥ ६२
दर्शनात्स्पर्शनात्पानात्तथा गङ्गेति कीर्तनात् ।
पुनात्यपुण्यान्पुरुषाञ्शतशोऽथ सहस्रशः ॥ ६३
य इच्छेत्सफलं जन्म जीवितं श्रुतमेव च ।
स पितॄंस्तर्पयेद्गङ्गामभिगम्य सुरांस्तथा ॥ ६४
न सुतैर्न च वित्तेन कर्मणा न च तत्फलम् ।
प्राप्नुयात्पुरुषोऽत्यन्तं गङ्गां प्राप्य यदाप्नुयात् ॥ ६५
जात्यन्धैरिह तुल्यास्ते मृतैः पङ्गुभिरेव च ।
समर्था ये न पश्यन्ति गङ्गां पुण्यजलां शिवाम् ॥
भूतभव्यभविष्यज्ञैर्महर्षिभिरुपस्थिताम् ।
देवैः सेन्द्रैश्च को गङ्गां नोपसेवेत मानवः ॥ ६७
वानप्रस्थैर्गृहस्थैश्च यतिभिर्ब्रह्मचारिभिः ।
विद्यावद्भिः श्रितां गङ्गां पुमान्को नाम नाश्रयेत् ॥
उत्क्रामद्भिश्च यः प्राणैः प्रयतः शिष्टसंमतः ।
चिन्तयेन्मनसा गङ्गां स गतिं परमां लभेत् ॥ ६९
न भयेभ्यो भयं तस्य न पापेभ्यो न राजतः ।
आ देहपतनाद्गङ्गामुपास्ते यः पुमानिह ॥ ७०
गगनाद्यां महापुण्यां पतन्तीं वै महेश्वरः ।
दधार शिरसा देवीं तामेव दिवि सेवते ॥ ७१
अलंकृतास्त्रयो लोकाः पथिभिर्विमलैस्त्रिभिः ।
यस्तु तस्या जलं सेवेत्कृतकृत्यः पुमान्भवेत् ॥ ७२
दिवि ज्योतिर्यथादित्यः पितॄणां चैव चन्द्रमाः ।
देवेशश्च यथा नृणां गङ्गेह सरितां तथा ॥ ७३
मात्रा पित्रा सुतैर्दारैर्वियुक्तस्य धनेन वा ।
न भवेद्धि तथा दुःखं यथा गङ्गावियोगजम् ॥७४
नारण्यैर्नेष्टविषयैर्न सुतैर्न धनागमैः ।
तथा प्रसादो भवति गङ्गां वीक्ष्य यथा नृणाम् ॥
पूर्णमिन्दुं यथा दृष्ट्वा नृणां दृष्टिः प्रसीदति ।
गङ्गां त्रिपथगां दृष्ट्वा तथा दृष्टिः प्रसीदति ॥ ७६
तद्भावस्तद्गतमनास्तन्निष्ठस्तत्परायणः ।
गङ्गां योऽनुगतो भक्त्या स तस्याः प्रियतां व्रजेत् ॥
भूःस्थैः खस्थैर्दिविष्ठैश्च भूतैरुच्चावचैरपि ।
गङ्गा विगाह्या सततमेतत्कार्यतमं सताम् ॥ ७८
त्रिषु लोकेषु पुण्यत्वाद्गङ्गायाः प्रथितं यशः ।
यत्पुत्रान्सगरस्यैषा भस्माख्याननयद्दिवम् ॥ ७९

वाय्वीरिताभिः सुमहास्वनाभि-
  र्द्रुताभिरत्यर्थसमुच्छ्रिताभिः ।
गङ्गोर्मिभिर्भानुमतीभिरिद्धः
  सहस्ररश्मिप्रतिमो विभाति ॥ ८०
पयस्विनीं घृतिनीमत्युदारां
  समृद्धिनीं वेगिनीं दुर्विगाह्याम् ।
गङ्गां गत्वा यैः शरीरं विसृष्टं
  गता धीरास्ते विबुधैः समत्वम् ॥ ८१
अन्धाञ्जडान्द्रव्यहीनांश्च गङ्गा
  यशस्विनी बृहती विश्वरूपा ।
देवैः सेन्द्रैर्मुनिभिर्मानवैश्च

निषेविता सर्वकामैर्यनक्ति ॥ ८२
ऊर्जावतीं मधुमतीं महापुण्यां त्रिवर्त्मगाम् ।
त्रिलोकगोप्त्रीं ये गङ्गां संश्रितास्ते दिवं गताः ॥
यो वत्स्यति द्रक्ष्यति वापि मर्त्य-
स्तस्मै प्रयच्छन्ति सुखानि देवाः ।
तद्भाविताः स्पर्शने दर्शने य-
स्तस्मै देवा गतिमिष्टां दिशन्ति ॥ ८४
दक्षां पृथ्वीं बृहतीं विप्रकृष्टां
शिवामृतां सुरसां सुप्रसन्नाम् ।
विभावरीं सर्वभूतप्रतिष्ठां
गङ्गां गता ये त्रिदिवं गतास्ते ॥ ८५
ख्यातिर्यस्याः खं दिवं गां च नित्यं
पुरा दिशो विदिशश्चावतस्थे ।
तस्या जलं सेव्य सरिद्वराया
मर्त्याः सर्वे कृतकृत्या भवन्ति ॥ ८६
इयं गङ्गेति नियतं प्रतिष्ठा
गुहस्य रुक्मस्य च गर्भयोषा ।
प्रातस्त्रिमार्गा घृतवहा विपाप्मा
गङ्गावतीर्णा वियतो विश्वतोया ॥ ८७
सुतावनीध्रस्य हरस्य भार्या
दिवो भुवश्चापि कक्ष्यानुरूपा ।
भव्या पृथिव्या भाविनी भाति राज-
न्गङ्गा लोकानां पुण्यदा वै त्रयाणाम् ॥ ८८
मधुप्रवाहा घृतरागोद्धृताभि-
र्महोर्मिभिः शोभिता ब्राह्मणैश्च ।
दिवश्च्युता शिरसात्ता भवेन
गङ्गावनीध्रास्त्रिदिवस्य माला ॥ ८९
योनिर्वरिष्ठा विरजा वितन्वी
शुष्मा इरा वारिवहा यशोदा ।
विश्वावती चाकृतिरिष्टिरिद्धा
गङ्गोक्षितानां भुवनस्य पन्थाः ॥ ९०
क्षान्त्या मह्या गोपने धारणे च
दीप्त्या कृशानोस्तपनस्य चैव ।
तुल्या गङ्गा संमता ब्राह्मणानां
गुहस्य ब्रह्मण्यतया च नित्यम् ॥ ९१
ऋषिष्टुतां विष्णुपदीं पुराणीं
सुपुण्यतोयां मनसापि लोके ।
सर्वात्मना जाह्नवीं ये प्रपन्ना-
स्ते ब्रह्मणः सदनं संप्रयाताः ॥ ९२
लोकानिमान्नयति या जननीव पुत्रा-
न्सर्वात्मना सर्वगुणोपपन्ना ।
स्वस्थानमिष्टमिह ब्राह्मममीप्समानै-
र्गङ्गा सदैवात्मवशैरुपास्या ॥ ९३
उस्रां जुष्टां मिषतीं विश्वतोया-
मिरां वज्रीं रेवतीं भूधराणाम् ।
शिष्टाश्रयाममृतां ब्रह्मकान्तां
गङ्गां श्रयेदात्मवान्सिद्धिकामः ॥ ९४
प्रसाद्य देवान्सविभून्समस्ता-
न्भगीरथस्तपसोग्रेण गङ्गाम् ।
गामानयत्तामभिगम्य शश्व-
न्पुमान्भयं नेह नामुत्र विद्यात् ॥ ९५
उदाहृतः सर्वथा ते गुणानां
मयैकदेशः प्रसमीक्ष्य बुद्ध्या ।
शक्तिर्न मे काचिदिहास्ति वक्तुं
गुणान्सर्वान्परिमातुं तथैव ॥ ९६
मेरोः समुद्रस्य च सर्वरत्नैः
संख्योपलानामुदकस्य वापि ।
वक्तुं शक्यं नेह गङ्गाजलानां
गुणाख्यानं परिमातुं तथैव ॥ ९७
तस्मादिमान्परया श्रद्धयोक्ता-

न्गुणान्सर्वाञ्जाह्नवीजांस्तथैव ।
भजेद्वाचा मनसा कर्मणा च
भक्त्या युक्तः परया श्रद्दधानः ॥ ९८
लोकानिमांस्त्रीन्यशसा वितत्य
सिद्धिं प्राप्य महतीं तां दुरापाम् ।
गङ्गाकृतानचिरेणैव लोका-
न्यथेष्टमिष्टान्विचरिष्यसि त्वम् ॥ ९९
तव मम च गुणैर्महानुभावा
जुषतु मतिं सततं स्वधर्मयुक्तैः ।
अभिगतजनवत्सला हि गङ्गा
भजति युनक्ति सुखैश्च भक्तिमन्तम् ॥१००

भीष्म उवाच ।

इति परममतिर्गुणाननेका-
ञ्शिलरतये त्रिपथानुयोगरूपान् ।
बहुविधमनुशास्य तथ्यरूपा-
न्गगनतलं द्युतिमान्विवेश सिद्धः ॥१०१
शिलवृत्तिस्तु सिद्धस्य वाक्यैः संबोधितस्तदा ।
गङ्गामुपास्य विधिवत्सिद्धिं प्राप्तः सुदुर्लभाम् ॥
तस्मात्त्वमपि कौन्तेय भक्त्या परमया युतः ।
गङ्गामभ्येहि सततं प्राप्स्यसे सिद्धिमुत्तमाम् ॥१०३

वैशंपायन उवाच ।

श्रुत्वेतिहासं भीष्मोक्तं गङ्गायाः स्तवसंयुतम् ।
युधिष्ठिरः परां प्रीतिमगच्छद्भ्रातृभिः सह ॥ १०४
इतिहासमिमं पुण्यं शृणुयाद्यः पठेत वा ।
गङ्गायाः स्तवसंयुक्तं स मुच्येत्सर्वकिल्बिषैः ॥

इति श्रीमहाभारते अनुशासनपर्वणि
सप्तविंशतितमोऽध्यायः ॥ २७ ॥

२८

युधिष्ठिर उवाच ।

प्रज्ञाश्रुताभ्यां वृत्तेन शीलेन च यथा भवान् ।
गुणैः समुदितः सर्वैर्वयसा च समन्वितः ।
तस्माद्भवन्तं पृच्छामि धर्मं धर्मभृतां वर ॥ १
क्षत्रियो यदि वा वैश्यः शूद्रो वा राजसत्तम ।
ब्राह्मण्यं प्राप्नुयात्केन तन्मे व्याख्यातुमर्हसि ॥ २
तपसा वा सुमहता कर्मणा वा श्रुतेन वा ।
ब्राह्मण्यमथ चेदिच्छेत्तन्मे ब्रूहि पितामह ॥ ३

भीष्म उवाच ।

ब्राह्मण्यं तात दुष्प्रापं वर्णैः क्षत्रादिभिस्त्रिभिः ।
परं हि सर्वभूतानां स्थानमेतद्युधिष्ठिर ॥ ४
बह्वीस्तु संसरन्योनीर्जायमानः पुनः पुनः ।
पर्याये तात कस्मिंश्चिद्ब्राह्मणो नाम जायते ॥ ५
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
मतङ्गस्य च संवादं गर्दभ्याश्च युधिष्ठिर ॥ ६
द्विजातेः कस्यचित्तात तुल्यवर्णः सुतः प्रभुः ।
मतङ्गो नाम नाम्नाभूत्सर्वैः समुदितो गुणैः ॥ ७
स यज्ञकारः कौन्तेय पित्रा सृष्टः परंतप ।
प्रायाद्गर्दभयुक्तेन रथेनेहाशुगामिना ॥ ८
स बालं गर्दभं राजन्वहन्तं मातुरन्तिके ।
निरविध्यत्प्रतोदेन नासिकायां पुनः पुनः ॥ ९
तं तु तीव्रव्रणं दृष्ट्वा गर्दभी पुत्रगृद्धिनी ।
उवाच मा शुचः पुत्र चण्डालस्त्वाधितिष्ठति ॥ १०
ब्राह्मणे दारुणं नास्ति मैत्रो ब्राह्मण उच्यते ।
आचार्यः सर्वभूतानां शास्ता किं प्रहरिष्यति ॥११
अयं तु पापप्रकृतिर्बाले न कुरुते दयाम् ।
स्वयोनिं मानयत्येष भावो भावं निगच्छति ॥१२
एतच्छ्रुत्वा मतङ्गस्तु दारुणं रासभीवचः ।
अवतीर्य रथात्तूर्णं रासभीं प्रत्यभाषत ॥ १३
ब्रूहि रासभि कल्याणि माता मे येन दूषिता ।
कथं मां वेत्सि चण्डालं क्षिप्रं रासभि शंस मे ॥
केन जातोऽस्मि चण्डालो ब्राह्मण्यं येन मेऽनशत् ।

तत्त्वेनैतन्महाप्राज्ञे ब्रूहि सर्वमशेषतः ॥ १५

गर्दभ्युवाच ।

ब्राह्मण्यां वृषलेन त्वं मत्तायां नापितेन ह ।
जातस्त्वमसि चण्डालो ब्राह्मण्यं तेन तेऽनशत् ॥
एवमुक्तो मतङ्गस्तु प्रत्युपायाद्गृहं प्रति ।
तमागतमभिप्रेक्ष्य पिता वाक्यमथाब्रवीत् ॥ १७
मया त्वं यज्ञसंसिद्धौ नियुक्तो गुरुकर्मणि ।
कस्मात्प्रतिनिवृत्तोऽसि कच्चिन्न कुशलं तव ॥ १८

मतङ्ग उवाच ।

अयोनिरग्र्ययोनिर्वा यः स्यात्स कुशली भवेत् ।
कुशलं तु कुतस्तस्य यस्येयं जननी पितः ॥ १९
ब्राह्मण्यां वृषलाज्जातं पितर्वेदयतीह माम् ।
अमानुषी गर्दभीयं तस्मात्तप्स्ये तपो महत् ॥ २०
एवमुक्त्वा स पितरं प्रतस्थे कृतनिश्चयः ।
ततो गत्वा महारण्यमतप्यत महत्तपः ॥ २१
ततः संतापयामास विबुधांस्तपसान्वितः ।
मतङ्गः सुसुखं प्रेप्सुः स्थानं सुचरितादपि ॥ २२
तं तथा तपसा युक्तमुवाच हरिवाहनः ।
मतङ्ग तप्यसे किं त्वं भोगानुत्सृज्य मानुषान् ॥ २३
वरं ददानि ते हन्त वृणीष्व त्वं यदिच्छसि ।
यच्चाप्यवाप्यमन्यत्ते सर्वं प्रब्रूहि माचिरम् ॥ २४

मतङ्ग उवाच ।

ब्राह्मण्यं कामयानोऽहमिदमारब्धवांस्तपः ।
गच्छेयं तदवाप्येह वर एष वृतो मया ॥ २५
एतच्छ्रुत्वा तु वचनं तमुवाच पुरंदरः ।
ब्राह्मण्यं प्रार्थयानस्त्वमप्राप्यमकृतात्मभिः ॥ २६
श्रेष्ठं यत्सर्वभूतेषु तपो यन्नातिवर्तते ।
तदग्र्यं प्रार्थयानस्त्वमचिराद्विनशिष्यसि ॥ २७
देवतासुरमर्त्येषु यत्पवित्रं परं स्मृतम् ।
चण्डालयोनौ जातेन न तत्प्राप्यं कथंचन ॥ २८

इति श्रीमहाभारते अनुशासनपर्वणि
अष्टाविंशोऽध्यायः ॥ २८ ॥

२९

भीष्म उवाच ।

एवमुक्तो मतङ्गस्तु संशितात्मा यतव्रतः ।
अतिष्ठदेकपादेन वर्षाणां शतमच्युत ॥ १
तमुवाच ततः शक्रः पुनरेव महायशाः ।
मतङ्ग परमं स्थानं प्रार्थयन्नतिदुर्लभम् ॥ २
मा कृथाः साहसं पुत्र नैष धर्मपथस्तव ।
अप्राप्यं प्रार्थयानो हि नचिराद्विनशिष्यसि ॥ ३
मतङ्ग परमं स्थानं वार्यमाणो मया सकृत् ।
चिकीर्षस्येव तपसा सर्वथा न भविष्यसि ॥ ४
तिर्यग्योनिगतः सर्वो मानुष्यं यदि गच्छति ।
स जायते पुल्कसो वा चण्डालो वा कदाचन ॥ ५
पुंश्चलः पापयोनिर्वा यः कश्चिदिह लक्ष्यते ।
स तस्यामेव सुचिरं मतङ्ग परिवर्तते ॥ ६
ततो दशगुणे काले लभते शूद्रतामपि ।
शूद्रयोनावपि ततो बहुशः परिवर्तते ॥ ७
ततस्त्रिंशद्गुणे काले लभते वैश्यतामपि ।
वैश्यतायां चिरं कालं तत्रैव परिवर्तते ॥ ८
ततः षष्टिगुणे काले राजन्यो नाम जायते ।
राजन्यत्वे चिरं कालं तत्रैव परिवर्तते ॥ ९
ततः षष्टिगुणे काले लभते ब्रह्मबन्धुताम् ।
ब्रह्मबन्धुश्चिरं कालं तत्रैव परिवर्तते ॥ १०
ततस्तु द्विशते काले लभते काण्डपृष्ठताम् ।
काण्डपृष्ठश्चिरं कालं तत्रैव परिवर्तते ॥ ११
ततस्तु त्रिशते काले लभते द्विजतामपि ।
तां च प्राप्य चिरं कालं तत्रैव परिवर्तते ॥ १२
ततश्चतुःशते काले श्रोत्रियो नाम जायते ।

श्रोत्रियत्वे चिरं कालं तत्रैव परिवर्तते ॥ १३
तत्रैव क्रोधहर्षौ च कामद्वेषौ च पुत्रक ।
अतिमानातिवादौ तमाविशन्ति द्विजाधमम् ॥ १४
तांश्चेज्जयति शत्रून्स तदा प्राप्नोति सद्गतिम् ।
अथ ते वै जयन्त्येनं तालाग्रादिव पात्यते ॥ १५
मतङ्ग संप्रधार्यैतद्यदहं त्वामचूचुदम् ।
वृणीष्व काममन्यं त्वं ब्राह्मण्यं हि सुदुर्लभम् ॥ १६

इति श्रीमहाभारते अनुशासनपर्वणि
एकोनत्रिंशोऽध्यायः ॥ २९ ॥

३०

भीष्म उवाच ।

एवमुक्तो मतङ्गस्तु भृशं शोकपरायणः ।
अतिष्ठत गयां गत्वा सोऽङ्गुष्ठेन शतं समाः ॥ १
सुदुष्करं वहन्योगं कृशो धमनिसंततः ।
त्वगस्थिभूतो धर्मात्मा स पपातेति नः श्रुतम् ॥ २
तं पतन्तमभिद्रुत्य परिजग्राह वासवः ।
वराणामीश्वरो दाता सर्वभूतहिते रतः ॥ ३

शक्र उवाच ।

मतङ्ग ब्राह्मणत्वं ते संवृतं परिपन्थिभिः ।
पूजयन्सुखमाप्नोति दुःखमाप्नोत्यपूजयन् ॥ ४
ब्राह्मणे सर्वभूतानां योगक्षेमः समाहितः ।
ब्राह्मणेभ्योऽनुतृप्यन्ति पितरो देवतास्तथा ॥ ५
ब्राह्मणः सर्वभूतानां मतङ्ग पर उच्यते ।
ब्राह्मणः कुरुते तद्धि यथा यद्यच्च वाञ्छति ॥ ६
बह्वीस्तु संसरन्योनीर्जायमानः पुनः पुनः ।
पर्याये तात कस्मिंश्चिद्ब्राह्मण्यमिह विन्दति ॥ ७

मतङ्ग उवाच ।

किं मां तुदसि दुःखार्तं मृतं मारयसे च माम् ।
तं तु शोचामि यो लब्ध्वा ब्राह्मण्यं न बुभूषते ॥ ८
ब्राह्मण्यं यदि दुष्प्रापं त्रिभिर्वर्णैः शतक्रतो ।
सुदुर्लभं तदावाप्य नानुतिष्ठन्ति मानवाः ॥ ९
यः पापेभ्यः पापतमस्तेषामधम एव सः ।
ब्राह्मण्यं योऽवजानीते धनं लब्ध्वेव दुर्लभम् ॥ १०
दुष्प्रापं खलु विप्रत्वं प्राप्तं दुरनुपालनम् ।
दुरवापमवाप्यैतन्नानुतिष्ठन्ति मानवाः ॥ ११
एकारामो ह्यहं शक्र निर्द्वंद्वो निष्परिग्रहः ।
अहिंसादमदानस्थः कथं नार्हामि विप्रताम् ॥ १२
यथाकामविहारी स्यां कामरूपी विहंगमः ।
ब्रह्मक्षत्राविरोधेन पूजां च प्राप्नुयामहम् ।
यथा ममाक्षया कीर्तिर्भवेच्चापि पुरंदर ॥ १३

इन्द्र उवाच ।

छन्दोदेव इति ख्यातः स्त्रीणां पूज्यो भविष्यसि ॥ १४

भीष्म उवाच ।

एवं तस्मै वरं दत्त्वा वासवोऽन्तरधीयत ।
प्राणांस्त्यक्त्वा मतङ्गोऽपि प्राप तत्स्थानमुत्तमम् ॥ १५
एवमेतत्परं स्थानं ब्राह्मण्यं नाम भारत ।
तच्च दुष्प्रापमिह वै महेन्द्रवचनं यथा ॥ १६

इति श्रीमहाभारते अनुशासनपर्वणि
त्रिंशोऽध्यायः ॥ ३० ॥

३१

युधिष्ठिर उवाच ।

श्रुतं मे महदाख्यानमेतत्कुरुकुलोद्वह ।
सुदुष्प्रापं ब्रवीषि त्वं ब्राह्मण्यं वदतां वर ॥ १
विश्वामित्रेण च पुरा ब्राह्मण्यं प्राप्तमित्युत ।
श्रूयते वदसे तच्च दुष्प्रापमिति सत्तम ॥ २
वीतहव्यश्च राजर्षिः श्रुतो मे विप्रतां गतः ।
तदेव तावद्गाङ्गेय श्रोतुमिच्छाम्यहं विभो ॥ ३
स केन कर्मणा प्राप्तो ब्राह्मण्यं राजसत्तम ।

वरेण तपसा वापि तन्मे व्याख्यातुमर्हसि ॥ ४

भीष्म उवाच ।

शृणु राजन्यथा राजा वीतहव्यो महायशाः ।
क्षत्रियः सन्पुनः प्राप्तो ब्राह्मण्यं लोकसत्कृतम् ॥ ५
मनोर्महात्मनस्तात प्रजाधर्मेण शासतः ।
बभूव पुत्रो धर्मात्मा शर्यातिरिति विश्रुतः ॥ ६
तस्यान्ववाये द्वौ राजन्राजानौ संबभूवतुः ।
हेहयस्तालजङ्घश्च वत्सेषु जयतां वर ॥ ७
हेहयस्य तु पुत्राणां दशसु स्त्रीषु भारत ।
शतं बभूव प्रख्यातं शूराणामनिवर्तिनाम् ॥ ८
तुल्यरूपप्रभावाणां विदुषां युद्धशालिनाम् ।
धनुर्वेदे च वेदे च सर्वत्रैव कृतश्रमाः ॥ ९
काशिष्वपि नृपो राजन्दिवोदासपितामहः ।
हर्यश्व इति विख्यातो बभूव जयतां वरः ॥ १०
स वीतहव्यदायादैरागत्य पुरुषर्षभ ।
गङ्गायमुनयोर्मध्ये संग्रामे विनिपातितः ॥ ११
तं तु हत्वा नरवरं हेहयास्ते महारथाः ।
प्रतिजग्मुः पुरीं रम्यां वत्सानामकुतोभयाः ॥ १२
हर्यश्वस्य तु दायादः काशिराजोऽभ्यषिच्यत ।
सुदेवो देवसंकाशः साक्षाद्धर्म इवापरः ॥ १३
स पालयन्नेव महीं धर्मात्मा काशिनन्दनः ।
तैर्वीतहव्यैरागत्य युधि सर्वैर्विनिर्जितः ॥ १४
तमप्याजौ विनिर्जित्य प्रतिजग्मुर्यथागतम् ।
सौदेविस्त्वथ काशीशो दिवोदासोऽभ्यषिच्यत ॥ १५
दिवोदासस्तु विज्ञाय वीर्यं तेषां महात्मनाम् ।
वाराणसीं महातेजा निर्ममे शक्रशासनात् ॥ १६
विप्रक्षत्रियसंबाधां वैश्यशूद्रसमाकुलाम् ।
नैकद्रव्योच्चयवतीं समृद्धविपणापणाम् ॥ १७
गङ्गायां उत्तरे कूले वप्रान्ते राजसत्तम ।
गोमत्या दक्षिणे चैव शक्रस्येवामरावतीम् ॥ १८
तत्र तं राजशार्दूलं निवसन्तं महीपतिम् ।
आगत्य हेहया भूयः पर्यधावन्त भारत ॥ १९
स निष्पत्य ददौ युद्धं तेभ्यो राजा महाबलः ।
देवासुरसमं घोरं दिवोदासो महाद्युतिः ॥ २०
स तु युद्धे महाराज दिनानां दशतीर्दश ।
हतवाहनभूयिष्ठस्ततो दैन्यमुपागमत् ॥ २१
हतयोधस्ततो राजन्क्षीणकोशश्च भूमिपः ।
दिवोदासः पुरीं हित्वा पलायनपरोऽभवत् ॥ २२
स त्वाश्रममुपागम्य भरद्वाजस्य धीमतः ।
जगाम शरणं राजा कृताञ्जलिररिंदम ॥ २३

राजोवाच ।

भगवन्वैतहव्यैर्मे युद्धे वंशः प्रणाशितः ।
अहमेकः परिद्यूनो भवन्तं शरणं गतः ॥ २४
शिष्यस्नेहेन भगवन्स मां रक्षितुमर्हसि ।
निःशेषो हि कृतो वंशो मम तैः पापकर्मभिः ॥२५
तमुवाच महाभागो भरद्वाजः प्रतापवान् ।
न भेतव्यं न भेतव्यं सौदेव व्येतु ते भयम् ॥२६
अहमिष्टिं करोम्यद्य पुत्रार्थं ते विशां पते ।
वैतहव्यसहस्राणि यथा त्वं प्रसहिष्यसि ॥ २७
ततः इष्टिं चकारर्षिस्तस्य वै पुत्रकामिकीम् ।
अथास्य तनयो जज्ञे प्रतर्दन इति श्रुतः ॥ २८
स जातमात्रो ववृधे समाः सद्यस्त्रयोदश ।
वेदं चाधिजगे कृत्स्नं धनुर्वेदं च भारत ॥ २९
योगेन च समाविष्टो भरद्वाजेन धीमता ।
तेजो लौक्यं स संगृह्य तस्मिन्देशे समाविशत् ॥
ततः स कवची धन्वी बाणी दीप्त इवानलः ।
प्रययौ स धनुर्धन्वन्विवर्षुरिव तोयदः ॥ ३१
तं दृष्ट्वा परमं हर्षं सुदेवतनयो ययौ ।
मेने च मनसा दग्धान्वैतहव्यान्स पार्थिवः ॥ ३२
ततस्तं यौवराज्येन स्थापयित्वा प्रतर्दनम् ।

कृतकृत्यं तदात्मानं स राजा अभ्यनन्दत ॥ ३३
ततस्तु वैतहव्यानां वधाय स महीपतिः ।
पुत्रं प्रस्थापयामास प्रतर्दनमरिंदमम् ॥ ३४
सरथः स तु संतीर्य गङ्गामाशु पराक्रमी ।
प्रययौ वीतहव्यानां पुरीं परपुरंजयः ॥ ३५
वैतहव्यास्तु संश्रुत्य रथघोषं समुद्धतम् ।
निर्ययुर्नगराकारैः रथैः पररथारुजैः ॥ ३६
निष्क्रम्य ते नरव्याघ्रा दंशिताश्चित्रयोधिनः ।
प्रतर्दनं समाजघ्नुः शरवर्षैरुदायुधाः ॥ ३७
अस्त्रैश्च विविधाकारै रथौघैश्च युधिष्ठिर ।
अभ्यवर्षन्त राजानं हिमवन्तमिवाम्बुदाः ॥ ३८
अस्त्रैरस्त्राणि संवार्य तेषां राजा प्रतर्दनः ।
जघान तान्महातेजा वज्रानलसमैः शरैः ॥ ३९
कृत्तोत्तमाङ्गास्ते राजन्भल्लैः शतसहस्रशः ।
अपतन्रुधिरार्द्राङ्गा निकृत्ता इव किंशुकाः ॥ ४०
हतेषु तेषु सर्वेषु वीतहव्यः सुतेष्वथ ।
प्राद्रवन्नगरं हित्वा भृगोराश्रममप्युत ॥ ४१
ययौ भृगुं च शरणं वीतहव्यो नराधिपः ।
अभयं च ददौ तस्मै राज्ञे राजन्भृगुस्तथा ।
ततो ददावासनं च तस्मै शिष्यो भृगोस्तदा ॥ ४२
अथानुपदमेवाशु तत्रागच्छत्प्रतर्दनः ।
स प्राप्य चाश्रमपदं दिवोदासात्मजोऽब्रवीत् ॥ ४३
भो भो केऽत्राश्रमे सन्ति भृगोः शिष्या महात्मनः ।
द्रष्टुमिच्छे मुनिमहं तस्याचक्षत मामिति ॥ ४४
स तं विदित्वा तु भृगुर्निश्चक्रामाश्रमात्तदा ।
पूजयामास च ततो विधिना परमेण ह ॥ ४५
उवाच चैनं राजेन्द्र किं कार्यमिति पार्थिवम् ।
स चोवाच नृपस्तस्मै यदागमनकारणम् ॥ ४६
अयं ब्रह्मन्नितो राजा वीतहव्यो विसर्ज्यताम् ।
अस्य पुत्रैर्हि मे ब्रह्मन्कृत्स्नो वंशः प्रणाशितः ।
उत्सादितश्च विषयः काशीनां रत्नसंचयः ॥ ४७
एतस्य वीर्यदृप्तस्य हतं पुत्रशतं मया ।
अस्येदानीं वधाद्ब्रह्मन्भविष्याम्यनृणः पितुः ॥ ४८
तमुवाच कृपाविष्टो भृगुर्धर्मभृतां वरः ।
नेहास्ति क्षत्रियः कश्चित्सर्वे हीमे द्विजातयः ॥४९
एवं तु वचनं श्रुत्वा भृगोस्तथ्यं प्रतर्दनः ।
पादावुपस्पृश्य शनैः प्रहसन्वाक्यमब्रवीत् ॥ ५०
एवमप्यस्मि भगवन्कृतकृत्यो न संशयः ।
यदेष राजा वीर्येण स्वजातिं त्याजितो मया ॥५१
अनुजानीहि मां ब्रह्मन्ध्यायस्व च शिवेन माम् ।
त्याजितो हि मया जातिमेष राजा भृगूद्वह ॥ ५२
ततस्तेनाभ्यनुज्ञातो ययौ राजा प्रतर्दनः ।
यथागतं महाराज मुक्त्वा विषमिवोरगः ॥ ५३
भृगोर्वचनमात्रेण स च ब्रह्मर्षितां गतः ।
वीतहव्यो महाराज ब्रह्मवादित्वमेव च ॥ ५४
तस्य गृत्समदः पुत्रो रूपेणेन्द्र इवापरः ।
शक्रस्त्वमिति यो दैत्यैर्निगृहीतः किलाभवत् ॥ ५५
ऋग्वेदे वर्तते चाग्र्या श्रुतिरत्र विशां पते ।
यत्र गृत्समदो ब्रह्मन्ब्राह्मणैः स महीयते ॥ ५६
स ब्रह्मचारी विप्रर्षिः श्रीमान्गृत्समदोऽभवत् ।
पुत्रो गृत्समदस्यापि सुचेता अभवद्द्विजः ॥ ५७
वर्चाः सुतेजसः पुत्रो विहव्यस्तस्य चात्मजः ।
विहव्यस्य तु पुत्रस्तु वितत्यस्तस्य चात्मजः ॥ ५८
वितत्यस्य सुतः सत्यः सन्तः सत्यस्य चात्मजः ।
श्रवास्तस्य सुतश्चर्षिः श्रवसश्चाभवत्तमः ॥ ५९
तमसश्च प्रकाशोऽभूत्तनयो द्विजसत्तमः ।
प्रकाशस्य च वागिन्द्रो बभूव जयतां वरः ॥ ६०
तस्यात्मजश्च प्रमतिर्वेदवेदाङ्गपारगः ।
घृताच्यां तस्य पुत्रस्तु रुरुर्नामोदपद्यत ॥ ६१
प्रमद्वरायां तु रुरोः पुत्रः समुदपद्यत ।

शुनको नाम विप्रर्षिर्यस्य पुत्रोऽथ शौनकः ॥ ६२
एवं विप्रत्वमगमद्वीतहव्यो नराधिपः ।
भृगोः प्रसादाद्राजेन्द्र क्षत्रियः क्षत्रियर्षभ ॥ ६३
तथैव कथितो वंशो मया गार्त्समदस्तव ।
विस्तरेण महाराज किमन्यदनुपृच्छसि ॥ ६४

इति श्रीमहाभारते अनुशासनपर्वणि
एकत्रिंशत्तमोऽध्यायः ॥ ३१ ॥

३२

युधिष्ठिर उवाच ।

के पूज्याः के नमस्कार्या मानवैर्भरतर्षभ ।
विस्तरेण तदाचक्ष्व न हि तृप्यामि कथ्यताम् ॥१

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
नारदस्य च संवादं वासुदेवस्य चोभयोः ॥ २
नारदं प्राञ्जलिं दृष्ट्वा पूजयानं द्विजर्षभान् ।
केशवः परिपप्रच्छ भगवन्कान्नमस्यसि ॥ ३
बहुमानः परः केषु भवतो यान्नमस्यसि ।
शक्यं चेच्छ्रोतुमिच्छामि ब्रूह्येतद्धर्मवित्तम ॥ ४

नारद उवाच ।

शृणु गोविन्द यानेतान्पूजयाम्यरिमर्दन ।
त्वत्तोऽन्यः कः पुमाँल्लोके श्रोतुमेतदिहार्हति ॥ ५
वरुणं वायुमादित्यं पर्जन्यं जातवेदसम् ।
स्थाणुं स्कन्दं तथा लक्ष्मीं विष्णुं ब्रह्माणमेव च ॥६
वाचस्पतिं चन्द्रमसमपः पृथ्वीं सरस्वतीम् ।
सततं ये नमस्यन्ति तान्नमस्याम्यहं विभो ॥ ७
तपोधनान्वेदविदो नित्यं वेदपरायणान् ।
महार्हान्वृष्णिशार्दूल सदा संपूजयाम्यहम् ॥ ८
अभुक्त्वा देवकार्याणि कुर्वते येऽविकत्थनाः ।
संतुष्टाश्च क्षमायुक्तास्तान्नमस्याम्यहं विभो ॥ ९
सम्यग्ददति ये चेष्टान्क्षान्ता दान्ता जितेन्द्रियाः ।
सस्यं धनं क्षितिं गाश्च तान्नमस्यामि यादव ॥ १०
ये ते तपसि वर्तन्ते वने मूलफलाशनाः ।
असंचयाः क्रियावन्तस्तान्नमस्यामि यादव ॥ ११
ये भृत्यभरणे सक्ताः सततं चातिथिप्रियाः ।
भुञ्जन्ते देवशेषाणि तान्नमस्यामि यादव ॥ १२
ये वेदं प्राप्य दुर्धर्षा वाग्मिनो ब्रह्मवादिनः ।
याजनाध्यापने युक्ता नित्यं तान्पूजयाम्यहम् ॥१३
प्रसन्नहृदयाश्चैव सर्वसत्त्वेषु नित्यशः ।
आ पृष्ठतापात्स्वाध्याये युक्तास्तान्पूजयाम्यहम् ॥१४
गुरुप्रसादे स्वाध्याये यतन्ते ये स्थिरव्रताः ।
शुश्रूषवोऽनसूयन्तस्तान्नमस्यामि यादव ॥ १५
सुव्रता मुनयो ये च ब्रह्मण्याः सत्यसंगराः ।
वोढारो हव्यकव्यानां तान्नमस्यामि यादव ॥ १६
भैक्ष्यचर्यासु निरताः कृशा गुरुकुलाश्रयाः ।
निःसुखा निर्धना ये च तान्नमस्यामि यादव ॥१७
निर्ममा निष्प्रतिद्वंद्वा निर्ह्रीका निष्प्रयोजनाः ।
अहिंसानिरता ये च ये च सत्यव्रता नराः ।
दान्ताः शमपराश्चैव तान्नमस्यामि केशव ॥ १८
देवतातिथिपूजायां प्रसक्ता गृहमेधिनः ।
कपोतवृत्तयो नित्यं तान्नमस्यामि यादव ॥ १९
येषां त्रिवर्गः कृत्येषु वर्तते नोपहीयते ।
शिष्टाचारप्रवृत्ताश्च तान्नमस्याम्यहं सदा ॥ २०
ब्राह्मणास्त्रिषु लोकेषु ये त्रिवर्गमनुष्ठिताः ।
अलोलुपाः पुण्यशीलास्तान्नमस्यामि केशव ॥ २१
अब्भक्षा वायुभक्षाश्च सुधाभक्षाश्च ये सदा ।
व्रतैश्च विविधैर्युक्तास्तान्नमस्यामि माधव ॥ २२
अयोनीनग्नियोनींश्च ब्रह्मयोनींस्तथैव च ।
सर्वभूतात्मयोनींश्च तान्नमस्याम्यहं द्विजान् ॥ २३
नित्यमेतान्नमस्यामि कृष्ण लोककरानृषीन् ।

लोकज्येष्ठाञ्ज्ञाननिष्ठांस्तमोघ्नाँल्लोकभास्करान् ॥२४
तस्मात्त्वमपि वार्ष्णेय द्विजान्पूजय नित्यदा ।
पूजिताः पूजनार्हा हि सुखं दास्यन्ति तेऽनघ ॥२५
अस्मिँल्लोके सदा ह्येते परत्र च सुखप्रदाः ।
त एते मान्यमाना वै प्रदास्यन्ति सुखं तव ॥ २६
ये सर्वातिथयो नित्यं गोषु च ब्राह्मणेषु च ।
नित्यं सत्ये च निरता दुर्गाण्यतितरन्ति ते ॥ २७
नित्यं शमपरा ये च तथा ये चानसूयकाः ।
नित्यं स्वाध्यायिनो ये च दुर्गाण्यतितरन्ति ते॥२८
सर्वान्देवान्नमस्यन्ति ये चैकं देवमाश्रिताः ।
श्रद्दधानाश्च दान्ताश्च दुर्गाण्यतितरन्ति ते ॥ २९
तथैव विप्रप्रवरान्नमस्कृत्य यतव्रतान् ।
भवन्ति ये दानरता दुर्गाण्यतितरन्ति ते ॥ ३०
अग्नीनाधाय विधिवत्प्रयता धारयन्ति ये ।
प्राप्ताः सोमाहुतिं चैव दुर्गाण्यतितरन्ति ते ॥ ३१
मातापित्रोर्गुरुषु च सम्यग्वर्तन्ति ये सदा ।
यथा त्वं वृष्णिशार्दूलेत्युक्त्वैवं विरराम सः ॥ ३२
तस्मात्त्वमपि कौन्तेय पितृदेवद्विजातिथीन् ।
सम्यक्पूजय येन त्वं गतिमिष्टामवाप्स्यसि ॥ ३३

इति श्रीमहाभारते अनुशासनपर्वणि
द्वात्रिंशत्तमोऽध्यायः ॥ ३२ ॥

३३

युधिष्ठिर उवाच ।

किं राज्ञः सर्वकृत्यानां गरीयः स्यात्पितामह ।
किं कुर्वन्कर्म नृपतिरुभौ लोकौ समश्नुते ॥ १

भीष्म उवाच ।

एतद्राज्ञः कृत्यतममभिषिक्तस्य भारत ।
ब्राह्मणानामनुष्ठानमत्यन्तं सुखमिच्छता ।
श्रोत्रियान्ब्राह्मणान्वृद्धान्नित्यमेवाभिपूजयेत् ॥ २
पौरजानपदांश्चापि ब्राह्मणांश्च बहुश्रुतान् ।
सान्त्वेन भोगदानेन नमस्कारैस्तथार्चयेत् ॥ ३
एतत्कृत्यतमं राज्ञो नित्यमेवेति लक्षयेत् ।
यथात्मानं यथा पुत्रांस्तथैतान्परिपालयेत् ॥ ४
ये चाप्येषां पूज्यतमास्तान्दृढं प्रतिपूजयेत् ।
तेषु शान्तेषु तद्राष्ट्रं सर्वमेव विराजते ॥ ५
ते पूज्यास्ते नमस्कार्यास्ते रक्ष्याः पितरो यथा ।
तेष्वेव यात्रा लोकस्य भूतानामिव वासवे ॥ ६
अभिचारैरुपायैश्च दहेयुरपि तेजसा ।
निःशेषं कुपिताः कुर्युरुग्राः सत्यपराक्रमाः ॥ ७
नान्तमेषां प्रपश्यामि न दिशश्चाप्यपावृताः ।
कुपिताः समुदीक्षन्ते दावेष्वग्निशिखा इव ॥ ८
विद्यन्तेषां साहसिका गुणास्तेषामतीव हि ।
कूपा इव तृणच्छन्ना विशुद्धा द्यौरिवापरे ॥ ९
प्रसह्यकारिणः केचित्कार्पाससमृदवोऽपरे ।
सन्ति चैषामतिशठास्तथान्येऽतितपस्विनः ॥ १०
कृषिगोरक्ष्यमप्यन्ये भैक्षमन्येऽप्यनुष्ठिताः ।
चोराश्चान्येऽनृताश्चान्ये तथान्ये नटनर्तकाः ॥ ११
सर्वकर्मसु दृश्यन्ते प्रशान्तेष्वितरेषु च ।
विविधाचारयुक्ताश्च ब्राह्मणा भरतर्षभ ॥ १२
नानाकर्मसु युक्तानां बहुकर्मोपजीविनाम् ।
धर्मज्ञानां सतां तेषां नित्यमेवानुकीर्तयेत् ॥ १३
पितॄणां देवतानां च मनुष्योरगरक्षसाम् ।
पुरोहिता महाभागा ब्राह्मणा वै नराधिप ॥ १४
नैते देवैर्न पितृभिर्न गन्धर्वैर्न राक्षसैः ।
नासुरैर्न पिशाचैश्च शक्या जेतुं द्विजातयः ॥ १५
अदैवं दैवतं कुर्युर्दैवतं चाप्यदैवतम् ।
यमिच्छेयुः स राजा स्याद्यं द्विष्युः स पराभवेत् ॥
परिवादं च ये कुर्युर्ब्राह्मणानामचेतसः ।
निन्दाप्रशंसाकुशलाः कीर्त्यकीर्तिपरावराः ।

परिक्रुध्यन्ति ते राजन्सततं द्विषतां द्विजाः ॥ १७
ब्राह्मणा ये प्रशंसन्ति पुरुषः स प्रवर्धते ।
ब्राह्मणैर्यः पराक्रुष्टः पराभूयात्क्षणाद्धि सः ॥ १८
शका यवनकाम्बोजास्तास्ताः क्षत्रियजातयः ।
वृषलत्वं परिगता ब्राह्मणानामदर्शनात् ॥ १९
द्रमिळाश्च कलिङ्गाश्च पुलिन्दाश्चाप्युशीनराः ।
कौलाः सर्पा माहिषकास्तास्ताः क्षत्रियजातयः ॥ २०
वृषलत्वं परिगता ब्राह्मणानामदर्शनात् ।
श्रेयान्पराजयस्तेभ्यो न जयो जयतां वर ॥ २१
यस्तु सर्वमिदं हन्याद्ब्राह्मणं च न तत्समम ।
ब्रह्मवध्या महान्दोष इत्याहुः परमर्षयः ॥ २२
परिवादो द्विजातीनां न श्रोतव्यः कथंचन ।
आसीताधोमुखस्तूष्णीं समुत्थाय व्रजेत वा ॥ २३
न स जातो जनिष्यो वा पृथिव्यामिह कश्चन ।
यो ब्राह्मणविरोधेन सुखं जीवितुमुत्सहेत् ॥ २४
दुर्ग्रहो मुष्टिना वायुर्दुःस्पर्शः पाणिना शशी ।
दुर्धरा पृथिवी मूर्ध्ना दुर्जया ब्राह्मणा भुवि ॥ २५

इति श्रीमहाभारते अनुशासनपर्वणि
त्रयस्त्रिंशत्तमोऽध्यायः ॥ ३३ ॥

३४

भीष्म उवाच ।

ब्राह्मणानेव सततं भृशं संप्रतिपूजयेत् ।
एते हि सोमराजान ईश्वराः सुखदुःखयोः ॥ १
एते भोगैरलंकारैरन्यैश्चैव किमिच्छकैः ।
सदा पूज्या नमस्कार्या रक्ष्याश्च पितृवन्नृपैः ।
अतो राष्ट्रस्य शान्तिर्हि भूतानामिव वासवात् ॥ २
जायतां ब्रह्मवर्चस्वी राष्ट्रे वै ब्राह्मणः शुचिः ।
महारथश्च राजन्य एष्टव्यः शत्रुतापनः ॥ ३
ब्राह्मणं जातिसंपन्नं धर्मज्ञं संशितव्रतम् ।
वासयेत गृहे राजन्न तस्मात्परमस्ति वै ॥ ४
ब्राह्मणेभ्यो हविर्दत्तं प्रतिगृह्णन्ति देवताः ।
पितरः सर्वभूतानां नैतेभ्यो विद्यते परम् ॥ ५
आदित्यश्चन्द्रमा वायुर्भूमिरापोऽम्बरं दिशः ।
सर्वे ब्राह्मणमाविश्य सदान्नमुपभुञ्जते ॥ ६
न तस्याश्नन्ति पितरो यस्य विप्रा न भुञ्जते ।
देवाश्चाप्यस्य नाश्नन्ति पापस्य ब्राह्मणद्विषः ॥ ७
ब्राह्मणेषु तु तुष्टेषु प्रीयन्ते पितरः सदा ।
तथैव देवता राजन्नात्र कार्या विचारणा ॥ ८
तथैव तेऽपि प्रीयन्ते येषां भवति तद्धविः ।
न च प्रेत्य विनश्यन्ति गच्छन्ति परमां गतिम् ॥ ९
येन येनैव हविषा ब्राह्मणांस्तर्पयेन्नरः ।
तेन तेनैव प्रीयन्ते पितरो देवतास्तथा ॥ १०
ब्राह्मणादेव तद्भूतं प्रभवन्ति यतः प्रजाः ।
यतश्चायं प्रभवति प्रेत्य यत्र च गच्छति ॥ ११
वेदैष मार्गं स्वर्गस्य तथैव नरकस्य च ।
आगतानागते चोभे ब्राह्मणो द्विपदां वरः ।
ब्राह्मणो भरतश्रेष्ठ स्वधर्मं वेद मेधया ॥ १२
ये चैनमनुवर्तन्ते ते न यान्ति पराभवम् ।
न ते प्रेत्य विनश्यन्ति गच्छन्ति न पराभवम् ॥
ये ब्राह्मणमुखात्प्राप्तं प्रतिगृह्णन्ति वै वचः ।
कृतात्मानो महात्मानस्ते न यान्ति पराभवम् ॥ १४
क्षत्रियाणां प्रतपतां तेजसा च बलेन च ।
ब्राह्मणेष्वेव शाम्यन्ति तेजांसि च बलानि च ॥ १५
भृगवोऽजयंस्तालजङ्घान्नीपानङ्गिरसोऽजयन् ।
भरद्वाजो वैतहव्यानैलांश्च भरतर्षभ ॥ १६
चित्रायुधांश्चाप्यजयन्नेते कृष्णाजिनध्वजाः ।
प्रक्षिप्याथ च कुम्भान्वै पारगामिनमारभेत् ॥ १७
यत्किंचित्कथ्यते लोके श्रूयते पश्यतेऽपि वा ।
सर्वं तद्ब्राह्मणेष्वेव गूढोऽग्निरिव दारुषु ॥ १८
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।

संवादं वासुदेवस्य पृथ्व्याश्च भरतर्षभ ॥ १९

वासुदेव उवाच ।

मातरं सर्वभूतानां पृच्छे त्वा संशयं शुभे ।
केनस्वित्कर्मणा पापं व्यपोहति नरो गृही ॥ २०

पृथिव्युवाच ।

ब्राह्मणानेव सेवेत पवित्रं ह्येतदुत्तमम् ।
ब्राह्मणान्सेवमानस्य रजः सर्वं प्रणश्यति ॥ २१
अतो भूतिरतः कीर्तिरतो बुद्धिः प्रजायते ।
अपरेषां परेषां च परेभ्यश्चैव ये परे ॥ २२
ब्राह्मणा यं प्रशंसन्ति पुरुषः स प्रवर्धते ।
अथ यो ब्राह्मणाक्रुष्टः पराभवति सोऽचिरात् ॥२३
यथा महार्णवे क्षिप्त आमलोष्टो विनश्यति ।
तथा दुश्चरितं कर्म पराभावाय कल्पते ॥ २४
पश्य चन्द्रे कृतं लक्ष्म समुद्रे लवणोदकम् ।
तथा भगसहस्रेण महेन्द्रं परिचिह्नितम् ॥ २५
तेषामेव प्रभावेन सहस्रनयनो ह्यसौ ।
शतक्रतुः समभवत्पश्य माधव यादृशम् ॥ २६
इच्छन्भूतिं च कीर्तिं च लोकांश्च मधुसूदन ।
ब्राह्मणानुमते तिष्ठेत्पुरुषः शुचिरात्मवान् ॥ २७
इत्येतद्वचनं श्रुत्वा मेदिन्या मधुसूदनः ।
साधु साध्वित्यथेत्युक्त्वा मेदिनीं प्रत्यपूजयत् ॥२८
एतां श्रुत्वोपमां पार्थ प्रयतो ब्राह्मणर्षभान् ।
सततं पूजयेथास्त्वं ततः श्रेयोऽभिपत्स्यसे ॥ २९

इति श्रीमहाभारते अनुशासनपर्वणि
चतुस्त्रिंशत्तमोऽध्यायः ॥ ३४ ॥

३५

भीष्म उवाच ।

जन्मनैव महाभागो ब्राह्मणो नाम जायते ।
नमस्यः सर्वभूतानामतिथिः प्रसृताग्रभुक् ॥ १
सर्वान्नः सुहृदस्तात ब्राह्मणाः सुमनोमुखाः ।
गीर्भिर्मङ्गलयुक्ताभिरनुध्यायन्ति पूजिताः ॥ २
सर्वान्नो द्विषतस्तात ब्राह्मणा जातमन्यवः ।
गीर्भिर्दारुणयुक्ताभिरभिहन्युरपूजिताः ॥ ३
अत्र गाथा ब्रह्मगीताः कीर्तयन्ति पुराविदः ।
सृष्ट्वा द्विजातीन्धाता हि यथापूर्वं समादधत् ॥ ४
न वोऽन्यदिह कर्तव्यं किंचिदूर्ध्वं यथाविधि ।
गुप्ता गोपायत ब्रह्म श्रेयो वस्तेन शोभनम् ॥ ५
स्वमेव कुर्वतां कर्म श्रीर्वो ब्राह्मी भविष्यति ।
प्रमाणं सर्वभूतानां प्रग्रहं च गमिष्यथ ॥ ६
न शौद्रं कर्म कर्तव्यं ब्राह्मणेन विपश्चिता ।
शौद्रं हि कुर्वतः कर्म धर्मः समुपरुध्यते ॥ ७
श्रीश्च बुद्धिश्च तेजश्च विभूतिश्च प्रतापिनी ।
स्वाध्यायेनैव माहात्म्यं विमलं प्रतिपत्स्यथ ॥ ८
हुत्वा चाहवनीयस्थं महाभाग्ये प्रतिष्ठिताः ।
अग्रभोज्याः प्रसूतीनां श्रिया ब्राह्म्यानुकल्पिताः ॥
श्रद्धया परया युक्ता ह्यनभिद्रोहलब्धया ।
दमस्वाध्यायनिरताः सर्वान्कामानवाप्स्यथ ॥ १०
यच्चैव मानुषे लोके यच्च देवेषु किंचन ।
सर्वं तत्तपसा साध्यं ज्ञानेन विनयेन च ॥ ११
इत्येता ब्रह्मगीतास्ते समाख्याता मयानघ ।
विप्रानुकम्पार्थमिदं तेन प्रोक्तं हि धीमता ॥ १२
भूयस्तेषां बलं मन्ये यथा राजंस्तपस्विनः ।
दुरासदाश्च चण्डाश्च रभसाः क्षिप्रकारिणः ॥ १३
सन्त्येषां सिंहसत्त्वाश्च व्याघ्रसत्त्वास्तथापरे ।
वराहमृगसत्त्वाश्च गजसत्त्वास्तथापरे ॥ १४
कर्पासमृदवः केचित्तथान्ये मकरस्पृशः ।
विभाष्यघातिनः केचित्तथा चक्षुर्हणोऽपरे ॥ १५
सन्ति चाशीविषनिभाः सन्ति मन्दास्तथापरे ।
विविधानीह वृत्तानि ब्राह्मणानां युधिष्ठिर ॥ १६

मेकला द्रमिडाः काशाः पौण्ड्राः कोल्लगिरास्तथा ।
शौण्डिका दरदा दर्वाश्चौराः शबरबर्बराः ॥ १७
किराता यवनाश्चैव तास्ता क्षत्रियजातयः ।
वृषलत्वमनुप्राप्ता ब्राह्मणानामदर्शनात् ॥ १८
ब्राह्मणानां परिभवादसुराः सलिलेशयाः ।
ब्राह्मणानां प्रसादाच्च देवाः स्वर्गनिवासिनः ॥ १९
अशक्यं स्प्रष्टुमाकाशमचाल्यो हिमवान्गिरिः ।
अवार्या सेतुना गङ्गा दुर्जया ब्राह्मणा भुवि ॥२०
न ब्राह्मणविरोधेन शक्या शास्तुं वसुंधरा ।
ब्राह्मणा हि महात्मानो देवानामपि देवताः ॥ २१
तान्पूजयस्व सततं दानेन परिचर्यया ।
यदीच्छसि महीं भोक्तुमिमां सागरमेखलाम् ॥२२
प्रतिग्रहेण तेजो हि विप्राणां शाम्यतेऽनघ ।
प्रतिग्रहं ये नेच्छेयुस्तेऽपि रक्ष्यास्त्वयानघ ॥ २३

इति श्रीमहाभारते अनुशासनपर्वणि
पञ्चत्रिंशत्तमोऽध्यायः ॥ ३५ ॥

३६

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
शक्रशम्बरसंवादं तन्निबोध युधिष्ठिर ॥ १
शक्रो ह्यज्ञातरूपेण जटी भूत्वा रजोरुणः ।
विरूपं रूपमास्थाय प्रश्नं पप्रच्छ शम्बरम् ॥ २
केन शम्बर वृत्तेन स्वजात्यानधितिष्ठसि ।
श्रेष्ठं त्वां केन मन्यन्ते तन्मे प्रब्रूहि पृच्छतः ॥ ३

शम्बर उवाच ।

नासूयामि सदा विप्रान्ब्रह्माणं च पितामहम् ।
शास्त्राणि वदतो विप्रान्संमन्यामि यथासुखम् ॥ ४
श्रुत्वा च नावजानामि नापराध्यामि कर्हिचित् ।
अभ्यर्च्यानुपृच्छामि पादौ गृह्णामि धीमताम् ॥५
ते विश्रब्धाः प्रभाषन्ते संयच्छन्ति च मां सदा ।
प्रमत्तेष्वप्रमत्तोऽस्मि सदा सुप्तेषु जागृमि ॥ ६
ते मा शास्त्रपथे युक्तं ब्रह्मण्यमनसूयकम् ।
समासिञ्चन्ति शास्तारः क्षौद्रं मध्विव मक्षिकाः ॥
यच्च भाषन्ति ते तुष्टास्तत्तद्गृह्णामि मेधया ।
समाधिमात्मनो नित्यमनुलोममचिन्तयन् ॥ ८
सोऽहं वागग्रसृष्टानां रसानामवलेहकः ।
स्वजात्यानधितिष्ठामि नक्षत्राणीव चन्द्रमाः ॥ ९
एतत्पृथिव्याममृतमेतच्चक्षुरनुत्तमम् ।
यद्ब्राह्मणमुखाच्छास्त्रमिह श्रुत्वा प्रवर्तते ॥ १०
एतत्कारणमाज्ञाय दृष्ट्वा देवासुरं पुरा ।
युद्धं पिता मे हृष्टात्मा विस्मितः प्रत्यपद्यत ॥ ११
दृष्ट्वा च ब्राह्मणानां तु महिमानं महात्मनाम् ।
पर्यपृच्छत्कथमिमे सिद्धा इति निशाकरम् ॥ १२

सोम उवाच ।

ब्राह्मणास्तपसा सर्वे सिध्यन्ते वाग्बलाः सदा ।
भुजवीर्या हि राजानो वागस्त्राश्च द्विजातयः ॥१३
प्रवसन्वाप्यधीयीत बह्वीर्दुर्वसतीर्वसन् ।
निर्मन्युरपि निर्मानो यतिः स्यात्समदर्शनः ॥ १४
अपि चेज्जातिसंपन्नः सर्वान्वेदान्पितुर्गृहे ।
श्लाघमान इवाधीयेद्ग्राम्य इत्येव तं विदुः ॥ १५
भूमिरेतौ निगिरति सर्पो बिलशयानिव ।
राजानं चाप्ययोद्धारं ब्राह्मणं चाप्रवासिनम् ॥ १६
अतिमानः श्रियं हन्ति पुरुषस्याल्पमेधसः ।
गर्भेण दुष्यते कन्या गृहवासेन च द्विजः ॥ १७
इत्येतन्मे पिता श्रुत्वा सोमादद्भुतदर्शनात् ।
ब्राह्मणान्पूजयामास तथैवाहं महाव्रतान् ॥ १८

भीष्म उवाच ।

श्रुत्वैतद्वचनं शक्रो दानवेन्द्रमुखाच्च्युतम् ।

द्विजान्संपूजयामास महेन्द्रत्वमवाप च ॥ १९

इति श्रीमहाभारते अनुशासनपर्वणि
षट्त्रिंशत्तमोऽध्यायः ॥ ३६ ॥

३७

युधिष्ठिर उवाच ।

अपूर्वं वा भवेत्पात्रमथ वापि चिरोषितम् ।
दूरादभ्यागतं वापि किं पात्रं स्यात्पितामह ॥ १

भीष्म उवाच ।

क्रिया भवति केषांचिदुपांशुव्रतमुत्तमम् ।
यो यो याचेत यत्किंचित्सर्वं दद्याम इत्युत ॥ २
अपीडयन्भृत्यवर्गमित्येवमनुशुश्रुम ।
पीडयन्भृत्यवर्गं हि आत्मानमपकर्षति ॥ ३
अपूर्वं वापि यत्पात्रं यच्चापि स्याच्चिरोषितम् ।
दूरादभ्यागतं चापि तत्पात्रं च विदुर्बुधाः ॥ ४

युधिष्ठिर उवाच ।

अपीडया च भृत्यानां धर्मस्याहिंसया तथा ।
पात्रं विद्याम तत्त्वेन यस्मै दत्तं न संतपेत् ॥ ५

भीष्म उवाच ।

ऋत्विक्पुरोहिताचार्याः शिष्याः संबन्धिबान्धवाः ।
सर्वे पूज्याश्च मान्याश्च श्रुतवृत्तोपसंहिताः ॥ ६
अतोऽन्यथा वर्तमानाः सर्वे नार्हन्ति सत्क्रियाम् ।
तस्मान्नित्यं परीक्षेत पुरुषान्प्रणिधाय वै ॥ ७
अक्रोधः सत्यवचनमहिंसा दम आर्जवम् ।
अद्रोहो नातिमानश्च ह्रीस्तितिक्षा तपः शमः ॥ ८
यस्मिन्नेतानि दृश्यन्ते न चाकार्याणि भारत ।
भावतो विनिविष्टानि तत्पात्रं मानमर्हति ॥ ९
तथा चिरोषितं चापि संप्रत्यागतमेव च ।
अपूर्वं चैव पूर्वं च तत्पात्रं मानमर्हति ॥ १०
अप्रामाण्यं च वेदानां शास्त्राणां चातिलङ्घनम् ।
सर्वत्र चानवस्थानमेतन्नाशनमात्मनः ॥ ११
भवेत्पण्डितमानी यो ब्राह्मणो वेदनिन्दकः ।
आन्वीक्षिकीं तर्कविद्यामनुरक्तो निरर्थिकाम् ॥ १२
हेतुवादान्ब्रुवन्सत्सु विजेताहेतुवादिकः ।
आक्रोष्टा चातिवक्ता च ब्राह्मणानां सदैव हि ॥ १३
सर्वाभिशङ्की मूढश्च बालः कटुकवागपि ।
बोद्धव्यस्तादृशस्तात नरश्वानं हि तं विदुः ॥ १४
यथा श्वा भषितुं चैव हन्तुं चैवावसृज्यते ।
एवं संभाषणार्थाय सर्वशास्त्रवधाय च ।
अल्पश्रुताः कुतर्काश्च दृष्टाः स्पृष्टाः कुपण्डिताः ॥
श्रुतिस्मृतीतिहासादिपुराणारण्यवेदिनः ।
अनुरुन्ध्याद्बहुज्ञांश्च सारज्ञांश्चैव पण्डितान् ॥ १६
लोकयात्रा च द्रष्टव्या धर्मश्चात्महितानि च ।
एवं नरो वर्तमानः शाश्वतीरेधते समाः ॥ १७
ऋणमुन्मुच्य देवानामृषीणां च तथैव च ।
पितॄणामथ विप्राणामतिथीनां च पञ्चमम् ॥ १८
पर्यायेण विशुद्धेन सुनिर्णिक्तेन कर्मणा ।
एवं गृहस्थः कर्माणि कुर्वन्धर्मान्न हीयते ॥ १९

इति श्रीमहाभारते अनुशासनपर्वणि
सप्तत्रिंशत्तमोऽध्यायः ॥ ३७ ॥

३८

युधिष्ठिर उवाच ।

स्त्रीणां स्वभावमिच्छामि श्रोतुं भरतसत्तम ।
स्त्रियो हि मूलं दोषाणां लघुचित्ताः पितामह ॥ १

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
नारदस्य च संवादं पुंश्चल्या पञ्चचूडया ॥ २
लोकाननुचरन्धीमान्देवर्षिर्नारदः पुरा ।
ददर्शाप्सरसं ब्राह्मीं पञ्चचूडामनिन्दिताम् ॥ ३
तां दृष्ट्वा चारुसर्वाङ्गीं पप्रच्छाप्सरसं मुनिः ।

संशयो हृदि मे कश्चित्तन्मे ब्रूहि सुमध्यमे ॥ ४
एवमुक्ता तु सा विप्रं प्रत्युवाचाथ नारदम् ।
विषये सति वक्ष्यामि समर्थां मन्यसे च माम् ॥५

नारद उवाच ।

न त्वामविषये भद्रे नियोक्ष्यामि कथंचन ।
स्त्रीणां स्वभावमिच्छामि त्वत्तः श्रोतुं वरानने ॥ ६

भीष्म उवाच

एतच्छ्रुत्वा वचस्तस्य देवर्षेरप्सरोत्तमा ।
प्रत्युवाच न शक्ष्यामि स्त्री सती निन्दितुं स्त्रियः ॥
विदितास्ते स्त्रियो याश्च यादृशाश्च स्वभावतः ।
न मामर्हसि देवर्षे नियोक्तुं प्रश्न ईदृशे ॥ ८
तामुवाच स देवर्षिः सत्यं वद सुमध्यमे ।
मृषावादे भवेद्दोषः सत्ये दोषो न विद्यते ॥ ९
इत्युक्ता सा कृतमतिरभवच्चारुहासिनी ।
स्त्रीदोषाञ्शाश्वतान्सत्यान्भाषितुं संप्रचक्रमे ॥ १०

पञ्चचूडोवाच ।

कुलीना रूपवत्यश्च नाथवत्यश्च योषितः ।
मर्यादासु न तिष्ठन्ति स दोषः स्त्रीषु नारद ॥११
न स्त्रीभ्यः किंचिदन्यद्वै पापीयस्तरमस्ति वै ।
स्त्रियो हि मूलं दोषाणां तथा त्वमपि वेत्थ ह ॥१२
समाज्ञातानृद्धिमतः प्रतिरूपान्वशे स्थितान् ।
पतीनन्तरमासाद्य नालं नार्यः प्रतीक्षितुम् ॥ १३
असद्धर्मस्त्वयं स्त्रीणामस्माकं भवति प्रभो ।
पापीयसो नरान्यद्वै लज्जां त्यक्त्वा भजामहे ॥ १४
स्त्रियं हि यः प्रार्थयते संनिकर्षं च गच्छति ।
ईषच्च कुरुते सेवां तमेवेच्छन्ति योषितः ॥ १५
अनर्थित्वान्मनुष्याणां भयात्परिजनस्य च ।
मर्यादायाममर्यादाः स्त्रियस्तिष्ठन्ति भर्तृषु ॥ १६
नासां कश्चिदगम्योऽस्ति नासां वयसि संस्थितिः ।
विरूपं रूपवन्तं वा पुमानित्येव भुञ्जते ॥ १७
न भयान्नाप्यनुक्रोशान्नार्थहेतोः कथंचन ।
न ज्ञातिकुलसंबन्धात्स्त्रियस्तिष्ठन्ति भर्तृषु ॥ १८
यौवने वर्तमानानां मृष्टाभरणवाससाम् ।
नारीणां स्वैरवृत्तानां स्पृहयन्ति कुलस्त्रियः ॥ १९
याश्च शश्वद्बहुमता रक्ष्यन्ते दयिताः स्त्रियः ।
अपि ताः संप्रसज्जन्ते कुब्जान्धजडवामनैः ॥ २०
पङ्गुष्वपि च देवर्षे ये चान्ये कुत्सिताः नराः ।
स्त्रीणामगम्यो लोकेऽस्मिन्नास्ति कश्चिन्महामुने ॥
यदि पुंसां गतिर्ब्रह्मन् कथंचिन्नोपपद्यते ।
अप्यन्योन्यं प्रवर्तन्ते न हि तिष्ठन्ति भर्तृषु ॥ २२
अलाभात्पुरुषाणां हि भयात्परिजनस्य च ।
वधबन्धभयाच्चापि स्वयं गुप्ता भवन्ति ताः ॥ २३
चलस्वभावा दुःसेव्या दुर्ग्राह्या भावतस्तथा ।
प्राज्ञस्य पुरुषस्येह यथा वाचस्तथा स्त्रियः ॥ २४
नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः ।
नान्तकः सर्वभूतानां न पुंसां वामलोचनाः ॥ २५
इदमन्यच्च देवर्षे रहस्यं सर्वयोषिताम् ।
दृष्ट्वैव पुरुषं हृद्यं योनिः प्रक्लिद्यते स्त्रियः ॥ २६
कामानामपि दातारं कर्तारं मानसान्त्वयोः ।
रक्षितारं न मृष्यन्ति भर्तारं परमं स्त्रियः ॥ २७
न कामभोगान्बहुलान्नालंकारार्थसंचयान् ।
तथैव बहु मन्यन्ते यथा रत्यामनुग्रहम् ॥ २८
अन्तकः शमनो मृत्युः पातालं वडवामुखम् ।
क्षुरधारा विषं सर्पो वह्निरित्येकतः स्त्रियः ॥ २९
यतश्च भूतानि महान्ति पञ्च
यतश्च लोका विहिता विधात्रा ।
यतः पुमांसः प्रमदाश्च निर्मिता-
स्तदैव दोषाः प्रमदासु नारद ॥ ३०

इति श्रीमहाभारते अनुशासनपर्वणि
अष्टत्रिंशत्तमोऽध्यायः ॥ ३८ ॥

३९

युधिष्ठिर उवाच ।

इमे वै मानवा लोके स्त्रीषु सजन्त्यभीक्ष्णशः ।
मोहेन परमाविष्टा दैवादिष्टेन पार्थिव ।
स्त्रियश्च पुरुषेष्वेव प्रत्यक्षं लोकसाक्षिकम् ॥ १
अत्र मे संशयस्तीव्रो हृदि संपरिवर्तते ।
कथमासां नराः सङ्गं कुर्वते कुरुनन्दन ।
स्त्रियो वा तेषु रज्यन्ते विरज्यन्तेऽथ वा पुनः ॥ २
इति ताः पुरुषव्याघ्र कथं शक्याः स्म रक्षितुम् ।
प्रमदाः पुरुषेणेह तन्मे व्याख्यातुमर्हसि ॥ ३
एता हि मयमायाभिर्वञ्चयन्तीह मानवान् ।
न चासां मुच्यते कश्चित्पुरुषो हस्तमागतः ।
गावो नवतृणानीव गृह्णन्त्येव नवान्नवान् ॥ ४
शम्बरस्य च या माया या माया नमुचेरपि ।
बलेः कुम्भीनसेश्चैव सर्वास्ता योषितो विदुः ॥ ५
हसन्तं प्रहसन्त्येता रुदन्तं प्ररुदन्ति च ।
अप्रियं प्रियवाक्यैश्च गृह्णते कालयोगतः ॥ ६
उशना वेद यच्छास्त्रं यच्च वेद बृहस्पतिः ।
स्त्रीबुद्ध्या न विशिष्येते ताः स्म रक्ष्याः कथं नरैः ॥
अनृतं सत्यमित्याहुः सत्यं चापि तथानृतम् ।
इति यास्ताः कथं वीर संरक्ष्याः पुरुषैरिह ॥ ८
स्त्रीणां बुद्ध्युपनिष्कर्षादर्थशास्त्राणि शत्रुहन् ।
बृहस्पतिप्रभृतिभिर्मन्ये सद्भिः कृतानि वै ॥ ९
संपूज्यमानाः पुरुषैर्विकुर्वन्ति मनो नृषु ।
अपास्ताश्च तथा राजन्विकुर्वन्ति मनः स्त्रियः ॥१०
कस्ताः शक्तो रक्षितुं स्यादिति मे संशयो महान् ।
तन्मे ब्रूहि महाबाहो कुरूणां वंशवर्धन ॥ ११
यदि शक्या कुरुश्रेष्ठ रक्षा तासां कथंचन ।
कर्तुं वा कृतपूर्वा वा तन्मे व्याख्यातुमर्हसि ॥ १२

इति श्रीमहाभारते अनुशासनपर्वणि
एकोनत्रिंशत्तमोऽध्यायः ॥ ३९ ॥

४०

भीष्म उवाच ।

एवमेतन्महाबाहो नात्र मिथ्यास्ति किंचन ।
यथा ब्रवीषि कौरव्य नारीं प्रति जनाधिप ॥ १
अत्र ते वर्तयिष्यामि इतिहासं पुरातनम् ।
यथा रक्षा कृता पूर्वं विपुलेन महात्मना ॥ २
प्रमदाश्च यथा सृष्टा ब्रह्मणा भरतर्षभ ।
यदर्थं तच्च ते तात प्रवक्ष्ये वसुधाधिप ॥ ३
न हि स्त्रीभ्यः परं पुत्र पापीयः किंचिदस्ति वै ।
अग्निर्हि प्रमदा दीप्तो मायाश्च मयजा विभो ।
क्षुरधारा विषं सर्पो मृत्युरित्येकतः स्त्रियः ॥ ४
इमाः प्रजा महाबाहो धार्मिका इति नः श्रुतम् ।
स्वयं गच्छन्ति देवत्वं ततो देवानियाद्भयम् ॥ ५
अथाभ्यगच्छन्देवास्ते पितामहमरिंदम ।
निवेद्य मानसं चापि तूष्णीमासन्नवाङ्मुखाः ॥ ६
तेषामन्तर्गतं ज्ञात्वा देवानां स पितामहः ।
मानवानां प्रमोहार्थं कृत्या नार्योऽसृजत्प्रभुः ॥ ७
पूर्वसर्गे तु कौन्तेय साध्व्यो नार्य इहाभवन् ।
असाध्व्यस्तु समुत्पन्ना कृत्या सर्गात्प्रजापतेः ॥ ८
ताभ्यः कामान्यथाकामं प्रादाद्धि स पितामहः ।
ताः कामलुब्धाः प्रमदाः प्रामथ्नन्त नरांस्तदा ॥ ९
क्रोधं कामस्य देवेशः सहायं चासृजत्प्रभुः ।
असज्जन्त प्रजाः सर्वाः कामक्रोधवशं गताः ॥१०
न च स्त्रीणां क्रिया काचिदिति धर्मो व्यवस्थितः ।
निरिन्द्रिया अमन्त्राश्च स्त्रियोऽनृतमिति श्रुतिः ॥११
शय्यासनमलंकारमन्नपानमनार्यताम् ।
दुर्वाग्भावं रतिं चैव ददौ स्त्रीभ्यः प्रजापतिः ॥१२
न तासां रक्षणं कर्तुं शक्यं पुंसा कथंचन ।
अपि विश्वकृता तात कुतस्तु पुरुषैरिह ॥ १३
वाचा वा वधबन्धैर्वा क्लेशैर्वा विविधैस्तथा ।

न शक्या रक्षितुं नार्यस्ता हि नित्यमसंयताः ॥१४
इदं तु पुरुषव्याघ्र पुरस्ताच्छ्रुतवानहम् ।
यथा रक्षा कृता पूर्वं विपुलेन गुरुस्त्रियः ॥ १५
ऋषिरासीन्महाभागो देवशर्मेति विश्रुतः ।
तस्य भार्या रुचिर्नाम रूपेणासदृशी भुवि ॥ १६
तस्या रूपेण संमत्ता देवगन्धर्वदानवाः ।
विशेषतस्तु राजेन्द्र वृत्रहा पाकशासनः ॥ १७
नारीणां चरितज्ञश्च देवशर्मा महामुनिः ।
यथाशक्ति यथोत्साहं भार्यां तामभ्यरक्षत ॥ १८
पुरंदरं च जानीते परस्त्रीकामचारिणम् ।
तस्माद्यत्नेन भार्याया रक्षणं स चकार ह ॥ १९
स कदाचिदृषिस्तात यज्ञं कर्तुमनास्तदा ।
भार्यासंरक्षणं कार्यं कथं स्यादित्यचिन्तयत् ॥ २०
रक्षाविधानं मनसा स विचिन्त्य महातपाः ।
आहूय दयितं शिष्यं विपुलं प्राह भार्गवम् ॥ २१
यज्ञकारो गमिष्यामि रुचिं चेमां सुरेश्वरः ।
पुत्र प्रार्थयते नित्यं तां रक्षस्व यथाबलम् ॥ २२
अप्रमत्तेन ते भाव्यं सदा प्रति पुरंदरम् ।
स हि रूपाणि कुरुते विविधानि भृगूद्वह ॥ २३
इत्युक्तो विपुलस्तेन तपस्वी नियतेन्द्रियः ।
सदैवोग्रतपा राजन्नग्न्यर्कसदृशद्युतिः ॥ २४
धर्मज्ञः सत्यवादी च तथेति प्रत्यभाषत ।
पुनश्चेदं महाराज पप्रच्छ प्रस्थितं गुरुम् ॥ २५
कानि रूपाणि शक्रस्य भवन्त्यागच्छतो मुने ।
वपुस्तेजश्च कीदृग्वै तन्मे व्याख्यातुमर्हसि ॥ २६
ततः स भगवांस्तस्मै विपुलाय महात्मने ।
आचचक्षे यथातत्त्वं मायां शक्रस्य भारत ॥ २७
बहुमायः स विप्रर्षे बलहा पाकशासनः ।
तांस्तान्विकुरुते भावान्बहूनथ मुहुर्मुहुः ॥ २८
किरीटी वज्रभृद्धन्वी मुकुटी बद्धकुण्डलः ।
भवत्यथ मुहूर्तेन चण्डालसमदर्शनः ॥ २९
शिखी जटी चीरवासाः पुनर्भवति पुत्रक ।
बृहच्छरीरश्च पुनः पीवरोऽथ पुनः कृशः ॥ ३०
गौरं श्यामं च कृष्णं च वर्णं विकुरुते पुनः ।
विरूपो रूपवांश्चैव युवा वृद्धस्तथैव च ॥ ३१
प्राज्ञो जडश्च मूकश्च ह्रस्वो दीर्घस्तथैव च ।
ब्राह्मणः क्षत्रियश्चैव वैश्यः शूद्रस्तथैव च ।
प्रतिलोमानुलोमश्च भवत्यथ शतक्रतुः ॥ ३२
शुकवायसरूपी च हंसकोकिलरूपवान् ।
सिंहव्याघ्रगजानां च रूपं धारयते पुनः ॥ ३३
दैवं दैत्यमथो राज्ञां वपुर्धारयतेऽपि च ।
सुकृशो वायुभग्नाङ्गः शकुनिर्विकृतस्तथा ॥ ३४
चतुष्पाद्बहुरूपश्च पुनर्भवति बालिशः ।
मक्षिकामशकादीनां वपुर्धारयतेऽपि च ॥ ३५
न शक्यमस्य ग्रहणं कर्तुं विपुल केनचित् ।
अपि विश्वकृता तात येन सृष्टमिदं जगत् ॥ ३६
पुनरन्तर्हितः शक्रो दृश्यते ज्ञानचक्षुषा ।
वायुभूतश्च स पुनर्देवराजो भवत्युत ॥ ३७
एवं रूपाणि सततं कुरुते पाकशासनः ।
तस्माद्विपुल यत्नेन रक्षेमां तनुमध्यमाम् ॥ ३८
यथा रुचिं नावलिहेद्देवेन्द्रो भृगुसत्तम ।
क्रतावुपहितं न्यस्तं हविः श्वेव दुरात्मवान् ॥ ३९
एवमाख्याय स मुनिर्यज्ञकारोऽगमत्तदा ।
देवशर्मा महाभागस्ततो भरतसत्तम ॥ ४०
विपुलस्तु वचः श्रुत्वा गुरोश्चिन्तापरोऽभवत् ।
रक्षां च परमां चक्रे देवराजान्महाबलात् ॥ ४१
किं नु शक्यं मया कर्तुं गुरुदाराभिरक्षणे ।
मायावी हि सुरेन्द्रोऽसौ दुर्धर्षश्चापि वीर्यवान् ॥
नापिधायाश्रमं शक्यो रक्षितुं पाकशासनः ।
उटजं वा तथा ह्यस्य नानाविधसरूपता ॥ ४३

वायुरूपेण वा शक्रो गुरुपत्नीं प्रधर्षयेत् ।
तस्मादिमां संप्रविश्य रुचिं स्थास्येऽहमद्य वै ॥ ४४
अथ वा पौरुषेणेयमशक्या रक्षितुं मया ।
बहुरूपो हि भगवाञ्छ्रूयते हरिवाहनः ॥ ४५
सोऽहं योगबलादेनां रक्षिष्ये पाकशासनात् ।
गात्राणि गात्रैरस्याहं संप्रवेक्ष्येऽभिरक्षितुम् ॥ ४६
यद्युच्छिष्टामिमां पत्नीं रुचिं पश्येत मे गुरुः ।
शप्स्यत्यसंशयं कोपाद्दिव्यज्ञानो महातपाः ॥ ४७
न चेयं रक्षितुं शक्या यथान्या प्रमदा नृभिः ।
मायावी हि सुरेन्द्रोऽसावहो प्राप्तोऽस्मि संशयम् ॥
अवश्यकरणीयं हि गुरोरिह हि शासनम् ।
यदि त्वेतदहं कुर्यामाश्चर्यं स्यात्कृतं मया ॥ ४९
योगेनानुप्रविश्येह गुरुपत्न्याः कलेवरम् ।
निर्मुक्तस्य रजोरूपान्नापराधो भवेन्मम ॥ ५०
यथा हि शून्यां पथिकः सभामध्यावसेत्पथि ।
तथाद्यावासयिष्यामि गुरुपत्न्याः कलेवरम् ॥ ५१
असक्तः पद्मपत्रस्थो जलबिन्दुर्यथा चलः ।
एवमेव शरीरेऽस्या निवत्स्यामि समाहितः ॥ ५२
इत्येवं धर्ममालोक्य वेदवेदांश्च सर्वशः ।
तपश्च विपुलं दृष्ट्वा गुरोरात्मन एव च ॥ ५३
इति निश्चित्य मनसा रक्षां प्रति स भार्गवः ।
आतिष्ठत्परमं यत्नं यथा तच्छृणु पार्थिव ॥ ५४
गुरुपत्नीमुपासीनो विपुलः स महातपाः ।
उपासीनामनिन्द्याङ्गीं कथाभिः समलोभयत् ॥ ५५
नेत्राभ्यां नेत्रयोरस्या रश्मीन्संयोज्य रश्मिभिः ।
विवेश विपुलः कायमाकाशं पवनो यथा ॥ ५६
लक्षणं लक्षणेनैव वदनं वदनेन च ।
अविचेष्टन्नतिष्ठद्वै छायेवान्तर्गतो मुनिः ॥ ५७
ततो विष्टभ्य विपुलो गुरुपत्न्याः कलेवरम् ।
उवास रक्षणे युक्तो न च सा तमबुध्यत ॥ ५८
यं कालं नागतो राजन्गुरुस्तस्य महात्मनः ।
क्रतुं समाप्य स्वगृहं तं कालं सोऽभ्यरक्षत ॥ ५९

इति श्रीमहाभारते अनुशासनपर्वणि
चत्वारिंशोऽध्यायः ॥ ४० ॥

४१

भीष्म उवाच ।

ततः कदाचिद्देवेन्द्रो दिव्यरूपवपुर्धरः ।
इदमन्तरमित्येवं ततोऽभ्यागादथाश्रमम् ॥ १
रूपमप्रतिमं कृत्वा लोभनीयं जनाधिप ।
दर्शनीयतमो भूत्वा प्रविवेश तमाश्रमम् ॥ २
स ददर्श तमासीनं विपुलस्य कलेवरम् ।
निश्चेष्टं स्तब्धनयनं यथालेख्यगतं तथा ॥ ३
रुचिं च रुचिरापाङ्गीं पीनश्रोणिपयोधराम् ।
पद्मपत्रविशालाक्षीं संपूर्णेन्दुनिभाननाम् ॥ ४
सा तमालोक्य सहसा प्रत्युत्थातुमियेष ह ।
रूपेण विस्मिता कोऽसीत्यथ वक्तुमिहेच्छती ॥ ५
उत्थातुकामापि सती व्यतिष्ठद्विपुलेन सा ।
निगृहीता मनुष्येन्द्र न शशाक विचेष्टितुम् ॥ ६
तामाबभाषे देवेन्द्रः साम्ना परमवल्गुना ।
त्वदर्थमागतं विद्धि देवेन्द्रं मां शुचिस्मिते ॥ ७
क्लिश्यमानमनङ्गेन त्वत्संकल्पोद्भवेन वै ।
तत्पर्याप्नुहि मां सुभ्रु पुरा कालोऽतिवर्तते ॥ ८
तमेवंवादिनं शक्रं शुश्राव विपुलो मुनिः ।
गुरुपत्न्याः शरीरस्थो ददर्श च सुराधिपम् ॥ ९
न शशाक च सा राजन्प्रत्युत्थातुमनिन्दिता ।
वक्तुं च नाशकद्राजन्विष्टब्धा विपुलेन सा ॥ १०
आकारं गुरुपत्न्यास्तु विज्ञाय स भृगूद्वहः ।
निजग्राह महातेजा योगेन बलवत्प्रभो ।
बबन्ध योगबन्धैश्च तस्याः सर्वेन्द्रियाणि सः ॥ ११
तां निर्विकारां दृष्ट्वा तु पुनरेव शचीपतिः ।

उवाच व्रीडितो राजंस्तां योगबलमोहिताम् ॥ १२
एह्येहीति ततः सा तं प्रतिवक्तुमियेष च ।
स तां वाचं गुरोः पत्न्या विपुलः पर्यवर्तयत् ॥१३
भोः किमागमने कृत्यमिति तस्याश्च निःसृता ।
वक्त्राच्छशाङ्कप्रतिमाद्वाणी संस्कारभूषिता ॥ १४
व्रीडिता सा तु तद्वाक्यमुक्त्वा परवशा तदा ।
पुरंदरश्च संत्रस्तो बभूव विमनास्तदा ॥ १५
स तद्वैकृतमालक्ष्य देवराजो विशां पते ।
अवैक्षत सहस्राक्षस्तदा दिव्येन चक्षुषा ॥ १६
ददर्श च मुनिं तस्याः शरीरान्तरगोचरम् ।
प्रतिबिम्बमिवादर्शे गुरुपत्न्याः शरीरगम् ॥ १७
स तं घोरेण तपसा युक्तं दृष्ट्वा पुरंदरः ।
प्रावेपत सुसंत्रस्तः शापभीतस्तदा विभो ॥ १८
विमुच्य गुरुपत्नीं तु विपुलः सुमहातपाः ।
स्वं कलेवरमाविश्य शक्रं भीतमथाब्रवीत् ॥ १९
अजितेन्द्रिय पापात्मन्कामात्मक पुरंदर ।
न चिरं पूजयिष्यन्ति देवास्त्वां मानुषास्तथा ॥२०
किं नु तद्विस्मृतं शक्र न तन्मनसि ते स्थितम् ।
गौतमेनासि यन्मुक्तो भगाङ्कपरिचिह्नितः ॥ २१
जाने त्वां बालिशमतिमकृतात्मानमस्थिरम् ।
मयेयं रक्ष्यते मूढ गच्छ पाप यथागतम् ॥ २२
नाहं त्वामद्य मूढात्मन्दहेयं हि स्वतेजसा ।
कृपायमाणस्तु न ते दग्धुमिच्छामि वासव ॥ २३
स च घोरतपा धीमान्गुरुर्मे पापचेतसम् ।
दृष्ट्वा त्वां निर्दहेदद्य क्रोधदीप्तेन चक्षुषा ॥ २४
नैवं तु शक्र कर्तव्यं पुनर्मान्याश्च ते द्विजाः ।
मा गमः ससुतामात्योऽत्ययं ब्रह्मबलार्दितः ॥ २५
अमरोऽस्मीति यद्बुद्धिमेतामास्थाय वर्तसे ।
मावमंस्था न तपसामसाध्यं नाम किंचन ॥ २६
तच्छ्रुत्वा वचनं शक्रो विपुलस्य महात्मनः ।
अकिंचिदुक्त्वा व्रीडितस्तत्रैवान्तरधीयत ॥ २७
मुहूर्तयाते शक्रे तु देवशर्मा महातपाः ।
कृत्वा यज्ञं यथाकाममाजगाम स्वमाश्रमम् ॥ २८
आगतेऽथ गुरौ राजन्विपुलः प्रियकर्मकृत् ।
रक्षितां गुरवे भार्यां न्यवेदयदनिन्दिताम् ॥ २९
अभिवाद्य च शान्तात्मा स गुरुं गुरुवत्सलः ।
विपुलः पर्युपातिष्ठद्यथापूर्वमशङ्कितः ॥ ३०
विश्रान्ताय ततस्तस्मै सहासीनाय भार्यया ।
निवेदयामास तदा विपुलः शक्रकर्म तत् ॥ ३१
तच्छ्रुत्वा स मुनिस्तुष्टो विपुलस्य प्रतापवान् ।
बभूव शीलवृत्ताभ्यां तपसा नियमेन च ॥ ३२
विपुलस्य गुरौ वृत्तिं भक्तिमात्मनि च प्रभुः ।
धर्मे च स्थिरतां दृष्ट्वा साधु साध्वित्युवाच ह ॥३३
प्रतिनन्द्य च धर्मात्मा शिष्यं धर्मपरायणम् ।
वरेण च्छन्दयामास स तस्माद्गुरुवत्सलः ।
अनुज्ञातश्च गुरुणा चचारानुत्तमं तपः ॥ ३४
तथैव देवशर्मापि सभार्यः स महातपाः ।
निर्भयो बलवृत्रघ्नाच्चचार विजने जने ॥ ३५

इति श्रीमहाभारते अनुशासनपर्वणि
एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

४२

भीष्म उवाच ।

विपुलस्त्वकरोत्तीव्रं तपः कृत्वा गुरोर्वचः ।
तपोयुक्तमथात्मानममन्यत च वीर्यवान् ॥ १
स तेन कर्मणा स्पर्धन्पृथिवीं पृथिवीपते ।
चचार गतभीः प्रीतो लब्धकीर्तिर्वरो नृषु ॥ २
उभौ लोकौ जितौ चापि तथैवामन्यत प्रभुः ।
कर्मणा तेन कौरव्य तपसा विपुलेन च ॥ ३
अथ काले व्यतिक्रान्ते कस्मिंश्चित्कुरुनन्दन ।
रुच्या भगिन्या दानं वै बभूव धनधान्यवत् ॥ ४

एतस्मिन्नेव काले तु दिव्या काचिद्वराङ्गना ।
बिभ्रती परमं रूपं जगामाथ विहायसा ॥ ५
तस्याः शरीरात्पुष्पाणि पतितानि महीतले ।
तस्याश्रमस्याविदूरे दिव्यगन्धानि भारत ॥ ६
तान्यगृह्णात्ततो राजन्रुचिर्नलिनलोचना ।
तदा निमन्त्रकस्तस्या अङ्गेभ्यः क्षिप्रमागमत् ॥ ७
तस्या हि भगिनी तात ज्येष्ठा नाम्ना प्रभावती ।
भार्या चित्ररथस्याथ बभूवाङ्गेश्वरस्य वै ॥ ८
पिनह्य तानि पुष्पाणि केशेषु वरवर्णिनी ।
आमन्त्रिता ततोऽगच्छद्रुचिरङ्गपतेर्गृहान् ॥ ९
पुष्पाणि तानि दृष्ट्वाथ तदाङ्गेन्द्रवराङ्गना ।
भगिनीं चोदयामास पुष्पार्थे चारुलोचना ॥ १०
सा भर्त्रे सर्वमाचष्ट रुचिः सुरुचिरानना ।
भगिन्या भाषितं सर्वमृषिस्तच्चाभ्यनन्दत ॥ ११
ततो विपुलमानाय्य देवशर्मा महातपाः ।
पुष्पार्थे चोदयामास गच्छ गच्छेति भारत ॥ १२
विपुलस्तु गुरोर्वाक्यमविचार्य महातपाः ।
स तथेत्यब्रवीद्राजंस्तं च देशं जगाम ह ॥ १३
यस्मिन्देशे तु तान्यासन्पतितानि नभस्तलात् ।
अम्लानान्यपि तत्रासन्कुसुमान्यपराण्यपि ॥ १४
ततः स तानि जग्राह दिव्यानि रुचिराणि च ।
प्राप्तानि स्वेन तपसा दिव्यगन्धानि भारत ॥ १५
संप्राप्य तानि प्रीतात्मा गुरोर्वचनकारकः ।
ततो जगाम तूर्णं च चम्पां चम्पकमालिनीम् ॥ १६
स वने विजने तात ददर्श मिथुनं नृणाम् ।
चक्रवत्परिवर्तन्तं गृहीत्वा पाणिना करम् ॥ १७
तत्रैकस्तूर्णमगमत्तत्पदे परिवर्तयन् ।
एकस्तु न तथा राजंश्चक्रतुः कलहं ततः ॥ १८
त्वं शीघ्रं गच्छसीत्येकोऽब्रवीन्नेति तथापरः ।
नेति नेति च तौ तात परस्परमथोचतुः ॥ १९

तयोर्विस्पर्धतोरेवं शपथोऽयमभूत्तदा ।
मनसोद्दिश्य विपुलं ततो वाक्यमथोचतुः ॥ २०
आवयोरनृतं प्राह यस्तस्याथ द्विजस्य वै ।
विपुलस्य परे लोके या गतिः सा भवेदिति ॥ २१
एतच्छ्रुत्वा तु विपुलो विषण्णवदनोऽभवत् ।
एवं तीव्रतपाश्चाहं कष्टश्चायं परिग्रहः ॥ २२
मिथुनस्यास्य किं मे स्यात्कृतं पापं यतो गतिः ।
अनिष्टा सर्वभूतानां कीर्तितानेन मेऽद्य वै ॥ २३
एवं संचिन्तयन्नेव विपुलो राजसत्तम ।
अवाङ्मुखो न्यस्तशिरा दध्यौ दुष्कृतमात्मनः ॥ २४
ततः षडन्यान्पुरुषानक्षैः काञ्चनराजतैः ।
अपश्यद्दीव्यमानान्वै लोभहर्षान्वितांस्तथा ॥ २५
कुर्वतः शपथं तं वै यः कृतो मिथुनेन वै ।
विपुलं वै समुद्दिश्य तेऽपि वाक्यमथाब्रुवन् ॥ २६
यो लोभमास्थायास्माकं विषमं कर्तुमुत्सहेत् ।
विपुलस्य परे लोके या गतिस्तामवाप्नुयात् ॥ २७
एतच्छ्रुत्वा तु विपुलो नापश्यद्धर्मसंकरम् ।
जन्मप्रभृति कौरव्य कृतपूर्वमथात्मनः ॥ २८
स प्रदध्यौ तदा राजन्नग्नावग्निरिवाहितः ।
दह्यमानेन मनसा शापं श्रुत्वा तथाविधम् ॥ २९
तस्य चिन्तयतस्तात बह्व्यो दिननिशा ययुः ।
इदमासीन्मनसि च रुच्या रक्षणकारितम् ॥ ३०
लक्षणं लक्षणेनैव वदनं वदनेन च ।
विधाय न मया चोक्तं सत्यमेतद्गुरोस्तदा ॥ ३१
एतदात्मनि कौरव्य दुष्कृतं विपुलस्तदा ।
अमन्यत महाभाग तथा तच्च न संशयः ॥ ३२
स चम्पां नगरीमेत्य पुष्पाणि गुरवे ददौ ।
पूजयामास च गुरुं विधिवत्स गुरुप्रियः ॥ ३३

इति श्रीमहाभारते अनुशासनपर्वणि
द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

४३

भीष्म उवाच ।

तमागतमभिप्रेक्ष्य शिष्यं वाक्यमथाब्रवीत् ।
देवशर्मा महातेजा यत्तच्छृणु नराधिप ॥ १

देवशर्मोवाच ।

किं ते विपुल दृष्टं वै तस्मिन्नद्य महावने ।
ते त्वा जानन्ति निपुण आत्मा च रुचिरेव च ॥२

विपुल उवाच ।

ब्रह्मर्षे मिथुनं किं तत्के च ते पुरुषा विभो ।
ये मां जानन्ति तत्त्वेन तांश्च मे वक्तुमर्हसि ॥ ३

देवशर्मोवाच ।

यद्वै तन्मिथुनं ब्रह्मन्नहोरात्रं हि विद्धि तत् ।
चक्रवत्परिवर्तेत तत्ते जानाति दुष्कृतम् ॥ ४
ये च ते पुरुषा विप्र अक्षैर्दीव्यन्ति हृष्टवत् ।
ऋतूंस्तानभिजानीहि ते ते जानन्ति दुष्कृतम् ॥ ५
न मां कश्चिद्विजानीत इति कृत्वा न विश्वसेत् ।
नरो रहसि पापात्मा पापकं कर्म वै द्विज ॥ ६
कुर्वाणं हि नरं कर्म पापं रहसि सर्वदा ।
पश्यन्ति ऋतवश्चापि तथा दिननिशेऽच्युत ॥ ७
ते त्वां हर्षस्मितं दृष्ट्वा गुरोः कर्मानिवेदकम् ।
स्मारयन्तस्तथा प्राहुस्ते यथा श्रुतवान्भवान् ॥ ८
अहोरात्रं विजानाति ऋतवश्चापि नित्यशः ।
पुरुषे पापकं कर्म शुभं वा शुभकर्मणः ॥ ९
तत्त्वया मम यत्कर्म व्यभिचाराद्भयात्मकम् ।
नाख्यातमिति जानन्तस्ते त्वामाहुस्तथा द्विज ॥१०
ते चैव हि भवेयुस्ते लोकाः पापकृतो यथा ।
कृत्वा नाचक्षतः कर्म मम यच्च त्वया कृतम् ॥११
तथा शक्या च दुर्वृत्ता रक्षितुं प्रमदा द्विज ।
न च त्वं कृतवान्किंचिदागः प्रीतोऽस्मि तेन ते ॥ १२
यदि त्वहं त्वा दुर्वृत्तमद्राक्षं द्विजसत्तम ।
शपेयं त्वामहं क्रोधान्न मेऽत्रास्ति विचारणा ॥१३
सज्जन्ति पुरुषे नार्यः पुंसां सोऽर्थश्च पुष्कलः ।
अन्यथा रक्षतः शापोऽभविष्यत्ते गतिश्च सा ॥१४
रक्षिता सा त्वया पुत्र मम चापि निवेदिता ।
अहं ते प्रीतिमांस्तात स्वस्ति मार्गं गमिष्यसि ॥१५

भीष्म उवाच ।

इत्युक्त्वा विपुलं प्रीतो देवशर्मा महानृषिः ।
मुमोद स्वर्गमास्थाय सहभार्यः सशिष्यकः ॥ १६
इदमाख्यातवांश्चापि ममाख्यानं महामुनिः ।
मार्कण्डेयः पुरा राजन्गङ्गाकूले कथान्तरे ॥ १७
तस्माद्ब्रवीमि पार्थ त्वा स्त्रियः सर्वाः सदैव च ।
उभयं दृश्यते तासु सततं साध्वसाधु च ॥ १८
स्त्रियः साध्व्यो महाभागाः संमता लोकमातरः ।
धारयन्ति महीं राजन्निमां सवनकाननाम् ॥ १९
असाध्व्यश्चापि दुर्वृत्ताः कुलघ्न्यः पापनिश्चयाः ।
विज्ञेया लक्षणैर्दुष्टैः स्वगात्रसहजैर्नृप ॥ २०
एवमेतासु रक्षा वै शक्या कर्तुं महात्मभिः ।
अन्यथा राजशार्दूल न शक्या रक्षितुं स्त्रियः ॥२१
एता हि मनुजव्याघ्र तीक्ष्णातीक्ष्णपराक्रमाः ।
नासामस्ति प्रियो नाम मैथुने संगमे नृभिः ॥२२
एताः कृत्याश्च कार्याश्च कृताश्च भरतर्षभ ।
न चैकस्मिन्रमन्त्येताः पुरुषे पाण्डुनन्दन ॥ २३
नासु स्नेहो नृभिः कार्यस्तथैवेर्ष्या जनेश्वर ।
खेदमास्थाय भुञ्जीत धर्ममास्थाय चैव हि ॥ २४
विहन्येतान्यथा कुर्वन्नरः कौरवनन्दन ।
सर्वथा राजशार्दूल युक्तिः सर्वत्र पूज्यते ॥ २५
तेनैकेन तु रक्षा वै विपुलेन कृता स्त्रियाः ।

नान्यः शक्तो नृलोकेऽस्मिन्रक्षितुं नृप योषितः ॥

इति श्रीमहाभारते अनुशासनपर्वणि
त्रिचत्वारिंशत्तमोऽध्यायः ॥ ४३ ॥

४४

युधिष्ठिर उवाच ।

यन्मूलं सर्वधर्माणां प्रजनस्य गृहस्य च ।
पितृदेवातिथीनां च तन्मे ब्रूहि पितामह ॥ १

भीष्म उवाच ।

अयं हि सर्वधर्माणां धर्मश्चिन्त्यतमो मतः ।
कीदृशाय प्रदेया स्यात्कन्येति वसुधाधिप ॥ २
शीलवृत्ते समाज्ञाय विद्यां योनिं च कर्म च ।
अद्भिरेव प्रदातव्या कन्या गुणवते वरे ।
ब्राह्मणानां सतामेष धर्मो नित्यं युधिष्ठिर ॥ ३
आवाह्यमावहेदेवं यो दद्यादनुकूलतः ।
शिष्टानां क्षत्रियाणां च धर्म एष सनातनः ॥ ४
आत्माभिप्रेतमुत्सृज्य कन्याभिप्रेत एव यः ।
अभिप्रेता च या यस्य तस्मै देया युधिष्ठिर ।
गान्धर्वमिति तं धर्मं प्राहुर्धर्मविदो जनाः ॥ ५
धनेन बहुना क्रीत्वा संप्रलोभ्य च बान्धवान् ।
असुराणां नृपैतं वै धर्ममाहुर्मनीषिणः ॥ ६
हत्वा छित्त्वा च शीर्षाणि रुदतां रुदतीं गृहात् ।
प्रसह्य हरणं तात राक्षसं धर्मलक्षणम् ॥ ७
पञ्चानां तु त्रयो धर्म्या द्वावधर्म्यौ युधिष्ठिर ।
पैशाच आसुरश्चैव न कर्तव्यौ कथंचन ॥ ८
ब्राह्मः क्षात्रोऽथ गान्धर्व एते धर्म्या नरर्षभ ।
पृथग्वा यदि वा मिश्राः कर्तव्या नात्र संशयः ॥९
तिस्रो भार्या ब्राह्मणस्य द्वे भार्ये क्षत्रियस्य तु ।
वैश्यः स्वजातिं विन्देत तास्वपत्यं समं भवेत् ॥१०
ब्राह्मणी तु भवेज्ज्येष्ठा क्षत्रिया क्षत्रियस्य तु ।
रत्यर्थमपि शूद्रा स्यान्नेत्याहुरपरे जनाः ॥ ११
अपत्यजन्म शूद्रायां न प्रशंसन्ति साधवः ।
शूद्रायां जनयन्विप्रः प्रायश्चित्ती विधीयते ॥ १२
त्रिंशद्वर्षो दशवर्षां भार्यां विन्देत नग्निकाम् ।
एकविंशतिवर्षो वा सप्तवर्षामवाप्नुयात् ॥ १३
यस्यास्तु न भवेद्भ्राता पिता वा भरतर्षभ ।
नोपयच्छेत तां जातु पुत्रिकाधर्मिणी हि सा ॥१४
त्रीणि वर्षाण्युदीक्षेत कन्या ऋतुमती सती ।
चतुर्थे त्वथ संप्राप्ते स्वयं भर्तारमर्जयेत ॥ १५
प्रजनो हीयते तस्या रतिश्च भरतर्षभ ।
अतोऽन्यथा वर्तमाना भवेद्वाच्या प्रजापतेः ॥ १६
असपिण्डा च या मातुरसगोत्रा च या पितुः ।
इत्येतामनुगच्छेत तं धर्मं मनुरब्रवीत् ॥ १७

युधिष्ठिर उवाच ।

शुल्कमन्येन दत्तं स्याद्ददानीत्याह चापरः ।
बलादन्यः प्रभाषेत धनमन्यः प्रदर्शयेत् ॥ १८
पाणिग्रहीता त्वन्यः स्यात्कस्य कन्या पितामह ।
तत्त्वं जिज्ञासमानानां चक्षुर्भवतु नो भवान् ॥१९

भीष्म उवाच ।

यत्किंचित्कर्म मानुष्यं संस्थानाय प्रकृष्यते ।
मन्त्रवन्मन्त्रितं तस्य मृषावादस्तु पातकः ॥ २०
भार्यापत्यृत्विगाचार्याः शिष्योपाध्याय एव च ।
मृषोक्ते दण्डमर्हन्ति नेत्याहुरपरे जनाः ॥ २१
न ह्यकामेन संवादं मनुरेवं प्रशंसति ।
अयशस्यमधर्म्यं च यन्मृषा धर्मकोपनम् ॥ २२
नैकान्तदोष एकस्मिंस्तद्दानं नोपलभ्यते ।
धर्मतो यां प्रयच्छन्ति यां च क्रीणन्ति भारत ॥२३
बन्धुभिः समनुज्ञातो मन्त्रहोमौ प्रयोजयेत् ।
तथा सिध्यन्ति ते मन्त्रा नादत्तायाः कथंचन ॥२४
यस्त्वत्र मन्त्रसमयो भार्यापत्योर्मिथः कृतः ।
तमेवाहुर्गरीयांसं यश्चासौ ज्ञातिभिः कृतः ॥ २५

देवदत्तां पतिर्भार्यां वेत्ति धर्मस्य शासनात् ।
सा दैवीं मानुषीं वाचमनृतां पर्युदस्यति ॥ २६

युधिष्ठिर उवाच ।

कन्यायां प्राप्तशुल्कायां ज्यायांश्चेदाव्रजेद्वरः ।
धर्मकामार्थसंपन्नो वाच्यमत्रानृतं न वा ॥ २७
तस्मिन्नुभयतो दोषे कुर्वञ्छ्रेयः समाचरेत् ।
अयं नः सर्वधर्माणां धर्मश्चिन्त्यतमो मतः ॥ २८
तत्त्वं जिज्ञासमानानां चक्षुर्भवतु नो भवान् ।
तदेतत्सर्वमाचक्ष्व न हि तृप्यामि कथ्यताम् ॥ २९

भीष्म उवाच ।

न वै निष्ठाकरं शुल्कं ज्ञात्वासीत्तेन नाहृतम् ।
न हि शुल्कपराः सन्तः कन्यां ददति कर्हिचित् ॥
अन्यैर्गुणैरुपेतं तु शुल्कं याचन्ति बान्धवाः ।
अलंकृत्वा वहस्वेति यो दद्यादनुकूलतः ॥ ३१
तच्च तां च ददात्येव न शुल्कं विक्रयो न सः ।
प्रतिगृह्य भवेद्देयमेष धर्मः सनातनः ॥ ३२
दास्यामि भवते कन्यामिति पूर्वं नभाषितम् ।
ये चैवाहुर्ये च नाहुर्ये चावश्यं वदन्त्युत ॥ ३३
तस्मादा ग्रहणात्पाणेर्याचयन्ति परस्परम् ।
कन्यावरः पुरा दत्तो मरुद्भिरिति न श्रुतम् ॥ ३४
नानिष्टाय प्रदातव्या कन्या इत्यृषिचोदितम् ।
तन्मूलं काममूलस्य प्रजनस्येति मे मतिः ॥ ३५
समीक्ष्य च बहून्दोषान्संवासाद्विद्विषाणयोः ।
यथा निष्ठाकरं शुल्कं न जात्वासीत्तथा शृणु ॥३६
अहं विचित्रवीर्याय द्वे कन्ये समुदावहम् ।
जित्वा च मागधान्सर्वान्काशीनथ च कोसलान् ।
गृहीतपाणिरेकासीत्प्राप्तशुल्कापराभवत् ॥ ३७
पाणौ गृहीता तत्रैव विसृज्या इति मे पिता ।
अब्रवीदितरां कन्यामावहस्व तु कौरवः ॥ ३८
अप्यन्यामनुपप्रच्छ शङ्कमानः पितुर्वचः ।
अतीव ह्यस्य धर्मेप्सा पितुर्मेऽभ्यधिकाभवत् ॥३९
ततोऽहमब्रुवं राजन्नाचारेप्सुरिदं वचः ।
आचारं तत्त्वतो वेत्तुमिच्छामीति पुनः पुनः ॥४०
ततो मयैवमुक्ते तु वाक्ये धर्मभृतां वरः ।
पिता मम महाराज बाह्लीको वाक्यमब्रवीत् ॥ ४१
यदि वः शुल्कतो निष्ठा न पाणिग्रहणं तथा ।
लाजान्तरमुपासीत प्राप्तशुल्का पतिं वृतम् ॥ ४२
न हि धर्मविदः प्राहुः प्रमाणं वाक्यतः स्मृतम् ।
येषां वै शुल्कतो निष्ठा न पाणिग्रहणात्तथा ॥ ४३
प्रसिद्धं भाषितं दाने तेषां प्रत्ययसतं पुनः ।
ये मन्यन्ते क्रयं शुल्कं न ते धर्मविदो जनाः ॥४४
न चैतेभ्यः प्रदातव्या न वोढव्या तथाविधा ।
न ह्येव भार्या क्रेतव्या न विक्रेया कथंचन ॥ ४५
ये च क्रीणन्ति दासीवद्ये च विक्रीणते जनाः ।
भवेत्तेषां तथा निष्ठा लुब्धानां पापचेतसाम् ॥ ४६
अस्मिन्धर्मे सत्यवन्तं पर्यपृच्छन्त वै जनाः ।
कन्यायाः प्राप्तशुल्कायाः शुल्कदः प्रशमं गतः ॥४७
पाणिग्रहीता चान्यः स्यादत्र नो धर्मसंशयः ।
तन्नश्छिन्धि महाप्राज्ञ त्वं हि वै प्राज्ञसंमतः ।
तत्त्वं जिज्ञासमानानां चक्षुर्भवतु नो भवान् ॥ ४८
तानेवं ब्रुवतः सर्वान्सत्यवान्वाक्यमब्रवीत् ।
यत्रेष्टं तत्र देया स्यान्नात्र कार्या विचारणा ।
कुर्वते जीवतोऽप्येवं मृते नैवास्ति संशयः ॥ ४९
देवरं प्रविशेत्कन्या तप्येद्वापि महत्तपः ।
तमेवानुव्रता भूत्वा पाणिग्राहस्य नाम सा ॥ ५०
लिखन्त्येव तु केषांचिदपरेषां शनैरपि ।
इति ये संवदन्त्यत्र त एवं निश्चयं विदुः ॥ ५१
तत्पाणिग्रहणात्पूर्वमुत्तरं यत्र वर्तते ।
सर्वमङ्गलमन्त्रं वै मृषावादस्तु पातकः ॥ ५२
पाणिग्रहणमन्त्राणां निष्ठा स्यात्सप्तमे पदे ।

पाणिग्राहस्य भार्या स्याद्यस्य चाद्भिः प्रदीयते ॥५३
अनुकूलामनुवंशां भ्रात्रा दत्तामुपाग्निकाम् ।
परिक्रम्य यथान्यायं भार्यां विन्देद्द्विजोत्तमः ॥ ५४

इति श्रीमहाभारते अनुशासनपर्वणि
चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

४५

युधिष्ठिर उवाच ।

कन्यायाः प्राप्तशुल्कायाः पतिश्चेन्नास्ति कश्चन ।
तत्र का प्रतिपत्तिः स्यात्तन्मे ब्रूहि पितामह ॥ १

भीष्म उवाच ।

या पुत्रकस्याप्यरिक्थस्य प्रतिपत्सा तदा भवेत् ॥२
अथ चेत्साहरेच्छुल्कं क्रीता शुल्कप्रदस्य सा ।
तस्यार्थेऽपत्यमीहेत येन न्यायेन शक्नुयात् ॥ ३
न तस्या मन्त्रवत्कार्यं कश्चित्कुर्वीत किंचन ॥ ४
स्वयं वृतेति सावित्री पित्रा वै प्रत्यपद्यत ।
तत्तस्यान्ये प्रशंसन्ति धर्मज्ञा नेतरे जनाः ॥ ५
एतत्तु नापरे चक्रुर्न परे जातु साधवः ।
साधूनां पुनराचारो गरीयो धर्मलक्षणम् ॥ ६
अस्मिन्नेव प्रकरणे सुक्रतुर्वाक्यमब्रवीत् ।
नप्ता विदेहराजस्य जनकस्य महात्मनः ॥ ७
असदाचरिते मार्गे कथं स्यादनुकीर्तनम् ।
अनुप्रश्नः संशयो वा सतामेतदुपालभेत् ॥ ८
असदेव हि धर्मस्य प्रमादो धर्म आसुरः ।
नानुशुश्रुम जात्वेतामिमां पूर्वेषु जन्मसु ॥ ९
भार्यापत्योर्हि संबन्धः स्त्रीपुंसोस्तुल्य एव सः ।
रतिः साधारणो धर्म इति चाह स पार्थिवः ॥१०

युधिष्ठिर उवाच ।

अथ केन प्रमाणेन पुंसामादीयते धनम् ।
पुत्रवद्धि पितुस्तस्य कन्या भवितुमर्हति ॥ ११

भीष्म उवाच ।

यथैवात्मा तथा पुत्रः पुत्रेण दुहिता समा ।
तस्यामात्मनि तिष्ठन्त्यां कथमन्यो धनं हरेत् ॥१२
मातुश्च यौतकं यत्स्यात्कुमारीभाग एव सः ।
दौहित्र एव वा रिक्थमपुत्रस्य पितुर्हरेत् ॥ १३
ददाति हि स पिण्डं वै पितुर्मातामहस्य च ।
पुत्रदौहित्रयोर्नेह विशेषो धर्मतः स्मृतः ॥ १४
अन्यत्र जातया सा हि प्रजया पुत्र ईहते ।
दुहितान्यत्र जातेन पुत्रेणापि विशिष्यते ॥ १५
दौहित्रकेण धर्मेण नात्र पश्यामि कारणम् ।
विक्रीतासु च ये पुत्रा भवन्ति पितुरेव ते ॥ १६
असूयवस्त्वधर्मिष्ठाः परस्वादायिनः शठाः ।
आसुरादधिसंभूता धर्माद्विषमवृत्तयः ॥ १७
अत्र गाथा यमोद्गीताः कीर्तयन्ति पुराविदः ।
धर्मज्ञा धर्मशास्त्रेषु निबद्धा धर्मसेतुषु ॥ १८
यो मनुष्यः स्वकं पुत्रं विक्रीय धनमिच्छति ।
कन्यां वा जीवितार्थाय यः शुल्केन प्रयच्छति ॥
सप्तावरे महाघोरे निरये कालसाह्वये ।
स्वेदं मूत्रं पुरीषं च तस्मिन्प्रेत उपाश्नुते ॥ २०
आर्षे गोमिथुनं शुल्कं केचिदाहुर्मृषैव तत् ।
अल्पं वा बहु वा राजन्विक्रयस्तावदेव सः ॥ २१
यद्यप्याचरितः कैश्चिन्नैष धर्मः कथंचन ।
अन्येषामपि दृश्यन्ते लोभतः संप्रवृत्तयः ॥ २२
वश्यां कुमारीं विहितां ये च तामुपभुञ्जते ।
एते पापस्य कर्तारस्तमस्यन्धेऽथ शेरते ॥ २३
अन्योऽप्यथ न विक्रेयो मनुष्यः किं पुनः प्रजाः ।
अधर्ममूलैर्हि धनैर्न तैरर्थोऽस्ति कश्चन ॥ २४

इति श्रीमहाभारते अनुशासनपर्वणि
पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

४६

भीष्म उवाच ।

प्राचेतसस्य वचनं कीर्तयन्ति पुराविदः ।
यस्याः किंचिन्नाददते ज्ञातयो न स विक्रयः ॥ १
अर्हणं तत्कुमारीणामानृशंस्यतमं च तत् ।
सर्वं च प्रतिदेयं स्यात्कन्यायै तदशेषतः ॥ २
पितृभिर्भ्रातृभिश्चैव श्वशुरैरथ देवरैः ।
पूज्या लालयितव्याश्च बहुकल्याणमीप्सुभिः ॥ ३
यदि वै स्त्री न रोचेत पुमांसं न प्रमोदयेत् ।
अप्रमोदनात्पुनः पुंसः प्रजनं न प्रवर्धते ॥ ४
पूज्या लालयितव्याश्च स्त्रियो नित्यं जनाधिप ।
अपूजिताश्च यत्रैताः सर्वास्तत्राफलाः क्रियाः ।
तदैव तत्कुलं नास्ति यदा शोचन्ति जामयः ॥ ५
जामीशप्तानि गेहानि निकृत्तानीव कृत्यया ।
नैव भान्ति न वर्धन्ते श्रिया हीनानि पार्थिव ॥ ६
स्त्रियः पुंसां परिददे मनुर्जिगमिषुर्दिवम् ।
अबलाः स्वल्पकौपीनाः सुहृदः सत्यजिष्णवः ॥ ७
ईर्ष्यवो मानकामाश्च चण्डा असुहृदोऽबुधाः ।
स्त्रियो माननमर्हन्ति ता मानयत मानवाः ॥ ८
स्त्रीप्रत्ययो हि वो धर्मो रतिभोगाश्च केवलाः ।
परिचर्यान्नसंस्कारास्तदायत्ता भवन्तु वः ॥ ९
उत्पादनमपत्यस्य जातस्य परिपालनम् ।
प्रीत्यर्थं लोकयात्रा च पश्यत स्त्रीनिबन्धनम् ॥ १०
संमान्यमानाश्चैताभिः सर्वकार्याण्यवाप्स्यथ ।
विदेहराजदुहिता चात्र श्लोकमगायत ॥ ११
नास्ति यज्ञः स्त्रियः कश्चिन्न श्राद्धं नोपवासकम् ।
धर्मस्तु भर्तृशुश्रूषा तया स्वर्गं जयत्युत ॥ १२
पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
पुत्रास्तु स्थविरीभावे न स्त्री स्वातन्त्र्यमर्हति ॥ १३
श्रिय एताः स्त्रियो नाम सत्कार्या भूतिमिच्छता ।
लालिता निगृहीता च स्त्री श्रीर्भवति भारत ॥१४

इति श्रीमहाभारते अनुशासनपर्वणि
षट्चत्वारिंशत्तमोऽध्यायः ॥ ४६ ॥

४७

युधिष्ठिर उवाच ।

सर्वशास्त्रविधानज्ञ राजधर्मार्थवित्तम ।
अतीव संशयच्छेत्ता भवान्वै प्रथितः क्षितौ ॥ १
कश्चित्तु संशयो मेऽस्ति तन्मे ब्रूहि पितामह ।
अस्यामापदि कष्टायामन्यं पृच्छाम कं वयम् ॥ २
यथा नरेण कर्तव्यं यश्च धर्मः सनातनः ।
एतत्सर्वं महाबाहो भवान्व्याख्यातुमर्हति ॥ ३
चतस्रो विहिता भार्या ब्राह्मणस्य पितामह ।
ब्राह्मणी क्षत्रिया वैश्या शूद्रा च रतिमिच्छतः ॥४
तत्र जातेषु पुत्रेषु सर्वासां कुरुसत्तम ।
आनुपूर्व्येण कस्तेषां पित्र्यं दायाद्यमर्हति ॥ ५
केन वा किं ततो हार्यं पितृवित्तात्पितामह ।
एतदिच्छामि कथितं विभागस्तेषु यः स्मृतः ॥६

भीष्म उवाच ।

ब्राह्मणः क्षत्रियो वैश्यस्त्रयो वर्णा द्विजातयः ।
एतेषु विहितो धर्मो ब्राह्मणस्य युधिष्ठिर ॥ ७
वैषम्यादथ वा लोभात्कामाद्वापि परंतप ।
ब्राह्मणस्य भवेच्छूद्रा न तु दृष्टान्ततः स्मृता ॥ ८
शूद्रां शयनमारोप्य ब्राह्मणः पीडितो भवेत् ।
प्रायश्चित्तीयते चापि विधिदृष्टेन हेतुना ॥ ९
तत्र जातेष्वपत्येषु द्विगुणं स्याद्युधिष्ठिर ।
अतस्ते नियमं वित्ते संप्रवक्ष्यामि भारत ॥ १०
लक्षण्यो गोवृषो यानं यत्प्रधानतमं भवेत् ।
ब्राह्मण्यास्तद्धरेत्पुत्र एकांशं वै पितुर्धनात् ॥ ११
शेषं तु दशधा कार्यं ब्राह्मणस्वं युधिष्ठिर ।
तत्र तेनैव हर्तव्याश्चत्वारोंऽशाः पितुर्धनात् ॥ १२

क्षत्रियायास्तु यः पुत्रो ब्राह्मणः सोऽप्यसंशयः ।
स तु मातृविशेषेण त्रीनंशान्हर्तुमर्हति ॥ १३
वर्णे तृतीये जातस्तु वैश्यायां ब्राह्मणादपि ।
द्विरंशस्तेन हर्तव्यो ब्राह्मणस्वाद्युधिष्ठिर ॥ १४
शूद्रायां ब्राह्मणाज्जातो नित्यादेयधनः स्मृतः ।
अल्पं वापि प्रदातव्यं शूद्रापुत्राय भारत ॥ १५
दशधा प्रविभक्तस्य धनस्यैष भवेत्क्रमः ।
सवर्णासु तु जातानां समान्भागान्प्रकल्पयेत् ॥ १६
अब्राह्मणं तु मन्यन्ते शूद्रापुत्रमनैपुणात् ।
त्रिषु वर्णेषु जातो हि ब्राह्मणाद्ब्राह्मणो भवेत् ॥ १७
स्मृता वर्णाश्च चत्वारः पञ्चमो नाधिगम्यते ।
हरेत्तु दशमं भागं शूद्रापुत्रः पितुर्धनात् ॥ १८
तत्तु दत्तं हरेत्पित्रा नादत्तं हर्तुमर्हति ।
अवश्यं हि धनं देयं शूद्रापुत्राय भारत ॥ १९
आनृशंस्यं परो धर्म इति तस्मै प्रदीयते ।
यत्र तत्र समुत्पन्नो गुणायैवोपकल्पते ॥ २०
यदि वाप्येकपुत्रः स्यादपुत्रो यदि वा भवेत् ।
नाधिकं दशमाद्दद्याच्छूद्रापुत्राय भारत ॥ २१
त्रैवार्षिकाद्यदा भक्तादधिकं स्याद्द्विजस्य तु ।
यजेत तेन द्रव्येण न वृथा साधयेद्धनम् ॥ २२
त्रिसाहस्रपरो दायः स्त्रियो देयो धनस्य वै ।
तच्च भर्त्रा धनं दत्तं नादत्तं भोक्तुमर्हति ॥ २३
स्त्रीणां तु पतिदायाद्यमुपभोगफलं स्मृतम् ।
नापहारं स्त्रियः कुर्युः पतिवित्तात्कथंचन ॥ २४
स्त्रियास्तु यद्भवेद्वित्तं पित्रा दत्तं युधिष्ठिर ।
ब्राह्मण्यास्तद्धरेत्कन्या यथा पुत्रस्तथा हि सा ।
सा हि पुत्रसमा राजन्विहिता कुरुनन्दन ॥ २५
एवमेतत्समुद्दिष्टं धर्मेषु भरतर्षभ ।
एतद्धर्ममनुस्मृत्य न वृथा साधयेद्धनम् ॥ २६

युधिष्ठिर उवाच ।

शूद्रायां ब्राह्मणाज्जातो यद्यदेयधनः स्मृतः ।
केन प्रतिविशेषेण दशमोऽप्यस्य दीयते ॥ २७
ब्राह्मण्यां ब्राह्मणाज्जातो ब्राह्मणः स्यान्न संशयः ।
क्षत्रियायां तथैव स्याद्वैश्यायामपि चैव हि ॥ २८
कस्मात्ते विषमं भागं भजेरन्नृपसत्तम ।
यदा सर्वे त्रयो वर्णास्त्वयोक्ता ब्राह्मणा इति ॥२९

भीष्म उवाच ।

दारा इत्युच्यते लोके नाम्नैकेन परंतप ।
प्रोक्तेन चैकनाम्नायं विशेषः सुमहान्भवेत् ॥ ३०
तिस्रः कृत्वा पुरो भार्याः पश्चाद्विन्देत ब्राह्मणीम् ।
सा ज्येष्ठा सा च पूज्या स्यात्सा च ताभ्यो गरीयसी ॥
स्नानं प्रसाधनं भर्तुर्दन्तधावनमञ्जनम् ।
हव्यं कव्यं च यच्चान्यद्धर्मयुक्तं भवेद्गृहे ॥ ३२
न तस्यां जातु तिष्ठन्त्यामन्या तत्कर्तुमर्हति ।
ब्राह्मणी त्वेव तत्कुर्याद्ब्राह्मणस्य युधिष्ठिर ॥ ३३
अन्नं पानं च माल्यं च वासांस्याभरणानि च ।
ब्राह्मण्यै तानि देयानि भर्तुः सा हि गरीयसी ॥
मनुनाभिहितं शास्त्रं यच्चापि कुरुनन्दन ।
तत्राप्येष महाराज दृष्टो धर्मः सनातनः ॥ ३५
अथ चेदन्यथा कुर्याद्यदि कामाद्युधिष्ठिर ।
यथा ब्राह्मणचण्डालः पूर्वदृष्टस्तथैव सः ॥ ३६
ब्राह्मण्याः सदृशः पुत्रः क्षत्रियायाश्च यो भवेत् ।
राजन्विशेषो नास्त्यत्र वर्णयोरुभयोरपि ॥ ३७
न तु जात्या समा लोके ब्राह्मण्याः क्षत्रिया भवेत् ।
ब्राह्मण्याः प्रथमः पुत्रो भूयान्स्याद्राजसत्तम ।
भूयोऽपि भूयसा हार्यं पितृवित्ताद्युधिष्ठिर ॥ ३८
यथा न सदृशी जातु ब्राह्मण्याः क्षत्रिया भवेत् ।
क्षत्रियायास्तथा वैश्या न जातु सदृशी भवेत् ॥
श्रीश्च राज्यं च कोशश्च क्षत्रियाणां युधिष्ठिर ।

विहितं दृश्यते राजन्सागरान्ता च मेदिनी ॥ ४०
क्षत्रियो हि स्वधर्मेण श्रियं प्राप्नोति भूयसीम् ।
राजा दण्डधरो राजन्रक्षा नान्यत्र क्षत्रियात् ॥४१
ब्राह्मणा हि महाभागा देवानामपि देवताः ।
तेषु राजा प्रवर्तेत पूजया विधिपूर्वकम् ॥ ४२
प्रणीतमृषिभिर्ज्ञात्वा धर्मं शाश्वतमव्ययम् ।
लुप्यमानः स्वधर्मेण क्षत्रियो रक्षति प्रजाः ॥ ४३
दस्युभिर्ह्रियमाणं च धनं दाराश्च सर्वशः ।
सर्वेषामेव वर्णानां त्राता भवति पार्थिवः ॥ ४४
भूयान्स्यात्क्षत्रियापुत्रो वैश्यापुत्रान्न संशयः ।
भूयस्तेनापि हर्तव्यं पितृवित्ताद्युधिष्ठिर ॥ ४५

युधिष्ठिर उवाच ।

उक्तं ते विधिवद्राजन्ब्राह्मणस्वे पितामह ।
इतरेषां तु वर्णानां कथं विनियमो भवेत् ॥ ४६

भीष्म उवाच ।

क्षत्रियस्यापि भार्ये द्वे विहिते कुरुनन्दन ।
तृतीया च भवेच्छूद्रा न तु दृष्टान्ततः स्मृता ॥४७
एष एव क्रमो हि स्यात्क्षत्रियाणां युधिष्ठिर ।
अष्टधा तु भवेत्कार्यं क्षत्रियस्वं युधिष्ठिर ॥ ४८
क्षत्रियाया हरेत्पुत्रश्चतुरोंऽशान्पितुर्धनात् ।
युद्धावहारिकं यच्च पितुः स्यात्स हरेच्च तत् ॥ ४९
वैश्यापुत्रस्तु भागांस्त्रीन्शूद्रापुत्रस्तथाष्टमम् ।
सोऽपि दत्तं हरेत्पित्रा नादत्तं हर्तुमर्हति ॥ ५०
एकैव हि भवेद्भार्या वैश्यस्य कुरुनन्दन ।
द्वितीया वा भवेच्छूद्रा न तु दृष्टान्ततः स्मृता ॥५१
वैश्यस्य वर्तमानस्य वैश्यायां भरतर्षभ ।
शूद्रायां चैव कौन्तेय तयोर्विनियमः स्मृतः ॥ ५२
पञ्चधा तु भवेत्कार्यं वैश्यस्वं भरतर्षभ ।
तयोरपत्ये वक्ष्यामि विभागं च जनाधिप ॥ ५३
वैश्यापुत्रेण हर्तव्याश्चत्वारोंऽशाः पितुर्धनात् ।
पञ्चमस्तु भवेद्भागः शूद्रापुत्राय भारत ॥ ५४
सोऽपि दत्तं हरेत्पित्रा नादत्तं हर्तुमर्हति ।
त्रिभिर्वर्णैस्तथा जातः शूद्रो देयधनो भवेत् ॥ ५५
शूद्रस्य स्यात्सवर्णैव भार्या नान्या कथंचन ।
शूद्रस्य समभागः स्याद्यदि पुत्रशतं भवेत् ॥ ५६
जातानां समवर्णासु पुत्राणामविशेषतः ।
सर्वेषामेव वर्णानां समभागो धने स्मृतः ॥ ५७
ज्येष्ठस्य भागो ज्येष्ठः स्यादेकांशो यः प्रधानतः ।
एष दायविधिः पार्थ पूर्वमुक्तः स्वयंभुवा ॥ ५८
समवर्णासु जातानां विशेषोऽस्त्यपरो नृप ।
विवाहवैशेष्यकृतः पूर्वः पूर्वो विशिष्यते ॥ ५९
हरेज्ज्येष्ठः प्रधानांशमेकं तुल्यासुतेष्वपि ।
मध्यमो मध्यमं चैव कनीयांस्तु कनीयसम् ॥ ६०
एवं जातिषु सर्वासु सवर्णाः श्रेष्ठतां गताः ।
महर्षिरपि चैतद्वै मारीचः काश्यपोऽब्रवीत् ॥ ६१

इति श्रीमहाभारते अनुशासनपर्वणि
सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

४८

युधिष्ठिर उवाच ।

अर्थाश्रयाद्वा कामाद्वा वर्णानां वाप्यनिश्चयात् ।
अज्ञानाद्वापि वर्णानां जायते वर्णसंकरः ॥ १
तेषामेतेन विधिना जातानां वर्णसंकरे ।
को धर्मः कानि कर्माणि तन्मे ब्रूहि पितामह ॥ २

भीष्म उवाच ।

चातुर्वर्ण्यस्य कर्माणि चातुर्वर्ण्यं च केवलम् ।
असृजत्स ह यज्ञार्थे पूर्वमेव प्रजापतिः ॥ ३
भार्याश्चतस्रो विप्रस्य द्वयोरात्मास्य जायते ।
आनुपूर्व्याद्द्वयोर्हीनौ मातृजात्यौ प्रसूयतः ॥ ४
परं शवाद्ब्राह्मणस्यैष पुत्रः
शूद्रापुत्रं पारशवं तमाहुः ।

शुश्रूषकः स्वस्य कुलस्य स स्या-
त्स्वं चारित्रं नित्यमथो न जह्यात् ॥ ५
सर्वानुपायानपि संप्रधार्य
समुद्धरेत्स्वस्य कुलस्य तन्तुम् ।
ज्येष्ठो यवीयानपि यो द्विजस्य
शुश्रूषवान्दानपरायणः स्यात् ॥ ६
तिस्रः क्षत्रियसंबन्धाद्द्वयोरात्मास्य जायते ।
हीनवर्णस्तृतीयायां शूद्र उग्र इति स्मृतः ॥ ७
द्वे चापि भार्ये वैश्यस्य द्वयोरात्मास्य जायते ।
शूद्रः शूद्रस्य चाप्येका शूद्रमेव प्रजायते ॥ ८
अतो विशिष्टस्त्वधमो गुरुदारप्रधर्षकः ।
बाह्यं वर्णं जनयति चातुर्वर्ण्यविगर्हितम् ॥ ९
अयाज्यं क्षत्रियो व्रात्यं सूतं स्तोमक्रियापरम् ।
वैश्यो वैदेहकं चापि मौद्गल्यमपवर्जितम् ॥ १०
शूद्रश्चण्डालमत्युग्रं वध्यघ्नं बाह्यवासिनम् ।
ब्राह्मण्यां संप्रजायन्त इत्येते कुलपांसनाः ।
एते मतिमतां श्रेष्ठ वर्णसंकरजाः प्रभो ॥ ११
बन्दी तु जायते वैश्यान्मागधो वाक्यजीवनः ।
शूद्रान्निषादो मत्स्यघ्नः क्षत्रियाणां व्यतिक्रमात् ॥
शूद्रादायोगवश्चापि वैश्यायां ग्रामधर्मिणः ।
ब्राह्मणैरप्रतिग्राह्यस्तथा स वनजीवनः ॥ १३
एतेऽपि सदृशं वर्णं जनयन्ति स्वयोनिषु ।
मातृजात्यां प्रसूयन्ते प्रवरा हीनयोनिषु ॥ १४
यथा चतुर्षु वर्णेषु द्वयोरात्मास्य जायते ।
आनन्तर्यात्तु जायन्ते तथा बाह्याः प्रधानतः ॥१५
ते चापि सदृशं वर्णं जनयन्ति स्वयोनिषु ।
परस्परस्य वर्तन्तो जनयन्ति विगर्हितान् ॥ १६
यथा च शूद्रो ब्राह्मण्यां जन्तुं बाह्यं प्रसूयते ।
एवं बाह्यतराद्बाह्यश्चातुर्वर्ण्यात्प्रसूयते ॥ १७
प्रतिलोमं तु वर्तन्ते बाह्याद्बाह्यतरं पुनः ।
हीना हीनात्प्रसूयन्ते वर्णाः पञ्चदशैव ते ॥ १८
अगम्यागमनाच्चैव वर्तते वर्णसंकरः ।
व्रात्यानामत्र जायन्ते सैरन्ध्रा मागधेषु च ।
प्रसाधनोपचारज्ञमदासं दासजीवनम् ॥ १९
व्रतश्चायोगवं सूते वागुरावनजीवनम् ।
मैरेयकं च वैदेहः संप्रसूतेऽथ माधुकम् ॥ २०
निषादो मुद्गरं सूते दाशं नावोपजीविनम् ।
मृतपं चापि चण्डालः श्वपाकमतिकुत्सितम् ॥ २१
चतुरो मागधी सूते क्रूरान्मायोपजीविनः ।
मांसस्वादुकरं सूदं सौगन्धमिति संज्ञितम् ॥ २२
वैदेहकाच्च पापिष्ठं क्रूरं भार्योपजीविनम् ।
निषादान्मद्रनाभं च खरयानप्रयायिनम् ॥ २३
चण्डालात्पुल्कसं चापि खराश्वगजभोजिनम् ।
मृतचेलप्रतिच्छन्नं भिन्नभाजनभोजिनम् ॥ २४
आयोगवीषु जायन्ते हीनवर्णासु ते त्रयः ।
क्षुद्रो वैदेहकादन्ध्रो बहिर्ग्रामप्रतिश्रयः ॥ २५
कारावरो निषाद्यां तु चर्मकारात्प्रजायते ।
चण्डालात्पाण्डुसौपाकस्त्वक्सारव्यवहारवान् ॥ २६
आहिण्डिको निषादेन वैदेह्यां संप्रजायते ।
चण्डालेन तु सौपाको मौद्गल्यसमवृत्तिमान् ॥२७
निषादी चापि चण्डालात्पुत्रमन्तावसायिनम् ।
श्मशानगोचरं सूते बाह्यैरपि बहिष्कृतम् ॥ ॥ २८
इत्येताः संकरे जात्यः पितृमातृव्यतिक्रमात् ।
प्रच्छन्ना वा प्रकाशा वा वेदितव्याः स्वकर्मभिः ॥
चतुर्णामेव वर्णानां धर्मो नान्यस्य विद्यते ।
वर्णानां धर्महीनेषु संज्ञा नास्तीह कस्यचित् ॥३०
यदृच्छयोपसंपन्नैर्यज्ञसाधुबहिष्कृतैः ।
बाह्या बाह्यैस्तु जायन्ते यथावृत्ति यथाश्रयम् ॥३१
चतुष्पथश्मशानानि शैलांश्चान्यान्वनस्पतीन् ।
युञ्जन्ते चाप्यलंकारास्तथोपकरणानि च ॥ ३२

गोब्राह्मणार्थे साहाय्यं कुर्वाणा वै न संशयः ।
आनृशंस्यमनुक्रोशः सत्यवाक्यमथ क्षमा ॥ ३३
स्वशरीरैः परित्राणं ब्राह्मणानां सिद्धिकारकम् ।
मनुजव्याघ्र भवति तत्र मे नास्ति संशयः ॥ ३४
यथोपदेशं परिकीर्तितासु
नरः प्रजायेत विचार्य बुद्धिमान् ।
विहीनयोनिर्हि सुतोऽवसादये-
त्तितीर्षमाणं सलिले यथोपलम् ॥ ३५
अविद्वांसमलं लोके विद्वांसमपि वा पुनः ।
नयन्ते ह्युत्पथं नार्यः कामक्रोधवशानुगम् ॥ ३६
स्वभावश्चैव नारीणां नराणामिह दूषणम् ।
इत्यर्थं न प्रसज्जन्ते प्रमदासु विपश्चितः ॥ ३७

युधिष्ठिर उवाच ।

वर्णापेतमविज्ञातं नरं कलुषयोनिजम् ।
आर्यरूपमिवानार्यं कथं विद्यामहे नृप ॥ ३८

भीष्म उवाच ।

योनिसंकलुषे जातं नानाचारसमाहितम् ।
कर्मभिः सज्जनाचीर्णैर्विज्ञेया योनिशुद्धता ॥ ३९
अनार्यत्वमनाचारः क्रूरत्वं निष्क्रियात्मता ।
पुरुषं व्यञ्जयन्तीह लोके कलुषयोनिजम् ॥ ४०
पित्र्यं वा भजते शीलं मातृजं वा तथोभयम् ।
न कथंचन संकीर्णः प्रकृतिं स्वां नियच्छति ॥४१
यथैव सदृशो रूपे मातापित्रोर्हि जायते ।
व्याघ्रश्चित्रैस्तथा योनिं पुरुषः स्वां नियच्छति ॥
कुलस्रोतसि संछन्ने यस्य स्याद्योनिसंकरः ।
संश्रयत्येव तच्छीलं नरोऽल्पमपि वा बहु ॥ ४३
आर्यरूपसमाचारं चरन्तं कृतके पथि ।
स्ववर्णमन्यवर्णं वा स्वशीलं शास्ति निश्चये ॥ ४४
नानावृत्तेषु भूतेषु नानाकर्मरतेषु च ।
जन्मवृत्तसमं लोके सुश्लिष्टं न विरज्यते ॥ ४५
शरीरमिह सत्त्वेन नरस्य परिकृष्यते ।
ज्येष्ठमध्यावरं सत्त्वं तुल्यसत्त्वं प्रमोदते ॥ ४६
ज्यायांसमपि शीलेन विहीनं नैव पूजयेत् ।
अपि शूद्रं तु सद्वृत्तं धर्मज्ञमभिपूजयेत् ॥ ४७
आत्मानमाख्याति हि कर्मभिर्नरः
स्वशीलचारित्रकृतैः शुभाशुभैः ।
प्रनष्टमप्यात्मकुलं तथा नरः
पुनः प्रकाशं कुरुते स्वकर्मभिः ॥ ४८
योनिष्वेतासु सर्वासु संकीर्णास्वितरासु च ।
यत्रात्मानं न जनयेद्बुधस्ताः परिवर्जयेत् ॥ ४९

इति श्रीमहाभारते अनुशासनपर्वणि
अष्टचत्वारिंशत्तमोऽध्यायः ॥ ४८ ॥

४९

युधिष्ठिर उवाच ।

ब्रूहि पुत्रान्कुरुश्रेष्ठ वर्णानां त्वं पृथक्पृथक् ।
कीदृश्यां कीदृशाश्चापि पुत्राः कस्य च के च ते ॥
विप्रवादाः सुबहुशः श्रूयन्ते पुत्रकारिताः ।
अत्र नो मुह्यतां राजन्संशयं छेत्तुमर्हसि ॥ २

भीष्म उवाच ।

आत्मा पुत्रस्तु विज्ञेयस्तस्यानन्तरजश्च यः ।
नियुक्तजश्च विज्ञेयः सुतः प्रसृतजस्तथा ॥ ३
पतितस्य च भार्यायां भर्त्रा सुसमवेतया ।
तथा दत्तकृतौ पुत्रावध्यूढश्च तथापरः ॥ ४
षडपध्वंसजाश्चापि कानीनापसदास्तथा ।
इत्येते ते समाख्यातास्तान्विजानीहि भारत ॥ ५

युधिष्ठिर उवाच ।

षडपध्वंसजाः के स्युः के वाप्यपसदास्तथा ।
एतत्सर्वं यथातत्त्वं व्याख्यातुं मे त्वमर्हसि ॥ ६

भीष्म उवाच ।

त्रिषु वर्णेषु ये पुत्रा ब्राह्मणस्य युधिष्ठिर ।

वर्णयोश्च द्वयोः स्यातां यौ राजन्यस्य भारत ॥ ७
एको द्विवर्ण एवाथ तथात्रैवोपलक्षितः ।
षडपध्वंसजास्ते हि तथैवापसदाञ्शृणु ॥ ८
चण्डालो व्रात्यवेनौ च ब्राह्मण्यां क्षत्रियासु च ।
वैश्यायां चैव शूद्रस्य लक्ष्यन्तेऽपसदास्त्रयः ॥ ९
मागधो वामकश्चैव द्वौ वैश्यस्योपलक्षितौ ।
ब्राह्मण्यां क्षत्रियायां च क्षत्रियस्यैक एव तु ॥ १०
ब्राह्मण्यां लक्ष्यते सूत इत्येतेऽपसदाः स्मृताः ।
पुत्ररेतो न शक्यं हि मिथ्या कर्तुं नराधिप ॥ ११

युधिष्ठिर उवाच ।

क्षेत्रजं केचिदेवाहुः सुतं केचित्तु शुक्रजम् ।
तुल्यावेतौ सुतौ कस्य तन्मे ब्रूहि पितामह ॥ १२

भीष्म उवाच ।

रेतजो वा भवेत्पुत्रस्त्यक्तो वा क्षेत्रजो भवेत् ।
अध्यूढः समयं भित्त्वेत्येतदेव निबोध मे ॥ १३

युधिष्ठिर उवाच ।

रेतोजं विद्म वै पुत्रं क्षेत्रजस्यागमः कथम् ।
अध्यूढं विद्म वै पुत्रं हित्वा च समयं कथम् ॥ १४

भीष्म उवाच ।

आत्मजं पुत्रमुत्पाद्य यस्त्यजेत्कारणान्तरे ।
न तत्र कारणं रेतः स क्षेत्रस्वामिनो भवेत् ॥ १५
पुत्रकामो हि पुत्रार्थे यां वृणीते विशां पते ।
तत्र क्षेत्रं प्रमाणं स्यान्न वै तत्रात्मजः सुतः ॥ १६
अन्यत्र क्षेत्रजः पुत्रो लक्ष्यते भरतर्षभ ।
न ह्यात्मा शक्यते हन्तुं दृष्टान्तोपगतो ह्यसौ ॥ १७
कश्चिच्च कृतकः पुत्रः संग्रहादेव लक्ष्यते ।
न तत्र रेतः क्षेत्रं वा प्रमाणं स्याद्युधिष्ठिर ॥ १८

युधिष्ठिर उवाच ।

कीदृशः कृतकः पुत्रः संग्रहादेव लक्ष्यते ।
शुक्रं क्षेत्रं प्रमाणं वा यत्र लक्ष्येत भारत ॥ १९

भीष्म उवाच ।

मातापितृभ्यां संत्यक्तं पथि यं तु प्रलक्षयेत् ।
न चास्य मातापितरौ ज्ञायेते स हि कृत्रिमः ॥ २०
अस्वामिकस्य स्वामित्वं यस्मिन्संप्रतिलक्षयेत् ।
सवर्णस्तं च पोषेत सवर्णस्तस्य जायते ॥ २१

युधिष्ठिर उवाच ।

कथमस्य प्रयोक्तव्यः संस्कारः कस्य वा कथम् ।
देया कन्या कथं चेति तन्मे ब्रूहि पितामह ॥ २२

भीष्म उवाच ।

आत्मवत्तस्य कुर्वीत संस्कारं स्वामिवत्तथा ॥ २३
त्यक्तो मातापितृभ्यां यः सवर्णं प्रतिपद्यते ।
तद्गोत्रवर्णतस्तस्य कुर्यात्संस्कारमच्युत ॥ २४
अथ देया तु कन्या स्यात्तद्वर्णेन युधिष्ठिर ।
संस्कर्तुं मातृगोत्रं च मातृवर्णविनिश्चये ॥ २५
कानीनाध्यूढजौ चापि विज्ञेयौ पुत्रकिल्बिषौ ।
तावपि स्वाविव सुतौ संस्कार्याविति निश्चयः ॥ २६
क्षेत्रजो वाप्यपसदो येऽध्यूढास्तेषु चाप्यथ ।
आत्मवद्वै प्रयुञ्जीरन्संस्कारं ब्राह्मणादयः ॥ २७
धर्मशास्त्रेषु वर्णानां निश्चयोऽयं प्रदृश्यते ।
एतत्ते सर्वमाख्यातं किं भूयः श्रोतुमिच्छसि ॥ २८

इति श्रीमहाभारते अनुशासनपर्वणि
एकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥

५०

युधिष्ठिर उवाच ।

दर्शने कीदृशः स्नेहः संवासे च पितामह ।
महाभाग्यं गवां चैव तन्मे ब्रूहि पितामह ॥ १

भीष्म उवाच ।

हन्त ते कथयिष्यामि पुरावृत्तं महाद्युते ।

नहुषस्य च संवादं महर्षेश्च्यवनस्य च ॥ २
पुरा महर्षिश्च्यवनो भार्गवो भरतर्षभ ।
उदवासकृतारम्भो बभूव सुमहाव्रतः ॥ ३
निहत्य मानं क्रोधं च प्रहर्षं शोकमेव च ।
वर्षाणि द्वादश मुनिर्जलवासे धृतव्रतः ॥ ४
आदधत्सर्वभूतेषु विस्रम्भं परमं शुभम् ।
जलेचरेषु सत्त्वेषु शीतरश्मिरिव प्रभुः ॥ ५
स्थाणुभूतः शुचिर्भूत्वा दैवतेभ्यः प्रणम्य च ।
गङ्गायमुनयोर्मध्ये जलं संप्रविवेश ह ॥ ६
गङ्गायमुनयोर्वेगं सुभीमं भीमनिःस्वनम् ।
प्रतिजग्राह शिरसा वातवेगसमं जवे ॥ ७
गङ्गा च यमुना चैव सरितश्चानुगास्तयोः ।
प्रदक्षिणमृषिं चक्रुर्न चैनं पर्यपीडयन् ॥ ८
अन्तर्जले स सुष्वाप काष्ठभूतो महामुनिः ।
ततश्चोर्ध्वस्थितो धीमानभवद्भरतर्षभ ॥ ९
जलौकसां च सत्त्वानां बभूव प्रियदर्शनः ।
उपाजिघ्रन्त च तदा मत्स्यास्तं हृष्टमानसाः ।
तत्र तस्यासतः कालः समतीतोऽभवन्महान् ॥ १०
ततः कदाचित्समये कस्मिंश्चिन्मत्स्यजीविनः ।
तं देशं समुपाजग्मुर्जालहस्ता महाद्युते ॥ ११
निषादा बहवस्तत्र मत्स्योद्धरणनिश्चिताः ।
व्यायता बलिनः शूराः सलिलेष्वनिवर्तिनः ।
अभ्याययुश्च तं देशं निश्चिता जालकर्मणि ॥ १२
जालं च योजयामासुर्विशेषेण जनाधिप ।
मत्स्योदकं समासाद्य तदा भरतसत्तम ॥ १३
ततस्ते बहुभिर्योगैः कैवर्ता मत्स्यकाङ्क्षिणः ।
गङ्गायमुनयोर्वारि जालैरभ्यकिरंस्ततः ॥ १४
जालं सुविततं तेषां नवसूत्रकृतं तथा ।
विस्तारायामसंपन्नं यत्तत्र सलिले क्षमम् ॥ १५
ततस्ते सुमहच्चैव बलवच्च सुवर्तितम् ।
प्रकीर्य सर्वतः सर्वे जालं चकृषिरे तदा ॥ १६
अभीतरूपाः संहृष्टास्तेऽन्योन्यवशवर्तिनः ।
बबन्धुस्तत्र मत्स्यांश्च तथान्याञ्जलचारिणः ॥ १७
तथा मत्स्यैः परिवृतं च्यवनं भृगुनन्दनम् ।
आकर्षन्त महाराज जालेनाथ यदृच्छया ॥ १८
नदीशैवलदिग्धाङ्गं हरिश्मश्रुजटाधरम् ।
लग्नैः शङ्खगणैर्गात्रैः कोष्ठैश्चित्रैरिवावृतम् ॥ १९
तं जालेनोद्धृतं दृष्ट्वा ते तदा वेदपारगम् ।
सर्वे प्राञ्जलयो दाशाः शिरोभिः प्रापतन्भुवि ॥२०
परिखेदपरित्रासाज्जालस्याकर्षणेन च ।
मत्स्या बभूवुर्व्यापन्नाः स्थलसंकर्षणेन च ॥ २१
स मुनिस्तत्तदा दृष्ट्वा मत्स्यानां कदनं कृतम् ।
बभूव कृपयाविष्टो निःश्वसंश्च पुनः पुनः ॥ २२

निषादा ऊचुः ।

अज्ञानाद्यत्कृतं पापं प्रसादं तत्र नः कुरु ।
करवाम प्रियं किं ते तन्नो ब्रूहि महामुने ॥ २३

भीष्म उवाच ।

इत्युक्तो मत्स्यमध्यस्थश्च्यवनो वाक्यमब्रवीत् ।
यो मेऽद्य परमः कामस्तं शृणुध्वं समाहिताः ॥२४
प्राणोत्सर्गं विक्रयं वा मत्स्यैर्यास्याम्यहं सह ।
संवासान्नोत्सहे त्यक्तुं सलिलाध्युषितानिमान् ॥२५
इत्युक्तास्ते निषादास्तु सुभृशं भयकम्पिताः ।
सर्वे विषण्णवदना नहुषाय न्यवेदयन् ॥ २६

इति श्रीमहाभारते अनुशासनपर्वणि
पञ्चाशत्तमोऽध्यायः ॥ ५० ॥

५१

भीष्म उवाच ।

नहुषस्तु ततः श्रुत्वा च्यवनं तं तथागतम् ।
त्वरितः प्रययौ तत्र सहामात्यपुरोहितः ॥ १
शौचं कृत्वा यथान्यायं प्राञ्जलिः प्रयतो नृपः ।

आत्मानमाचचक्षे च च्यवनाय महात्मने ॥ २
अर्चयामास तं चापि तस्य राज्ञः पुरोहितः ।
सत्यव्रतं महाभागं देवकल्पं विशां पते ॥ ३

नहुष उवाच ।

करवाणि प्रियं किं ते तन्मे व्याख्यातुमर्हसि ।
सर्वं कर्तास्मि भगवन्यद्यपि स्यात्सुदुष्करम् ॥ ४

च्यवन उवाच ।

श्रमेण महता युक्ताः कैवर्ता मत्स्यजीविनः ।
मम मूल्यं प्रयच्छैभ्यो मत्स्यानां विक्रयैः सह ॥५

नहुष उवाच ।

सहस्रं दीयतां मूल्यं निषादेभ्यः पुरोहितः ।
निष्क्रयार्थं भगवतो यथाह भृगुनन्दनः ॥ ६

च्यवन उवाच ।

सहस्रं नाहमर्हामि किं वा त्वं मन्यसे नृप ।
सदृशं दीयतां मूल्यं स्वबुद्ध्या निश्चयं कुरु ॥ ७

नहुष उवाच ।

सहस्राणां शतं क्षिप्रं निषादेभ्यः प्रदीयताम् ।
स्यादेतत्तु भवेन्मूल्यं किं वान्यन्मन्यते भवान् ॥ ८

च्यवन उवाच ।

नाहं शतसहस्रेण निमेयः पार्थिवर्षभ ।
दीयतां सदृशं मूल्यममात्यैः सह चिन्तय ॥ ९

नहुष उवाच ।

कोटिः प्रदीयतां मूल्यं निषादेभ्यः पुरोहित ।
यदेतदपि नौपम्यमतो भूयः प्रदीयताम् ॥ १०

च्यवन उवाच ।

राजन्नाहम्यिहं कोटिं भूयो वापि महाद्युते ।
सदृशं दीयतां मूल्यं ब्राह्मणैः सह चिन्तय ॥ ११

नहुष उवाच ।

अर्धराज्यं समग्रं वा निषादेभ्यः प्रदीयताम् ।
एतन्मूल्यमहं मन्ये किं वान्यन्मन्यसे द्विज ॥ १२

च्यवन उवाच ।

अर्धराज्यं समग्रं वा नाहमर्हामि पार्थिव ।
सदृशं दीयतां मूल्यमृषिभिः सह चिन्त्यताम् ॥१३

भीष्म उवाच ।

महर्षेर्वचनं श्रुत्वा नहुषो दुःखकर्शितः ।
स चिन्तयामास तदा सहामात्यपुरोहितः ॥ १४
तत्र त्वन्यो वनचरः कश्चिन्मूलफलाशनः ।
नहुषस्य समीपस्थो गविजातोऽभवन्मुनिः ॥ १५
स समाभाष्य राजानमब्रवीद्द्विजसत्तमः ।
तोषयिष्याम्यहं विप्रं यथा तुष्टो भविष्यति ॥ १६
नाहं मिथ्यावचो ब्रूयां स्वैरेष्वपि कुतोऽन्यथा ।
भवतो यदहं ब्रूयां तत्कार्यमविशङ्कया ॥ १७

नहुष उवाच ।

ब्रवीतु भगवान्मूल्यं महर्षेः सदृशं भृगोः ।
परित्रायस्व मामस्माद्विषयं च कुलं च मे ॥ १८
हन्याद्धि भगवान्क्रुद्धस्त्रैलोक्यमपि केवलम् ।
किं पुनर्मां तपोहीनं बाहुवीर्यपरायणम् ॥ १९
अगाधेऽम्भसि मग्नस्य सामात्यस्य सहर्त्विजः ।
प्लवो भव महर्षे त्वं कुरु मूल्यविनिश्चयम् ॥ २०

भीष्म उवाच ।

नहुषस्य वचः श्रुत्वा गविजातः प्रतापवान् ।
उवाच हर्षयन्सर्वानमात्यान्पार्थिवं च तम् ॥ २१
अनर्घेया महाराज द्विजा वर्णमहत्तमाः ।
गावश्च पृथिवीपाल गौर्मूल्यं परिकल्प्यताम् ॥ २२
नहुषस्तु ततः श्रुत्वा महर्षेर्वचनं नृप ।
हर्षेण महता युक्तः सहामात्यपुरोहितः ॥ २३

अभिगम्य भृगोः पुत्रं च्यवनं संशितव्रतम् ।
इदं प्रोवाच नृपते वाचा संतर्पयन्निव ॥ २४
उत्तिष्ठोत्तिष्ठ विप्रर्षे गवा क्रीतोऽसि भार्गव ।
एतन्मूल्यमहं मन्ये तव धर्मभृतां वर ॥ २५

च्यवन उवाच ।

उत्तिष्ठाम्येष राजेन्द्र सम्यक्क्रीतोऽस्मि तेऽनघ ।
गोभिस्तुल्यं न पश्यामि धनं किंचिदिहाच्युत ॥ २६
कीर्तनं श्रवणं दानं दर्शनं चापि पार्थिव ।
गवां प्रशस्यते वीर सर्वपापहरं शिवम् ॥ २७
गावो लक्ष्म्याः सदा मूलं गोषु पाप्मा न विद्यते ।
अन्नमेव सदा गावो देवानां परमं हविः ॥ २८
स्वाहाकारवषट्कारौ गोषु नित्यं प्रतिष्ठितौ ।
गावो यज्ञप्रणेत्र्यो वै तथा यज्ञस्य ता मुखम् ॥ २९
अमृतं ह्यक्षयं दिव्यं क्षरन्ति च वहन्ति च ।
अमृतायतनं चैताः सर्वलोकनमस्कृताः ॥ ३०
तेजसा वपुषा चैव गावो वह्निसमा भुवि ।
गावो हि सुमहत्तेजः प्राणिनां च सुखप्रदाः ॥ ३१
निविष्टं गोकुलं यत्र श्वासं मुञ्चति निर्भयम् ।
विराजयति तं देशं पाप्मानं चापकर्षति ॥ ३२
गावः स्वर्गस्य सोपानं गावः स्वर्गेऽपि पूजिताः ।
गावः कामदुघा देव्यो नान्यत्किंचित्परं स्मृतम् ॥
इत्येतद्गोषु मे प्रोक्तं माहात्म्यं पार्थिवर्षभ ।
गुणैकदेशवचनं शक्यं पारायणं न तु ॥ ३४

निषादा ऊचुः ।

दर्शनं कथनं चैव सहास्माभिः कृतं मुने ।
सतां सप्तपदं मित्रं प्रसादं नः कुरु प्रभो ॥ ३५
हवींषि सर्वाणि यथा ह्युपभुङ्क्ते हुताशनः ।
एवं त्वमपि धर्मात्मन्पुरुषाग्निः प्रतापवान् ॥ ३६
प्रसादयामहे विद्वन्भवन्तं प्रणता वयम् ।
अनुग्रहार्थमस्माकमियं गौः प्रतिगृह्यताम् ॥ ३७

च्यवन उवाच ।

कृपणस्य च यच्चक्षुर्मुनेराशीविषस्य च ।
नरं समूलं दहति कक्षमग्निरिव ज्वलन् ॥ ३८
प्रतिगृह्णामि वो धेनुं कैवर्ता मुक्तकिल्बिषाः ।
दिवं गच्छत वै क्षिप्रं मत्स्यैर्जालोद्धृतैः सह ॥ ३९

भीष्म उवाच ।

ततस्तस्य प्रसादात्ते महर्षेर्भावितात्मनः ।
निषादास्तेन वाक्येन सह मत्स्यैर्दिवं ययुः ॥ ४०
ततः स राजा नहुषो विस्मितः प्रेक्ष्य धीवरान् ।
आरोहमाणांस्त्रिदिवं मत्स्यांश्च भरतर्षभ ॥ ४१
ततस्तौ गविजश्चैव च्यवनश्च भृगूद्वहः ।
वराभ्यामनुरूपाभ्यां छन्दयामासतुर्नृपम् ॥ ४२
ततो राजा महावीर्यो नहुषः पृथिवीपतिः ।
परमित्यब्रवीत्प्रीतस्तदा भरतसत्तम ॥ ४३
ततो जग्राह धर्मे स स्थितिमिन्द्रनिभो नृपः ।
तथेति चोदितः प्रीतस्तावृषी प्रत्यपूजयत् ॥ ४४
समाप्तदीक्षश्च्यवनस्ततोऽगच्छत्स्वमाश्रमम् ।
गविजश्च महातेजाः स्वमाश्रमपदं ययौ ॥ ४५
निषादाश्च दिवं जग्मुस्ते च मत्स्या जनाधिप ।
नहुषोऽपि वरं लब्ध्वा प्रविवेश पुरं स्वकम् ॥ ४६
एतत्ते कथितं तात यन्मां त्वं परिपृच्छसि ।
दर्शने यादृशः स्नेहः संवासे च युधिष्ठिर ॥ ४७
महाभाग्यं गवां चैव तथा धर्मविनिश्चयम् ।
किं भूयः कथ्यतां वीर किं ते हृदि विवक्षितम् ॥

इति श्रीमहाभारते अनुशासनपर्वणि
एकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

५२

युधिष्ठिर उवाच ।

संशयो मे महाप्राज्ञ सुमहान्सागरोपमः ।
तन्मे शृणु महाबाहो श्रुत्वा चाख्यातुमर्हसि ॥ १

कौतूहलं मे सुमहज्जामदग्न्यं प्रति प्रभो ।
रामं धर्मभृतां श्रेष्ठं तन्मे व्याख्यातुमर्हसि ॥ २
कथमेष समुत्पन्नो रामः सत्यपराक्रमः ।
कथं ब्रह्मर्षिवंशे च क्षत्रधर्मा व्यजायत ॥ ३
तदस्य संभवं राजन्निखिलेनानुकीर्तय ।
कौशिकाच्च कथं वंशात्क्षत्राद्वै ब्राह्मणोऽभवत् ॥ ४
अहो प्रभावः सुमहानासीद्वै सुमहात्मनोः ।
रामस्य च नरव्याघ्र विश्वामित्रस्य चैव ह ॥ ५
कथं पुत्रानतिक्रम्य तेषां नप्तृष्वथाभवत् ।
एष दोषः सुतान्हित्वा तन्मे व्याख्यातुमर्हसि ॥ ६

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
च्यवनस्य च संवादं कुशिकस्य च भारत ॥ ७
एतं दोषं पुरा दृष्ट्वा भार्गवश्च्यवनस्तदा ।
आगामिनं महाबुद्धिः स्ववंशे मुनिपुंगवः ॥ ८
संचिन्त्य मनसा सर्वं गुणदोषबलाबलम् ।
दग्धुकामः कुलं सर्वं कुशिकानां तपोधनः ॥ ९
च्यवनस्तमनुप्राप्य कुशिकं वाक्यमब्रवीत् ।
वस्तुमिच्छा समुत्पन्ना त्वया सह ममानघ ॥ १०

कुशिक उवाच ।

भगवन्सहधर्मोऽयं पण्डितैरिह धार्यते ।
प्रदानकाले कन्यानामुच्यते च सदा बुधैः ॥ ११
यत्तु तावदतिक्रान्तं धर्मद्वारं तपोधन ।
तत्कार्यं प्रकरिष्यामि तदनुज्ञातुमर्हसि ॥ १२

भीष्म उवाच ।

अथासनमुपादाय च्यवनस्य महामुनेः ।
कुशिको भार्यया सार्धमाजगाम यतो मुनिः ॥ १३
प्रगृह्य राजा भृङ्गारं पाद्यमस्मै न्यवेदयत् ।
कारयामास सर्वाश्च क्रियास्तस्य महात्मनः ॥ १४
ततः स राजा च्यवनं मधुपर्कं यथाविधि ।
प्रत्यग्राहयदव्यग्रो महात्मा नियतव्रतः ॥ १५
सत्कृत्य स तथा विप्रमिदं वचनमब्रवीत् ।
भगवन्परवन्तौ स्वो ब्रूहि किं करवावहे ॥ १६
यदि राज्यं यदि धनं यदि गाः संशितव्रत ।
यज्ञदानानि च तथा ब्रूहि सर्वं ददामि ते ॥ १७
इदं गृहमिदं राज्यमिदं धर्मासनं च ते ।
राजा त्वमसि शाध्युर्वीं भृत्योऽहं परवांस्त्वयि ॥१८
एवमुक्ते ततो वाक्ये च्यवनो भार्गवस्तदा ।
कुशिकं प्रत्युवाचेदं मुदा परमया युतः ॥ १९
न राज्यं कामये राजन्न धनं न च योषितः ।
न च गा न च ते देशान्न यज्ञाञ्श्रूयतामिदम् ॥२०
नियमं कंचिदारप्स्ये युवयोर्यदि रोचते ।
परिचर्योऽस्मि यत्ताभ्यां युवाभ्यामविशङ्कया ॥२१
एवमुक्ते तदा तेन दंपती तौ जहर्षतुः ।
प्रत्यब्रूतां च तमृषिमेवमस्त्विति भारत ॥ २२
अथ तं कुशिको हृष्टः प्रावेशयदनुत्तमम् ।
गृहोद्देशं ततस्तत्र दर्शनीयमदर्शयत् ॥ २३
इयं शय्या भगवतो यथाकाममिहोष्यताम् ।
प्रयतिष्यावहे प्रीतिमाहर्तुं ते तपोधन ॥ २४
अथ सूर्योऽतिचक्राम तेषां संवदतां तथा ।
अथर्षिश्चोदयामास पानमन्नं तथैव च ॥ २५
तमपृच्छत्ततो राजा कुशिकः प्रणतस्तदा ।
किमन्नजातमिष्टं ते किमुपस्थापयाम्यहम् ॥ २६
ततः स परया प्रीत्या प्रत्युवाच जनाधिपम् ।
औपपत्तिकमाहारं प्रयच्छस्वेति भारत ॥ २७
तद्वचः पूजयित्वा तु तथेत्याह स पार्थिवः ।
यथोपपन्नं चाहारं तस्मै प्रादाज्जनाधिपः ॥ २८
ततः स भगवान्भुक्त्वा दंपती प्राह धर्मवित् ।
स्वप्तुमिच्छाम्यहं निद्रा बाधते मामिति प्रभो ॥२९
ततः शय्यागृहं प्राप्य भगवानृषिसत्तमः ।

संविवेश नरेन्द्रस्तु सपत्नीकः स्थितोऽभवत् ॥ ३०
न प्रबोध्योऽस्मि संसुप्त इत्युवाचाथ भार्गवः ।
संवाहितव्यौ पादौ मे जागर्तव्यं च वां निशि ॥ ३१
अविशङ्कश्च कुशिकस्तथेत्याह स धर्मवित् ।
न प्रबोधयतां तं च तौ तदा रजनीक्षये ॥ ३२
यथादेशं महर्षेस्तु शुश्रूषापरमौ तदा ।
बभूवतुर्महाराज प्रयतावथ दंपती ॥ ३३
ततः स भगवान्विप्रः समादिश्य नराधिपम् ।
सुष्वापैकेन पार्श्वेन दिवसानेकविंशतिम् ॥ ३४
स तु राजा निराहारः सभार्यः कुरुनन्दन ।
पर्युपासत तं हृष्टश्च्यवनाराधने रतः ॥ ३५
भार्गवस्तु समुत्तस्थौ स्वयमेव तपोधनः ।
अकिंचिदुक्त्वा तु गृहान्निश्चक्राम महातपाः ॥ ३६
तमन्वगच्छतां तौ तु क्षुधितौ श्रमकर्शितौ ।
भार्यापती मुनिश्रेष्ठो न च ताववलोकयत् ॥ ३७
तयोस्तु प्रेक्षतोरेव भार्गवाणां कुलोद्वहः ।
अन्तर्हितोऽभूद्राजेन्द्र ततो राजापतत्क्षितौ ॥ ३८
स मुहूर्तं समाश्वस्य सह देव्या महाद्युतिः ।
पुनरन्वेषणे यत्नमकरोत्परमं तदा ॥ ३९

इति श्रीमहाभारते अनुशासनपर्वणि
द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥

५३

युधिष्ठिर उवाच ।

तस्मिन्नन्तर्हिते विप्रे राजा किमकरोत्तदा ।
भार्या चास्य महाभागा तन्मे ब्रूहि पितामह ॥ १

भीष्म उवाच ।

अदृष्ट्वा स महीपालस्तमृषिं सह भार्यया ।
परिश्रान्तो निववृते व्रीडितो नष्टचेतनः ॥ २
स प्रविश्य पुरीं दीनो नाभ्यभाषत किंचन ।
तदेव चिन्तयामास च्यवनस्य विचेष्टितम् ॥ ३
अथ शून्येन मनसा प्रविवेश गृहं नृपः ।
ददर्श शयने तस्मिञ्शयानं भृगुनन्दनम् ॥ ४
विस्मितौ तौ तु दृष्ट्वा तं तदाश्चर्यं विचिन्त्य च ।
दर्शनात्तस्य च मुनेर्विश्रान्तौ संबभूवतुः ॥ ५
यथास्थानं तु तौ स्थित्वा भूयस्तं संववाहतुः ।
अथापरेण पार्श्वेन सुष्वाप स महामुनिः ॥ ६
तेनैव च स कालेन प्रत्यबुध्यत वीर्यवान् ।
न च तौ चक्रतुः किंचिद्विकारं भयशङ्कितौ ॥ ७
प्रतिबुद्धस्तु स मुनिस्तौ प्रोवाच विशां पते ।
तैलाभ्यङ्गो दीयतां मे स्नास्येऽहमिति भारत ॥ ८
तथेति तौ प्रतिश्रुत्य क्षुधितौ श्रमकर्शितौ ।
शतपाकेन तैलेन महार्हेणोपतस्थतुः ॥ ९
ततः सुखासीनमृषिं वाग्यतौ संववाहतुः ।
न च पर्याप्तमित्याह भार्गवः सुमहातपाः ॥ १०
यदा तौ निर्विकारौ तु लक्षयामास भार्गवः ।
तत उत्थाय सहसा स्नानशालां विवेश ह ।
क्लृप्तमेव तु तत्रासीत्स्नानीयं पार्थिवोचितम् ॥ ११
असत्कृत्य तु तत्सर्वं तत्रैवान्तरधीयत ।
स मुनिः पुनरेवाथ नृपतेः पश्यतस्तदा ।
नासूयां चक्रतुस्तौ च दंपती भरतर्षभ ॥ १२
अथ स्नातः स भगवान्सिंहासनगतः प्रभुः ।
दर्शयामास कुशिकं सभार्यं भृगुनन्दनः ॥ १३
संहृष्टवदनो राजा सभार्यः कुशिको मुनिम् ।
सिद्धमन्नमिति प्रह्वो निर्विकारो न्यवेदयत् ॥ १४
आनीयतामिति मुनिस्तं चोवाच नराधिपम् ।
राजा च समुपाजह्रे तदन्नं सह भार्यया ॥ १५
मांसप्रकारान्विविधाञ्शाकानि विविधानि च ।
वेसवारविकारांश्च पानकानि लघूनि च ॥ १६
रसालापूपकांश्चित्रान्मोदकानथ षाडवान् ।
रसान्नानाप्रकारांश्च वन्यं च मुनिभोजनम् ॥ १७

फलानि च विचित्राणि तथा भोज्यानि भूरिशः ।
बदरेङ्गुदकाश्मर्यभल्लातकवटानि च ॥ १८
गृहस्थानां च यद्भोज्यं यच्चापि वनवासिनाम् ।
सर्वमाहारयामास राजा शापभयान्मुनेः ॥ १९
अथ सर्वमुपन्यस्तमग्रतश्च्यवनस्य तत् ।
ततः सर्वं समानीय तच्च शय्यासनं मुनिः ॥ २०
वस्त्रैः शुभैरवच्छाद्य भोजनोपस्करैः सह ।
सर्वमादीपयामास च्यवनो भृगुनन्दनः ॥ २१
न च तौ चक्रतुः कोपं दंपती सुमहाव्रतौ ।
तयोः संप्रेक्षतोरेव पुनरन्तर्हितोऽभवत् ॥ २२
तत्रैव च स राजर्षिस्तस्थौ तां रजनीं तदा ।
सभार्यो वाग्यतः श्रीमान्न च तं कोप आविशत् ॥
नित्यं संस्कृतमन्नं तु विविधं राजवेश्मनि ।
शयनानि च मुख्यानि परिषेकाश्च पुष्कलाः ॥ २४
वस्त्रं च विविधाकारमभवत्समुपार्जितम् ।
न शशाक ततो द्रष्टुमन्तरं च्यवनस्तदा ॥ २५
पुनरेव च विप्रर्षिः प्रोवाच कुशिकं नृपम् ।
सभार्यो मां रथेनाशु वह यत्र ब्रवीम्यहम् ॥ २६
तथेति च प्राह नृपो निर्विशङ्कस्तपोधनम् ।
क्रीडारथोऽस्तु भगवन्नुत सांग्रामिको रथः ॥ २७
इत्युक्तः स मुनिस्तेन राज्ञा हृष्टेन तद्वचः ।
च्यवनः प्रत्युवाचेदं हृष्टः परपुरंजयम् ॥ २८
सज्जीकुरु रथं क्षिप्रं यस्ते सांग्रामिको मतः ।
सायुधः सपताकश्च सशक्तिः कणयष्टिमान् ॥ २९
किङ्किणीशतनिर्घोषो युक्तस्तोमरकल्पनैः ।
गदाखड्गनिबद्धश्च परमेषुशतान्वितः ॥ ३०
ततः स तं तथेत्युक्त्वा कल्पयित्वा महारथम् ।
भार्यां वामे धुरि तदा चात्मानं दक्षिणे तथा ॥३१
त्रिदंष्ट्रं वज्रसूच्यग्रं प्रतोदं तत्र चादधत् ।
सर्वमेतत्ततो दत्त्वा नृपो वाक्यमथाब्रवीत् ॥ ३२
भगवन्क्व रथो यातु ब्रवीतु भृगुनन्दनः ।
यत्र वक्ष्यसि विप्रर्षे तत्र यास्यति ते रथः ॥ ३३
एवमुक्तस्तु भगवान्प्रत्युवाचाथ तं नृपम् ।
इतःप्रभृति यातव्यं पदकं पदकं शनैः ॥ ३४
श्रमो मम यथा न स्यात्तथा मे छन्दचारिणौ ।
सुखं चैवास्मि वोढव्यो जनः सर्वश्च पश्यतु ॥३५
नोत्सार्यः पथिकः कश्चित्तेभ्यो दास्याम्यहं वसु ।
ब्राह्मणेभ्यश्च ये कामानर्थयिष्यन्ति मां पथि ॥३६
सर्वं दास्याम्यशेषेण धनं रत्नानि चैव हि ।
क्रियतां निखिलेनैतन्मा विचारय पार्थिव ॥ ३७
तस्य तद्वचनं श्रुत्वा राजा भृत्यानथाब्रवीत् ।
यद्यद्ब्रूयान्मुनिस्तत्तत्सर्वं देयमशङ्कितैः ॥ ३८
ततो रत्नान्यनेकानि स्त्रियो युग्यमजाविकम् ।
कृताकृतं च कनकं गजेन्द्राश्चाचलोपमाः ॥ ३९
अन्वगच्छन्त तमृषिं राजामात्याश्च सर्वशः ।
हाहाभूतं च तत्सर्वमासीन्नगरमार्तिमत् ॥ ४०
तौ तीक्ष्णाग्रेण सहसा प्रतोदेन प्रचोदितौ ।
पृष्ठे विद्धौ कटे चैव निर्विकारौ तमूहतुः ॥ ४१
वेपमानौ निराहारौ पञ्चाशद्रात्रकर्शितौ ।
कथंचिदूहतुर्वीरौ दंपती तं रथोत्तमम् ॥ ४२
बहुशो भृशविद्धौ तौ क्षरमाणौ क्षतोद्भवम् ।
ददृशाते महाराज पुष्पिताविव किंशुकौ ॥ ४३
तौ दृष्ट्वा पौरवर्गस्तु भृशं शोकपरायणः ।
अभिशापभयात्त्रस्तो न च किंचिदुवाच ह ॥ ४४
द्वन्द्वशश्चाब्रुवन्सर्वे पश्यध्वं तपसो बलम् ।
क्रुद्धा अपि मुनिश्रेष्ठं वीक्षितुं नैव शक्नुमः ॥ ४५
अहो भगवतो वीर्यं महर्षेर्भावितात्मनः ।
राज्ञश्चापि सभार्यस्य धैर्यं पश्यत यादृशम् ॥ ४६
श्रान्तावपि हि कृच्छ्रेण रथमेतं समूहतुः ।
न चैतयोर्विकारं वै ददर्श भृगुनन्दनः ॥ ४७

भीष्म उवाच ।

ततः स निर्विकारौ तौ दृष्ट्वा भृगुकुलोद्वहः ।
वसु विश्राणयामास यथा वैश्रवणस्तथा ॥ ४८
तत्रापि राजा प्रीतात्मा यथाज्ञप्तमथाकरोत् ।
ततोऽस्य भगवान्प्रीतो बभूव मुनिसत्तमः ॥ ४९
अवतीर्य रथश्रेष्ठाद्दंपती तौ मुमोच ह ।
विमोच्य चैतौ विधिवत्ततो वाक्यमुवाच ह ॥ ५०
स्निग्धगम्भीरया वाचा भार्गवः सुप्रसन्नया ।
ददानि वां वरं श्रेष्ठं तद्ब्रूतामिति भारत ॥ ५१
सुकुमारौ च तौ विद्वान्कराभ्यां मुनिसत्तमः ।
पस्पर्शामृतकल्पाभ्यां स्नेहाद्भरतसत्तम ॥ ५२
अथाब्रवीन्नृपो वाक्यं श्रमो नास्त्यावयोरिह ।
विश्रान्तौ स्वः प्रभावात्ते ध्यानेनैवेति भार्गव ॥ ५३
अथ तौ भगवान्प्राह प्रहृष्टश्च्यवनस्तदा ।
न वृथा व्याहृतं पूर्वं यन्मया तद्भविष्यति ॥ ५४
रमणीयः समुद्देशो गङ्गातीरमिदं शुभम् ।
कंचित्कालं व्रतपरो निवत्स्यामीह पार्थिव ॥ ५५
गम्यतां स्वपुरं पुत्र विश्रान्तः पुनरेष्यसि ।
इहस्थं मां सभार्यस्त्वं द्रष्टासि श्वो नराधिप ॥ ५६
न च मन्युस्त्वया कार्यः श्रेयस्ते समुपस्थितम् ।
यत्काङ्क्षितं हृदिस्थं ते तत्सर्वं संभविष्यति ॥ ५७
इत्येवमुक्तः कुशिकः प्रहृष्टेनान्तरात्मना ।
प्रोवाच मुनिशार्दूलमिदं वचनमर्थवत् ॥ ५८
न मे मन्युर्महाभाग पूतोऽस्मि भगवंस्त्वया ।
संवृत्तौ यौवनस्थौ स्वो वपुष्मन्तौ बलान्वितौ ॥ ५९
प्रतोदेन व्रणा ये मे सभार्यस्य कृतास्त्वया ।
तान्न पश्यामि गात्रेषु स्वस्थोऽस्मि सह भार्यया ॥
इमां च देवीं पश्यामि मुने दिव्याप्सरोपमाम् ।
श्रिया परमया युक्तां यथादृष्टां मया पुरा ॥ ६१
तव प्रसादात्संवृत्तमिदं सर्वं महामुने ।
नैतच्चित्रं तु भगवंस्त्वयि सत्यपराक्रम ॥ ६२
इत्युक्तः प्रत्युवाचेदं च्यवनः कुशिकं तदा ।
आगच्छेथाः सभार्यश्च त्वमिहेति नराधिप ॥ ६३
इत्युक्तः समनुज्ञातो राजर्षिरभिवाद्य तम् ।
प्रययौ वपुषा युक्तो नगरं देवराजवत् ॥ ६४
तत एनमुपाजग्मुरमात्याः सपुरोहिताः ।
बलस्था गणिकायुक्ताः सर्वाः प्रकृतयस्तथा ॥ ६५
तैर्वृतः कुशिको राजा श्रिया परमया ज्वलन् ।
प्रविवेश पुरं हृष्टः पूज्यमानोऽथ बन्दिभिः ॥ ६६
ततः प्रविश्य नगरं कृत्वा सर्वाह्णिकक्रियाः ।
भुक्त्वा सभार्यो रजनीमुवास स महीपतिः ॥ ६७

ततस्तु तौ नवमभिवीक्ष्य यौवनं
परस्परं विगतजराविवामरौ ।
ननन्दतुः शयनगतौ वपुर्धरौ
श्रिया युतौ द्विजवरदत्तया तया ॥ ६८
स चाप्यृषिर्भृगुकुलकीर्तिवर्धन-
स्तपोधनो वनमभिराममृद्धिमत् ।
मनीषया बहुविधरत्नभूषितं
ससर्ज यन्नास्ति शतक्रतोरपि ॥ ६९

इति श्रीमहाभारते अनुशासनपर्वणि
त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥

५४

भीष्म उवाच ।

ततः स राजा रात्र्यन्ते प्रतिबुद्धो महामनाः ।
कृतपूर्वाह्णिकः प्रायात्सभार्यस्तद्वनं प्रति ॥ १
ततो ददर्श नृपतिः प्रासादं सर्वकाञ्चनम् ।
मणिस्तम्भसहस्राढ्यं गन्धर्वनगरोपमम् ।
तत्र दिव्यानभिप्रायान्ददर्श कुशिकस्तदा ॥ २
पर्वतान्रम्यसानूंश्च नलिनीश्च सपङ्कजाः ।
चित्रशालाश्च विविधास्तोरणानि च भारत ।

शाद्वलोपचितां भूमिं तथा काञ्चनकुट्टिमाम् ॥ ३
सहकारान्प्रफुल्लांश्च केतकोद्दालकान्धवान् ।
अशोकान्मुचुकुन्दांश्च फुल्लांश्चैवातिमुक्तकान् ॥ ४
चम्पकांस्तिलकान्भव्यान्पनसान्वञ्जुलानपि ।
पुष्पितान्कर्णिकारांश्च तत्र तत्र ददर्श ह ॥ ५
श्यामां वारणपुष्पीं च तथाष्टापदिकां लताम् ।
तत्र तत्र परिक्लृप्ता ददर्श स महीपतिः ॥ ६
वृक्षान्पद्मोत्पलधरान्सर्वर्तुकुसुमांस्तथा ।
विमानच्छन्दकांश्चापि प्रासादान्पद्मसंनिभान् ॥ ७
शीतलानि च तोयानि क्वचिदुष्णानि भारत ।
आसनानि विचित्राणि शयनप्रवराणि च ॥ ८
पर्यङ्कान्सर्वसौवर्णान्परार्ध्यास्तरणास्तृतान् ।
भक्ष्यभोज्यमनन्तं च तत्र तत्रोपकल्पितम् ॥ ९
वाणीवादाञ्छुकांश्चापि शारिकाभृङ्गराजकान् ।
कोकिलाञ्छतपत्रांश्च कोयष्टिमककुक्कुटान् ॥ १०
मयूरान्कुक्कुटांश्चापि पुत्रकाञ्जीवजीवकान् ।
चकोरान्वानरान्हंसान्सारसांश्चक्रसाह्वयान् ॥ ११
समन्ततः प्रणदितान्ददर्श सुमनोहरान् ।
क्वचिदप्सरसां संघान्गन्धर्वाणां च पार्थिव ॥ १२
कान्ताभिरपरांस्तत्र परिष्वक्तान्ददर्श ह ।
न ददर्श च तान्भूयो ददर्श च पुनर्नृपः ॥ १३
गीतध्वनिं सुमधुरं तथैवाध्ययनध्वनिम् ।
हंसान्सुमधुरांश्चापि तत्र शुश्राव पार्थिवः ॥ १४
तं दृष्ट्वात्यद्भुतं राजा मनसाचिन्तयत्तदा ।
स्वप्नोऽयं चित्तविभ्रंश उताहो सत्यमेव तु ॥ १५
अहो सह शरीरेण प्राप्तोऽस्मि परमां गतिम् ।
उत्तरान्वा कुरून्पुण्यानथ वाप्यमरावतीम् ॥ १६
किं त्विदं महदाश्चर्यं संपश्यामीत्यचिन्तयत् ।
एवं संचिन्तयन्नेव ददर्श मुनिपुंगवम् ॥ १७
तस्मिन्विमाने सौवर्णे मणिस्तम्भसमाकुले ।
महार्हे शयने दिव्ये शयानं भृगुनन्दनम् ॥ १८
तमभ्ययात्प्रहर्षेण नरेन्द्रः सह भार्यया ।
अन्तर्हितस्ततो भूयश्च्यवनः शयनं च तत् ॥ १९
ततोऽन्यस्मिन्वनोद्देशे पुनरेव ददर्श तम् ।
कौश्यां बृस्यां समासीनं जपमानं महाव्रतम् ।
एवं योगबलाद्विप्रो मोहयामास पार्थिवम् ॥ २०
क्षणेन तद्वनं चैव ते चैवाप्सरसां गणाः ।
गन्धर्वाः पादपाश्चैव सर्वमन्तरधीयत ॥ २१
निःशब्दमभवच्चापि गङ्गाकूलं पुनर्नृप ।
कुशवल्मीकभूयिष्ठं बभूव च यथा पुरा ॥ २२
ततः स राजा कुशिकः सभार्यस्तेन कर्मणा ।
विस्मयं परमं प्राप्तस्तद्दृष्ट्वा महदद्भुतम् ॥ २३
ततः प्रोवाच कुशिको भार्यां हर्षसमन्वितः ।
पश्य भद्रे यथा भावाश्चित्रा दृष्टाः सुदुर्लभाः ॥२४
प्रसादाद्भृगुमुख्यस्य किमन्यत्र तपोबलात् ।
तपसा तदवाप्यं हि यन्न शक्यं मनोरथैः ॥ २५
त्रैलोक्यराज्यादपि हि तप एव विशिष्यते ।
तपसा हि सुतप्तेन क्रीडत्येष तपोधनः ॥ २६
अहो प्रभावो ब्रह्मर्षेश्च्यवनस्य महात्मनः ।
इच्छन्नेष तपोवीर्यादन्याँल्लोकान्सृजेदपि ॥ २७
ब्राह्मणा एव जायेरन्पुण्यवाग्बुद्धिकर्मणः ।
उत्सहेदिह कर्तुं हि कोऽन्यो वै च्यवनादृते ॥ २८
ब्राह्मण्यं दुर्लभं लोके राज्यं हि सुलभं नरैः ।
ब्राह्मणस्य प्रभावाद्धि रथे युक्तौ स्वधुर्यवत् ॥ २९
इत्येवं चिन्तयानः स विदितश्च्यवनस्य वै ।
संप्रेक्ष्योवाच स नृपं क्षिप्रमागम्यतामिति ॥ ३०
इत्युक्तः सहभार्यस्तमभ्यगच्छन्महामुनिम् ।
शिरसा वन्दनीयं तमवन्दत स पार्थिवः ॥ ३१
तस्याशिषः प्रयुज्याथ स मुनिस्तं नराधिपम् ।
निषीदेत्यब्रवीद्धीमान्सान्त्वयन्पुरुषर्षभ ॥ ३२

ततः प्रकृतिमापन्नो भार्गवो नृपते नृपम् ।
उवाच श्लक्ष्णया वाचा तर्पयन्निव भारत ।। ३३
राजन्सम्यग्जितानीह पञ्च पञ्चसु यत्त्वया ।
मनःषष्ठानीन्द्रियाणि कृच्छ्रान्मुक्तोऽसि तेन वै ।।
सम्यगाराधितः पुत्र त्वयाहं वदतां वर ।
न हि ते वृजिनं किंचित्सुसूक्ष्ममपि विद्यते ।। ३५
अनुजानीहि मां राजन्गमिष्यामि यथागतम् ।
प्रीतोऽस्मि तव राजेन्द्र वरश्च प्रतिगृह्यताम् ।। ३६

कुशिक उवाच ।

अग्निमध्यगतेनेदं भगवन्संनिधौ मया ।
वर्तितं भृगुशार्दूल यन्न दग्धोऽस्मि तद्बहु ।। ३७
एष एव वरो मुख्यः प्राप्तो मे भृगुनन्दन ।
यत्प्रीतोऽसि समाचारात्कुलं पूतं ममानघ ।। ३८
एष मेऽनुग्रहो विप्र जीविते च प्रयोजनम् ।
एतद्राज्यफलं चैव तपश्चैतत्परं मम ।। ३९
यदि तु प्रीतिमान्विप्र मयि त्वं भृगुनन्दन ।
अस्ति मे संशयः कश्चित्तन्मे व्याख्यातुमर्हसि ।।

इति श्रीमहाभारते अनुशासनपर्वणि
चतुष्पञ्चाशत्तमोऽध्यायः ।। ५४ ।।

५५

च्यवन उवाच ।

वरश्च गृह्यतां मत्तो यश्च ते संशयो हृदि ।
तं च ब्रूहि नरश्रेष्ठ सर्वं संपादयामि ते ।। १

कुशिक उवाच ।

यदि प्रीतोऽसि भगवंस्ततो मे वद भार्गव ।
कारणं श्रोतुमिच्छामि मद्गृहे वासकारितम् ।। २
शयनं चैकपार्श्वेन दिवसानेकविंशतिम् ।
अकिंचिदुक्त्वा गमनं बहिश्च मुनिपुंगव ।। ३
अन्तर्धानमकस्माच्च पुनरेव च दर्शनम् ।
पुनश्च शयनं विप्र दिवसानेकविंशतिम् ।। ४
तैलाभ्यक्तस्य गमनं भोजनं च गृहे मम ।
समुपानीय विविधं यद्दग्धं जातवेदसा ।
निर्याणं च रथेनाशु सहसा यत्कृतं त्वया ।। ५
धनानां च विसर्गस्य वनस्यापि च दर्शनम् ।
प्रासादानां बहूनां च काञ्चनानां महामुने ।। ६
मणिविद्रुमपादानां पर्यङ्कानां च दर्शनम् ।
पुनश्चादर्शनं तस्य श्रोतुमिच्छामि कारणम् ।। ७
अतीव ह्यत्र मुह्यामि चिन्तयानो दिवानिशम् ।
न चैवात्राधिगच्छामि सर्वस्यास्य विनिश्चयम् ।
एतदिच्छामि कार्त्स्न्येन सत्यं श्रोतुं तपोधन ।। ८

च्यवन उवाच ।

शृणु सर्वमशेषेण यदिदं येन हेतुना ।
न हि शक्यमनाख्यातुमेवं पृष्टेन पार्थिव ।। ९
पितामहस्य वदतः पुरा देवसमागमे ।
श्रुतवानस्मि यद्राजंस्तन्मे निगदतः शृणु ।। १०
ब्रह्मक्षत्रविरोधेन भविता कुलसंकरः ।
पौत्रस्ते भविता राजंस्तेजोवीर्यसमन्वितः ।। ११
ततः स्वकुलरक्षार्थमहं त्वा समुपागमम् ।
चिकीर्षन्कुशिकोच्छेदं संदिधक्षुः कुलं तव ।। १२
ततोऽहमागम्य पुरा त्वामवोचं महीपते ।
नियमं कंचिदारप्स्ये शुश्रूषा क्रियतामिति ।। १३
न च ते दुष्कृतं किंचिदहमासादयं गृहे ।
तेन जीवसि राजर्षे न भवेथास्ततोऽन्यथा ।। १४
एतां बुद्धिं समास्थाय दिवसानेकविंशतिम् ।
सुप्तोऽस्मि यदि मां कश्चिद्बोधयेदिति पार्थिव ।।१५
यदा त्वया सभार्येण संसुप्तो न प्रबोधितः ।
अहं तदैव ते प्रीतो मनसा राजसत्तम ।। १६
उत्थाय चास्मि निष्क्रान्तो यदि मां त्वं महीपते ।
पृच्छेः क यास्यसीत्येवं शपेयं त्वामिति प्रभो ।।
अन्तर्हितश्चास्मि पुनः पुनरेव च ते गृहे ।

योगमास्थाय संविष्टो दिवसानेकविंशतिम् ॥ १८
क्षुधितो मामसूयेथाः श्रमाद्वेति नराधिप ।
एतां बुद्धिं समास्थाय कर्शितौ वां मया क्षुधा ॥१९
न च तेऽभूत्सुसूक्ष्मोऽपि मन्युर्मनसि पार्थिव ।
सभार्यस्य नरश्रेष्ठ तेन ते प्रीतिमानहम् ॥ २०
भोजनं च समानाय्य यत्तदादीपितं मया ।
क्रुध्येथा यदि मात्सर्यादिति तन्मर्षितं च ते ॥२१
ततोऽहं रथमारुह्य त्वामवोचं नराधिप ।
सभार्यो मां वहस्वेति तच्च त्वं कृतवांस्तथा ॥ २२
अविशङ्को नरपते प्रीतोऽहं चापि तेन ते ।
धनोत्सर्गेऽपि च कृते न त्वां क्रोधः प्रधर्षयत् ॥
ततः प्रीतेन ते राजन्पुनरेतत्कृतं तव ।
सभार्यस्य वनं भूयस्तद्विद्धि मनुजाधिप ॥ २४
प्रीत्यर्थं तव चैतन्मे स्वर्गसंदर्शनं कृतम् ।
यत्ते वनेऽस्मिन्नृपते दृष्टं दिव्यं निदर्शनम् ॥ २५
स्वर्गोद्देशस्त्वया राजन्सशरीरेण पार्थिव ।
मुहूर्तमनुभूतोऽसौ सभार्येण नृपोत्तम ॥ २६
निदर्शनार्थं तपसो धर्मस्य च नराधिप ।
तत्र यासीत्स्पृहा राजंस्तच्चापि विदितं मम ॥ २७
ब्राह्मण्यं काङ्क्षसे हि त्वं तपश्च पृथिवीपते ।
अवमन्य नरेन्द्रत्वं देवेन्द्रत्वं च पार्थिव ॥ २८
एवमेतद्यथात्थ त्वं ब्राह्मण्यं तात दुर्लभम् ।
ब्राह्मण्ये सति चर्षित्वमृषित्वे च तपस्विता ॥ २९
भविष्यत्येष ते कामः कुशिकात्कौशिको द्विजः ।
तृतीयं पुरुषं प्राप्य ब्राह्मणत्वं गमिष्यति ॥ ३०
वंशस्ते पार्थिवश्रेष्ठ भृगूणामेव तेजसा ।
पौत्रस्ते भविता विप्र तपस्वी पावकद्युतिः ॥ ३१
यः स देवमनुष्याणां भयमुत्पादयिष्यति ।
त्रयाणां चैव लोकानां सत्यमेतद्ब्रवीमि ते ॥ ३२
वरं गृहाण राजर्षे यस्ते मनसि वर्तते ।
तीर्थयात्रां गमिष्यामि पुरा कालोऽतिवर्तते ॥ ३३

कुशिक उवाच ।

एष एव वरो मेऽद्य यत्त्वं प्रीतो महामुने ।
भवत्वेतद्यथात्थ त्वं तपः पौत्रे ममानघ ।
ब्राह्मण्यं मे कुलस्यास्तु भगवन्नेष मे वरः ॥ ३४
पुनश्चाख्यातुमिच्छामि भगवन्विस्तरेण वै ।
कथमेष्यति विप्रत्वं कुलं मे भृगुनन्दन ।
कश्चासौ भविता बन्धुर्मम कश्चापि संमतः ॥ ३५

इति श्रीमहाभारते अनुशासनपर्वणि
पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥

५६

च्यवन उवाच ।

अवश्यं कथनीयं मे तवैतन्नरपुंगव ।
यदर्थं त्वाहमुच्छेत्तुं संप्राप्तो मनुजाधिप ॥ १
भृगूणां क्षत्रिया याज्या नित्यमेव जनाधिप ।
ते च भेदं गमिष्यन्ति दैवयुक्तेन हेतुना ॥ २
क्षत्रियाश्च भृगून्सर्वान्वधिष्यन्ति नराधिप ।
आ गर्भादनुकृन्तन्तो दैवदण्डनिपीडिताः ॥ ३
तत उत्पत्स्यतेऽस्माकं कुले गोत्रविवर्धनः ।
और्वो नाम महातेजा ज्वलनार्कसमद्युतिः ॥ ४
स त्रैलोक्यविनाशाय कोपाग्निं जनयिष्यति ।
महीं सपर्वतवनां यः करिष्यति भस्मसात् ॥ ५
कंचित्कालं तु तं वह्निं स एव शमयिष्यति ।
समुद्रे वडवावक्त्रे प्रक्षिप्य मुनिसत्तमः ॥ ६
पुत्रं तस्य महाभागमृचीकं भृगुनन्दनम् ।
साक्षात्कृत्स्नो धनुर्वेदः समुपस्थास्यतेऽनघ ॥ ७
क्षत्रियाणामभावाय दैवयुक्तेन हेतुना ।
स तु तं प्रतिगृह्यैव पुत्रे संक्रामयिष्यति ॥ ८
जमदग्नौ महाभागे तपसा भावितात्मनि ।
स चापि भृगुशार्दूलस्तं वेदं धारयिष्यति ॥ ९

कुलात्तु तव धर्मात्मन्कन्यां सोऽग्निगमिष्यति ।
उद्भावनार्थं भवतो वंशस्य नृपसत्तम ॥ १०
गाधेर्दुहितरं प्राप्य पौत्रीं तव महातपाः ।
ब्राह्मणं क्षत्रधर्माणं राममुत्पादयिष्यति ॥ ११
क्षत्रियं विप्रकर्माणं बृहस्पतिमिवौजसा ।
विश्वामित्रं तव कुले गाधेः पुत्रं सुधार्मिकम् ।
तपसा महता युक्तं प्रदास्यति महाद्युते ॥ १२
स्त्रियौ तु कारणं तत्र परिवर्ते भविष्यतः ।
पितामहनियोगाद्वै नान्यथैतद्भविष्यति ॥ १३
तृतीये पुरुषे तुभ्यं ब्राह्मणत्वमुपैष्यति ।
भविता त्वं च संबन्धी भृगूणां भावितात्मनाम् ॥

भीष्म उवाच ।

कुशिकस्तु मुनेर्वाक्यं च्यवनस्य महात्मनः ।
श्रुत्वा हृष्टोऽभवद्राजा वाक्यं चेदमुवाच ह ।
एवमस्त्विति धर्मात्मा तदा भरतसत्तम ॥ १५
च्यवनस्तु महातेजाः पुनरेव नराधिपम् ।
वरार्थं चोदयामास तमुवाच स पार्थिवः ॥ १६
बाढमेवं ग्रहीष्यामि कामं त्वत्तो महामुने ।
ब्रह्मभूतं कुलं मेऽस्तु धर्मे चास्य मनो भवेत् ॥१७
एवमुक्तस्तथेत्येवं प्रत्युक्त्वा च्यवनो मुनिः ।
अभ्यनुज्ञाय नृपतिं तीर्थयात्रां ययौ तदा ॥ १८
एतत्ते कथितं सर्वमशेषेण यथा नृप ।
भृगूणां कुशिकानां च प्रति संबन्धकारणम् ॥ १९
यथोक्तं मुनिना चापि तथा तदभवन्नृप ।
जन्म रामस्य च मुनेर्विश्वामित्रस्य चैव ह ॥ २०

इति श्रीमहाभारते अनुशासनपर्वणि
षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥

५७

युधिष्ठिर उवाच ।

मुह्यामीव निशम्याद्य चिन्तयानः पुनः पुनः ।
हीनां पार्थिवसंघातैः श्रीमद्भिः पृथिवीमिमाम् ॥ १
प्राप्य राज्यानि शतशो महीं जित्वापि भारत ।
कोटिशः पुरुषान्हत्वा परितप्ये पितामह ॥ २
का नु तासां वरस्त्रीणामवस्थाद्य भविष्यति ।
या हीनाः पतिभिः पुत्रैर्मातुलैर्भ्रातृभिस्तथा ॥ ३
वयं हि तान्गुरून्हत्वा ज्ञातींश्च सुहृदोऽपि च ।
अवाक्शीर्षाः पतिष्यामो नरके नात्र संशयः ॥ ४
शरीरं योक्तुमिच्छामि तपसोग्रेण भारत ।
उपदिष्टमिहेच्छामि तत्त्वतोऽहं विशां पते ॥ ५

वैशंपायन उवाच ।

युधिष्ठिरस्य तद्वाक्यं श्रुत्वा भीष्मो महामनाः ।
परीक्ष्य निपुणं बुद्ध्या युधिष्ठिरमभाषत ॥ ६
रहस्यमद्भुतं चैव शृणु वक्ष्यामि यत्त्वयि ।
या गतिः प्राप्यते येन प्रेत्यभावेषु भारत ॥ ७
तपसा प्राप्यते स्वर्गस्तपसा प्राप्यते यशः ।
आयुःप्रकर्षो भोगाश्च लभ्यन्ते तपसा विभो ॥ ८
ज्ञानं विज्ञानमारोग्यं रूपं संपत्तथैव च ।
सौभाग्यं चैव तपसा प्राप्यते भरतर्षभ ॥ ९
धनं प्राप्नोति तपसा मौनं ज्ञानं प्रयच्छति ।
उपभोगांस्तु दानेन ब्रह्मचर्येण जीवितम् ॥ १०
अहिंसायाः फलं रूपं दीक्षाया जन्म वै कुले ।
फलमूलाशिनां राज्यं स्वर्गः पर्णाशिनां भवेत् ॥११
पयोभक्षो दिवं याति स्नानेन द्रविणाधिकः ।
गुरुशुश्रूषया विद्या नित्यश्राद्धेन संततिः ॥ १२
गवाढ्यः शाकदीक्षाभिः स्वर्गमाहुस्तृणाशनात् ।
स्त्रियस्त्रिषवणस्नानाद्वायुं पीत्वा क्रतुं लभेत् ॥ १३
नित्यस्नायी भवेद्दक्षः संध्ये तु द्वे जपन्द्विजः ।
मरुं साधयतो राज्यं नाकपृष्ठमनाशके ॥ १४
स्थण्डिले शयमानानां गृहाणि शयनानि च ।
चीरवल्कलवासोभिर्वासांस्याभरणानि च ॥ १५

शय्यासनानि यानानि योगयुक्ते तपोधने ।
अग्निप्रवेशे नियतं ब्रह्मलोको विधीयते ॥ १६
रसानां प्रतिसंहारात्सौभाग्यमिह विन्दति ।
आमिषप्रतिसंहारात्प्रजास्यायुष्मती भवेत् ॥ १७
उदवासं वसेद्यस्तु स नराधिपतिर्भवेत् ।
सत्यवादी नरश्रेष्ठ दैवतैः सह मोदते ॥ १८
कीर्तिर्भवति दानेन तथारोग्यमहिंसया ।
द्विजशुश्रूषया राज्यं द्विजत्वं वापि पुष्कलम् ॥ १९
पानीयस्य प्रदानेन कीर्तिर्भवति शाश्वती ।
अन्नपानप्रदानेन तृप्यते कामभोगतः ॥ २०
सान्त्वदः सर्वभूतानां सर्वशोकैर्विमुच्यते ।
देवशुश्रूषया राज्यं दिव्यं रूपं नियच्छति ॥ २१
दीपलोकप्रदानेन चक्षुष्मान्भवते नरः ।
प्रेक्षणीयप्रदानेन स्मृतिं मेधां च विन्दति ॥ २२
गन्धमाल्यनिवृत्त्या तु कीर्तिर्भवति पुष्कला ।
केशश्मश्रून्धारयतामग्र्या भवति संततिः ॥ २३
उपवासं च दीक्षां च अभिषेकं च पार्थिव ।
कृत्वा द्वादश वर्षाणि वीरस्थानाद्विशिष्यते ॥ २४
दासीदासमलंकारान्क्षेत्राणि च गृहाणि च ।
ब्रह्मदेयां सुतां दत्त्वा प्राप्नोति मनुजर्षभ ॥ २५
क्रतुभिश्चोपवासैश्च त्रिदिवं याति भारत ।
लभते च चिरं स्थानं बलिपुष्पप्रदो नरः ॥ २६
सुवर्णशृङ्गैस्तु विभूषितानां
गवां सहस्रस्य नरः प्रदाता ।
प्राप्नोति पुण्यं दिवि देवलोक-
मित्येवमाहुर्मुनिदेवसंघाः ॥ २७
प्रयच्छते यः कपिलां सचैलां
कांस्योपदोहां कनकाग्रशृङ्गीम् ।
तैस्तैर्गुणैः कामदुघास्य भूत्वा
नरं प्रदातारमुपैति सा गौः ॥ २८
यावन्ति लोमानि भवन्ति धेन्वा-
स्तावत्फलं प्राप्नुते गोप्रदाता ।
पुत्रांश्च पौत्रांश्च कुलं च सर्व-
मासप्तमं तारयते परत्र ॥ २९
सदक्षिणां काञ्चनचारुशृङ्गीं
कांस्योपदोहां द्रविणोत्तरीयाम् ।
धेनुं तिलानां ददतो द्विजाय
लोका वसूनां सुलभा भवन्ति ॥ ३०
स्वकर्मभिर्मानवं संनिबद्धं
तीव्रान्धकारे नरके पतन्तम् ।
महार्णवे नौरिव वायुयुक्ता
दानं गवां तारयते परत्र ॥ ३१
यो ब्रह्मदेयां तु ददाति कन्यां
भूमिप्रदानं च करोति विप्रे ।
ददाति चान्नं विधिवच्च यश्च
स लोकमाप्नोति पुरंदरस्य ॥ ३२
नैवेशिकं सर्वगुणोपपन्नं
ददाति वै यस्तु नरो द्विजाय ।
स्वाध्यायचारित्रगुणान्विताय
तस्यापि लोकाः कुरुषूत्तरेषु ॥ ३३
धुर्यप्रदानेन गवां तथाश्वै-
र्लोकानवाप्नोति नरो वसूनाम् ।
स्वर्गाय चाहुर्हि हिरण्यदानं
ततो विशिष्टं कनकप्रदानम् ॥ ३४
छत्रप्रदानेन गृहं वरिष्ठं
यानं तथोपानहसंप्रदाने ।
वस्त्रप्रदानेन फलं सुरूपं
गन्धप्रदाने सुरभिर्नरः स्यात् ॥ ३५
पुष्पोपगं वाथ फलोपगं वा
यः पादपं स्पर्शयते द्विजाय ।

स स्त्रीसमृद्धं बहुरत्नपूर्णं
लभत्ययत्नोपगतं गृहं वै ॥ ३६
भक्षान्नपानीयरसप्रदाता
सर्वानवाप्नोति रसान्प्रकामम् ।
प्रतिश्रयाच्छादनसंप्रदाता
प्राप्नोति तानेव न संशयोऽत्र ॥ ३७
स्रग्धूपगन्धान्यनुलेपनानि
स्नानानि माल्यानि च मानवो यः ।
दद्याद्द्विजेभ्यः स भवेदरोग-
स्तथाभिरूपश्च नरेन्द्रलोके ॥ ३८
बीजैरशून्यं शयनैरुपेतं
दद्याद्गृहं यः पुरुषो द्विजाय ।
पुण्याभिरामं बहुरत्नपूर्णं
लभत्यधिष्ठानवरं स राजन् ॥ ३९
सुगन्धचित्रास्तरणोपपन्नं
दद्यान्नरो यः शयनं द्विजाय ।
रूपान्वितां पक्षवतीं मनोज्ञां
भार्यामयत्नोपगतां लभेत्सः ॥ ४०
पितामहस्यानुचरो वीरशायी भवेन्नरः ।
नाधिकं विद्यते तस्मादित्याहुः परमर्षयः ॥ ४१

वैशंपायन उवाच ।

तस्य तद्वचनं श्रुत्वा प्रीतात्मा कुरुनन्दनः ।
नाश्रमेऽरोचयद्वासं वीरमार्गाभिकाङ्क्षया ॥ ४२
ततो युधिष्ठिरः प्राह पाण्डवान्भरतर्षभ ।
पितामहस्य यद्वाक्यं तद्वो रोचत्विति प्रभुः ॥ ४३
ततस्तु पाण्डवाः सर्वे द्रौपदी च यशस्विनी ।
युधिष्ठिरस्य तद्वाक्यं बाढमित्यभ्यपूजयन् ॥ ४४

इति श्रीमहाभारते अनुशासनपर्वणि
सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥

५८

युधिष्ठिर उवाच ।

यानीमानि बहिर्वेद्यां दानानि परिचक्षते ।
तेभ्यो विशिष्टं किं दानं मतं ते कुरुपुंगव ॥ १
कौतूहलं हि परमं तत्र मे वर्तते प्रभो ।
दातारं दत्तमन्वेति यद्दानं तत्प्रचक्ष्व मे ॥ २

भीष्म उवाच ।

अभयं सर्वभूतेभ्यो व्यसने चाप्यनुग्रहम् ।
यच्चाभिलषितं दद्यात्तृषितायाभियाचते ॥ ३
दत्तं मन्येत यद्दत्त्वा तद्दानं श्रेष्ठमुच्यते ।
दत्तं दातारमन्वेति यद्दानं भरतर्षभ ॥ ४
हिरण्यदानं गोदानं पृथिवीदानमेव च ।
एतानि वै पवित्राणि तारयन्त्यपि दुष्कृतम् ॥ ५
एतानि पुरुषव्याघ्र साधुभ्यो देहि नित्यदा ।
दानानि हि नरं पापान्मोक्षयन्ति न संशयः ॥ ६
यद्यदिष्टतमं लोके यच्चास्य दयितं गृहे ।
तत्तद्गुणवते देयं तदेवाक्षयमिच्छता ॥ ७
प्रियाणि लभते लोके प्रियदः प्रियकृत्तथा ।
प्रियो भवति भूतानामिह चैव परत्र च ॥ ८
याचमानमभीमानादाशावन्तमकिंचनम् ।
यो नार्चति यथाशक्ति स नृशंसो युधिष्ठिर ॥ ९
अमित्रमपि चेद्दीनं शरणैषिणमागतम् ।
व्यसने योऽनुगृह्णाति स वै पुरुषसत्तमः ॥ १०
कृशाय ह्रीमते तात वृत्तिक्षीणाय सीदते ।
अपहन्यात्क्षुधं यस्तु न तेन पुरुषः समः ॥ ११
ह्रिया तु नियतान्साधून्पुत्रदारैश्च कर्शितान् ।
अयाचमानान्कौन्तेय सर्वोपायैर्निमन्त्रय ॥ १२
आशिषं ये न देवेषु न मर्त्येषु च कुर्वते ।
अर्हन्तो नित्यसत्त्वस्था यथालब्धोपजीविनः ॥ १३

आशीविषसमेभ्यश्च तेभ्यो रक्षस्व भारत ।
तान्युक्तैरुपजिज्ञास्य तथा द्विजवरोत्तमान् ।। १४
कृतैरावसथैर्नित्यं सप्रेष्यैः सपरिच्छदैः ।
निमन्त्रयेथाः कौरव्य सर्वकामसुखावहैः ।। १५
यदि ते प्रतिगृह्णीयुः श्रद्धापूतं युधिष्ठिर ।
कार्यमित्येव मन्वाना धार्मिकाः पुण्यकर्मिणः ।।१६
विद्यास्नाता व्रतस्नाता ये व्यपाश्रित्यजीविनः ।
गूढस्वाध्यायतपसो ब्राह्मणाः संशितव्रताः ।। १७
तेषु शुद्धेषु दान्तेषु स्वदारनिरतेषु च ।
यत्करिष्यसि कल्याणं तत्त्वा लोकेषु धास्यति ।।
यथाग्निहोत्रं सुहुतं सायं प्रातर्द्विजातिना ।
तथा भवति दत्तं वै द्विजेभ्योऽथ कृतात्मना ।।१९
एष ते विततो यज्ञः श्रद्धापूतः सदक्षिणः ।
विशिष्टः सर्वयज्ञेभ्यो ददतस्तात वर्तताम् ।। २०
निवापो दानसदृशस्तादृशेषु युधिष्ठिर ।
निवपन्पूजयंश्चैव तेष्वानृण्यं निगच्छति ।। २१
य एव नो न कुप्यन्ति न लुभ्यन्ति तृणेष्वपि ।
त एव नः पूज्यतमा ये चान्ये प्रियवादिनः ।।२२
ये नो न बहु मन्यन्ते न प्रवर्तन्ति चापरे ।
पुत्रवत्परिपाल्यास्ते नमस्तेभ्यस्तथाभयम् ।। २३
ऋत्विक्पुरोहिताचार्या मृदुब्रह्मधरा हि ते ।
क्षत्रेणापि हि संसृष्टं तेजः शाम्यति वै द्विजे ।।२४
अस्ति मे बलवानस्मि राजास्मीति युधिष्ठिर ।
ब्राह्मणान्मा स्म पर्यश्नीर्वासोभिरशनेन च ।। २५
यच्छोभार्थं बलार्थं वा वित्तमस्ति तवानघ ।
तेन ते ब्राह्मणाः पूज्याः स्वधर्ममनुतिष्ठता ।। २६
नमस्कार्यास्त्वया विप्रा वर्तमाना यथातथम् ।
यथासुखं यथोत्साहं ललन्तु त्वयि पुत्रवत् ।। २७
को ह्यन्यः सुप्रसादानां सुहृदामल्पतोषिणाम् ।
वृत्तिमर्हत्युपक्षेप्तुं त्वदन्यः कुरुसत्तम ।। २८
यथा पत्याश्रयो धर्मः स्त्रीणां लोके सनातनः ।
स देवः सा गतिर्नान्या तथास्माकं द्विजातयः ।।
यदि नो ब्राह्मणास्तात संत्यजेयुरपूजिताः ।
पश्यन्तो दारुणं कर्म सततं क्षत्रिये स्थितम् ।।३०
अवेदानामकीर्तीनामलोकानामयज्वनाम् ।
कोऽस्माकं जीवितेनार्थस्तद्धि नो ब्राह्मणाश्रयम् ।।
अत्र ते वर्तयिष्यामि यथा धर्मः सनातनः ।
राजन्यो ब्राह्मणं राजन्पुरा परिचचार ह ।
वैश्यो राजन्यमित्येव शूद्रो वैश्यमिति श्रुतिः ।।३२
दूराच्छूद्रेणोपचर्यो ब्राह्मणोऽग्निरिव ज्वलन् ।
संस्पृश्य परिचर्यस्तु वैश्येन क्षत्रियेण च ।। ३३
मृदुभावान्सत्यशीलान्सत्यधर्मानुपालकान् ।
आशीविषानिव क्रुद्धांस्तानुपाचरत द्विजान् ।। ३४
अपरेषां परेषां च परेभ्यश्चैव ये परे ।
क्षत्रियाणां प्रतपतां तेजसा च बलेन च ।
ब्राह्मणेष्वेव शाम्यन्ति तेजांसि च तपांसि च।।३५
न मे पिता प्रियतरो न त्वं तात तथा प्रियः ।
न मे पितुः पिता राजन्न चात्मा न च जीवितम्
त्वत्तश्च मे प्रियतरः पृथिव्यां नास्ति कश्चन ।
त्वत्तोऽपि मे प्रियतरा ब्राह्मणा भरतर्षभ ।। ३७
ब्रवीमि सत्यमेतच्च यथाहं पाण्डुनन्दन ।
तेन सत्येन गच्छेयं लोकान्यत्र स शंतनुः ।। ३८
पश्येयं च सतां लोकाञ्छुचीन्ब्रह्मपुरस्कृतान् ।
तत्र मे तात गन्तव्यमह्नाय च चिराय च ।। ३९
सोऽहमेतादृशाँल्लोकान्दृष्ट्वा भरतसत्तम ।
यन्मे कृतं ब्राह्मणेषु न तप्ये तेन पार्थिव ।। ४०

इति श्रीमहाभारते अनुशासनपर्वणि

अष्टपञ्चाशत्तमोऽध्यायः ।। ५८ ।।

५९

युधिष्ठिर उवाच ।

यौ तु स्यातां चरणेनोपपन्नौ
यौ विद्यया सदृशौ जन्मना च ।
ताभ्यां दानं कतरस्मै विशिष्ट-
मयाचमानाय च याचते च ॥ १

भीष्म उवाच ।

श्रेयो वै याचतः पार्थ दत्तमाहुरयाचते ।
अर्हत्तमो वै धृतिमान्कृपणादधृतात्मनः ॥ २
क्षत्रियो रक्षणधृतिर्ब्राह्मणोऽनर्थनाधृतिः ।
ब्राह्मणो धृतिमान्विद्वान्देवान्प्रीणाति तुष्टिमान् ॥ ३
याच्ञामाहुरनीशस्य अभिहारं च भारत ।
उद्वेजयति याचन्हि सदा भूतानि दस्युवत् ॥ ४
म्रियते याचमानो वै तमनु म्रियते ददत् ।
ददत्संजीवयत्येनमात्मानं च युधिष्ठिर ॥ ५
आनृशंस्यं परो धर्मो याचते यत्प्रदीयते ।
अयाचतः सीदमानान्सर्वोपायैर्निमन्त्रय ॥ ६
यदि वै तादृशा राष्ट्रे वसेयुस्ते द्विजोत्तमाः ।
भस्मच्छन्नानिवाग्नींस्तान्बुध्येथास्त्वं प्रयत्नतः ॥ ७
तपसा दीप्यमानास्ते दहेयुः पृथिवीमपि ।
पूज्या हि ज्ञानविज्ञानतपोयोगसमन्विताः ॥ ८
तेभ्यः पूजां प्रयुञ्जीथा ब्राह्मणेभ्यः परंतप ।
ददद्बहुविधान्दायानुपच्छन्दानयाचताम् ॥ ९
यदग्निहोत्रे सुहुते सायंप्रातर्भवेत्फलम् ।
विद्यावेदव्रतवति तद्दानफलमुच्यते ॥ १०
विद्यावेदव्रतस्नातानव्यपाश्रयजीविनः ।
गूढस्वाध्यायतपसो ब्राह्मणान्संशितव्रतान् ॥ ११
कृतैरावसथैर्हृद्यैः सप्रेष्यैः सपरिच्छदैः ।
निमन्त्रयेथाः कौन्तेय कामैश्चान्यैर्द्विजोत्तमान् ॥ १२
अपि ते प्रतिगृह्णीयुः श्रद्धापूतं युधिष्ठिर ।
कार्यमित्येव मन्वाना धर्मज्ञाः सूक्ष्मदर्शिनः ॥ १३
अपि ते ब्राह्मणा भुक्त्वा गताः सोद्धरणान्गृहान् ।
येषां दाराः प्रतीक्षन्ते पर्जन्यमिव कर्षकाः ॥ १४
अन्नानि प्रातःसवने नियता ब्रह्मचारिणः ।
ब्राह्मणास्तात भुञ्जानास्त्रेताग्नीन्प्रीणयन्तु ते ॥ १५
माध्यंदिनं ते सवनं ददतस्तात वर्तताम् ।
गा हिरण्यानि वासांसि तेनेन्द्रः प्रीयतां तव ॥ १६
तृतीयं सवनं तत्ते वैश्वदेवं युधिष्ठिर ।
यद्देवेभ्यः पितृभ्यश्च विप्रेभ्यश्च प्रयच्छसि ॥ १७
अहिंसा सर्वभूतेभ्यः संविभागश्च सर्वशः ।
दमस्त्यागो धृतिः सत्यं भवत्ववभृथाय ते ॥ १८
एष ते विततो यज्ञः श्रद्धापूतः सदक्षिणः ।
विशिष्टः सर्वयज्ञेभ्यो नित्यं तात प्रवर्तताम् ॥ १९

इति श्रीमहाभारते अनुशासनपर्वणि
एकोनषष्टितमोऽध्यायः ॥ ५९ ॥

६०

युधिष्ठिर उवाच ।

दानं यज्ञक्रिया चेह किंस्वित्प्रेत्य महाफलम् ।
कस्य ज्यायः फलं प्रोक्तं कीदृशेभ्यः कथं कदा ॥
एतदिच्छामि विज्ञातुं याथातथ्येन भारत ।
विद्वञ्जिज्ञासमानाय दानधर्मान्प्रचक्ष्व मे ॥ २
अन्तर्वेद्यां च यद्दत्तं श्रद्धया चानृशंस्यतः ।
किंस्विन्निःश्रेयसं तात तन्मे ब्रूहि पितामह ॥ ३

भीष्म उवाच ।

रौद्रं कर्म क्षत्रियस्य सततं तात वर्तते ।
तस्य वैतानिकं कर्म दानं चैवेह पावनम् ॥ ४
न तु पापकृतां राज्ञां प्रतिगृह्णन्ति साधवः ।
एतस्मात्कारणाद्यज्ञैर्यजेद्राजाप्तदक्षिणैः ॥ ५
अथ चेत्प्रतिगृह्णीयुर्दद्यादहरहर्नृपः ।
श्रद्धामास्थाय परमां पावनं ह्येतदुत्तमम् ॥ ६

ब्राह्मणांस्तर्पयेद्द्रव्यैस्ततो यज्ञे यतव्रतः ।
मैत्रान्साधून्वेदविदः शीलवृत्ततपोन्वितान् ॥ ७
यत्ते तेन करिष्यन्ति कृतं तेन भविष्यति ।
यज्ञान्साधय साधुभ्यः स्वाद्वन्नान्दक्षिणावतः ॥ ८
इष्टं दत्तं च मन्येथा आत्मानं दानकर्मणा ।
पूजयेथा यायजूकांस्तवाप्यंशो भवेद्यथा ॥ ९
प्रजावतो भरेथाश्च ब्राह्मणान्बहुभारिणः ।
प्रजावांस्तेन भवति यथा जनयिता तथा ॥ १०
यावतो वै साधुधर्मान्सन्तः संवर्तयन्त्युत ।
सर्वे ते चापि भर्तव्या नरा ये बहुभारिणः ॥ ११
समृद्धः संप्रयच्छस्व ब्राह्मणेभ्यो युधिष्ठिर ।
धेनुरनडुहोऽन्नानि च्छत्रं वासांस्युपानहौ ॥ १२
आज्यानि यजमानेभ्यस्तथान्नाद्यानि भारत ।
अश्ववन्ति च यानानि वेश्मानि शयनानि च ॥ १३
एते देया व्युष्टिमन्तो लघूपायाश्च भारत ।
अजुगुप्सांश्च विज्ञाय ब्राह्मणान्वृत्तिकर्शितान् ॥ १४
उपच्छन्नं प्रकाशं वा वृत्त्या तान्प्रतिपादय ।
राजसूयाश्वमेधाभ्यां श्रेयस्तत्क्षत्रियान्प्रति ॥ १५
एवं पापैर्विमुक्तस्त्वं पूतः स्वर्गमवाप्स्यसि ।
स्रंसयित्वा पुनः कोशं यद्राष्ट्रं पालयिष्यसि ॥ १६
ततश्च ब्रह्मभूयस्त्वमवाप्स्यसि धनानि च ।
आत्मनश्च परेषां च वृत्तिं संरक्ष भारत ॥ १७
पुत्रवच्चापि भृत्यान्स्वान्प्रजाश्च परिपालय ।
योगक्षेमश्च ते नित्यं ब्राह्मणेष्वस्तु भारत ॥ १८
अरक्षितारं हर्तारं विलोप्तारमदायकम् ।
तं स्म राजकलिं हन्युः प्रजाः संभूय निर्घृणम् ॥
अहं वो रक्षितेत्युक्त्वा यो न रक्षति भूमिपः ।
स संहत्य निहन्तव्यः श्वेव सोन्माद आतुरः ॥ २०
पापं कुर्वन्ति यत्किंचित्प्रजा राज्ञा ह्यरक्षिताः ।
चतुर्थं तस्य पापस्य राजा भारत विन्दति ॥ २१
अप्याहुः सर्वमेवेति भूयोऽर्धमिति निश्चयः ।
चतुर्थं मतमस्माकं मनोः श्रुत्वानुशासनम् ॥ २२
शुभं वा यत्प्रकुर्वन्ति प्रजा राज्ञा सुरक्षिताः ।
चतुर्थं तस्य पुण्यस्य राजा चाप्नोति भारत ॥ २३
जीवन्तं त्वानुजीवन्तु प्रजाः सर्वा युधिष्ठिर ।
पर्जन्यमिव भूतानि महाद्रुममिव द्विजाः ॥ २४
कुबेरमिव रक्षांसि शतक्रतुमिवामराः ।
ज्ञातयस्त्वानुजीवन्तु सुहृदश्च परंतप ॥ २५

इति श्रीमहाभारते अनुशासनपर्वणि
षष्टितमोऽध्यायः ॥ ६० ॥

६१

युधिष्ठिर उवाच ।

इदं देयमिदं देयमितीयं श्रुतिचोदना ।
बहुदेयाश्च राजानः किंस्विद्देयमनुत्तमम् ॥ १

भीष्म उवाच ।

अति दानानि सर्वाणि पृथिवीदानमुच्यते ।
अचला ह्यक्षया भूमिर्दोग्ध्री कामाननुत्तमान् ॥ २
दोग्ध्री वासांसि रत्नानि पशून्व्रीहियवांस्तथा ।
भूमिदः सर्वभूतेषु शाश्वतीरेधते समाः ॥ ३
यावद्भूमेरायुरिह तावद्भूमिद एधते ।
न भूमिदानादस्तीह परं किंचिद्युधिष्ठिर ॥ ४
अप्यल्पं प्रददुः पूर्वं पृथिव्या इति नः श्रुतम् ।
भूमिमेते ददुः सर्वे ये भूमिं भुञ्जते जनाः ॥ ५
स्वकर्मैवोपजीवन्ति नरा इह परत्र च ।
भूमिर्भूतिर्महादेवी दातारं कुरुते प्रियम् ॥ ६
य एतां दक्षिणां दद्यादक्षयां पृथिवीपतिः ।
पुनर्नरत्वं संप्राप्य भवेत्स पृथिवीपतिः ॥ ७
यथा दानं तथा भोग इति धर्मेषु निश्चयः ।
संग्रामे वा तनुं जह्याद्दद्याद्वा पृथिवीमिमाम् ॥ ८
इत्येतां क्षत्रबन्धूनां वदन्ति परमाशिषम् ।

पुनाति दत्ता पृथिवी दातारमिति शुश्रुम ।। ९
अपि पापसमाचारं ब्रह्मघ्नमपि वानृतम् ।
सैव पापं पावयति सैव पापात्प्रमोचयेत् ।। १०
अपि पापकृतां राज्ञां प्रतिगृह्णन्ति साधवः ।
पृथिवीं नान्यदिच्छन्ति पावनं जननी यथा ।। ११
नामास्याः प्रियदत्तेति गुह्यं देव्याः सनातनम् ।
दानं वाप्यथ वा ज्ञानं नाम्नोऽस्याः परमं प्रियम् ।
तस्मात्प्राप्यैव पृथिवीं दद्याद्विप्राय पार्थिवः ।। १२
नाभूमिपतिना भूमिरधिष्ठेया कथंचन ।
न वा पात्रेण वा गूहेदन्तर्धानेन वा चरेत् ।
ये चान्ये भूमिमिच्छेयुः कुर्युरेवमसंशयम् ।। १३
यः साधोर्भूमिमादत्ते न भूमिं विन्दते तु सः ।
भूमिं तु दत्त्वा साधुभ्यो विन्दते भूमिमेव हि ।
प्रेत्येह च स धर्मात्मा संप्राप्नोति महद्यशः ।। १४
यस्य विप्रानुशासन्ति साधोर्भूमिं सदैव हि ।
न तस्य शत्रवो राजन्प्रशासन्ति वसुंधराम् ।। १५
यत्किंचित्पुरुषः पापं कुरुते वृत्तिकर्शितः ।
अपि गोचर्ममात्रेण भूमिदानेन पूयते ।। १६
येऽपि संकीर्णकर्माणो राजानो रौद्रकर्मिणः ।
तेभ्यः पवित्रमाख्येयं भूमिदानमनुत्तमम् ।। १७
अल्पान्तरमिदं शश्वत्पुराणा मेनिरे जनाः ।
यो यजेदश्वमेधेन दद्याद्वा साधवे महीम् ।। १८
अपि चेत्सुकृतं कृत्वा शङ्केरन्नपि पण्डिताः ।
अशक्यमेकमेवैतद्भूमिदानमनुत्तमम् ।। १९
सुवर्णं रजतं वस्त्रं मणिमुक्तावसूनि च ।
सर्वमेतन्महाप्राज्ञ ददाति वसुधां ददत् ।। २०
तपो यज्ञः श्रुतं शीलमलोभः सत्यसंधता ।
गुरुदैवतपूजा च नातिवर्तन्ति भूमिदम् ।। २१
भर्तुर्निःश्रेयसे युक्तास्त्यक्तात्मानो रणे हताः ।
ब्रह्मलोकगताः सिद्धा नातिक्रामन्ति भूमिदम् ।।२२
यथा जनित्री क्षीरेण स्वपुत्रं भरते सदा ।
अनुगृह्णाति दातारं तथा सर्वरसैर्मही ।। २३
मृत्योर्वै किंकरो दण्डस्तापो वह्नेः सुदारुणः ।
घोराश्च वारुणाः पाशा नोपसर्पन्ति भूमिदम् ।। २४
पितॄंश्च पितृलोकस्थान्देवलोके च देवताः ।
संतर्पयति शान्तात्मा यो ददाति वसुंधराम् ।। २५
कृशाय म्रियमाणाय वृत्तिम्लानाय सीदते ।
भूमिं वृत्तिकरीं दत्त्वा सत्री भवति मानवः ।। २६
यथा धावति गौर्वत्सं क्षीरमभ्युत्सृजन्त्युत ।
एवमेव महाभाग भूमिर्भवति भूमिदम् ।। २७
हलकृष्टां महीं दत्त्वा सबीजां सफलामपि ।
उदीर्णं वापि शरणं तथा भवति कामदः ।। २८
ब्राह्मणं वृत्तसंपन्नमाहिताग्निं शुचिव्रतम् ।
नरः प्रतिग्राह्य महीं न याति यमसादनम् ।। २९
यथा चन्द्रमसो वृद्धिरहन्यहनि जायते ।
तथा भूमिकृतं दानं सस्ये सस्ये विवर्धते ।। ३०
अत्र गाथा भूमिगीताः कीर्तयन्ति पुराविदः ।
याः श्रुत्वा जामदग्न्येन दत्ता भूः काश्यपाय वै ।।
मामेवादत्त मां दत्त मां दत्त्वा मामवाप्स्यथ ।
अस्मिँल्लोके परे चैव ततश्चाजनने पुनः ।। ३२
य इमां व्याहृतिं वेद ब्राह्मणो ब्रह्मसंश्रितः ।
श्राद्धस्य हूयमानस्य ब्रह्मभूयं स गच्छति ।। ३३
कृत्यानामभिशस्तानां दुरिष्टशमनं महत् ।
प्रायश्चित्तमहं कृत्वा पुनात्युभयतो दश ।। ३४
पुनाति य इदं वेद वेद चाहं तथैव च ।
प्रकृतिः सर्वभूतानां भूमिर्वै शाश्वती मता ।। ३५
अभिषिच्यैव नृपतिं श्रावयेदिममागमम् ।
यथा श्रुत्वा महीं दद्यान्नादद्यात्साधुतश्च ताम् ।।३६
सोऽयं कृत्स्नो ब्राह्मणार्थो राजार्थश्चाप्यसंशयम् ।
राजा हि धर्मकुशलः प्रथमं भूतिलक्षणम् ।। ३७

अथ येषामधर्मज्ञो राजा भवति नास्तिकः ।
न ते सुखं प्रबुध्यन्ते न सुखं प्रस्वपन्ति च ॥ ३८
सदा भवन्ति चोद्विग्नास्तस्य दुश्चरितैर्नराः ।
योगक्षेमा हि बहवो राष्ट्रं नास्याविशन्ति तत् ॥ ३९
अथ येषां पुनः प्राज्ञो राजा भवति धार्मिकः ।
सुखं ते प्रतिबुध्यन्ते सुसुखं प्रस्वपन्ति च ॥ ४०
तस्य राज्ञः शुभैरार्यैः कर्मभिर्निर्वृताः प्रजाः ।
योगक्षेमेण वृष्ट्या च विवर्धन्ते स्वकर्मभिः ॥ ४१
स कुलीनः स पुरुषः स बन्धुः स च पुण्यकृत् ।
स दाता स च विक्रान्तो यो ददाति वसुंधराम् ॥ ४२
आदित्या इव दीप्यन्ते तेजसा भुवि मानवाः ।
ददन्ति वसुधां स्फीतां ये वेदविदुषि द्विजे ॥ ४३
यथा बीजानि रोहन्ति प्रकीर्णानि महीतले ।
तथा कामाः प्ररोहन्ति भूमिदानसमार्जिताः ॥ ४४
आदित्यो वरुणो विष्णुर्ब्रह्मा सोमो हुताशनः ।
शूलपाणिश्च भगवान्प्रतिनन्दन्ति भूमिदम् ॥ ४५
भूमौ जायन्ति पुरुषा भूमौ निष्ठां व्रजन्ति च ।
चतुर्विधो हि लोकोऽयं योऽयं भूमिगुणात्मकः ॥ ४६
एषा माता पिता चैव जगतः पृथिवीपते ।
नानया सदृशं भूतं किंचिदस्ति जनाधिप ॥ ४७
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
बृहस्पतेश्च संवादमिन्द्रस्य च युधिष्ठिर ॥ ४८
इष्ट्वा क्रतुशतेनाथ महता दक्षिणावता ।
मघवा वाग्विदां श्रेष्ठं पप्रच्छेदं बृहस्पतिम् ॥ ४९
भगवन्केन दानेन स्वर्गतः सुखमेधते ।
यदक्षयं महार्घं च तद्ब्रूहि वदतां वर ॥ ५०
इत्युक्तः स सुरेन्द्रेण ततो देवपुरोहितः ।
बृहस्पतिर्महातेजाः प्रत्युवाच शतक्रतुम् ॥ ५१
सुवर्णदानं गोदानं भूमिदानं च वृत्रहन् ।
ददद्देतान्महाप्राज्ञः सर्वपापैः प्रमुच्यते ॥ ५२
न भूमिदानादेवेन्द्र परं किंचिदिति प्रभो ।
विशिष्टमिति मन्यामि यथा प्राहुर्मनीषिणः ॥ ५३
ये शूरा निहता युद्धे स्वर्याता रणगृद्धिनः ।
सर्वे ते विबुधश्रेष्ठ नातिक्रामन्ति भूमिदम् ॥ ५४
भर्तुर्निःश्रेयसे युक्तास्त्यक्तात्मानो रणे हताः ।
ब्रह्मलोकगताः शूरा नातिक्रामन्ति भूमिदम् ॥ ५५
पञ्च पूर्वादिपुरुषाः षट् च ये वसुधां गताः ।
एकादश ददद्भूमिं परित्रातीह मानवः ॥ ५६
रत्नोपकीर्णां वसुधां यो ददाति पुरंदर ।
स मुक्तः सर्वकलुषैः स्वर्गलोके महीयते ॥ ५७
महीं स्फीतां ददद्राजा सर्वकामगुणान्विताम् ।
राजाधिराजो भवति तद्धि दानमनुत्तमम् ॥ ५८
सर्वकामसमायुक्तां काश्यपीं यः प्रयच्छति ।
सर्वभूतानि मन्यन्ते मां ददातीति वासव ॥ ५९
सर्वकामदुघां धेनुं सर्वकामपुरोगमाम् ।
ददाति यः सहस्राक्ष स स्वर्गं याति मानवः ॥ ६०
मधुसर्पिःप्रवाहिन्यः पयोदधिवहास्तथा ।
सरितस्तर्पयन्तीह सुरेन्द्र वसुधाप्रदम् ॥ ६१
भूमिप्रदानान्नृपतिर्मुच्यते राजकिल्बिषात् ।
न हि भूमिप्रदानेन दानमन्यद्विशिष्यते ॥ ६२
ददाति यः समुद्रान्तां पृथिवीं शस्त्रनिर्जिताम् ।
तं जनाः कथयन्तीह यावद्धरति गौरियम् ॥ ६३
पुण्यामृद्धरसां भूमिं यो ददाति पुरंदर ।
न तस्य लोकाः क्षीयन्ते भूमिदानगुणार्जिताः ॥ ६४
सर्वथा पार्थिवेनेह सततं भूतिमिच्छता ।
भूर्देया विधिवच्छक्र पात्रे सुखमभीप्सता ॥ ६५
अपि कृत्वा नरः पापं भूमिं दत्त्वा द्विजातये ।
समुत्सृजति तत्पापं जीर्णां त्वचमिवोरगः ॥ ६६
सागरान्सरितः शैलान्काननानि च सर्वशः ।
सर्वमेतन्नरः शक्र ददाति वसुधां ददत् ॥ ६७

तडागान्युदपानानि स्रोतांसि च सरांसि च ।
स्नेहान्सर्वरसांश्चैव ददाति वसुधां ददत् ॥ ६८
ओषधीः क्षीरसंपन्ना नगान्पुष्पफलान्वितान् ।
काननोपलशैलांश्च ददाति वसुधां ददत् ॥ ६९
अग्निष्टोमप्रभृतिभिरिष्ट्वा च स्वाप्तदक्षिणैः ।
न तत्फलमवाप्नोति भूमिदानाद्यदश्नुते ॥ ७०
दाता दशानुगृह्णाति दश हन्ति तथा क्षिपन् ।
पूर्वदत्तां हरन्भूमिं नरकायोपगच्छति ॥ ७१
न ददाति प्रतिश्रुत्य दत्त्वा वा हरते तु यः ।
स बद्धो वारुणैः पाशैस्तप्यते मृत्युशासनात् ॥ ७२
आहिताग्निं सदायज्ञं कृशभृत्यं प्रियातिथिम् ।
ये भरन्ति द्विजश्रेष्ठं नोपसर्पन्ति ते यमम् ॥ ७३
ब्राह्मणेष्वृणभूतं स्यात्पार्थिवस्य पुरंदर ।
इतरेषां तु वर्णानां तारयेत्कृशदुर्बलान् ॥ ७४
नाच्छिन्द्यात्स्पर्शितां भूमिं परेण त्रिदशाधिप ।
ब्राह्मणाय सुरश्रेष्ठ कृशभृत्याय कश्चन ॥ ७५
अथाश्रु पतितं तेषां दीनानामवसीदताम् ।
ब्राह्मणानां हृते क्षेत्रे हन्यात्रिपुरुषं कुलम् ॥ ७६
भूमिपालं च्युतं राष्ट्राद्यस्तु संस्थापयेत्पुनः ।
तस्य वासः सहस्राक्ष नाकपृष्ठे महीयते ॥ ७७
इक्षुभिः संततां भूमिं यवगोधूमसंकुलाम् ।
गोऽश्ववाहनसंपूर्णां बाहुवीर्यसमार्जिताम् ॥ ७८
निधिगर्भां ददद्भूमिं सर्वरत्नपरिच्छदाम् ।
अक्षयाँल्लभते लोकान्भूमिसत्रं हि तस्य तत् ॥ ७९
विधूय कलुषं सर्वं विरजाः संमतः सताम् ।
लोके महीयते सद्भिर्यो ददाति वसुंधराम् ॥ ८०
यथाप्सु पतितः शक्र तैलबिन्दुर्विसर्पति ।
तथा भूमिकृतं दानं सस्ये सस्ये विसर्पति ॥ ८१
ये रणाग्रे महीपालाः शूराः समितिशोभनाः ।
वध्यन्तेऽभिमुखाः शक्र ब्रह्मलोकं व्रजन्ति ते ॥ ८२
नृत्यगीतपरा नार्यो दिव्यमाल्यविभूषिताः ।
उपतिष्ठन्ति देवेन्द्र सदा भूमिप्रदं दिवि ॥ ८३
मोदते च सुखं स्वर्गे देवगन्धर्वपूजितः ।
यो ददाति महीं सम्यग्विधिनेह द्विजातये ॥ ८४
शतमप्सरसश्चैव दिव्यमाल्यविभूषिताः ।
उपतिष्ठन्ति देवेन्द्र सदा भूमिप्रदं नरम् ॥ ८५
शङ्खं भद्रासनं छत्रं वराश्वा वरवारणाः ।
भूमिप्रदानात्पुष्पाणि हिरण्यनिचयास्तथा ॥ ८६
आज्ञा सदाप्रतिहता जयशब्दो भवत्यथ ।
भूमिदानस्य पुष्पाणि फलं स्वर्गः पुरंदर ॥ ८७
हिरण्यपुष्पाश्चौषध्यः कुशकाञ्चनशाड्वलाः ।
अमृतप्रसवां भूमिं प्राप्नोति पुरुषो ददत् ॥ ८८
नास्ति भूमिसमं दानं नास्ति मातृसमो गुरुः ।
नास्ति सत्यसमो धर्मो नास्ति दानसमो निधिः ॥
एतदाङ्गिरसाच्छ्रुत्वा वासवो वसुधामिमाम् ।
वसुरत्नसमाकीर्णां ददावाङ्गिरसे तदा ॥ ९०
य इमं श्रावयेच्छ्राद्धे भूमिदानस्य संस्तवम् ।
न तस्य रक्षसां भागो नासुराणां भवत्युत ॥ ९१
अक्षयं च भवेद्दत्तं पितृभ्यस्तत्र संशयः ।
तस्माच्छ्राद्धेष्विदं विप्रो भुञ्जतः श्रावयेद्द्विजान् ॥ ९२
इत्येतत्सर्वदानानां श्रेष्ठमुक्तं तवानघ ।
मया भरतशार्दूल किं भूयः श्रोतुमिच्छसि ॥ ९३

इति श्रीमहाभारते अनुशासनपर्वणि
एकषष्टितमोऽध्यायः ॥ ६१ ॥

६२

युधिष्ठिर उवाच ।

कानि दानानि लोकेऽस्मिन्दातुकामो महीपतिः ।
गुणाधिकेभ्यो विप्रेभ्यो दद्याद्भरतसत्तम ॥ १
केन तुष्यन्ति ते सद्यस्तुष्टाः किं प्रदिशन्त्युत ।
शंस मे तन्महाबाहो फलं पुण्यकृतं महत् ॥ २

दत्तं किं फलवद्राजन्निह लोके परत्र च ।
भवतः श्रोतुमिच्छामि तन्मे विस्तरतो वद ॥ ३

भीष्म उवाच ।

इममर्थं पुरा पृष्टो नारदो देवदर्शनः ।
यदुक्तवानसौ तन्मे गदतः शृणु भारत ॥ ४

नारद उवाच ।

अन्नमेव प्रशंसन्ति देवाः सर्षिगणाः पुरा ।
लोकतन्त्रं हि यज्ञाश्च सर्वमन्ने प्रतिष्ठितम् ॥ ५
अन्नेन सदृशं दानं न भूतं न भविष्यति ।
तस्मादन्नं विशेषेण दातुमिच्छन्ति मानवाः ॥ ६
अन्नमूर्जस्करं लोके प्राणाश्चान्ने प्रतिष्ठिताः ।
अन्नेन धार्यते सर्वं विश्वं जगदिदं प्रभो ॥ ७
अन्नाद्गृहस्था लोकेऽस्मिन्भिक्षवस्तत एव च ।
अन्नात्प्रभवति प्राणः प्रत्यक्षं नात्र संशयः ॥ ८
कुटुम्बं पीडयित्वापि ब्राह्मणाय महात्मने ।
दातव्यं भिक्षवे चान्नमात्मनो भूतिमिच्छता ॥ ९
ब्राह्मणायाभिरूपाय यो दद्यादन्नमर्थिने ।
निदधाति निधिं श्रेष्ठं पारलौकिकमात्मनः ॥ १०
श्रान्तमध्वनि वर्तन्तं वृद्धमर्हमुपस्थितम ।
अर्चयेद्भूतिमन्विच्छन्गृहस्थो गृहमागतम् ॥ ११
क्रोधमुत्पतितं हित्वा सुशीलो वीतमत्सरः ।
अन्नदः प्राप्नुते राजन्दिवि चेह च यत्सुखम् ॥ १२
नावमन्येदभिगतं न प्रणुद्यात्कथंचन ।
अपि श्वपाके शुनि वा न दानं विप्रणश्यति ॥ १३
यो दद्यादपरिक्लिष्टमन्नमध्वनि वर्तते ।
श्रान्तायादृष्टपूर्वाय स महद्धर्ममाप्नुयात् ॥ १४
पितृन्देवानृषीन्विप्रानतिथींश्च जनाधिप ।
यो नरः प्रीणयत्यन्नैस्तस्य पुण्यफलं महत् ॥ १५
कृत्वापि पापकं कर्म यो दद्यादन्नमर्थिने ।
ब्राह्मणाय विशेषेण न स पापेन युज्यते ॥ १६
ब्राह्मणेष्वक्षयं दानमन्नं शूद्रे महाफलम् ।
अन्नदानं च शूद्रे च ब्राह्मणे च विशिष्यते ॥ १७
न पृच्छेद्गोत्रचरणं स्वाध्यायं देशमेव वा ।
भिक्षितो ब्राह्मणेनेह जन्म वान्नं प्रयाचितः ॥ १८
अन्नदस्यान्नवृक्षाश्च सर्वकामफलान्विताः ।
भवन्तीहाथ वामुत्र नृपते नात्र संशयः ॥ १९
आशंसन्ते हि पितरः सुवृष्टिमिव कर्षकाः ।
अस्माकमपि पुत्रो वा पौत्रो वान्नं प्रदास्यति ॥ २०
ब्राह्मणो हि महद्भूतं स्वयं देहीति याचते ।
अकामो वा सकामो वा दत्त्वा पुण्यमवाप्नुयात् ॥
ब्राह्मणः सर्वभूतानामतिथिः प्रसृताग्रभुक् ।
विप्रा यमभिगच्छन्ति भिक्षमाणा गृहं सदा ॥ २२
सत्कृताश्च निवर्तन्ते तदतीव प्रवर्धते ।
महाभोगे कुले जन्म प्रेत्य प्राप्नोति भारत ॥ २३
दत्त्वा त्वन्नं नरो लोके तथा स्थानमनुत्तमम् ।
मृष्टमृष्टान्नदायी तु स्वर्गे वसति सत्कृतः ॥ २४
अन्नं प्राणा नराणां हि सर्वमन्ने प्रतिष्ठितम् ।
अन्नदः पशुमान्पुत्री धनवान्भोगवानपि ॥ २५
प्राणवांश्चापि भवति रूपवांश्च तथा नृप ।
अन्नदः प्राणदो लोके सर्वतः प्रोच्यते तु सः ॥ २६
अन्नं हि दत्त्वातिथये ब्राह्मणाय यथाविधि ।
प्रदाता सुखमाप्नोति दैवैश्चाप्यभिपूज्यते ॥ २७
ब्राह्मणो हि महद्भूतं क्षेत्रं चरति पादवत् ।
उप्यते तत्र यद्बीजं तद्धि पुण्यफलं महत् ॥ २८
प्रत्यक्षं प्रीतिजननं भोक्तृदात्रोर्भवत्युत ।
सर्वाण्यन्यानि दानानि परोक्षफलवन्त्युत ॥ २९
अन्नाद्धि प्रसवं विद्धि रतिमन्नाद्धि भारत ।
धर्मार्थावन्नतो विद्धि रोगनाशं तथान्नतः ॥ ३०
अन्नं ह्यमृतमित्याह पुराकल्पे प्रजापतिः ।
अन्नं भुवं दिवं खं च सर्वमन्ने प्रतिष्ठितम् ॥ ३१

अन्नप्रणाशे भिद्यन्ते शरीरे पञ्च धातवः ।
बलं बलवतोऽपीह प्रणश्यत्यन्नहानितः ॥ ३२
आवाहाश्च विवाहाश्च यज्ञाश्चान्नमृते तथा ।
न वर्तन्ते नरश्रेष्ठ ब्रह्म चात्र प्रलीयते ॥ ३३
अन्नतः सर्वमेतद्धि यत्किंचित्स्थाणु जङ्गमम् ।
त्रिषु लोकेषु धर्मार्थमन्नं देयमतो बुधैः ॥ ३४
अन्नदस्य मनुष्यस्य बलमोजो यशः सुखम् ।
कीर्तिश्च वर्धते शश्वत्त्रिषु लोकेषु पार्थिव ॥ ३५
मेघेष्वम्भः संनिधत्ते प्राणानां पवनः शिवः ।
तच्च मेघगतं वारि शक्रो वर्षति भारत ॥ ३६
आदत्ते च रसं भौममादित्यः स्वगभस्तिभिः ।
वायुरादित्यतस्तांश्च रसान्देवः प्रजापतिः ॥ ३७
तद्यदा मेघतो वारि पतितं भवति क्षितौ ।
तदा वसुमती देवी स्निग्धा भवति भारत ॥ ३८
ततः सस्यानि रोहन्ति येन वर्तयते जगत् ।
मांसमेदोस्थिशुक्राणां प्रादुर्भावस्ततः पुनः ॥ ३९
संभवन्ति ततः शुक्रात्प्राणिनः पृथिवीपते ।
अग्नीषोमौ हि तच्छुक्रं प्रजनः पुष्यतश्च ह ॥ ४०
एवमन्नं च सूर्यश्च पवनः शुक्रमेव च ।
एक एव स्मृतो राशिर्यतो भूतानि जज्ञिरे ॥ ४१
प्राणान्ददाति भूतानां तेजश्च भरतर्षभ ।
गृहमभ्यागतायाशु यो दद्यादन्नमर्थिने ॥ ४२

भीष्म उवाच ।

नारदेनैवमुक्तोऽहमदामन्नं सदा नृप ।
अनसूयुस्त्वमप्यन्नं तस्माद्देहि गतज्वरः ॥ ४३
दत्त्वान्नं विधिवद्राजन्विप्रेभ्यस्त्वमपि प्रभो ।
यथावदनुरूपेभ्यस्ततः स्वर्गमवाप्स्यसि ॥ ४४
अन्नदानां हि ये लोकास्तांस्त्वं शृणु नराधिप ।
भवनानि प्रकाशन्ते दिवि तेषां महात्मनाम् ।
नानासंस्थानरूपाणि नानास्तम्भान्वितानि च ॥ ४५
चन्द्रमण्डलशुभ्राणि किङ्किणीजालवन्ति च ।
तरुणादित्यवर्णानि स्थावराणि चराणि च ॥ ४६
अनेकशतभौमानि सान्तर्जलवनानि च ।
वैडूर्यार्कप्रकाशानि रौप्यरुक्ममयानि च ॥ ४७
सर्वकामफलाश्चापि वृक्षा भवनसंस्थिताः ।
वाप्यो वीथ्यः सभाः कूपा दीर्घिकाश्चैव सर्वशः ॥
घोषवन्ति च यानानि युक्तान्यथ सहस्रशः ।
भक्ष्यभोज्यमयाः शैला वासांस्याभरणानि च ॥४९
क्षीरं स्रवन्त्यः सरितस्तथा चैवान्नपर्वताः ।
प्रासादाः पाण्डुराभ्राभाः शय्याश्च कनकोज्ज्वलाः ।
तानन्नदाः प्रपद्यन्ते तस्मादन्नप्रदो भव ॥ ५०
एते लोकाः पुण्यकृतामन्नदानां महात्मनाम् ।
तस्मादन्नं विशेषेण दातव्यं मानवैर्भुवि ॥ ५१

इति श्रीमहाभारते अनुशासनपर्वणि
द्विषष्टितमोऽध्यायः ॥ ६२ ॥

६३

युधिष्ठिर उवाच ।

श्रुतं मे भवतो वाक्यमन्नदानस्य यो विधिः ।
नक्षत्रयोगस्येदानीं दानकल्पं ब्रवीहि मे ॥ १

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
देवक्याश्चैव संवादं देवर्षेर्नारदस्य च ॥ २
द्वारकामनुसंप्राप्तं नारदं देवदर्शनम् ।
पप्रच्छैनं ततः प्रश्नं देवकी धर्मदर्शिनी ॥ ३
तस्याः संपृच्छमानाया देवर्षिर्नारदस्तदा ।
आचष्ट विधिवत्सर्वं यत्तच्छृणु विशां पते ॥ ४

नारद उवाच ।

कृत्तिकासु महाभागे पायसेन ससर्पिषा ।
संतर्प्य ब्राह्मणान्साधूँल्लोकानाप्नोत्यनुत्तमान् ॥ ५

रोहिण्यां प्रथितैर्मासैर्माषैरन्नेन सर्पिषा ।
पयोऽनुपानं दातव्यमानृण्यार्थं द्विजातये ॥ ६
दोग्ध्रीं दत्त्वा सवत्सां तु नक्षत्रे सोमदैवते ।
गच्छन्ति मानुषाल्लोकात्स्वर्गलोकमनुत्तमम् ॥ ७
आर्द्रायां कृसरं दत्त्वा तैलमिश्रमुपोषितः ।
नरस्तरति दुर्गाणि क्षुरधारांश्च पर्वतान् ॥ ८
अपूपान्पुनर्वसौ दत्त्वा तथैवान्नानि शोभने ।
यशस्वी रूपसंपन्नो बह्वन्ने जायते कुले ॥ ९
पुष्ये तु कनकं दत्त्वा कृतं चाकृतमेव च ।
अनालोकेषु लोकेषु सोमवत्स विराजते ॥ १०
आश्लेषायां तु यो रूप्यमृषभं वा प्रयच्छति ।
स सर्वभयनिर्मुक्तः शात्रवानधितिष्ठति ॥ ११
मघासु तिलपूर्णानि वर्धमानानि मानवः ।
प्रदाय पुत्रपशुमानिह प्रेत्य च मोदते ॥ १२
फल्गुनीपूर्वसमये ब्राह्मणानामुपोषितः ।
भक्षान्फाणितसंयुक्तान्दत्त्वा सौभाग्यमृच्छति ॥ १३
घृतक्षीरसमायुक्तं विधिवत्षष्टिकौदनम् ।
उत्तराविषये दत्त्वा स्वर्गलोके महीयते ॥ १४
यद्यत्प्रदीयते दानमुत्तराविषये नरैः ।
महाफलमनन्तं च भवतीति विनिश्चयः ॥ १५
हस्ते हस्तिरथं दत्त्वा चतुर्युक्तमुपोषितः ।
प्राप्नोति परमाँल्लोकान्पुण्यकामसमन्वितान् ॥ १६
चित्रायामृषभं दत्त्वा पुण्यान्गन्धांश्च भारत ।
चरत्यप्सरसां लोके रमते नन्दने तथा ॥ १७
स्वातावथ धनं दत्त्वा यदिष्टतममात्मनः ।
प्राप्नोति लोकान्स शुभानिह चैव महद्यशः ॥ १८
विशाखायामनड्वाहं धेनुं दत्त्वा च दुग्धदाम् ।
सप्रासङ्गं च शकटं सधान्यं वस्त्रसंयुतम् ॥ १९
पितॄन्देवांश्च प्रीणाति प्रेत्य चानन्त्यमश्नुते ।
न च दुर्गाण्यवाप्नोति स्वर्गलोकं च गच्छति ॥
दत्त्वा यथोक्तं विप्रेभ्यो वृत्तिमिष्टां स विन्दति ।
नरकादींश्च संक्लेशान्नाप्नोतीति विनिश्चयः ॥ २१
अनुराधासु प्रावारं वस्त्रान्तरमुपोषितः ।
दत्त्वा युगशतं चापि नरः स्वर्गे महीयते ॥ २२
कालशाकं तु विप्रेभ्यो दत्त्वा मर्त्यः समूलकम् ।
ज्येष्ठायामृद्धिमिष्टां वै गतिमिष्टां च विन्दति ॥ २३
मूले मूलफलं दत्त्वा ब्राह्मणेभ्यः समाहितः ।
पितॄन्प्रीणयते चापि गतिमिष्टां च गच्छति ॥ २४
अथ पूर्वास्वषाढासु दधिपात्राण्युपोषितः ।
कुलवृत्तोपसंपन्ने ब्राह्मणे वेदपारगे ।
प्रदाय जायते प्रेत्य कुले सुबहुगोकुले ॥ २५
उदमन्थं ससर्पिष्कं प्रभूतमधुफाणितम् ।
दत्त्वोत्तरास्वषाढासु सर्वकामानवाप्नुयात् ॥ २६
दुग्धं त्वभिजिते योगे दत्त्वा मधुघृताप्लुतम् ।
धर्मनित्यो मनीषिभ्यः स्वर्गलोके महीयते ॥ २७
श्रवणे कम्बलं दत्त्वा वस्त्रान्तरितमेव च ।
श्वेतेन याति यानेन सर्वलोकानसंवृतान् ॥ २८
गोप्रयुक्तं धनिष्ठासु यानं दत्त्वा समाहितः ।
वस्त्ररश्मिधरं सद्यः प्रेत्य राज्यं प्रपद्यते ॥ २९
गन्धाञ्शतभिषग्योगे दत्त्वा सागुरुचन्दनान् ।
प्राप्नोत्यप्सरसां लोकान्प्रेत्य गन्धांश्च शाश्वतान् ॥ ३०
पूर्वभाद्रपदायोगे राजमाषान्प्रदाय तु ।
सर्वभक्षफलोपेतः स वै प्रेत्य सुखी भवेत् ॥ ३१
औरभ्रमुत्तरायोगे यस्तु मांसं प्रयच्छति ।
स पितॄन्प्रीणयति वै प्रेत्य चानन्त्यमश्नुते ॥ ३२
कांस्योपदोहनां धेनुं रेवत्यां यः प्रयच्छति ।
सा प्रेत्य कामानादाय दातारमुपतिष्ठति ॥ ३३
रथमश्वसमायुक्तं दत्त्वाश्विन्यां नरोत्तमः ।
हस्त्यश्वरथसंपन्ने वर्चस्वी जायते कुले ॥ ३४
भरणीषु द्विजातिभ्यस्तिलधेनुं प्रदाय वै ।

गाः सुप्रभूताः प्राप्नोति नरः प्रेत्य यशस्तथा ॥ ३५

भीष्म उवाच ।

इत्येष लक्षणोद्देशः प्रोक्तो नक्षत्रयोगतः ।
देवक्या नारदेनेह सा स्नुषाभ्योऽब्रवीदिदम् ॥३६

इति श्रीमहाभारते अनुशासनपर्वणि
त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

६४

भीष्म उवाच ।

सर्वान्कामान्प्रयच्छन्ति ये प्रयच्छन्ति काञ्चनम् ।
इत्येवं भगवानत्रिः पितामहसुतोऽब्रवीत् ॥ १
पवित्रं शुच्यथायुष्यं पितृणामक्षयं च तत् ।
सुवर्णं मनुजेन्द्रेण हरिश्चन्द्रेण कीर्तितम् ॥ २
पानीयदानं परमं दानानां मनुरब्रवीत् ।
तस्माद्वापीश्च कूपांश्च तडागानि च खानयेत् ॥ ३
अर्धं पापस्य हरति पुरुषस्येह कर्मणः ।
कूपः प्रवृत्तपानीयः सुप्रवृत्तश्च नित्यशः ॥ ४
सर्वं तारयते वंशं यस्य खाते जलाशये ।
गावः पिबन्ति विप्राश्च साधवश्च नराः सदा ॥ ५
निदाघकाले पानीयं यस्य तिष्ठत्यवारितम् ।
स दुर्गं विषमं कृच्छ्रं न कदाचिदवाप्नुते ॥ ६
बृहस्पतेर्भगवतः पूष्णश्चैव भगस्य च ।
अश्विनोश्चैव वह्नेश्च प्रीतिर्भवति सर्पिषा ॥ ७
परमं भेषजं ह्येतद्यज्ञानामेतदुत्तमम् ।
रसानामुत्तमं चैतत्फलानां चैतदुत्तमम् ॥ ८
फलकामो यशस्कामः पुष्टिकामश्च नित्यदा ।
घृतं दद्याद्द्विजातिभ्यः पुरुषः शुचिरात्मवान् ॥ ९
घृतं मासे आश्वयुजि विप्रेभ्यो यः प्रयच्छति ।
तस्मै प्रयच्छतो रूपं प्रीतौ देवाविहाश्विनौ ॥ १०
पायसं सर्पिषा मिश्रं द्विजेभ्यो यः प्रयच्छति ।
गृहं तस्य न रक्षांसि धर्षयन्ति कदाचन ॥ ११
पिपासया न म्रियते सोपच्छन्दश्च दृश्यते ।
न प्राप्नुयाच्च व्यसनं करकान्यः प्रयच्छति ॥ १२
प्रयतो ब्राह्मणाग्रेभ्यः श्रद्धया परया युतः ।
उपस्पर्शनषड्भागं लभते पुरुषः सदा ॥ १३
यः साधनार्थं काष्ठानि ब्राह्मणेभ्यः प्रयच्छति ।
प्रतापार्थं च राजेन्द्र वृत्तवद्भ्यः सदा नरः ॥ १४
सिध्यन्त्यर्थाः सदा तस्य कार्याणि विविधानि च ।
उपर्युपरि शत्रूणां वपुषा दीप्यते च सः ॥ १५
भगवांश्चास्य सुप्रीतो वह्निर्भवति नित्यशः ।
न तं त्यजन्ते पशवः संग्रामे च जयत्यपि ॥ १६
पुत्राञ्छ्रियं च लभते यश्छत्रं संप्रयच्छति ।
चक्षुर्व्याधिं न लभते यज्ञभागमथाश्नुते ॥ १७
निदाघकाले वर्षे वा यश्छत्रं संप्रयच्छति ।
नास्य कश्चिन्मनोदाहः कदाचिदपि जायते ।
कृच्छ्रात्स विषमाच्चैव क्षिप्रं मोक्षमवाप्नुते ॥ १८
प्रदानं सर्वदानानां शकटस्य विशिष्यते ।
एवमाह महाभागः शाण्डिल्यो भगवानृषिः ॥ १९

इति श्रीमहाभारते अनुशासनपर्वणि
चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

६५

युधिष्ठिर उवाच ।

दह्यमानाय विप्राय यः प्रयच्छत्युपानहौ ।
यत्फलं तस्य भवति तन्मे ब्रूहि पितामह ॥ १

भीष्म उवाच ।

उपानहौ प्रयच्छेद्यो ब्राह्मणेभ्यः समाहितः ।
मर्दते कण्टकान्सर्वान्विषमान्निस्तरत्यपि ।
स शत्रूणामुपरि च संतिष्ठति युधिष्ठिर ॥ २
यानं चाश्वतरीयुक्तं तस्य शुभ्रं विशां पते ।
उपतिष्ठति कौन्तेय रूप्यकाञ्चनभूषणम् ।

शकटं दम्यसंयुक्तं दत्तं भवति चैव हि ॥ ३

युधिष्ठिर उवाच ।

यत्फलं तिलदाने च भूमिदाने च कीर्तितम् ।
गोप्रदानेऽन्नदाने च भूयस्तद्ब्रूहि कौरव ॥ ४

भीष्म उवाच ।

शृणुष्व मम कौन्तेय तिलदानस्य यत्फलम् ।
निशम्य च यथान्यायं प्रयच्छ कुरुसत्तम ॥ ५
पितॄणां प्रथमं भोज्यं तिलाः सृष्टाः स्वयंभुवा ।
तिलदानेन वै तस्मात्पितृपक्षः प्रमोदते ॥ ६
माघमासे तिलान्यस्तु ब्राह्मणेभ्यः प्रयच्छति ।
सर्वसत्त्वसमाकीर्णं नरकं स न पश्यति ॥ ७
सर्वकामैः स यजते यस्तिलैर्यजते पितॄन् ।
न चाकामेन दातव्यं तिलश्राद्धं कथंचन ॥ ८
महर्षेः कश्यपस्यैते गात्रेभ्यः प्रसृतास्तिलाः ।
ततो दिव्यं गता भावं प्रदानेषु तिलाः प्रभो ॥ ९
पौष्टिका रूपदाश्चैव तथा पापविनाशनाः ।
तस्मात्सर्वप्रदानेभ्यस्तिलदानं विशिष्यते ॥ १०
आपस्तम्बश्च मेधावी शङ्खश्च लिखितस्तथा ।
महर्षिर्गौतमश्चापि तिलदानैर्दिवं गताः ॥ ११
तिलहोमपरा विप्राः सर्वे संयतमैथुनाः ।
समा गव्येन हविषा प्रवृत्तिषु च संस्थिताः ॥ १२
सर्वेषामेव दानानां तिलदानं परं स्मृतम् ।
अक्षयं सर्वदानानां तिलदानमिहोच्यते ॥ १३
उत्पन्ने च पुरा हव्ये कुशिकर्षिः परंतप ।
तिलैरग्नित्रयं हुत्वा प्राप्तवान्गतिमुत्तमाम् ॥ १४
इति प्रोक्तं कुरुश्रेष्ठ तिलदानमनुत्तमम् ।
विधानं येन विधिना तिलानामिह शस्यते ॥ १५
अत ऊर्ध्वं निबोधेदं देवानां यष्टुमिच्छताम् ।
समागमं महाराज ब्रह्मणा वै स्वयंभुवा ॥ १६
देवाः समेत्य ब्रह्माणं भूमिभागं यियक्षवः ।
शुभं देशमयाचन्त यजेम इति पार्थिव ॥ १७

देवा ऊचुः ।

भगवंस्त्वं प्रभुर्भूमेः सर्वस्य त्रिदिवस्य च ।
यजेमहि महाभाग यज्ञं भवदनुज्ञया ।
नाननुज्ञातभूमिर्हि यज्ञस्य फलमश्नुते ॥ १८
त्वं हि सर्वस्य जगतः स्थावरस्य चरस्य च ।
प्रभुर्भवसि तस्मात्त्वं समनुज्ञातुमर्हसि ॥ १९

ब्रह्मोवाच ।

ददामि मेदिनीभागं भवद्भ्योऽहं सुरर्षभाः ।
यस्मिन्देशे करिष्यध्वं यज्ञं काश्यपनन्दनाः ॥ २०

देवा ऊचुः ।

भगवन्कृतकामाः स्मो यक्ष्यामस्त्वाप्तदक्षिणैः ।
इमं तु देशं मुनयः पर्युपासन्त नित्यदा ॥ २१

भीष्म उवाच ।

ततोऽगस्त्यश्च कण्वश्च भृगुरत्रिर्वृषाकपिः ।
असितो देवलश्चैव देवयज्ञमुपागमन् ॥ २२
ततो देवा महात्मान ईजिरे यज्ञमच्युत ।
तथा समापयामासुर्यथाकालं सुरर्षभाः ॥ २३
त इष्टयज्ञास्त्रिदशा हिमवत्यचलोत्तमे ।
षष्ठमंशं क्रतोस्तस्य भूमिदानं प्रचक्रिरे ॥ २४
प्रादेशमात्रं भूमेस्तु यो दद्यादनुपस्कृतम् ।
न सीदति स कृच्छ्रेषु न च दुर्गाण्यवाप्नुते ॥ २५
शीतवातातपसहां गृहभूमिं सुसंस्कृताम् ।
प्रदाय सुरलोकस्थः पुण्यान्तेऽपि न चाल्यते ॥ २६
मुदितो वसते प्राज्ञः शक्रेण सह पार्थिव ।
प्रतिश्रयप्रदाता च सोऽपि स्वर्गे महीयते ॥ २७
अध्यापककुले जातः श्रोत्रियो नियतेन्द्रियः ।
गृहे यस्य वसेत्तुष्टः प्रधानं लोकमश्नुते ॥ २८
तथा गवार्थे शरणं शीतवर्षसहं महत् ।

आसप्तमं तारयति कुलं भरतसत्तम ॥ २९
क्षेत्रभूमिं ददल्लोके पुत्र श्रियमवाप्नुयात् ।
रत्नभूमिं प्रदत्त्वा तु कुलवंशं विवर्धयेत् ॥ ३०
न चोषरां न निर्दग्धां महीं दद्यात्कथंचन ।
न श्मशानपरीतां च न च पापनिषेविताम् ॥ ३१
पारक्ये भूमिदेशे तु पितॄणां निर्वपेत्तु यः ।
तद्भूमिस्वामिपितृभिः श्राद्धकर्म विहन्यते ॥ ३२
तस्मात्क्रीत्वा महीं दद्यात्स्वल्पामपि विचक्षणः ।
पिण्डः पितृभ्यो दत्तो वै तस्यां भवति शाश्वतः ॥
अटवीपर्वताश्चैव नदीतीर्थानि यानि च ।
सर्वाण्यस्वामिकान्याहुर्न हि तत्र परिग्रहः ॥ ३४
इत्येतद्भूमिदानस्य फलमुक्तं विशां पते ।
अतः परं तु गोदानं कीर्तयिष्यामि तेऽनघ ॥ ३५
गावोऽधिकास्तपस्विभ्यो यस्मात्सर्वेभ्य एव च ।
तस्मान्महेश्वरो देवस्तपस्ताभिः समास्थितः ॥ ३६
ब्रह्मलोके वसन्त्येताः सोमेन सह भारत ।
आसां ब्रह्मर्षयः सिद्धाः प्रार्थयन्ति परां गतिम् ॥
पयसा हविषा दध्ना शकृताप्यथ चर्मणा ।
अस्थिभिश्चोपकुर्वन्ति शृङ्गैर्वालैश्च भारत ॥ ३८
नासां शीतातपौ स्यातां सदैताः कर्म कुर्वते ।
न वर्षं विषमं वापि दुःखमासां भवत्युत ॥ ३९
ब्राह्मणैः सहिता यान्ति तस्मात्परतरं पदम् ।
एकं गोब्राह्मणं तस्मात्प्रवदन्ति मनीषिणः ॥ ४०
रन्तिदेवस्य यज्ञे ताः पशुत्वेनोपकल्पिताः ।
ततश्चर्मण्वती राजन्गोचर्मभ्यः प्रवर्तिता ॥ ४१
पशुत्वाच्च विनिर्मुक्ताः प्रदानायोपकल्पिताः ।
ता इमा विप्रमुख्येभ्यो यो ददाति महीपते ।
निस्तरेदापदं कृच्छ्रां विषमस्थोऽपि पार्थिव ॥ ४२
गवां सहस्रदः प्रेत्य नरकं न प्रपश्यति ।
सर्वत्र विजयं चापि लभते मनुजाधिप ॥ ४३
अमृतं वै गवां क्षीरमित्याह त्रिदशाधिपः ।
तस्माद्ददाति यो धेनुममृतं स प्रयच्छति ॥ ४४
अग्नीनामव्ययं ह्येतद्धौम्यं वेदविदो विदुः ।
तस्माद्ददाति यो धेनुं स हौम्यं संप्रयच्छति ॥ ४५
स्वर्गो वै मूर्तिमानेष वृषभं यो गवां पतिम् ।
विप्रे गुणयुते दद्यात्स वै स्वर्गे महीयते ॥ ४६
प्राणा वै प्राणिनामेते प्रोच्यन्ते भरतर्षभ ।
तस्माद्ददाति यो धेनुं प्राणान्वै स प्रयच्छति ॥ ४७
गावः शरण्या भूतानामिति वेदविदो विदुः ।
तस्माद्ददाति यो धेनुं शरणं संप्रयच्छति ॥ ४८
न वधार्थं प्रदातव्या न कीनाशे न नास्तिके ।
गोजीविने न दातव्या तथा गौः पुरुषर्षभ ॥ ४९
ददाति तादृशानां वै नरो गाः पापकर्मणाम् ।
अक्षयं नरकं यातीत्येवमाहुर्मनीषिणः ॥ ५०
न कृशां पापवत्सां वा वन्ध्यां रोगान्वितां तथा ।
न व्यङ्गां न परिश्रान्तां दद्याद्गां ब्राह्मणाय वै ॥५१
दशगोसहस्रदः सम्यक्शक्रेण सह मोदते ।
अक्षयाँल्लभते लोकान्नरः शतसहस्रदः ॥ ५२
इत्येतद्गोप्रदानं च तिलदानं च कीर्तितम् ॥
तथा भूमिप्रदानं च शृणुष्वान्ने च भारत ॥ ५३
अन्नदानं प्रधानं हि कौन्तेय परिचक्षते ।
अन्नस्य हि प्रदानेन रन्तिदेवो दिवं गतः ॥ ५४
श्रान्ताय क्षुधितायान्नं यः प्रयच्छति भूमिप ।
स्वायंभुवं महाभागं स पश्यति नराधिप ॥ ५५
न हिरण्यैर्न वासोभिर्नाश्वदानेन भारत ।
प्राप्नुवन्ति नराः श्रेयो यथेहान्नप्रदाः प्रभो ॥ ५६
अन्नं वै परमं द्रव्यमन्नं श्रीश्च परा मता ।
अन्नात्प्राणः प्रभवति तेजो वीर्यं बलं तथा ॥ ५७
सद्यो ददाति यश्चान्नं सदैकाग्रमना नरः ।
न स दुर्गाण्यवाप्नोतीत्येवमाह पराशरः ॥ ५८

अर्चयित्वा यथान्यायं देवेभ्योऽन्नं निवेदयेत् ।
यदन्नो हि नरो राजंस्तदन्नास्तस्य देवताः ॥ ५९
कौमुद्यां शुक्लपक्षे तु योऽन्नदानं करोत्युत ।
स संतरति दुर्गाणि प्रेत्य चानन्त्यमश्नुते ॥ ६०
अभुक्त्वातिथये चान्नं प्रयच्छेद्यः समाहितः ।
स वै ब्रह्मविदां लोकान्प्राप्नुयाद्भरतर्षभ ॥ ६१
सुकृच्छ्रामापदं प्राप्तश्चान्नदः पुरुषस्तरेत् ।
पापं तरति चैवेह दुष्कृतं चापकर्षति ॥ ६२
इत्येतदन्नदानस्य तिलदानस्य चैव ह ।
भूमिदानस्य च फलं गोदानस्य च कीर्तितम् ॥ ६३

इति श्रीमहाभारते अनुशासनपर्वणि
पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

६६

युधिष्ठिर उवाच ।

श्रुतं दानफलं तात यत्त्वया परिकीर्तितम् ।
अन्नं तु ते विशेषेण प्रशस्तमिह भारत ॥ १
पानीयदानं परमं कथं चेह महाफलम् ।
इत्येतच्छ्रोतुमिच्छामि विस्तरेण पितामह ॥ २

भीष्म उवाच ।

हन्त ते वर्तयिष्यामि यथावद्भरतर्षभ ।
गदतस्तन्ममाद्येह शृणु सत्यपराक्रम ।
पानीयदानात्प्रभृति सर्वं वक्ष्यामि तेऽनघ ॥ ३
यदन्नं यच्च पानीयं संप्रदायाश्नुते नरः ।
न तस्मात्परमं दानं किंचिदस्तीति मे मतिः ॥ ४
अन्नात्प्राणभृतस्तात प्रवर्तन्ते हि सर्वशः ।
तस्मादन्नं परं लोके सर्वदानेषु कथ्यते ॥ ५
अन्नाद्बलं च तेजश्च प्राणिनां वर्धते सदा ।
अन्नदानमतस्तस्माच्छ्रेष्ठमाह प्रजापतिः ॥ ६
सावित्र्या ह्यपि कौन्तेय श्रुतं ते वचनं शुभम् ।
यतश्चैतद्यथा चैतद्देवसत्रे महामते ॥ ७
अन्ने दत्ते नरेणेह प्राणा दत्ता भवन्त्युत ।
प्राणदानाद्धि परमं न दानमिह विद्यते ॥ ८
श्रुतं हि ते महाबाहो लोमशस्यापि तद्वचः ।
प्राणान्दत्त्वा कपोताय यत्प्राप्तं शिबिना पुरा ॥ ९
तां गतिं लभते दत्त्वा द्विजस्यान्नं विशां पते ।
गतिं विशिष्टां गच्छन्ति प्राणदा इति नः श्रुतम् ॥
अन्नं चापि प्रभवति पानीयात्कुरुसत्तम ।
नीरजातेन हि विना न किंचित्संप्रवर्तते ॥ ॥ ११
नीरजातश्च भगवान्सोमो ग्रहगणेश्वरः ।
अमृतं च सुधा चैव स्वाहा चैव वषट् तथा ॥१२
अन्नौषध्यो महाराज वीरुधश्च जलोद्भवाः ।
यतः प्राणभृतां प्राणाः संभवन्ति विशां पते ॥१३
देवानाममृतं चान्नं नागानां च सुधा तथा ।
पितॄणां च स्वधा प्रोक्ता पशूनां चापि वीरुधः ॥
अन्नमेव मनुष्याणां प्राणानाहुर्मनीषिणः ।
तच्च सर्वं नरव्याघ्र पानीयात्संप्रवर्तते ॥ १५
तस्मात्पानीयदानाद्वै न परं विद्यते क्वचित् ।
तच्च दद्यान्नरो नित्यं य इच्छेद्भूतिमात्मनः ॥ १६
धन्यं यशस्यमायुष्यं जलदानं विशां पते ।
शत्रूंश्चाप्यधि कौन्तेय सदा तिष्ठति तोयदः ॥ १७
सर्वकामानवाप्नोति कीर्तिं चैवेह शाश्वतीम् ।
प्रेत्य चानन्त्यमाप्नोति पापेभ्यश्च प्रमुच्यते ॥ १८
तोयदो मनुजव्याघ्र स्वर्गं गत्वा महाद्युते ।
अक्षयान्समवाप्नोति लोकानित्यब्रवीन्मनुः ॥ १९

इति श्रीमहाभारते अनुशासनपर्वणि
षट्षष्टितमोऽध्यायः ॥ ६६ ॥

६७

युधिष्ठिर उवाच ।

तिलानां कीदृशं दानमथ दीपस्य चैव ह ।
अन्नानां वाससां चैव भूय एव ब्रवीहि मे ॥ १

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
ब्राह्मणस्य च संवादं यमस्य च युधिष्ठिर ॥ २
मध्यदेशे महान्ग्रामो ब्राह्मणानां बभूव ह ।
गङ्गायमुनयोर्मध्ये यामुनस्य गिरेरधः ॥ ३
पर्णशालेति विख्यातो रमणीयो नराधिप ।
विद्वांसस्तत्र भूयिष्ठा ब्राह्मणाश्चावसंस्तदा ॥ ४
अथ प्राह यमः कंचित्पुरुषं कृष्णवाससम् ।
रक्ताक्षमूर्ध्वरोमाणं काकजङ्घाक्षिनासिकम् ॥ ५
गच्छ त्वं ब्राह्मणग्रामं ततो गत्वा तमानय ।
अगस्त्यं गोत्रतश्चापि नामतश्चापि शर्मिणम् ॥ ६
शमे निविष्टं विद्वांसमध्यापकमनादृतम् ।
मा चान्यमानयेथास्त्वं सगोत्रं तस्य पार्श्वतः ॥ ७
स हि तादृग्गुणस्तेन तुल्योऽध्ययनजन्मना ।
अपत्येषु तथा वृत्ते समस्तेनैव धीमता ।
तमानय यथोद्दिष्टं पूजा कार्या हि तस्य मे ॥ ८
स गत्वा प्रतिकूलं तच्चकार यमशासनम् ।
तमाक्रम्यानयामास प्रतिषिद्धो यमेन यः ॥ ९
तस्मै यमः समुत्थाय पूजां कृत्वा च वीर्यवान् ।
प्रोवाच नीयतामेष सोऽन्य आनीयतामिति ॥ १०
एवमुक्ते तु वचने धर्मराजेन स द्विजः ।
उवाच धर्मराजानं निर्विण्णोऽध्ययनेन वै ।
यो मे कालो भवेच्छेषस्तं वसेयमिहाच्युत ॥ ११

यम उवाच ।

नाहं कालस्य विहितं प्राप्नोमीह कथंचन ।
यो हि धर्मं चरति वै तं तु जानामि केवलम् ॥१२
गच्छ विप्र त्वमद्यैव आलयं स्वं महाद्युते ।
ब्रूहि वा त्वं यथा स्वैरं करवाणि किमिच्युत ॥ १३

ब्राह्मण उवाच ।

यत्तत्र कृत्वा सुमहत्पुण्यं स्यात्तद्ब्रवीहि मे ।
सर्वस्य हि प्रमाणं त्वं त्रैलोक्यस्यापि सत्तम ॥१४

यम उवाच ।

शृणु तत्त्वेन विप्रर्षे प्रदानविधिमुत्तमम् ।
तिलाः परमकं दानं पुण्यं चैवेह शाश्वतम् ॥ १५
तिलाश्च संप्रदातव्या यथाशक्ति द्विजर्षभ ।
नित्यदानात्सर्वकामांस्तिला निर्वर्तयन्त्युत ॥ १६
तिलाञ्श्राद्धे प्रशंसन्ति दानमेतद्ध्यनुत्तमम् ।
तान्प्रयच्छस्व विप्रेभ्यो विधिदृष्टेन कर्मणा ॥ १७
तिला भक्षयितव्याश्च सदा त्वालभनं च तैः ।
कार्यं सततमिच्छद्भिः श्रेयः सर्वात्मना गृहे ॥ १८
तथापः सर्वदा देयाः पेयाश्चैव न संशयः ।
पुष्करिण्यस्तडागानि कूपांश्चैवात्र खानयेत् ॥ १९
एतत्सुदुर्लभतरमिह लोके द्विजोत्तम ।
आपो नित्यं प्रदेयास्ते पुण्यं ह्येतदनुत्तमम् ॥ २०
प्रपाश्च कार्याः पानार्थं नित्यं ते द्विजसत्तम ।
भुक्तेऽप्यथ प्रदेयं ते पानीयं वै विशेषतः ॥ २१
इत्युक्ते स तदा तेन यमदूतेन वै गृहान् ।
नीतश्चकार च तथा सर्वं तद्यमशासनम् ॥ २२
नीत्वा तं यमदूतोऽपि गृहीत्वा शर्मिणं तदा ।
ययौ स धर्मराजाय न्यवेदयत चापि तम् ॥ २३
तं धर्मराजो धर्मज्ञं पूजयित्वा प्रतापवान् ।
कृत्वा च संविदं तेन विससर्ज यथागतम् ॥ २४
तस्यापि च यमः सर्वमुपदेशं चकार ह ।
प्रत्येत्य च स तत्सर्वं चकारोक्तं यमेन तत् ॥ २५
तथा प्रशंसते दीपान्यमः पितृहितेप्सया ।
तस्माद्दीपप्रदो नित्यं संतारयति वै पितॄन् ॥ २६
दातव्याः सततं दीपास्तस्माद्भरतसत्तम ।
देवानां च पितॄणां च चक्षुष्यास्ते मताः प्रभो ॥
रत्नदानं च सुमहत्पुण्यमुक्तं जनाधिप ।
तानि विक्रीय यजते ब्राह्मणो ह्यभयंकरः ॥ २८

यद्वै ददाति विप्रेभ्यो ब्राह्मणः प्रतिगृह्य वै ।
उभयोः स्यात्तदक्षय्यं दातुरादातुरेव च ॥ २९
यो ददाति स्थितः स्थित्यां तादृशाय प्रतिग्रहम् ।
उभयोरक्षयं धर्मं तं मनुः प्राह धर्मवित् ॥ ३०
वाससां तु प्रदानेन स्वदारनिरतो नरः ।
सुवस्त्रश्च सुवेषश्च भवतीत्यनुशुश्रुम ॥ ३१
गावः सुवर्णं च तथा तिलाश्चैवानुवर्णिताः ।
बहुशः पुरुषव्याघ्र वेदप्रामाण्यदर्शनात् ॥ ३२
विवाहांश्चैव कुर्वीत पुत्रानुत्पादयेत च ।
पुत्रलाभो हि कौरव्य सर्वलाभाद्विशिष्यते ॥ ३३

इति श्रीमहाभारते अनुशासनपर्वणि
सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

६८

युधिष्ठिर उवाच ।

भूय एव कुरुश्रेष्ठ दानानां विधिमुत्तमम् ।
कथयस्व महाभाग भूमिदानं विशेषतः ॥ १
पृथिवीं क्षत्रियो दद्याद्ब्राह्मणस्तां स्वकर्मणा ।
विधिवत्प्रतिगृह्णीयान्न त्वन्यो दातुमर्हति ॥ २
सर्ववर्णैस्तु यच्छक्यं प्रदातुं फलकाङ्क्षिभिः ।
वेदे वा यत्समाम्नातं तन्मे व्याख्यातुमर्हसि ॥ ३

भीष्म उवाच ।

तुल्यनामानि देयानि त्रीणि तुल्यफलानि च ।
सर्वकामफलानीह गावः पृथ्वी सरस्वती ॥ ४
यो ब्रूयाच्चापि शिष्याय धर्म्यां ब्राह्मीं सरस्वतीम् ।
पृथिवीगोप्रदानाभ्यां स तुल्यं फलमश्नुते ॥ ५
तथैव गाः प्रशंसन्ति न च देयं ततः परम् ।
संनिकृष्टफलास्ता हि लघ्वर्थाश्च युधिष्ठिर ।
मातरः सर्वभूतानां गावः सर्वसुखप्रदाः ॥ ६
वृद्धिमाकाङ्क्षता नित्यं गावः कार्याः प्रदक्षिणाः ।
मङ्गलायतनं देव्यस्तस्मात्पूज्याः सदैव हि ॥ ७
प्रचोदनं देवकृतं गवां कर्मसु वर्तताम् ।
पूर्वमेवाक्षरं नान्यदभिधेयं कथंचन ॥ ८
प्रचारे वा निपाने वा बुधो नोद्वेजयेत गाः ।
तृषिता ह्यभिवीक्षन्त्यो नरं हन्युः सबान्धवम् ॥
पितृसद्मानि सततं देवतायतनानि च ।
पूयन्ते शकृता यासां पूतं किमधिकं ततः ॥ १०
ग्रासमुष्टिं परगवे दद्यात्संवत्सरं तु यः ।
अकृत्वा स्वयमाहारं व्रतं तत्सार्वकामिकम् ॥ ११
स हि पुत्रान्यशोऽर्थं च श्रियं चाप्यधिगच्छति ।
नाशयत्यशुभं चैव दुःस्वप्नं च व्यपोहति ॥ १२

युधिष्ठिर उवाच ।

देयाः किंलक्षणा गावः काश्चापि परिवर्जयेत् ।
कीदृशाय प्रदातव्या न देयाः कीदृशाय च ॥ १३

भीष्म उवाच ।

असद्वृत्ताय पापाय लुब्धायानृतवादिने ।
हव्यकव्यव्यपेताय न देया गौः कथंचन ॥ १४
भिक्षवे बहुपुत्राय श्रोत्रियायाहिताग्नये ।
दत्त्वा दशगवां दाता लोकानाप्नोत्यनुत्तमान् ॥ १५
यं चैव धर्मं कुरुते तस्य पुण्यफलं च यत् ।
सर्वस्यैवांशभाग्दाता तन्निमित्तं प्रवृत्तयः ॥ १६
यश्चैनमुत्पादयति यश्चैनं त्रायते भयात् ।
यश्चास्य कुरुते वृत्तिं सर्वे ते पितरस्त्रयः ॥ १७
कल्मषं गुरुशुश्रूषा हन्ति मानो महद्यशः ।
अपुत्रतां त्रयः पुत्रा अवृत्तिं दश धेनवः ॥ १८
वेदान्तनिष्ठस्य बहुश्रुतस्य
प्रज्ञानतृप्तस्य जितेन्द्रियस्य ।
शिष्टस्य दान्तस्य यतस्य चैव
भूतेषु नित्यं प्रियवादिनश्च ॥ १९
यः क्षुद्भयाद्वै न विकर्म कुर्या-
न्मृदुर्दान्तश्चातिथेयश्च नित्यम् ।

वृत्तिं विप्रायातिसृजेत तस्मै
यस्तुल्यशीलश्च सपुत्रदारः ॥ २०
शुभे पात्रे ये गुणा गोप्रदाने
तावान्दोषो ब्राह्मणस्वापहारे ।
सर्वावस्थं ब्राह्मणस्वापहारो
दाराश्चैषां दूरतो वर्जनीयाः ॥ २१

इति श्रीमहाभारते अनुशासनपर्वणि
अष्टषष्टितमोऽध्यायः ॥ ६८ ॥

६९

भीष्म उवाच ।

अत्रैव कीर्त्यते सद्भिर्ब्राह्मणस्वाभिमर्शने ।
नृगेण सुमहत्कृच्छ्रं यदवाप्तं कुरूद्वह ॥ १
निविशन्त्यां पुरा पार्थ द्वारवत्यामिति श्रुतिः ।
अदृश्यत महाकूपस्तृणवीरुत्समावृतः ॥ २
प्रयत्नं तत्र कुर्वाणास्तस्मात्कूपाज्जलार्थिनः ।
श्रमेण महता युक्तास्तस्मिंस्तोये सुसंवृते ॥ ३
ददृशुस्ते महाकायं कृकलासमवस्थितम् ।
तस्य चोद्धरणे यत्नमकुर्वंस्ते सहस्रशः ॥ ४
प्रग्रहैश्चर्मपट्टैश्च तं बद्ध्वा पर्वतोपमम् ।
नाशक्नुवन्समुद्धर्तुं ततो जग्मुर्जनार्दनम् ॥ ५
समावृत्योदपानस्य कृकलासः स्थितो महान् ।
तस्य नास्ति समुद्धर्तेत्यथ कृष्णे न्यवेदयन् ॥ ६
स वासुदेवेन समुद्धृतश्च
पृष्टश्च कामान्निजगाद राजा ।
नृगस्तदात्मानमथो न्यवेदय-
त्पुरातनं यज्ञसहस्रयाजिनम् ॥ ७
तथा ब्रुवाणं तमाह माधवः
शुभं त्वया कर्म कृतं न पापकम् ।
कथं भवान्दुर्गतिमीदृशीं गतो
नरेन्द्र तद्ब्रूहि किमेतदीदृशम् ॥ ८
शतं सहस्राणि शतं गवां पुनः
पुनः शतान्यष्ट शतायुतानि ।
त्वया पुरा दत्तमितीह शुश्रुम
नृप द्विजेभ्यः क्व नु तद्गतं तव ॥ ९
नृगस्ततोऽब्रवीत्कृष्णं ब्राह्मणस्याग्निहोत्रिणः ।
प्रोषितस्य परिभ्रष्टा गौरेका मम गोधने ॥ १०
गवां सहस्रे संख्याता तदा सा पशुपैर्मम ।
सा ब्राह्मणाय मे दत्ता प्रेत्यार्थमभिकाङ्क्षता ॥ ११
अपश्यत्परिमार्गंश्च तां गां परगृहे द्विजः ।
ममेयमिति चोवाच ब्राह्मणो यस्य साभवत् ॥ १२
तावुभौ समनुप्राप्तौ विवदन्तौ भृशज्वरौ ।
भवान्दाता भवान्हर्तेत्यथ तौ मां तदोचतुः ॥ १३
शतेन शतसंख्येन गवां विनिमयेन वै ।
याचे प्रतिग्रहीतारं स तु मामब्रवीदिदम् ॥ १४
देशकालोपसंपन्ना दोग्ध्री क्षान्तातिवत्सला ।
स्वादुक्षीरप्रदा धन्या मम नित्यं निवेशने ॥ १५
कृशं च भरते या गौर्मम पुत्रमपस्तनम् ।
न सा शक्या मया हातुमित्युक्त्वा स जगाम ह ॥
ततस्तमपरं विप्रं याचे विनिमयेन वै ।
गवां शतसहस्रं वै तत्कृते गृह्यतामिति ॥ १७

ब्राह्मण उवाच ।

न राज्ञां प्रतिगृह्णामि शक्तोऽहं स्वस्य मार्गणे ।
सैव गौर्दीयतां शीघ्रं ममेति मधुसूदन ॥ १८
रुक्ममश्वांश्च ददतो रजतं स्यन्दनांस्तथा ।
न जग्राह ययौ चापि तदा स ब्राह्मणर्षभः ॥ १९
एतस्मिन्नेव काले तु चोदितः कालधर्मणा ।
पितृलोकमहं प्राप्य धर्मराजमुपागमम् ॥ २०
यमस्तु पूजयित्वा मां ततो वचनमब्रवीत् ।
नान्तः संख्यायते राजंस्तव पुण्यस्य कर्मणः ॥ २१
अस्ति चैव कृतं पापमज्ञानात्तदपि त्वया ।

चरस्व पापं पश्चाद्वा पूर्वं वा त्वं यथेच्छसि ॥ २२
रक्षितास्मीति चोक्तं ते प्रतिज्ञा चानृता तव ।
ब्राह्मणस्वस्य चादानं त्रिविधस्ते व्यतिक्रमः ॥ २३
पूर्वं कृच्छ्रं चरिष्येऽहं पश्चाच्छुभमिति प्रभो ।
धर्मराजं ब्रुवन्नेवं पतितोऽस्मि महीतले ॥ २४
अश्रौषं प्रच्युतश्चाहं यमस्योच्चैः प्रभाषतः ।
वासुदेवः समुद्धर्ता भविता ते जनार्दनः ॥ २५
पूर्णे वर्षसहस्रान्ते क्षीणे कर्मणि दुष्कृते ।
प्राप्स्यसे शाश्वताँल्लोकाञ्जितान्स्वेनैव कर्मणा ॥ २६
कूपेऽऽत्मानमधःशीर्षमपश्यं पतितं च ह ।
तिर्यग्योनिमनुप्राप्तं न तु मामजहात्स्मृतिः ॥ २७
त्वया तु तारितोऽस्म्यद्य किमन्यत्र तपोबलात् ।
अनुजानीहि मां कृष्ण गच्छेयं दिवमद्य वै ॥ २८
अनुज्ञातः स कृष्णेन नमस्कृत्य जनार्दनम् ।
विमानं दिव्यमास्थाय ययौ दिवमरिंदम ॥ २९
ततस्तस्मिन्दिवं प्राप्ते नृगे भरतसत्तम ।
वासुदेव इमं श्लोकं जगाद कुरुनन्दन ॥ ३०
ब्राह्मणस्वं न हर्तव्यं पुरुषेण विजानता ।
ब्राह्मणस्वं हृतं हन्ति नृगं ब्राह्मणगौरिव ॥ ३१
सतां समागमः सद्भिर्नाफलः पार्थ विद्यते ।
विमुक्तं नरकात्पश्य नृगं साधुसमागमात् ॥ ३२
प्रदानं फलवत्तत्र द्रोहस्तत्र तथाफलः ।
अपचारं गवां तस्माद्वर्जयेत युधिष्ठिर ॥ ३३

इति श्रीमहाभारते अनुशासनपर्वणि
एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

७०

युधिष्ठिर उवाच ।

दत्तानां फलसंप्राप्तिं गवां प्रब्रूहि मेऽनघ ।
विस्तरेण महाबाहो न हि तृप्यामि कथ्यताम् ॥ १

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
ऋषेरुद्दालकेर्वाक्यं नाचिकेतस्य चोभयोः ॥ २
ऋषिरुद्दालकिर्दीक्षामुपगम्य ततः सुतम् ।
त्वं मामुपचरस्वेति नाचिकेतमभाषत ।
समाप्ते नियमे तस्मिन्महर्षिः पुत्रमब्रवीत् ॥ ३
उपस्पर्शनसक्तस्य स्वाध्यायनिरतस्य च ।
इध्मा दर्भाः सुमनसः कलशश्चाभितो जलम् ।
विस्मृतं मे तदादाय नदीतीरादिहाव्रज ॥ ४
गत्वानवाप्य तत्सर्वं नदीवेगसमाप्लुतम् ।
न पश्यामि तदित्येवं पितरं सोऽब्रवीन्मुनिः ॥ ५
क्षुत्पिपासाश्रमाविष्टो मुनिरुद्दालकिस्तदा ।
यमं पश्येति तं पुत्रमशपत्स महातपाः ॥ ६
तथा स पित्राभिहतो वाग्वज्रेण कृताञ्जलिः ।
प्रसीदेति ब्रुवन्नेव गतसत्त्वोऽपतद्भुवि ॥ ७
नाचिकेतं पिता दृष्ट्वा पतितं दुःखमूर्छितः ।
किं मया कृतमित्युक्त्वा निपपात महीतले ॥ ८
तस्य दुःखपरीतस्य स्वं पुत्रमुपगूहतः ।
व्यतीतं तदहःशेषं सा चोग्रा तत्र शर्वरी ॥ ९
पित्र्येणाश्रुप्रपातेन नाचिकेतः कुरूद्वह ।
प्रास्पन्दच्छयने कौश्ये वृष्ट्या सस्यमिवाप्लुतम् ॥ १०
स पर्यपृच्छत्तं पुत्रं श्लाघ्यं प्रत्यागतं पुनः ।
दिव्यैर्गन्धैः समादिग्धं क्षीणस्वप्नमिवोत्थितम् ॥ ११
अपि पुत्र जिता लोकाः शुभास्ते स्वेन कर्मणा ।
दिष्ट्या चासि पुनः प्राप्तो न हि ते मानुषं वपुः ॥
प्रत्यक्षदर्शी सर्वस्य पित्रा पृष्टो महात्मना ।
अन्वर्थं तं पितुर्मध्ये महर्षीणां न्यवेदयत् ॥ १३
कुर्वन्भवच्छासनमाशु यातो
ह्यहं विशालां रुचिरप्रभावाम् ।
वैवस्वतीं प्राप्य सभामपश्यं

सहस्रशो योजनहैमभौमाम् ।। १४
दृष्ट्वैव मामभिमुखमापतन्तं
गृहं निवेद्यासनमादिदेश ।
वैवस्वतोऽर्घ्यादिभिरर्हणैश्च
भवत्कृते पूजयामास मां सः ।। १५
ततस्त्वहं तं शनकैरवोचं
वृतं सदस्यैरभिपूज्यमानम् ।
प्राप्तोऽस्मि ते विषयं धर्मराज
लोकानर्हे यान्स्म तान्मे विधत्स्व ।। १६
यमोऽब्रवीन्मां न मृतोऽसि सौम्य
यमं पश्येत्याह तु त्वां तपस्वी ।
पिता प्रदीप्ताग्निसमानतेजा
न तच्छक्यमनृतं विप्र कर्तुम् ।। १७
दृष्टस्तेऽहं प्रतिगच्छस्व तात
शोचत्यसौ तव देहस्य कर्ता ।
ददामि किं चापि मनःप्रणीतं
प्रियातिथे तव कामान्वृणीष्व ।। १८
तेनैवमुक्तस्तमहं प्रत्यवोचं
प्राप्तोऽस्मि ते विषयं दुर्निवर्त्यम् ।
इच्छाम्यहं पुण्यकृतां समृद्धा-
ल्लोँकान्द्रष्टुं यदि तेऽहं वरार्हः ।। १९
यानं समारोप्य तु मां स देवो
वाहैर्युक्तं सुप्रभं भानुमन्तम् ।
संदर्शयामास तदा स्म लोका-
न्सर्वांस्तदा पुण्यकृतां द्विजेन्द्र ।। २०
अपश्यं तत्र वेश्मानि तैजसानि कृतात्मनाम् ।
नानासंस्थानरूपाणि सर्वरत्नमयानि च ।। २१
चन्द्रमण्डलशुभ्राणि किङ्किणीजालवन्ति च ।
अनेकशतभौमानि सान्तर्जलवनानि च ।। २२
वैडूर्यार्कप्रकाशानि रूप्यरुक्ममयानि च ।
तरुणादित्यवर्णानि स्थावराणि चराणि च ।। २३
भक्ष्यभोज्यमयाञ्शैलान्वासांसि शयनानि च ।
सर्वकामफलांश्चैव वृक्षान्भवनसंस्थितान् ।। २४
नद्यो वीथ्यः सभा वापी दीर्घिकाश्चैव सर्वशः ।
घोषवन्ति च यानानि युक्तान्येव सहस्रशः ।। २५
क्षीरस्रवा वै सरितो गिरींश्च
सर्पिस्तथा विमलं चापि तोयम् ।
वैवस्वतस्यानुमतांश्च देशा-
नदृष्टपूर्वान्सुबहूनपश्यम् ।। २६
सर्वं दृष्ट्वा तदहं धर्मराज-
मवोचं वै प्रभविष्णुं पुराणम् ।
क्षीरस्यैताः सर्पिषश्चैव नद्यः
शश्वत्स्रोताः कस्य भोज्याः प्रदिष्टाः ।। २७
यमोऽब्रवीद्विद्धि भोज्यास्त्वमेता
ये दातारः साधवो गोरसानाम् ।
अन्ये लोकाः शाश्वता वीतशोकाः
समाकीर्णा गोप्रदाने रतानाम् ।। २८
न त्वेवासां दानमात्रं प्रशस्तं
पात्रं कालो गोविशेषो विधिश्च ।
ज्ञात्वा देया विप्र गवान्तरं हि
दुःखं ज्ञातुं पावकादित्यभूतम् ।। २९
स्वाध्यायाढ्यो योऽतिमात्रं तपस्वी
वैतानस्थो ब्राह्मणः पात्रमासाम् ।
कृच्छ्रोत्सृष्टाः पोषणाभ्यागताश्च
द्वारैरेतैर्गोविशेषाः प्रशस्ताः ।। ३०
तिस्रो रात्रीरद्भिरुपोष्य भूमौ
तृप्ता गावस्तर्पितेभ्यः प्रदेयाः ।
वत्सैः प्रीताः सुप्रजाः सोपचारा-
स्त्र्यहं दत्त्वा गोरसैर्वर्तितव्यं ।। ३१
दत्त्वा धेनुं सुव्रतां कांस्यदोहां

कल्याणवत्सामपलायिनीं च ।
यावन्ति लोमानि भवन्ति तस्या-
स्तावद्वर्षाण्यश्नुते स्वर्गलोकम् ॥ ३२
तथानड्वाहं ब्राह्मणाय प्रदाय
दान्तं धुर्यं बलवन्तं युवानम् ।
कुलानुजीवं वीर्यवन्तं बृहन्तं
भुङ्क्ते लोकान्संमितान्धेनुदस्य ॥ ३३
गोषु क्षान्तं गोशरण्यं कृतज्ञं
वृत्तिग्लानं तादृशं पात्रमाहुः ।
वृत्तिग्लाने संभ्रमे वा महार्थे
कृष्यर्थे वा होमहेतोः प्रसूत्याम् ॥ ३४
गुर्वर्थे वा बालपुष्ट्याभिषङ्गा-
द्गावो दातुं देशकालोऽविशिष्टः ।
अन्तर्जाताः सुक्रयज्ञानलब्धाः
प्राणक्रीता निर्जिताश्चौदकाश्च ॥ ३५

नाचिकेत उवाच ।

श्रुत्वा वैवस्वतवचस्तमहं पुनरब्रुवम् ।
अगोमी गोप्रदातॄणां कथं लोकान्निगच्छति ॥ ३६
ततो यमोऽब्रवीद्धीमान्गोप्रदाने परां गतिम् ।
गोप्रदानानुकल्पं तु गामृते सन्ति गोप्रदाः ॥ ३७
अलाभे यो गवां दद्याद्घृतधेनुं यतव्रतः ।
तस्यैता घृतवाहिन्यः क्षरन्ते वत्सला इव ॥ ३८
घृतालाभे च यो दद्यात्तिलधेनुं यतव्रतः ।
स दुर्गात्तारितो धेन्वा क्षीरनद्यां प्रमोदते ॥ ३९
तिलालाभे च यो दद्याज्जलधेनुं यतव्रतः ।
स कामप्रवहां शीतां नदीमेतामुपाश्नुते ॥ ४०
एवमादीनि मे तत्र धर्मराजो न्यदर्शयत् ।
दृष्ट्वा च परमं हर्षमवापमहमच्युत ॥ ४१
निवेदये चापि प्रियं भवत्सु
क्रतुर्महानल्पधनप्रचारः ।
प्राप्तो मया तात स मत्प्रसूतः
प्रपत्स्यते वेदविधिप्रवृत्तः ॥ ४२
शापो ह्ययं भवतोऽनुग्रहाय
प्राप्तो मया यत्र दृष्टो यमो मे ।
दानव्युष्टिं तत्र दृष्ट्वा महार्थां
निःसंदिग्धं दानधर्मांश्चरिष्ये ॥ ४३
इदं च मामब्रवीद्धर्मराजः
पुनः पुनः संप्रहृष्टो द्विजर्षे ।
दानेन तात प्रयतोऽभूः सदैव
विशेषतो गोप्रदानं च कुर्याः ॥ ४४
शुद्धो ह्यर्थो नावमन्यः स्वधर्मा-
त्पात्रे देयं देशकालोपपन्ने ।
तस्माद्गावस्ते नित्यमेव प्रदेया
मा भूच्च ते संशयः कश्चिदत्र ॥ ४५
एताः पुरा अददन्नित्यमेव
शान्तात्मानो दानपथे निविष्टाः ।
तपांस्युग्राण्यप्रतिशङ्कमाना-
स्ते वै दानं प्रददुश्चापि शक्त्या ॥ ४६
काले शक्त्या मत्सरं वर्जयित्वा
शुद्धात्मानः श्रद्धिनः पुण्यशीलाः ।
दत्त्वा तप्त्वा लोकममुं प्रपन्ना
देदीप्यन्ते पुण्यशीलाश्च नाके ॥ ४७
एतद्दानं न्यायलब्धं द्विजेभ्यः
पात्रे दत्तं प्रापणीयं परीक्ष्य ।
काम्याष्टम्यां वर्तितव्यं दशाहं
रसैर्गवां शकृता प्रस्रवैर्वा ॥ ४८
वेदव्रती स्याद्वृषभप्रदाता
वेदावाप्तिर्गोयुगस्य प्रदाने
तीर्थावाप्तिर्गोप्रयुक्तप्रदाने
पापोत्सर्गः कपिलायाः प्रदाने ॥ ४९

गामप्येकां कपिलां संप्रदाय
न्यायोपेतां कल्मषाद्विप्रमुच्येत् ।
गवां रसात्परमं नास्ति किंचि-
द्गवां दानं सुमहत्तद्वदन्ति ॥ ५०
गावो लोकान्धारयन्ति क्षरन्त्यो
गावश्चान्नं संजनयन्ति लोके ।
यस्तज्जानन्न गवां हार्दमेति
स वै गन्ता निरयं पापचेताः ॥ ५१
यत्ते दातुं गोसहस्रं शतं वा
शतार्धं वा दश वा साधुवत्साः ।
अप्येकां वा साधये ब्राह्मणाय
सास्यामुष्मिन्पुण्यतीर्था नदी वै ॥ ५२
प्राप्त्या पुष्ट्या लोकसंरक्षणेन
गावस्तुल्याः सूर्यपादैः पृथिव्याम् ।
शब्दश्चैकः संततिश्चोपभोग-
स्तस्माद्गोदः सूर्य इवाभिभाति ॥ ५३
गुरुं शिष्यो वरयेद्गोप्रदाने
स वै वक्ता नियतं स्वर्गदाता ।
विधिज्ञानां सुमहानेष धर्मो
विधिं ह्याद्यं विधयः संश्रयन्ति ॥ ५४
एतद्दानं न्यायलब्धं द्विजेभ्यः
पात्रे दत्त्वा प्रापयेथाः परीक्ष्य ।
त्वय्याशंसन्त्यमरा मानवाश्च
वयं चापि प्रसृते पुण्यशीलाः ॥ ५५
इत्युक्तोऽहं धर्मराज्ञा महर्षे
धर्मात्मानं शिरसाभिप्रणम्य ।
अनुज्ञातस्तेन वैवस्वतेन
प्रत्यागमं भगवत्पादमूलम् ॥ ५६

इति श्रीमहाभारते अनुशासनपर्वणि
सप्ततितमोऽध्यायः ॥ ७० ॥

७१

युधिष्ठिर उवाच ।

उक्तं वै गोप्रदानं ते नाचिकेतमृषिं प्रति ।
माहात्म्यमपि चैवोक्तमुद्देशेन गवां प्रभो ॥ १
नृगेण च यथा दुःखमनुभूतं महात्मना ।
एकापराधादज्ञानात्पितामह महामते ॥ २
द्वारवत्यां यथा चासौ निविशन्त्यां समुद्धृतः ।
मोक्षहेतुरभूत्कृष्णस्तदप्यवधृतं मया ॥ ३
किं त्वस्ति मम संदेहो गवां लोकं प्रति प्रभो ।
तत्त्वतः श्रोतुमिच्छामि गोदा यत्र विशन्त्युत ॥ ४

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
यथापृच्छत्पद्मयोनिमेतदेव शतक्रतुः ॥ ५

शक्र उवाच ।

स्वर्लोकवासिनां लक्ष्मीमभिभूय त्वया त्विषा ।
गोलोकवासिनः पश्ये व्रजतः संशयोऽत्र मे ॥ ६
कीदृशा भगवँल्लोका गवां तद्ब्रूहि मेऽनघ ।
यानावसन्ति दातार एतदिच्छामि वेदितुम् ॥ ७
कीदृशाः किंफलाः कःस्वित्परमस्तत्र वै गुणः ।
कथं च पुरुषास्तत्र गच्छन्ति विगतज्वराः ॥ ८
कियत्कालं प्रदानस्य दाता च फलमश्नुते ।
कथं बहुविधं दानं स्यादल्पमपि वा कथम् ॥ ९
बह्वीनां कीदृशं दानमल्पानां वापि कीदृशम् ।
अदत्त्वा गोप्रदाः सन्ति केन वा तच्च शंस मे ॥ १०
कथं च बहुदाता स्यादल्पदात्रा समः प्रभो ।
अल्पप्रदाता बहुदः कथं च स्यादिहेश्वर ॥ ११
कीदृशी दक्षिणा चैव गोप्रदाने विशिष्यते ।
एतत्तथ्येन भगवन्मम शंसितुमर्हसि ॥ १२

इति श्रीमहाभारते अनुशासनपर्वणि
एकसप्ततितमोऽध्यायः ॥ ७१ ॥

७२

ब्रह्मोवाच ।

योऽयं प्रश्नस्त्वया पृष्टो गोप्रदानाधिकारवान् ।
नास्य प्रष्टास्ति लोकेऽस्मिंस्त्वत्तोऽन्यो हि शतक्रतो ॥
सन्ति नानाविधा लोका यांस्त्वं शक्र न पश्यसि ।
पश्यामि यानहं लोकानेकपत्न्यश्च याः स्त्रियः ॥२
कर्मभिश्चापि सुशुभैः सुव्रता ऋषयस्तथा ।
सशरीरा हि तान्यान्ति ब्राह्मणाः शुभवृत्तयः ॥ ३
शरीरन्यासमोक्षेण मनसा निर्मलेन च ।
स्वप्नभूतांश्च ताँल्लोकान्पश्यन्तीहापि सुव्रताः ॥ ४
ते तु लोकाः सहस्राक्ष शृणु यादृग्गुणान्विताः ।
न तत्र क्रमते कालो न जरा न च पापकम् ।
तथान्यन्नाशुभं किंचिन्न व्याधिस्तत्र न क्लमः ॥ ५
यद्यच्च गावो मनसा तस्मिन्वाञ्छन्ति वासव ।
तत्सर्वं प्रापयन्ति स्म मम प्रत्यक्षदर्शनात् ।
कामगाः कामचारिण्यः कामात्कामांश्च भुञ्जते ॥६
वाप्यः सरांसि सरितो विविधानि वनानि च ।
गृहाणि पर्वताश्चैव यावद्द्रव्यं च किंचन ॥ ७
मनोज्ञं सर्वभूतेभ्यः सर्वं तत्र प्रदृश्यते ।
ईदृशान्विद्धि ताँल्लोकान्नास्ति लोकस्ततोऽधिकः ॥
तत्र सर्वसहाः क्षान्ता वत्सला गुरुवर्तिनः ।
अहंकारैर्विरहिता यान्ति शक्र नरोत्तमाः ॥ ९

यः सर्वमांसानि न भक्षयीत
पुमान्सदा यावदन्ताय युक्तः ।
मातापित्रोरर्चिता सत्ययुक्तः
शुश्रूषिता ब्राह्मणानामनिन्द्यः ॥ १०
अक्रोधनो गोषु तथा द्विजेषु
धर्मे रतो गुरुशुश्रूषकश्च ।
यावज्जीवं सत्यवृत्ते रतश्च
दाने रतो यः क्षमी चापराधे ॥ ११
मृदुर्दान्तो देवपरायणश्च
सर्वातिथिश्चापि तथा दयावान् ।
ईदृग्गुणो मानवः संप्रयाति
लोकं गवां शाश्वतं चाव्ययं च ॥ १२
न पारदारी पश्यति लोकमेनं
न वै गुरुघ्नो न मृषाप्रलापी ।
सदापवादी ब्राह्मणः शान्तवेदो
दोषैरन्यैर्यश्च युक्तो दुरात्मा ॥ १३
न मित्रध्रुङ्नैकृतिकः कृतघ्नः
शठोऽनृजुर्धर्मविद्वेषकश्च ।
न ब्रह्महा मनसापि प्रपश्ये-
द्गवां लोकं पुण्यकृतां निवासम् ॥ १४

एतत्ते सर्वमाख्यातं नैपुणेन सुरेश्वर ।
गोप्रदानरतानां तु फलं शृणु शतक्रतो ॥ १५
दायाद्यलब्धैरर्थैर्यो गाः क्रीत्वा संप्रयच्छति ।
धर्मार्जितधनक्रीतान्स लोकानश्नुतेऽक्षयान् ॥ १६
यो वै द्यूते धनं जित्वा गाः क्रीत्वा संप्रयच्छति ।
स दिव्यमयुतं शक्र वर्षाणां फलमश्नुते ॥ १७
दायाद्या यस्य वै गावो न्यायपूर्वैरुपार्जिताः ।
प्रदत्तास्ताः प्रदातॄणां संभवन्त्यक्षया ध्रुवाः ॥ १८
प्रतिगृह्य च यो दद्याद्गाः सुशुद्धेन चेतसा ।
तस्यापीहाक्षयाँल्लोकान्ध्रुवान्विद्धि शचीपते ॥ १९
जन्मप्रभृति सत्यं च यो ब्रूयान्नियतेन्द्रियः ।
गुरुद्विजसहः क्षान्तस्तस्य गोभिः समा गतिः ॥२०
न जातु ब्राह्मणो वाच्यो यदवाच्यं शचीपते ।
मनसा गोषु न द्रुह्येद्गोवृत्तिर्गोनुकम्पकः ॥ २१
सत्ये धर्मे च निरतस्तस्य शक्र फलं शृणु ।
गोसहस्रेण समिता तस्य धेनुर्भवत्युत ॥ २२
क्षत्रियस्य गुणैरेभिरन्वितस्य फलं शृणु ।
तस्यापि शततुल्या गौर्भवतीति विनिश्चयः ॥ २३

वैश्यस्यैते यदि गुणास्तस्य पञ्चाशतं भवेत् ।
शूद्रस्यापि विनीतस्य चतुर्भागफलं स्मृतम् ॥ २४

एतच्चैवं योऽनुतिष्ठेत युक्तः
सत्येन युक्तो गुरुशुश्रूषया च ।
दान्तः क्षान्तो देवतार्ची प्रशान्तः
शुचिर्बुद्धो धर्मशीलोऽनहंवाक् ॥ २५

महत्फलं प्राप्नुते स द्विजाय
दत्त्वा दोग्ध्रीं विधिनानेन धेनुम् ।
नित्यं दद्यादेकभक्तः सदा च
सत्ये स्थितो गुरुशुश्रूषिता च ॥ २६

वेदाध्यायी गोषु यो भक्तिमांश्च
नित्यं दृष्ट्वा योऽभिनन्देत गाश्च ।
आ जातितो यश्च गवां नमेत
इदं फलं शक्र निबोध तस्य ॥ २७

यत्स्यादिष्ट्वा राजसूये फलं तु
यत्स्यादिष्ट्वा बहुना काञ्चनेन ।
एतत्तुल्यं फलमस्याहुरग्र्यं
सर्वे सन्तस्त्वृषयो ये च सिद्धाः ॥ २८

योऽग्रं भक्तात्किंचिदप्राश्य दद्या-
द्गोभ्यो नित्यं गोव्रती सत्यवादी ।
शान्तो वृद्धो गोसहस्रस्य पुण्यं
संवत्सरेणाप्नुयात्पुण्यशीलः ॥ २९

य एकं भक्तमश्नीयाद्दद्यादेकं गवां च यत् ।
दश वर्षाण्यनन्तानि गोव्रती गोनुकम्पकः ॥ ३०

एकेनैव च भक्तेन यः क्रीत्वा गां प्रयच्छति ।
यावन्ति यस्य प्रोक्तानि दिवसानि शतक्रतो ।
तावच्छतानां स गवां फलमाप्नोति शाश्वतम् ॥ ३१

ब्राह्मणस्य फलं हीदं क्षत्रियेऽभिहितं शृणु ।
पञ्चवार्षिकमेतत्तु क्षत्रियस्य फलं स्मृतम् ।
ततोऽर्धेन तु वैश्यस्य शूद्रो वैश्यार्धतः स्मृतः ॥ ३२

यश्चात्मविक्रयं कृत्वा गाः क्रीत्वा संप्रयच्छति ।
यावतीः स्पर्शयेद्वा वै तावत्तु फलमश्नुते ।
लोम्नि लोम्नि महाभाग लोकाश्चास्याक्षयाः स्मृताः ॥

संग्रामेष्वर्जयित्वा तु यो वै गाः संप्रयच्छति ।
आत्मविक्रयतुल्यास्ताः शाश्वता विद्धि कौशिक ॥

अलाभे यो गवां दद्यात्तिलधेनुं यतव्रतः ।
दुर्गात्स तारितो धेन्वा क्षीरनद्यां प्रमोदते ॥ ३५

न त्वेवासां दानमात्रं प्रशस्तं
पात्रं कालो गोविशेषो विधिश्च ।
कालज्ञानं विप्र गवान्तरं हि
दुःखं ज्ञातुं पावकादित्यभूतम् ॥ ३६

स्वाध्यायाढ्यं शुद्धयोनिं प्रशान्तं
वैतानस्थं पापभीरुं कृतज्ञम् ।
गोषु क्षान्तं नातितीक्ष्णं शरण्यं
वृत्तिग्लानं तादृशं पात्रमाहुः ॥ ३७

वृत्तिग्लाने सीदति चातिमात्रं
कृष्यर्थं वा होमहेतोः प्रसूत्याम् ।
गुर्वर्थं वा बालसंवृद्धये वा
धेनुं दद्याद्देशकाले विशिष्टे ॥ ३८

अन्तर्जाताः सुक्रयज्ञानलब्धाः
प्राणक्रीता निर्जिताश्चौकजाश्च ।
कृच्छ्रोत्सृष्टाः पोषणाभ्यागताश्च
द्वारैरेतैर्गोविशेषाः प्रशस्ताः ॥ ३९

बलान्विता शीलवयोपपन्नाः
सर्वाः प्रशंसन्ति सुगन्धवत्यः ।
यथा हि गङ्गा सरितां वरिष्ठा
तथार्जुनीनां कपिला वरिष्ठा ॥ ४०

तिस्रो रात्रीस्त्वद्भिरुपोष्य भूमौ
तृप्ता गावस्तर्पितेभ्यः प्रदेयाः ।
वत्सैः पुष्टैः क्षीरपैः सुप्रचारा-

स्त्र्यहं दत्त्वा गोरसैर्वर्तितव्यम् ॥ ४१

दत्त्वा धेनुं सुव्रतां साधुवत्सां
कल्याणवृत्तामपलायिनीं च ।
यावन्ति लोमानि भवन्ति तस्या-
स्तावन्ति वर्षाणि वसत्यमुत्र ॥ ४२

तथानड्वाहं ब्राह्मणायाथ धुर्यं
दत्त्वा युवानं बलिनं विनीतम् ।
हलस्य वोढारमनन्तवीर्यं
प्राप्नोति लोकान्दशधेनुदस्य ॥ ४३

कान्तारे ब्राह्मणान्गाश्च यः परित्राति कौशिक ।
क्षेमेण च विमुच्येत तस्य पुण्यफलं शृणु ।
अश्वमेधक्रतोस्तुल्यं फलं भवति शाश्वतम् ॥ ४४

मृत्युकाले सहस्राक्ष यां वृत्तिमनुकाङ्क्षते ।
लोकान्बहुविधान्दिव्यान्यद्वास्य हृदि वर्तते ॥ ४५

तत्सर्वं समवाप्नोति कर्मणा तेन मानवः ।
गोभिश्च समनुज्ञातः सर्वत्र स महीयते ॥ ४६

यस्त्वेतेनैव विधिना गां वनेष्वनुगच्छति ।
तृणगोमयपर्णाशी निःस्पृहो नियतः शुचिः ॥ ४७

अकामं तेन वस्तव्यं मुदितेन शतक्रतो ।
मम लोके सुरैः सार्धं लोके यत्रापि चेच्छति ॥४८

इति श्रीमहाभारते अनुशासनपर्वणि
द्वासप्ततितमोऽध्यायः ॥ ७२ ॥

७३

इन्द्र उवाच ।

जानन्यो गामपहरेद्विक्रीयाद्वार्थकारणात् ।
एतद्विज्ञातुमिच्छामि का नु तस्य गतिर्भवेत् ॥ १

ब्रह्मोवाच ।

भक्षार्थं विक्रयार्थं वा येऽपहारं हि कुर्वते ।
दानार्थं वा ब्राह्मणाय तत्रेदं श्रूयतां फलम् ॥ २

विक्रयार्थं हि यो हिंस्याद्भक्षयेद्वा निरङ्कुशः ।
घातयानं हि पुरुषं येऽनुमन्येयुरर्थिनः ॥ ३

घातकः खादको वापि तथा यश्चानुमन्यते ।
यावन्ति तस्या लोमानि तावद्वर्षाणि मज्जति ॥ ४

ये दोषा यादृशाश्चैव द्विजयज्ञोपघातके ।
विक्रये चापहारे च ते दोषा वै स्मृताः प्रभो ॥ ५

अपहृत्य तु यो गां वै ब्राह्मणाय प्रयच्छति ।
यावद्दाने फलं तस्यास्तावन्निरयमृच्छति ॥ ६

सुवर्णं दक्षिणामाहुर्गोप्रदाने महाद्युते ।
सुवर्णं परमं ह्युक्तं दक्षिणार्थमसंशयम् ॥ ७

गोप्रदानं तारयते सप्त पूर्वांस्तथा परान् ।
सुवर्णं दक्षिणां दत्त्वा तावद्द्विगुणमुच्यते ॥ ८

सुवर्णं परमं दानं सुवर्णं दक्षिणा परा ।
सुवर्णं पावनं शक्र पावनानां परं स्मृतम् ॥ ९

कुलानां पावनं प्राहुर्जातरूपं शतक्रतो ।
एषा मे दक्षिणा प्रोक्ता समासेन महाद्युते ॥ १०

भीष्म उवाच ।

एतत्पितामहेनोक्तमिन्द्राय भरतर्षभ ।
इन्द्रो दशरथायाह रामायाह पिता तथा ॥ ११

राघवोऽपि प्रियभ्रात्रे लक्ष्मणाय यशस्विने ।
ऋषिभ्यो लक्ष्मणेनोक्तमरण्ये वसता विभो ॥ १२

पारंपर्यागतं चेदमृषयः संशितव्रताः ।
दुर्धरं धारयामासू राजानश्चैव धार्मिकाः ।
उपाध्यायेन गदितं मम चेदं युधिष्ठिर ॥ १३

य इदं ब्राह्मणो नित्यं वदेद्ब्राह्मणसंसदि ।
यज्ञेषु गोप्रदानेषु द्वयोरपि समागमे ॥ १४

तस्य लोकाः किलाक्षय्या दैवतैः सह नित्यदा ।
इति ब्रह्मा स भगवानुवाच परमेश्वरः ॥ १५

इति श्रीमहाभारते अनुशासनपर्वणि
त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥

७४

युधिष्ठिर उवाच ।

विस्तम्भितोऽहं भवता धर्मान्प्रवदता विभो ।
प्रवक्ष्यामि तु संदेहं तन्मे ब्रूहि पितामह ॥ १
व्रतानां किं फलं प्रोक्तं कीदृशं वा महाद्युते ।
नियमानां फलं किं च स्वधीतस्य च किं फलम् ॥
दमस्येह फलं किं च वेदानां धारणे च किम् ।
अध्यापने फलं किं च सर्वमिच्छामि वेदितुम् ॥ ३
अप्रतिग्राहके किं च फलं लोके पितामह ।
तस्य किं च फलं दृष्टं श्रुतं यः संप्रयच्छति ॥ ४
स्वकर्मनिरतानां च शूराणां चापि किं फलम् ।
सत्ये च किं फलं प्रोक्तं ब्रह्मचर्ये च किं फलम् ॥
पितृशुश्रूषणे किं च मातृशुश्रूषणे तथा ।
आचार्यगुरुशुश्रूषास्वनुक्रोशानुकम्पने ॥ ६
एतत्सर्वमशेषेण पितामह यथातथम् ।
वेत्तुमिच्छामि धर्मज्ञ परं कौतूहलं हि मे ॥ ७

भीष्म उवाच ।

यो व्रतं वै यथोद्दिष्टं तथा संप्रतिपद्यते ।
अखण्डं सम्यगारब्धं तस्य लोकाः सनातनाः ॥ ८
नियमानां फलं राजन्प्रत्यक्षमिह दृश्यते ।
नियमानां क्रतूनां च त्वयावाप्तमिदं फलम् ॥ ९
स्वधीतस्यापि च फलं दृश्यतेऽमुत्र चेह च ।
इहलोकेऽर्थवान्नित्यं ब्रह्मलोके च मोदते ॥ ॥ १०
दमस्य तु फलं राजञ्शृणु त्वं विस्तरेण मे ।
दान्ताः सर्वत्र सुखिनो दान्ताः सर्वत्र निर्वृताः ॥
यत्रेच्छागामिनो दान्ताः सर्वशत्रुनिषूदनाः ।
प्रार्थयन्ति च यद्दान्ता लभन्ते तन्न संशयः ॥ १२
युज्यन्ते सर्वकामैर्हि दान्ताः सर्वत्र पाण्डव ।
स्वर्गे तथा प्रमोदन्ते तपसा विक्रमेण च ॥ १३
दानैर्यज्ञैश्च विविधैर्यथा दान्ताः क्षमान्विताः ।
दाता कुप्यति नो दान्तस्तस्माद्दानात्परो दमः ॥१४
यस्तु दद्यादकुप्यन्हि तस्य लोकाः सनातनाः ।
क्रोधो हन्ति हि यद्दानं तस्माद्दानात्परो दमः ॥१५
अदृश्यानि महाराज स्थानान्ययुतशो दिवि ।
ऋषीणां सर्वलोकेषु यानीतो यान्ति देवताः ॥१६
दमेन यानि नृपते गच्छन्ति परमर्षयः ।
कामयाना महत्स्थानं तस्माद्दानात्परो दमः ॥ १७
अध्यापकः परिक्लेशादक्षयं फलमश्नुते ।
विधिवत्पावकं हुत्वा ब्रह्मलोके नराधिप ॥ १८
अधीत्यापि हि यो वेदान्न्यायविद्भ्यः प्रयच्छति ।
गुरुकर्मप्रशंसी च सोऽपि स्वर्गे महीयते ॥ १९
क्षत्रियोऽध्ययने युक्तो यजने दानकर्मणि ।
युद्धे यश्च परित्राता सोऽपि स्वर्गे महीयते ॥ २०
वैश्यः स्वकर्मनिरतः प्रदानाल्लभते महत् ।
शूद्रः स्वकर्मनिरतः स्वर्गं शुश्रूषयार्च्छति ॥ २१
शूरा बहुविधाः प्रोक्तास्तेषामर्थांश्च मे शृणु ॥
शूरान्वयानां निर्दिष्टं फलं शूरस्य चैव ह ॥ २२
यज्ञशूरा दमे शूराः सत्यशूरास्तथापरे ।
युद्धशूरास्तथैवोक्ता दानशूराश्च मानवाः ॥ २३
बुद्धिशूरास्तथैवान्ये क्षमाशूरास्तथापरे ।
आर्जवे च तथा शूराः शमे वर्तन्ति मानवाः ॥२४
तैस्तैस्तु नियमैः शूरा बहवः सन्ति चापरे ।
वेदाध्ययनशूराश्च शूराश्चाध्यापने रताः ॥ २५
गुरुशुश्रूषया शूराः पितृशुश्रूषयापरे ।
मातृशुश्रूषया शूरा भैक्ष्यशूरास्तथापरे ॥ २६
सांख्यशूराश्च बहवो योगशूरास्तथापरे ।
अरण्ये गृहवासे च शूराश्चातिथिपूजने ।
सर्वे यान्ति परांल्लोकान्स्वकर्मफलनिर्जितान् ॥२७
धारणं सर्ववेदानां सर्वतीर्थावगाहनम् ।
सत्यं च ब्रुवतो नित्यं समं वा स्यान्न वा समम् ॥

अश्वमेधसहस्रं च सत्यं च तुलया धृतम् ।
अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते ॥ २९
सत्येन सूर्यस्तपति सत्येनाग्निः प्रदीप्यते ।
सत्येन मारुतो वाति सर्वं सत्ये प्रतिष्ठितम् ॥३०
सत्येन देवान्प्रीणाति पितॄन्वै ब्राह्मणांस्तथा ।
सत्यमाहुः परं धर्मं तस्मात्सत्यं न लङ्घयेत् ॥ ३१
मुनयः सत्यनिरता मुनयः सत्यविक्रमाः ।
मुनयः सत्यशपथास्तस्मात्सत्यं विशिष्यते ।
सत्यवन्तः स्वर्गलोके मोदन्ते भरतर्षभ ॥ ३२
दमः सत्यफलावाप्तिरुक्ता सर्वात्मना मया ।
असंशयं विनीतात्मा सर्वः स्वर्गे महीयते ॥ ३३
ब्रह्मचर्यस्य तु गुणाञ्शृणु मे वसुधाधिप ।
आ जन्ममरणाद्यस्तु ब्रह्मचारी भवेदिह ।
न तस्य किंचिदप्राप्यमिति विद्धि जनाधिप ॥ ३४
बह्व्यः कोट्यस्त्वृषीणां तु ब्रह्मलोके वसन्त्युत ।
सत्ये रतानां सततं दान्तानामूर्ध्वरेतसाम् ॥ ३५
ब्रह्मचर्यं दहेद्राजन्सर्वपापान्युपासितम् ।
ब्राह्मणेन विशेषेण ब्राह्मणो ह्यग्निरुच्यते ॥ ३६
प्रत्यक्षं च तवाप्येतद्ब्राह्मणेषु तपस्विषु ।
बिभेति हि यथा शक्रो ब्रह्मचारिप्रधर्षितः ।
तद्ब्रह्मचर्यस्य फलमृषीणामिह दृश्यते ॥ ३७
मातापित्रोः पूजने यो धर्मस्तमपि मे शृणु ।
शुश्रूषते यः पितरं न चासूयेत्कथंचन ।
मातरं वानहंवादी गुरुमाचार्यमेव च ॥ ३८
तस्य राजन्फलं विद्धि स्वर्लोके स्थानमुत्तमम् ।
न च पश्येत नरकं गुरुशुश्रूषुरात्मवान् ॥ ३९

इति श्रीमहाभारते अनुशासनपर्वणि
चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥

७५

युधिष्ठिर उवाच ।

विधिं गवां परमहं श्रोतुमिच्छामि तत्त्वतः ।
येन ताञ्शाश्वताँल्लोकानखिलानश्नुवीमहि ॥ १

भीष्म उवाच ।

न गोदानात्परं किंचिद्विद्यते वसुधाधिप ।
गौर्हि न्यायागता दत्ता सद्यस्तारयते कुलम् ॥ २
सतामर्थे सम्यगुत्पादितो यः
स वै क्लृप्तः सम्यगिष्टः प्रजाभ्यः ।
तस्मात्पूर्वं ह्यादिकाले प्रवृत्तं
गवां दाने शृणु राजन्विधिं मे ॥ ३
पुरा गोषूपनीतासु गोषु संदिग्धदर्शिना ।
मान्धात्रा प्रकृतं प्रश्नं बृहस्पतिरभाषत ॥ ४
द्विजातिमभिसत्कृत्य श्वः कालमभिवेद्य च ।
प्रदानार्थे नियुञ्जीत रोहिणीं नियतव्रतः ॥ ५
आह्वानं च प्रयुञ्जीत समङ्गे बहुलेति च ।
प्रविश्य च गवां मध्यमिमां श्रुतिमुदाहरेत् ॥ ६
गौर्मे माता गोवृषभः पिता मे
दिवं शर्म जगती मे प्रतिष्ठा ।
प्रपद्यैवं शर्वरीमुष्य गोषु
मुनिर्वाणीमुत्सृजेद्गोप्रदाने ॥ ७
स तामेकां निशां गोभिः समसख्यः समव्रतः ।
ऐकात्म्यगमनात्सद्यः कल्मषाद्विप्रमुच्यते ॥ ८
उत्सृष्टवृषवत्सा हि प्रदेया सूर्यदर्शने ।
त्रिदिवं प्रतिपत्तव्यमर्थवादाशिषः स्तवाः ॥ ९
ऊर्जस्विन्य ऊर्जमेधाश्च यज्ञो
गर्भोऽमृतस्य जगतश्च प्रतिष्ठा ।
क्षितौ राधःप्रभवः शश्वदेव
प्राजापत्याः सर्वमित्यर्थवादः ॥ १०

गावो ममैनः प्रणुदन्तु सौर्या-
स्तथा सौम्याः स्वर्गयानाय सन्तु ।
आम्नाता मे ददतीराश्रयं तु
तथानुक्ताः सन्तु सर्वाशिषो मे ॥ ११
शेषोत्सर्गे कर्मभिर्देहमोक्षे
सरस्वत्यः श्रेयसि संप्रवृत्ताः ।
यूयं नित्यं पुण्यकर्मोपवाह्या
दिशध्वं मे गतिमिष्टां प्रपन्नाः ॥ १२
या वै यूयं सोऽहमद्यैकभावो
युष्मान्दत्त्वा चाहमात्मप्रदाता ।
मनश्च्युता मनएवोपपन्नाः
संधुक्षध्वं सौम्यरूपोग्ररूपाः ॥ १३
एवं तस्याग्रे पूर्वमर्धं वदेत
गवां दाता विधिवत्पूर्वदृष्टम् ।
प्रतिब्रूयाच्छेषमर्धं द्विजातिः
प्रतिगृह्णन्वै गोप्रदाने विधिज्ञः ॥ १४
गां ददानीति वक्तव्यमर्घ्यवस्त्रवसुप्रदः ।
ऊधस्या भरितव्या च वैष्णवीति च चोदयेत् ॥
नाम संकीर्तयेत्तस्या यथासंख्योत्तरं स वै ।
फलं षड्विंशदष्टौ च सहस्राणि च विंशतिः ॥ १६
एवमेतान्गुणान्वृद्धान्गवादीनां यथाक्रमम् ।
गोप्रदाता समाप्नोति समस्तानष्टमे क्रमे ॥ १७
गोदः शीली निर्भयश्चार्घदाता
न स्याद्दुःखी वसुदाता च कामी ।
ऊधस्योढा भारत यश्च विद्वा-
न्व्याख्यातास्ते वैष्णवाश्चन्द्रलोकाः ॥ १८
गा वै दत्त्वा गोव्रती स्यात्त्रिरात्रं
निशां चैकां संवसेतेह ताभिः ।
काम्याष्टम्यां वर्तितव्यं त्रिरात्रं
रसैर्वा गोः शकृता प्रस्नवैर्वा ॥ १९
वेदव्रती स्यादृषभप्रदाता
वेदावाप्तिर्गोयुगस्य प्रदाने ।
तथा गवां विधिमासाद्य यज्वा
लोकानग्र्यान्विन्दते नाविधिज्ञः ॥ २०
कामान्सर्वान्पार्थिवानेकसंस्था-
न्यो वै दद्यात्कामदुघां च धेनुम् ।
सम्यक्ताः स्युर्हव्यकव्यौघवत्य-
स्तासामुक्ष्णां ज्यायसां संप्रदानम् ॥ २१
न चाशिष्यायाव्रतायोपकुर्या-
न्नाश्रद्दधानाय न वक्रबुद्धये ।
गुह्यो ह्ययं सर्वलोकस्य धर्मो
नेमं धर्मं यत्र तत्र प्रजल्पेत् ॥ २२
सन्ति लोके श्रद्दधाना मनुष्याः
सन्ति क्षुद्रा राक्षसा मानुषेषु ।
येषां दानं दीयमानं ह्यनिष्टं
नास्तिक्यं चाप्याश्रयन्ते ह्यपुण्याः ॥ २३
बार्हस्पत्यं वाक्यमेतन्निशम्य
ये राजानो गोप्रदानानि कृत्वा ।
लोकान्प्राप्ताः पुण्यशीलाः सुवृत्ता-
स्तान्मे राजन्कीर्त्यमानान्निबोध ॥ २४
उशीनरो विष्वगश्वो नृगश्च
भगीरथो विश्रुतो यौवनाश्वः ।
मान्धाता वै मुचुकुन्दश्च राजा
भूरिद्युम्नो नैषधः सोमकश्च ॥ २५
पुरूरवा भरतश्चक्रवर्ती
यस्यान्वये भारताः सर्व एव ।
तथा वीरो दाशरथिश्च रामो
ये चाप्यन्ये विश्रुताः कीर्तिमन्तः ॥ २६
तथा राजा पृथुकर्मा दिलीपो
दिवं प्राप्तो गोप्रदाने विधिज्ञः ।

यज्ञैर्दानैस्तपसा राजधर्मै-
मान्धाताभूद्गोप्रदानैश्च युक्तः ॥ २७
तस्मात्पार्थ त्वमपीमां मयोक्तां
बार्हस्पतीं भारतीं धारयस्व ।
द्विजाग्र्येभ्यः संप्रयच्छ प्रतीतो
गाः पुण्या वै प्राप्य राज्यं कुरूणाम् ॥२८

वैशंपायन उवाच ।

तथा सर्वं कृतवान्धर्मराजो
भीष्मेणोक्तो विधिवद्गोप्रदाने ।
स मान्धातुर्देवदेवोपदिष्टं
सम्यग्धर्मं धारयामास राजा ॥ २९
इति नृप सततं गवां प्रदाने
यवशकलान्सह गोमयैः पिबानः ।
क्षितितलशयनः शिखी यतात्मा
वृष इव राजवृषस्तदा बभूव ॥ ३०
स नृपतिरभवत्सदैव ताभ्यः
प्रयतमना ह्यभिसंस्तुवंश्च गा वै ।
नृपधुरि च न गामयुङ्क्त भूय-
स्तुरगवरैरगमच्च यत्र तत्र ॥ ॥ ३१

इति श्रीमहाभारते अनुशासनपर्वणि
पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥

७६

वैशंपायन उवाच ।

ततो युधिष्ठिरो राजा भूयः शांतनवं नृप ।
गोदाने विस्तरं धीमान्पप्रच्छ विनयान्वितः ॥ १

युधिष्ठिर उवाच ।

गोप्रदाने गुणान्सम्यक्पुनः प्रब्रूहि भारत ।
न हि तृप्याम्यहं वीर शृण्वानोऽमृतमीदृशम् ॥ २
इत्युक्तो धर्मराजेन तदा शांतनवो नृप ।
सम्यगाह गुणांस्तस्मै गोप्रदानस्य केवलान् ॥ ३

भीष्म उवाच ।

वत्सलां गुणसंपन्नां तरुणीं वस्त्रसंवृताम् ।
दत्त्वेदृशीं गां विप्राय सर्वपापैः प्रमुच्यते ॥ ४
असुर्या नाम ते लोका गां दत्त्वा तत्र गच्छति ।
पीतोदकां जग्धतृणां नष्टदुग्धां निरिन्द्रियाम् ॥ ५
जरोग्रामुपयुक्तार्थां जीर्णां कूपमिवाजलम् ।
दत्त्वा तमः प्रविशति द्विजं क्लेशेन योजयेत् ॥ ६
दुष्टा रुष्टा व्याधिता दुर्बला वा
न दातव्या याश्च मूल्यैरदत्तैः ।
क्लेशैर्विप्रं योऽफलैः संयुनक्ति
तस्यावीर्याश्चाफलाश्चैव लोकाः ॥ ७
बलान्विताः शीलवयोपपन्नाः
सर्वाः प्रशंसन्ति सुगन्धवत्यः ।
यथा हि गङ्गा सरितां वरिष्ठा
तथार्जुनीनां कपिला वरिष्ठा ॥ ८

युधिष्ठिर उवाच ।

कस्मात्समाने बहुलाप्रदाने
सद्भिः प्रशस्तं कपिलाप्रदानम् ।
विशेषमिच्छामि महानुभाव
श्रोतुं समर्थो हि भवान्प्रवक्तुम् ॥ ९

भीष्म उवाच ।

वृद्धानां ब्रुवतां तात श्रुतं मे यत्प्रभाषसे ।
वक्ष्यामि तदशेषेण रोहिण्यो निर्मिता यथा ॥१०
प्रजाः सृजेति व्यादिष्टः पूर्वं दक्षः स्वयंभुवा ।
असृजद्वृत्तिमेवाग्रे प्रजानां हितकाम्यया ॥ ११
यथा ह्यमृतमाश्रित्य वर्तयन्ति दिवौकसः ।
तथा वृत्तिं समाश्रित्य वर्तयन्ति प्रजा विभो ॥ १२
अचरेभ्यश्च भूतेभ्यश्चराः श्रेष्ठास्ततो नराः ।
ब्राह्मणाश्च ततः श्रेष्ठास्तेषु यज्ञाः प्रतिष्ठिताः ॥ १३

यैरैराप्यायते सोमः च स गोषु प्रतिष्ठितः ।
सर्वे देवाः प्रमोदन्ते पूर्ववृत्तास्ततः प्रजाः ॥ १४
एतान्येव तु भूतानि प्राक्रोशन्वृत्तिकाङ्क्षया ।
वृत्तिदं चान्वपद्यन्त तृषिताः पितृमातृवत् ॥ १५
इतीदं मनसा गत्वा प्रजासर्गार्थमात्मनः ।
प्रजापतिर्बलाधानममृतं प्रापिबत्तदा ॥ १६
स गतस्तस्य तृप्तिं तु गन्धं सुरभिमुद्गिरन् ।
ददर्शोद्गारसंवृत्तां सुरभिं मुखजां सुताम् ॥ १७
सासृजत्सौरभेयीस्तु सुरभिर्लोकमातरः ।
सुवर्णवर्णाः कपिलाः प्रजानां वृत्तिधेनवः ॥ १८
तासाममृतवर्णानां क्षरन्तीनां समन्ततः ।
बभूवामृतजः फेनः स्रवन्तीनामिवोर्मिजः ॥ १९
स वत्समुखविभ्रष्टो भवस्य भुवि तिष्ठतः ।
शिरस्यवाप तत्क्रुद्धः स तदोदैक्षत प्रभुः ।
ललाटप्रभवेनाक्ष्णा रोहिणीः प्रदहन्निव ॥ २०
तत्तेजस्तु ततो रौद्रं कपिला गा विशां पते ।
नानावर्णत्वमनयन्मेघानिव दिवाकरः ॥ २१
यास्तु तस्मादपक्रम्य सोममेवाभिसंश्रिताः ।
यथोत्पन्नाः स्ववर्णस्थास्ता नीता नान्यवर्णताम् ॥२२
अथ क्रुद्धं महादेवं प्रजापतिरभाषत ।
अमृतेनावसिक्तस्त्वं नोच्छिष्टं विद्यते गवाम् ॥ २३
यथा ह्यमृतमादाय सोमो विष्यन्दते पुनः ।
तथा क्षीरं क्षरन्त्येता रोहिण्योऽमृतसंभवाः ॥२४
न दुष्यत्यनिलो नाग्निर्न सुवर्णं न चोदधिः ।
नामृतेनामृतं पीतं वत्सपीता न वत्सला ॥ २५
इमाँल्लोकान्भरिष्यन्ति हविषा प्रस्रवेन च ।
आसामैश्वर्यमश्नीहि सर्वामृतमयं शुभम् ॥ २६
वृषभं च ददौ तस्मै सह ताभिः प्रजापतिः ।
प्रसादयामास मनस्तेन रुद्रस्य भारत ॥ २७
प्रीतश्चापि महादेवश्चकार वृषभं तदा ।
ध्वजं च वाहनं चैव तस्मात्स वृषभध्वजः ॥ २८
ततो देवैर्महादेवस्तदा पशुपतिः कृतः ।
ईश्वरः स गवां मध्ये वृषाङ्क इति चोच्यते ॥ २९
एवमव्यग्रवर्णानां कपिलानां महौजसाम् ।
प्रदाने प्रथमः कल्पः सर्वासामेव कीर्तितः ॥ ३०
लोकज्येष्ठा लोकवृत्तिप्रवृत्ता
रुद्रोपेताः सोमविष्यन्दभूताः ।
सौम्याः पुण्याः कामदाः प्राणदाश्च
गा वै दत्त्वा सर्वकामप्रदः स्यात् ॥ ३१
इमं गवां प्रभवविधानमुत्तमं
पठन्सदा शुचिरतिमङ्गलप्रियः ।
विमुच्यते कलिकलुषेण मानवः
प्रियं सुतान्पशुधनमाप्नुयात्तथा ॥ ३२
हव्यं कव्यं तर्पणं शान्तिकर्म
यानं वासो वृद्धबालस्य पुष्टिम् ।
एतान्सर्वान्गोप्रदाने गुणान्वै
दाता राजन्नाप्नुयाद्वै सदैव ॥ ३३

वैशंपायन उवाच ।

पितामहस्याथ निशम्य वाक्यं
राजा सह भ्रातृभिराजमीढः ।
सौवर्णकांस्योपदुहास्ततो गाः
पार्थो ददौ ब्राह्मणसत्तमेभ्यः ॥ ३४
तथैव तेभ्योऽभिददौ द्विजेभ्यो
गवां सहस्राणि शतानि चैव ।
यज्ञान्समुद्दिश्य च दक्षिणार्थे
लोकान्विजेतुं परमां च कीर्तिम् ॥ ३५

इति श्रीमहाभारते अनुशासनपर्वणि
षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

७७

भीष्म उवाच

एतस्मिन्नेव काले तु वसिष्ठमृषिसत्तमम् ।
इक्ष्वाकुवंशजो राजा सौदासो ददतां वरः ॥ १
सर्वलोकचरं सिद्धं ब्रह्मकोशं सनातनम् ।
पुरोहितमिदं प्रष्टुमभिवाद्योपचक्रमे ॥ २

सौदास उवाच ।

त्रैलोक्ये भगवन्किंस्वित्पवित्रं कथ्यतेऽनघ ।
यत्कीर्तयन्सदा मर्त्यः प्राप्नुयात्पुण्यमुत्तमम् ॥ ३

भीष्म उवाच ।

तस्मै प्रोवाच वचनं प्रणताय हितं तदा ।
गवामुपनिषद्विद्वान्नमस्कृत्य गवां शुचिः ॥ ४
गावः सुरभिगन्धिन्यस्तथा गुग्गुलुगन्धिकाः ।
गावः प्रतिष्ठा भूतानां गावः स्वस्त्ययनं महत् ॥ ५
गावो भूतं भविष्यच्च गावः पुष्टिः सनातनी ।
गावो लक्ष्म्यास्तथा मूलं गोषु दत्तं न नश्यति ।
अन्नं हि सततं गावो देवानां परमं हविः ॥ ६
स्वाहाकारवषट्कारौ गोषु नित्यं प्रतिष्ठितौ ।
गावो यज्ञस्य हि फलं गोषु यज्ञाः प्रतिष्ठिताः ॥ ७
सायं प्रातश्च सततं होमकाले महामते ।
गावो ददति वै होम्यमृषिभ्यः पुरुषर्षभ ॥ ८
कानिचिद्यानि दुर्गाणि दुष्कृतानि कृतानि च ।
तरन्ति चैव पाप्मानं धेनुं ये ददति प्रभो ॥ ९
एकां च दशगुर्दद्याद्दश दद्याच्च गोशती ।
शतं सहस्रगुर्दद्यात्सर्वे तुल्यफला हि ते ॥ १०
अनाहिताग्निः शतगुरयज्वा च सहस्रगुः ।
समृद्धो यश्च कीनाशो नार्घ्यमर्हन्ति ते त्रयः ॥ ११
कपिलां ये प्रयच्छन्ति सवत्सां कांस्यदोहनाम् ।
सुव्रतां वस्त्रसंवीतामुभौ लोकौ जयन्ति ते ॥ १२
युवानमिन्द्रियोपेतं शतेन सह यूथपम् ।
गवेन्द्रं ब्राह्मणेन्द्राय भूरिशृङ्गमलंकृतम् ॥ १३
वृषभं ये प्रयच्छन्ति श्रोत्रियाय परंतप ।
ऐश्वर्यं तेऽभिजायन्ते जायमानाः पुनः पुनः ॥ १४
नाकीर्तयित्वा गाः सुप्यान्नास्मृत्य पुनरुत्पतेत् ।
सायं प्रातर्नमस्येच्च गास्ततः पुष्टिमाप्नुयात् ॥ १५
गवां मूत्रपुरीषस्य नोद्विजेत कदाचन ।
न चासां मांसमश्नीयाद्गवां व्युष्टिं तथाश्नुते ॥ १६
गाश्च संकीर्तयेन्नित्यं नावमन्येत गास्तथा ।
अनिष्टं स्वप्नमालक्ष्य गां नरः संप्रकीर्तयेत् ॥ १७
गोमयेन सदा स्नायाद्गोकरीषे च संविशेत् ।
श्लेष्ममूत्रपुरीषाणि प्रतिघातं च वर्जयेत् ॥ १८
सार्द्रचर्मणि भुञ्जीत निरीक्षन्वारुणीं दिशम् ।
वाग्यतः सर्पिषा भूमौ गवां व्युष्टिं तथाश्नुते ॥ १९
घृतेन जुहुयादग्निं घृतेन स्वस्ति वाचयेत् ।
घृतं दद्याद्घृतं प्राशेद्गवां व्युष्टिं तथाश्नुते ॥ २०
गोमत्या विद्यया धेनुं तिलानामभिमन्त्र्य यः ।
रसरत्नमयीं दद्यान्न स शोचेत्कृताकृते ॥ २१
गावो मामुपतिष्ठन्तु हेमशृङ्गाः पयोमुचः ।
सुरभ्यः सौरभेयाश्च सरितः सागरं यथा ॥ २२
गावः पश्यन्तु मां नित्यं गावः पश्याम्यहं सदा ।
गावोऽस्माकं वयं तासां यतो गावस्ततो वयम् ॥ २३
एवं रात्रौ दिवा चैव समेषु विषमेषु च ।
महाभयेषु च नरः कीर्तयन्मुच्यते भयात् ॥ २४

इति श्रीमहाभारते अनुशासनपर्वणि
सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥

७८

वसिष्ठ उवाच ।

शतं वर्षसहस्राणां तपस्तप्तं सुदुश्चरम् ।
गोभिः पूर्वविसृष्टाभिर्गच्छेम श्रेष्ठतामिति ॥ १

लोकेऽस्मिन्दक्षिणानां च सर्वासां वयमुत्तमाः ।
भवेम न च लिप्येम दोषेणेति परंतप ॥ २
स एव चेतसा तेन हतो लिप्येत सर्वदा ।
शकृता च पवित्रार्थं कुर्वीरन्देवमानुषाः ॥ ३
तथा सर्वाणि भूतानि स्थावराणि चराणि च ।
प्रदातारश्च गोलोकान्गच्छेयुरिति मानद ॥ ४
ताभ्यो वरं ददौ ब्रह्मा तपसोऽन्ते स्वयं प्रभुः ।
एवं भवत्विति विभुर्लोकांस्तारयतेति च ॥ ५
उत्तस्थुः सिद्धिकामास्ता भूतभव्यस्य मातरः ।
तपसोऽन्ते महाराज गावो लोकपरायणाः ॥ ६
तस्माद्गावो महाभागाः पवित्रं परमुच्यते ।
तथैव सर्वभूतानां गावस्तिष्ठन्ति मूर्धनि ॥ ७
समानवत्सां कपिलां धेनुं दत्त्वा पयस्विनीम् ।
सुव्रतां वस्त्रसंवीतां ब्रह्मलोके महीयते ॥ ८
रोहिणीं तुल्यवत्सां तु धेनुं दत्त्वा पयस्विनीम् ।
सुव्रतां वस्त्रसंवीतां सूर्यलोके महीयते ॥ ९
समानवत्सां शबलां धेनुं दत्त्वा पयस्विनीम् ।
सुव्रतां वस्त्रसंवीतां सोमलोके महीयते ॥ १०
समानवत्सां श्वेतां तु धेनुं दत्त्वा पयस्विनीम् ।
सुव्रतां वस्त्रसंवीतामिन्द्रलोके महीयते ॥ ११
समानवत्सां कृष्णां तु दत्त्वा धेनुं पयस्विनीम् ।
सुव्रतां वस्त्रसंवीतामग्निलोके महीयते ॥ १२
समानवत्सां धूम्रां तु दत्त्वा धेनुं पयस्विनीम् ।
सुव्रतां वस्त्रसंवीतां याम्यलोके महीयते ॥ १३
अपां फेनसवर्णां तु सवत्सां कांस्यदोहनाम् ।
प्रदाय वस्त्रसंवीतां वारुणं लोकमश्नुते ॥ १४
वातरेणुसवर्णां तु सवत्सां कांस्यदोहनाम् ।
प्रदाय वस्त्रसंवीतां वायुलोके महीयते ॥ १५
हिरण्यवर्णां पिङ्गाक्षीं सवत्सां कांस्यदोहनाम् ।
प्रदाय वस्त्रसंवीतां कौबेरं लोकमश्नुते ॥ १६
पलालधूम्रवर्णां तु सवत्सां कांस्यदोहनाम् ।
प्रदाय वस्त्रसंवीतां पितृलोके महीयते ॥ १७
सवत्सां पीवरीं दत्त्वा शितिकण्ठामलंकृताम् ।
वैश्वदेवमसंबाधं स्थानं श्रेष्ठं प्रपद्यते ॥ १८
समानवत्सां गौरीं तु धेनुं दत्त्वा पयस्विनीम् ।
सुव्रतां वस्त्रसंवीतां वसूनां लोकमश्नुते ॥ १९
पाण्डुकम्बलवर्णां तु सवत्सां कांस्यदोहनाम् ।
प्रदाय वस्त्रसंवीतां साध्यानां लोकमश्नुते ॥ २०
वैराटपृष्ठमुक्षाणं सर्वरत्नैरलंकृतम् ।
प्रदाय मरुतां लोकानजरान्प्रतिपद्यते ॥ २१
वत्सोपपन्नां नीलाङ्गां सर्वरत्नसमन्विताम् ।
गन्धर्वाप्सरसां लोकान्दत्त्वा प्राप्नोति मानवः ॥२२
शितिकण्ठमनड्वाहं सर्वरत्नैरलंकृतम् ।
दत्त्वा प्रजापतेर्लोकान्विशोकः प्रतिपद्यते ॥ २३
गोप्रदानरतो याति भित्त्वा जलदसंचयान् ।
विमानेनार्कवर्णेन दिवि राजन्विराजता ॥ २४
तं चारुवेषाः सुश्रोण्यः सहस्रं वरयोषितः ।
रमयन्ति नरश्रेष्ठ गोप्रदानरतं नरम् ॥ २५
वीणानां वल्लकीनां च नूपुराणां च शिञ्जितैः ।
हासैश्च हरिणाक्षीणां प्रसुप्तः प्रतिबोध्यते ॥ २६

यावन्ति लोमानि भवन्ति धेन्वा-
स्तावन्ति वर्षाणि महीयते सः ।
स्वर्गाच्च्युतश्चापि ततो नृलोके
कुले समुत्पत्स्यति गोमिनां सः ॥ २७

इति श्रीमहाभारते अनुशासनपर्वणि
अष्टसप्ततितमोऽध्यायः ॥ ७८ ॥

७९

वसिष्ठ उवाच ।

घृतक्षीरप्रदा गावो घृतयोन्यो घृतोद्भवाः ।
घृतनद्यो घृतावर्तास्ता मे सन्तु सदा गृहे ॥ १

घृतं मे हृदये नित्यं घृतं नाभ्यां प्रतिष्ठितम् ।
घृतं सर्वेषु गात्रेषु घृतं मे मनसि स्थितम् ॥ २
गावो ममाग्रतो नित्यं गावः पृष्ठत एव च ।
गावो मे सर्वतश्चैव गवां मध्ये वसाम्यहम् ॥ ३
इत्याचम्य जपेत्सायं प्रातश्च पुरुषः सदा ।
यदह्ना कुरुते पापं तस्मात्स परिमुच्यते ॥ ४
प्रासादा यत्र सौवर्णा वसोर्धारा च यत्र सा ।
गन्धर्वाप्सरसो यत्र तत्र यान्ति सहस्रदाः ॥ ५
नवनीतपङ्काः क्षीरोदा: दधिशैवलसंकुलाः ।
वहन्ति यत्र नद्यो वै तत्र यान्ति सहस्रदाः ॥ ६
गवां शतसहस्रं तु यः प्रयच्छेद्यथाविधि ।
परामृद्धिमवाप्याथ स गोलोके महीयते ॥ ७
दश चोभयतः प्रेत्य मातापित्रोः पितामहान् ।
दधाति सुकृताँल्लोकान्पुनाति च कुलं नरः ॥ ८
धेन्वाः प्रमाणेन समप्रमाणां
धेनुं तिलानामपि च प्रदाय ।
पानीयदाता च यमस्य लोके
न यातनां कांचिदुपैति तत्र ॥ ९
पवित्रमग्र्यं जगतः प्रतिष्ठा
दिवौकसां मातरोऽथाप्रमेयाः ।
अन्वालभेद्दक्षिणतो व्रजेच्च
दद्याच्च पात्रे प्रसमीक्ष्य कालम् ॥ १०
धेनुं सवत्सां कपिलां भूरिशृङ्गां
कांस्योपदोहां वसनोत्तरीयाम् ।
प्रदाय तां गाहति दुर्विगाह्यां
याम्यां सभां वीतभयो मनुष्यः ॥ ११
सुरूपा बहुरूपाश्च विश्वरूपाश्च मातरः ।
गावो मामुपतिष्ठन्तामिति नित्यं प्रकीर्तयेत् ॥ १२
नातः पुण्यतरं दानं नातः पुण्यतरं फलम् ।
नातो विशिष्टं लोकेषु भूतं भवितुमर्हति ॥ १३
त्वचा लोम्नाथ शृङ्गैश्च वालैः क्षीरेण मेदसा ।
यज्ञं वहन्ति संभूय किमस्त्यभ्यधिकं ततः ॥ १४
यया सर्वमिदं व्याप्तं जगत्स्थावरजङ्गमम् ।
तां धेनुं शिरसा वन्दे भूतभव्यस्य मातरम् ॥ १५
गुणवचनसमुच्चयैकदेशो
नृवर मयैष गवां प्रकीर्तितस्ते ।
न हि परमिह दानमस्ति गोभ्यो
भवति न चापि परायणं तथान्यत् ॥ १६

भीष्म उवाच ।

परमिदमिति भूमिपो विचिन्त्य
प्रवरमृषेर्वचनं ततो महात्मा ।
व्यसृजत नियतात्मवान्द्विजेभ्यः
सुबहु च गोधनमाप्तवांश्च लोकान् ॥ १७

इति श्रीमहाभारते अनुशासनपर्वणि
एकोनाशीतितमोऽध्यायः ॥ ७९ ॥

८०

युधिष्ठिर उवाच ।

पवित्राणां पवित्रं यच्छ्रेष्ठं लोके च यद्भवेत् ।
पावनं परमं चैव तन्मे ब्रूहि पितामह ॥ १

भीष्म उवाच ।

गावो महार्थाः पुण्याश्च तारयन्ति च मानवान् ।
धारयन्ति प्रजाश्चेमाः पयसा हविषा तथा ॥ २
न हि पुण्यतमं किंचिद्गोभ्यो भरतसत्तम ।
एताः पवित्राः पुण्याश्च त्रिषु लोकेष्वनुत्तमाः ॥ ३
देवानामुपरिष्टाच्च गावः प्रतिवसन्ति वै ।
दत्त्वा चैता नरपते यान्ति स्वर्गं मनीषिणः ॥ ४
मान्धाता यौवनाश्वश्च ययातिर्नहुषस्तथा ।
गावो ददन्तः सततं सहस्रशतसंमिताः ।
गताः परमकं स्थानं देवैरपि सुदुर्लभम् ॥ ५
अपि चात्र पुरावृत्तं कथयिष्यामि तेऽनघ ॥ ६

ऋषीणामुत्तमं धीमान्कृष्णद्वैपायनं शुकः ।
अभिवाद्याह्निकं कृत्वा शुचिः प्रयतमानसः ।
पितरं परिपप्रच्छ दृष्टलोकपरावरम् ॥ ७
को यज्ञः सर्वयज्ञानां वरिष्ठ उपलक्ष्यते ।
किं च कृत्वा परं स्वर्गं प्राप्नुवन्ति मनीषिणः ॥ ८
केन देवाः पवित्रेण स्वर्गमश्नन्ति वा विभो ।
किं च यज्ञस्य यज्ञत्वं क च यज्ञः प्रतिष्ठितः ॥ ९
दानानामुत्तमं किं च किं च सत्रमतः परम् ।
पवित्राणां पवित्रं च यत्तद्ब्रूहि ममानघ ॥ १०
एतच्छ्रुत्वा तु वचनं व्यासः परमधर्मवित् ।
पुत्रायाकथयत्सर्वं तत्त्वेन भरतर्षभ ॥ ११

व्यास उवाच ।

गावः प्रतिष्ठा भूतानां तथा गावः परायणम् ।
गावः पुण्याः पवित्राश्च पावनं धर्म एव च ॥१२
पूर्वमासन्नशृङ्गा वै गावः इत्यनुशुश्रुमः ।
शृङ्गार्थे समुपासन्त ताः किल प्रभुमव्ययम् ॥ १३
ततो ब्रह्मा तु गाः प्रायमुपविष्टाः समीक्ष्य ह ।
ईप्सितं प्रददौ ताभ्यो गोभ्यः प्रत्येकशः प्रभुः ॥
तासां शृङ्गाण्यजायन्त यस्या यादृङ्मनोगतम् ।
नानावर्णाः शृङ्गवन्त्यस्ता व्यरोचन्त पुत्रक ॥ १५
ब्रह्मणा वरदत्तास्ता हव्यकव्यप्रदाः शुभाः ।
पुण्याः पवित्राः सुभगा दिव्यसंस्थानलक्षणाः ।
गावस्तेजो महद्दिव्यं गवां दानं प्रशस्यते ॥ १६
ये चैताः संप्रयच्छन्ति साधवो वीतमत्सराः ।
ते वै सुकृतिनः प्रोक्ताः सर्वदानप्रदाश्च ते ।
गवां लोकं तथा पुण्यमाप्नुवन्ति च तेऽनघ ॥ १७
यत्र वृक्षा मधुफला दिव्यपुष्पफलोपगाः ।
पुष्पाणि च सुगन्धीनि दिव्यानि द्विजसत्तम ॥१८
सर्वा मणिमयी भूमिः सूक्ष्मकाञ्चनवालुका ।
सर्वत्र सुखसंस्पर्शा निष्पङ्का नीरजा शुभा ॥ १९
रक्तोत्पलवनैश्चैव मणिदण्डैर्हिरण्मयैः ।
तरुणादित्यसंकाशैर्भान्ति तत्र जलाशयाः ॥ २०
महार्हमणिपत्रैश्च काञ्चनप्रभकेसरैः ।
नीलोत्पलविमिश्रैश्च सरोभिर्बहुपङ्कजैः ॥ २१
करवीरवनैः फुल्लैः सहस्रावर्तसंवृतैः ।
संतानकवनैः फुल्लैर्वृक्षैश्च समलंकृताः ॥ २२
निर्मलाभिश्च मुक्ताभिर्मणिभिश्च महाधनैः ।
उद्धूतपुलिनास्तत्र जातरूपैश्च निम्नगाः ॥ २३
सर्वरत्नमयैश्चित्रैरवगाढा नगोत्तमैः ।
जातरूपमयैश्चान्यैर्हुताशनसमप्रभैः ॥ २४
सौवर्णगिरयस्तत्र मणिरत्नशिलोच्चयाः ।
सर्वरत्नमयैर्भान्ति शृङ्गैश्चारुभिरुच्छ्रितैः ॥ २५
नित्यपुष्पफलास्तत्र नगाः पत्ररथाकुलाः ।
दिव्यगन्धरसैः पुष्पैः फलैश्च भरतर्षभ ॥ २६
रमन्ते पुण्यकर्माणस्तत्र नित्यं युधिष्ठिर ।
सर्वकामसमृद्धार्था निःशोका गतमन्यवः ॥ २७
विमानेषु विचित्रेषु रमणीयेषु भारत ।
मोदन्ते पुण्यकर्माणो विहरन्तो यशस्विनः ॥ २८
उपक्रीडन्ति तान्राजञ्शुभाश्चाप्सरसां गणाः ।
एताँल्लोकानवाप्नोति गां दत्त्वा वै युधिष्ठिर ॥ २९
यासामधिपतिः पूषा मारुतो बलवान्बली ।
ऐश्वर्ये वरुणो राजा ता मां पान्तु युगंधराः ॥ ३०
सुरूपा बहुरूपाश्च विश्वरूपाश्च मातरः ।
प्राजापत्या इति ब्रह्मञ्जपेन्नित्यं यतव्रतः ॥ ३१
गास्तु शुश्रूषते यश्च समन्वेति च सर्वशः ।
तस्मै तुष्टाः प्रयच्छन्ति वरानपि सुदुर्लभान् ॥ ३२
न द्रुह्येन्मनसा चापि गोषु ता हि सुखप्रदाः ।
अर्चयेत सदा चैव नमस्कारैश्च पूजयेत् ।
दान्तः प्रीतमना नित्यं गवां व्युष्टिं तथाश्नुते ॥३३
येन देवाः पवित्रेण भुञ्जते लोकमुत्तमम् ।

यत्पवित्रं पवित्राणां तद्धृतं शिरसा वहेत् ॥ ३४
घृतेन जुहुयादग्निं घृतेन स्वस्ति वाचयेत् ।
घृतं प्राशेद्धृतं दद्याद्गवां व्युष्टिं तथाश्नुते ॥ ३५
त्र्यहमुष्णं पिबेन्मूत्रं त्र्यहमुष्णं पिबेत्पयः ।
गवामुष्णं पयः पीत्वा त्र्यहमुष्णं घृतं पिबेत् ।
त्र्यहमुष्णं घृतं पीत्वा वायुभक्षो भवेत्त्र्यहम् ॥ ३६
निर्हृतैश्च यवैर्गोभिर्मासं प्रसृतयावकः ।
ब्रह्महत्यासमं पापं सर्वमेतेन शुध्यति ॥ ३७
पराभवार्थं दैत्यानां देवैः शौचमिदं कृतम् ।
देवत्वमपि च प्राप्ताः संसिद्धाश्च महाबलाः ॥ ३८
गावः पवित्राः पुण्याश्च पावनं परमं महत् ।
ताश्च दत्त्वा द्विजातिभ्यो नरः स्वर्गमुपाश्नुते ॥ ३९
गवां मध्ये शुचिर्भूत्वा गोमतीं मनसा जपेत् ।
पूताभिरद्भिराचम्य शुचिर्भवति निर्मलः ॥ ४०
अग्निमध्ये गवां मध्ये ब्राह्मणानां च संसदि ।
विद्यावेदव्रतस्नाता ब्राह्मणाः पुण्यकर्मिणः ॥ ४१
अध्यापयेरञ्शिष्यान्वै गोमतीं यज्ञसंमिताम् ।
त्रिरात्रोपोषितः श्रुत्वा गोमतीं लभते वरम् ॥ ४२
पुत्रकामश्च लभते पुत्रं धनमथापि च ।
पतिकामा च भर्तारं सर्वकामांश्च मानवः ।
गावस्तुष्टाः प्रयच्छन्ति सेविता वै न संशयः ॥ ४३
एवमेता महाभागा यज्ञियाः सर्वकामदाः ।
रोहिण्य इति जानीहि नैताभ्यो विद्यते परम् ॥ ४४
इत्युक्तः स महातेजाः शुकः पित्रा महात्मना ।
पूजयामास गा नित्यं तस्मात्त्वमपि पूजय ॥ ४५

इति श्रीमहाभारते अनुशासनपर्वणि
अशीतितमोऽध्यायः ॥ ८० ॥

८१

युधिष्ठिर उवाच ।

मया गवां पुरीषं वै श्रिया जुष्टमिति श्रुतम् ।
एतदिच्छाम्यहं श्रोतुं संशयोऽत्र हि मे महान् ॥ १

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
गोभिर्नृपेह संवादं श्रिया भरतसत्तम ॥ २
श्रीः कृत्वेह वपुः कान्तं गोमध्यं प्रविवेश ह ।
गावोऽथ विस्मितास्तस्या दृष्ट्वा रूपस्य संपदम् ॥ ३

गाव ऊचुः ।

कासि देवि कुतो वा त्वं रूपेणाप्रतिमा भुवि ।
विस्मिताः स्म महाभागे तव रूपस्य संपदा ॥ ४
इच्छामस्त्वां वयं ज्ञातुं का त्वं क च गमिष्यसि ।
तत्त्वेन च सुवर्णाभे सर्वमेतद्ब्रवीहि नः ॥ ५

श्रीरुवाच ।

लोककान्तास्मि भद्रं वः श्रीर्नाम्नेह परिश्रुता ।
मया दैत्याः परित्यक्ता विनष्टाः शाश्वतीः समाः ॥ ६
इन्द्रो विवस्वान्सोमश्च विष्णुरापोऽग्निरेव च ।
मयाभिपन्ना ऋध्यन्ते ऋषयो देवतास्तथा ॥ ७
यांश्च द्विषाम्यहं गावस्ते विनश्यन्ति सर्वशः ।
धर्मार्थकामहीनाश्च ते भवन्त्यसुखान्विताः ॥ ८
एवंप्रभावां मां गावो विजानीत सुखप्रदाम् ।
इच्छामि चापि युष्मासु वस्तुं सर्वासु नित्यदा ।
आगता प्रार्थयानाहं श्रीजुष्टा भवतानघाः ॥ ९

गाव ऊचुः ।

अध्रुवां चञ्चलां च त्वां सामान्यां बहुभिः सह ।
न त्वामिच्छाम भद्रं ते गम्यतां यत्र रोचते ॥ १०
वपुष्मन्त्यो वयं सर्वाः किमस्माकं त्वयाद्य वै ।
यत्रेष्टं गम्यतां तत्र कृतकार्या वयं त्वया ॥ ११

श्रीरुवाच ।

किमेतद्वः क्षमं गावो यन्मां नेहाभ्यनन्दथ ।
न मां संप्रति गृह्णीथ कस्माद्वै दुर्लभां सतीम् ॥ १२

सत्यश्च लोकवादोऽयं लोके चरति सुव्रताः ।
स्वयं प्राप्ते परिभवो भवतीति विनिश्चयः ॥ १३
महदुग्रं तपः कृत्वा मां निषेवन्ति मानवाः ।
देवदानवगन्धर्वाः पिशाचोरगराक्षसाः ॥ १४
क्षममेतद्धि वो गावः प्रतिगृह्णीत मामिह ।
नावमन्या ह्यहं सौम्यास्त्रैलोक्ये सचराचरे ॥ १५

गाव ऊचुः ।

नावमन्यामहे देवि न त्वां परिभवामहे ।
अध्रुवा चलचित्तासि ततस्त्वां वर्जयामहे ॥ १६
बहुनात्र किमुक्तेन गम्यतां यत्र वाञ्छसि ।
वपुष्मत्यो वयं सर्वाः किमस्माकं त्वयानघे ॥ १७

श्रीरुवाच ।

अवज्ञाता भविष्यामि सर्वलोकेषु मानदाः ।
प्रत्याख्यानेन युष्माभिः प्रसादः क्रियतामिति ॥१८
महाभागा भवत्यो वै शरण्याः शरणागताम् ।
परित्रायन्तु मां नित्यं भजमानामनिन्दिताम् ।
माननां त्वहमिच्छामि भवत्यः सततं शुभाः ॥१९
अप्येकाङ्गे तु वो वस्तुमिच्छामि च सुकुत्सिते ।
न वोऽस्ति कुत्सितं किंचिदङ्गेष्वालक्ष्यतेऽनघाः ॥२०
पुण्याः पवित्राः सुभगा ममादेशं प्रयच्छत ।
वसेयं यत्र चाङ्गेऽहं तन्मे व्याख्यातुमर्हथ ॥ २१

भीष्म उवाच ।

एवमुक्तास्तु ता गावः शुभाः करुणवत्सलाः ।
संमन्त्र्य सहिताः सर्वाः श्रियमूचुर्नराधिप ॥ २२
अवश्यं मानना कार्या तवास्माभिर्यशस्विनि ।
शकृन्मूत्रे निवस नः पुण्यमेतद्धि नः शुभे ॥ २३

श्रीरुवाच ।

दिष्ट्या प्रसादो युष्माभिः कृतो मेऽनुग्रहात्मकः ।
एवं भवतु भद्रं वः पूजितास्मि सुखप्रदाः ॥ २४

भीष्म उवाच ।

एवं कृत्वा तु समयं श्रीर्गोभिः सह भारत ।
पश्यन्तीनां ततस्तासां तत्रैवान्तरधीयत ॥ २५
एतद्गोशकृतः पुत्र माहात्म्यं तेऽनुवर्णितम् ।
माहात्म्यं च गवां भूयः श्रूयतां गदतो मम ॥ २६

इति श्रीमहाभारते अनुशासनपर्वणि
एकाशीतितमोऽध्यायः ॥ ८१ ॥

८२

भीष्म उवाच ।

ये च गाः संप्रयच्छन्ति हुतशिष्टाशिनश्च ये ।
तेषां सत्राणि यज्ञाश्च नित्यमेव युधिष्ठिर ॥ १
ऋते दधिघृतेनेह न यज्ञः संप्रवर्तते ।
तेन यज्ञस्य यज्ञत्वमतोमूलं च लक्ष्यते ॥ २
दानानामपि सर्वेषां गवां दानं प्रशस्यते ।
गावः श्रेष्ठाः पवित्राश्च पावनं ह्येतदुत्तमम् ॥ ३
पुष्ट्यर्थमेताः सेवेत शान्त्यर्थमपि चैव ह ।
पयो दधि घृतं यासां सर्वपापप्रमोचनम् ॥ ४
गावस्तेजः परं प्रोक्तमिह लोके परत्र च ।
न गोभ्यः परमं किंचित्पवित्रं पुरुषर्षभ ॥ ५
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
पितामहस्य संवादमिन्द्रस्य च युधिष्ठिर ॥ ६
पराभूतेषु दैत्येषु शक्रे त्रिभुवनेश्वरे ।
प्रजाः समुदिताः सर्वाः सत्यधर्मपरायणाः ॥ ७
अथर्षयः सगन्धर्वाः किंनरोरगराक्षसाः ।
देवासुरसुपर्णाश्च प्रजानां पतयस्तथा ।
पर्युपासन्त कौरव्य कदाचिद्वै पितामहम् ॥ ८
नारदः पर्वतश्चैव विश्वावसुहहाहुहू ।
दिव्यतानेषु गायन्तः पर्युपासन्त तं प्रभुम् ॥ ९
तत्र दिव्यानि पुष्पाणि प्रावहत्पवनस्तथा ।
आजह्रुर्ऋतवश्चापि सुगन्धीनि पृथक्पृथक् ॥ १०

तस्मिन्देवसमावाये सर्वभूतसमागमे ।
दिव्यवादित्रसंघुष्टे दिव्यस्त्रीचारणावृते ।
इन्द्रः पप्रच्छ देवेशमभिवाद्य प्रणम्य च ॥ ११
देवानां भगवन्कस्माल्लोकेशानां पितामह ।
उपरिष्टाद्गवां लोक एतदिच्छामि वेदितुम् ॥ १२
किं तपो ब्रह्मचर्यं वा गोभिः कृतमिहेश्वर ।
देवानामुपरिष्टाद्यद्वसन्त्यरजसः सुखम् ॥ १३
ततः प्रोवाच तं ब्रह्मा शक्रं बलनिसूदनम् ।
अवज्ञातास्त्वया नित्यं गावो बलनिसूदन ॥ १४
तेन त्वमासां माहात्म्यं न वेत्थ शृणु तत्प्रभो ।
गवां प्रभावं परमं माहात्म्यं च सुरर्षभ ॥ १५
यज्ञाङ्गं कथिता गावो यज्ञ एव च वासव ।
एताभिश्चाप्यृते यज्ञो न प्रवर्तेत्कथंचन ॥ १६
धारयन्ति प्रजाश्चैव पयसा हविषा तथा ।
एतासां तनयाश्चापि कृषियोगमुपासते ॥ १७
जनयन्ति च धान्यानि बीजानि विविधानि च ।
ततो यज्ञाः प्रवर्तन्ते हव्यं कव्यं च सर्वशः ॥ १८
पयो दधि घृतं चैव पुण्याश्चैताः सुराधिप ।
वहन्ति विविधान्भारान्क्षुत्तृष्णापरिपीडिताः ॥ १९
मुनींश्च धारयन्तीह प्रजाश्चैवापि कर्मणा ।
वासवाकूटवाहिन्यः कर्मणा सुकृतेन च ।
उपरिष्टात्ततोऽस्माकं वसन्त्येताः सदैव हि ॥ २०
एतत्ते कारणं शक्र निवासकृतमद्य वै ।
गवां देवोपरिष्टाद्धि समाख्यातं शतक्रतो ॥ २१
एता हि वरदत्ताश्च वरदाश्चैव वासव ।
सौरभ्यः पुण्यकर्मिण्यः पावनाः शुभलक्षणाः ॥२२
यदर्थं गा गताश्चैव सौरभ्यः सुरसत्तम ।
तच्च मे शृणु कार्त्स्न्येन वदतो बलसूदन ॥ २३
पुरा देवयुगे तात दैत्येन्द्रेषु महात्मसु ।
त्रीँल्लोकाननुशासत्सु विष्णौ गर्भत्वमागते ॥ २४
अदित्यास्तप्यमानायास्तपो घोरं सुदुश्चरम् ।
पुत्रार्थममरश्रेष्ठ पादेनैकेन नित्यदा ॥ २५
तां तु दृष्ट्वा महादेवीं तप्यमानां महत्तपः ।
दक्षस्य दुहिता देवी सुरभिर्नाम नामतः ॥ २६
अतप्यत तपो घोरं हृष्टा धर्मपरायणा ।
कैलासशिखरे रम्ये देवगन्धर्वसेविते ॥ २७
व्यतिष्ठदेकपादेन परमं योगमास्थिता ।
दश वर्षसहस्राणि दश वर्षशतानि च ॥ २८
संतप्तास्तपसा तस्या देवाः सर्षिमहोरगाः ।
तत्र गत्वा मया सार्धं पर्युपासन्त तां शुभाम् ॥२९
अथाहमब्रुवं तत्र देवीं तां तपसान्विताम् ।
किमर्थं तप्यसे देवि तपो घोरमनिन्दिते ॥ ३०
प्रीतस्तेऽहं महाभागे तपसानेन शोभने ।
वरयस्व वरं देवि दातास्मीति पुरंदर ॥ ३१

सुरभ्युवाच ।

वरेण भगवन्मह्यं कृतं लोकपितामह ।
एष एव वरो मेऽद्य यत्प्रीतोऽसि ममानघ ॥ ३२

ब्रह्मोवाच ।

तामेवं ब्रुवतीं देवीं सुरभीं त्रिदशेश्वर ।
प्रत्यब्रुवं यद्देवेन्द्र तन्निबोध शचीपते ॥ ३३
अलोभकाम्यया देवि तपसा च शुभेन च ।
प्रसन्नोऽहं वरं तस्मादमरत्वं ददानि ते ॥ ३४
त्रयाणामपि लोकानामुपरिष्टान्निवत्स्यसि ।
मत्प्रसादाच्च विख्यातो गोलोकः स भविष्यति ॥
मानुषेषु च कुर्वाणाः प्रजाः कर्म सुतास्तव ।
निवत्स्यन्ति महाभागे सर्वा दुहितरश्च ते ॥ ३६
मनसा चिन्तिता भोगास्त्वया वै दिव्यमानुषाः ।
यच्च स्वर्गसुखं देवि तत्ते संपत्स्यते शुभे ॥ ३७
तस्या लोकाः सहस्राक्ष सर्वकामसमन्विताः ।
न तत्र क्रमते मृत्युर्न जरा न च पावकः ।

न दैन्यं नाशुभं किंचिद्विद्यते तत्र वासव ॥ ३८
तत्र दिव्यान्यरण्यानि दिव्यानि भवनानि च ।
विमानानि च युक्तानि कामगानि च वासव ॥३९
व्रतैश्च विविधैः पुण्यैस्तथा तीर्थानुसेवनात् ।
तपसा महता चैव सुकृतेन च कर्मणा ।
शक्यः समासादयितुं गोलोकः पुष्करेक्षण ॥ ४०
एतत्ते सर्वमाख्यातं मया शक्रानुपृच्छते ।
न ते परिभवः कार्यो गवामरिनिसूदन ॥ ४१

भीष्म उवाच ।

एतच्छ्रुत्वा सहस्राक्षः पूजयामास नित्यदा ।
गाश्चक्रे बहुमानं च तासु नित्यं युधिष्ठिर ॥ ४२
एतत्ते सर्वमाख्यातं पावनं च महाद्युते ।
पवित्रं परमं चापि गवां माहात्म्यमुत्तमम् ।
कीर्तितं पुरुषव्याघ्र सर्वपापविनाशनम् ॥ ४३
य इदं कथयेन्नित्यं ब्राह्मणेभ्यः समाहितः ।
हव्यकव्येषु यज्ञेषु पितृकार्येषु चैव ह ।
सार्वकामिकमक्षय्यं पितॄंस्तस्योपतिष्ठति ॥ ४४
गोषु भक्तश्च लभते यद्यदिच्छति मानवः ।
स्त्रियोऽपि भक्ता या गोषु ताश्च कामानवाप्नुयुः ॥
पुत्रार्थी लभते पुत्रं कन्या पतिमवाप्नुयात् ।
धनार्थी लभते वित्तं धर्मार्थी धर्ममाप्नुयात् ॥ ४६
विद्यार्थी प्राप्नुयाद्विद्यां सुखार्थी प्राप्नुयात्सुखम् ।
न किंचिद्दुर्लभं चैव गवां भक्तस्य भारत ॥ ४७

इति श्रीमहाभारते अनुशासनपर्वणि
द्व्यशीतितमोऽध्यायः ॥ ८२ ॥

८३

युधिष्ठिर उवाच ।

उक्तं पितामहेनेदं गवां दानमनुत्तमम् ।
विशेषेण नरेन्द्राणामिति धर्ममवेक्षताम् ॥ १
राज्यं हि सततं दुःखमाश्रमाश्च सुदुर्विदाः ।
परिवारेण वै दुःखं दुर्धरं चाकृतात्मभिः ।
भूयिष्ठं च नरेन्द्राणां विद्यते न शुभा गतिः ॥ २
पूयन्ते तेऽत्र नियतं प्रयच्छन्तो वसुंधराम् ।
पूर्वं च कथिता धर्मास्त्वया मे कुरुनन्दन ॥ ३
एवमेव गवामुक्तं प्रदानं ते नृगेण ह ।
ऋषिणा नाचिकेतेन पूर्वमेव निदर्शितम् ॥ ४
वेदोपनिषदे चैव सर्वकर्मसु दक्षिणा ।
सर्वक्रतुषु चोद्दिष्टं भूमिर्गावोऽथ काञ्चनम् ॥ ५
तत्र श्रुतिस्तु परमा सुवर्णं दक्षिणेति वै ।
एतदिच्छाम्यहं श्रोतुं पितामह यथातथम् ॥ ६
किं सुवर्णं कथं जातं कस्मिन्काले किमात्मकम् ।
किं दानं किं फलं चैव कस्माच्च परमुच्यते ॥ ७
कस्माद्दानं सुवर्णस्य पूजयन्ति मनीषिणः ।
कस्माच्च दक्षिणार्थं तद्यज्ञकर्मसु शस्यते ॥ ८
कस्माच्च पावनं श्रेष्ठं भूमेर्गोभ्यश्च काञ्चनम् ।
परमं दक्षिणार्थे च तद्ब्रवीहि पितामह ॥ ९

भीष्म उवाच ।

शृणु राजन्नवहितो बहुकारणविस्तरम् ।
जातरूपसमुत्पत्तिमनुभूतं च यन्मया ॥ १०
पिता मम महातेजाः शंतनुर्निधनं गतः ।
तस्य दित्सुरहं श्राद्धं गङ्गाद्वारमुपागमम् ॥ ११
तत्रागम्य पितुः पुत्र श्राद्धकर्म समारभम् ।
माता मे जाह्नवी चैव साहाय्यमकरोत्तदा ॥ १२
ततोऽग्रतस्तपःसिद्धानुपवेश्य बहूनृषीन् ।
तोयप्रदानात्प्रभृति कार्याण्यहमथारभम् ॥ १३
तत्समाप्य यथोद्दिष्टं पूर्वकर्म समाहितः ।
दातुं निर्वपणं सम्यग्यथावदहमारभम् ॥ १४
ततस्तं दर्भविन्यासं भित्त्वा सुरुचिराङ्गदः ।
प्रलम्बाभरणो बाहुरुदतिष्ठद्विशां पते ॥ १५
तमुत्थितमहं दृष्ट्वा परं विस्मयमागमम् ।

प्रतिग्रहीता साक्षान्मे पितेति भरतर्षभ ॥ १६
ततो मे पुनरेवासीत्संज्ञा संचिन्त्य शास्त्रतः ।
नायं वेदेषु विहितो विधिर्हस्त इति प्रभो ।
पिण्डो देयो नरेणेह ततो मतिरभून्मम ॥ १७
साक्षान्नेह मनुष्यस्य पितरोऽन्तर्हिताः क्वचित् ।
गृह्णन्ति विहितं त्वेवं पिण्डो देयः कुशेष्विति ॥१८
ततोऽहं तदनादृत्य पितुर्हस्तनिदर्शनम् ।
शास्त्रप्रमाणात्सूक्ष्मं तु विधिं पार्थिव संस्मरन् ॥१९
ततो दर्भेषु तत्सर्वमददं भरतर्षभ ।
शास्त्रमार्गानुसारेण तद्विद्धि मनुजर्षभ ॥ २०
ततः सोऽन्तर्हितो बाहुः पितुर्मम नराधिप ।
ततो मां दर्शयामासुः स्वप्नान्ते पितरस्तदा ॥ २१
प्रीयमाणास्तु मामूचुः प्रीताः स्म भरतर्षभ ।
विज्ञानेन तवानेन यन्न मुह्यसि धर्मतः ॥ २२
त्वया हि कुर्वता शास्त्रं प्रमाणमिह पार्थिव ।
आत्मा धर्मः श्रुतं वेदाः पितरश्च महर्षिभिः ॥२३
साक्षात्पितामहो ब्रह्मा गुरवोऽथ प्रजापतिः ।
प्रमाणमुपनीता वै स्थितिश्च न विचालिता ॥ २४
तदिदं सम्यगारब्धं त्वयाद्य भरतर्षभ ।
किं तु भूमेर्गवां चार्थे सुवर्णं दीयतामिति ॥ २५
एवं वयं च धर्मश्च सर्वे चास्मत्पितामहाः ।
पाविता वै भविष्यन्ति पावनं परमं हि तत् ॥२६
दश पूर्वान्दश परांस्तथा संतारयन्ति ते ।
सुवर्णं ये प्रयच्छन्ति एवं मे पितरोऽब्रुवन् ॥ २७
ततोऽहं विस्मितो राजन्प्रतिबुद्धो विशां पते ।
सुवर्णदानेऽकरवं मतिं भरतसत्तम ॥ २८
इतिहासमिमं चापि शृणु राजन्पुरातनम् ।
जामदग्न्यं प्रति विभो धन्यमायुष्यमेव च ॥ २९
जामदग्न्येन रामेण तीव्ररोषान्वितेन वै ।
त्रिःसप्तकृत्वः पृथिवी कृता निःक्षत्रिया पुरा ॥३०
ततो जित्वा महीं कृत्स्नां रामो राजीवलोचनः ।
आजहार क्रतुं वीरो ब्रह्मक्षत्रेण पूजितम् ॥ ३१
वाजिमेधं महाराज सर्वकामसमन्वितम् ।
पावनं सर्वभूतानां तेजोद्युतिविवर्धनम् ॥ ३२
विपाप्मापि स तेजस्वी तेन क्रतुफलेन वै ।
नैवात्मनोऽथ लघुतां जामदग्न्योऽभ्यगच्छत ॥ ३३
स तु क्रतुवरेणेष्ट्वा महात्मा दक्षिणावता ।
पप्रच्छागमसंपन्नानृषीन्देवांश्च भार्गवः ॥ ३४
पावनं यत्परं नृणामुग्रे कर्मणि वर्तताम् ।
तदुच्यतां महाभागा इति जातघृणोऽब्रवीत् ।
इत्युक्ता वेदशास्त्रज्ञास्ते तमूचुर्महर्षयः ॥ ३५

वसिष्ठ उवाच ।

देवतास्ते प्रयच्छन्ति सुवर्णं ये ददत्युत ।
अग्निर्हि देवताः सर्वाः सुवर्णं च तदात्मकम् ॥३६
तस्मात्सुवर्णं ददता दत्ताः सर्वाश्च देवताः ।
भवन्ति पुरुषव्याघ्र न ह्यतः परमं विदुः ॥ ३७
भूय एव च माहात्म्यं सुवर्णस्य निबोध मे ।
गदतो मम विप्रर्षे सर्वशस्त्रभृतां वर ॥ ३८
मया श्रुतमिदं पूर्वं पुराणे भृगुनन्दन ।
प्रजापतेः कथयतो मनोः स्वायंभुवस्य वै ॥ ३९
शूलपाणेर्भगवतो रुद्रस्य च महात्मनः ।
गिरौ हिमवति श्रेष्ठे तदा भृगुकुलोद्वह ॥ ४०
देव्या विवाहे निर्वृत्ते रुद्राण्या भृगुनन्दन ।
समागमे भगवतो देव्या सह महात्मनः ।
ततः सर्वे समुद्विग्ना भगवन्तमुपागमन् ॥ ४१
ते महादेवमासीनं देवीं च वरदामुमाम् ।
प्रसाद्य शिरसा सर्वे रुद्रमूचुर्भृगूद्वह ॥ ४२
अयं समागमो देव देव्या सह तवानघ ।
तपस्विनस्तपस्विन्या तेजस्विन्यातितेजसः ।

अमोघतेजास्त्वं देव देवी चेयमुमा तथा ॥ ४३
अपत्यं युवयोर्देव बलवद्भविता प्रभो ।
तन्नूनं त्रिषु लोकेषु न किंचिच्छेषयिष्यति ॥ ४४
तदेभ्यः प्रणतेभ्यस्त्वं देवेभ्यः पृथुलोचन ।
वरं प्रयच्छ लोकेश त्रैलोक्यहितकाम्यया ।
अपत्यार्थं निगृह्णीष्व तेजो ज्वलितमुत्तमम् ॥ ४५
इति तेषां कथयतां भगवान्गोवृषध्वजः ।
एवमस्त्विति देवांस्तान्विप्रर्षे प्रत्यभाषत ॥ ४६
इत्युक्त्वा चोर्ध्वमनयत्तद्रेतो वृषवाहनः ।
ऊर्ध्वरेताः समभवत्ततःप्रभृति चापि सः ॥ ४७
रुद्राणी तु ततः क्रुद्धा प्रजोच्छेदे तथा कृते ।
देवानथाब्रवीत्तत्र स्त्रीभावात्परुषं वचः ॥ ४८
यस्मादपत्यकामो वै भर्ता मे विनिवर्तितः ।
तस्मात्सर्वे सुरा यूयमनपत्या भविष्यथ ॥ ४९
प्रजोच्छेदो मम कृतो तस्माद्युष्माभिरद्य वै ।
तस्मात्प्रजा वः खगमाः सर्वेषां न भविष्यति ॥
पावकस्तु न तत्रासीच्छापकाले भृगूद्वह ।
देवा देव्यास्तथा शापादनपत्यास्तदाभवन् ॥ ५१
रुद्रस्तु तेजोऽप्रतिमं धारयामास तत्तदा ।
प्रस्कन्नं तु ततस्तस्मात्किंचित्तत्रापतद्भुवि ॥ ५२
उत्पपात तदा चाग्नौ ववृधे चाद्भुतोपमम् ।
तेजस्तेजसि संपृक्तमेकयोनित्वमागतम् ॥ ५३
एतस्मिन्नेव काले तु देवाः शक्रपुरोगमाः ।
असुरस्तारको नाम तेन संतापिता भृशम् ॥ ५४
आदित्या वसवो रुद्रा मरुतोऽथाश्विनावपि ।
साध्याश्च सर्वे संत्रस्ता दैतेयस्य पराक्रमात् ॥ ५५
स्थानानि देवतानां हि विमानानि पुराणि च ।
ऋषीणामाश्रमाश्चैव बभूवुरसुरैर्हृताः ॥ ५६
ते दीनमनसः सर्वे देवाश्च ऋषयश्च ह ।
प्रजग्मुः शरणं देवं ब्रह्माणमजरं प्रभुम् ॥ ५७

इति श्रीमहाभारते अनुशासनपर्वणि
त्र्यशीतितमोऽध्यायः ॥ ८३ ॥

८४

देवा ऊचुः ।

असुरस्तारको नाम त्वया दत्तवरः प्रभो ।
सुरानृषींश्च क्लिश्नाति वधस्तस्य विधीयताम् ॥ १
तस्माद्भयं समुत्पन्नमस्माकं वै पितामह ।
परित्रायस्व नो देव न ह्यन्या गतिरस्ति नः ॥ २

ब्रह्मोवाच ।

समोऽहं सर्वभूतानामधर्मं नेह रोचये ।
हन्यतां तारकः क्षिप्रं सुरर्षिगणबाधकः ॥ ३
वेदा धर्माश्च नोत्सादं गच्छेयुः सुरसत्तमाः ।
विहितं पूर्वमेवात्र मया वै व्येतु वो ज्वरः ॥ ४

देवा ऊचुः ।

वरदानाद्भगवतो दैतेयो बलगर्वितः ।
देवैर्न शक्यते हन्तुं स कथं प्रशमं व्रजेत् ॥ ५
स हि नैव स्म देवानां नासुराणां न रक्षसाम् ।
वध्यः स्यामिति जग्राह वरं त्वत्तः पितामह ॥ ६
देवाश्च शप्ता रुद्राण्या प्रजोच्छेदे पुरा कृते ।
न भविष्यति वोऽपत्यमिति सर्वजगत्पते ॥ ७

ब्रह्मोवाच ।

हुताशनो न तत्रासीच्छापकाले सुरोत्तमाः ।
स उत्पादयितापत्यं वधार्थं त्रिदशद्विषाम् ॥ ८
तद्वै सर्वानतिक्रम्य देवदानवराक्षसान् ।
मानुषानथ गन्धर्वान्नागानथ च पक्षिणः ॥ ९
अस्त्रेणामोघपातेन शक्त्या तं घातयिष्यति ।
यतो वो भयमुत्पन्नं ये चान्ये सुरशत्रवः ॥ १०
सनातनो हि संकल्पः काम इत्यभिधीयते ।

रुद्रस्य तेजः प्रस्कन्नमग्नौ निपतितं च तत् ॥ ११
तत्तेजोऽग्निर्महद्भूतं द्वितीयमिव पावकम् ।
वधार्थं देवशत्रूणां गङ्गायां जनयिष्यति ॥ १२
स तु नावाप तं शापं नष्टः स हुतभुक्तदा ।
तस्माद्वो भयहृद्देवाः समुत्पत्स्यति पावकिः ॥ १३
अन्विष्यतां वै ज्वलनस्तथा चाद्य नियुज्यताम् ।
तारकस्य वधोपायः कथितो वै मयानघाः ॥ १४
न हि तेजस्विनां शापास्तेजःसु प्रभवन्ति वै ।
बलान्यतिबलं प्राप्य नबलानि भवन्ति वै ॥ १५
हन्यादवध्यान्वरदानपि चैव तपस्विनः ।
संकल्पाभिरुचिः कामः सनातनतमोऽनलः ॥ १६
जगत्पतिरनिर्देश्यः सर्वगः सर्वभावनः ।
हृच्छयः सर्वभूतानां ज्येष्ठो रुद्रादपि प्रभुः ॥ १७
अन्विष्यतां स तु क्षिप्रं तेजोराशिर्हुताशनः ।
स वो मनोगतं कामं देवः संपादयिष्यति ॥ १८
एतद्वाक्यमुपश्रुत्य ततो देवा महात्मनः ।
जग्मुः संसिद्धसंकल्पाः पर्येषन्तो विभावसुम् ॥ १९
ततस्त्रैलोक्यमृषयो व्यचिन्वन्त सुरैः सह ।
काङ्क्षन्तो दर्शनं वह्नेः सर्वे तद्गतमानसाः ॥ २०
परेण तपसा युक्ताः श्रीमन्तो लोकविश्रुताः ।
लोकानन्वचरन्सिद्धाः सर्व एव भृगूद्वह ।
नष्टमात्मनि संलीनं नाधिजग्मुर्हुताशनम् ॥ २१
ततः संजातसंत्रासानग्नेर्दर्शनलालसान् ।
जलेचरः क्लान्तमनास्तेजसाग्नेः प्रदीपितः ।
उवाच देवान्मण्डूको रसातलतलोत्थितः ॥ २२
रसातलतले देवा वसत्यग्निरिति प्रभो ।
संतापादिह संप्राप्तः पावकप्रभवादहम् ॥ २३
स संसुप्तो जले देवा भगवान्हव्यवाहनः ।
अपः संसृज्य तेजोभिस्तेन संतापिता वयम् ॥ २४
तस्य दर्शनमिष्टं वो यदि देवा विभावसोः ।
तत्रैनमभिगच्छध्वं कार्यं वो यदि वह्निना ॥ २५
गम्यतां साधयिष्यामो वयं ह्यग्निभयात्सुराः ।
एतावदुक्त्वा मण्डूकस्त्वरितो जलमाविशत् ॥ २६
हुताशनस्तु बुबुधे मण्डूकस्याथ पैशुनम् ।
शशाप स तमासाद्य न रसान्वेत्स्यसीति वै ॥ २७
तं स संयुज्य शापेन मण्डूकं पावको ययौ ।
अन्यत्र वासाय विभुर्न च देवानदर्शयत् ॥ २८
देवास्त्वनुग्रहं चक्रुर्मण्डूकानां भृगूद्वह ।
यत्तच्छृणु महाबाहो गदतो मम सर्वशः ॥ २९

देवा ऊचुः ।

अग्निशापादजिह्वापि रसज्ञानबहिष्कृताः ।
सरस्वतीं बहुविधां यूयमुच्चारयिष्यथ ॥ ३०
बिलवासगतांश्चैव निरादानानचेतसः ।
गतासूनपि वः शुष्कान्भूमिः संधारयिष्यति ।
तमोगतायामपि च निशायां विचरिष्यथ ॥ ३१
इत्युक्त्वा तांस्ततो देवाः पुनरेव महीमिमाम् ।
परीयुर्ज्वलनस्यार्थे न चाविन्दन्हुताशनम् ॥ ३२
अथ तान्द्विरदः कश्चित्सुरेन्द्रद्विरदोपमः ।
अश्वत्थस्थोऽग्निरित्येवं प्राह देवान्भृगूद्वह ॥ ३३
शशाप ज्वलनः सर्वान्द्विरदान्क्रोधमूर्छितः ।
प्रतीपा भवतां जिह्वा भवित्रीति भृगूद्वह ॥ ३४
इत्युक्त्वा निःसृतोऽश्वत्थादग्निर्वारणसूचितः ।
प्रविवेश शमीगर्भमथ वह्निः सुषुप्सया ॥ ३५
अनुग्रहं तु नागानां यं चक्रुः शृणु तं प्रभो ।
देवा भृगुकुलश्रेष्ठ प्रीताः सत्यपराक्रमाः ॥ ३६

देवा ऊचुः ।

प्रतीपया जिह्वयापि सर्वाहारान्करिष्यथ ।
वाचं चोच्चारयिष्यध्वमुच्चैरव्यञ्जिताक्षरम् ।
इत्युक्त्वा पुनरेवाग्निमनुसस्रुर्दिवौकसः ॥ ३७
अश्वत्थान्निःसृतश्चाग्निः शमीगर्भगतस्तदा ।

शुकेन ख्यापितो विप्र तं देवाः समुपाद्रवन् ॥ ३८
शशाप शुकमग्निस्तु वाग्विहीनो भविष्यसि ।
जिह्वां चावर्तयामास तस्यापि हुतभुक्तदा ॥ ३९
दृष्ट्वा तु ज्वलनं देवाः शुकमूचुर्दयान्विताः ।
भविता न त्वमत्यन्तं शकुने नष्टवागिति ॥ ४०
आवृत्तजिह्वस्य सतो वाक्यं कान्तं भविष्यति ।
बालस्येव प्रवृद्धस्य कलमव्यक्तमद्भुतम् ॥ ४१
इत्युक्त्वा तं शमीगर्भे वह्निमालक्ष्य देवताः ।
तदेवायतनं चक्रुः पुण्यं सर्वक्रियास्वपि ॥ ४२
ततःप्रभृति चाप्यग्निः शमीगर्भेषु दृश्यते ।
उत्पादने तथोपायमनुजग्मुश्च मानवाः ॥ ४३
आपो रसातले यास्तु संसृष्टाश्चित्रभानुना ।
ताः पर्वतप्रस्रवणैरूष्मां मुञ्चन्ति भार्गव ।
पावकेनाधिशयता संतप्तास्तस्य तेजसा ॥ ४४
ततोऽग्निर्देवता दृष्ट्वा बभूव व्यथितस्तदा ।
किमागमनमित्येवं तानपृच्छत पावकः ॥ ४५
तमूचुर्विबुधाः सर्वे ते चैव परमर्षयः ।
त्वां नियोक्ष्यामहे कार्ये तद्भवान्कर्तुमर्हति ।
कृते च तस्मिन्भविता तवापि सुमहान्गुणः ॥ ४६

अग्निरुवाच ।

ब्रूत यद्भवतां कार्यं सर्वं कर्तास्मि तत्सुराः ।
भवतां हि नियोज्योऽहं मा वोऽत्रास्तु विचारणा ॥

देवा ऊचुः ।

असुरस्तारको नाम ब्रह्मणो वरदर्पितः ।
अस्मान्प्रबाधते वीर्याद्वधस्तस्य विधीयताम् ॥ ४८
इमान्देवगणांस्तात प्रजापतिगणांस्तथा ।
ऋषींश्चापि महाभागान्परित्रायस्व पावक ॥ ४९
अपत्यं तेजसा युक्तं प्रवीरं जनय प्रभो ।
यद्भयं नोऽसुरात्तस्मान्नाशयेद्धव्यवाहन ॥ ५०
शप्तानां नो महादेव्या नान्यदस्ति परायणम् ।
अन्यत्र भवतो वीर्यं तस्मात्त्रायस्व नस्ततः ॥ ५१
इत्युक्तः स तथेत्युक्त्वा भगवान्हव्यकव्यभुक् ।
जगामाथ दुराधर्षो गङ्गां भागीरथीं प्रति ॥ ५२
तया चाप्यभवन्मिश्रो गर्भश्चास्याभवत्तदा ।
ववृधे स तदा गर्भः कक्षे कृष्णगतिर्यथा ॥ ५३
तेजसा तस्य गर्भस्य गङ्गा विह्वलचेतना ।
संतापमगमत्तीव्रं सा सोढुं न शशाक ह ॥ ५४
आहिते ज्वलनेनाथ गर्भे तेजःसमन्विते ।
गङ्गायामसुरः कश्चिद्भैरवं नादमुत्सृजत् ॥ ५५
अबुद्धापतितेनाथ नादेन विपुलेन सा ।
वित्रस्तोद्भ्रान्तनयना गङ्गा विप्लुतलोचना ।
विसंज्ञा नाशकद्गर्भं संधारयितुमात्मना ॥ ५६
सा तु तेजःपरीताङ्गी कम्पमाना च जाह्नवी ।
उवाच वचनं विप्र तदा गर्भबलोद्धता ।
न ते शक्तास्मि भगवंस्तेजसोऽस्य विधारणे ॥ ५७
विमूढास्मि कृतानेन तथास्वास्थ्यं कृतं परम् ।
विह्वला चास्मि भगवंस्तेजो नष्टं च मेऽनघ ॥ ५८
धारणे नास्य शक्ताहं गर्भस्य तपतां वर ।
उत्स्रक्ष्येऽहमिमं दुःखान्न तु कामात्कथंचन ॥ ५९
न चेतसोऽस्ति संस्पर्शो मम देव विभावसो ।
आपदर्थे हि संबन्धः सुसूक्ष्मोऽपि महाद्युते ॥ ६०
यदत्र गुणसंपन्नमितरं वा हुताशन ।
त्वय्येव तदहं मन्ये धर्माधर्मौ च केवलौ ॥ ६१
तामुवाच ततो वह्निर्धार्यतां धार्यतामयम् ।
गर्भो मत्तेजसा युक्तो महागुणफलोदयः ॥ ६२
शक्ता ह्यसि महीं कृत्स्नां वोढुं धारयितुं तथा ।
न हि ते किंचिदप्राप्यं मद्रेतोधारणादृते ॥ ६३
सा वह्निना वार्यमाणा देवैश्चापि सरिद्वरा ।
समुत्ससर्ज तं गर्भं मेरौ गिरिवरे तदा ॥ ६४
समर्था धारणे चापि रुद्रतेजःप्रधर्षिता ।

नाशकत्तं तदा गर्भं संधारयितुमोजसा ॥ ६५
सा समुत्सृज्य तं दुःखाद्दीप्तवैश्वानरप्रभम् ।
दर्शयामास चाग्निस्तां तदा गङ्गां भृगूद्वह ।
पप्रच्छ सरितां श्रेष्ठां कच्चिद्गर्भः सुखोदयः ॥ ६६
कीदृग्वर्णोऽपि वा देवि कीदृग्रूपश्च दृश्यते ।
तेजसा केन वा युक्तः सर्वमेतद्ब्रवीहि मे ॥ ६७

गङ्गोवाच ।

जातरूपः स गर्भो वै तेजसा त्वमिवानल ।
सुवर्णो विमलो दीप्तः पर्वतं चावभासयत् ॥ ६८
पद्मोत्पलविमिश्राणां ह्रदानामिव शीतलः ।
गन्धोऽस्य स कदम्बानां तुल्यो वै तपतां वर ॥६९
तेजसा तस्य गर्भस्य भास्करस्येव रश्मिभिः ।
यद्द्रव्यं परिसंसृष्टं पृथिव्यां पर्वतेषु वा ।
तत्सर्वं काञ्चनीभूतं समन्तात्प्रत्यदृश्यत ॥ ७०
पर्यधावत शैलांश्च नदीः प्रस्रवणानि च ।
व्यदीपयत्तेजसा च त्रैलोक्यं सचराचरम् ॥ ७१
एवंरूपः स भगवान्पुत्रस्ते हव्यवाहन ।
सूर्यवैश्वानरसमः कान्त्या सोम इवापरः ।
एवमुक्त्वा तु सा देवी तत्रैवान्तरधीयत ॥ ७२
पावकश्चापि तेजस्वी कृत्वा कार्यं दिवौकसाम् ।
जगामेष्टं ततो देशं तदा भार्गवनन्दन ॥ ७३
एतैः कर्मगुणैर्लोके नामाग्नेः परिगीयते ।
हिरण्यरेता इति वै ऋषिभिर्विबुधैस्तथा ।
पृथिवी च तदा देवी ख्याता वसुमतीति वै ॥७४
स तु गर्भो महातेजा गाङ्गेयः पावकोद्भवः ।
दिव्यं शरवणं प्राप्य ववृधेऽद्भुतदर्शनः ॥ ७५
ददृशुः कृत्तिकास्तं तु बालार्कसदृशद्युतिम् ।
जातस्नेहाश्च तं बालं पुपुषुः स्तन्यविस्रवैः ॥ ७६
ततः स कार्तिकेयत्वमवाप परमद्युतिः ।
स्कन्नत्वात्स्कन्दतां चापि गुहावासाद्गुहोऽभवत् ॥७७
एवं सुवर्णमुत्पन्नमपत्यं जातवेदसः ।
तत्र जाम्बूनदं श्रेष्ठं देवानामपि भूषणम् ॥ ७८
ततःप्रभृति चाप्येतज्जातरूपमुदाहृतम् ।
यत्सुवर्णं स भगवानग्निरीशः प्रजापतिः ॥ ७९
पवित्राणां पवित्रं हि कनकं द्विजसत्तम ।
अग्नीषोमात्मकं चैव जातरूपमुदाहृतम् ॥ ८०
रत्नानामुत्तमं रत्नं भूषणानां तथोत्तमम् ।
पवित्रं च पवित्राणां मङ्गलानां च मङ्गलम् ॥ ८१

इति श्रीमहाभारते अनुशासनपर्वणि
चतुरशीतितमोऽध्यायः ॥ ८४ ॥

८५

वसिष्ठ उवाच ।

अपि चेदं पुरा राम श्रुतं मे ब्रह्मदर्शनम् ।
पितामहस्य यद्वृत्तं ब्रह्मणः परमात्मनः ॥ १
देवस्य महतस्तात वारुणीं बिभ्रतस्तनुम् ।
ऐश्वर्ये वारुणे राम रुद्रस्येशस्य वै प्रभो ॥ २
आजग्मुर्मुनयः सर्वे देवाश्चाग्निपुरोगमाः ।
यज्ञाङ्गानि च सर्वाणि वषट्कारश्च मूर्तिमान् ॥ ३
मूर्तिमन्ति च सामानि यजूंषि च सहस्रशः ।
ऋग्वेदश्चागमत्तत्र पदक्रमविभूषितः ॥ ४
लक्षणानि स्वराः स्तोभा निरुक्तं स्वरभक्तयः ।
ओंकारश्चावसन्नेत्रे निग्रहप्रग्रहौ तथा ॥ ५
वेदाश्च सोपनिषदो विद्या सावित्र्यथापि च ।
भूतं भव्यं भविष्यच्च दधार भगवाञ्छिवः ।
जुह्वत्सात्मन्यथात्मानं स्वयमेव तदा प्रभो ॥ ६
देवपत्न्यश्च कन्याश्च देवानां चैव मातरः ।
आजग्मुः सहितास्तत्र तदा भृगुकुलोद्वह ॥ ७
यज्ञं पशुपतेः प्रीता वरुणस्य महात्मनः ।
स्वयंभुवस्तु ता दृष्ट्वा रेतः समपतद्भुवि ॥ ८
तस्य शुक्रस्य निष्पन्दात्पांसून्संगृह्य भूमितः ।

प्रास्यत्पूषा कराभ्यां वै तस्मिन्नेव हुताशने ॥ ९
ततस्तस्मिन्संप्रवृत्ते सत्रे ज्वलितपावके ।
ब्रह्मणो जुह्वतस्तत्र प्रादुर्भावो बभूव ह ॥ १०
स्कन्नमात्रं च तच्छुक्रं स्रुवेण प्रतिगृह्य सः ।
आज्यवन्मन्त्रवच्चापि सोऽजुहोद्भृगुनन्दन ॥ ११
ततः संजनयामास भूतग्रामं स वीर्यवान् ।
ततस्तु तेजसस्तस्माज्जज्ञे लोकेषु तैजसम् ॥ १२
तमसस्तामसा भावा व्यापि सत्त्वं तथोभयम् ।
सगुणस्तेजसो नित्यं तमस्याकाशमेव च ॥ १३
सर्वभूतेष्वथ तथा सत्त्वं तेजस्तथा तमः ।
शुक्रे हुतेऽग्नौ तस्मिंस्तु प्रादुरासंस्त्रयः प्रभो ॥ १४
पुरुषा वपुषा युक्ता युक्ताः प्रसवजैर्गुणैः ।
भृगित्येव भृगुः पूर्वमङ्गारेभ्योऽङ्गिराभवत् ॥ १५
अङ्गारसंश्रयाच्चैव कविरित्यपरोऽभवत् ।
सह ज्वालाभिरुत्पन्नो भृगुस्तस्माद्भृगुः स्मृतः ॥ १६
मरीचिभ्यो मरीचिस्तु मारीचः कश्यपो ह्यभूत् ।
अङ्गारेभ्योऽङ्गिरास्तात वालखिल्याः शिलोच्चयात् ।
अत्रैवात्रेति च विभो जातमत्रिं वदन्त्यपि ॥ १७
तथा भस्मव्यपोहेभ्यो ब्रह्मर्षिगणसंमिताः ।
वैखानसाः समुत्पन्नास्तपःश्रुतगुणेप्सवः ।
अश्रुतोऽस्य समुत्पन्नावश्विनौ रूपसंमतौ ॥ १८
शेषाः प्रजानां पतयः स्रोतोभ्यस्तस्य जज्ञिरे ।
ऋषयो लोमकूपेभ्यः स्वेदाच्छन्दो मलात्मकम् ॥
एतस्मात्कारणादाहुरग्निं सर्वास्तु देवताः ।
ऋषयः श्रुतसंपन्ना वेदप्रामाण्यदर्शनात् ॥ २०
यानि दारूणि ते मासा निर्यासाः पक्षसंज्ञिताः ।
अहोरात्रा मुहूर्तास्तु पित्तं ज्योतिश्च वारुणम् ॥२१
रौद्रं लोहितमित्याहुर्लोहितात्कनकं स्मृतम् ।
तन्मैत्रमिति विज्ञेयं धूमाच्च वसवः स्मृताः ॥ २२
अर्चिषो याश्च ते रुद्रास्तथादित्या महाप्रभाः ।
उद्दिष्टास्ते तथाङ्गारा ये धिष्ण्येषु दिवि स्थिताः ॥
आदिनाथश्च लोकस्य तत्परं ब्रह्म तद्ध्रुवम् ।
सर्वकामदमित्याहुस्तत्र हव्यमुदावहन् ॥ २४
ततोऽब्रवीन्महादेवो वरुणः परमात्मकः ।
मम सत्रमिदं दिव्यमहं गृहपतिस्त्विह ॥ २५
त्रीणि पूर्वाण्यपत्यानि मम तानि न संशयः ।
इति जानीत खगमा मम यज्ञफलं हि तत् ॥ २६

अग्निरुवाच ।

मदङ्गेभ्यः प्रसूतानि मदाश्रयकृतानि च ।
ममैव तान्यपत्यानि वरुणो ह्यवशात्मकः ॥ २७
अथाब्रवील्लोकगुरुर्ब्रह्मा लोकपितामहः ।
ममैव तान्यपत्यानि मम शुक्रं हुतं हि तत् ॥ २८
अहं वक्ता च मन्त्रस्य होता शुक्रस्य चैव ह ।
यस्य बीजं फलं तस्य शुक्रं चेत्कारणं मतम् ॥ २९
ततोऽब्रुवन्देवगणाः पितामहमुपेत्य वै ।
कृताञ्जलिपुटाः सर्वे शिरोभिरभिवन्द्य च ॥ ३०
वयं च भगवन्सर्वे जगच्च सचराचरम् ।
तवैव प्रसवाः सर्वे तस्मादग्निर्विभावसुः ।
वरुणश्चेश्वरो देवो लभतां काममीप्सितम् ॥ ३१
निसर्गाद्वरुणश्चापि ब्रह्मणो यादसां पतिः ।
जग्राह वै भृगुं पूर्वमपत्यं सूर्यवर्चसम् ॥ ३२
ईश्वरोऽङ्गिरसं चाग्नेरपत्यार्थेऽभ्यकल्पयत् ।
पितामहस्त्वपत्यं वै कविं जग्राह तत्त्ववित् ॥ ३३
तदा स वारुणः ख्यातो भृगुः प्रसवकर्मकृत् ।
आग्नेयस्त्वङ्गिराः श्रीमान्कविर्ब्राह्मो महायशाः ।
भार्गवाङ्गिरसौ लोके लोकसंतानलक्षणौ ॥ ३४
एते विप्रवराः सर्वे प्रजानां पतयस्त्रयः ।
सर्वं संतानमेतेषामिदमित्युपधारय ॥ ३५
भृगोस्तु पुत्रास्तत्रासन्सप्त तुल्या भृगोर्गुणैः ।
च्यवनो वज्रशीर्षश्च शुचिरौर्वस्तथैव च ॥ ३६

शुक्रो वरेण्यश्च विभुः सवनश्चेति सप्त ते ।
भार्गवा वारुणाः सर्वे येषां वंशे भवानपि ॥ ३७
अष्टौ चाङ्गिरसः पुत्रा वारुणास्तेऽप्युदाहृताः ।
बृहस्पतिरुतथ्यश्च वयस्यः शान्तिरेव च ॥ ३८
घोरो विरूपः संवर्तः सुधन्वा चाष्टमः स्मृतः ।
एतेऽष्टावग्निजाः सर्वे ज्ञाननिष्ठा निरामयाः ॥ ३९
ब्राह्मणस्य कवेः पुत्रा वारुणास्तेऽप्युदाहृताः ।
अष्टौ प्रसवजैर्युक्ता गुणैर्ब्रह्मविदः शुभाः ॥ ४०
कविः काव्यश्च विष्णुश्च बुद्धिमानुशनास्तथा ।
भृगुश्च विरजाश्चैव काशी चोग्रश्च धर्मवित् ॥४१
अष्टौ कविसुता ह्येते सर्वमेभिर्जगत्ततम् ।
प्रजापतय एते हि प्रजानां यैरिमाः प्रजाः ॥ ४२
एवमङ्गिरसश्चैव कवेश्च प्रसवान्वयैः ।
भृगोश्च भृगुशार्दूल वंशजैः सततं जगत् ॥ ४३
वरुणश्चादितो विप्र जग्राह प्रभुरीश्वरः ।
कविं तात भृगुं चैव तस्मात्तौ वारुणौ स्मृतौ ॥४४
जग्राहाङ्गिरसं देवः शिखी तस्माद्धुताशनः ।
तस्मादङ्गिरसो ज्ञेयाः सर्व एव तदन्वयाः ॥ ४५
ब्रह्मा पितामहः पूर्वं देवताभिः प्रसादितः ।
इमे नः संतरिष्यन्ति प्रजाभिर्जगदीश्वराः ॥ ४६
सर्वे प्रजानां पतयः सर्वे चातितपस्विनः ।
त्वत्प्रसादादिमं लोकं तारयिष्यन्ति शाश्वतम् ॥४७
तथैव वंशकर्तारस्तव तेजोविवर्धनाः ।
भवेयुर्वेदविदुषः सर्वे वाक्पतयस्तथा ॥ ४८
देवपक्षधराः सौम्याः प्राजापत्या महर्षयः ।
आप्नुवन्ति तपश्चैव ब्रह्मचर्यं परं तथा ॥ ४९
सर्वे हि वयमेते च तवैव प्रसवः प्रभो ।
देवानां ब्राह्मणानां च त्वं हि कर्ता पितामह ॥५०
मरीचिमादितः कृत्वा सर्वे चैवाथ भार्गवाः ।
अपत्यानीति संप्रेक्ष्य क्षमयाम पितामह ॥ ५१

ते त्वनेनैव रूपेण प्रजनिष्यन्ति वै प्रजाः ।
स्थापयिष्यन्ति चात्मानं युगादिनिधने तथा ॥ ५२
एवमेतत्पुरा वृत्तं तस्य यज्ञे महात्मनः ।
देवश्रेष्ठस्य लोकादौ वारुणीं बिभ्रतस्तनुम् ॥ ५३
अग्निर्ब्रह्मा पशुपतिः शर्वो रुद्रः प्रजापतिः ।
अग्नेरपत्यमेतद्वै सुवर्णमिति धारणा ॥ ५४
अग्न्यभावे च कुर्वन्ति वह्निस्थानेषु काञ्चनम् ।
जामदग्न्य प्रमाणज्ञा वेदश्रुतिनिदर्शनात् ॥ ५५
कुशस्तम्बे जुहोत्यग्निं सुवर्णं तत्र संस्थितम् ।
हुते प्रीतिकरीमृद्धिं भगवांस्तत्र मन्यते ॥ ५६
तस्मादग्निपराः सर्वा देवता इति शुश्रुम ।
ब्रह्मणो हि प्रसूतोऽग्निरग्नेरपि च काञ्चनम् ॥ ५७
तस्माद्ये वै प्रयच्छन्ति सुवर्णं धर्मदर्शिनः ।
देवतास्ते प्रयच्छन्ति समस्ता इति नः श्रुतम् ॥५८
तस्य चातमसो लोका गच्छतः परमां गतिम् ।
स्वर्लोके राजराज्येन सोऽभिषिच्येत भार्गव ॥ ५९
आदित्योदयने प्राप्ते विधिमन्त्रपुरस्कृतम् ।
ददाति काञ्चनं यो वै दुःस्वप्नं प्रतिहन्ति सः ॥६०
ददात्युदितमात्रे यस्तस्य पाप्मा विधूयते ।
मध्याह्ने ददतो रुक्मं हन्ति पापमनागतम् ॥ ६१
ददाति पश्चिमां संध्यां यः सुवर्णं धृतव्रतः ।
ब्रह्मवाय्वग्निसोमानां सालोक्यमुपयाति सः ॥ ६२
सेन्द्रेषु चैव लोकेषु प्रतिष्ठां प्राप्नुते शुभाम् ।
इह लोके यशः प्राप्य शान्तपाप्मा प्रमोदते ॥६३
ततः संपद्यतेऽन्येषु लोकेष्वप्रतिमः सदा ।
अनावृतगतिश्चैव कामचारी भवत्युत ॥ ६४
न च क्षरति तेभ्यः स शश्वच्चैवाप्नुते महत् ।
सुवर्णमक्षयं दत्त्वा लोकानाप्नोति पुष्कलान् ॥ ६५
यस्तु संजनयित्वाग्निमादित्योदयनं प्रति ।
दद्याद्वै व्रतमुद्दिश्य सर्वान्कामान्समश्नुते ॥ ६६

अग्निरित्येव तत्प्राहुः प्रदानं वै सुखावहम् ।
यथेष्टगुणसंपन्नं प्रवर्तकमिति स्मृतम् ॥ ६७

भीष्म उवाच ।

इत्युक्तः स वसिष्ठेन जामदग्न्यः प्रतापवान् ।
ददौ सुवर्णं विप्रेभ्यो व्यमुच्यत च किल्बिषात् ॥
एतत्ते सर्वमाख्यातं सुवर्णस्य महीपते ।
प्रदानस्य फलं चैव जन्म चाग्र्यमनुत्तमम् ॥ ६९
तस्मात्त्वमपि विप्रेभ्यः प्रयच्छ कनकं बहु ।
ददत्सुवर्णं नृपते किल्बिषाद्विप्रमोक्ष्यसि ॥ ७०

इति श्रीमहाभारते अनुशासनपर्वणि
पञ्चाशीतितमोऽध्यायः ॥ ८५ ॥

८६

युधिष्ठिर उवाच ।

उक्ताः पितामहेनेह सुवर्णस्य विधानतः ।
विस्तरेण प्रदानस्य ये गुणाः श्रुतिलक्षणाः ॥ १
यत्तु कारणमुत्पत्तेः सुवर्णस्येह कीर्तितम् ।
स कथं तारकः प्राप्तो निधनं तद्ब्रवीहि मे ॥ २
उक्तः स देवतानां हि अवध्य इति पार्थिव ।
न च तस्येह ते मृत्युर्विस्तरेण प्रकीर्तितः ॥ ३
एतदिच्छाम्यहं श्रोतुं त्वत्तः कुरुकुलोद्वह ।
कार्त्स्न्येन तारकवधं परं कौतूहलं हि मे ॥ ४

भीष्म उवाच ।

विपन्नकृत्या राजेन्द्र देवता ऋषयस्तथा ।
कृत्तिकाश्चोदयामासुरपत्यभरणाय वै ॥ ५
न देवतानां काचिद्धि समर्था जातवेदसः ।
एकापि शक्ता तं गर्भं संधारयितुमोजसा ॥ ६
षण्णां तासां ततः प्रीतः पावको गर्भधारणात् ।
स्वेन तेजोविसर्गेण वीर्येण परमेण च ॥ ७
तासु षट्कृत्तिका गर्भं पुपुषुर्जातवेदसः ।
षट्सु वर्त्मसु तेजोऽग्नेः सकलं निहितं प्रभो ॥ ८
ततस्ता वर्धमानस्य कुमारस्य महात्मनः ।
तेजसाभिपरीताङ्ग्यो न क्वचिच्छर्म लेभिरे ॥ ९
ततस्तेजःपरीताङ्ग्यः सर्वाः काल उपस्थिते ।
समं गर्भं सुषुविरे कृत्तिकास्ता नरर्षभ ॥ १०
ततस्तं षडधिष्ठानं गर्भमेकत्वमागतम् ।
पृथिवी प्रतिजग्राह कान्तीपुरसमीपतः ॥ ११
स गर्भो दिव्यसंस्थानो दीप्तिमान्पावकप्रभः ।
दिव्यं शरवणं प्राप्य ववृधे प्रियदर्शनः ॥ १२
ददृशुः कृत्तिकास्तं तु बालं वह्निसमद्युतिम् ।
जातस्नेहाश्च सौहार्दात्पुपुषुः स्तन्यविस्रवैः ॥ १३
अभवत्कार्त्तिकेयः स त्रैलोक्ये सचराचरे ।
स्कन्नत्वात्स्कन्दतां चाप गुहावासाद्गुहोऽभवत् ॥ १४
ततो देवास्त्रयस्त्रिंशद्दिशश्च सदिगीश्वराः ।
रुद्रो धाता च विष्णुश्च यज्ञः पूषार्यमा भगः ॥
अंशो मित्रश्च साध्याश्च वसवो वासवोऽश्विनौ ।
आपो वायुर्नभश्चन्द्रो नक्षत्राणि ग्रहा रविः ॥ १६
पृथग्भूतानि चान्यानि यानि देवार्पणानि वै ।
आजग्मुस्तत्र तं द्रष्टुं कुमारं ज्वलनात्मजम् ।
ऋषयस्तुष्टुवुश्चैव गन्धर्वाश्च जगुस्तथा ॥ १७
षडाननं कुमारं तं द्विषडक्षं द्विजप्रियम् ।
पीनांसं द्वादशभुजं पावकादित्यवर्चसम् ॥ १८
शयानं शरगुल्मस्थं दृष्ट्वा देवाः सहर्षिभिः ।
लेभिरे परमं हर्षं मेनिरे चासुरं हतम् ॥ १९
ततो देवाः प्रियाण्यस्य सर्व एव समाचरन् ।
क्रीडतः क्रीडनीयानि ददुः पक्षिगणांश्च ह ॥ २०
सुपर्णोऽस्य ददौ पत्रं मयूरं चित्रबर्हिणम् ।
राक्षसाश्च ददुस्तस्मै वराहमहिषावुभौ ॥ २१
कुक्कुटं चाग्निसंकाशं प्रददौ वरुणः स्वयम् ।
चन्द्रमाः प्रददौ मेषमादित्यो रुचिरां प्रभाम् ॥ २२
गवां माता च गा देवी ददौ शतसहस्रशः ।

छागमग्निर्गुणोपेतमिला पुष्पफलं बहु ॥ २३
सुधन्वा शकटं चैव रथं चामितकूबरम् ।
वरुणो वारुणान्दिव्यान्भुजंगान्प्रददौ शुभान् ।
सिंहान्सुरेन्द्रो व्याघ्रांश्च द्वीपिनोऽन्यांश्च दंष्ट्रिणः ॥
श्वापदांश्च बहून्घोरांश्छत्राणि विविधानि च ।
राक्षसासुरसंघाश्च येऽनुजग्मुस्तमीश्वरम् ॥ २५
वर्धमानं तु तं दृष्ट्वा प्रार्थयामास तारकः ।
उपायैर्बहुभिर्हन्तुं नाशकच्चापि तं विभुम् ॥ २६
सेनापत्येन तं देवाः पूजयित्वा गुहालयम् ।
शशंसुर्विप्रकारं तं तस्मै तारककारितम् ॥ २७
स विवृद्धो महावीर्यो देवसेनापतिः प्रभुः ।
जघानामोघया शक्त्या दानवं तारकं गुहः ॥ २८
तेन तस्मिन्कुमारेण क्रीडता निहतेऽसुरे ।
सुरेन्द्रः स्थापितो राज्ये देवानां पुनरीश्वरः ॥ २९
स सेनापतिरेवाथ बभौ स्कन्दः प्रतापवान् ।
ईशो गोप्ता च देवानां प्रियकृच्छंकरस्य च ॥ ३०
हिरण्यमूर्तिर्भगवानेष एव च पावकिः ।
सदा कुमारो देवानां सेनापत्यमवाप्तवान् ॥ ३१
तस्मात्सुवर्णं मङ्गल्यं रत्नमक्षय्यमुत्तमम् ।
सहजं कार्त्तिकेयस्य वह्नेस्तेजः परं मतम् ॥ ३२
एवं रामाय कौरव्य वसिष्ठोऽकथयत्पुरा ।
तस्मात्सुवर्णदानाय प्रयतस्व नराधिप ॥ ३३
रामः सुवर्णं दत्त्वा हि विमुक्तः सर्वकिल्बिषैः ।
त्रिविष्टपे महत्स्थानमवापासुलभं नरैः ॥ ३४

इति श्रीमहाभारते अनुशासनपर्वणि
षडशीतितमोऽध्यायः ॥ ८६ ॥

८७

युधिष्ठिर उवाच ।

चातुर्वर्ण्यस्य धर्मास्तेधर्मः प्रोक्तस्त्वयानघ ।
तथैव मे श्राद्धविधिं कृत्स्नं प्रब्रूहि पार्थिव ॥ १

वैशंपायन उवाच ।

युधिष्ठिरेणैवमुक्तो भीष्मः शांतनवस्तदा ।
इमं श्राद्धविधिं कृत्स्नं प्रवक्तुमुपचक्रमे ॥ २

भीष्म उवाच ।

शृणुष्वावहितो राजञ्श्राद्धकल्पमिमं शुभम् ।
धन्यं यशस्यं पुत्रीयं पितृयज्ञं परंतप ॥ ३
देवासुरमनुष्याणां गन्धर्वोरगरक्षसाम् ।
पिशाचकिंनराणां च पूज्या वै पितरः सदा ॥ ४
पितॄन्पूज्यादितः पश्चाद्देवान्संतर्पयन्ति वै ।
तस्मात्सर्वप्रयत्नेन पुरुषः पूजयेत्सदा ॥ ५
अन्वाहार्यं महाराज पितॄणां श्राद्धमुच्यते ।
तच्चामिषेण विधिना विधिः प्रथमकल्पितः ॥ ६
सर्वेष्वहःसु प्रीयन्ते कृतैः श्राद्धैः पितामहाः ।
प्रवक्ष्यामि तु ते सर्वांस्तिथ्यां तिथ्यां गुणागुणान् ॥
येष्वहःसु कृतैः श्राद्धैर्यत्फलं प्राप्यतेऽनघ ।
तत्सर्वं कीर्तयिष्यामि यथावत्तन्निबोध मे ॥ ८
पितॄनर्च्य प्रतिपदि प्राप्नुयात्स्वगृहे स्त्रियः ।
अभिरूपप्रजायिन्यो दर्शनीया बहुप्रजाः ॥ ९
स्त्रियो द्वितीयां जायन्ते तृतीयायां तु वन्दिनः ।
चतुर्थ्यां क्षुद्रपशवो भवन्ति बहवो गृहे ॥ १०
पञ्चम्यां बहवः पुत्रा जायन्ते कुर्वतां नृप ।
कुर्वाणास्तु नराः षष्ठ्यां भवन्ति द्युतिभागिनः ॥
कृषिभागी भवेच्छ्राद्धं कुर्वाणः सप्तमीं नृप ।
अष्टम्यां तु प्रकुर्वाणो वाणिज्ये लाभमाप्नुयात् ॥१२
नवम्यां कुर्वतः श्राद्धं भवत्येकशफं बहु ।
विवर्धन्ते तु दशमीं गावः श्राद्धानि कुर्वतः ॥ १३
कुप्यभागी भवेन्मर्त्यः कुर्वन्नेकादशीं नृप ।
ब्रह्मवर्चस्विनः पुत्रा जायन्ते तस्य वेश्मनि ॥ १४
द्वादश्यामीहमानस्य नित्यमेव प्रदृश्यते ।
रजतं बहु चित्रं च सुवर्णं च मनोरमम् ॥ १५

ज्ञातीनां तु भवेच्छ्रेष्ठः कुर्वञ्श्राद्धं त्रयोदशीम् ।
अवश्यं तु युवानोऽस्य प्रमीयन्ते नरा गृहे ॥ १६
युद्धभागी भवेन्मर्त्यः श्राद्धं कुर्वंश्चतुर्दशीम् ।
अमावास्यां तु निवपन्सर्वान्कामानवाप्नुयात् ॥ १७
कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीम् ।
श्राद्धकर्मणि तिथ्यः स्युः प्रशस्ता न तथेतराः ॥ १८
यथा चैवापरः पक्षः पूर्वपक्षाद्विशिष्यते ।
तथा श्राद्धस्य पूर्वाह्णादपराह्णो विशिष्यते ॥ १९

इति श्रीमहाभारते अनुशासनपर्वणि
सप्ताशीतितमोऽध्यायः ॥ ८७ ॥

८८

युधिष्ठिर उवाच ।

किंस्विद्दत्तं पितृभ्यो वै भवत्यक्षयमीश्वर ।
किं हविश्चिररात्राय किमानन्त्याय कल्पते ॥ १

भीष्म उवाच ।

हवींषि श्राद्धकल्पे तु यानि श्राद्धविदो विदुः ।
तानि मे शृणु काम्यानि फलं चैषां युधिष्ठिर ॥ २
तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलैस्तथा ।
दत्तेन मासं प्रीयन्ते श्राद्धेन पितरो नृप ॥ ३
वर्धमानतिलं श्राद्धमक्षयं मनुरब्रवीत् ।
सर्वेष्वेव तु भोज्येषु तिलाः प्राधान्यतः स्मृताः ॥ ४
द्वौ मासौ तु भवेत्तृप्तिर्मत्स्यैः पितृगणस्य ह ।
त्रीन्मासानाविकेनाहुश्चातुर्मास्यं शशेन तु ॥ ५
आजेन मासान्प्रीयन्ते पञ्चैव पितरो नृप ।
वाराहेण तु षण्मासान्सप्त वै शाकुनेन तु ॥ ६
मासानष्टौ पार्षतेन रौरवेण नवैव तु ।
गवयस्य तु मांसेन तृप्तिः स्याद्दशमासिकी ॥ ७
मासानेकादश प्रीतिः पितॄणां माहिषेण तु ।
गव्येन दत्ते श्राद्धे तु संवत्सरमिहोच्यते ॥ ८
यथा गव्यं तथा युक्तं पायसं सर्पिषा सह ।
वाध्रीणसस्य मांसेन तृप्तिर्द्वादशवार्षिकी ॥ ९
आनन्त्याय भवेद्दत्तं खड्गमांसं पितृक्षये ।
कालशाकं च लौहं चाप्यानन्त्यं छाग उच्यते ॥ १०
गाथाश्चाप्यत्र गायन्ति पितृगीता युधिष्ठिर ।
सनत्कुमारो भगवान्पुरा मय्यभ्यभाषत ॥ ११
अपि नः स कुले जायाद्यो नो दद्यात्त्रयोदशीम् ।
मघासु सर्पिषा युक्तं पायसं दक्षिणायने ॥ १२
आजेन वापि लौहेन मघास्वेव यतव्रतः ।
हस्तिच्छायासु विधिवत्कर्णव्यजनवीजितम् ॥ १३
एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् ।
यत्रासौ प्रथितो लोकेष्वक्षय्यकरणो वटः ॥ १४
आपो मूलं फलं मांसमन्नं वापि पितृक्षये ।
यत्किंचिन्मधुसंमिश्रं तदानन्त्याय कल्पते ॥ १५

इति श्रीमहाभारते अनुशासनपर्वणि
अष्टाशीतितमोऽध्यायः ॥ ८८ ॥

८९

भीष्म उवाच ।

यमस्तु यानि श्राद्धानि प्रोवाच शशबिन्दवे ।
तानि मे शृणु काम्यानि नक्षत्रेषु पृथक्पृथक् ॥ १
श्राद्धं यः कृत्तिकायोगे कुर्वीत सततं नरः ।
अग्नीनाधाय सापत्यो यजेत विगतज्वरः ॥ २
अपत्यकामो रोहिण्यामोजस्कामो मृगोत्तमे ।
क्रूरकर्मा ददच्छ्राद्धमार्द्रायां मानवो भवेत् ॥ ३
कृषिभागी भवेन्मर्त्यः कुर्वञ्श्राद्धं पुनर्वसौ ।
पुष्टिकामोऽथ पुष्येण श्राद्धमीहेत मानवः ॥ ४
आश्लेषायां ददच्छ्राद्धं वीरान्पुत्रान्प्रजायते ।
ज्ञातीनां तु भवेच्छ्रेष्ठो मघासु श्राद्धमावपन् ॥ ५
फल्गुनीषु ददच्छ्राद्धं सुभगः श्राद्धदो भवेत् ।
अपत्यभागुत्तरासु हस्तेन फलभाग्भवेत् ॥ ६
चित्रायां तु ददच्छ्राद्धं लभेद्रूपवतः सुतान् ।

स्वातियोगे पितॄनर्च्य वाणिज्यमुपजीवति ॥ ७
बहुपुत्रो विशाखासु पित्र्यमीहन्भवेन्नरः ।
अनुराधासु कुर्वाणो राजचक्रं प्रवर्तयेत् ॥ ८
आधिपत्यं व्रजेन्मर्त्यो ज्येष्ठायामपवर्जयन् ।
नरः कुरुकुलश्रेष्ठ श्रद्धादमपुरःसरः ॥ ९
मूले त्वारोग्यमर्च्छेत यशोऽषाढास्वनुत्तमम् ।
उत्तरासु त्वषाढासु वीतशोकश्चरेन्महीम् ॥ १०
श्राद्धं त्वभिजिता कुर्वन्विद्यां श्रेष्ठामवाप्नुयात् ।
श्रवणे तु ददच्छ्राद्धं प्रेत्य गच्छेत्परां गतिम् ॥ ११
राज्यभागी धनिष्ठायां प्राप्नुयान्नापदं नरः ।
नक्षत्रे वारुणे कुर्वन्भिषक्सिद्धिमवाप्नुयात् ॥ १२
पूर्वप्रोष्ठपदाः कुर्वन्बहु विन्देदजाविकम् ।
उत्तरास्वथ कुर्वाणो विन्दते गाः सहस्रशः ॥ १३
बहुरूप्यकृतं वित्तं विन्दते रेवतीं श्रितः ।
अश्वांश्चाश्वयुजे वेत्ति भरणीष्वायुरुत्तमम् ॥ १४
इमं श्राद्धविधिं श्रुत्वा शशबिन्दुस्तथाकरोत् ।
अक्लेशेनाजयच्चापि महीं सोऽनुशशास ह ॥ १५

इति श्रीमहाभारते अनुशासनपर्वणि
एकोननवतितमोऽध्यायः ॥ ८९ ॥

९०

युधिष्ठिर उवाच ।

कीदृशेभ्यः प्रदातव्यं भवेच्छ्राद्धं पितामह ।
द्विजेभ्यः कुरुशार्दूल तन्मे व्याख्यातुमर्हसि ॥ १

भीष्म उवाच ।

ब्राह्मणान्न परीक्षेत क्षत्रियो दानधर्मवित् ।
दैवे कर्मणि पित्र्ये तु न्याय्यमाहुः परीक्षणम् ॥ २
देवताः पूजयन्तीह दैवेनैवेह तेजसा ।
उपेत्य तस्माद्देवेभ्यः सर्वेभ्यो दापयेन्नरः ॥ ३
श्राद्धे त्वथ महाराज परीक्षेद्ब्राह्मणान्बुधः ।
कुलशीलवयोरूपैर्विद्ययाभिजनेन च ॥ ४
एषामन्ये पङ्क्तिदूषास्तथान्ये पङ्क्तिपावनाः ।
अपाङ्क्तेयास्तु ये राजन्कीर्तयिष्यामि ताञ्शृणु ॥ ५
कितवो भ्रूणहा यक्ष्मी पशुपालो निराकृतिः ।
ग्रामप्रेष्यो वार्धुषिको गायनः सर्वविक्रयी ॥ ६
अगारदाही गरदः कुण्डाशी सोमविक्रयी ।
सामुद्रिको राजभृत्यस्तैलिकः कूटकारकः ॥ ७
पित्रा विवदमानश्च यस्य चोपपतिर्गृहे ।
अभिशस्तस्तथा स्तेनः शिल्पं यश्चोपजीवति ॥ ८
पर्वकारश्च सूची च मित्रध्रुक्पारदारिकः ।
अव्रतानामुपाध्यायः काण्डपृष्ठस्तथैव च ॥ ९
श्वभिर्यश्च परिक्रामेद्यः शुना दष्ट एव च ।
परिवित्तिश्च यश्च स्याद्दुश्चर्मा गुरुतल्पगः ।
कुशीलवो देवलको नक्षत्रैर्यश्च जीवति ॥ १०
एतानिह विजानीयादपाङ्क्तेयान्द्विजाधमान् ।
शूद्राणामुपदेशं च ये कुर्वन्त्यल्पचेतसः ॥ ११
षष्टिं काणः शतं षण्ढः श्वित्री यावत्प्रपश्यति ।
पङ्क्त्यां समुपविष्टायां तावद्दूषयते नृप ॥ १२
यद्वेष्टितशिरा भुङ्क्ते यद्भुङ्क्ते दक्षिणामुखः ।
सोपानत्कश्च यद्भुङ्क्ते सर्वं विद्यात्तदासुरम् ॥ १३
असूयता च यद्दत्तं यच्च श्रद्धाविवर्जितम् ।
सर्वं तदसुरेन्द्राय ब्रह्मा भागमकल्पयत् ॥ १४
श्वानश्च पङ्क्तिदूषाश्च नावेक्षेरन्कथंचन ।
तस्मात्परिवृते दद्यात्तिलांश्चान्ववकीरयेत् ॥ १५
तिलादाने च क्रव्यादा ये च क्रोधवशा गणाः ।
यातुधानाः पिशाचाश्च विप्रलुम्पन्ति तद्धविः ॥ १६
यावद्ध्यपङ्क्त्यः पङ्क्त्यां वै भुञ्जानाननुपश्यति ।
तावत्फलाद्भ्रंशयति दातारं तस्य बालिशम् ॥ १७
इमे तु भरतश्रेष्ठ विज्ञेयाः पङ्क्तिपावनाः ।
ये त्वतस्तान्प्रवक्ष्यामि परीक्षस्वेह तान्द्विजान् ॥ १८
वेदविद्याव्रतस्नाता ब्राह्मणाः सर्व एव हि ।

पाङ्क्तेयान्यांस्तु वक्ष्यामि ज्ञेयास्ते पङ्क्तिपावनाः ॥
त्रिणाचिकेतः पञ्चाग्निस्त्रिसुपर्णः षडङ्गवित् ।
ब्रह्मदेयानुसंतानश्छन्दोगो ज्येष्ठसामगः ॥ २०
मातापित्रोर्यश्च वश्यः श्रोत्रियो दशपूरुषः ।
ऋतुकालाभिगामी च धर्मपत्नीषु यः सदा ।
वेदविद्याव्रतस्नातो विप्रः पङ्क्तिं पुनात्युत ॥ २१
अथर्वशिरसोऽध्येता ब्रह्मचारी यतव्रतः ।
सत्यवादी धर्मशीलः स्वकर्मनिरतश्च यः ॥ २२
ये च पुण्येषु तीर्थेषु अभिषेककृतश्रमाः ।
मखेषु च समन्त्रेषु भवन्त्यवभृथाप्लुताः ॥ २३
अक्रोधना अचपलाः क्षान्ता दान्ता जितेन्द्रियाः ।
सर्वभूतहिता ये च श्राद्धेष्वेतान्निमन्त्रयेत् ।
एतेषु दत्तमक्षय्यमेते वै पङ्क्तिपावनाः ॥ २४
इमे परे महाराज विज्ञेयाः पङ्क्तिपावनाः ।
यतयो मोक्षधर्मज्ञा योगाः सुचरितव्रताः ॥ २५
ये चेतिहासं प्रयताः श्रावयन्ति द्विजोत्तमान् ।
ये च भाष्यविदः केचिद्ये च व्याकरणे रताः ॥
अधीयते पुराणं ये धर्मशास्त्राण्यथापि च ।
अधीत्य च यथान्यायं विधिवत्तस्य कारिणः ॥ २७
उपपन्नो गुरुकुले सत्यवादी सहस्रदः ।
अग्र्यः सर्वेषु वेदेषु सर्वप्रवचनेषु च ॥ २८
यावदेते प्रपश्यन्ति पङ्क्त्यास्तावत्पुनन्त्युत ।
ततो हि पावनात्पङ्क्त्याः पङ्क्तिपावन उच्यते ॥ २९
क्रोशादर्धतृतीयात्तु पावयेदेक एव हि ।
ब्रह्मदेयानुसंतान इति ब्रह्मविदो विदुः ॥ ३०
अनृत्विगनुपाध्यायः स चेदग्रासनं व्रजेत् ।
ऋत्विग्भिरननुज्ञातः पङ्क्त्या हरति दुष्कृतम् ॥ ३१
अथ चेद्वेदवित्सर्वैः पङ्क्तिदोषैर्विवर्जितः ।
न च स्यात्पतितो राजन्पङ्क्तिपावन एव सः ॥ ३२
तस्मात्सर्वप्रयत्नेन परीक्ष्यामन्त्रयेद्द्विजान् ।
स्वकर्मनिरतान्दान्तान्कुले जातान्बहुश्रुतान् ॥ ३३
यस्य मित्रप्रधानानि श्राद्धानि च हवींषि च ।
न प्रीणाति पितॄन्देवान्स्वर्गं च न स गच्छति ॥ ३४
यश्च श्राद्धे कुरुते संगतानि
न देवयानेन पथा स याति ।
स वै मुक्तः पिप्पलं बन्धनाद्वा
स्वर्गाल्लोकाच्च्यवते श्राद्धमित्रः ॥ ३५
तस्मान्मित्रं श्राद्धकृन्नाद्रियेत
दद्यान्मित्रेभ्यः संग्रहार्थं धनानि ।
यं मन्यते नैव शत्रुं न मित्रं
तं मध्यस्थं भोजयेद्धव्यकव्ये ॥ ३६
यथोषरे बीजमुप्तं न रोहे-
न्न चास्योप्ता प्राप्नुयाद्बीजभागम् ।
एवं श्राद्धं भुक्तमनर्हमाणै-
र्न चेह नामुत्र फलं ददाति ॥ ३७
ब्राह्मणो ह्यनधीयानस्तृणाग्निरिव शाम्यति ।
तस्मै श्राद्धं न दातव्यं न हि भस्मनि हूयते ॥ ३८
संभोजनी नाम पिशाचदक्षिणा
सा नैव देवान्न पितॄनुपैति ।
इहैव सा भ्राम्यति क्षीणपुण्या
शालान्तरे गौरिव नष्टवत्सा ॥ ३९
यथाग्नौ शान्ते घृतमाजुहोति
तन्नैव देवान्न पितॄनुपैति ।
तथा दत्तं नर्तने गायने च
यां चानृचे दक्षिणामावृणोति ॥ ४०
उभौ हिनस्ति न भुनक्ति चैषा
या चानृचे दक्षिणा दीयते वै ।
आघातनी गर्हितैषा पतन्ती
तेषां प्रेतान्पातयेद्देवयानात् ॥ ४१
ऋषीणां समयं नित्यं ये चरन्ति युधिष्ठिर ।

निश्चिताः सर्वधर्मज्ञास्तान्देवा ब्राह्मणान्विदुः ॥४२
स्वाध्यायनिष्ठा ऋषयो ज्ञाननिष्ठास्तथैव च ।
तपोनिष्ठाश्च बोद्धव्याः कर्मनिष्ठाश्च भारत ॥ ४३
कव्यानि ज्ञाननिष्ठेभ्यः प्रतिष्ठाप्यानि भारत ।
तत्र ये ब्राह्मणाः केचिन्न निन्दन्ति हि ते वराः ॥
ये तु निन्दन्ति जल्पेषु न ताञ्श्राद्धेषु भोजयेत् ।
ब्राह्मणा निन्दिता राजन्हन्युस्त्रिपुरुषं कुलम् ॥ ४५
वैखानसानां वचनमृषीणां श्रूयते नृप ।
दूरादेव परीक्षेत ब्राह्मणान्वेदपारगान् ।
प्रियान्वा यदि वा द्वेष्यांस्तेषु तच्छ्राद्धमावपेत् ॥
यः सहस्रं सहस्राणां भोजयेदनृचां नरः ।
एकस्तान्मन्त्रवित्प्रीतः सर्वानर्हति भारत ॥ ४७

इति श्रीमहाभारते अनुशासनपर्वणि
नवतितमोऽध्यायः ॥ ९० ॥

९१

युधिष्ठिर उवाच ।

केन संकल्पितं श्राद्धं कस्मिन्काले किमात्मकम् ।
भृग्वङ्गिरसके काले मुनिना कतरेण वा ॥ १
कानि श्राद्धेषु वर्ज्यानि तथा मूलफलानि च ।
धान्यजातिश्च का वर्ज्या तन्मे ब्रूहि पितामह ॥ २

भीष्म उवाच ।

यथा श्राद्धं संप्रवृत्तं यस्मिन्काले यदात्मकम् ।
येन संकल्पितं चैव तन्मे शृणु जनाधिप ॥ ३
स्वायंभुवोऽत्रिः कौरव्य परमर्षिः प्रतापवान् ।
तस्य वंशे महाराज दत्तात्रेय इति स्मृतः ॥ ४
दत्तात्रेयस्य पुत्रोऽभून्निमिर्नाम तपोधनः ।
निमेश्चाप्यभवत्पुत्रः श्रीमान्नाम श्रिया वृतः ॥ ५
पूर्णे वर्षसहस्रान्ते स कृत्वा दुष्करं तपः ।
कालधर्मपरीतात्मा निधनं समुपागतः ॥ ६
निमिस्तु कृत्वा शौचानि विधिदृष्टेन कर्मणा ।
संतापमगमत्तीव्रं पुत्रशोकपरायणः ॥ ७
अथ कृत्वोपहार्याणि चतुर्दश्यां महामतिः ।
तमेव गणयञ्शोकं विरात्रे प्रत्यबुध्यत ॥ ८
तस्यासीत्प्रतिबुद्धस्य शोकेन पिहितात्मनः ।
मनः संहृत्य विषये बुद्धिर्विस्तरगामिनी ॥ ९
ततः संचिन्तयामास श्राद्धकल्पं समाहितः ।
यानि तस्यैव भोज्यानि मूलानि च फलानि च ॥
उक्तानि यानि चान्यानि यानि चेष्टानि तस्य ह ।
तानि सर्वाणि मनसा विनिश्चित्य तपोधनः ॥११
अमावास्यां महाप्राज्ञ विप्रानानाय्य पूजिताम् ।
दक्षिणावर्तिकाः सर्वा बृसीः स्वयमथाकरोत् ॥१२
सप्त विप्रांस्ततो भोज्ये युगपत्समुपानयत् ।
ऋते च लवणं भोज्यं श्यामाकान्नं ददौ प्रभुः ॥१३
दक्षिणाग्रास्ततो दर्भा विष्टरेषु निवेशिताः ।
पादयोश्चैव विप्राणां ये त्वन्नमुपभुञ्जते ॥ १४
कृत्वा च दक्षिणाग्रान्वै दर्भान्सुप्रयतः शुचिः ।
प्रददौ श्रीमते पिण्डं नामगोत्रमुदाहरन् ॥ १५
तत्कृत्वा स मुनिश्रेष्ठो धर्मसंकरमात्मनः ।
पश्चात्तापेन महता तप्यमानोऽभ्यचिन्तयत् ॥ १६
अकृतं मुनिभिः पूर्वं किं मयैतदनुष्ठितम् ।
कथं नु शापेन न मां दहेयुर्ब्राह्मणा इति ॥ १७
ततः संचिन्तयामास वंशकर्तारमात्मनः ।
ध्यातमात्रस्तथा चात्रिराजगाम तपोधनः ॥ १८
अथात्रिस्तं तथा दृष्ट्वा पुत्रशोकेन कर्शितम् ।
भृशमाश्वासयामास वाग्भिरिष्टाभिरव्ययः ॥ १९
निमे संकल्पितस्तेऽयं पितृयज्ञस्तपोधनः ।
मा ते भूद्भीः पूर्वदृष्टो धर्मोऽयं ब्रह्मणा स्वयम् ॥
सोऽयं स्वयंभुविहितो धर्मः संकल्पितस्त्वया ।
ऋते स्वयंभुवः कोऽन्यः श्राद्धेयं विधिमाहरेत् ॥२१
आख्यास्यामि च ते भूयः श्राद्धेयं विधिमुत्तमम् ।

स्वयंभुविहितं पुत्र तत्कुरुष्व निबोध मे ॥ २२
कृत्वाग्निकरणं पूर्वं मन्त्रपूर्वं तपोधन ।
ततोऽर्यम्णे च सोमाय वरुणाय च नित्यशः ॥२३
विश्वेदेवाश्च ये नित्यं पितृभिः सह गोचराः ।
तेभ्यः संकल्पिता भागाः स्वयमेव स्वयंभुवा ॥२४
स्तोतव्या चेह पृथिवी निवापस्येह धारिणी ।
वैष्णवी काश्यपी चेति तथैवेहाक्षयेति च ॥ २५
उदकानयने चैव स्तोतव्यो वरुणो विभुः ।
ततोऽग्निश्चैव सोमश्च आप्याय्याविह तेऽनघ ॥२६
देवास्तु पितरो नाम निर्मिता वै स्वयंभुवा ।
ऊष्मपाः सुमहाभागास्तेषां भागाः प्रकल्पिताः ॥
ते श्राद्धेनार्च्यमाना वै विमुच्यन्ते ह किल्बिषात् ।
सप्तकः पितृवंशस्तु पूर्वदृष्टः स्वयंभुवा ॥ २८
विश्वे चाग्निमुखा देवाः संख्याताः पूर्वमेव ते ।
तेषां नामानि वक्ष्यामि भागार्हाणां महात्मनाम् ॥
सहः कृतिर्विपाप्मा च पुण्यकृत्पावनस्तथा ।
ग्राम्निः क्षेमः समूहश्च दिव्यसानुस्तथैव च ॥ ३०
विवस्वान्वीर्यवान्ह्रीमान्कीर्तिमान्कृत एव च ।
विपूर्वः सोमपूर्वश्च सूर्यश्रीश्चेति नामतः ॥ ३१
सोमपः सूर्यसावित्रो दत्तात्मा पुष्करीयकः ।
उष्णीनाभो नभोदश्च विश्वायुर्दीप्तिरेव च ॥ ३२
चमूहरः सुवेषश्च व्योमारिः शंकरो भवः ।
ईशः कर्ता कृतिर्दक्षो भुवनो दिव्यकर्मकृत् ॥ ३३
गणितः पञ्चवीर्यश्च आदित्यो रश्मिमांस्तथा ।
सप्तकृत्सोमवर्चाश्च विश्वकृत्कविरेव च ॥ ३४
अनुगोप्ता सुगोप्ता च नप्ता चेश्वर एव च ।
जितात्मा मुनिवीर्यश्च दीप्तलोमा भयंकरः ॥ ३५
अतिकर्मा प्रतीतश्च प्रदाता चांशुमांस्तथा ।
शैलाभः परमक्रोधी धीरोष्णी भूपतिस्तथा ॥ ३६
स्रजी वज्री वरी चैव विश्वेदेवाः सनातनाः ।
कीर्तितास्ते महाभागाः कालस्य गतिगोचराः ॥३७
अश्राद्धेयानि धान्यानि कोद्रवाः पुलकास्तथा ।
हिङ्गु द्रव्येषु शाकेषु पलाण्डुं लशुनं तथा ॥ ३८
पलाण्डुः सौभञ्जनकस्तथा गृञ्जनकादयः ।
कूष्माण्डजात्यलाबुं च कृष्णं लवणमेव च ॥ ३९
ग्राम्यं वाराहमांसं च यच्चैवाप्रोक्षितं भवेत् ।
कृष्णाजाजी विडश्चैव शीतपाकी तथैव च ।
अङ्कुराद्यास्तथा वर्ज्या इह शृङ्गाटकानि च ॥ ४०
वर्जयेल्लवणं सर्वं तथा जम्बूफलानि च ।
अवक्षुतावरुदितं तथा श्राद्धेषु वर्जयेत् ॥ ४१
निवापे हव्यकव्ये वा गर्हितं च श्वदर्शनम् ।
पितरश्चैव देवाश्च नाभिनन्दन्ति तद्धविः ॥ ४२
चण्डालश्वपचौ वर्ज्यौ निवापे समुपस्थिते ।
काषायवासी कुष्ठी वा पतितो ब्रह्महापि वा ॥ ४३
संकीर्णयोनिर्विप्रश्च संबन्धी पतितश्च यः ।
वर्जनीया बुधैरेते निवापे समुपस्थिते ॥ ४४
इत्येवमुक्त्वा भगवान्स्ववंशजमृषिं पुरा ।
पितामहसभां दिव्यां जगामात्रिस्तपोधनः ॥ ४५

इति श्रीमहाभारते अनुशासनपर्वणि
एकनवतितमोऽध्यायः ॥ ९१ ॥

९२

भीष्म उवाच ।

तथा विधौ प्रवृत्ते तु सर्व एव महर्षयः ।
पितृयज्ञानकुर्वन्त विधिदृष्टेन कर्मणा ॥ १
ऋषयो धर्मनित्यास्तु कृत्वा निवपनान्युत ।
तर्पणं चाप्यकुर्वन्त तीर्थाम्भोभिर्यतव्रताः ॥ २
निवापैर्दीयमानैश्च चातुर्वर्ण्येन भारत ।
तर्पिताः पितरो देवास्ते नान्नं जरयन्ति वै ॥ ३
अजीर्णेनाभिहन्यन्ते ते देवाः पितृभिः सह ।
सोममेवाभ्यपद्यन्त निवापान्नाभिपीडिताः ॥ ४

तेऽब्रुवन्सोममासाद्य पितरोऽजीर्णऽपीडिताः ।
निवापान्नेन पीड्यामः श्रेयो नोऽत्र विधीयताम् ॥
तान्सोमः प्रत्युवाचाथ श्रेयश्चेदीप्सितं सुराः ।
स्वयंभूसदनं यात स वः श्रेयो विधास्यति ॥ ६
ते सोमवचनाद्देवाः पितृभिः सह भारत ।
मेरुशृङ्गे समासीनं पितामहमुपागमन् ॥ ७

पितर ऊचुः ।

निवापान्नेन भगवन्भृशं पीड्यामहे वयम् ।
प्रसादं कुरु नो देव श्रेयो नः संविधीयताम् ॥ ८
इति तेषां वचः श्रुत्वा स्वयंभूरिदमब्रवीत् ।
एष मे पार्श्वतो वह्निर्युष्मच्छ्रेयो विधास्यति ॥ ९

अग्निरुवाच ।

सहितास्तात भोक्ष्यामो निवापे समुपस्थिते ।
जरयिष्यथ चाप्यन्नं मया सार्धं न संशयः ॥ १०
एतच्छ्रुत्वा तु पितरस्ततस्ते विज्वराभवन् ।
एतस्मात्कारणाच्चाग्नेः प्राक्तनं दीयते नृप ॥ ११
निवप्ते चाग्निपूर्वे वै निवापे पुरुषर्षभ ।
न ब्रह्मराक्षसास्तं वै निवापं धर्षयन्त्युत ।
रक्षांसि चापवर्तन्ते स्थिते देवे विभावसौ ॥ १२
पूर्वं पिण्डं पितुर्दद्यात्ततो दद्यात्पितामहे ।
प्रपितामहाय च तत एष श्राद्धविधिः स्मृतः ॥ १३
ब्रूयाच्छ्राद्धे च सावित्रीं पिण्डे पिण्डे समाहितः ।
सोमायेति च वक्तव्यं तथा पितृमतेति च ॥ १४
रजस्वला च या नारी व्यङ्गिता कर्णयोश्च या ।
निवापे नोपतिष्ठेत संग्राह्या नान्यवंशजाः ॥ १५
जलं प्रतरमाणश्च कीर्तयेत पितामहान् ।
नदीमासाद्य कुर्वीत पितॄणां पिण्डतर्पणम् ॥ १६
पूर्वं स्ववंशजानां तु कृत्वाद्भिस्तर्पणं पुनः ।
सुहृत्संबन्धिवर्गाणां ततो दद्याज्जलाञ्जलिम् ॥ १७
कल्माषगोयुगेनाथ युक्तेन तरतो जलम् ।
पितरोऽभिलषन्ते वै नावं चाप्यधिरोहतः ।
सदा नावि जलं तज्ज्ञाः प्रयच्छन्ति समाहिताः ॥
मासार्धे कृष्णपक्षस्य कुर्यान्निवपनानि वै ।
पुष्टिरायुस्तथा वीर्यं श्रीश्चैव पितृवर्तिनः ॥ १९
पितामहः पुलस्त्यश्च वसिष्ठः पुलहस्तथा ।
अङ्गिराश्च क्रतुश्चैव कश्यपश्च महानृषिः ।
एते कुरुकुलश्रेष्ठ महायोगेश्वराः स्मृताः ॥ २०
एते च पितरो राजन्नेष श्राद्धविधिः परः ।
प्रेतास्तु पिण्डसंबन्धान्मुच्यन्ते तेन कर्मणा ॥ २१
इत्येषा पुरुषश्रेष्ठ श्राद्धोत्पत्तिर्यथागमम् ।
ख्यापिता पूर्वनिर्दिष्टा दानं वक्ष्याम्यतः परम् ॥२२

इति श्रीमहाभारते अनुशासनपर्वणि
द्विनवतितमोऽध्यायः ॥ ९२ ॥

९३

युधिष्ठिर उवाच ।

द्विजातयो व्रतोपेता हविस्ते यदि भुञ्जते ।
अन्नं ब्राह्मणकामाय कथमेतत्पितामह ॥ १

भीष्म उवाच ।

अवेदोक्तव्रताश्चैव भुञ्जानाः कार्यकारिणः ।
वेदोक्तेषु तु भुञ्जाना व्रतलुप्ता युधिष्ठिर ॥ २

युधिष्ठिर उवाच ।

यदिदं तप इत्याहुरुपवासं पृथग्जनाः ।
तपः स्यादेतदिह वै तपोऽन्यद्वापि किं भवेत् ॥ ३

भीष्म उवाच ।

मासार्धमासौ नोपवसेद्यत्तपो मन्यते जनः ।
आत्मतन्त्रोपघाती यो न तपस्वी न धर्मवित् ॥ ४
त्यागस्यापि च संपत्तिः शिष्यते तप उत्तमम् ।
सदोपवासी स भवेद्ब्रह्मचारी तथैव च ॥ ५
मुनिश्च स्यात्सदा विप्रो देवांश्चैव सदा यजेत् ।

कुटुम्बिको धर्मकामः सदास्वप्नश्च भारत ॥ ६
अमृताशी सदा च स्यात्पवित्री च सदा भवेत् ।
ऋतवादी सदा च स्यान्नियतश्च सदा भवेत् ॥ ७
विघसाशी सदा च स्यात्सदा चैवातिथिप्रियः ।
अमांसाशी सदा च स्यात्पवित्री च सदा भवेत् ॥

युधिष्ठिर उवाच ।

कथं सदोपवासी स्याद्ब्रह्मचारी च पार्थिव ।
विघसाशी कथं च स्यात्कथं चैवातिथिप्रियः ॥ ९

भीष्म उवाच ।

अन्तरा सायमाशं च प्रातराशं तथैव च ।
सदोपवासी भवति यो न भुङ्क्तेऽन्तरा पुनः ॥ १०
भार्यां गच्छन्ब्रह्मचारी सदा भवति चैव ह ।
ऋतवादी सदा च स्याद्दानशीलश्च मानवः ॥ ११
अभक्षयन्वृथा मांसममांसाशी भवत्युत ।
दानं ददत्पवित्री स्यादस्वप्नश्च दिवास्वपन् ॥ १२
भृत्यातिथिषु यो भुङ्क्ते भुक्तवत्सु नरः सदा ।
अमृतं केवलं भुङ्क्ते इति विद्धि युधिष्ठिर ॥ १३
अभुक्तवत्सु नाश्नाति ब्राह्मणेषु तु यो नरः ।
अभोजनेन तेनास्य जितः स्वर्गो भवत्युत ॥ १४
देवेभ्यश्च पितृभ्यश्च भृत्येभ्योऽतिथिभिः सह ।
अवशिष्टानि यो भुङ्क्ते तमाहुर्विघसाशिनम् ॥ १५
तेषां लोका ह्यपर्यन्ताः सदने ब्रह्मणः स्मृताः ।
उपस्थिता ह्यप्सरोभिर्गन्धर्वैश्च जनाधिप ॥ १६
देवतातिथिभिः सार्धं पितृभिश्चोपभुञ्जते ।
रमन्ते पुत्रपौत्रैश्च तेषां गतिरनुत्तमा ॥ १७

इति श्रीमहाभारते अनुशासनपर्वणि

त्रिनवतितमोऽध्यायः ॥ ९३ ॥

९४

युधिष्ठिर उवाच ।

ब्राह्मणेभ्यः प्रयच्छन्ति दानानि विविधानि च ।
दातृप्रतिग्रहीत्रोर्वा को विशेषः पितामह ॥ १

भीष्म उवाच ।

साधोर्यः प्रतिगृह्णीयात्तथैवासाधुतो द्विजः ।
गुणवत्यल्पदोषः स्यान्निर्गुणे तु निमज्जति ॥ २
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
वृषादर्भेश्च संवादं सप्तर्षीणां च भारत ॥ ३
कश्यपोऽत्रिर्वसिष्ठश्च भरद्वाजोऽथ गौतमः ।
विश्वामित्रो जमदग्निः साध्वी चैवाप्यरुधन्ती ॥ ४
सर्वेषामथ तेषां तु गण्डाभूत्कर्मकारिका ।
शूद्रः पशुसखश्चैव भर्ता चास्या बभूव ह ॥ ५
ते वै सर्वे तपस्यन्तः पुरा चेरुर्महीमिमाम् ।
समाधिनोपशिक्षन्तो ब्रह्मलोकं सनातनम् ॥ ६
अथाभवदनावृष्टिर्महती कुरुनन्दन ।
कृच्छ्रप्राणोऽभवद्यत्र लोकोऽयं वै क्षुधान्वितः ॥ ७
कस्मिंश्चिच्च पुरा यज्ञे याज्येन शिबिसूनुना ।
दक्षिणार्थेऽथ ऋत्विग्भ्यो दत्तः पुत्रो निजः किल ॥
तस्मिन्काले्ऽथ सोऽल्पायुर्दिष्टान्तमगमत्प्रभो ।
ते तं क्षुधाभिसंतप्ताः परिवार्योपतस्थिरे ॥ ९
याज्यात्मजमथो दृष्ट्वा गतासुमृषिसत्तमाः ।
अपचन्त तदा स्थाल्यां क्षुधार्ताः किल भारत ॥१०
निराद्ये मर्त्यलोकेऽस्मिन्नात्मानं ते परीप्सवः ।
कृच्छ्रामापेदिरे वृत्तिमन्नहेतोस्तपस्विनः ॥ ११
अटमानोऽथ तान्मार्गे पचमानान्महीपतिः ।
राजा शैब्यो वृषादर्भिः क्लिश्यमानान्ददर्श ह ॥ १२

वृषादर्भिरुवाच ।

प्रतिग्रहस्तारयति पुष्टिर्वै प्रतिगृह्णताम् ।
मयि यद्विद्यते वित्तं तच्छृणुध्वं तपोधनाः ॥ १३

प्रियो हि मे ब्राह्मणो याचमानो
दद्यामहं वोऽश्वतरीसहस्रम् ।
एकैकशः सवृषाः संप्रसूताः
सर्वेषां वै शीघ्रगाः श्वेतलोमाः ॥ १४

कुलंभराननडुहः शतंशता-
न्धुर्याञ्शुभान्सर्वशोऽहं ददानि ।
पृथ्वीवाहान्पीवरांश्चैव तात्र-
दग्र्या गृष्ट्यो धेनवः सुव्रताश्च ॥ १५

वरान्ग्रामान्व्रीहियवं रसांश्च
रत्नं चान्यद्दुर्लभं किं ददानि ।
मा स्माभक्ष्ये भावमेवं कुरुध्वं
पुष्ट्यर्थं वै किं प्रयच्छाम्यहं वः ॥ १६

ऋषय ऊचुः ।

राजन्प्रतिग्रहो राज्ञो मध्वास्वादो विषोपमः ।
तज्जानमानः कस्मात्त्वं कुरुषे नः प्रलोभनम् ॥ १७
क्षत्रं हि दैवतमिव ब्राह्मणं समुपाश्रितम् ।
अमलो ह्येष तपसा प्रीतः प्रीणाति देवताः ॥ १८
अह्नापीह तपो जातु ब्राह्मणस्योपजायते ।
तद्दाव इव निर्दह्यात्प्राप्तो राजप्रतिग्रहः ॥ १९
कुशलं सह दानेन राजन्नस्तु सदा तव ।
अर्थिभ्यो दीयतां सर्वमित्युक्त्वा ते ततो ययुः ॥
अपक्वमेव तन्मांसमभूत्तेषां च धीमताम् ।
अथ हित्वा ययुः सर्वे वनमाहारकाङ्क्षिणः ॥ २१
ततः प्रचोदिता राज्ञा वनं गत्वास्य मन्त्रिणः ।
प्रचीयोदुम्बराणि स्म दानं दातुं प्रचक्रमुः ॥ २२
उदुम्बराण्यथान्यानि हेमगर्भाण्युपाहरन् ।
भृत्यास्तेषां ततस्तानि प्रग्राहितुमुपाद्रवन् ॥ २३
गुरूणीति विदित्वाथ न ग्राह्याण्यत्रिरब्रवीत् ।
न स्म हे मूढविज्ञाना न स्म हे मन्दबुद्धयः ।
हैमानीमानि जानीमः प्रतिबुद्धाः स्म जागृमः ॥२४
इह ह्येतदुपादत्तं प्रेत्य स्यात्कटुकोदयम् ।
अप्रतिग्राह्यमेवैतत्प्रेत्य चेह सुखेप्सुना ॥ २५

वसिष्ठ उवाच ।

शतेन निष्कं गणितं सहस्रेण च संमितम् ।
यथा बहु प्रतीच्छन्हि पापिष्ठां लभते गतिम् ॥२६

कश्यप उवाच ।

यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः ।
सर्वं तन्नालमेकस्य तस्माद्विद्वाञ्शमं व्रजेत् ॥ २७

भरद्वाज उवाच ।

उत्पन्नस्य रुरोः शृङ्गं वर्धमानस्य वर्धते ।
प्रार्थना पुरुषस्येव तस्य मात्रा न विद्यते ॥ २८

गौतम उवाच ।

न तल्लोके द्रव्यमस्ति यल्लोकं प्रतिपूरयेत् ।
समुद्रकल्पः पुरुषो न कदाचन पूर्यते ॥ २९

विश्वामित्र उवाच ।

कामं कामयमानस्य यदा कामः समृध्यते ।
अथैनमपरः कामस्तृष्णा विध्यति बाणवत् ॥ ३०

जमदग्निरुवाच ।

प्रतिग्रहे संयमो वै तपो धारयते ध्रुवम् ।
तद्धनं ब्राह्मणस्येह लुभ्यमानस्य विस्रवेत् ॥ ३१

अरुन्धत्युवाच ।

धर्मार्थं संचयो यो वै द्रव्याणां पक्षसंमतः ।
तपःसंचय एवेह विशिष्टो द्रव्यसंचयात् ॥ ३२

गण्डोवाच ।

उग्रादितो भयाद्यस्माद्बिभ्यतीमे ममेश्वराः ।
बलीयांसो दुर्बलवद्बिभेम्यहमतः परम् ॥ ३३

पशुसख उवाच ।

यद्वै धर्मे परं नास्ति ब्राह्मणास्तद्धनं विदुः ।

विनयार्थं सुविद्वांसमुपासेथं यथातथम् ॥ ३४

ऋषय ऊचुः ।

कुशलं सह दानाय तस्मै यस्य प्रजा इमाः ।
फलान्युपधियुक्तानि य एवं नः प्रयच्छसि ॥ ३५

भीष्म उवाच ।

इत्युक्त्वा हेमगर्भाणि हित्वा तानि फलानि ते ।
ऋषयो जग्मुरन्यत्र सर्व एव धृतव्रताः ॥ ३६

मन्त्रिण ऊचुः ।

उपधिं शङ्कमानास्ते हित्वेमानि फलानि वै ।
ततोऽन्येनैव गच्छन्ति विदितं तेऽस्तु पार्थिव ॥३७
इत्युक्तः स तु भृत्यैस्तैर्वृषादर्भिश्चुकोप ह ।
तेषां संप्रतिकर्तुं च सर्वेषामगमद्गृहम् ॥ ३८
स गत्वाहवनीयेऽग्नौ तीव्रं नियममास्थितः ।
जुहाव संस्कृतां मन्त्रैरेकैकामाहुतिं नृपः ॥ ३९
तस्मादग्नेः समुत्तस्थौ कृत्या लोकभयंकरी ।
तस्या नाम वृषादर्भिर्यातुधानीत्यथाकरोत् ॥ ४०
सा कृत्या कालरात्रीव कृताञ्जलिरुपस्थिता ।
वृषादर्भिं नरपतिं किं करोमीति चाब्रवीत् ॥ ४१

वृषादर्भिरुवाच ।

ऋषीणां गच्छ सप्तानामरुन्धत्यास्तथैव च ।
दासीभर्तुश्च दास्याश्च मनसा नाम धारय ॥ ४२
ज्ञात्वा नामानि चैतेषां सर्वानेतान्विनाशय ।
विनष्टेषु यथा स्वैरं गच्छ यत्रेप्सितं तव ॥ ४३
सा तथेति प्रतिश्रुत्य यातुधानी स्वरूपिणी ।
जगाम तद्वनं यत्र विचेरुस्ते महर्षयः ॥ ४४

इति श्रीमहाभारते अनुशासनपर्वणि
चतुर्नवतितमोऽध्यायः ॥ ९४ ॥

९५

भीष्म उवाच ।

अथात्रिप्रमुखा राजन्वने तस्मिन्महर्षयः ।
व्यचरन्भक्षयन्तो वै मूलानि च फलानि च ॥ १
अथापश्यन्सुपीनांसपाणिपादमुखोदरम् ।
परिव्रजन्तं स्थूलाङ्गं परिव्राजं शुनःसखम् ॥ २
अरुन्धती तु तं दृष्ट्वा सर्वाङ्गोपचितं शुभा ।
भवितारो भवन्तो वै नैवमित्यब्रवीदृषीन् ॥ ३

वसिष्ठ उवाच ।

नैतस्येह यथास्माकमग्निहोत्रमनिर्हुतम् ।
सायं प्रातश्च होतव्यं तेन पीवाञ्शुनःसखः ॥ ४

अत्रिरुवाच ।

नैतस्येह यथास्माकं क्षुधा वीर्यं समाहृतम् ।
कृच्छ्राधीतं प्रनष्टं च तेन पीवाञ्शुनःसखः ॥ ५

विश्वामित्र उवाच ।

नैतस्येह यथास्माकं शश्वच्छास्त्रं जरद्गवः ।
अलसः क्षुत्परो मूर्खस्तेन पीवाञ्शुनःसखः ॥ ६

जमदग्निरुवाच ।

नैतस्येह यथास्माकं भक्तमिन्धनमेव च ।
संचिन्त्य वार्षिकं किंचित्तेन पीवाञ्शुनःसखः ॥ ७

कश्यप उवाच ।

नैतस्येह यथास्माकं चत्वारश्च सहोदराः ।
देहि देहीति भिक्षन्ति तेन पीवाञ्शुनसखः ॥ ८

भरद्वाज उवाच ।

नैतस्येह यथास्माकं ब्रह्मबन्धोरचेतसः ।
शोको भार्यापवादेन तेन पीवाञ्शुनःसखः ॥ ९

गौतम उवाच ।

नैतस्येह यथास्माकं त्रिकौशेयं हि राङ्कवम् ।

एकैकं वै त्रिवार्षीयं तेन पीवाञ्शुनःसखः ॥ १०

भीष्म उवाच ।

अथ दृष्ट्वा परिवाट् तान्महर्षीञ्शुनःसखः ।
अभिगम्य यथान्यायं पाणिस्पर्शमथाचरत् ॥ ११
परिचर्यां वने तां तु क्षुत्प्रतीघातकारिकाम् ।
अन्योन्येन निवेद्याथ प्रातिष्ठन्त सहैव ते ॥ १२
एकनिश्चयकार्याश्च व्यचरन्त वनानि ते ।
आददानाः समुद्धृत्य मूलानि च फलानि च ॥१३
कदाचिद्विचरन्तस्ते वृक्षैरविरलैर्वृताम् ।
शुचिवारिप्रसन्नोदां ददृशुः पद्मिनीं शुभाम् ॥ १४
बालादित्यवपुःप्रख्यैः पुष्करैरुपशोभिताम् ।
वैदूर्यवर्णसदृशैः पद्मपत्रैरथावृताम् ॥ १५
नानाविधैश्च विहगैर्जलप्रकरसेविभिः ।
एकद्वारामनादेयां सूपतीर्थामकर्दमाम् ॥ १६
वृषादर्भिप्रयुक्ता तु कृत्या विकृतदर्शना ।
यातुधानीति विख्याता पद्मिनीं तामरक्षत ॥ १७
शुनःसखसहायास्तु बिसार्थं ते महर्षयः ।
पद्मिनीमभिजग्मुस्ते सर्वे कृत्याभिरक्षिताम् ॥ १८
ततस्ते यातुधानीं तां दृष्ट्वा विकृतदर्शनाम् ।
स्थितां कमलिनीतीरे कृत्यामूचुर्महर्षयः ॥ १९
एका तिष्ठसि का नु त्वं कस्यार्थे किं प्रयोजनम् ॥
पद्मिनीतीरमाश्रित्य ब्रूहि त्वं किं चिकीर्षसि ॥ २०

यातुधान्युवाच ।

यास्मि सास्म्यनुयोगो मे न कर्तव्यः कथंचन ।
आरक्षिणीं मां पद्मिन्या वित्त सर्वे तपोधनाः ॥२१

ऋषय ऊचुः ।

सर्व एव क्षुधार्ताः स्म न चान्यत्किंचिदस्ति नः ।
भवत्याः संमते सर्वे गृह्णीमहि बिसान्युत ॥ २२

यातुधान्युवाच ।

समयेन बिसानीतो गृह्णीध्वं कामकारतः ।
एकैको नाम मे प्रोक्त्वा ततो गृह्णीत माचिरम् ॥२३

भीष्म उवाच ।

विज्ञाय यातुधानीं तां कृत्यामृषिवधैषिणीम् ।
अत्रिः क्षुधापरीतात्मा ततो वचनमब्रवीत् ॥ २४
अरात्रिरत्रेः सा रात्रिर्यां नाधीते त्रिरद्य वै ।
अरात्रिरत्रिरित्येव नाम मे विद्धि शोभने ॥ २५

यातुधान्युवाच ।

यथोदाहृतमेतत्ते मयि नाम महामुने ।
दुर्धार्यमेतन्मनसा गच्छावतर पद्मिनीम् ॥ २६

वसिष्ठ उवाच ।

वसिष्ठोऽस्मि वरिष्ठोऽस्मि वसे वासं गृहेष्वपि ।
वरिष्ठत्वाच्च वासाच्च वसिष्ठ इति विद्धि माम् ॥ २७

यातुधान्युवाच ।

नामनैरुक्तमेतत्ते दुःखव्याभाषिताक्षरम् ।
नैतद्धारयितुं शक्यं गच्छावतर पद्मिनीम् ॥ २८

कश्यप उवाच ।

कुलं कुलं च कुपपः कुपयः कश्यपो द्विजः ।
काश्यः काशनिकाशत्वादेतन्मे नाम धारय ॥ २९

यातुधान्युवाच ।

यथोदाहृतमेतत्ते मयि नाम महामुने ।
दुर्धार्यमेतन्मनसा गच्छावतर पद्मिनीम् ॥ ३०

भरद्वाज उवाच ।

भरे सुतान्भरे शिष्यान्भरे देवान्भरे द्विजान् ।
भरे भार्यामनव्याजो भरद्वाजोऽस्मि शोभने ॥३१

यातुधान्युवाच ।

नामनैरुक्तमेतत्ते दुःखव्याभाषिताक्षरम् ।

नैतद्धारयितुं शक्यं गच्छावतर पद्मिनीम् ॥ ३२

गौतम उवाच ।

गोदमो दमगोऽधूमो दमो दुर्दर्शनश्च ते ।
विद्धि मां गौतमं कृत्ये यातुधानि निबोध मे ॥

यातुधान्युवाच ।

यथोदाहृतमेतत्ते मयि नाम महामुने ।
नैतद्धारयितुं शक्यं गच्छावतर पद्मिनीम् ॥ ३४

विश्वामित्र उवाच ।

विश्वेदेवाश्च मे मित्रं मित्रमस्मि गवां तथा ।
विश्वामित्रमिति ख्यातं यातुधानि निबोध मे ॥३५

यातुधान्युवाच ।

नामनैरुक्तमेतत्ते दुःखव्याभाषिताक्षरम् ।
नैतद्धारयितुं शक्यं गच्छावतर पद्मिनीम् ॥ ३६

जमदग्निरुवाच ।

जाजमद्यजजा नाम मृजा माह जिजायिषे ।
जमदग्निरिति ख्यातमतो मां विद्धि शोभने ॥ ३७

यातुधान्युवाच ।

यथोदाहृतमेतत्ते मयि नाम महामुने ।
नैतद्धारयितुं शक्यं गच्छावतर पद्मिनीम् ॥ ३८

अरुन्धत्युवाच ।

धरां धरित्रीं वसुधां भर्तुस्तिष्ठाम्यनन्तरम् ।
मनोऽनुरुन्धती भर्तुरिति मां विद्ध्यरुन्धतीम् ॥३९

यातुधान्युवाच ।

नामनैरुक्तमेतत्ते दुःखव्याभाषिताक्षरम् ।
नैतद्धारयितुं शक्यं गच्छावतर पद्मिनीम् ॥ ४०

गण्डोवाच ।

गण्डं गण्डं गतवती गण्डगण्डेति संज्ञिता ।
गण्डगण्डेव गण्डेति विद्धि मानलसंभवे ॥ ४१

यातुधान्युवाच ।

नामनैरुक्तमेतत्ते दुःखव्याभाषिताक्षरम् ।
नैतद्धारयितुं शक्यं गच्छावतर पद्मिनीम् ॥ ४२

पशुसख उवाच ।

सखा सखे यः सख्येयः पशूनां च सखा सदा ।
गौणं पशुसखेत्येवं विद्धि मामग्निसंभवे ॥ ४३

यातुधान्युवाच ।

नामनैरुक्तमेतत्ते दुःखव्याभाषिताक्षरम् ।
नैतद्धारयितुं शक्यं गच्छावतर पद्मिनीम् ॥ ४४

शुनःसख उवाच ।

एभिरुक्तं यथा नाम नाहं वक्तुमिहोत्सहे ।
शुनःसखसखायं मां यातुधान्युपधारय ॥ ४५

यातुधान्युवाच ।

नाम तेऽव्यक्तमुक्तं वै वाक्यं संदिग्धया गिरा ।
तस्मात्सकृदिदानीं त्वं ब्रूहि यन्नाम ते द्विज ॥ ४६

शुनःसख उवाच ।

सकृदुक्तं मया नाम न गृहीतं यदा त्वया ।
तस्मात्त्रिदण्डाभिहता गच्छ भस्मेति माचिरम् ॥४७

भीष्म उवाच ।

सा ब्रह्मदण्डकल्पेन तेन मूर्ध्नि हता तदा ।
कृत्या पपात मेदिन्यां भस्मसाच्च जगाम ह ॥ ४८
शुनःसखश्च हत्वा तां यातुधानीं महाबलाम् ।
भुवि त्रिदण्डं विष्टभ्य शाद्वले समुपाविशत् ॥ ४९
ततस्ते मुनयः सर्वे पुष्कराणि बिसानि च ।
यथाकाममुपादाय समुत्तस्थुर्मुदान्विताः ॥ ५०
श्रमेण महता युक्तास्ते बिसानि कलापशः ।
तीरे निक्षिप्य पद्मिन्यास्तर्पणं चक्रुरम्भसा ॥ ५१
अथोत्थाय जलात्तस्मात्सर्वे ते वै समागमन् ।
नापश्यंश्चापि ते तानि बिसानि पुरुषर्षभ ॥ ५२

ऋषय ऊचुः ।
केन क्षुधाभिभूतानामस्माकं पापकर्मणा ।
नृशंसेनापनीतानि बिसान्याहारकाङ्क्षिणाम् ॥ ५३
ते शङ्कमानास्त्वन्योन्यं पप्रच्छुर्द्विजसत्तमाः ।
त ऊचुः शपथं सर्वे कुर्म इत्यरिकर्शन ॥ ५४
त उक्त्वा बाढमित्येव सर्व एव शुनःसखम् ।
क्षुधार्ताः सुपरिश्रान्ताः शपथायोपचक्रमुः ॥ ५५
अत्रिरुवाच ।
स गां स्पृशतु पादेन सूर्यं च प्रतिमेहतु ।
अनध्यायेष्वधीयीत बिसस्तैन्यं करोति यः ॥ ५६
वसिष्ठ उवाच ।
अनध्यायपरो लोके शुनः स परिकर्षतु ।
परिव्राड्कामवृत्तोऽस्तु बिसस्तैन्यं करोति यः ॥ ५७
शरणागतं हन्तु मित्रं स्वसुतां चोपजीवतु ।
अर्थान्काङ्क्षतु कीनाशाद्बिसस्तैन्यं करोति यः ॥ ५८
कश्यप उवाच ।
सर्वत्र सर्वं पणतु न्यासलोपं करोतु च ।
कूटसाक्षित्वमभ्येतु बिसस्तैन्यं करोति यः ॥ ५९
वृथामांसं समश्नातु वृथादानं करोतु च ।
यातु स्त्रियं दिवा चैव बिसस्तैन्यं करोति यः ॥ ६०
भरद्वाज उवाच ।
नृशंसस्त्यक्तधर्मोऽस्तु स्त्रीषु ज्ञातिषु गोषु च ।
ब्राह्मणं चापि जयतां बिसस्तैन्यं करोति यः ॥ ६१
उपाध्यायमधः कृत्वा ऋचोऽध्येतु यजूंषि च ।
जुहोतु च स कक्षाग्नौ बिसस्तैन्यं करोति यः ॥ ६२
जमदग्निरुवाच ।
पुरीषमुत्सृजत्वप्सु हन्तु गां चापि दोहिनीम् ।
अनृतौ मैथुनं यातु बिसस्तैन्यं करोति यः ॥ ६३
द्वेष्यो भार्योपजीवी स्याद्दूरबन्धुश्च वैरवान् ।
अन्योन्यस्यातिथिश्चास्तु बिसस्तैन्यं करोति यः ॥
गौतम उवाच ।
अधीत्य वेदांस्त्यजतु त्रीनग्नीनपविध्यतु ।
विक्रीणातु तथा सोमं बिसस्तैन्यं करोति यः ॥ ६५
उदपानप्लवे ग्रामे ब्राह्मणो वृषलीपतिः ।
तस्य सालोक्यतां यातु बिसस्तैन्यं करोति यः ॥ ६६
विश्वामित्र उवाच ।
जीवतो वै गुरून्भृत्यान्भरन्त्वस्य परे जनाः ।
अगतिर्बहुपुत्रः स्याद्बिसस्तैन्यं करोति यः ॥ ६७
अशुचिर्ब्रह्मकूटोऽस्तु ऋद्ध्या चैवाप्यहंकृतः ।
कर्षको मत्सरी चास्तु बिसस्तैन्यं करोति यः ॥ ६८
वर्षान्करोतु भृतको राज्ञश्चास्तु पुरोहितः ।
अयाज्यस्य भवेदृत्विग्बिसस्तैन्यं करोति यः ॥ ६९
अरुन्धत्युवाच ।
नित्यं परिवदेच्छ्वश्रूं भर्तुर्भवतु दुर्मनाः ।
एका स्वादु समश्नातु बिसस्तैन्यं करोति या ॥ ७०
ज्ञातीनां गृहमध्यस्था सक्तूनत्तु दिनक्षये ।
अभाग्यावीरसूरस्तु बिसस्तैन्यं करोति या ॥ ७१
गण्डोवाच ।
अनृतं भाषतु सदा साधुभिश्च विरुध्यतु ।
ददातु कन्यां शुल्केन बिसस्तैन्यं करोति या ॥ ७२
साधयित्वा स्वयं प्राशेद्दास्ये जीवतु चैव ह ।
विकर्मणा प्रमीयेत बिसस्तैन्यं करोति या ॥ ७३
पशुसख उवाच ।
दास्य एव प्रजायेत सोऽप्रसूतिरकिंचनः ।
दैवतेष्वनमस्कारो बिसस्तैन्यं करोति यः ॥ ७४
शुनःसख उवाच ।
अध्वर्यवे दुहितरं ददातु
छन्दोगे वा चरितब्रह्मचर्ये ।

आथर्वणं वेदमधीत्य विप्रः
स्नायीत यो वै हरते बिसानि ॥ ७५

ऋषय ऊचुः ।

इष्टमेतद्द्विजातीनां योऽयं ते शपथः कृतः ।
त्वया कृतं बिसस्तैन्यं सर्वेषां नः शुनःसख ॥ ७६

शुनःसख उवाच ।

न्यस्तमाद्यमपश्यद्भिर्यदुक्तं कृतकर्मभिः ।
सत्यमेतन्न मिथ्यैतद्बिसस्तैन्यं कृतं मया ॥ ७७
मया ह्यन्तर्हितानीह बिसानीमानि पश्यत ।
परीक्षार्थं भगवतां कृतमेतन्मयानघाः ।
रक्षणार्थं च सर्वेषां भवतामहमागतः ॥ ७८
यातुधानी ह्यतिक्रुद्धा कृत्यैषा वो वधैषिणी ।
वृषादर्भिप्रयुक्तैषा निहता मे तपोधनाः ॥ ७९
दुष्टा हिंस्यादियं पापा युष्मान्प्रत्यग्निसंभवा ।
तस्मादस्म्यागतो विप्रा वासवं मां निबोधत ॥ ८०
अलोभादक्षया लोकाः प्राप्ता वः सार्वकामिकाः ।
उत्तिष्ठध्वमितः क्षिप्रं तानवाप्नुत वै द्विजाः ॥ ८१

भीष्म उवाच ।

ततो महर्षयः प्रीतास्तथेत्युक्त्वा पुरंदरम् ।
सहैव त्रिदशेन्द्रेण सर्वे जग्मुस्त्रिविष्टपम् ॥ ८२
एवमेते महात्मानो भोगैर्बहुविधैरपि ।
क्षुधा परमया युक्ताश्छन्द्यमाना महात्मभिः ।
नैव लोभं तदा चक्रुस्ततः स्वर्गमवाप्नुवन् ॥ ८३
तस्मात्सर्वास्ववस्थासु नरो लोभं विवर्जयेत् ।
एष धर्मः परो राजन्नलोभ इति विश्रुतः ॥ ८४
इदं नरः सच्चरितं समवायेषु कीर्तयेत् ।
सुखभागी च भवति न च दुर्गाण्यवाप्नुते ॥ ८५
प्रीयन्ते पितरश्चास्य ऋषयो देवतास्तथा ।
यशोधर्मार्थभागी च भवति प्रेत्य मानवः ॥ ८६

इति श्रीमहाभारते अनुशासनपर्वणि
पञ्चनवतितमोऽध्यायः ॥ ९५ ॥

९६

भीष्म उवाच ।

अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
यद्वृत्तं तीर्थयात्रायां शपथं प्रति तच्छृणु ॥ १
पुष्करार्थं कृतं स्तैन्यं पुरा भरतसत्तम ।
राजर्षिभिर्महाराज तथैव च द्विजर्षिभिः ॥ २
ऋषयः समेताः पश्चिमे वै प्रभासे
समागता मन्त्रममन्त्रयन्त ।
चराम सर्वे पृथिवीं पुण्यतीर्थां
तन्नः कार्यं हन्त गच्छाम सर्वे ॥ ३
शुक्रोऽङ्गिराश्चैव कविश्च विद्वां-
स्तथागस्त्यो नारदपर्वतौ च ।
भृगुर्वसिष्ठः कश्यपो गौतमश्च
विश्वामित्रो जमदग्निश्च राजन् ॥ ४
ऋषिस्तथा गालवोऽथाष्टकश्च
भरद्वाजोऽरुन्धती वालखिल्याः ।
शिबिर्दिलीपो नहुषोऽम्बरीषो
राजा ययातिर्धुन्धुमारोऽथ पूरुः ॥ ५
जग्मुः पुरस्कृत्य महानुभावं
शतक्रतुं वृत्रहणं नरेन्द्र ।
तीर्थानि सर्वाणि परिक्रमन्तो
माघ्यां ययुः कौशिकीं पुण्यतीर्थाम् ॥ ६
सर्वेषु तीर्थेष्वथ धूतपापा
जग्मुस्ततो ब्रह्मसरः सुपुण्यम् ।
देवस्य तीर्थे जलमग्निकल्पा
विगाह्य ते भुक्तबिसप्रसूनाः ॥ ७
केचिद्बिसान्यखनंस्तत्र राज-

अन्ये मृणालान्यखनंस्तत्र विप्राः ।
अथापश्यन्पुष्करं ते ह्रियन्तं
ह्रदादगस्त्येन समुद्धृतं वै ॥ ८
तानाह सर्वानृषिमुख्यानगस्त्यः
केनादत्तं पुष्करं मे सुजातम् ।
युष्माञ्शङ्के दीयतां पुष्करं मे
न वै भवन्तो हर्तुमर्हन्ति पद्मम् ॥ ९
शृणोमि कालो हिंसते धर्मवीर्यं
सेयं प्राप्ता वर्धते धर्मपीडा ।
पुराधर्मो वर्धते नेह याव-
त्तावद्गच्छामि परलोकं चिराय ॥ १०
पुरा वेदान्ब्राह्मणा ग्राममध्ये
घुष्टस्वरा वृषलाञ्श्रावयन्ति ।
पुरा राजा व्यवहारानधर्म्या-
न्पश्यत्यहं परलोकं व्रजामि ॥ ११
पुरावरान्प्रत्यवरान्गरीयसो
यावन्नरा नावमंस्यन्ति सर्वे ।
तमोत्तरं यावदिदं न वर्तते
तावद्व्रजामि परलोकं चिराय ॥ १२
पुरा प्रपश्यामि परेण मर्त्या-
न्बलीयसा दुर्बलान्भुज्यमानान् ।
तस्माद्यास्यामि परलोकं चिराय
न ह्युत्सहे द्रष्टुमीदृङ्नृलोके ॥ १३
तमाहुरार्ता ऋषयो महर्षिं
न ते वयं पुष्करं चोरयामः ।
मिथ्याभिषङ्गो भवता न कार्यः
शपाम तीक्ष्णाञ्शपथान्महर्षे ॥ १४
ते निश्चितास्तत्र महर्षयस्तु
संमन्यन्तो धर्ममेवं नरेन्द्र ।
ततोऽशपञ्शपथान्पर्ययेण
सहैव ते पार्थिव पुत्रपौत्रैः ॥ १५

भृगुरुवाच ।

प्रत्याक्रोशेदिहाक्रुष्टस्ताडितः प्रतिताडयेत् ।
खादेच्च पृष्ठमांसानि यस्ते हरति पुष्करम् ॥ १६

वसिष्ठ उवाच ।

अस्वाध्यायपरो लोके श्वानं च परिकर्षतु ।
पुरे च भिक्षुर्भवतु यस्ते हरति पुष्करम् ॥ १७

कश्यप उवाच ।

सर्वत्र सर्वं पणतु न्यासे लोभं करोतु च ।
कूटसाक्षित्वमभ्येतु यस्ते हरति पुष्करम् ॥ १८

गौतम उवाच ।

जीवत्वहंकृतो बुद्ध्या विषमत्वधमेन सः ।
कर्षको मत्सरी चास्तु यस्ते हरति पुष्करम् ॥ १९

अङ्गिरा उवाच ।

अशुचिर्ब्रह्मकूटोऽस्तु श्वानं च परिकर्षतु ।
ब्रह्महानिकृतिश्चास्तु यस्ते हरति पुष्करम् ॥ २०

धुन्धुमार उवाच ।

अकृतज्ञोऽस्तु मित्राणां शूद्रायां तु प्रजायतु ।
एकः संपन्नमश्नातु यस्ते हरति पुष्करम् ॥ २१

पूरुरुवाच ।

चिकित्सायां प्रचरतु भार्यया चैव पुष्यतु ।
श्वशुरात्तस्य वृत्तिः स्याद्यस्ते हरति पुष्करम् ॥ २२

दिलीप उवाच ।

उदपानप्लवे ग्रामे ब्राह्मणो वृषलीपतिः ।
तस्य लोकान्स व्रजतु यस्ते हरति पुष्करम् ॥ २३

शुक्र उवाच ।

पृष्ठमांसं समश्नातु दिवा गच्छतु मैथुनम् ।
प्रेष्यो भवतु राज्ञश्च यस्ते हरति पुष्करम् ॥ २४

जमदग्निरुवाच ।
अनध्यायेष्वधीयीत मित्रं श्राद्धे च भोजयेत् ।
श्राद्धे शूद्रस्य चाश्नीयाद्यस्ते हरति पुष्करम् ॥ २५
शिबिरुवाच ।
अनाहिताग्निर्म्रियतां यज्ञे विघ्नं करोतु च ।
तपस्विभिर्विरुध्येत यस्ते हरति पुष्करम् ॥ २६
ययातिरुवाच ।
अनृतौ जटी व्रतिन्यां वै भार्यायां संप्रजायतु ।
निराकरोतु वेदांश्च यस्ते हरति पुष्करम् ॥ २७
नहुष उवाच ।
अतिथिं गृहस्थो नुदतु कामवृत्तोऽस्तु दीक्षितः ।
विद्यां प्रयच्छतु भृतो यस्ते हरति पुष्करम् ॥ २८
अम्बरीष उवाच ।
नृशंसस्त्यक्तधर्मोऽस्तु स्त्रीषु ज्ञातिषु गोषु च ।
ब्राह्मणं चापि जहतु यस्ते हरति पुष्करम् ॥ २९
नारद उवाच ।
गूढोऽज्ञानी बहिः शास्त्रं पठतां विस्वरं पदम् ।
गरीयसोऽवजानातु यस्ते हरति पुष्करम् ॥ ३०
नाभाग उवाच ।
अनृतं भाषतु सदा सद्भिश्चैव विरुध्यतु ।
शुल्केन कन्यां ददतु यस्ते हरति पुष्करम् ॥ ३१
कविरुवाच ।
पदा स गां ताडयतु सूर्यं च प्रति मेहतु ।
शरणागतं च त्यजतु यस्ते हरति पुष्करम् ॥ ३२
विश्वामित्र उवाच ।
करोतु भृतकोऽवर्षां राज्ञश्चास्तु पुरोहितः ।
ऋत्विगस्तु ह्ययाज्यस्य यस्ते हरति पुष्करम् ॥ ३३
पर्वत उवाच ।
ग्रामे चाधिकृतः सोऽस्तु खरयानेन गच्छतु ।
शुनः कर्षतु वृत्त्यर्थे यस्ते हरति पुष्करम् ॥ ३४
भरद्वाज उवाच ।
सर्वपापसमादानं नृशंसे चानृते च यत् ।
तत्तस्यास्तु सदा पापं यस्ते हरति पुष्करम् ॥ ३५
अष्टक उवाच ।
स राजास्त्वकृतप्रज्ञः कामवृत्तिश्च पापकृत् ।
अधर्मेणानुशास्तूर्वीं यस्ते हरति पुष्करम् ॥ ३६
गालव उवाच ।
पापिष्ठेभ्यस्त्वनर्घार्हः स नरोऽस्तु स्वपापकृत् ।
दत्त्वा दानं कीर्तयतु यस्ते हरति पुष्करम् ॥ ३७
अरुन्धत्युवाच ।
श्वश्र्वापवादं वदतु भर्तुर्भवतु दुर्मनाः ।
एका स्वादु समश्नातु या ते हरति पुष्करम् ॥ ३८
वालखिल्या ऊचुः ।
एकपादेन वृत्त्यर्थं ग्रामद्वारे स तिष्ठतु ।
धर्मज्ञस्त्यक्तधर्मोऽस्तु यस्ते हरति पुष्करम् ॥ ३९
पशुसख उवाच ।
अग्निहोत्रमनादृत्य सुखं स्वपतु स द्विजः ।
परिव्राट्कामवृत्तोऽस्तु यस्ते हरति पुष्करम् ॥ ४०
सुरभ्युवाच ।
बाल्वजेन निदानेन कांस्यं भवतु दोहनम् ।
दुह्येत परवत्सेन या ते हरति पुष्करम् ॥ ४१
भीष्म उवाच ।
ततस्तु तैः शपथैः शप्यमानै-
र्नानाविधैर्बहुभिः कौरवेन्द्र ।
सहस्राक्षो देवराट् संप्रहृष्टः
समीक्ष्य तं कोपनं विप्रमुख्यम् ॥ ४२
अथाब्रवीन्मघवा प्रत्ययं स्वं
समाभाष्य तमृषिं जातरोषम् ।

ब्रह्मर्षिदेवर्षिनृपर्षिमध्ये

यत्तन्निबोधेह ममाद्य राजन् ॥ ४३

शक्र उवाच ।

अध्वर्यवे दुहितरं ददातु

च्छन्दोगे वा चरितब्रह्मचर्ये ।

आथर्वणं वेदमधीत्य विप्रः

स्नायेत यः पुष्करमाददाति ॥ ४४

सर्वान्वेदानधीयीत पुण्यशीलोऽस्तु धार्मिकः ।
ब्रह्मणः सदनं यातु यस्ते हरति पुष्करम् ॥ ४५

अगस्त्य उवाच ।

आशीर्वादस्त्वया प्रोक्तः शपथो बलसूदन ।
दीयतां पुष्करं मह्यमेष धर्मः सनातनः ॥ ४६

इन्द्र उवाच ।

न मया भगवँल्लोभाद्धृतं पुष्करमद्य वै ।
धर्मं तु श्रोतुकामेन हृतं न क्रोद्धुमर्हसि ॥ ४७
धर्मः श्रुतिसमुत्कर्षो धर्मसेतुरनामयः ।
आर्षो वै शाश्वतो नित्यमव्ययोऽयं मया श्रुतः ॥४८
तदिदं गृह्यतां विद्वन्पुष्करं मुनिसत्तम ।
अतिक्रमं मे भगवन्क्षन्तुमर्हस्यनिन्दित ॥ ४९
इत्युक्तः स महेन्द्रेण तपस्वी कोपनो भृशम् ।
जग्राह पुष्करं धीमान्प्रसन्नश्चाभवन्मुनिः ॥ ५०
प्रययुस्ते ततो भूयस्तीर्थानि वनगोचराः ।
पुण्यतीर्थेषु च तथा गात्राण्याप्लावयन्ति ते ॥ ५१
आख्यानं य इदं युक्तः पठेत्पर्वणि पर्वणि ।
न मूर्खं जनयेत्पुत्रं न भवेच्च निराकृतिः ॥ ५२
न तमापत्स्पृशेत्काचिन्न ज्वरो न रुजश्च ह ।
विरजाः श्रेयसा युक्तः प्रेत्य स्वर्गमवाप्नुयात् ॥ ५३
यश्च शास्त्रमनुध्यायेदृषिभिः परिपालितम् ।
सगच्छेद्ब्रह्मणो लोकमव्ययं च नरोत्तम ॥ ५४

इति श्रीमहाभारते अनुशासनपर्वणि
षण्णवतितमोऽध्यायः ॥ ९६ ॥

९७

युधिष्ठिर उवाच ।

यदिदं श्राद्धधर्मेषु दीयते भरतर्षभ ।
छत्रं चोपानहौ चैव केनैतत्संप्रवर्तितम् ।
कथं चैतत्समुत्पन्नं किमर्थं च प्रदीयते ॥ १
न केवलं श्राद्धधर्मे पुण्यकेष्वपि दीयते ।
एतद्विस्तरतो राजञ्श्रोतुमिच्छामि तत्त्वतः ॥ २

भीष्म उवाच ।

शृणु राजन्नवहितश्छत्रोपानहविस्तरम् ।
यथैतत्प्रथितं लोके येन चैतत्प्रवर्तितम् ॥ ३
यथा चाक्षय्यतां प्राप्तं पुण्यतां च यथा गतम् ।
सर्वमेतदशेषेण प्रवक्ष्यामि जनाधिप ॥ ४
इतिहासं पुरावृत्तमिमं शृणु नराधिप ।
जमदग्नेश्च संवादं सूर्यस्य च महात्मनः ॥ ५
पुरा स भगवान्साक्षाद्धनुषाक्रीडत प्रभो ।
संधाय संधाय शरांश्चिक्षेप किल भार्गवः ॥ ६
तान्क्षिप्तान्रेणुका सर्वांस्तस्येषून्दीप्ततेजसः ।
आनाय्य सा तदा तस्मै प्रादादसकृदच्युत ॥ ७
अथ तेन स शब्देन ज्यातलस्य शरस्य च ।
प्रहृष्टः संप्रचिक्षेप सा च प्रत्याजहार तान् ॥ ८
ततो मध्याह्नमारूढे ज्येष्ठामूले दिवाकरे ।
स सायकान्द्विजो विद्ध्वा रेणुकामिदमब्रवीत् ॥ ९
गच्छानय विशालाक्षि शरानेतान्धनुश्च्युतान् ।
यावदेतान्पुनः सुभ्रु क्षिपामीति जनाधिप ॥ १०
सा गच्छत्यन्तरा छायां वृक्षमाश्रित्य भामिनी ।
तस्थौ तस्या हि संतप्तं शिरः पादौ तथैव च ॥११
स्थिता सा तु मुहूर्तं वै भर्तुः शापभयाच्छुभा ।

यथावानयितुं भूयः सायकानसितेक्षणा ।
प्रत्याजगाम च शरांस्तानादाय यशस्विनी ॥ १२
सा प्रस्विन्ना सुचार्वङ्गी पद्भ्यां दुःखं नियच्छती ।
उपाजगाम भर्तारं भयाद्भर्तुः प्रवेपती ॥ १३
स तामृषिस्ततः क्रुद्धो वाक्यमाह शुभाननाम् ।
रेणुके किं चिरेण त्वमागतेति पुनः पुनः ॥ १४

रेणुकोवाच ।

शिरस्तावत्प्रदीप्तं मे पादौ चैव तपोधन ।
सूर्यतेजोनिरुद्धाहं वृक्षच्छायामुपाश्रिता ॥ १५
एतस्मात्कारणाद्ब्रह्मंश्चिरमेतत्कृतं मया ।
एतज्ज्ञात्वा मम विभो मा क्रुधस्त्वं तपोधन ॥१६

जमदग्निरुवाच ।

अद्यैनं दीप्तकिरणं रेणुके तव दुःखदम् ।
शरैर्निपातयिष्यामि सूर्यमस्त्राग्नितेजसा ॥ १७

भीष्म उवाच ।

स विस्फार्य धनुर्दिव्यं गृहीत्वा च बहूञ्शरान् ।
अतिष्ठत्सूर्यमभितो यतो याति ततोमुखः ॥ १८
अथ तं प्रहरिष्यन्तं सूर्योऽभ्येत्य वचोऽब्रवीत् ।
द्विजरूपेण कौन्तेय किं ते सूर्योऽपराध्यते ॥ १९
आदत्ते रश्मिभिः सूर्यो दिवि विद्वंस्ततस्ततः ।
रसं स तं वै वर्षासु प्रवर्षति दिवाकरः ॥ २०
ततोऽन्नं जायते विप्र मनुष्याणां सुखावहम् ।
अन्नं प्राणा इति यथा वेदेषु परिपठ्यते ॥ २१
अथाभ्रेषु निगूढश्च रश्मिभिः परिवारितः ।
सप्त द्वीपानिमान्ब्रह्मन्वर्षेणाभिप्रवर्षति ॥ २२
ततस्तदौषधीनां च वीरुधां पत्रपुष्पजम् ।
सर्वं वर्षाभिनिर्वृत्तमन्नं संभवति प्रभो ॥ २३
जातकर्माणि सर्वाणि व्रतोपनयनानि च ।
गोदानानि विवाहाश्च तथा यज्ञसमृद्धयः ॥ २४
सत्राणि दानानि तथा संयोगा वित्तसंचयाः ।
अन्नतः संप्रवर्तन्ते यथा त्वं वेत्थ भार्गव ॥ २५
रमणीयानि यावन्ति यावदारम्भकाणि च ।
सर्वमन्नात्प्रभवति विदितं कीर्तयामि ते ॥ २६
सर्वं हि वेत्थ विप्र त्वं यदेतत्कीर्तितं मया ।
प्रसादये त्वा विप्रर्षे किं ते सूर्यो निपात्यते ॥ २७

इति श्रीमहाभारते अनुशासनपर्वणि
सप्तनवतितमोऽध्यायः ॥ ९७ ॥

९८

युधिष्ठिर उवाच ।

एवं तदा प्रयाचन्तं भास्करं मुनिसत्तमः ।
जमदग्निर्महातेजाः किं कार्यं प्रत्यपद्यत ॥ १

भीष्म उवाच ।

तथा प्रयाचमानस्य मुनिरग्निसमप्रभः ।
जमदग्निः शमं नैव जगाम कुरुनन्दन ॥ २
ततः सूर्यो मधुरया वाचा तमिदमब्रवीत् ।
कृताञ्जलिर्विप्ररूपी प्रणम्येदं विशां पते ॥ ३
चलं निमित्तं विप्रर्षे सदा सूर्यस्य गच्छतः ।
कथं चलं वेत्स्यसि त्वं सदा यान्तं दिवाकरम् ॥४

जमदग्निरुवाच ।

स्थिरं वापि चलं वापि जाने त्वां ज्ञानचक्षुषा ।
अवश्यं विनयाधानं कार्यमद्य मया तव ॥ ५
अपराह्णे निमेषार्धं तिष्ठसि त्वं दिवाकर ।
तत्र वेत्स्यामि सूर्य त्वां न मेऽत्रास्ति विचारणा ॥

सूर्य उवाच ।

असंशयं मां विप्रर्षे वेत्स्यसे धन्विनां वर ।
अपकारिणं तु मां विद्धि भगवञ्शरणागतम् ॥ ७

भीष्म उवाच ।

ततः प्रहस्य भगवाञ्जमदग्निरुवाच तम् ।
न भीः सूर्य त्वया कार्या प्रणिपातगतो ह्यसि ॥ ८

ब्राह्मणेष्वार्जवं यच्च स्थैर्यं च धरणीतले ।
सौम्यतां चैव सोमस्य गाम्भीर्यं वरुणस्य च ॥ ९
दीप्तिमग्नेः प्रभां मेरोः प्रतापं तपनस्य च ।
एतान्यतिक्रमेद्यो वै स हन्याच्छरणागतम् ॥ १०
भवेत्स गुरुतल्पी च ब्रह्महा च तथा भवेत् ।
सुरापानं च कुर्यात्स यो हन्याच्छरणागतम् ॥ ११
एतस्य त्वपनीतस्य समाधिं तात चिन्तय ।
यथा सुखगमः पन्था भवेत्त्वद्रश्मितापितः ॥ १२

भीष्म उवाच ।

एतावदुक्त्वा स तदा तूष्णीमासीद्भृगूद्वहः ।
अथ सूर्यो ददौ तस्मै छत्रोपानहमाशु वै ॥ १३

सूर्य उवाच ।

महर्षे शिरसस्त्राणं छत्रं मद्रश्मिवारणम् ।
प्रतिगृह्णीष्व पद्भ्यां च त्राणार्थं चर्मपादुके ॥ १४
अद्यप्रभृति चैवैतल्लोके संप्रचरिष्यति ।
पुण्यदानेषु सर्वेषु परमक्षय्यमेव च ॥ १५

भीष्म उवाच ।

उपानच्छत्रमेतद्वै सूर्येणेह प्रवर्तितम् ।
पुण्यमेतदभिख्यातं त्रिषु लोकेषु भारत ॥ १६
तस्मात्प्रयच्छ विप्रेभ्यश्छत्रोपानहमुत्तमम् ।
धर्मस्ते सुमहान्भावी न मेऽत्रास्ति विचारणा ॥१७
छत्रं हि भरतश्रेष्ठ यः प्रदद्याद्द्विजातये ।
शुभ्रं शतशलाकं वै स प्रेत्य सुखमेधते ॥ १८
स शक्रलोके वसति पूज्यमानो द्विजातिभिः ।
अप्सरोभिश्च सततं देवैश्च भरतर्षभ ॥ १९
दह्यमानाय विप्राय यः प्रयच्छत्युपानहौ ।
स्नातकाय महाबाहो संशिताय द्विजातये ॥ २०
सोऽपि लोकानवाप्नोति दैवतैरभिपूजितान् ।
गोलोके स मुदा युक्तो वसति प्रेत्य भारत ॥ २१
एतत्ते भरतश्रेष्ठ मया कार्त्स्न्येन कीर्तितम् ।
छत्रोपानहदानस्य फलं भरतसत्तम ॥ २२

इति श्रीमहाभारते अनुशासनपर्वणि
अष्टनवतितमोऽध्यायः ॥ ९८ ॥

९९

युधिष्ठिर उवाच ।

आरामाणां तडागानां यत्फलं कुरुनन्दन ।
तदहं श्रोतुमिच्छामि त्वत्तोऽद्य भरतर्षभ ॥ १

भीष्म उवाच ।

सुप्रदर्शा वनवती चित्रधातुविभूषिता ।
उपेता सर्वबीजैश्च श्रेष्ठा भूमिरिहोच्यते ॥ २
तस्याः क्षेत्रविशेषं च तडागानां निवेशनम् ।
औदकानि च सर्वाणि प्रवक्ष्याम्यनुपूर्वशः ॥ ३
तडागानां च वक्ष्यामि कृतानां चापि ये गुणाः ।
त्रिषु लोकेषु सर्वत्र पूजितो यस्तडागवान् ॥ ४
अथ वा मित्रसदनं मैत्रं मित्रविवर्धनम् ।
कीर्तिसंजननं श्रेष्ठं तडागानां निवेशनम् ॥ ५
धर्मस्यार्थस्य कामस्य फलमाहुर्मनीषिणः ।
तडागं सुकृतं देशे क्षेत्रमेव महाश्रयम् ॥ ६
चतुर्विधानां भूतानां तडागमुपलक्षयेत् ।
तडागानि च सर्वाणि दिशन्ति श्रियमुत्तमाम् ॥ ७
देवा मनुष्या गन्धर्वाः पितरोरगराक्षसाः ।
स्थावराणि च भूतानि संश्रयन्ति जलाशयम् ॥ ८
तस्मात्तांस्ते प्रवक्ष्यामि तडागे ये गुणाः स्मृताः ।
या च तत्र फलावाप्तिर्ऋषिभिः समुदाहृता ॥ ९
वर्षमात्रे तडागे तु सलिलं यस्य तिष्ठति ।
अग्निहोत्रफलं तस्य फलमाहुर्मनीषिणः ॥ १०
शरत्काले तु सलिलं तडागे यस्य तिष्ठति ।
गोसहस्रस्य स प्रेत्य लभते फलमुत्तमम् ॥ ११
हेमन्तकाले सलिलं तडागे यस्य तिष्ठति ।
स वै बहुसुवर्णस्य यज्ञस्य लभते फलम् ॥ १२

यस्य वै शैशिरे काले तडागे सलिलं भवेत् ।
अग्निष्टोमस्य यज्ञस्य फलमाहुर्मनीषिणः ॥ १३
तडागं सुकृतं यस्य वसन्ते तु महाश्रयम् ।
अतिरात्रस्य यज्ञस्य फलं स समुपाश्नुते ॥ १४
निदाघकाले पानीयं तडागे यस्य तिष्ठति ।
वाजपेयसमं तस्य फलं वै मुनयो विदुः ॥ १५
स कुलं तारयेत्सर्वं यस्य खाते जलाशये ।
गावः पिबन्ति पानीयं साधवश्च नराः सदा ॥ १६
तडागे यस्य गावस्तु पिबन्ति तृषिता जलम् ।
मृगपक्षिमनुष्याश्च सोऽश्वमेधफलं लभेत् ॥ १७
यत्पिबन्ति जलं तत्र स्नायन्ते विश्रमन्ति च ।
तडागदस्य तत्सर्वं प्रेत्यानन्त्याय कल्पते ॥ १८
दुर्लभं सलिलं तात विशेषेण परत्र वै ।
पानीयस्य प्रदानेन प्रीतिर्भवति शाश्वती ॥ १९
तिलान्ददत पानीयं दीपान्ददत जाग्रत ।
ज्ञातिभिः सह मोदध्वमेतत्प्रेतेषु दुर्लभम् ॥ २०
सर्वदानैर्गुरुतरं सर्वदानैर्विशिष्यते ।
पानीयं नरशार्दूल तस्माद्दातव्यमेव हि ॥ २१
एवमेतत्तडागेषु कीर्तितं फलमुत्तमम् ।
अत ऊर्ध्वं प्रवक्ष्यामि वृक्षाणामपि रोपणे ॥ २२
स्थावराणां च भूतानां जातयः षट् प्रकीर्तिताः ।
वृक्षगुल्मलतावल्ल्यस्त्वक्सारास्तृणजातयः ॥ २३
एता जात्यस्तु वृक्षाणां तेषां रोपे गुणास्त्विमे ।
कीर्तिश्च मानुषे लोके प्रेत्य चैव फलं शुभम् ॥ २४
लभते नाम लोके च पितृभिश्च च महीयते ।
देवलोकगतस्यापि नाम तस्य न नश्यति ॥ २५
अतीतानागते चोभे पितृवंशं च भारत ।
तारयेद्वृक्षरोपी च तस्माद्वृक्षान्प्ररोपयेत् ॥ २६
तस्य पुत्रा भवन्त्येते पादपा नात्र संशयः ।
परलोकगतः स्वर्गं लोकांश्चाप्नोति सोऽव्ययान् ॥ २७
पुष्पैः सुरगणान्वृक्षाः फलैश्चापि तथा पितॄन् ।
छायया चातिथींस्तात पूजयन्ति महीरुहाः ॥ २८
किंनरोरगरक्षांसि देवगन्धर्वमानवाः ।
तथा ऋषिगणाश्चैव संश्रयन्ति महीरुहाः ॥ २९
पुष्पिताः फलवन्तश्च तर्पयन्तीह मानवान् ।
वृक्षदं पुत्रवद्वृक्षास्तारयन्ति परत्र च ॥ ३०
तस्मात्तडागे वृक्षा वै रोप्याः श्रेयोर्थिना सदा ।
पुत्रवत्परिपाल्याश्च पुत्रास्ते धर्मतः स्मृताः ॥ ३१
तडागकृद्वृक्षरोपी इष्टयज्ञश्च यो द्विजः ।
एते स्वर्गे महीयन्ते ये चान्ये सत्यवादिनः ॥ ३२
तस्मात्तडागं कुर्वीत आरामांश्चैव रोपयेत् ।
यजेच्च विविधैर्यज्ञैः सत्यं च सततं वदेत् ॥ ३३

इति श्रीमहाभारते अनुशासनपर्वणि
एकोनशततमोऽध्यायः ॥ ९९ ॥

१००

युधिष्ठिर उवाच ।

गार्हस्थ्यं धर्ममखिलं प्रब्रूहि भरतर्षभ ।
ऋद्धिमाप्नोति किं कृत्वा मनुष्य इह पार्थिव ॥ १

भीष्म उवाच ।

अत्र ते वर्तयिष्यामि पुरावृत्तं जनाधिप ।
वासुदेवस्य संवादं पृथिव्याश्चैव भारत ॥ २
संस्तूय पृथिवीं देवीं वासुदेवः प्रतापवान् ।
पप्रच्छ भरतश्रेष्ठ यदेतत्पृच्छसेऽद्य माम् ॥ ३

वासुदेव उवाच ।

गार्हस्थ्यं धर्ममाश्रित्य मया वा मद्विधेन वा ।
किमवश्यं धरे कार्यं किं वा कृत्वा सुखी भवेत् ॥

पृथिव्युवाच ।

ऋषयः पितरो देवा मनुष्याश्चैव माधव ।
इज्याश्चैवार्चनीयाश्च यथा चैवं निबोध मे ॥ ५

सदा यज्ञेन देवांश्च आतिथ्येन च मानवान् ।
छन्दतश्च यथानित्यमर्हान्युञ्जीत नित्यशः ।
तेन ह्यृषिगणाः प्रीता भवन्ति मधुसूदन ॥ ६
नित्यमग्निं परिचरेदभुक्त्वा बलिकर्म च ।
कुर्यात्तथैव देवा वै प्रीयन्ते मधुसूदन ॥ ७
कुर्यादहरहः श्राद्धमन्नाद्येनोदकेन वा ।
पयोमूलफलैर्वापि पितॄणां प्रीतिमाहरन् ॥ ८
सिद्धान्नाद्वैश्वदेवं वै कुर्यादग्नौ यथाविधि ।
अग्नीषोमं वैश्वदेवं धान्वन्तर्यमनन्तरम् ॥ ९
प्रजानां पतये चैव पृथग्घोमो विधीयते ।
तथैव चानुपूर्व्येण बलिकर्म प्रयोजयेत् ॥ १०
दक्षिणायां यमायेह प्रतीच्यां वरुणाय च ।
सोमाय चाप्युदीच्यां वै वास्तुमध्ये द्विजातये ॥ ११
धन्वन्तरेः प्रागुदीच्यां प्राच्यां शक्राय माधव ।
मनोर्वै इति च प्राहुर्बलिं द्वारे गृहस्य वै ।
मरुद्भ्यो देवताभ्यश्च बलिमन्तर्गृहे हरेत् ॥ १२
तथैव विश्वेदेवेभ्यो बलिमाकाशतो हरेत् ।
निशाचरेभ्यो भूतेभ्यो बलिं नक्तं तथा हरेत् ॥
एवं कृत्वा बलिं सम्यग्दद्याद्भिक्षां द्विजातये ।
अलाभे ब्राह्मणस्याग्नावग्रमुत्क्षिप्य निक्षिपेत् ॥ १४
यदा श्राद्धं पितृभ्यश्च दातुमिच्छेत मानवः ।
तदा पश्चात्प्रकुर्वीत निवृत्ते श्राद्धकर्मणि ॥ १५
पितॄन्संतर्पयित्वा तु बलिं कुर्याद्विधानतः ।
वैश्वदेवं ततः कुर्यात्पश्चाद्ब्राह्मणवाचनम् ॥ १६
ततोऽन्नेनावशेषेण भोजयेदतिथीनपि ।
अर्चापूर्वं महाराज ततः प्रीणाति मानुषान् ॥ १७
अनित्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते ॥ १८
आचार्यस्य पितुश्चैव सख्युराप्तस्य चातिथेः ।
इदमस्ति गृहे मह्यमिति नित्यं निवेदयेत् ॥ १९
ते यद्वदेयुस्तत्कुर्यादिति धर्मो विधीयते ।
गृहस्थः पुरुष कृष्ण शिष्टाशी च सदा भवेत् ॥
राजर्त्विजं स्नातकं च गुरुं श्वशुरमेव च ।
अर्चयेन्मधुपर्केण परिसंवत्सरोषितान् ॥ २१
श्वभ्यश्च श्वपचेभ्यश्च वयोभ्यश्चावपेद्भुवि ।
वैश्वदेवं हि नामैतत्सायंप्रातर्विधीयते ॥ २२
एतांस्तु धर्मान्गार्हस्थान्यः कुर्यादनसूयकः ।
स इहर्द्धिं परां प्राप्य प्रेत्य नाके महीयते ॥ २३

भीष्म उवाच ।

इति भूमेर्वचः श्रुत्वा वासुदेवः प्रतापवान् ।
तथा चकार सततं त्वमप्येवं समाचर ॥ २४
एवं गृहस्थधर्मं त्वं चेतयानो नराधिप ।
इहलोके यशः प्राप्य प्रेत्य स्वर्गमवाप्स्यसि ॥ २५

इति श्रीमहाभारते अनुशासनपर्वणि
शततमोऽध्यायः ॥ १०० ॥

१०१

युधिष्ठिर उवाच ।

आलोकदानं नामैतत्कीदृशं भरतर्षभ ।
कथमेतत्समुत्पन्नं फलं चात्र ब्रवीहि मे ॥ १

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
मनोः प्रजापतेर्वादं सुवर्णस्य च भारत ॥ २
तपस्वी कश्चिदभवत्सुवर्णो नाम नामतः ।
वर्णतो हेमवर्णः स सुवर्ण इति पप्रथे ॥ ३
कुलशीलगुणोपेतः स्वाध्याये च परं गतः ।
बहून्स्ववंशप्रभवान्समतीतः स्वकैर्गुणैः ॥ ४
स कदाचिन्मनुं विप्रो ददर्शोपससर्प च ।
कुशलप्रश्नमन्योन्यं तौ च तत्र प्रचक्रतुः ॥ ५
ततस्तौ सिद्धसंकल्पौ मेरौ काञ्चनपर्वते ।
रमणीये शिलापृष्ठे सहितौ संन्यषीदताम् ॥ ६
तत्र तौ कथयामास्तां कथा नानाविधाश्रयाः ।

ब्रह्मर्षिदेवदैत्यानां पुराणानां महात्मनाम् ॥ ७
सुवर्णस्त्वब्रवीद्वाक्यं मनुं स्वायंभुवं प्रभुम् ।
हितार्थं सर्वभूतानां प्रश्नं मे वक्तुमर्हसि ॥ ८
सुमनोभिर्यदिज्यन्ते दैवतानि प्रजेश्वर ।
किमेतत्कथमुत्पन्नं फलयोगं च शंस मे ॥ ९

मनुरुवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
शुक्रस्य च बलेश्चैव संवादं वै समागमे ॥ १०
बलेर्वैरोचनस्येह त्रैलोक्यमनुशासतः ।
समीपमाजगामाशु शुक्रो भृगुकुलोद्वहः ॥ ११
तमर्घ्यादिभिरभ्यर्च्य भार्गवं सोऽसुराधिपः ।
निषसादासने पश्चाद्विधिवद्भूरिदक्षिणः ॥ १२
कथेयमभवत्तत्र या त्वया परिकीर्तिता ।
सुमनोधूपदीपानां संप्रदाने फलं प्रति ॥ १३
ततः पप्रच्छ दैत्येन्द्रः कवीन्द्रं प्रश्नमुत्तमम् ।
सुमनोधूपदीपानां किं फलं ब्रह्मवित्तम ।
प्रदानस्य द्विजश्रेष्ठ तद्भवान्वक्तुमर्हति ॥ १४

शुक्र उवाच ।

तपः पूर्वं समुत्पन्नं धर्मस्तस्मादनन्तरम् ।
एतस्मिन्नन्तरे चैव वीरुदोषध्य एव च ॥ १५
सोमस्यात्मा च बहुधा संभूतः पृथिवीतले ।
अमृतं च विषं चैव याश्चान्यास्तुल्यजातयः ॥ १६
अमृतं मनसः प्रीतिं सद्यः पुष्टिं ददाति च ।
मनो ग्लपयते तीव्रं विषं गन्धेन सर्वशः ॥ १७
अमृतं मङ्गलं विद्धि महद्विषममङ्गलम् ।
ओषध्यो ह्यमृतं सर्वं विषं तेजोऽग्निसंभवम् ॥ १८
मनो ह्लादयते यस्माच्छ्रियं चापि दधाति ह ।
तस्मात्सुमनसः प्रोक्ता नरैः सुकृतकर्मभिः ॥ १९
देवताभ्यः सुमनसो यो ददाति नरः शुचिः ।
तस्मात्सुमनसः प्रोक्ता यस्मात्तुष्यन्ति देवताः ॥२०
यं यमुद्दिश्य दीयेरन्देवं सुमनसः प्रभो ।
मङ्गलार्थं स तेनास्य प्रीतो भवति दैत्यप ॥ २१
ज्ञेयास्तूग्राश्च सौम्याश्च तेजस्विन्यश्च ताः पृथक् ।
ओषध्यो बहुवीर्याश्च बहुरूपास्तथैव च ॥ २२
यज्ञियानां च वृक्षाणामयज्ञियान्निबोध मे ।
आसुराणि च माल्यानि दैवतेभ्यो हितानि च ॥
राक्षसानां सुराणां च यक्षाणां च तथा प्रियाः ।
पितॄणां मानुषाणां च कान्तायास्त्वनुपूर्वशः ॥ २४
वन्या ग्राम्याश्चेह तथा कृष्टोप्ताः पर्वताश्रयाः ।
अकण्टकाः कण्टकिन्यो गन्धरूपरसान्विताः ॥ २५
द्विविधो हि स्मृतो गन्ध इष्टोऽनिष्टश्च पुष्पजः ।
इष्टगन्धानि देवानां पुष्पाणीति विभावयेत् ॥ २६
अकण्टकानां वृक्षाणां श्वेतप्रायाश्च वर्णतः ।
तेषां पुष्पाणि देवानामिष्टानि सततं प्रभो ॥ २७
जलजानि च माल्यानि पद्मादीनि च यानि च ।
गन्धर्वनागयक्षेभ्यस्तानि दद्याद्विचक्षणः ॥ २८
ओषध्यो रक्तपुष्पाश्च कटुकाः कण्टकान्विताः ।
शत्रूणामभिचारार्थमथर्वसु निदर्शिताः ॥ २९
तीक्ष्णवीर्यास्तु भूतानां दुरालम्भाः सकण्टकाः ।
रक्तभूयिष्ठवर्णाश्च कृष्णाश्चैवोपहारयेत् ॥ ३०
मनोहृदयनन्दिन्यो विमर्दे मधुराश्च याः ।
चारुरूपाः सुमनसो मानुषाणां स्मृता विभो ॥३१
न तु श्मशानसंभूता न देवायतनोद्भवाः ।
संनयेत्पुष्टियुक्तेषु विवाहेषु रहःसु च ॥ ३२
गिरिसानुरुहाः सौम्या देवानामुपपादयेत् ।
प्रोक्षिताभ्युक्षिताः सौम्या यथायोगं यथास्मृति ॥
गन्धेन देवास्तुष्यन्ति दर्शनाद्यक्षराक्षसाः ।
नागाः समुपभोगेन त्रिभिरेतैस्तु मानुषाः ॥ ३४
सद्यः प्रीणाति देवान्वै ते प्रीता भावयन्त्युत ।
संकल्पसिद्धा मर्त्यानामीप्सितैश्च मनोरथैः ॥ ३५

देवाः प्रीणन्ति सततं मानिता मानयन्ति च ।
अवज्ञातावधूताश्च निर्दहन्त्यधमान्नरान् ॥ ३६
अतऊर्ध्वं प्रवक्ष्यामि धूपदानविधौ फलम् ।
धूपांश्च विविधान्साधूनसाधूंश्च निबोध मे ॥ ३७
निर्यासः सरलश्चैव कृत्रिमश्चैव ते त्रयः ।
इष्टानिष्टो भवेद्गन्धस्तन्मे विस्तरतः शृणु ॥ ३८
निर्यासाः सल्लकीवर्ज्या देवानां दयितास्तु ते ।
गुग्गुलुः प्रवरस्तेषां सर्वेषामिति निश्चयः ॥ ३९
अगुरुः सारिणां श्रेष्ठो यक्षराक्षसभोगिनाम् ।
दैत्यानां सल्लकीजश्च काङ्क्षितो यश्च तद्विधः ॥ ४०
अथ सर्जरसादीनां गन्धैः पार्थिवदारवैः ।
फाणितासवसंयुक्तैर्मनुष्याणां विधीयते ॥ ४१
देवदानवभूतानां सद्यस्तुष्टिकरः स्मृतः ।
येऽन्ये वैहारिकास्ते तु मानुषाणामिति स्मृताः ॥
य एवोक्ताः सुमनसां प्रदाने गुणहेतवः ।
धूपेष्वपि परिज्ञेयास्त एव प्रीतिवर्धनाः ॥ ४३
दीपदाने प्रवक्ष्यामि फलयोगमनुत्तमम् ।
यथा येन यदा चैव प्रदेया यादृशाश्च ते ॥ ४४
ज्योतिस्तेजः प्रकाशश्चाप्यूर्ध्वगं चापि वर्ण्यते ।
प्रदानं तेजसां तस्मात्तेजो वर्धयते नृणाम् ॥ ४५
अन्धं तमस्तमिस्रं च दक्षिणायनमेव च ।
उत्तरायणमेतस्माज्ज्योतिर्दानं प्रशस्यते ॥ ४६
यस्मादूर्ध्वगमेतत्तु तमसश्चैव भेषजम् ।
तस्मादूर्ध्वगतेर्दाता भवेदिति विनिश्चयः ॥ ४७
देवास्तेजस्विनो यस्मात्प्रभावन्तः प्रकाशकाः ।
तामसा राक्षसाश्चेति तस्माद्दीपः प्रदीयते ॥ ४८
आलोकदानाच्चक्षुष्मान्प्रभायुक्तो भवेन्नरः ।
तान्दत्त्वा नोपहिंसेत न हरेन्नोपनाशयेत् ॥ ४९
दीपहर्ता भवेदन्धस्तमोगतिरसुप्रभः ।
दीपप्रदः स्वर्गलोके दीपमाली विराजते ॥ ५०
हविषा प्रथमः कल्पो द्वितीयस्त्वौषधीरसैः ।
वसामेदोस्थिनिर्यासैर्न कार्यः पुष्टिमिच्छता ॥ ५१
गिरिप्रपाते गहने चैत्यस्थाने चतुष्पथे ।
दीपदाता भवेन्नित्यं य इच्छेद्भूतिमात्मनः ॥ ५२
कुलोद्द्योतो विशुद्धात्मा प्रकाशत्वं च गच्छति ।
ज्योतिषां चैव सालोक्यं दीपदाता नरः सदा ॥५३
बलिकर्मसु वक्ष्यामि गुणान्कर्मफलोदयान् ।
देवयक्षोरगनृणां भूतानामथ रक्षसाम् ॥ ५४
येषां नाग्रभुजो विप्रा देवतातिथिबालकाः ।
राक्षसानेव तान्विद्धि निर्वषट्कारमङ्गलान् ॥ ५५
तस्मादग्रं प्रयच्छेत देवेभ्यः प्रतिपूजितम् ।
शिरसा प्रणतश्चापि हरेद्बलिमतन्द्रितः ॥ ५६
गृह्या हि देवता नित्यमाशंसन्ति गृहात्सदा ।
बाह्याश्चागन्तवो येऽन्ये यक्षराक्षसपन्नगाः ॥ ५७
इतो दत्तेन जीवन्ति देवताः पितरस्तथा ।
ते प्रीताः प्रीणयन्त्येतानायुषा यशसा धनैः ॥ ५८
बलयः सह पुष्पैस्तु देवानामुपहारयेत् ।
दधिद्रप्सयुताः पुण्याः सुगन्धाः प्रियदर्शनाः ॥५९
कार्या रुधिरमांसाढ्या बलयो यक्षरक्षसाम् ।
सुरासवपुरस्कारा लाजोल्लेपनभूषिताः ॥ ६०
नागानां दयिता नित्यं पद्मोत्पलविमिश्रिताः ।
तिलान्गुडसुसंपन्नान्भूतानामुपहारयेत् ॥ ६१
अग्रदाताग्रभोगी स्याद्बलवर्णसमन्वितः ।
तस्मादग्रं प्रयच्छेत देवेभ्यः प्रतिपूजितम् ॥ ६२
ज्वलत्यहरहो वेश्म याश्चास्य गृहदेवताः ।
ताः पूज्या भूतिकामेन प्रसृताग्रप्रदायिना ॥ ६३
इत्येतदसुरेन्द्राय काव्यः प्रोवाच भार्गवः ।
सुवर्णाय मनुः प्राह सुवर्णो नारदाय च ॥ ६४
नारदोऽपि मयि प्राह गुणानेतान्महाद्युते ।

त्वमप्येतद्विदित्वेह सर्वमाचर पुत्रक ॥ ६५

इति श्रीमहाभारते अनुशासनपर्वणि
एकोत्तरशततमोऽध्यायः ॥ १०१ ॥

१०२

युधिष्ठिर उवाच ।

श्रुतं मे भरतश्रेष्ठ पुष्पधूपप्रदायिनाम् ।
फलं बलिविधाने च तद्भूयो वक्तुमर्हसि ॥ १
धूपप्रदानस्य फलं प्रदीपस्य तथैव च ।
बलयश्च किमर्थं वै क्षिप्यन्ते गृहमेधिभिः ॥ २

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
नहुषं प्रति संवादमगस्त्यस्य भृगोस्तथा ॥ ३
नहुषो हि महाराज राजर्षिः सुमहातपाः ।
देवराज्यमनुप्राप्तः सुकृतेनेह कर्मणा ॥ ४
तत्रापि प्रयतो राजन्नहुषस्त्रिदिवे वसन् ।
मानुषीश्चैव दिव्याश्च कुर्वाणो विविधाः क्रियाः ॥५
मानुष्यस्तत्र सर्वाः स्म क्रियास्तस्य महात्मनः ।
प्रवृत्तास्त्रिदिवे राजन्दिव्याश्चैव सनातनाः ॥ ६
अग्निकार्याणि समिधः कुशाः सुमनसस्तथा ।
बलयश्चान्नलाजाभिर्धूपनं दीपकर्म च ॥ ७
सर्वं तस्य गृहे राज्ञः प्रावर्तत महात्मनः ।
जपयज्ञान्मनोयज्ञांस्त्रिदिवेऽपि चकार सः ॥ ८
दैवतान्यर्चयंश्चापि विधिवत्स सुरेश्वरः ।
सर्वाण्येव यथान्यायं यथापूर्वमरिंदम ॥ ९
अथेन्द्रस्य भविष्यत्वादहंकारस्तमाविशत् ।
सर्वाश्चैव क्रियास्तस्य पर्यहीयन्त भूपते ॥ १०
स ऋषीन्वाहयामास वरदानमदान्वितः ।
परिहीनक्रियश्चापि दुर्बलत्वमुपेयिवान् ॥ ११
तस्य वाहयतः कालो मुनिमुख्यांस्तपोधनान् ।
अहंकाराभिभूतस्य सुमहानत्यवर्तत ॥ १२
अथ पर्यायश ऋषीन्वाहनायोपचक्रमे ।
पर्यायश्चाप्यगस्त्यस्य समपद्यत भारत ॥ १३
अथागम्य महातेजा भृगुर्ब्रह्मविदां वरः ।
अगस्त्यमाश्रमस्थं वै समुपेत्येदमब्रवीत् ॥ १४
एवं वयमसत्कारं देवेन्द्रस्यास्य दुर्मतेः ।
नहुषस्य किमर्थं वै मर्षयाम महामुने ॥ १५

अगस्त्य उवाच ।

कथमेष मया शक्यः शप्तुं यस्य महामुने ।
वरदेन वरो दत्तो भवतो विदितश्च सः ॥ १६
यो मे दृष्टिपथं गच्छेत्स मे वश्यो भवेदिति ।
इत्यनेन वरो देवाद्याचितो गच्छता दिवम् ॥ १७
एवं न दग्धः स मया भवता च न संशयः ।
अन्येनाप्यृषिमुख्येन न शप्तो न च पातितः ॥१८
अमृतं चैव पानाय दत्तमस्मै पुरा विभो ।
महात्मने तदर्थं च नास्माभिर्विनिपात्यते ॥ १९
प्रायच्छत वरं देवः प्रजानां दुःखकारकम् ।
द्विजेष्वधर्मयुक्तानि स करोति नराधमः ॥ २०
अत्र यत्प्राप्तकालं नस्तद्ब्रूहि वदतां वर ।
भवांश्चापि यथा ब्रूयात्कुर्वीमहि तथा वयम् ॥ २१

भृगुरुवाच ।

पितामहनियोगेन भवन्तमहमागतः ।
प्रतिकर्तुं बलवति नहुषे दर्पमाश्रिते ॥ २२
अद्य हि त्वा सुदुर्बुद्धी रथे योक्ष्यति देवराट् ।
अद्यैनमहमुद्वृत्तं करिष्येऽनिन्द्रमोजसा ॥ २३
अद्येन्द्रं स्थापयिष्यामि पश्यतस्ते शतक्रतुम् ।
संचाल्य पापकर्माणमिन्द्रस्थानात्सुदुर्मतिम् ॥ २४
अद्य चासौ कुदेवेन्द्रस्त्वां पदा धर्षयिष्यति ।
दैवोपहतचित्तत्वादात्मनाशाय मन्दधीः ॥ २५
व्युत्क्रान्तधर्मं तमहं धर्षणामर्षितो भृशम् ।
अहिर्भवस्वेति रुषा शप्स्ये पापं द्विजद्रुहम् ॥ २६

तत एनं सुदुर्बुद्धिं धिक्शब्दाभिहतत्विषम् ।
धरण्यां पातयिष्यामि प्रेक्षतस्ते महामुने ॥ २७
नहुषं पापकर्माणमैश्वर्यबलमोहितम् ।
यथा च रोचते तुभ्यं तथा कर्तास्म्यहं मुने ॥ २८
एवमुक्तस्तु भृगुणा मैत्रावरुणिरव्ययः ।
अगस्त्यः परमप्रीतो बभूव विगतज्वरः ॥ २९

इति श्रीमहाभारते अनुशासनपर्वणि
द्व्यधिकशततमोऽध्यायः ॥ १०२ ॥

१०३

युधिष्ठिर उवाच ।

कथं स वै विपन्नश्च कथं वै पातितो भुवि ।
कथं चानिन्द्रतां प्राप्तस्तद्भवान्वक्तुमर्हति ॥ १

भीष्म उवाच ।

एवं तयोः संवदतोः क्रियास्तस्य महात्मनः ।
सर्वा एवाभ्यवर्तन्त या दिव्या याश्च मानुषाः ॥२
तथैव दीपदानानि सर्वोपकरणानि च ।
बलिकर्म च यच्चान्यदुत्सेकाश्च पृथग्विधाः ।
सर्वास्तस्य समुत्पन्ना देवराज्ञो महात्मनः ॥ ३
देवलोके नृलोके च सदाचारा बुधैः स्मृताः ।
ते चेद्भवन्ति राजेन्द्र ऋध्यन्ते गृहमेधिनः ।
धूपप्रदानैर्दीपैश्च नमस्कारैस्तथैव च ॥ ४
यथा सिद्धस्य चान्नस्य द्विजायाग्रं प्रदीयते ।
बलयश्च गृहोद्देशे अतः प्रीयन्ति देवताः ॥ ५
यथा च गृहिणस्तोषो भवेद्वै बलिकर्मणा ।
तथा शतगुणा प्रीतिर्देवतानां स्म जायते ॥ ६
एवं धूपप्रदानं च दीपदानं च साधवः ।
प्रशंसन्ति नमस्कारैर्युक्तमात्मगुणावहम् ॥ ७
स्नानेनाद्भिश्च यत्कर्म क्रियते वै विपश्चिता ।
नमस्कारप्रयुक्तेन तेन प्रीयन्ति देवताः ।
गृह्याश्च देवताः सर्वाः प्रीयन्ते विधिनार्चिताः॥ ८

इत्येतां बुद्धिमास्थाय नहुषः स नरेश्वरः ।
सुरेन्द्रत्वं महत्प्राप्य कृतवानेतदद्भुतम् ॥ ९
कस्यचित्त्वथ कालस्य भाग्यक्षय उपस्थिते ।
सर्वमेतदवज्ञाय न चकारैतदीदृशम् ॥ १०
ततः स परिहीणोऽभूत्सुरेन्द्रो बलिकर्मतः ।
धूपदीपोदकविधिं न यथावच्चकार ह ।
ततोऽस्य यज्ञविषयो रक्षोभिः पर्यबाध्यत ॥ ११
अथागस्त्यमृषिश्रेष्ठं वाहनायाजुहाव ह ।
द्रुतं सरस्वतीकूलात्स्मयन्निव महाबलः ॥ १२
ततो भृगुर्महातेजा मैत्रावरुणिमब्रवीत् ।
निमीलयस्व नयने जटा यावद्विशामि ते ॥ १३
स्थाणुभूतस्य तस्याथ जटाः प्राविशदच्युतः ।
भृगुः स सुमहातेजाः पातनाय नृपस्य ह ॥ १४
ततः स देवराट् प्राप्तस्तमृषिं वाहनाय वै ।
ततोऽगस्त्यः सुरपतिं वाक्यमाह विशां पते ॥ १५
योजयस्वेन्द्र मां क्षिप्रं कं च देशं वहामि ते ।
यत्र वक्ष्यसि तत्र त्वां नयिष्यामि सुराधिप ॥ १६
इत्युक्तो नहुषस्तेन योजयामास तं मुनिम् ।
भृगुस्तस्य जटासंस्थो बभूव हृषितो भृशम् ॥ १७
न चापि दर्शनं तस्य चकार स भृगुस्तदा ।
वरदानप्रभावज्ञो नहुषस्य महात्मनः ॥ १८
न चुकोप स चागस्त्यो युक्तोऽपि नहुषेण वै ।
तं तु राजा प्रतोदेन चोदयामास भारत ॥ १९
न चुकोप स धर्मात्मा ततः पादेन देवराट् ।
अगस्त्यस्य तदा क्रुद्धो वामेनाभ्यहनच्छिरः ॥ २०
तस्मिञ्शिरस्यभिहते स जटान्तर्गतो भृगुः ।
शशाप बलवत्क्रुद्धो नहुषं पापचेतसम् ॥ २१

भृगुरुवाच ।

यस्मात्पदाहनः क्रोधाच्छिरसीमं महामुनिम् ।
तस्मादाशु महीं गच्छ सर्पो भूत्वा सुदुर्मते ॥ २२

इत्युक्तः स तदा तेन सर्पो भूत्वा पपात ह ।
अदृष्टेनाथ भृगुणा भूतले भरतर्षभ ॥ २३
भृगुं हि यदि सोऽद्राक्षीन्नहुषः पृथिवीपते ।
न स शक्तोऽभविष्यद्वै पातने तस्य तेजसा ॥ २४
स तु तैस्तैः प्रदानैश्च तपोभिर्नियमैस्तथा ।
पतितोऽपि महाराज भूतले स्मृतिमानभूत् ।
प्रसादयामास भृगुं शापान्तो मे भवेदिति ॥ २५
ततोऽगस्त्यः कृपाविष्टः प्रासादयत तं भृगुम् ।
शापान्तार्थं महाराज स च प्रादात्कृपान्वितः ॥२६

भृगुरुवाच ।

राजा युधिष्ठिरो नाम भविष्यति कुरूद्वहः ।
स त्वां मोक्षयिता शापादित्युक्त्वान्तरधीयत ॥२७
अगस्त्योऽपि महातेजाः कृत्वा कार्यं शतक्रतोः ।
स्वमाश्रमपदं प्रायात्पूज्यमानो द्विजातिभिः ॥ २८
नहुषोऽपि त्वया राजंस्तस्माच्छापात्समुद्धृतः ।
जगाम ब्रह्मसदनं पश्यतस्ते जनाधिप ॥ २९
तदा तु पातयित्वा तं नहुषं भूतले भृगुः ।
जगाम ब्रह्मसदनं ब्रह्मणे च न्यवेदयत् ॥ ३०
ततः शक्रं समानाय्य देवानाह पितामहः ।
वरदानान्मम सुरा नहुषो राज्यमाप्तवान् ।
स चागस्त्येन क्रुद्धेन भ्रंशितो भूतलं गतः ॥ ३१
न च शक्यं विना राज्ञा सुरा वर्तयितुं क्वचित् ।
तस्मादयं पुनः शक्रो देवराज्येऽभिषिच्यताम् ॥३२
एवं संभाषमाणं तु देवाः पार्थ पितामहम् ।
एवमस्त्विति संहृष्टाः प्रत्यूचुस्ते पितामहम् ॥ ३३
सोऽभिषिक्तो भगवता देवराज्येन वासवः ।
ब्रह्मणा राजशार्दूल यथापूर्वं व्यरोचत ॥ ३४
एवमेतत्पुरावृत्तं नहुषस्य व्यतिक्रमात् ।
स च तैरेव संसिद्धो नहुषः कर्मभिः पुनः ॥ ३५
तस्माद्दीपाः प्रदातव्याः सायं वै गृहमेधिभिः ।
दिव्यं चक्षुरवाप्नोति प्रेत्य दीपप्रदायकः ।
पूर्णचन्द्रप्रतीकाशा दीपदाश्च भवन्त्युत ॥ ३६
यावदक्षिनिमेषाणि ज्वलते तावतीः समाः ।
रूपवान्धनवांश्चापि नरो भवति दीपदः ॥ ३७

इति श्रीमहाभारते अनुशासनपर्वणि
त्र्यधिकशततमोऽध्यायः ॥ १०३ ॥

१०४

युधिष्ठिर उवाच ।

ब्राह्मणस्वानि ये मन्दा हरन्ति भरतर्षभ ।
नृशंसकारिणो मूढाः क्व ते गच्छन्ति मानवाः ॥ १

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
चण्डालस्य च संवादं क्षत्रबन्धोश्च भारत ॥ २

राजन्य उवाच ।

वृद्धरूपोऽसि चण्डाल बालवच्च विचेष्टसे ।
श्वखराणां रजःसेवी कस्मादुद्विजसे गवाम् ॥ ३
साधुभिर्गर्हितं कर्म चण्डालस्य विधीयते ।
कस्माद्गोरजसा ध्वस्तमपां कुण्डे निषिञ्चसि ॥ ४

चण्डाल उवाच ।

ब्राह्मणस्य गवां राजन्ह्रियतीनां रजः पुरा ।
सोममुद्ध्वंसयामास तं सोमं येऽपिबन्द्विजाः ॥ ५
दीक्षितश्च स राजापि क्षिप्रं नरकमाविशत् ।
सह तैर्याजकैः सर्वैर्ब्रह्मस्वमुपजीव्य तत् ॥ ६
येऽपि तत्रापिबन्क्षीरं घृतं दधि च मानवाः ।
ब्राह्मणाः सहराजन्याः सर्वे नरकमाविशन् ॥ ७
जघ्नुस्ताः पयसा पुत्रांस्तथा पौत्रान्विधुन्वतीः ।
पशूनवेक्षमाणाश्च साधुवृत्तेन दंपती ॥ ८
अहं तत्रावसं राजन्ब्रह्मचारी जितेन्द्रियः ।
तासां मे रजसा ध्वस्तं भैक्षमासीन्नराधिप ॥ ९
चण्डालोऽहं ततो राजन्भुक्त्वा तदभवं मृतः ।

ब्रह्मस्वहारी च नृपः सोऽप्रतिष्ठां गतिं ययौ ॥ १०
तस्माद्धरेन्न विप्रस्वं कदाचिदपि किंचन ।
ब्रह्मस्वरजसा ध्वस्तं भुक्त्वा मां पश्य यादृशम् ॥ ११
तस्मात्सोमोऽप्यविक्रेयः पुरुषेण विपश्चिता ।
विक्रयं हीह सोमस्य गर्हयन्ति मनीषिणः ॥ १२
ये चैनं क्रीणते राजन्ये च विक्रीणते जनाः ।
ते तु वैवस्वतं प्राप्य रौरवं यान्ति सर्वशः ॥ १३
सोमं तु रजसा ध्वस्तं विक्रीयाद्बुद्धिपूर्वकम् ।
श्रोत्रियो वार्धुषी भूत्वा चिररात्राय नश्यति ।
नरकं त्रिंशतं प्राप्य श्वविष्ठामुपजीवति ॥ १४
श्वचर्यामतिमानं च सखिदारेषु विप्लवम् ।
तुलयाधारयद्धर्मो ह्यतिमानोऽतिरिच्यते ॥ १५
श्वानं वै पापिनं पश्य विवर्णं हरिणं कृशम् ।
अतिमानेन भूतानामिमां गतिमुपागतम् ॥ १६
अहं वै विपुले जातः कुले धनसमन्विते ।
अन्यस्मिञ्जन्मनि विभो ज्ञानविज्ञानपारगः ॥ १७
अभवं तत्र जानानो ह्येतान्दोषान्मदात्तदा ।
संरब्ध एव भूतानां पृष्ठमांसान्यभक्षयम् ॥ १८
सोऽहं तेन च वृत्तेन भोजनेन च तेन वै ।
इमामवस्थां संप्राप्तः पश्य कालस्य पर्ययम् ॥ १९
आदीप्तमिव चैलान्तं भ्रमरैरिव चार्दितम् ।
धावमानं सुसंरब्धं पश्य मां रजसान्वितम् ॥ २०
स्वाध्यायैस्तु महत्पापं तरन्ति गृहमेधिनः ।
दानैः पृथग्विधैश्चापि यथा प्राहुर्मनीषिणः ॥ २१
तथा पापकृतं विप्रमाश्रमस्थं महीपते ।
सर्वसङ्गविनिर्मुक्तं छन्दांस्युत्तारयन्त्युत ॥ २२
अहं तु पापयोन्यां वै प्रसूतः क्षत्रियर्षभ ।
निश्चयं नाधिगच्छामि कथं मुच्येयमित्युत ॥ २३
जातिस्मरत्वं तु मम केनचित्पूर्वकर्मणा ।
शुभेन येन मोक्षं वै प्राप्तुमिच्छाम्यहं नृप ॥ २४
त्वमिमं मे प्रपन्नाय संशयं ब्रूहि पृच्छते ।
चण्डालत्वात्कथमहं मुच्येयमिति सत्तम ॥ २५

राजन्य उवाच ।

चण्डाल प्रतिजानीहि येन मोक्षमवाप्स्यसि ।
ब्राह्मणार्थे त्यजन्प्राणान्गतिमिष्टामवाप्स्यसि ॥ २६
दत्त्वा शरीरं क्रव्याद्भ्यो रणाग्नौ द्विजहेतुकम् ।
हुत्वा प्राणान्प्रमोक्षस्ते नान्यथा मोक्षमर्हसि ॥ २७

भीष्म उवाच ।

इत्युक्तः स तदा राजन्ब्रह्मस्वार्थे परंतप ।
हुत्वा रणमुखे प्राणान्गतिमिष्टामवाप ह ॥ २८
तस्माद्रक्ष्यं त्वया पुत्र ब्रह्मस्वं भरतर्षभ ।
यदीच्छसि महाबाहो शाश्वतीं गतिमुत्तमाम् ॥ २९

इति श्रीमहाभारते अनुशासनपर्वणि
चतुरधिकशततमोऽध्यायः ॥ १०४ ॥

१०५

युधिष्ठिर उवाच ।

एको लोकः सुकृतिनां सर्वे त्वाहो पितामह ।
उत तत्रापि नानात्वं तन्मे ब्रूहि पितामह ॥ १

भीष्म उवाच ।

कर्मभिः पार्थ नानात्वं लोकानां यान्ति मानवाः ।
पुण्यान्पुण्यकृतो यान्ति पापान्पापकृतो जनाः ॥ २
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
गौतमस्य मुनेस्तात संवादं वासवस्य च ॥ ३
ब्राह्मणो गौतमः कश्चिन्मृदुर्दान्तो जितेन्द्रियः ।
महावने हस्तिशिशुं परिद्यूनममातृकम् ॥ ४
तं दृष्ट्वा जीवयामास सानुक्रोशो धृतव्रतः ।
स तु दीर्घेण कालेन बभूवातिबलो महान् ॥ ५
तं प्रभिन्नं महानागं प्रस्रुतं सर्वतो मदम् ।
धृतराष्ट्रस्य रूपेण शक्रो जग्राह हस्तिनम् ॥ ६
ह्रियमाणं तु तं दृष्ट्वा गौतमः संशितव्रतः ।

अभ्यभाषत राजानं धृतराष्ट्रं महातपाः ॥ ७
मा मे हार्षीर्हस्तिनं पुत्रमेनं
दुःखात्पुष्टं धृतराष्ट्राकृतज्ञ ।
मित्रं सतां सप्तपदं वदन्ति
मित्रद्रोहो नैव राजन्स्पृशेत्त्वाम् ॥ ८
इध्मोदकप्रदातारं शून्यपालकमाश्रमे ।
विनीतमाचार्यकुले सुयुक्तं गुरुकर्मणि ॥ ९
शिष्टं दान्तं कृतज्ञं च प्रियं च सततं मम ।
न मे विक्रोशतो राजन्हर्तुमर्हसि कुञ्जरम् ॥ १०

धृतराष्ट्र उवाच ।

गवां सहस्रं भवते ददामि
दासीशतं निष्कशतानि पञ्च ।
अन्यच्च वित्तं विविधं महर्षे
किं ब्राह्मणस्येह गजेन कृत्यम् ॥ ११

गौतम उवाच ।

त्वामेव गावोऽभि भवन्तु राज-
न्दास्यः सनिष्का विविधं च रत्नम् ।
अन्यच्च वित्तं विविधं नरेन्द्र
किं ब्राह्मणस्येह धनेन कृत्यम् ॥ १२

धृतराष्ट्र उवाच ।

ब्राह्मणानां हस्तिभिर्नास्ति कृत्यं
राजन्यानां नागकुलानि विप्र ।
स्वं वाहनं नयतो नास्त्यधर्मो
नागश्रेष्ठाद्गौतमास्मान्निवर्त ॥ १३

गौतम उवाच ।

यत्र प्रेतो नन्दति पुण्यकर्मा
यत्र प्रेतः शोचति पापकर्मा ।
वैवस्वतस्य सदने महात्मन-
स्तत्र त्वाहं हस्तिनं यातयिष्ये ॥ १४

धृतराष्ट्र उवाच ।

ये निष्क्रिया नास्तिका श्रद्दधानाः
पापात्मान इन्द्रियार्थे निविष्टाः ।
यमस्य ते यातनां प्राप्नुवन्ति
परं गन्ता धृतराष्ट्रो न तत्र ॥ १५

गौतम उवाच ।

वैवस्वती संयमनी जनानां
यत्रानृतं नोच्यते यत्र सत्यम् ।
यत्राबला बलिनं यातयन्ति
तत्र त्वाहं हस्तिनं यातयिष्ये ॥ १६

धृतराष्ट्र उवाच ।

ज्येष्ठां स्वसारं पितरं मातरं च
गुरुं यथा मानयन्तश्चरन्ति ।
तथाविधानामेष लोको महर्षे
परं गन्ता धृतराष्ट्रो न तत्र ॥ १७

गौतम उवाच ।

मन्दाकिनी वैश्रवणस्य राज्ञो
महाभोगा भोगिजनप्रवेश्या ।
गन्धर्वयक्षैरप्सरोभिश्च जुष्टा
तत्र त्वाहं हस्तिनं यातयिष्ये ॥ १८

धृतराष्ट्र उवाच ।

अतिथिव्रताः सुव्रता ये जना वै
प्रतिश्रयं ददति ब्राह्मणेभ्यः ।
शिष्टाशिनः संविभज्याश्रितांश्च
मन्दाकिनीं तेऽपि विभूषयन्ति ॥ १९

गौतम उवाच ।

मेरोरग्रे यद्वनं भाति रम्यं
सुपुष्पितं किंनरगीतजुष्टम् ।
सुदर्शना यत्र जम्बूर्विशाला

तत्र त्वाहं हस्तिनं यातयिष्ये ॥ २०

धृतराष्ट्र उवाच ।

ये ब्राह्मणा मृदवः सत्यशीला
बहुश्रुताः सर्वभूताभिरामाः ।
येऽधीयन्ते सेतिहासं पुराणं
मध्वाहुत्या जुह्वति च द्विजेभ्यः ॥ २१
तथाविधानामेष लोको महर्षे
परं गन्ता धृतराष्ट्रो न तत्र ।
यद्विद्यते विदितं स्थानमस्ति
तद्ब्रूहि त्वं त्वरितो ह्येष यामि ॥ २२

गौतम उवाच ।

सुपुष्पितं किंनरराजजुष्टं
प्रियं वनं नन्दनं नारदस्य ।
गन्धर्वाणामप्सरसां च सद्म
तत्र त्वाहं हस्तिनं यातयिष्ये ॥ २३

धृतराष्ट्र उवाच ।

ये नृत्तगीतकुशला जनाः सदा
ह्ययाचमानाः सहिताश्चरन्ति ।
तथाविधानामेष लोको महर्षे
परं गन्ता धृतराष्ट्रो न तत्र ॥ २४

गौतम उवाच ।

यत्रोत्तराः कुरवो भान्ति रम्या
देवैः सार्धं मोदमाना नरेन्द्र ।
यत्राग्नियौनाश्च वसन्ति विप्रा
ह्ययोनयः पर्वतयोनयश्च ॥ २५
यत्र शक्रो वर्षति सर्वकामा-
न्यत्र स्त्रियः कामचाराश्चरन्ति ।
यत्र चेर्ष्या नास्ति नारीनराणां
तत्र त्वाहं हस्तिनं यातयिष्ये ॥ २६

धृतराष्ट्र उवाच ।

ये सर्वभूतेषु निवृत्तकामा
अमांसादा न्यस्तदण्डाश्चरन्ति ।
न हिंसन्ति स्थावरं जङ्गमं च
भूतानां ये सर्वभूतात्मभूताः ॥ २७
निराशिषो निर्ममा वीतरागा
लाभालाभे तुल्यनिन्दाप्रशंसाः ।
तथाविधानामेष लोको महर्षे
परं गन्ता धृतराष्ट्रो न तत्र ॥ २८

गौतम उवाच ।

ततः परं भान्ति लोकाः सनातनाः
सुपुण्यगन्धा निर्मला वीतशोकाः ।
सोमस्य राज्ञः सदने महात्मन-
स्तत्र त्वाहं हस्तिनं यातयिष्ये ॥ २९

धृतराष्ट्र उवाच ।

ये दानशीला न प्रतिगृह्णते सदा
न चाप्यर्थानाददते परेभ्यः ।
येषामदेयमर्हते नास्ति किंचि-
त्सर्वातिथ्याः सुप्रसादा जनाश्च ॥ ३०
ये क्षन्तारो नाभिजल्पन्ति चान्या-
ञ्शक्ता भूत्वा सततं पुण्यशीलाः ।
तथाविधानामेष लोको महर्षे
परं गन्ता धृतराष्ट्रो न तत्र ॥ ३१

गौतम उवाच ।

ततः परं भान्ति लोकाः सनातना
विरजसो वितमस्का विशोकाः ।
आदित्यस्य सुमहान्तः सुवृत्ता-
स्तत्र त्वाहं हस्तिनं यातयिष्ये ॥ ३२

धृतराष्ट्र उवाच ।

स्वाध्यायशीला गुरुशुश्रूषणे रता-
स्तपस्विनः सुव्रताः सत्यसंधाः ।
आचार्याणामप्रतिकूलभाषिणो
नित्योत्थिता गुरुकर्मस्वचोद्याः ॥ ३३
तथाविधानामेष लोको महर्षे
विशुद्धानां भावितवाङ्मतीनाम् ।
सत्ये स्थितानां वेदविदां महात्मनां
परं गन्ता धृतराष्ट्रो न तत्र ॥ ३४

गौतम उवाच ।

ततः परे भान्ति लोकाः सनातनाः
सुपुण्यगन्धा विरजा विशोकाः ।
वरुणस्य राज्ञः सदने महात्मन-
स्तत्र त्वाहं हस्तिनं यातयिष्ये ॥ ३५

धृतराष्ट्र उवाच ।

चातुर्मास्यैर्ये यजन्ते जनाः सदा
तथेष्टीनां दशशतं प्राप्नुवन्ति ।
ये चाग्निहोत्रं जुह्वति श्रद्दधाना
यथान्यायं त्रीणि वर्षाणि विप्राः ॥ ३६
स्वदारिणां धर्मधुरे महात्मनां
यथोचिते वर्त्मनि सुस्थितानाम् ।
धर्मात्मनामुद्वहतां गतिं तां
परं गन्ता धृतराष्ट्रो न तत्र ॥ ३७

गौतम उवाच ।

इन्द्रस्य लोका विरजा विशोका
दुरन्वयाः काङ्क्षिता मानवानाम् ।
तस्याहं ते भवने भूरितेजसो
राजन्निमं हस्तिनं यातयिष्ये ॥ ३८
शतवर्षजीवी यश्च शूरो मनुष्यो
वेदाध्यायी यश्च यज्वाप्रमत्तः ।
एते सर्वे शक्रलोकं व्रजन्ति
परं गन्ता धृतराष्ट्रो न तत्र ॥ ३९

गौतम उवाच ।

प्राजापत्याः सन्ति लोका महान्तो
नाकस्य पृष्ठे पुष्कला वीतशोकाः ।
मनीषिताः सर्वलोकोद्भवानां
तत्र त्वाहं हस्तिनं यातयिष्ये ॥ ४०

धृतराष्ट्र उवाच ।

ये राजानो राजसूयाभिषिक्ता
धर्मात्मानो रक्षितारः प्रजानाम् ।
ये चाश्वमेधावभृथाप्लुताङ्गा-
स्तेषां लोका धृतराष्ट्रो न तत्र ॥ ४१

गौतम उवाच ।

ततः परं भान्ति लोकाः सनातनाः
सुपुण्यगन्धा विरजा वीतशोकाः ।
तस्मिन्नहं दुर्लभे त्वाप्रधृष्ये
गवां लोके हस्तिनं यातयिष्ये ॥ ४२

धृतराष्ट्र उवाच ।

यो गोसहस्री शतदः समां समां
यो गोशती दश दद्याच्च शक्त्या ।
तथा दशभ्यो यश्च दद्यादिहैकां
पञ्चभ्यो वा दानशीलस्तथैकाम् ॥ ४३
ये जीर्यन्ते ब्रह्मचर्येण विप्रा
ब्राह्मीं वाचं परिरक्षन्ति चैव ।
मनस्विनस्तीर्थयात्रापरायणा-
स्ते तत्र मोदन्ति गवां विमाने ॥ ४४
प्रभासं मानसं पुण्यं पुष्कराणि महत्सरः ।
पुण्यं च नैमिषं तीर्थं बाहुदां करतोयिनीम् ॥ ४५

गयां गयशिरश्चैव विपाशां स्थूलवालुकाम् ।
तूष्णींगङ्गां दशगङ्गां महाह्रदमथापि च ॥ ४६
गौतमीं कौशिकीं पाकां महात्मानो धृतव्रताः ।
सरस्वतीदृषद्वत्यौ यमुनां ये प्रयान्ति च ॥ ४७
तत्र ते दिव्यसंस्थाना दिव्यमाल्यधराः शिवाः ।
प्रयान्ति पुण्यगन्धाढ्या धृतराष्ट्रो न तत्र वै ॥ ४८

गौतम उवाच ।

यत्र शीतभयं नास्ति न चोष्णभयमण्वपि ।
न क्षुत्पिपासे न ग्लानिर्न दुःखं न सुखं तथा ॥
न द्वेष्यो न प्रियः कश्चिन्न बन्धुर्न रिपुस्तथा ।
न जरामरणे वापि न पुण्यं न च पातकम् ॥ ५०
तस्मिन्विरजसि स्फीते प्रज्ञासत्त्वव्यवस्थिते ।
स्वयंभुभवने पुण्ये हस्तिनं मे यतिष्यति ॥ ५१

धृतराष्ट्र उवाच ।

निर्मुक्ताः सर्वसङ्गेभ्यो कृतात्मानो यतव्रताः ।
अध्यात्मयोगसंस्थाने युक्ताः स्वर्गगतिं गताः ॥५२
ते ब्रह्मभवनं पुण्यं प्राप्नुवन्तीह सात्त्विकाः ।
न तत्र धृतराष्ट्रस्ते शक्यो द्रष्टुं महामुने ॥ ५३

गौतम उवाच ।

रथन्तरं यत्र बृहच्च गीयते
यत्र वेदी पुण्डरीकैः स्तृणोति ।
यत्रोपयाति हरिभिः सोमपीथी
तत्र त्वाहं हस्तिनं यातयिष्ये ॥ ५४
बुध्यामि त्वां वृत्रहणं शतक्रतुं
व्यतिक्रमन्तं भुवनानि विश्वा ।
कच्चिन्न वाचा वृजिनं कदाचि-
दकार्षं ते मनसोऽभिषङ्गात् ॥ ५५

शक्र उवाच ।

यस्मादिमं लोकपथं प्रजाना-
मन्वागमं पदवादे गजस्य
तस्माद्भवान्प्रणतं मानुशास्तु
ब्रवीषि यत्तत्करवाणि सर्वम् ॥ ५६

गौतम उवाच ।

श्वेतं करेणुं मम पुत्रनागं
यं मेऽहार्षीर्दशवर्षाणि बालम् ।
यो मे वने वसतोऽभूद्द्वितीय-
स्तमेव मे देहि सुरेन्द्र नागम् ॥ ५७

शक्र उवाच ।

अयं सुतस्ते द्विजमुख्य नाग-
श्चाघ्रायते त्वामभिवीक्षमाणः ।
पादौ च ते नासिकयोपजिघ्रते
श्रेयो मम ध्याहि नमश्च तेऽस्तु ॥ ५८

गौतम उवाच ।

शिवं सदैवेह सुरेन्द्र तुभ्यं
ध्यायामि पूजां च सदा प्रयुञ्जे ।
ममापि त्वं शक्र शिवं ददस्व
त्वया दत्तं प्रतिगृह्णामि नागम् ॥ ५९

शक्र उवाच ।

येषां वेदा निहिता वै गुहायां
मनीषिणां सत्त्ववतां महात्मनाम् ।
तेषां त्वयैकेन महात्मनास्मि
बुद्धस्तस्मात्प्रीतिमांस्तेऽहमद्य ॥ ६०
हन्तैहि ब्राह्मण क्षिप्रं सह पुत्रेण हस्तिना ।
प्राप्नुहि त्वं शुभाँल्लोकानह्नाय च चिराय च ॥ ६१

भीष्म उवाच ।

स गौतमं पुरस्कृत्य सह पुत्रेण हस्तिना ।
दिवमाचक्रमे वज्री सद्भिः सह दुरासदम् ॥ ६२

इति श्रीमहाभारते अनुशासनपर्वणि
पञ्चाधिकशततमोऽध्यायः ॥ १०५ ॥

१०६

युधिष्ठिर उवाच ।

दानं बहुविधाकारं शान्तिं सत्यमहिंसता ।
स्वदारतुष्टिश्चोक्ता ते फलं दानस्य चैव यत् ॥ १
पितामहस्य विदितं किमन्यत्र तपोबलात् ।
तपसो यत्परं तेऽद्य तन्मे व्याख्यातुमर्हसि ॥ २

भीष्म उवाच ।

तपः प्रचक्षते यावत्तावल्लोका युधिष्ठिर ।
मतं मम तु कौन्तेय तपो नानशनात्परम् ॥ ३
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
भगीरथस्य संवादं ब्रह्मणश्च महात्मनः ॥ ४
अतीत्य सुरलोकं च गवां लोकं च भारत ।
ऋषिलोकं च सोऽगच्छद्भगीरथ इति श्रुतिः ॥ ५
तं दृष्ट्वा स वचः प्राह ब्रह्मा राजन्भगीरथम् ।
कथं भगीरथागास्त्वमिमं देशं दुरासदम् ॥ ६
न हि देवा न गन्धर्वा न मनुष्या भगीरथ ।
आयान्त्यतप्ततपसः कथं वै त्वमिहागतः ॥ ७

भगीरथ उवाच ।

निःशङ्कमन्नमददं ब्राह्मणेभ्यः
शतं सहस्राणि सदैव दानम् ।
ब्राह्मं व्रतं नित्यमास्थाय विद्धि
न त्वेवाहं तस्य फलादिहागाम् ॥ ८
दशैकरात्रान्दश पञ्चरात्रा-
नेकादशैकादशकान्क्रतूंश्च ।
ज्योतिष्टोमानां च शतं यदिष्टं
फलेन तेनापि च नागतोऽहम् ॥ ९
यच्चावसं जाह्नवीतीरनित्यः
शतं समास्तप्यमानस्तपोऽहम् ।
अदां च तत्राश्वतरीसहस्रं
नारीपुरं न च तेनाहमागाम् ॥ १०
दशायुतानि चाश्वानामयुतानि च विंशतिम् ।
पुष्करेषु द्विजातिभ्यः प्रादां गाश्च सहस्रशः ॥ ११
सुवर्णचन्द्रोडुपधारिणीनां
कन्योत्तमानामददं स्रग्विणीनाम् ।
षष्टिं सहस्राणि विभूषितानां
जाम्बूनदैराभरणैर्न तेन ॥ १२
दशार्बुदान्यददं गोसवेज्या-
स्वेकैकशो दश गा लोकनाथ ।
समानवत्साः पयसा समन्विताः
सुवर्णकांस्योपदुहा न तेन ॥ १३
अप्तोर्यामेषु नियतमेकैकस्मिन्दशाददम् ।
गृष्टीनां क्षीरदात्रीणां रोहिणीनां न तेन च ॥ १४
दोग्ध्रीणां वै गवां चैव प्रयुतानि दशैव ह ।
प्रादां दशगुणं ब्रह्मन्न च तेनाहमागतः ॥ १५
वाजिनां बाह्लिजातानामयुतान्यददं दश ।
कर्काणां हेममालानां न च तेनाहमागतः ॥ १६
कोटीश्च काञ्चनस्याष्टौ प्रादां ब्रह्मन्दश त्वहम् ।
एकैकस्मिन्क्रतौ तेन फलेनाहं न चागतः ॥ १७
वाजिनां श्यामकर्णानां हरितानां पितामह ।
प्रादां हेमस्रजां ब्रह्मन्कोटीर्दश च सप्त च ॥ १८
ईषादन्तान्महाकायान्काञ्चनस्रग्विभूषितान् ।
पत्नीमतः सहस्राणि प्रायच्छं दश सप्त च ॥ १९
अलंकृतानां देवेश दिव्यैः कनकभूषणैः ।
रथानां काञ्चनाङ्गानां सहस्राण्यददं दश ।
सप्त चान्यानि युक्तानि वाजिभिः समलंकृतैः ॥ २०
दक्षिणावयवाः केचिद्वेदैर्ये संप्रकीर्तिताः ।
वाजपेयेषु दशसु प्रादां तेनापि नाप्यहम् ॥ २१
शक्रतुल्यप्रभावानामिज्यया विक्रमेण च ।
सहस्रं निष्ककण्ठानामददं दक्षिणामहम् ॥ २२
विजित्य नृपतीन्सर्वान्मखैरिष्ट्वा पितामह ।

अष्टभ्यो राजसूयेभ्यो न च तेनाहमागतः ॥ २३
स्रोतश्च यावद्गङ्गायाश्छन्नमासीज्जगत्पते ।
दक्षिणाभिः प्रवृत्ताभिर्मम नागां च तत्कृते ॥ २४
वाजिनां च सहस्रे द्वे सुवर्णशतभूषिते ।
वरं ग्रामशतं चाहमेकैकस्य त्रिधाददम् ।
तपस्वी नियताहारः शममास्थाय वाग्यतः ॥ २५
दीर्घकालं हिमवति गङ्गायाश्च दुरुत्सहाम् ।
मूर्ध्ना धारां महादेवः शिरसा यामधारयत् ।
न तेनाप्यहमागच्छं फलेनेह पितामह ॥ २६
शम्याक्षेपैरयजं यच्च देवा-
न्सद्यस्कानामयुतैश्चापि यत्तत् ।
त्रयोदशद्वादशाहांश्च देव
सपौण्डरीकान्न च तेषां फलेन ॥ २७
अष्टौ सहस्राणि ककुद्मिनामहं
शुक्लर्षभाणामददं ब्राह्मणेभ्यः ।
एकैकं वै काञ्चनं शृङ्गमेभ्यः
पत्नीश्चैषामददं निष्ककण्ठीः ॥ २८
हिरण्यरत्ननिचितानददं रत्नपर्वतान् ।
धनधान्यसमृद्धांश्च ग्रामाञ्शतसहस्रशः ॥ २९
शतं शतानां गृष्टीनामददं चाप्यतन्द्रितः ।
इष्ट्वानेकैर्महायज्ञैर्ब्राह्मणेभ्यो न तेन च ॥ ३०
एकादशाहैरयजं सदक्षिणै-
र्द्विर्द्वादशाहैरश्वमेधैश्च देव ।
आर्कायणैः षोडशभिश्च ब्रह्मं-
स्तेषां फलेनेह न चागतोऽस्मि ॥ ३१
निष्कैककण्ठमददं योजनायतं
तद्विस्तीर्णं काञ्चनपादपानाम् ।
वनं चूतानां रत्नविभूषितानां
न चैव तेषामागतोऽहं फलेन ॥ ३२
तुरायणं हि व्रतमप्रधृष्य-
मक्रोधनोऽकरवं त्रिंशतोऽब्दान् ।
शतं गवामष्ट शतानि चैव
दिने दिने ह्यददं ब्राह्मणेभ्यः ॥ ३३
पयस्विनीनामथ रोहिणीनां
तथैव चाप्यनडुहां लोकनाथ ।
प्रादां नित्यं ब्राह्मणेभ्यः सुरेश
नेहागतस्तेन फलेन चाहम् ॥ ३४
त्रिंशदग्निमहं ब्रह्मन्नयजं यच्च नित्यदा ।
अष्टाभिः सर्वमेधैश्च नरमेधैश्च सप्तभिः ॥ ३५
दशभिर्विश्वजिद्भिश्च शतैरष्टादशोत्तरैः ।
न चैव तेषां देवेश फलेनाहमिहागतः ॥ ३६
सरय्वां बाहुदायां च गङ्गायामथ नैमिषे ।
गवां शतानामयुतमददं न च तेन वै ॥ ३७
इन्द्रेण गुह्यं निहितं वै गुहायां
यद्भार्गवस्तपसेहाभ्यविन्दत् ।
जाज्वल्यमानमुशनस्तेजसेह
तत्साधयामासमहं वरेण्यम् ॥ ३८
ततो मे ब्राह्मणास्तुष्टास्तस्मिन्कर्मणि साधिते ।
सहस्रमृषयश्चासन्ये वै तत्र समागताः ।
उक्तस्तैरस्मि गच्छ त्वं ब्रह्मलोकमिति प्रभो ॥ ३९
प्रीतेनोक्तः सहस्रेण ब्राह्मणानामहं प्रभो ।
इमं लोकमनुप्राप्तो मा भूत्तेऽत्र विचारणा ॥ ४०
कामं यथावद्विहितं विधात्रा
पृष्टेन वाच्यं तु मया यथावत् ।
तपो हि नान्यच्चानशनान्मतं मे
नमोऽस्तु ते देववर प्रसीद ॥ ४१

भीष्म उवाच ।

इत्युक्तवन्तं तं ब्रह्मा राजानं स भगीरथम् ।

पूजयामास पूजार्हं विधिदृष्टेन कर्मणा ॥ ४२

इति श्रीमहाभारते अनुशासनपर्वणि
षडधिकशततमोऽध्यायः ॥ १०६ ॥

१०७

युधिष्ठिर उवाच ।

शतायुरुक्तः पुरुषः शतवीर्यश्च वैदिके ।
कस्मान्म्रियन्ते पुरुषा बाला अपि पितामह ॥ १
आयुष्मान्केन भवति स्वल्पायुर्वापि मानवः ।
केन वा लभते कीर्तिं केन वा लभते श्रियम् ॥ २
तपसा ब्रह्मचर्येण जपैर्होमैस्तथौषधैः ।
जन्मना यदि वाचारात्तन्मे ब्रूहि पितामह ॥ ३

भीष्म उवाच ।

अत्र ते वर्तयिष्यामि यन्मां त्वमनुपृच्छसि ।
अल्पायुर्येन भवति दीर्घायुर्वापि मानवः ॥ ४
येन वा लभते कीर्तिं येन वा लभते श्रियम् ।
यथा च वर्तन्पुरुषः श्रेयसा संप्रयुज्यते ॥ ५
आचाराल्लभते ह्यायुराचाराल्लभते श्रियम् ।
आचारात्कीर्तिमाप्नोति पुरुषः प्रेत्य चेह च ॥ ६
दुराचारो हि पुरुषो नेहायुर्विन्दते महत् ।
त्रसन्ति यस्माद्भूतानि तथा परिभवन्ति च ॥ ७
तस्मात्कुर्यादिहाचारं य इच्छेद्भूतिमात्मनः ।
अपि पापशरीरस्य आचारो हन्त्यलक्षणम् ॥ ८
आचारलक्षणो धर्मः सन्तश्चाचारलक्षणाः ।
साधूनां च यथा वृत्तमेतदाचारलक्षणम् ॥ ९
अप्यदृष्टं श्रुतं वापि पुरुषं धर्मचारिणम् ।
भूतिकर्माणि कुर्वाणं तं जनाः कुर्वते प्रियम् ॥१०
ये नास्तिका निष्क्रियाश्च गुरुशास्त्रातिलङ्घिनः ।
अधर्मज्ञा दुराचारास्ते भवन्ति गतायुषः ॥ ११
विशीला भिन्नमर्यादा नित्यं संकीर्णमैथुनाः ।
अल्पायुषो भवन्तीह नरा निरयगामिनः ॥ १२
सर्वलक्षणहीनोऽपि समुदाचारवान्नरः ।
श्रद्दधानोऽनसूयश्च शतं वर्षाणि जीवति ॥ १३
अक्रोधनः सत्यवादी भूतानामविहिंसकः ।
अनसूयुरजिह्मश्च शतं वर्षाणि जीवति ॥ १४
लोष्टमर्दी तृणच्छेदी नखखादी च यो नरः ।
नित्योच्छिष्टः संकुसुको नेहायुर्विन्दते महत् ॥ १५
ब्राह्मे मुहूर्ते बुध्येत धर्मार्थौ चानुचिन्तयेत् ।
उत्थायाचम्य तिष्ठेत पूर्वां संध्यां कृताञ्जलिः ॥१६
एवमेवापरां संध्यां समुपासीत वाग्यतः ।
नेक्षेत्यादित्यमुद्यन्तं नास्तं यान्तं कदाचन ॥ १७
ऋषयो दीर्घसंध्यत्वाद्दीर्घमायुरवाप्नुवन् ।
तस्मात्तिष्ठेत्सदा पूर्वां पश्चिमां चैव वाग्यतः ॥ १८
ये न पूर्वामुपासन्ते द्विजाः संध्यां न पश्चिमाम् ।
सर्वांस्तान्धार्मिको राजा शूद्रकर्माणि कारयेत् ॥१९
परदारा न गन्तव्याः सर्ववर्णेषु कर्हिचित् ।
न हीदृशमनायुष्यं लोके किंचन विद्यते ।
यादृशं पुरुषस्येह परदारोपसेवनम् ॥ २०
प्रसाधनं च केशानामञ्जनं दन्तधावनम् ।
पूर्वाह्ण एव कुर्वीत देवतानां च पूजनम् ॥ २१
पुरीषमूत्रे नोदीक्षेन्नाधितिष्ठेत्कदाचन ।
उदक्यया च संभाषां न कुर्वीत कदाचन ॥ २२
नोत्सृजेत पुरीषं च क्षेत्रे ग्रामस्य चान्तिके ।
उभे मूत्रपुरीषे तु नाप्सु कुर्यात्कदाचन ॥ २३
प्राङ्मुखो नित्यमश्नीयाद्वाग्यतोऽन्नमकुत्सयन् ।
प्रस्कन्दयेच्च मनसा भुक्त्वा चाग्निमुपस्पृशेत् ॥ २४
आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः ।
धन्यं पश्चान्मुखो भुङ्क्ते ऋतं भुङ्क्ते उदङ्मुखः ॥२५
नाधितिष्ठेत्तुषाञ्जातु केशभस्मकपालिकाः ।
अन्यस्य चाप्युपस्थानं दूरतः परिवर्जयेत् ॥ २६
शान्तिहोमांश्च कुर्वीत सावित्राणि च कारयेत् ।

निषण्णश्चापि खादेत न तु गच्छन्कथंचन ॥ २७
मूत्रं न तिष्ठता कार्यं न भस्मनि न गोव्रजे ॥ २८
आर्द्रपादस्तु भुञ्जीत नार्द्रपादस्तु संविशेत् ।
आर्द्रपादस्तु भुञ्जानो वर्षाणां जीवते शतम् ॥ २९
त्रीणि तेजांसि नोच्छिष्ट आलभेत कदाचन ।
अग्निं गां ब्राह्मणं चैव तथास्यायुर्न रिष्यते ॥ ३०
त्रीणि तेजांसि नोच्छिष्ट उदीक्षेत कदाचन ।
सूर्याचन्द्रमसौ चैव नक्षत्राणि च सर्वशः ॥ ३१
ऊर्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति ।
प्रत्युत्थानाभिवादाभ्यां पुनस्तान्प्रतिपद्यते ॥ ३२
अभिवादयेत वृद्धांश्च आसनं चैव दापयेत् ।
कृताञ्जलिरुपासीत गच्छन्तं पृष्ठतोऽन्वियात् ॥ ३३
न चासीतासने भिन्ने भिन्नं कांस्यं च वर्जयेत् ।
नैकवस्त्रेण भोक्तव्यं न नग्नः स्नातुमर्हति ।
स्वप्तव्यं नैव नग्नेन न चोच्छिष्टोऽपि संविशेत् ॥
उच्छिष्टो न स्पृशेच्छीर्षं सर्वे प्राणास्तदाश्रयाः ।
केशग्रहान्प्रहारांश्च शिरस्येतान्विवर्जयेत् ॥ ३५
न पाणिभ्यामुभाभ्यां च कण्डूयेज्जातु वै शिरः ।
न चाभीक्ष्णं शिरः स्नायात्तथास्यायुर्न रिष्यते ॥ ३६
शिरःस्नातश्च तैलेन नाङ्गं किंचिदुपस्पृशेत् ।
तिलपिष्टं न चाश्नीयात्तथायुर्विन्दते महत् ॥ ३७
नाध्यापयेत्तथोच्छिष्टो नाधीयीत कदाचन ।
वाते च पूतिगन्धे च मनसापि न चिन्तयेत् ॥ ३८
अत्र गाथा यमोद्गीताः कीर्तयन्ति पुराविदः ।
आयुरस्य निकृन्तामि प्रजामस्याददे तथा ॥ ३९
य उच्छिष्टः प्रवदति स्वाध्यायं चाधिगच्छति ।
यश्चानध्यायकालेऽपि मोहादभ्यस्यति द्विजः ।
तस्मायुक्तोऽप्यनध्याये नाधीयीत कदाचन ॥ ४०
प्रत्यादित्यं प्रत्यनिलं प्रति गां च प्रति द्विजान् ।
ये मेहन्ति च पन्थानं ते भवन्ति गतायुषः ॥ ४१
उभे मूत्रपुरीषे तु दिवा कुर्यादुदङ्मुखः ।
दक्षिणाभिमुखो रात्रौ तथास्यायुर्न रिष्यते ॥ ४२
त्रीन्कृशान्नावजानीयाद्दीर्घमायुर्जिजीविषुः ।
ब्राह्मणं क्षत्रियं सर्पं सर्वे ह्याशीविषास्त्रयः ॥ ४३
दहत्याशीविषः क्रुद्धो यावत्पश्यति चक्षुषा ।
क्षत्रियोऽपि दहेत्क्रुद्धो यावत्स्पृशति तेजसा ॥ ४४
ब्राह्मणस्तु कुलं हन्याद्ध्यानेनावेक्षितेन च ।
तस्मादेतत्त्रयं यत्नादुपसेवेत पण्डितः ॥ ४५
गुरुणा वैरनिर्बन्धो न कर्तव्यः कदाचन ।
अनुमान्यः प्रसाद्यश्च गुरुः क्रुद्धो युधिष्ठिर ॥ ४६
सम्यङ्मिथ्याप्रवृत्तेऽपि वर्तितव्यं गुराविह ।
गुरुनिन्दा दहत्यायुर्मनुष्याणां न संशयः ॥ ४७
दूरादावसथान्मूत्रं दूरात्पादावसेचनम् ।
उच्छिष्टोत्सर्जनं चैव दूरे कार्यं हितैषिणा ॥ ४८
नातिकल्पं नातिसायं न च मध्यंदिने स्थिते ।
नाज्ञातैः सह गच्छेत नैको न वृषलैः सह ॥ ४९
पन्था देयो ब्राह्मणाय गोभ्यो राजभ्य एव च ।
वृद्धाय भारतप्ताय गर्भिण्यै दुर्बलाय च ॥ ५०
प्रदक्षिणं च कुर्वीत परिज्ञातान्वनस्पतीन् ।
चतुष्पथान्प्रकुर्वीत सर्वानेव प्रदक्षिणान् ॥ ५१
मध्यंदिने निशाकाले मध्यरात्रे च सर्वदा ।
चतुष्पथान्न सेवेत उभे संध्ये तथैव च ॥ ५२
उपानहौ च वस्त्रं च धृतमन्यैर्न धारयेत् ।
ब्रह्मचारी च नित्यं स्यात्पादं पादेन नाक्रमेत् ॥ ५३
अमावास्यां पौर्णमास्यां चतुर्दश्यां च सर्वशः ।
अष्टम्यां सर्वपक्षाणां ब्रह्मचारी सदा भवेत् ॥ ५४
वृथा मांसं न खादेत पृष्ठमांसं तथैव च ।
आक्रोशं परिवादं च पैशुन्यं च विवर्जयेत् ॥ ५५
नारुंतुदः स्यान्न नृशंसवादी
न हीनतः परमभ्याददीत ।

यथास्य वाचा पर उद्विजेत
न तां वदेद्रुशतीं पापलोक्याम् ॥ ५६
वाक्सायका वदनान्निष्पतन्ति
यैराहतः शोचति रात्र्यहानि ।
परस्य नामर्मसु ते पतन्ति
तान्पण्डितो नावसृजेत्परेषु ॥ ५७
रोहते सायकैर्विद्धं वनं परशुना हतम् ।
वाचा दुरुक्तं बीभत्सं न संरोहति वाक्क्षतम् ॥
हीनाङ्गानतिरिक्ताङ्गान्विद्याहीनान्वयोधिकान् ।
रूपद्रविणहीनांश्च सत्त्वहीनांश्च नाक्षिपेत् ॥ ५९
नास्तिक्यं वेदनिन्दां च देवतानां च कुत्सनम् ।
द्वेषस्तम्भाभिमानांश्च तैक्ष्ण्यं च परिवर्जयेत् ॥ ६०
परस्य दण्डं नोद्यच्छेत्क्रुद्धो नैनं निपातयेत् ।
अन्यत्र पुत्राच्छिष्याद्वा शिक्षार्थं ताडनं स्मृतम् ॥
न ब्राह्मणान्परिवदेन्नक्षत्राणि न निर्दिशेत् ।
तिथिं पक्षस्य न ब्रूयात्तथास्यायुर्न रिष्यते ॥ ६२
कृत्वा मूत्रपुरीषे तु रथ्यामाक्रम्य वा पुनः ।
पादप्रक्षालनं कुर्यात्स्वाध्याये भोजने तथा ॥ ६३
त्रीणि देवाः पवित्राणि ब्राह्मणानामकल्पयन् ।
अदृष्टमद्भिर्निर्णिक्तं यच्च वाचा प्रशस्यते ॥ ६४
संयावं कृसरं मांसं शष्कुली पायसं तथा ।
आत्मार्थं न प्रकर्तव्यं देवार्थं तु प्रकल्पयेत् ॥ ६५
नित्यमग्निं परिचरेद्भिक्षां दद्याच्च नित्यदा ।
वाग्यतो दन्तकाष्ठं च नित्यमेव समाचरेत् ।
न चाभ्युदितशायी स्यात्प्रायश्चित्ती तथा भवेत् ॥
मातापितरमुत्थाय पूर्वमेवाभिवादयेत् ।
आचार्यमथ वाप्येनं तथायुर्विन्दते महत् ॥ ६७
वर्जयेद्दन्तकाष्ठानि वर्जनीयानि नित्यशः ।
भक्षयेच्छास्त्रदृष्टानि पर्वस्वपि च वर्जयेत् ॥ ६८
उदङ्मुखश्च सततं शौचं कुर्यात्समाहितः ॥ ६९
अकृत्वा देवतापूजां नान्यं गच्छेत्कदाचन ।
अन्यत्र तु गुरुं वृद्धं धार्मिकं वा विचक्षणम् ॥ ७०
अवलोक्यो न चादर्शो मलिनो बुद्धिमत्तरैः ।
न चाज्ञातां स्त्रियं गच्छेद्गर्भिणीं वा कदाचन ॥ ७१
उदक्शिरा न स्वपेत तथा प्रत्यक्शिरा न च ।
प्राक्शिरास्तु स्वपेद्विद्वानथ वा दक्षिणाशिराः ॥ ७२
न भग्ने नावदीर्णे वा शयने प्रस्वपेत च ।
नान्तर्धाने न संयुक्ते न च तिर्यक्कदाचन ॥ ७३
न नग्नः कर्हिचित्स्नायान्न निशायां कदाचन ।
स्नात्वा च नावमृज्येत गात्राणि सुविचक्षणः ॥ ७४
न चानुलिम्पेदस्नात्वा स्नात्वा वासो न निर्धुनेत् ।
आर्द्र एव तु वासांसि नित्यं सेवेत मानवः ।
स्रजश्च नावकर्षेत न बहिर्धारयेत च ॥ ७५
रक्तमाल्यं न धार्यं स्याच्छुक्लं धार्यं तु पण्डितैः ।
वर्जयित्वा तु कमलं तथा कुवलयं विभो ॥ ७६
रक्तं शिरसि धार्यं तु तथा वानेयमित्यपि ।
काञ्चनी चैव या माला न सा दुष्यति कर्हिचित् ।
स्नातस्य वर्णकं नित्यमार्द्रं दद्याद्विशां पते ॥ ७७
विपर्ययं न कुर्वीत वाससो बुद्धिमान्नरः ।
तथा नान्यधृतं धार्यं न चापदशमेव च ॥ ७८
अन्यदेव भवेद्वासः शयनीये नरोत्तम ।
अन्यद्रथ्यासु देवानामर्चायामन्यदेव हि ॥ ७९
प्रियङ्गुचन्दनाभ्यां च बिल्वेन तगरेण च ।
पृथगेवानुलिम्पेत केसरेण च बुद्धिमान् ॥ ८०
उपवासं च कुर्वीत स्नातः शुचिरलंकृतः ।
पर्वकालेषु सर्वेषु ब्रह्मचारी सदा भवेत् ॥ ८१
नालीढया परिहतं भक्षयीत कदाचन ।
तथा नोद्धृतसाराणि प्रेक्षतां नाप्रदाय च ॥ ८२
न संनिकृष्टो मेधावी नाशुचिर्न च सत्सु च ।
प्रतिषिद्धान्न धर्मेषु भक्षान्भुञ्जीत पृष्ठतः ॥ ८३

पिप्पलं च वटं चैव शणशाकं तथैव च ।
उदुम्बरं न खादेच्च भवार्थी पुरुषोत्तमः ॥ ८४
आजं गव्यं च यन्मांसं मायूरं चैव वर्जयेत् ।
वर्जयेच्छुष्कमांसं च तथा पर्युषितं च यत् ॥ ८५
न पाणौ लवणं विद्वान्प्राश्नीयान्न च रात्रिषु ।
दधिसक्तून्न भुञ्जीत वृथामांसं च वर्जयेत् ॥ ८६
वालेन तु न भुञ्जीत परश्राद्धं तथैव च ।
सायं प्रातश्च भुञ्जीत नान्तराले समाहितः ॥ ८७
वाग्यतो नैकवस्त्रश्च नासंविष्टः कदाचन ।
भूमौ सदैव नाश्नीयान्नानासीनो न शब्दवत् ॥ ८८
तोयपूर्वं प्रदायान्नमतिथिभ्यो विशां पते ।
पश्चाद्भुञ्जीत मेधावी न चाप्यन्यमना नरः ॥ ८९
समानमेकपङ्क्त्यां तु भोज्यमन्नं नरेश्वर ।
विषं हालाहलं भुङ्क्ते योऽप्रदाय सुहृज्जने ॥ ९०
पानीयं पायसं सर्पिर्दधिसक्तुमधून्यपि ।
निरस्य शेषमेतेषां न प्रदेयं तु कस्यचित् ॥ ९१
भुञ्जानो मनुजव्याघ्र नैव शङ्कां समाचरेत् ।
दधि चाप्यनुपानं वै न कर्तव्यं भवार्थिना ॥ ९२
आचम्य चैव हस्तेन परिस्राव्य तथोदकम् ।
अङ्गुष्ठं चरणस्याथ दक्षिणस्यावसेचयेत् ॥ ९३
पाणिं मूर्ध्नि समाधाय स्पृष्ट्वा चाग्निं समाहितः ।
ज्ञातिश्रैष्ठ्यमवाप्नोति प्रयोगकुशलो नरः ॥ ९४
अद्भिः प्राणान्समालभ्य नाभिं पाणितलेन च ।
स्पृशंश्चैव प्रतिष्ठेत न चाप्यार्द्रेण पाणिना ॥ ९५
अङ्गुष्ठस्यान्तराले च ब्राह्मं तीर्थमुदाहृतम् ।
कनिष्ठिकायाः पश्चात्तु देवतीर्थमिहोच्यते ॥ ९६
अङ्गुष्ठस्य च यन्मध्यं प्रदेशिन्याश्च भारत ।
तेन पित्र्याणि कुर्वीत स्पृष्ट्वापो न्यायतस्तथा ॥ ९७
परापवादं न ब्रूयान्नाप्रियं च कदाचन ।
न मन्युः कश्चिदुत्पाद्यः पुरुषेण भवार्थिना ॥ ९८
पतितैस्तु कथां नेच्छेद्दर्शनं चापि वर्जयेत् ।
संसर्गं च न गच्छेत तथायुर्विन्दते महत् ॥ ९९
न दिवा मैथुनं गच्छेन्न कन्यां न च बन्धकीम् ।
न चास्नातां स्त्रियं गच्छेत्तथायुर्विन्दते महत् ॥
स्वे स्वे तीर्थे समाचम्य कार्ये समुपकल्पिते ।
त्रिः पीत्वापो द्विः प्रमृज्य कृतशौचो भवेन्नरः ॥
इन्द्रियाणि सकृत्स्पृश्य त्रिरभ्युक्ष्य च मानवः ।
कुर्वीत पित्र्यं दैवं च वेददृष्टेन कर्मणा ॥ १०२
ब्राह्मणार्थे च यच्छौचं तच्च मे शृणु कौरव ।
प्रवृत्ते च हितं चोक्त्वा भोजनाद्यन्तयोस्तथा ॥
सर्वशौचेषु ब्राह्मेण तीर्थेन समुपस्पृशेत् ।
निष्ठीव्य तु तथा क्षुत्वा स्पृश्यापो हि शुचिर्भवेत् ॥
वृद्धो ज्ञातिस्तथा मित्रं दरिद्रो यो भवेदपि ।
गृहे वासयितव्यास्ते धन्यमायुष्यमेव च ॥ १०५
गृहे पारावता धन्याः शुकाश्च सहसारिकाः ।
गृहेष्वेते न पापाय तथा वै तैलपायिकाः ॥ १०६
उद्दीपकाश्च गृध्राश्च कपोता भ्रमरास्तथा ।
निविशेयुर्यदा तत्र शान्तिमेव तदाचरेत् ॥ १०७
अमङ्गल्यानि चैतानि तथाक्रोशो महात्मनाम् ।
महात्मनां च गुह्यानि न वक्तव्यानि कर्हिचित् ॥
अगम्याश्च न गच्छेत राजपत्नीः सखीस्तथा ।
वैद्यानां बालवृद्धानां भृत्यानां च युधिष्ठिर ॥१०९
बन्धूनां ब्राह्मणानां च तथा शारणिकस्य च ।
संबन्धिनां च राजेन्द्र तथायुर्विन्दते महत् ॥११०
ब्राह्मणस्थपतिभ्यां च निर्मितं यन्निवेशनम् ।
तदावसेत्सदा प्राज्ञो भवार्थी मनुजेश्वर ॥ १११
संध्यायां न स्वपेद्राजन्विद्यां न च समाचरेत् ।
न भुञ्जीत च मेधावी तथायुर्विन्दते महत् ॥११२
नक्तं न कुर्यात्पित्र्याणि भुक्त्वा चैव प्रसाधनम् ।
पानीयस्य क्रिया नक्तं न कार्या भूतिमिच्छता ॥

वर्जनीयाश्च वै नित्यं सक्तवो निशि भारत ।
शेषाणि चावदातानि पानीयं चैव भोजने॥ ११४
सौहित्यं च न कर्तव्यं रात्रौ नैव समाचरेत् ।
द्विजच्छेदं न कुर्वीत भुक्त्वा न च समाचरेत् ॥
महाकुलप्रसूतां च प्रशस्तां लक्षणैस्तथा ।
वयःस्थां च महाप्राज्ञ कन्यामावोढुमर्हति ॥ ११६
अपत्यमुत्पाद्य ततः प्रतिष्ठाप्य कुलं तथा ।
पुत्राः प्रदेया ज्ञानेषु कुलधर्मेषु भारत ॥ ११७
कन्या चोत्पाद्य दातव्या कुलपुत्राय धीमते ।
पुत्रा निवेश्याश्च कुलाद्भृत्या लभ्याश्च भारत ॥
शिरःस्नातोऽथ कुर्वीत दैवं पित्र्यमथापि च ।
नक्षत्रे न च कुर्वीत यस्मिञ्जातो भवेन्नरः ।
न प्रोष्ठपदयोः कार्यं तथाग्नेये च भारत ॥ ११९
दारुणेषु च सर्वेषु प्रत्यहं च विवर्जयेत् ।
ज्योतिषे यानि चोक्तानि तानि सर्वाणि वर्जयेत् ॥
प्राङ्मुखः श्मश्रुकर्माणि कारयेत समाहितः ।
उदङ्मुखो वा राजेन्द्र तथायुर्विन्दते महत् ॥ १२१
परिवादं न च ब्रूयात्परेषामात्मनस्तथा ।
परिवादो न धर्माय प्रोच्यते भरतर्षभ ॥ १२२
वर्जयेद्व्यङ्गिनीं नारीं तथा कन्यां नरोत्तम ।
समार्षां व्यङ्गितां चैव मातुः स्वकुलजां तथा ॥
वृद्धां प्रव्रजितां चैव तथैव च पतिव्रताम् ।
तथातिकृष्णवर्णां च वर्णोत्कृष्टां च वर्जयेत् ॥१२४
अयोनिं च वियोनिं च न गच्छेत विचक्षणः ।
पिङ्गलां कुष्ठिनीं नारीं न त्वमावोढुमर्हसि ॥ १२५
अपस्मारिकुले जातां निहीनां चैव वर्जयेत् ।
श्वित्रिणां च कुले जातां त्रयाणां मनुजेश्वर ॥१२६
लक्षणैरन्विता या च प्रशस्ता या च लक्षणैः ।
मनोज्ञा दर्शनीया च तां भवान्वोढुमर्हति ॥ १२७
महाकुले निवेष्टव्यं सदृशे वा युधिष्ठिर ।
अवरा पतिता चैव न ग्राह्या भूतिमिच्छता ॥१२८
अग्नीनुत्पाद्य यत्नेन क्रियाः सुविहिताश्च याः ।
वेदेषु ब्राह्मणैः प्रोक्तास्ताश्च सर्वाः समाचरेत् ॥
न चेर्ष्या स्त्रीषु कर्तव्या दारा रक्ष्याश्च सर्वशः ।
अनायुष्या भवेदीर्ष्या तस्मादीर्ष्यां विवर्जयेत् ॥
अनायुष्यो दिवास्वप्नस्तथाभ्युदितशायिता ।
प्रातर्निशायां च तथा ये चोच्छिष्टाः स्वपन्ति वै ॥
पारदार्यमनायुष्यं नापितोच्छिष्टता तथा ।
यत्नतो वै न कर्तव्यमभ्यासश्चैव भारत ॥ १३२
संध्यां न भुञ्जेन्न स्नायान्न पुरीषं समुत्सृजेत् ।
प्रयतश्च भवेत्तस्यां न च किंचित्समाचरेत् ॥ १३३
ब्राह्मणान्पूजयेच्चापि तथा स्नात्वा नराधिप ।
देवांश्च प्रणमेत्स्नातो गुरूंश्चाप्यभिवादयेत् ॥ १३४
अनिमन्त्रितो न गच्छेत यज्ञं गच्छेत्तु दर्शकः ।
अनिमन्त्रिते ह्यनायुष्यं गमनं तत्र भारत ॥ १३५
न चैकेन परिव्राज्यं न गन्तव्यं तथा निशि ।
अनागतायां संध्यायां पश्चिमायां गृहे वसेत् ॥ १३६
मातुः पितुर्गुरूणां च कार्यमेवानुशासनम् ।
हितं वाप्यहितं वापि न विचार्यं नरर्षभ ॥ १३७
धनुर्वेदे च वेदे च यत्नः कार्यो नराधिप ।
हस्तिपृष्ठेऽश्वपृष्ठे च रथचर्यासु चैव ह ।
यत्नवान्भव राजेन्द्र यत्नवान्सुखमेधते ॥ १३८
अप्रधृष्यश्च शत्रूणां भृत्यानां स्वजनस्य च ।
प्रजापालनयुक्तश्च न क्षतिं लभते क्वचित् ॥ १३९
युक्तिशास्त्रं च ते ज्ञेयं शब्दशास्त्रं च भारत ।
गन्धर्वशास्त्रं च कलाः परिज्ञेया नराधिप ॥ १४०
पुराणमितिहासाश्च तथाख्यानानि यानि च ।
महात्मनां च चरितं श्रोतव्यं नित्यमेव ते ॥ १४१
पत्नीं रजस्वलां चैव नाभिगच्छेन्न चाह्वयेत् ।
स्नातां चतुर्थे दिवसे रात्रौ गच्छेद्विचक्षणः ॥१४२

पञ्चमे दिवसे नारी षष्ठेऽहनि पुमान्भवेत् ।
एतेन विधिना पत्नीमुपगच्छेत पण्डितः ॥ १४३
ज्ञातिसंबन्धिमित्राणि पूजनीयानि नित्यशः ।
यष्टव्यं च यथाशक्ति यज्ञैर्विविधदक्षिणैः ।
अतऊर्ध्वमरण्यं च सेवितव्यं नराधिप ॥ १४४
एष ते लक्षणोद्देश आयुष्याणां प्रकीर्तितः ।
शेषस्त्रैविद्यवृद्धेभ्यः प्रत्याहार्यो युधिष्ठिर ॥ १४५
आचारो भूतिजनन आचारः कीर्तिवर्धनः ।
आचाराद्वर्धते ह्यायुराचारो हन्त्यलक्षणम् ॥ १४६
आगमानां हि सर्वेषामाचारः श्रेष्ठ उच्यते ।
आचारप्रभवो धर्मो धर्मादायुर्विवर्धते ॥ १४७
एतद्यशस्यमायुष्यं स्वर्ग्यं स्वस्त्ययनं महत् ।
अनुकम्पता सर्ववर्णान्ब्रह्मणा समुदाहृतम् ॥ १४८

इति श्रीमहाभारते अनुशासनपर्वणि
सप्ताधिकशततमोऽध्यायः ॥ १०७ ॥

१०८

युधिष्ठिर उवाच ।

यथा ज्येष्ठः कनिष्ठेषु वर्तेत भरतर्षभ ।
कनिष्ठाश्च यथा ज्येष्ठे वर्तेरंस्तद्ब्रवीहि मे ॥ १

भीष्म उवाच ।

ज्येष्ठवत्तात वर्तस्व ज्येष्ठो हि सततं भवान् ।
गुरोर्गरीयसी वृत्तिर्या चेच्छिष्यस्य भारत ॥ २
न गुरावकृतप्रज्ञे शक्यं शिष्येण वर्जितुम् ।
गुरोर्हि दीर्घदर्शित्वं यत्तच्छिष्यस्य भारत ॥ ३
अन्धः स्यादन्धवेलायां जडः स्यादपि वा बुधः ।
परिहारेण तद्ब्रूयाद्यस्तेषां स्याद्व्यतिक्रमः ॥ ४
प्रत्यक्षं भिन्नहृदया भेदयेयुः कृतं नराः ।
श्रियाभितप्ताः कौन्तेय भेदकामास्तथारयः ॥ ५
ज्येष्ठः कुलं वर्धयति विनाशयति वा पुनः ।
हन्ति सर्वमपि ज्येष्ठः कुलं यत्रावजायते ॥ ६
अथ यो विनिकुर्वीत ज्येष्ठो भ्राता यवीयसः ।
अज्येष्ठः स्यादभागश्च नियम्यो राजभिश्च सः ॥ ७
निकृती हि नरो लोकान्पापान्गच्छत्यसंशयम् ।
विदुलस्येव तत्पुष्पं मोघं जनयितुः स्मृतम् ॥ ८
सर्वानर्थः कुले यत्र जायते पापपूरुषः ।
अकीर्तिं जनयत्येव कीर्तिमन्तर्दधाति च ॥ ९
सर्वे चापि विकर्मस्था भागं नार्हन्ति सोदराः ।
नाप्रदाय कनिष्ठेभ्यो ज्येष्ठः कुर्वीत यौतकम् ॥ १०
अनुजं हि पितुर्दायो जङ्घाश्रमफलोऽध्वगः ।
स्वयमीहितलब्धं तु नाकामो दातुमर्हति ॥ ११
भ्रातॄणामविभक्तानामुत्थानमपि चेत्सह ।
न पुत्रभागं विषमं पिता दद्यात्कथंचन ॥ १२
न ज्येष्ठानवमन्येत दुष्कृतः सुकृतोऽपि वा ।
यदि स्त्री यद्यवरजः श्रेयः पश्येत्तथाचरेत् ।
धर्मं हि श्रेय इत्याहुरिति धर्मविदो विदुः ॥ १३
दशाचार्यानुपाध्याय उपाध्यायान्पिता दश ।
दश चैव पितॄन्माता सर्वां वा पृथिवीमपि ॥ १४
गौरवेणाभिभवति नास्ति मातृसमो गुरुः ।
माता गरीयसी यच्च तेनैतां मन्यते जनः ॥ १५
ज्येष्ठो भ्राता पितृसमो मृते पितरि भारत ।
स ह्येषां वृत्तिदाता स्यात्स चैतान्परिपालयेत् ॥ १६
कनिष्ठास्तं नमस्येरन्सर्वे छन्दानुवर्तिनः ।
तमेव चोपजीवेरन्यथैव पितरं तथा ॥ १७
शरीरमेतौ सृजतः पिता माता च भारत ।
आचार्यशास्ता या जातिः सा सत्या साजरामरा ॥
ज्येष्ठा मातृसमा चापि भगिनी भरतर्षभ ।
भ्रातुर्भार्या च तद्वत्स्याद्यस्या बाल्ये स्तनं पिबेत् ॥

इति श्रीमहाभारते अनुशासनपर्वणि
अष्टोत्तरशततमोऽध्यायः ॥ १०८ ॥

१०९

युधिष्ठिर उवाच ।

सर्वेषामेव वर्णानां म्लेच्छानां च पितामह ।
उपवासे मतिरियं कारणं च न विद्महे ॥ १
ब्रह्मक्षत्रेण नियमाश्चर्तव्या इति नः श्रुतम् ।
उपवासे कथं तेषां कृत्यमस्ति पितामह ॥ २
नियमं चोपवासानां सर्वेषां ब्रूहि पार्थिव ।
अवाप्नोति गतिं कां च उपवासपरायणः ॥ ३
उपवासः परं पुण्यमुपवासः परायणम् ।
उपोष्येह नरश्रेष्ठ किं फलं प्रतिपद्यते ॥ ४
अधर्मान्मुच्यते केन धर्ममाप्नोति वै कथम् ।
स्वर्गं पुण्यं च लभते कथं भरतसत्तम ॥ ५
उपोष्य चापि किं तेन प्रदेयं स्यान्नराधिप ।
धर्मेण च सुखानर्थाँल्लँभेद्येन ब्रवीहि तम् ॥ ६

वैशंपायन उवाच ।

एवं ब्रुवाणं कौन्तेयं धर्मज्ञं धर्मतत्त्ववित् ।
धर्मपुत्रमिदं वाक्यं भीष्मः शांतनवोऽब्रवीत् ॥ ७
इदं खलु महाराज श्रुतमासीत्पुरातनम् ।
उपवासविधौ श्रेष्ठा ये गुणा भरतर्षभ ॥ ८
प्राजापत्यं ह्यङ्गिरसं पृष्टवानस्मि भारत ।
यथा मां त्वं तथैवाहं पृष्टवांस्तं तपोधनम् ॥ ९
प्रश्नमेतं मया पृष्टो भगवानग्निसंभवः ।
उपवासविधिं पुण्यमाचष्ट भरतर्षभ ॥ १०

अङ्गिरा उवाच ।

ब्रह्मक्षत्रे त्रिरात्रं तु विहितं कुरुनन्दन ।
द्विस्त्रिरात्रमथैवात्र निर्दिष्टं पुरुषर्षभ ॥ ११
वैश्यशूद्रौ तु यौ मोहादुपवासं प्रकुर्वते ।
त्रिरात्रं द्विस्त्रिरात्रं वा तयोः पुष्टिर्न विद्यते ॥ १२
चतुर्थभक्तक्षपणं वैश्यशूद्रे विधीयते ।
त्रिरात्रं न तु धर्मज्ञैर्विहितं ब्रह्मवादिभिः ॥ १३
पञ्चम्यां चैव षष्ठ्यां च पौर्णमास्यां च भारत ।
क्षमावान्रूपसंपन्नः श्रुतवांश्चैव जायते ॥ १४
नानपत्यो भवेत्प्राज्ञो दरिद्रो वा कदाचन ।
यजिष्णुः पञ्चमीं षष्ठीं क्षपेद्यो भोजयेद्द्विजान् ॥ १५
अष्टमीमथ कौन्तेय शुक्लपक्षे चतुर्दशीम् ।
उपोष्य व्याधिरहितो वीर्यवानभिजायते ॥ १६
मार्गशीर्षं तु यो मासमेकभक्तेन संक्षिपेत् ।
भोजयेच्च द्विजान्भक्त्या स मुच्येद्व्याधिकिल्बिषैः ॥
सर्वकल्याणसंपूर्णः सर्वौषधिसमन्वितः ।
कृषिभागी बहुधनो बहुपुत्रश्च जायते ॥ १८
पौषमासं तु कौन्तेय भक्तेनैकेन यः क्षपेत् ।
सुभगो दर्शनीयश्च यशोभागी च जायते ॥ १९
पितृभक्तो माघमासमेकभक्तेन यः क्षपेत् ।
श्रीमत्कुले ज्ञातिमध्ये स महत्त्वं प्रपद्यते ॥ २०
भगदैवं तु यो मासमेकभक्तेन यः क्षपेत् ।
स्त्रीषु वल्लभतां याति वश्याश्चास्य भवन्ति ताः ॥
चैत्रं तु नियतो मासमेकभक्तेन यः क्षपेत् ।
सुवर्णमणिमुक्ताढ्ये कुले महति जायते ॥ २२
निस्तरेदेकभक्तेन वैशाखं यो जितेन्द्रियः ।
नरो वा यदि वा नारी ज्ञातीनां श्रेष्ठतां व्रजेत् ॥
ज्येष्ठामूलं तु यो मासमेकभक्तेन संक्षपेत् ।
ऐश्वर्यमतुलं श्रेष्ठं पुमान्स्त्री वाभिजायते ॥ २४
आषाढमेकभक्तेन स्थित्वा मासमतन्द्रितः ।
बहुधान्यो बहुधनो बहुपुत्रश्च जायते ॥ २५
श्रावणं नियतो मासमेकभक्तेन यः क्षपेत् ।
यत्र तत्राभिषेकेण युज्यते ज्ञातिवर्धनः ॥ २६
प्रौष्ठपदं तु यो मासमेकाहारो भवेन्नरः ।
धनाढ्यं स्फीतमचलमैश्वर्यं प्रतिपद्यते ॥ २७
तथैवाश्वयुजं मासमेकभक्तेन यः क्षपेत् ।
प्रजावान्वाहनाढ्यश्च बहुपुत्रश्च जायते ॥ २८

कार्त्तिकं तु नरो मासं यः कुर्यादेकभोजनम् ।
शूरश्च बहुभार्यश्च कीर्तिमांश्चैव जायते ॥ २९
इति मासा नरव्याघ्र क्षपतां परिकीर्तिताः ।
तिथीनां नियमा ये तु शृणु तानपि पार्थिव ॥ ३०
पक्षे पक्षे गते यस्तु भक्तमश्नाति भारत ।
गवाढ्यो बहुपुत्रश्च दीर्घायुश्च स जायते ॥ ३१
मासि मासि त्रिरात्राणि कृत्वा वर्षाणि द्वादश ।
गणाधिपत्यं प्राप्नोति निःसपत्नमनाविलम् ॥ ३२
एते तु नियमाः सर्वे कर्तव्याः शरदो दश ।
द्वे चान्ये भरतश्रेष्ठ प्रवृत्तिमनुवर्तता ॥ ३३
यस्तु प्रातस्तथा सायं भुञ्जानो नान्तरा पिबेत् ।
अहिंसानिरतो नित्यं जुह्वानो जातवेदसम् ॥ ३४
षड्भिः स वर्षैर्नृपते सिध्यते नात्र संशयः ।
अग्निष्टोमस्य यज्ञस्य फलं प्राप्नोति मानवः ॥ ३५
अधिवासे सोऽप्सरसां नृत्यगीतविनादिते ।
तप्तकाञ्चनवर्णाभं विमानमधिरोहति ॥ ३६
पूर्णं वर्षसहस्रं तु ब्रह्मलोके महीयते ।
तत्क्षयादिह चागम्य माहात्म्यं प्रतिपद्यते ॥ ३७
यस्तु संवत्सरं पूर्णमेकाहारो भवेन्नरः ।
अतिरात्रस्य यज्ञस्य स फलं समुपाश्नुते ॥ ३८
दशवर्षसहस्राणि स्वर्गे च स महीयते ।
तत्क्षयादिह चागम्य माहात्म्यं प्रतिपद्यते ॥ ३९
यस्तु संवत्सरं पूर्णं चतुर्थं भक्तमश्नुते ।
अहिंसानिरतो नित्यं सत्यवाङ्नियतेन्द्रियः ॥ ४०
वाजपेयस्य यज्ञस्य फलं वै समुपाश्नुते ।
त्रिंशद्वर्षसहस्राणि स्वर्गे च स महीयते ॥ ४१
षष्ठे काले तु कौन्तेय नरः संवत्सरं क्षपेत् ।
अश्वमेधस्य यज्ञस्य फलं प्राप्नोति मानवः ॥ ४२
चक्रवाकप्रयुक्तेन विमानेन स गच्छति ।
चत्वारिंशत्सहस्राणि वर्षाणां दिवि मोदते ॥ ४३

अष्टमेन तु भक्तेन जीवन्संवत्सरं नृप ।
गवामयस्य यज्ञस्य फलं प्राप्नोति मानवः ॥ ४४
हंससारसयुक्तेन विमानेन स गच्छति ।
पञ्चाशतं सहस्राणि वर्षाणां दिवि मोदते ॥ ४५
पक्षे पक्षे गते राजन्योऽश्नीयाद्वर्षमेव तु ।
षण्मासानशनं तस्य भगवानङ्गिराब्रवीत् ।
षष्टिं वर्षसहस्राणि दिवमावसते च सः ॥ ४६
वीणानां वल्लकीनां च वेणूनां च विशां पते ।
सुघोषैर्मधुरैः शब्दैः सुप्तः स प्रतिबोध्यते ॥ ४७
संवत्सरमिहैकं तु मासि मासि पिबेत्पयः ।
फलं विश्वजितस्तात प्राप्नोति स नरो नृप ॥ ४८
सिंहव्याघ्रप्रयुक्तेन विमानेन स गच्छति ।
सप्ततिं च सहस्राणि वर्षाणां दिवि मोदते ॥ ४९
मासादूर्ध्वं नरव्याघ्र नोपवासो विधीयते ।
विधिं त्वनशनस्याहुः पार्थ धर्मविदो जनाः ॥ ५०
अनार्तो व्याधिरहितो गच्छेदनशनं तु यः ।
पदे पदे यज्ञफलं स प्राप्नोति न संशयः ॥ ५१
दिवं हंसप्रयुक्तेन विमानेन स गच्छति ।
शतं चाप्सरसः कन्या रमयन्त्यपि तं नरम् ॥ ५२
आर्तो वा व्याधितो वापि गच्छेदनशनं तु यः ।
शतं वर्षसहस्राणां मोदते दिवि स प्रभो ।
काञ्चीनूपुरशब्देन सुप्तश्चैव प्रबोध्यते ॥ ५३
सहस्रहंससंयुक्ते विमाने सोमवर्चसि ।
स गत्वा स्त्रीशताकीर्णे रमते भरतर्षभ ॥ ५४
क्षीणस्याप्यायनं दृष्टं क्षतस्य क्षतरोहणम् ।
व्याधितस्यौषधग्रामः क्रुद्धस्य च प्रसादनम् ॥ ५५
दुःखितस्यार्थमानाभ्यां द्रव्याणां प्रतिपादनम् ।
न चैते स्वर्गकामस्य रोचन्ते सुखमेधसः ॥ ५६
अतः स कामसंयुक्तो विमाने हेमसंनिभे ।
रमते स्त्रीशताकीर्णे पुरुषोऽलंकृतः शुभे ॥ ५७

स्वस्थः सफलसंकल्पः सुखी विगतकल्मषः ।
अनश्नन्देहमुत्सृज्य फलं प्राप्नोति मानवः ॥ ५८
बालसूर्यप्रतीकाशे विमाने हेमवर्चसि ।
वैडूर्यमुक्ताखचिते वीणामुरजनादिते ॥ ५९
पताकादीपिकाकीर्णे दिव्यघण्टानिनादिते ।
स्त्रीसहस्रानुचरिते स नरः सुखमेधते ॥ ६०
यावन्ति रोमकूपाणि तस्य गात्रेषु पाण्डव ।
तावन्त्येव सहस्राणि वर्षाणां दिवि मोदते ॥ ६१
नास्ति वेदात्परं शास्त्रं नास्ति मातृसमो गुरुः ।
न धर्मात्परमो लाभस्तपो नानशनात्परम् ॥ ६२
ब्राह्मणेभ्यः परं नास्ति पावनं दिवि चेह च ।
उपवासैस्तथा तुल्यं तपःकर्म न विद्यते ॥ ६३
उपोष्य विधिवद्देवास्त्रिदिवं प्रतिपेदिरे ।
ऋषयश्च परां सिद्धिमुपवासैरवाप्नुवन् ॥ ६४
दिव्यं वर्षसहस्रं हि विश्वामित्रेण धीमता ।
क्षान्तमेकेन भक्तेन तेन विप्रत्वमागतः ॥ ६५
च्यवनो जमदग्निश्च वसिष्ठो गौतमो भृगुः ।
सर्व एव दिवं प्राप्ताः क्षमावन्तो महर्षयः ॥ ६६
इदमङ्गिरसा पूर्वं महर्षिभ्यः प्रदर्शितम् ।
यः प्रदर्शयते नित्यं न स दुःखमवाप्नुते ॥ ६७

इमं तु कौन्तेय यथाक्रमं विधिं
प्रवर्तितं ह्यङ्गिरसा महर्षिणा ।
पठेत यो वै शृणुयाच्च नित्यदा
न विद्यते तस्य नरस्य किल्बिषम् ॥ ६८
विमुच्यते चापि स सर्वसंकरै-
र्न चास्य दोषैरभिभूयते मनः ।
वियोनिजानां च विजानते रुतं
ध्रुवां च कीर्तिं लभते नरोत्तमः ॥ ६९

इति श्रीमहाभारते अनुशासनपर्वणि
नवाधिकशततमोऽध्यायः ॥ १०९ ॥

११०

युधिष्ठिर उवाच ।

पितामहेन विधिवद्यज्ञाः प्रोक्ता महात्मना ।
गुणाश्चैषां यथातत्त्वं प्रेत्य चेह च सर्वशः ॥ १
न ते शक्या दरिद्रेण यज्ञाः प्राप्तुं पितामह ।
बहूपकरणा यज्ञा नानासंभारविस्तराः ॥ २
पार्थिवै राजपुत्रैर्वा शक्याः प्राप्तुं पितामह ।
नार्थन्यूनैरवगुणैरेकात्मभिरसंहतैः ॥ ३
यो दरिद्रैरपि विधिः शक्यः प्राप्तुं सदा भवेत् ।
तुल्यो यज्ञफलैरेतैस्तन्मे ब्रूहि पितामह ॥ ४

भीष्म उवाच ।

इदमङ्गिरसा प्रोक्तमुपवासफलात्मकम् ।
विधिं यज्ञफलैस्तुल्यं तन्निबोध युधिष्ठिर ॥ ५
यस्तु कल्यं तथा सायं भुञ्जानो नान्तरा पिबेत् ।
अहिंसानिरतो नित्यं जुह्वानो जातवेदसम् ॥ ६
षड्भिरेव तु वर्षैः स सिध्यते नात्र संशयः ।
तप्तकाञ्चनवर्णं च विमानं लभते नरः ॥ ७
देवस्त्रीणामधीवासे नृत्यगीतनिनादिते ।
प्राजापत्ये वसेत्पद्मं वर्षाणामग्निसंनिभे ॥ ८
त्रीणि वर्षाणि यः प्राशेत्सततं त्वेकभोजनम् ।
धर्मपत्नीरतो नित्यमग्निष्टोमफलं लभेत् ॥ ९
द्वितीये दिवसे यस्तु प्राश्नीयादेकभोजनम् ।
सदा द्वादशमासांस्तु जुह्वानो जातवेदसम् ।
यज्ञं बहुसुवर्णं वा वासवप्रियमाहरेत् ॥ १०
सत्यवाग्दानशीलश्च ब्रह्मण्यश्चानसूयकः ।
क्षान्तो दान्तो जितक्रोधः स गच्छति परां गतिम् ॥
पाण्डुराभ्रप्रतीकाशे विमाने हंसलक्षणे ।
द्वे समाप्ते ततः पद्मे सोऽप्सरोभिर्वसेत्सह ॥ १२
तृतीये दिवसे यस्तु प्राश्नीयादेकभोजनम् ।
सदा द्वादशमासांस्तु जुह्वानो जातवेदसम् ॥ १३

अतिरात्रस्य यज्ञस्य फलं प्राप्नोत्यनुत्तमम् ।
मयूरहंससंयुक्तं विमानं लभते नरः ॥ १४
सप्तर्षीणां सदा लोके सोऽप्सरोभिर्वसेत्सह ।
निवर्तनं च तत्रास्य त्रीणि पद्मानि वै विदुः ॥१५
दिवसे यश्चतुर्थे तु प्राश्नीयादेकभोजनम् ।
सदा द्वादशमासान्वै जुह्वानो जातवेदसम् ॥ १६
वाजपेयस्य यज्ञस्य फलं प्राप्नोत्यनुत्तमम् ।
इन्द्रकन्याभिरूढं च विमानं लभते नरः ॥ १७
सागरस्य च पर्यन्ते वासवं लोकमावसेत् ।
देवराजस्य च क्रीडां नित्यकालमवेक्षते ॥ १८
दिवसे पञ्चमे यस्तु प्राश्नीयादेकभोजनम् ।
सदा द्वादशमासांस्तु जुह्वानो जातवेदसम् ॥ १९
अलुब्धः सत्यवादी च ब्रह्मण्यश्चाविहिंसकः ।
अनसूयुरपापस्थो द्वादशाहफलं लभेत् ॥ २०
जाम्बूनदमयं दिव्यं विमानं हंसलक्षणम् ।
सूर्यमालासमाभासमारोहेत्पाण्डुरं गृहम् ॥ २१
आवर्तनानि चत्वारि तथा पद्मानि द्वादश ।
शराग्निपरिमाणं च तत्रासौ वसते सुखम् ॥ २२
दिवसे यस्तु षष्ठे वै मुनिः प्राशेत भोजनम् ।
सदा द्वादशमासान्वै जुह्वानो जातवेदसम् ॥ २३
सदा त्रिषवणस्नायी ब्रह्मचार्यनसूयकः ।
गवामयस्य यज्ञस्य फलं प्राप्नोत्यनुत्तमम् ॥ २४
अग्निज्वालासमाभासं हंसबर्हिणसेवितम् ।
शातकुम्भमयं युक्तं साधयेद्यानमुत्तमम् ॥ २५
तथैवाप्सरसामङ्के प्रसुप्तः प्रतिबुध्यते ।
नूपुराणां निनादेन मेखलानां च निस्वनैः ॥ २६
कोटीसहस्रं वर्षाणां त्रीणि कोटिशतानि च ।
पद्मान्यष्टादश तथा पताके द्वे तथैव च ॥ २७
अयुतानि च पञ्चाशदृक्षचर्मशतस्य च ।
लोम्नां प्रमाणेन समं ब्रह्मलोके महीयते ॥ २८

दिवसे सप्तमे यस्तु प्राश्नीयादेकभोजनम् ।
सदा द्वादशमासान्वै जुह्वानो जातवेदसम् ॥ २९
सरस्वतीं गोपयानो ब्रह्मचर्यं समाचरन् ।
सुमनोवर्णकं चैव मधुमांसं च वर्जयेत् ॥ ३०
पुरुषो मरुतां लोकमिन्द्रलोकं च गच्छति ।
तत्र तत्र च सिद्धार्थो देवकन्याभिरुह्यते ॥ ३१
फलं बहुसुवर्णस्य यज्ञस्य लभते नरः ।
संख्यामतिगुणां चापि तेषु लोकेषु मोदते ॥ ३२
यस्तु संवत्सरं क्षान्तो भुङ्क्तेऽहन्यष्टमे नरः ।
देवकार्यपरो नित्यं जुह्वानो जातवेदसम् ॥ ३३
पौण्डरीकस्य यज्ञस्य फलं प्राप्नोत्यनुत्तमम् ।
पद्मवर्णनिभं चैव विमानमधिरोहति ॥ ३४
कृष्णाः कनकगौर्यश्च नार्यः श्यामास्तथापराः ।
वयोरूपविलासिन्यो लभते नात्र संशयः ॥ ३५
यस्तु संवत्सरं भुङ्क्ते नवमे नवमेऽहनि ।
सदा द्वादशमासान्वै जुह्वानो जातवेदसम् ॥ ३
अश्वमेधस्य यज्ञस्य फलं प्राप्नोति मानवः ।
पुण्डरीकप्रकाशं च विमानं लभते नरः ॥ ३७
दीप्तसूर्याग्नितेजोभिर्दिव्यमालाभिरेव च ।
नीयते रुद्रकन्याभिः सोऽन्तरिक्षं सनातनम् ॥ ३
अष्टादशसहस्राणि वर्षाणां कल्पमेव च ।
कोटीशतसहस्रं च तेषु लोकेषु मोदते ॥ ३९
यस्तु संवत्सरं भुङ्क्ते दशाहे वै गते गते ।
सदा द्वादशमासान्वै जुह्वानो जातवेदसम् ॥ ४०
ब्रह्मकन्यानिवेशे च सर्वभूतमनोहरे ।
अश्वमेधसहस्रस्य फलं प्राप्नोत्यनुत्तमम् ॥ ४१
रूपवत्यश्च तं कन्या रमयन्ति सदा नरम् ।
नीलोत्पलनिभैर्वर्णै रक्तोत्पलनिभैस्तथा ॥ ४२
विमानं मण्डलावर्तमावर्तगहनावृतम् ।
सागरोर्मिप्रतीकाशं साधयेद्यानमुत्तमम् ॥ ४३

विचित्रमणिमालाभिर्नादितं शङ्खपुष्करैः ।
स्फाटिकैर्वज्रसारैश्च स्तम्भैः सुकृतवेदिकम् ॥ ४४
आरोहति महद्यानं हंससारसवाहनम् ।
एकादशे तु दिवसे यः प्राप्ते प्राशते हविः ।
सदा द्वादशमासान्वै जुह्वानो जातवेदसम् ॥ ४५
परस्त्रियो नाभिलषेद्वाचाथ मनसापि वा ।
अनृतं च न भाषेत मातापित्रोः कृतेऽपि वा ॥४६
अभिगच्छेन्महादेवं विमानस्थं महाबलम् ।
स्वयंभुवं च पश्येत विमानं समुपस्थितम् ॥ ४७
कुमार्यः काञ्चनाभासा रूपवत्यो नयन्ति तम् ।
रुद्राणां तमधीवासं दिवि दिव्यं मनोहरम् ॥ ४८
वर्षाण्यपरिमेयानि युगान्तमपि चावसेत् ।
कोटीशतसहस्रं च दश कोटिशतानि च ॥ ४९
रुद्रं नित्यं प्रणमते देवदानवसंमतम् ।
स तस्मै दर्शनं प्राप्तो दिवसे दिवसे भवेत् ॥ ५०
दिवसे द्वादशे यस्तु प्राप्ते वै प्राशते हविः ।
सदा द्वादशमासान्वै सर्वमेधफलं लभेत् ॥ ५१
आदित्यैर्द्वादशैस्तस्य विमानं संविधीयते ।
मणिमुक्ताप्रवालैश्च महार्हैरुपशोभितम् ॥ ५२
हंसमालापरिक्षिप्तं नागवीथीसमाकुलम् ।
मयूरैश्चक्रवाकैश्च कूजद्भिरुपशोभितम् ॥ ५३
अट्टैर्महद्भिः संयुक्तं ब्रह्मलोके प्रतिष्ठितम् ।
नित्यमावसते राजन्नरनारीसमावृतम् ।
ऋषिरेवं महाभागस्त्वङ्गिराः प्राह धर्मवित् ॥ ५४
त्रयोदशे तु दिवसे यः प्राप्ते प्राशते हविः ।
सदा द्वादश मासान्वै देवसत्रफलं लभेत् ॥ ५५
रक्तपद्मोदयं नाम विमानं साधयेन्नरः ।
जातरूपप्रयुक्तं च रत्नसंचयभूषितम् ॥ ५६
देवकन्याभिराकीर्णं दिव्याभरणभूषितम् ।
पुण्यगन्धोदयं दिव्यं वायव्यैरुपशोभितम् ॥ ५७
तत्र शङ्कुपताकं च युगान्तं कल्पमेव च ।
अयुतायुतं तथा पद्मं समुद्रं च तथा वसेत् ॥ ५८
गीतगन्धर्वघोषैश्च भेरीपणवनिस्वनैः ।
सदा प्रमुदितस्ताभिर्देवकन्याभिरीड्यते ॥ ५९
चतुर्दशे तु दिवसे यः पूर्णे प्राशते हविः ।
सदा द्वादश मासान्वै महामेधफलं लभेत् ॥ ६०
अनिर्देश्यवयोरूपा देवकन्याः स्वलंकृताः ।
मृष्टतप्ताङ्गदधरा विमानैरनुयान्ति तम् ॥ ६१
कलहंसविनिर्घोषैर्नूपुराणां च निस्वनैः ।
काञ्चीनां च समुत्कर्षैस्तत्र तत्र विबोध्यते ॥ ६२
देवकन्यानिवासे च तस्मिन्वसति मानवः ।
जाह्नवीवालुकाकीर्णे पूर्णं संवत्सरं नरः ॥ ६३
यस्तु पक्षे गते भुङ्क्ते एकभक्तं जितेन्द्रियः ।
सदा द्वादश मासांस्तु जुह्वानो जातवेदसम् ।
राजसूयसहस्रस्य फलं प्राप्नोत्यनुत्तमम् ॥ ६४
यानमारोहते नित्यं हंसबर्हिणसेवितम् ।
मणिमण्डलकैश्चित्रं जातरूपसमावृतम् ॥ ६५
दिव्याभरणशोभाभिर्वरस्त्रीभिरलंकृतम् ।
एकस्तम्भं चतुर्द्वारं सप्तभौमं सुमङ्गलम् ।
वैजयन्तीसहस्रैश्च शोभितं गीतनिस्वनैः ॥ ६६
दिव्यं दिव्यगुणोपेतं विमानमधिरोहति ।
मणिमुक्ताप्रवालैश्च भूषितं वैद्युतप्रभम् ।
वसेद्युगसहस्रं च खड्गकुञ्जरवाहनः ॥ ६७
षोडशे दिवसे यस्तु संप्राप्ते प्राशते हविः ।
सदा द्वादश मासान्वै सोमयज्ञफलं लभेत् ॥ ६८
सोमकन्यानिवासेषु सोऽध्यावसति नित्यदा ।
सौम्यगन्धानुलिप्तश्च कामचारगतिर्भवेत् ॥ ६९
सुदर्शनाभिर्नारीभिर्मधुराभिस्तथैव च ।
अर्च्यते वै विमानस्थः कामभोगैश्च सेव्यते ॥ ७०
फलं पद्मशतप्रख्यं महाकल्पं दशाधिकम् ।

आवर्तनानि चत्वारि सागरे यात्यसौ नरः ॥ ७१
दिवसे सप्तदशमे यः प्राप्ते प्राशते हविः ।
सदा द्वादश मासान्वै जुह्वानो जातवेदसम् ॥ ७२
स्थानं वारुणमैन्द्रं च रौद्रं चैवाधिगच्छति ।
मारुतौशनसे चैव ब्रह्मलोकं च गच्छति ॥ ७३
तत्र दैवतकन्याभिरासनेनोपचर्यते ।
भूर्भुवं चापि देवर्षिं विश्वरूपमवेक्षते ॥ ७४
तत्र देवाधिदेवस्य कुमार्यो रमयन्ति तम् ।
द्वात्रिंशद्रूपधारिण्यो मधुराः समलंकृताः ॥ ७५
चन्द्रादित्यावुभौ यावद्गगने चरतः प्रभो ।
तावच्चरत्यसौ वीरः सुधामृतरसाशनः ॥ ७६
अष्टादशे तु दिवसे प्राश्नीयादेकभोजनम् ।
सदा द्वादश मासान्वै सप्त लोकान्स पश्यति ॥७७
रथैः सनन्दिघोषैश्च पृष्ठतः सोऽनुगम्यते ।
देवकन्याधिरूढैस्तु भ्राजमानैः स्वलंकृतैः ॥ ७८
व्याघ्रसिंहप्रयुक्तं च मेघस्वननिनादितम् ।
विमानमुत्तमं दिव्यं सुसुखी ह्यधिरोहति ॥ ७९
तत्र कल्पसहस्रं स कान्ताभिः सह मोदते ।
सुधारसं च भुञ्जीत अमृतोपममुत्तमम् ॥ ८०
एकोनविंशे दिवसे यो भुङ्क्ते एकभोजनम् ।
सदा द्वादश मासान्वै सप्त लोकान्स पश्यति ॥८१
उत्तमं लभते स्थानमप्सरोगणसेवितम् ।
गन्धर्वैरुपगीतं च विमानं सूर्यवर्चसम् ॥ ८२
तत्रामरवरस्त्रीभिर्मोदते विगतज्वरः ।
दिव्याम्बरधरः श्रीमानयुतानां शतं समाः ॥ ८३
पूर्णेऽथ दिवसे विंशे यो भुङ्क्ते ह्येकभोजनम् ।
सदा द्वादश मासांस्तु सत्यवादी धृतव्रतः ॥ ८४
अमांसाशी ब्रह्मचारी सर्वभूतहिते रतः ।
स लोकान्विपुलान्दिव्यानादित्यानामुपाश्नुते ॥ ८५
गन्धर्वैरप्सरोभिश्च दिव्यमाल्यानुलेपनैः ।
विमानैः काञ्चनैर्दिव्यैः पृष्ठतश्चानुगम्यते ॥ ८६
एकविंशे तु दिवसे यो भुङ्क्ते ह्येकभोजनम् ।
सदा द्वादश मासान्वै जुह्वानो जातवेदसम् ॥ ८७
लोकमौशनसं दिव्यं शक्रलोकं च गच्छति ।
अश्विनोर्मरुतां चैव सुखेष्वभिरतः सदा ॥ ८८
अनभिज्ञश्च दुःखानां विमानवरमास्थितः ।
सेव्यमानो वरस्त्रीभिः क्रीडत्यमरवत्प्रभुः ॥ ८९
द्वाविंशे दिवसे प्राप्ते यो भुङ्क्ते ह्येकभोजनम् ।
सदा द्वादश मासान्वै जुह्वानो जातवेदसम् ॥ ९०
धृतिमानहिंसानिरतः सत्यवागनसूयकः ।
लोकान्वसूनामाप्नोति दिवाकरसमप्रभः ॥ ९१
कामचारी सुधाहारो विमानवरमास्थितः ।
रमते देवकन्याभिर्दिव्याभरणभूषितः ॥ ९२
त्रयोविंशे तु दिवसे प्राशेद्यस्त्वेकभोजनम् ।
सदा द्वादश मासांस्तु मिताहारो जितेन्द्रियः ॥९३
वायोरुशनसश्चैव रुद्रलोकं च गच्छति ।
कामचारी कामगमः पूज्यमानोऽप्सरोगणैः ॥ ९४
अनेकगुणपर्यन्तं विमानवरमास्थितः ।
रमते देवकन्याभिर्दिव्याभरणभूषितः ॥ ९५
चतुर्विंशे तु दिवसे यः प्राशेदेकभोजनम् ।
सदा द्वादश मासान्वै जुह्वानो जातवेदसम् ॥ ९६
आदित्यानामधीवासे मोदमानो वसेच्चिरम् ।
दिव्यमाल्याम्बरधरो दिव्यगन्धानुलेपनः ॥ ९७
विमाने काञ्चने दिव्ये हंसयुक्ते मनोरमे ।
रमते देवकन्यानां सहस्रैरयुतैस्तथा ॥ ९८
पञ्चविंशे तु दिवसे यः प्राशेदेकभोजनम् ।
सदा द्वादश मासांस्तु पुष्कलं यानमारुहेत् ॥ ९९
सिंहव्याघ्रप्रयुक्तैश्च मेघस्वननिनादितैः ।
रथैः सनन्दिघोषैश्च पृष्ठतः सोऽनुगम्यते ॥ १००
देवकन्यासमारूढैः राजतैर्विमलैः-शुभैः ।

विमानमुत्तमं दिव्यमास्थाय सुमनोहरम् ॥ १०१
तत्र कल्पसहस्रं वै वसते स्त्रीशतावृते ।
सुधारसं चोपजीवन्नमृतोपममुत्तमम् ॥ १०२
षड्विंशे दिवसे यस्तु प्राश्नीयादेकभोजनम् ।
सदा द्वादश मासांस्तु नियतो नियताशनः ॥१०३
जितेन्द्रियो वीतरागो जुह्वानो जातवेदसम् ।
स प्राप्नोति महाभागः पूज्यमानोऽप्सरोगणैः ॥
सप्तानां मरुतां लोकान्वसूनां चापि सोऽश्नुते ।
विमाने स्फाटिके दिव्ये सर्वरत्नैरलंकृते ॥ १०५
गन्धर्वैरप्सरोभिश्च पूज्यमानः प्रमोदते ।
द्वे युगानां सहस्रे तु दिव्ये दिव्येन तेजसा ॥१०६
सप्तविंशे तु दिवसे यः प्राशेदेकभोजनम् ।
सदा द्वादश मासांस्तु जुह्वानो जातवेदसम् ॥१०७
फलं प्राप्नोति विपुलं देवलोके च पूज्यते ।
अमृताशी वसंस्तत्र स वितृप्तः प्रमोदते ॥ १०८
देवर्षिचरितं राजन्राजर्षिभिरधिष्ठितम् ।
अध्यावसति दिव्यात्मा विमानवरमास्थितः ॥१०९
स्त्रीभिर्मनोभिरामाभी रममाणो मदोत्कटः ।
युगकल्पसहस्राणि त्रीण्यावसति वै सुखम् ॥११०
योऽष्टाविंशे तु दिवसे प्राश्नीयादेकभोजनम् ।
सदा द्वादश मासांस्तु जितात्मा विजितेन्द्रियः ॥
फलं देवर्षिचरितं विपुलं समुपाश्नुते ।
भोगवांस्तेजसा भाति सहस्रांशुरिवामलः ॥ ११२
सुकुमार्यश्च नार्यस्तं रममाणाः सुवर्चसः ।
पीनस्तनोरुजघना दिव्याभरणभूषिताः ॥ ११३
रमयन्ति मनः कान्ता विमाने सूर्यसंनिभे ।
सर्वकामगमे दिव्ये कल्पायुतशतं समाः ॥ ११४
एकोनत्रिंशे दिवसे यः प्राशेदेकभोजनम् ।
सदा द्वादश मासान्वै सत्यव्रतपरायणः ॥ ११५
तस्य लोकाः शुभा दिव्या देवराजर्षिपूजिताः ।
विमानं चन्द्रशुभ्राभं दिव्यं समधिगच्छति ॥११६
जातरूपमयं युक्तं सर्वरत्नविभूषितम् ।
अप्सरोगणसंपूर्णं गन्धर्वैरभिनादितम् ॥ ११७
तत्र चैनं शुभा नार्यो दिव्याभरणभूषिताः ।
मनोभिरामा मधुरा रमयन्ति मदोत्कटाः ॥ ११८
भोगवांस्तेजसा युक्तो वैश्वानरसमप्रभः ।
दिव्यो दिव्येन वपुषा भ्राजमान इवामरः ॥११९
वसूनां मरुतां चैव साध्यानामश्विनोस्तथा ।
रुद्राणां च तथा लोकान्ब्रह्मलोकं च गच्छति ॥
यस्तु मासे गते भुङ्क्ते एकभक्तं शमात्मकः ।
सदा द्वादश मासान्वै ब्रह्मलोकमवाप्नुयात् ॥ १२१
सुधारसकृताहारः श्रीमान्सर्वमनोहरः ।
तेजसा वपुषा लक्ष्म्या भ्राजते रश्मिवानिव ॥१२२
दिव्यमाल्याम्बरधरो दिव्यगन्धानुलेपनः ।
सुखेष्वभिरतो योगी दुःखानामविजानकः ॥१२३
स्वयंप्रभाभिर्नारीभिर्विमानस्थो महीयते ।
रुद्रदेवर्षिकन्याभिः सततं चाभिपूज्यते ॥ १२४
नानाविधसुरूपाभिर्नानारागाभिरेव च ।
नानामधुरभाषाभिर्नानारतिभिरेव च ॥ १२५
विमाने नगराकारे सूर्यवत्सूर्यसंनिभे ।
पृष्ठतः सोमसंकाशे उदक्चैवाभ्रसंनिभे ॥ १२६
दक्षिणायां तु रक्ताभे अधस्तान्नीलमण्डले ।
ऊर्ध्वं चित्राभिसंकाशे नैको वसति पूजितः ॥१२७
यावद्वर्षसहस्रं तु जम्बूद्वीपे प्रवर्षति ।
तावत्संवत्सराः प्रोक्ता ब्रह्मलोकस्य धीमतः ॥१२८
विप्रुषश्चैव यावन्त्यो निपतन्ति नभस्तलात् ।
वर्षासु वर्षतस्तावन्निवसत्यमरप्रभः ॥ १२९
मासोपवासी वर्षैस्तु दशभिः स्वर्गमुत्तमम् ।
महर्षित्वमथासाद्य सशरीरगतिर्भवेत् ॥ १३०
मुनिर्दान्तो जितक्रोधो जितशिश्नोदरः सदा ।

जुह्वन्नग्नींश्च नियतः संध्योपासनसेविता ॥ १३१
बहुभिर्नियमैरेवं मासानश्नाति यो नरः ।
अभ्रावकाशशीलश्च तस्य वासो निरुच्यते ॥ १३२
दिवं गत्वा शरीरेण स्वेन राजन्यथामरः ।
स्वर्गं पुण्यं यथाकाममुपभुङ्क्ते यथाविधि ॥ १३३
एष ते भरतश्रेष्ठ यज्ञानां विधिरुत्तमः ।
व्याख्यातो ह्यानुपूर्व्येण उपवासफलात्मकः ॥१३४
दरिद्रैर्मनुजैः पार्थ प्राप्यं यज्ञफलं यथा ।
उपवासमिमं कृत्वा गच्छेच्च परमां गतिम् ।
देवद्विजातिपूजायां रतो भरतसत्तम ॥ १३५
उपवासविधिस्त्वेष विस्तरेण प्रकीर्तितः ।
नियतेष्वप्रमत्तेषु शौचवत्सु महात्मसु ॥ १३६
दम्भद्रोहनिवृत्तेषु कृतबुद्धिषु भारत ।
अचलेष्वप्रकम्पेषु मा ते भूदत्र संशयः ॥ १३७

इति श्रीमहाभारते अनुशासनपर्वणि
दशाधिकशततमोऽध्यायः ॥ ११० ॥

१११

युधिष्ठिर उवाच ।

यद्वरं सर्वतीर्थानां तद्ब्रवीहि पितामह ।
यत्र वै परमं शौचं तन्मे व्याख्यातुमर्हसि ॥ १

भीष्म उवाच ।

सर्वाणि खलु तीर्थानि गुणवन्ति मनीषिणाम् ।
यत्तु तीर्थं च शौचं च तन्मे शृणु समाहितः ॥ २
अगाधे विमले शुद्धे सत्यतोये धृतिह्रदे ।
स्नातव्यं मानसे तीर्थे सत्त्वमालम्ब्य शाश्वतम् ॥३
तीर्थशौचमनर्थित्वमार्दवं सत्यमार्जवम् ।
अहिंसा सर्वभूतानामानृशंस्यं दमः शमः ॥ ४
निर्ममा निरहंकारा निर्द्वंद्वा निष्परिग्रहाः ।
शुचयस्तीर्थभूतास्ते ये भैक्षमुपभुञ्जते ॥ ५
तत्त्ववित्त्वनहंबुद्धिस्तीर्थं परममुच्यते ।
शौचलक्षणमेतत्ते सर्वत्रैवान्ववेक्षणम् ॥ ६
रजस्तमः सत्त्वमथो येषां निर्धौतमात्मनः ।
शौचाशौचे न ते सक्ताः स्वकार्यपरिमार्गिणः ॥ ७
सर्वत्यागेष्वभिरताः सर्वज्ञाः सर्वदर्शिनः ।
शौचेन वृत्तशौचार्थास्ते तीर्थाः शुचयश्च ते ॥ ८
नोदकक्लिन्नगात्रस्तु स्नात इत्यभिधीयते ।
स स्नातो यो दमस्नातः सबाह्याभ्यन्तरः शुचिः ॥९
अतीतेष्वनपेक्षा ये प्राप्तेष्वर्थेषु निर्ममाः ।
शौचमेव परं तेषां येषां नोत्पद्यते स्पृहा ॥ १०
प्रज्ञानं शौचमेवेह शरीरस्य विशेषतः ।
तथा निष्किंचनत्वं च मनसश्च प्रसन्नता ॥ ११
वृत्तशौचं मनःशौचं तीर्थशौचं परं हितम् ।
ज्ञानोत्पन्नं च यच्छौचं तच्छौचं परमं मतम् ॥१२
मनसाथ प्रदीपेन ब्रह्मज्ञानबलेन च ।
स्नाता ये मानसे तीर्थे तज्ज्ञाः क्षेत्रज्ञदर्शिनः ॥१३
समारोपितशौचस्तु नित्यं भावसमन्वितः ।
केवलं गुणसंपन्नः शुचिरेव नरः सदा ॥ १४
शरीरस्थानि तीर्थानि प्रोक्तान्येतानि भारत ।
पृथिव्यां यानि तीर्थानि पुण्यानि शृणु तान्यपि ॥
यथा शरीरस्योद्देशाः शुचयः परिनिर्मिताः ।
तथा पृथिव्या भागाश्च पुण्यानि सलिलानि च ॥१६
प्रार्थनाच्चैव तीर्थस्य स्नानाच्च पितृतर्पणात् ।
धुनन्ति पापं तीर्थेषु पूता यान्ति दिवं सुखम् ॥१७
परिग्रहाच्च साधूनां पृथिव्याश्चैव तेजसा ।
अतीव पुण्यास्ते भागाः सलिलस्य च तेजसा ॥ १८
मनसश्च पृथिव्याश्च पुण्यतीर्थास्तथापरे ।
उभयोरेव यः स्नातः स सिद्धिं शीघ्रमाप्नुयात् ॥
यथा बलं क्रियाहीनं क्रिया वा बलवर्जिता ।
नेह साधयते कार्यं समायुक्तस्तु सिध्यति ॥ २०
एवं शरीरशौचेन तीर्थशौचेन चान्वितः ।

ततः सिद्धिमवाप्नोति द्विविधं शौचमुत्तमम् ॥ २१

इति श्रीमहाभारते अनुशासनपर्वणि
एकादशाधिकशततमोऽध्यायः ॥ १११ ॥

११२

युधिष्ठिर उवाच ।

पितामह महाबाहो सर्वशास्त्रविशारद ।
श्रोतुमिच्छामि मर्त्यानां संसारविधिमुत्तमम् ॥ १
केन वृत्तेन राजेन्द्र वर्तमाना नरा भुवि ।
प्राप्नुवन्त्युत्तमं स्वर्गं कथं च नरकं नृप ॥ २
मृतं शरीरमुत्सृज्य काष्ठलोष्टसमं जनाः ।
प्रयान्त्यमुं लोकमितः को वैताननुगच्छति ॥ ३

भीष्म उवाच ।

असावायाति भगवान्बृहस्पतिरुदारधीः ।
पृच्छैनं सुमहाभागमेतद्गुह्यं सनातनम् ॥ ४
नैतदन्येन शक्यं हि वक्तुं केनचिदद्य वै ।
वक्ता बृहस्पतिसमो न ह्यन्यो विद्यते क्वचित् ॥ ५

वैशंपायन उवाच ।

तयोः संवदतोरेवं पार्थगाङ्गेययोस्तदा ।
आजगाम विशुद्धात्मा भगवान्स बृहस्पतिः ॥ ६
ततो राजा समुत्थाय धृतराष्ट्रपुरोगमः ।
पूजामनुपमां चक्रे सर्वे ते च सभासदः ॥ ७
ततो धर्मसुतो राजा भगवन्तं बृहस्पतिम् ।
उपगम्य यथान्यायं प्रश्नं पप्रच्छ सुव्रतः ॥ ८

युधिष्ठिर उवाच ।

भगवन्सर्वधर्मज्ञ सर्वशास्त्रविशारद ।
मर्त्यस्य कः सहायो वै पिता माता सुतो गुरुः ॥
मृतं शरीरमुत्सृज्य काष्ठलोष्टसमं जनाः ।
गच्छन्त्यमुत्रलोकं वै क एनमनुगच्छति ॥ १०

बृहस्पतिरुवाच ।

एकः प्रसूतो राजेन्द्र जन्तुरेको विनश्यति ।
एकस्तरति दुर्गाणि गच्छत्येकश्च दुर्गतिम् ॥ ११
असहायः पिता माता तथा भ्राता सुतो गुरुः ।
ज्ञातिसंबन्धिवर्गश्च मित्रवर्गस्तथैव च ॥ १२
मृतं शरीरमुत्सृज्य काष्ठलोष्टसमं जनाः ।
मुहूर्तमुपतिष्ठन्ति ततो यान्ति पराङ्मुखाः ।
तैस्तच्छरीरमुत्सृष्टं धर्म एकोऽनुगच्छति ॥ १३
तस्माद्धर्मः सहायार्थे सेवितव्यः सदा नृभिः ।
प्राणी धर्मसमायुक्तो गच्छते स्वर्गतिं पराम् ।
तथैवाधर्मसंयुक्तो नरकायोपपद्यते ॥ १४
तस्मान्न्यायागतैरर्थैर्धर्मं सेवेत पण्डितः ।
धर्म एको मनुष्याणां सहायः पारलौकिकः ॥ १५
लोभान्मोहादनुक्रोशाद्भयाद्वाप्यबहुश्रुतः ।
नरः करोत्यकार्याणि परार्थे लोभमोहितः ॥ १६
धर्मश्चार्थश्च कामश्च त्रितयं जीविते फलम् ।
एतत्त्रयमवाप्तव्यमधर्मपरिवर्जितम् ॥ १७

युधिष्ठिर उवाच ।

श्रुतं भगवतो वाक्यं धर्मयुक्तं परं हितम् ।
शरीरविचयं ज्ञातुं बुद्धिस्तु मम जायते ॥ १८
मृतं शरीरहितं सूक्ष्ममव्यक्ततां गतम् ।
अचक्षुर्विषयं प्राप्तं कथं धर्मोऽनुगच्छति ॥ १९

बृहस्पतिरुवाच ।

पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमम् ।
बुद्धिरात्मा च सहिता धर्मं पश्यन्ति नित्यदा ॥२०
प्राणिनामिह सर्वेषां साक्षिभूतानि चानिशम् ।
एतैश्च सह धर्मोऽपि तं जीवमनुगच्छति ॥ २१
त्वगस्थिमांसं शुक्रं च शोणितं च महामते ।
शरीरं वर्जयन्त्येते जीवितेन विवर्जितम् ॥ २२
ततो धर्मसमायुक्तः स जीवः सुखमेधते ।
इह लोके परे चैव किं भूयः कथयामि ते ॥ २३

युधिष्ठिर उवाच ।

अनुदर्शितं भगवता यथा धर्मोऽनुगच्छति ।
एतत्तु ज्ञातुमिच्छामि कथं रेतः प्रवर्तते ॥ २४

बृहस्पतिरुवाच ।

अन्नमश्नन्ति ये देवाः शरीरस्था नरेश्वर ।
पृथिवी वायुराकाशमापो ज्योतिर्मनस्तथा ॥ २५
ततस्तृप्तेषु राजेन्द्र तेषु भूतेषु पञ्चसु ।
मनःषष्ठेषु शुद्धात्मन्रेतः संपद्यते महत् ॥ २६
ततो गर्भः संभवति स्त्रीपुंसोः पार्थ संगमे ।
एतत्ते सर्वमाख्यातं किं भूयः श्रोतुमिच्छसि ॥२७

युधिष्ठिर उवाच ।

आख्यातमेतद्भवता गर्भः संजायते यथा ।
यथा जातस्तु पुरुषः प्रपद्यति तदुच्यताम् ॥ २८

बृहस्पतिरुवाच ।

आसन्नमात्रः सततं तैर्भूतैरभिभूयते ।
विप्रमुक्तश्च तैर्भूतैः पुनर्यात्यपरां गतिम् ।
स तु भूतसमायुक्तः प्राप्नुते जीव एव ह ॥ २९
ततोऽस्य कर्म पश्यन्ति शुभं वा यदि वाशुभम् ।
देवताः पञ्चभूतस्थाः किं भूयः श्रोतुमिच्छसि ॥३०

युधिष्ठिर उवाच ।

त्वगस्थिमांसमुत्सृज्य तैश्च भूतैर्विवर्जितः ।
जीवः स भगवन्कस्थः सुखदुःखे समश्नुते ॥ ३१

बृहस्पतिरुवाच ।

जीवो धर्मसमायुक्तः शीघ्रं रेतस्त्वमागतः ।
स्त्रीणां पुष्पं समासाद्य सूते कालेन भारत ॥ ३२
यमस्य पुरुषैः क्लेशं यमस्य पुरुषैर्वधम् ।
दुःखं संसारचक्रं च नरः क्लेशं च विन्दति ॥ ३३
इहलोके च स प्राणी जन्मप्रभृति पार्थिव ।
स्वकृतं कर्म वै भुङ्क्ते धर्मस्य फलमाश्रितः ॥ ३४
यदि धर्मं यथाशक्ति जन्मप्रभृति सेवते ।
ततः स पुरुषो भूत्वा सेवते नित्यदा सुखम् ॥३५
अथान्तरा तु धर्मस्य अधर्ममुपसेवते ।
सुखस्यानन्तरं दुःखं स जीवोऽप्यधिगच्छति ॥३६
अधर्मेण समायुक्तो यमस्य विषयं गतः ।
महद्दुःखं समासाद्य तिर्यग्योनौ प्रजायते ॥ ३७
कर्मणा येन येनेह यस्यां योनौ प्रजायते ।
जीवो मोहसमायुक्तस्तन्मे निगदतः शृणु ॥ ३८
यदेतदुच्यते शास्त्रे सेतिहासे सच्छन्दसि ।
यमस्य विषयं घोरं मर्त्यो लोकः प्रपद्यते ॥ ३९
अधीत्य चतुरो वेदान्द्विजो मोहसमन्वितः ।
पतितात्प्रतिगृह्याथ खरयोनौ प्रजायते ॥ ४०
खरो जीवति वर्षाणि दश पञ्च च भारत ।
खरो मृतो बलीवर्दः सप्त वर्षाणि जीवति ॥ ४१
बलीवर्दो मृतश्चापि जायते ब्रह्मराक्षसः ।
ब्रह्मरक्षस्तु त्रीन्मासांस्ततो जायति ब्राह्मणः ॥ ४२
पतितं याजयित्वा तु कृमियोनौ प्रजायते ।
तत्र जीवति वर्षाणि दश पञ्च च भारत ॥ ४३
कृमिभावात्प्रमुक्तस्तु ततो जायति गर्दभः ।
गर्दभः पञ्च वर्षाणि पञ्च वर्षाणि सूकरः ।
श्वा वर्षमेकं भवति ततो जायति मानवः ॥ ४४
उपाध्यायस्य यः पापं शिष्यः कुर्यादबुद्धिमान् ।
स जीव इह संसारांस्त्रीनाप्नोति न संशयः ॥ ४५
प्राक्श्वा भवति राजेन्द्र ततः क्रव्यात्ततः खरः ।
ततः प्रेतः परिक्लिष्टः पश्चाज्जायति ब्राह्मणः ॥ ४६
मनसापि गुरोर्भार्यां यः शिष्यो याति पापकृत् ।
सोऽधमान्याति संसारानधर्मेणेह चेतसा ॥ ४७
श्वयोनौ तु स संभूतस्त्रीणि वर्षाणि जीवति ।
तत्रापि निधनं प्राप्तः कृमियोनौ प्रजायते ॥ ४८
कृमिभावमनुप्राप्तो वर्षमेकं स जीवति ।

ततस्तु निधनं प्राप्य ब्रह्मयोनौ प्रजायते ॥ ४९
यदि पुत्रसमं शिष्यं गुरुर्हन्यादकारणे ।
आत्मनः कामकारेण सोऽपि हंसः प्रजायते ॥ ५०
पितरं मातरं वापि यस्तु पुत्रोऽवमन्यते ।
सोऽपि राजन्मृतो जन्तुः पूर्वं जायति गर्दभः ॥ ५१
खरो जीवति मासांस्तु दश श्वा च चतुर्दश ।
बिडालः सप्त मासांस्तु ततो जायति मानवः ॥ ५२
मातापितरमाक्रुश्य सारिकः संप्रजायते ।
ताडयित्वा तु तावेव जायते कच्छपो नृप ॥ ५३
कच्छपो दश वर्षाणि त्रीणि वर्षाणि शल्यकः ।
व्यालो भूत्वा तु षण्मासांस्ततो जायति मानुषः ॥
भर्तृपिण्डमुपाश्नन्यो राजद्विष्टानि सेवते ।
सोऽपि मोहसमापन्नो मृतो जायति वानरः ॥ ५५
वानरो दश वर्षाणि त्रीणि वर्षाणि मूषकः ।
श्वा भूत्वा चाथ षण्मासांस्ततो जायति मानुषः ॥
न्यासापहर्ता तु नरो यमस्य विषयं गतः ।
संसाराणां शतं गत्वा कृमियोनौ प्रजायते ॥ ५७
तत्र जीवति वर्षाणि दश पञ्च च भारत ।
दुष्कृतस्य क्षयं गत्वा ततो जायति मानुषः ॥ ५८
असूयको नरश्चापि मृतो जायति शार्ङ्गकः ।
विश्वासहर्ता तु नरो मीनो जायति दुर्मतिः ॥ ५९
भूत्वा मीनोऽष्ट वर्षाणि मृगो जायति भारत ।
मृगस्तु चतुरो मासांस्ततश्छागः प्रजायते ॥ ६०
छागस्तु निधनं प्राप्य पूर्णे संवत्सरे ततः ।
कीटः संजायते जन्तुस्ततो जायति मानुषः ॥ ६१
धान्यान्यवांस्तिलान्माषान्कुलत्थान्सर्षपांश्चणान् ।
कलायानथ मुद्गांश्च गोधूमानतसीस्तथा ॥ ६२
सस्यस्यान्यस्य हर्ता च मोहाज्जन्तुरचेतनः ।
स जायते महाराज मूषको निरपत्रपः ॥ ६३
ततः प्रेत्य महाराज पुनर्जायति सूकरः ।
सूकरो जातमात्रस्तु रोगेण म्रियते नृप ॥ ६४
श्वा ततो जायते मूढः कर्मणा तेन पार्थिव ।
श्वा भूत्वा पञ्च वर्षाणि ततो जायति मानुषः ॥
परदाराभिमर्शं तु कृत्वा जायति वै वृकः ।
श्वा सृगालस्ततो गृध्रो व्यालः कङ्को बकस्तथा ॥
भ्रातुर्भार्यां तु दुर्बुद्धिर्यो धर्षयति मोहितः ।
पुंस्कोकिलत्वमाप्नोति सोऽपि संवत्सरं नृप ॥ ६७
सखिभार्यां गुरोर्भार्यां राजभार्यां तथैव च ।
प्रधर्षयित्वा कामात्तो मृतो जायति सूकरः ॥ ६८
सूकरः पञ्च वर्षाणि पञ्च वर्षाणि श्वाविधः ।
पिपीलकस्तु षण्मासान्कीटः स्यान्मासमेव च ।
एतानासाद्य संसारान्कृमियोनौ प्रजायते ॥ ६९
तत्र जीवति मासांस्तु कृमियोनौ त्रयोदश ।
ततोऽधर्मक्षयं कृत्वा पुनर्जायति मानुषः ॥ ७०
उपस्थिते विवाहे तु दाने यज्ञेऽपि वाभिभो ।
मोहात्करोति यो विघ्नं स मृतो जायते कृमिः ॥
कृमिर्जीवति वर्षाणि दश पञ्च च भारत ।
अधर्मस्य क्षयं कृत्वा ततो जायति मानुषः ॥ ७२
पूर्वं दत्त्वा तु यः कन्यां द्वितीये संप्रयच्छति ।
सोऽपि राजन्मृतो जन्तुः कृमियोनौ प्रजायते ॥ ७३
तत्र जीवति वर्षाणि त्रयोदश युधिष्ठिर ।
अधर्मसंक्षये युक्तस्ततो जायति मानुषः ॥ ७४
देवकार्यमुपाकृत्य पितृकार्यमथापि च ।
अनिर्वाप्य समश्नन्वै ततो जायति वायसः ॥ ७५
वायसो दश वर्षाणि ततो जायति कुक्कुटः ।
जायते लवकश्चापि मासं तस्मात्तु मानुषः ॥ ७६
ज्येष्ठं पितृसमं चापि भ्रातरं योऽवमन्यते ।
सोऽपि मृत्युमुपागम्य क्रौञ्चयोनौ प्रजायते ॥ ७७
क्रौञ्चो जीवति मासांस्तु दश द्वौ सप्त पञ्च च ।
ततो निधनमापन्नो मानुषत्वमुपाश्नुते ॥ ७८

वृषलो ब्राह्मणीं गत्वा कृमियोनौ प्रजायते ।
तत्रापत्यं समुत्पाद्य ततो जायति मूषकः ॥ ७९
कृतघ्नस्तु मृतो राजन्यमस्य विषयं गतः ।
यमस्य विषये क्रुद्धैर्वधं प्राप्नोति दारुणम् ॥ ८०
पट्टिसं मुद्गरं शूलमग्निकुम्भं च दारुणम् ।
असिपत्रवनं घोरं वालुकां कूटशाल्मलीम् ॥ ८१
एताश्चान्याश्च बह्वीः स यमस्य विषयं गतः ।
यातनाः प्राप्य तत्रोग्रास्ततो वध्यति भारत ॥ ८२
संसारचक्रमासाद्य कृमियोनौ प्रजायते ।
कृमिर्भवति वर्षाणि दश पञ्च च भारत ।
ततो गर्भं समासाद्य तत्रैव म्रियते शिशुः ॥ ८३
ततो गर्भशतैर्जन्तुर्बहुभिः संप्रजायते ।
संसारांश्च बहून्गत्वा ततस्तिर्यक्प्रजायते ॥ ८४
मृतो दुःखमनुप्राप्य बहुवर्षगणानिह ।
अपुनर्भावसंयुक्तस्ततः कूर्मः प्रजायते ॥ ८५
अशस्त्रं पुरुषं हत्वा सशस्त्रः पुरुषाधमः ।
अर्थार्थी यदि वा वैरी स मृतो जायते खरः ॥८६
खरो जीवति वर्षे द्वे ततः शस्त्रेण वध्यते ।
स मृतो मृगयोनौ तु नित्योद्विग्नोऽभिजायते ॥ ८७
मृगो वध्यति शस्त्रेण गते संवत्सरे तु सः ।
हतो मृगस्ततो मीनः सोऽपि जालेन बध्यते ॥८८
मासे चतुर्थे संप्राप्ते श्वापदः संप्रजायते ।
श्वापदो दश वर्षाणि द्वीपी वर्षाणि पञ्च च ॥८९
ततस्तु निधनं प्राप्तः कालपर्यायचोदितः ।
अधर्मस्य क्षयं कृत्वा ततो जायति मानुषः ॥९०
स्त्रियं हत्वा तु दुर्बुद्धिर्यमस्य विषयं गतः ।
बहून्क्लेशान्समासाद्य संसारांश्चैव विंशतिम् ॥ ९१
ततः पश्चान्महाराज कृमियोनौ प्रजायते ।
कृमिर्विंशतिवर्षाणि भूत्वा जायति मानुषः ॥ ९२
भोजनं चोरयित्वा तु मक्षिका जायते नरः ।
मक्षिकासंघवशगो बहून्मासान्भवत्युत ।
ततः पापक्षयं कृत्वा मानुषत्वमवाप्नुते ॥ ९३
वाद्यं हृत्वा तु पुरुषो मशकः संप्रजायते ।
तथा पिण्यालसंमिश्रमशनं चोरयेन्नरः ।
स जायते बभ्रुसमो दारुणो मूषको नरः ॥ ९४
लवणं चोरयित्वा तु चीरीवाकः प्रजायते ।
दधि हृत्वा बकश्चापि प्लवो मत्स्यानसंस्कृतान् ॥९५
चोरयित्वा पयश्चापि बलाका संप्रजायते ।
यस्तु चोरयते तैलं तैलपायी प्रजायते ।
चोरयित्वा तु दुर्बुद्धिर्मधु दंशः प्रजायते ॥ ९६
अयो हृत्वा तु दुर्बुद्धिर्वायसो जायते नरः ।
पायसं चोरयित्वा तु तित्तिरित्वमवाप्नुते ॥ ९७
हृत्वा पैष्टमपूपं च कुम्भोलूकः प्रजायते ।
फलं वा मूलकं हृत्वा अपूपं वा पिपीलिकः ॥९८
कांस्यं हृत्वा तु दुर्बुद्धिर्हारीतो जायते नरः ।
राजतं भाजनं हृत्वा कपोतः संप्रजायते ॥ ९९
हृत्वा तु काञ्चनं भाण्डं कृमियोनौ प्रजायते ।
क्रौञ्चः कार्पासिकं हृत्वा मृतो जायति मानवः ॥
चोरयित्वा नरः पट्टं त्वाविकं वापि भारत ।
क्षौमं च वस्त्रमादाय शशो जन्तुः प्रजायते ॥१०१
वर्णान्हृत्वा तु पुरुषो मृतो जायति बर्हिणः ।
हृत्वा रक्तानि वस्त्राणि जायते जीवजीवकः ॥१०२
वर्णकादींस्तथा गन्धांश्चोरयित्वा तु मानवः ।
छुच्छुन्दरित्वमाप्नोति राजँल्लोभपरायणः ॥ १०३
विश्वासेन तु निक्षिप्तं यो निह्नवति मानवः ।
स गतासुर्नरस्तादृङ्मत्स्ययोनौ प्रजायते ॥ १०४
मत्स्ययोनिमनुप्राप्य मृतो जायति मानुषः ।
मानुषत्वमनुप्राप्य क्षीणायुरुपपद्यते ॥ १०५
पापानि तु नरः कृत्वा तिर्यग्जायति भारत ।
न चात्मनः प्रमाणं ते धर्मं जानन्ति किंचन ॥

ये पापानि नराः कृत्वा निरस्यन्ति व्रतैः सदा ।
सुखदुःखसमायुक्ता व्याधितास्ते भवन्त्युत ॥ १०७
असंवासाः प्रजायन्ते म्लेच्छाश्चापि न संशयः ।
नराः पापसमाचारा लोभमोहसमन्विताः ॥ १०८
वर्जयन्ति च पापानि जन्मप्रभृति ये नराः ।
अरोगा रूपवन्तस्ते धनिनश्च भवन्त्युत ॥ १०९
स्त्रियोऽप्येतेन कल्पेन कृत्वा पापमवाप्नुयुः ।
एतेषामेव जन्तूनां पत्नीत्वमुपयान्ति ताः ॥ ११०
परस्वहरणे दोषाः सर्व एव प्रकीर्तिताः ।
एतद्वै लेशमात्रेण कथितं ते मयानघ ।
अपरस्मिन्कथायोगे भूयः श्रोष्यसि भारत ॥ १११
एतन्मया महाराज ब्रह्मणो वदतः पुरा ।
सुरर्षीणां श्रुतं मध्ये पृष्टश्चापि यथातथम् ॥ ११२
मयापि तव कात्स्न्येंन यथावदनुवर्णितम् ।
एतच्छ्रुत्वा महाराज धर्मे कुरु मनः सदा ॥ ११३

इति श्रीमहाभारते अनुशासनपर्वणि
द्वादशाधिकशततमोऽध्यायः ॥ ११२ ॥

११३

युधिष्ठिर उवाच ।

अधर्मस्य गतिर्ब्रह्मन्कथिता मे त्वयानघ ।
धर्मस्य तु गतिं श्रोतुमिच्छामि वदतां वर ।
कृत्वा कर्माणि पापानि कथं यान्ति शुभां गतिम् ॥

बृहस्पतिरुवाच ।

कृत्वा पापानि कर्माणि अधर्मवशमागतः ।
मनसा विपरीतेन निरयं प्रतिपद्यते ॥ २
मोहादधर्मं यः कृत्वा पुनः समनुतप्यते ।
मनःसमाधिसंयुक्तो न स सेवेत दुष्कृतम् ॥ ३
यथा यथा नरः सम्यगधर्ममनुभाषते ।
समाहितेन मनसा विमुच्यति तथा तथा ।
भुजंग इव निर्मोकात्पूर्वभुक्ताज्जरान्वितात् ॥ ४
अदत्त्वापि प्रदानानि विविधानि समाहितः ।
मनःसमाधिसंयुक्तः सुगतिं प्रतिपद्यते ॥ ५
प्रदानानि तु वक्ष्यामि यानि दत्त्वा युधिष्ठिर ।
नरः कृत्वाप्यकार्याणि तदा धर्मेण युज्यते ॥ ६
सर्वेषामेव दानानामन्नं श्रेष्ठमुदाहृतम् ।
पूर्वमन्नं प्रदातव्यमृजुना धर्ममिच्छता ॥ ७
प्राणा ह्यन्नं मनुष्याणां तस्माज्जन्तुश्च जायते ।
अन्ने प्रतिष्ठिता लोकास्तस्मादन्नं प्रकाशते ॥ ८
अन्नमेव प्रशंसन्ति देवर्षिपितृमानवाः ।
अन्नस्य हि प्रदानेन स्वर्गमाप्नोति कौशिकः ॥ ९
न्यायलब्धं प्रदातव्यं द्विजेभ्यो ह्यन्नमुत्तमम् ।
स्वाध्यायसमुपेतेभ्यः प्रहृष्टेनान्तरात्मना ॥ १०
यस्य ह्यन्नमुपाश्नन्ति ब्राह्मणानां शता दश ।
हृष्टेन मनसा दत्तं न स तिर्यग्गतिर्भवेत् ॥ ११
ब्राह्मणानां सहस्राणि दश भोज्य नरर्षभ ।
नरोऽधर्मात्प्रमुच्येत पापेष्वभिरतः सदा ॥ १२
भैक्षेणान्नं समाहृत्य विप्रो वेदपुरस्कृतः ।
स्वाध्यायनिरते विप्रे दत्त्वेह सुखमेधते ॥ १३
अहिंसन्ब्राह्मणं नित्यं न्यायेन परिपाल्य च ।
क्षत्रियस्तरसा प्राप्तमन्नं यो वै प्रयच्छति ॥ १४
द्विजेभ्यो वेदवृद्धेभ्यः प्रयतः सुसमाहितः ।
तेनापोहति धर्मात्मा दुष्कृतं कर्म पाण्डव ॥ १५
षड्भागपरिशुद्धं च कृषेर्भागमुपार्जितम् ।
वैश्यो ददद्द्विजातिभ्यः पापेभ्यः परिमुच्यते ॥ १६
अवाप्य प्राणसंदेहं कार्कश्येन समार्जितम् ।
अन्नं दत्त्वा द्विजातिभ्यः शूद्रः पापात्प्रमुच्यते ॥ १७
औरसेन बलेनान्नमर्जयित्वाविहिंसकः ।
यः प्रयच्छति विप्रेभ्यो न स दुर्गाणि सेवते ॥ १८
न्यायेनावाप्तमन्नं तु नरो लोभविवर्जितः ।

द्विजेभ्यो वेदवृद्धेभ्यो दत्त्वा पापात्प्रमुच्यते ॥ १९
अन्नमूर्जस्करं लोके दत्त्वोर्जस्वी भवेन्नरः ।
सतां पन्थानमाश्रित्य सर्वपापात्प्रमुच्यते ॥ २०
दानकृद्भिः कृतः पन्था येन यान्ति मनीषिणः ।
ते स्म प्राणस्य दातारस्तेभ्यो धर्मः सनातनः ॥२१
सर्वावस्थं मनुष्येण न्यायेनान्नमुपार्जितम् ।
कार्यं पात्रगतं नित्यमन्नं हि परमा गतिः ॥ २२
अन्नस्य हि प्रदानेन नरो दुर्गं न सेवते ।
तस्मादन्नं प्रदातव्यमन्यायपरिवर्जितम् ॥ २३
यतेद्ब्राह्मणपूर्वं हि भोक्तुमन्नं गृही सदा ।
अवन्ध्यं दिवसं कुर्यादन्नदानेन मानवः ॥ २४
भोजयित्वा दशशतं नरो वेदविदां नृप ।
न्यायविद्धर्मविदुषामितिहासविदां तथा ॥२५
न याति नरकं घोरं संसारांश्च न सेवते ।
सर्वकामसमायुक्तः प्रेत्य चाप्यश्नुते फलम् ॥ २६
एवं सुखसमायुक्तो रमते विगतज्वरः ।
रूपवान्कीर्तिमांश्चैव धनवांश्चोपपद्यते ॥ २७
एतत्ते सर्वमाख्यातमन्नदानफलं महत् ।
मूलमेतद्धि धर्माणां प्रदानस्य च भारत ॥ २८

इति श्रीमहाभारते अनुशासनपर्वणि
त्रयोदशाधिकशततमोऽध्यायः ॥ ११३ ॥

११४

युधिष्ठिर उवाच ।

अहिंसा वैदिकं कर्म ध्यानमिन्द्रियसंयमः ।
तपोऽथ गुरुशुश्रूषा किं श्रेयः पुरुषं प्रति ॥ १

बृहस्पतिरुवाच ।

सर्वाण्येतानि धर्मस्य पृथग्द्वाराणि सर्वशः ।
शृणु संकीर्त्यमानानि षडेव भरतर्षभ ॥ २
हन्त निःश्रेयसं जन्तोरहं वक्ष्याम्यनुत्तमम् ।
अहिंसापाश्रयं धर्मं यः साधयति वै नरः ॥ ३
त्रीन्दोषान्सर्वभूतेषु निधाय पुरुषः सदा ।
कामक्रोधौ च संयम्य ततः सिद्धिमवाप्नुते ॥ ४
अहिंसकानि भूतानि दण्डेन विनिहन्ति यः ।
आत्मनः सुखमन्विच्छन्न स प्रेत्य सुखी भवेत् ॥५
आत्मोपमश्च भूतेषु यो वै भवति पूरुषः ।
न्यस्तदण्डो जितक्रोधः स प्रेत्य सुखमेधते ॥ ६
सर्वभूतात्मभूतस्य सर्वभूतानि पश्यतः ।
देवापि मार्गे मुह्यन्ति अपदस्य पदैषिणः ॥ ७
न तत्परस्य संदध्यात्प्रतिकूलं यदात्मनः ।
एष संक्षेपतो धर्मः कामादन्यः प्रवर्तते ॥ ८
प्रत्याख्याने च दाने च सुखदुःखे प्रियाप्रिये ।
आत्मौपम्येन पुरुषः समाधिमधिगच्छति ॥ ९
यथा परः प्रक्रमतेऽपरेषु
तथापरः प्रक्रमते परस्मिन् ।
एषैव तेऽस्तूपमा जीवलोके
यथा धर्मो नैपुणेनोपदिष्टः ॥ १०

वैशंपायन उवाच ।

इत्युक्त्वा तं सुरगुरुर्धर्मराजं युधिष्ठिरम् ।
दिवमाचक्रमे धीमान्पश्यतामेव नस्तदा ॥ ११

इति श्रीमहाभारते अनुशासनपर्वणि
चतुर्दशाधिकशततमोऽध्यायः ॥ ११४ ॥

११५

वैशंपायन उवाच ।

ततो युधिष्ठिरो राजा शरतल्पे पितामहम् ।
पुनरेव महातेजाः पप्रच्छ वदतां वरम् ॥ १
ऋषयो ब्राह्मणा देवाः प्रशंसन्ति महामते ।
अहिंसालक्षणं धर्मं वेदप्रामाण्यदर्शनात् ॥ २
कर्मणा मनुजः कुर्वन्हिंसां पार्थिवसत्तम ।
वाचा च मनसा चैव कथं दुःखात्प्रमुच्यते ॥ ३

भीष्म उवाच ।

चतुर्विधेयं निर्दिष्टा अहिंसा ब्रह्मवादिभिः ।
एषैकतोऽपि विभ्रष्टा न भवत्यरिसूदन ॥ ४
यथा सर्वश्चतुष्पादस्त्रिभिः पादैर्न तिष्ठति ।
तथैवेयं महीपाल प्रोच्यते कारणैस्त्रिभिः ॥ ५
यथा नागपदेऽन्यानि पदानि पदगामिनाम् ।
सर्वाण्येवापिधीयन्ते पदजातानि कौञ्जरे ।
एवं लोकेष्वहिंसा तु निर्दिष्टा धर्मतः परा ॥ ६
कर्मणा लिप्यते जन्तुर्वाचा च मनसैव च ॥ ७
पूर्वं तु मनसा त्यक्त्वा तथा वाचाथ कर्मणा ।
त्रिकारणं तु निर्दिष्टं श्रूयते ब्रह्मवादिभिः ॥ ८
मनोवाचि तथास्वादे दोषा ह्येषु प्रतिष्ठिताः ।
न भक्षयन्त्यतो मांसं तपोयुक्ता मनीषिणः ॥ ९
दोषांस्तु भक्षणे राजन्मांसस्येह निबोध मे ।
पुत्रमांसोपमं जानन्खादते यो विचेतनः ॥ १०
मातापितृसमायोगे पुत्रत्वं जायते यथा ।
रसं च प्रति जिह्वायां प्रज्ञानं जायते तथा ।
तथा शास्त्रेषु नियतं रागो ह्यास्वादिताद्भवेत् ॥ ११
असंस्कृताः संस्कृताश्च लवणालवणास्तथा ।
प्रज्ञायन्ते यथा भावास्तथा चित्तं निरुध्यते ॥ १२
भेरीशङ्खमृदङ्गाद्यांस्तन्त्रीशब्दांश्च पुष्कलान् ।
निषेविष्यन्ति वै मन्दा मांसभक्षाः कथं नराः ॥ १३
अचिन्तितमनुद्दिष्टमसंकल्पितमेव च ।
रसं गृद्ध्याभिभूता वै प्रशंसन्ति फलार्थिनः ।
प्रशंसा ह्येव मांसस्य दोषकर्मफलान्विता ॥ १४
जीवितं हि परित्यज्य बहवः साधवो जनाः ।
स्वमांसैः परमांसानि परिपाल्य दिवं गताः ॥ १५
एवमेषा महाराज चतुर्भिः कारणैर्वृता ।
अहिंसा तव निर्दिष्टा सर्वधर्मार्थसंहिता ॥ १६

इति श्रीमहाभारते अनुशासनपर्वणि
पञ्चाधिकशततमोऽध्यायः ॥ ११५ ॥

११६

युधिष्ठिर उवाच ।

अहिंसा परमो धर्म इत्युक्तं बहुशस्त्वया ।
श्राद्धेषु च भवानाह पितॄनामिषकाङ्क्षिणः ॥ १
मांसैर्बहुविधैः प्रोक्तस्त्वया श्राद्धविधिः पुरा ।
अहत्वा च कुतो मांसमेवमेतद्विरुध्यते ॥ २
जातो नः संशयो धर्मे मांसस्य परिवर्जने ।
दोषो भक्षयतः कः स्यात्कश्चाभक्षयतो गुणः ॥ ३
हत्वा भक्षयतो वापि परेणोपहृतस्य वा ।
हन्याद्वा यः परस्यार्थे क्रीत्वा वा भक्षयेन्नरः ॥ ४
एतदिच्छामि तत्त्वेन कथ्यमानं त्वयानघ ।
निश्चयेन चिकीर्षामि धर्ममेतं सनातनम् ॥ ५
कथमायुरवाप्नोति कथं भवति सत्त्ववान् ।
कथमव्यङ्गतामेति लक्षण्यो जायते कथम् ॥ ६

भीष्म उवाच ।

मांसस्य भक्षणे राजन्योऽधर्मः कुरुपुंगव ।
तं मे शृणु यथातत्त्वं यश्चास्य विधिरुत्तमः ॥ ७
रूपमव्यङ्गतामायुर्बुद्धिं सत्त्वं बलं स्मृतिम् ।
प्राप्तुकामैर्नरैर्हिंसा वर्जिता वै कृतात्मभिः ॥ ८
ऋषीणामत्र संवादो बहुशः कुरुपुंगव ।
बभूव तेषां तु मतं यत्तच्छृणु युधिष्ठिर ॥ ९
यो यजेताश्वमेधेन मासि मासि यतव्रतः ।
वर्जयेन्मधु मांसं च सममेतद्युधिष्ठिर ॥ १०
सप्तर्षयो वालखिल्यास्तथैव च मरीचिपाः ।
अमांसभक्षणं राजन्प्रशंसन्ति मनीषिणः ॥ ११
न भक्षयति यो मांसं न हन्यान्न च घातयेत् ।
तं मित्रं सर्वभूतानां मनुः स्वायंभुवोऽब्रवीत् ॥ १२

अधृष्यः सर्वभूतानां विश्वास्यः सर्वजन्तुषु ।
साधूनां संमतो नित्यं भवेन्मांसस्य वर्जनात् ॥१३
स्वमांसं परमांसेन यो वर्धयितुमिच्छति ।
नारदः प्राह धर्मात्मा नियतं सोऽवसीदति ॥ १४
ददाति यजते चापि तपस्वी च भवत्यपि ।
मधुमांसनिवृत्त्येति प्राहैवं स बृहस्पतिः ॥ १५
मासि मास्यश्वमेधेन यो यजेत शतं समाः ।
न खादति च यो मांसं सममेतन्मतं मम ॥ १६
सदा यजति सत्रेण सदा दानं प्रयच्छति ।
सदा तपस्वी भवति मधुमांसस्य वर्जनात् ॥ १७
सर्वे वेदा न तत्कुर्युः सर्वयज्ञाश्च भारत ।
यो भक्षयित्वा मांसानि पश्चादपि निवर्तते ॥ १८
दुष्करं हि रसज्ञेन मांसस्य परिवर्जनम् ।
चर्तुं व्रतमिदं श्रेष्ठं सर्वप्राण्यभयप्रदम् ॥ १९
सर्वभूतेषु यो विद्वान्ददात्यभयदक्षिणाम् ।
दाता भवति लोके स प्राणानां नात्र संशयः ॥२०
एवं वै परमं धर्मं प्रशंसन्ति मनीषिणः ।
प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा ॥२१
आत्मौपम्येन गन्तव्यं बुद्धिमद्भिर्महात्मभिः ।
मृत्युतो भयमस्तीति विदुषां भूतिमिच्छताम् ॥२२
किं पुनर्हन्यमानानां तरसा जीवितार्थिनाम् ।
अरोगाणामपापानां पापैर्मांसोपजीविभिः ॥ २३
तस्माद्विद्धि महाराज मांसस्य परिवर्जनम् ।
धर्मस्यायतनं श्रेष्ठं स्वर्गस्य च सुखस्य च ॥ २४
अहिंसा परमो धर्मस्तथाहिंसा परं तपः ।
अहिंसा परमं सत्यं ततो धर्मः प्रवर्तते ॥ २५
न हि मांसं तृणात्काष्ठादुपलाद्वापि जायते ।
हत्वा जन्तुं ततो मांसं तस्माद्दोषोऽस्य भक्षणे ॥२६
स्वाहास्वधामृतभुजो देवाः सत्यार्जवप्रियाः ।
क्रव्यादान्राक्षसान्विद्धि जिह्मानृतपरायणान् ॥ २७
कान्तारेष्वथ घोरेषु दुर्गेषु गहनेषु च ।
रात्रावहनि संध्यासु चत्वरेषु सभासु च ।
अमांसभक्षणे राजन्भयमन्ते न गच्छति ॥ २८
यदि चेत्खादको न स्यान्न तदा घातको भवेत् ।
घातकः खादकार्थाय तं घातयति वै नरः ॥ २९
अभक्ष्यमेतदिति वा इति हिंसा निवर्तते ।
खादकार्थमतो हिंसा मृगादीनां प्रवर्तते ॥ ३०
यस्माद्ग्रसति चैवायुर्हिंसकानां महाद्युते ।
तस्माद्विवर्जयेन्मांसं य इच्छेद्भूतिमात्मनः ॥ ३१
त्रातारं नाधिगच्छन्ति रौद्राः प्राणिविहिंसकाः ।
उद्वेजनीया भूतानां यथा व्यालमृगास्तथा ॥ ३२
लोभाद्वा बुद्धिमोहाद्वा बलवीर्यार्थमेव च ।
संसर्गाद्वाथ पापानामधर्मरुचिता नृणाम् ॥ ३३
स्वमांसं परमांसेन यो वर्धयितुमिच्छति ।
उद्विग्नवासे वसति यत्रतत्राभिजायते ॥ ३४
धन्यं यशस्यमायुष्यं स्वर्ग्यं स्वस्त्ययनं महत् ।
मांसस्याभक्षणं प्राहुर्नियताः परमर्षयः ॥ ३५
इदं तु खलु कौन्तेय श्रुतमासीत्पुरा मया ।
मार्कण्डेयस्य वदतो ये दोषा मांसभक्षणे ॥ ३६
यो हि खादति मांसानि प्राणिनां जीवितार्थिनाम् ।
हतानां वा मृतानां वा यथा हन्ता तथैव सः ॥३७
धनेन क्रायको हन्ति खादकश्चोपभोगतः ।
घातको वधबन्धाभ्यामित्येष त्रिविधो वधः ॥ ३८
अखादन्ननुमोदंश्च भावदोषेण मानवः ।
योऽनुमन्येत हन्तव्यं सोऽपि दोषेण लिप्यते ॥३९
अधृष्यः सर्वभूतानामायुष्मान्नीरुजः सुखी ।
भवत्यभक्षयन्मांसं दयावान्प्राणिनामिह ॥ ४०
हिरण्यदानैर्गोदानैर्भूमिदानैश्च सर्वशः ।
मांसस्याभक्षणे धर्मो विशिष्टः स्यादिति श्रुतिः ॥४१
अप्रोक्षितं वृथामांसं विधिहीनं न भक्षयेत् ।

भक्षयन्निरयं याति नरो नास्त्यत्र संशयः ॥ ४२
प्रोक्षिताभ्युक्षितं मांसं तथा ब्राह्मणकाम्यया ।
अल्पदोषमिह ज्ञेयं विपरीते तु लिप्यते ॥ ४३
खादकस्य कृते जन्तुं यो हन्यात्पुरुषाधमः ।
महादोषकरस्तत्र खादको न तु घातकः ॥ ४४
इज्यायज्ञश्रुतिकृतैर्यो मार्गैरबुधो जनः ।
हन्याज्जन्तुं मांसगृद्ध्री स वै नरकभाङ्नरः ॥ ४५
भक्षयित्वा तु यो मांसं पश्चादपि निवर्तते ।
तस्यापि सुमहान्धर्मो यः पापाद्विनिवर्तते ॥ ४६
आहर्ता चानुमन्ता च विशस्ता क्रयविक्रयी ।
संस्कर्ता चोपभोक्ता च घातकाः सर्व एव ते ॥४७
इदमन्यत्तु वक्ष्यामि प्रमाणं विधिनिर्मितम् ।
पुराणमृषिभिर्जुष्टं वेदेषु परिनिश्चितम् ॥ ४८
प्रवृत्तिलक्षणे धर्मे फलार्थिभिरभिद्रुते ।
यथोक्तं राजशार्दूल न तु तन्मोक्षकाङ्क्षिणाम् ॥ ४९
हविर्यत्संस्कृतं मन्त्रैः प्रोक्षिताभ्युक्षितं शुचि ।
वेदोक्तेन प्रमाणेन पितॄणां प्रक्रियासु च ।
अतोऽन्यथा वृथामांसमभक्ष्यं मनुरब्रवीत् ॥ ५०
अस्वर्ग्यमयशस्यं च रक्षोवद्भरतर्षभ ।
विधिना हि नराः पूर्वं मांसं राजन्नभक्षयन् ॥५१
यः इच्छेत्पुरुषोऽत्यन्तमात्मानं निरुपद्रवम् ।
स वर्जयेत मांसानि प्राणिनामिह सर्वशः ॥ ५२
श्रूयते हि पुराकल्पे नृणां व्रीहिमयः पशुः ।
येनायजन्त यज्वानः पुण्यलोकपरायणाः ॥ ५३
ऋषिभिः संशयं पृष्टो वसुश्चेदिपतिः पुरा ।
अभक्ष्यमिति मांसं स प्राह भक्ष्यमिति प्रभो ॥ ५४
आकाशान्मेदिनीं प्राप्तस्ततः स पृथिवीपतिः ।
एतदेव पुनश्चोक्त्वा विवेश धरणीतलम् ॥ ५५
प्रजानां हितकामेन त्वगस्त्येन महात्मना ।
आरण्याः सर्वदैवत्याः प्रोक्षितास्तपसा मृगाः ॥ ५६
क्रिया ह्येवं न हीयन्ते पितृदैवतसंश्रिताः ।
प्रीयन्ते पितरश्चैव न्यायतो मांसतर्पिताः ॥ ५७
इदं तु शृणु राजेन्द्र कीर्त्यमानं मयानघ ।
अभक्षणे सर्वसुखं मांसस्य मनुजाधिप ॥ ५८
यस्तु वर्षशतं पूर्णं तपस्तप्येत्सुदारुणम् ।
यश्चैकं वर्जयेन्मांसं सममेतन्मतं मम ॥ ५९
कौमुदे तु विशेषेण शुक्लपक्षे नराधिप ।
वर्जयेत्सर्वमांसानि धर्मो ह्यत्र विधीयते ॥ ६०
चतुरो वार्षिकान्मासान्यो मांसं परिवर्जयेत् ।
चत्वारि भद्राण्याप्नोति कीर्तिमायुर्यशो बलम् ॥ ६१
अथ वा मासमप्येकं सर्वमांसान्यभक्षयन् ।
अतीत्य सर्वदुःखानि सुखी जीवेन्निरामयः ॥ ६२
ये वर्जयन्ति मांसानि मासशः पक्षशोऽपि वा ।
तेषां हिंसानिवृत्तानां ब्रह्मलोको विधीयते ॥ ६३
मांसं तु कौमुदं पक्षं वर्जितं पार्थ राजभिः ।
सर्वभूतात्मभूतैस्तैर्विज्ञातार्थपरावरैः ॥ ६४
नाभागेनाम्बरीषेण गयेन च महात्मना ।
आयुषा चानरण्येन दिलीपरघुपूरुभिः ॥ ६५
कार्तवीर्यानिरुद्धाभ्यां नहुषेण ययातिना ।
नृगेण विष्वगश्वेन तथैव शशबिन्दुना ।
युवनाश्वेन च तथा शिबिनौशीनरेण च ॥ ६६
श्येनचित्रेण राजेन्द्र सोमकेन वृकेण च ।
रैवतेन रन्तिदेवेन वसुना सृञ्जयेन च ॥ ६७
दुःषन्तेन करूषेण रामालर्कनलैस्तथा ॥ ।
विरूपाश्वेन निमिना जनकेन च धीमता ॥ ६८
सिलेन पृथुना चैव वीरसेनेन चैव ह ।
इक्ष्वाकुणा शंभुना च श्वेतेन सगरेण च ॥ ६९
एतैश्चान्यैश्च राजेन्द्र पुरा मांसं न भक्षितम् ।
शारदं कौमुदं मासं ततस्ते स्वर्गमाप्नुवन् ॥ ७०
ब्रह्मलोके च तिष्ठन्ति ज्वलमानाः श्रियान्विताः ।

उपास्यमाना गन्धर्वैः स्त्रीसहस्रसमन्विताः ॥ ७१
तदेतदुत्तमं धर्ममहिंसालक्षणं शुभम् ।
ये चरन्ति महात्मानो नाकपृष्ठे वसन्ति ते ॥ ७२
मधु मांसं च ये नित्यं वर्जयन्तीह धार्मिकाः ।
जन्मप्रभृति मद्यं च सर्वे ते मुनयः स्मृताः ।
विशिष्टतां ज्ञातिषु च लभन्ते नात्र संशयः ॥ ७३
आपन्नश्चापदो मुच्येद्बद्धो मुच्येत बन्धनात् ।
मुच्येत्तथातुरो रोगाद्दुःखान्मुच्येत दुःखितः ॥ ७४
तिर्यग्योनिं न गच्छेत रूपवांश्च भवेन्नरः ।
बुद्धिमान्वै कुरुश्रेष्ठ प्राप्नुयाच्च महद्यशः ॥ ७५
एतत्ते कथितं राजन्मांसस्य परिवर्जने ।
प्रवृत्तौ च निवृत्तौ च विधानमृषिनिर्मितम् ॥ ७६

इति श्रीमहाभारते अनुशासनपर्वणि
षोडशाधिकशततमोऽध्यायः ॥ ११६ ॥

११७

युधिष्ठिर उवाच ।

इमे वै मानवा लोके भृशं मांसस्य गृद्धिनः ।
विसृज्य भक्षान्विविधान्यथा रक्षोगणास्तथा ॥ १
नापूपान्विविधाकाराञ्शाकानि विविधानि च ।
षाडवान्रसयोगांश्च तथेच्छन्ति यथामिषम् ॥ २
तत्र मे बुद्धिरत्रैव विसर्गे परिमुह्यते ।
न मन्ये रसतः किंचिन्मांसतोऽस्तीह किंचन ॥ ३
तदिच्छामि गुणाञ्श्रोतुं मांसस्याभक्षणेऽपि वा ।
भक्षणे चैव ये दोषास्तांश्चैव पुरुषर्षभ ॥ ४
सर्वं तत्त्वेन धर्मज्ञ यथावदिह धर्मतः ।
किं वा भक्ष्यमभक्ष्यं वा सर्वमेतद्वदस्व मे ॥ ५

भीष्म उवाच ।

एवमेतन्महाबाहो यथा वदसि भारत ।
न मांसात्परमत्रान्यद्रसतो विद्यते भुवि ॥ ६
क्षतक्षीणाभितप्तानां ग्राम्यधर्मरताश्च ये ।
अध्वना कर्शितानां च न मांसाद्विद्यते परम् ॥ ७
सद्यो वर्धयति प्राणान्पुष्टिमग्र्यां ददाति च ।
न भक्षोऽभ्यधिकः कश्चिन्मांसादस्ति परंतप ॥ ८
विवर्जने तु बहवो गुणाः कौरवनन्दन ।
ये भवन्ति मनुष्याणां तान्मे निगदतः शृणु ॥ ९
स्वमांसं परमांसैर्यो विवर्धयितुमिच्छति ।
नास्ति क्षुद्रतरस्तस्मान्न नृशंसतरो नरः ॥ १०
न हि प्राणात्प्रियतरं लोके किंचन विद्यते ।
तस्माद्दयां नरः कुर्याद्यथात्मनि तथा परे ॥ ११
शुक्राच्च तात संभूतिर्मांसस्येह न संशयः ।
भक्षणे तु महादोषो वधेन सह कल्पते ॥ १२
अहिंसालक्षणो धर्म इति वेदविदो विदुः ।
यदहिंस्रं भवेत्कर्म तत्कुर्यादात्मवान्नरः ॥ १३
पितृदैवतयज्ञेषु प्रोक्षितं हविरुच्यते ।
विधिना वेददृष्टेन तद्भुक्त्वेह न दुष्यति ॥ १४
यज्ञार्थे पशवः सृष्टा इत्यपि श्रूयते श्रुतिः ।
अतोऽन्यथा प्रवृत्तानां राक्षसो विधिरुच्यते ॥१५
क्षत्रियाणां तु यो दृष्टो विधिस्तमपि मे शृणु ।
वीर्येणोपार्जितं मांसं यथा खादन्न दुष्यति ॥ १६
आरण्याः सर्वदैवत्याः प्रोक्षिताः सर्वशो मृगाः ।
अगस्त्येन पुरा राजन्मृगया येन पूज्यते ॥ १७
नात्मानमपरित्यज्य मृगया नाम विद्यते ।
समतामुपसंगम्य रूपं हन्यान्न वा नृप ॥ १८
अतो राजर्षयः सर्वे मृगयां यान्ति भारत ।
लिप्यन्ते न हि दोषेण न चैतत्पातकं विदुः ॥१९
न हि तत्परमं किंचिदिह लोके परत्र च ।
यत्सर्वेष्विह लोकेषु दया कौरवनन्दन ॥ २०
न भयं विद्यते जातु नरस्येह दयावतः ।
दयावतामिमे लोकाः परे चापि तपस्विनाम् ॥२१
अभयं सर्वभूतेभ्यो यो ददाति दयापरः ।

अभयं तस्य भूतानि ददतीत्यनुशुश्रुमः ॥ २२
क्षतं च स्खलितं चैव पतितं क्लिष्टमाहतम् ।
सर्वभूतानि रक्षन्ति समेषु विषमेषु च ॥ २३
नैनं व्यालमृगा घ्नन्ति न पिशाचा न राक्षसाः ।
मुच्यन्ते भयकालेषु मोक्षयन्ति च ये परान् ॥२४
प्राणदानात्परं दानं न भूतं न भविष्यति ।
न ह्यात्मनः प्रियतरः कश्चिदस्तीति निश्चितम् ॥२५
अनिष्टं सर्वभूतानां मरणं नाम भारत ।
मृत्युकाले हि भूतानां सद्यो जायति वेपथुः ॥ २६
जातिजन्मजरादुःखे नित्यं संसारसागरे ।
जन्तवः परिवर्तन्ते मरणादुद्विजन्ति च ॥ २७
गर्भवासेषु पच्यन्ते क्षाराम्लकटुकै रसैः ।
मूत्रश्लेष्मपुरीषाणां स्पर्शैश्च भृशदारुणैः ॥ २८
जाताश्चाप्यवशास्तत्र भिद्यमानाः पुनः पुनः ।
पाट्यमानाश्च दृश्यन्ते विवशा मांसगृद्धिनः ॥ २९
कुम्भीपाके च पच्यन्ते तां तां योनिमुपागताः ।
आक्रम्य मार्यमाणाश्च भ्राम्यन्ते वै पुनः पुनः ॥
नात्मनोऽस्ति प्रियतरः पृथिव्यामनुसृत्य ह ।
तस्मात्प्राणिषु सर्वेषु दयावानात्मवान्भवेत् ॥ ३१
सर्वमांसानि यो राजन्यावज्जीवं न भक्षयेत् ।
स्वर्गे स विपुलं स्थानं प्राप्नुयान्नात्र संशयः ॥ ३२
ये भक्षयन्ति मांसानि भूतानां जीवितैषिणाम् ।
भक्ष्यन्ते तेऽपि तैर्भूतैरिति मे नास्ति संशयः ॥३३
मां स भक्षयते यस्माद्भक्षयिष्ये तमप्यहम् ।
एतन्मांसस्य मांसत्वमतो बुध्यस्व भारत ॥ ३४
घातको वध्यते नित्यं तथा वध्येत बन्धकः ।
आक्रोष्टाक्रुश्यते राजन्द्वेष्टा द्वेष्यत्वमाप्नुते ॥ ३५
येन येन शरीरेण यद्यत्कर्म करोति यः ।
तेन तेन शरीरेण तत्तत्फलमुपाश्नुते ॥ ३६
अहिंसा परमो धर्मस्तथाहिंसा परो दमः ।
अहिंसा परमं दानमहिंसा परमं तपः ॥ ३७
अहिंसा परमो यज्ञस्तथाहिंसा परं बलम् ।
अहिंसा परमं मित्रमहिंसा परमं सुखम् ।
अहिंसा परमं सत्यमहिंसा परमं श्रुतम् ॥ ३८
सर्वयज्ञेषु वा दानं सर्वतीर्थेषु चाप्लुतम् ।
सर्वदानफलं वापि नैतत्तुल्यमहिंसया ॥ ३९
अहिंस्रस्य तपोऽक्षय्यमहिंस्रो यजते सदा ।
अहिंस्रः सर्वभूतानां यथा माता यथा पिता ॥४०
एतत्फलमहिंसाया भूयश्च कुरुपुंगव ।
न हि शक्या गुणा वक्तुमिह वर्षशतैरपि ॥ ४१

इति श्रीमहाभारते अनुशासनपर्वणि
सप्तदशाधिकशततमोऽध्यायः ॥ ११७ ॥

११८

युधिष्ठिर उवाच ।

अकामाश्च सकामाश्च हता येऽस्मिन्महाहवे ।
कां योनिं प्रतिपन्नास्ते तन्मे ब्रूहि पितामह ॥ १
दुःखं प्राणपरित्यागः पुरुषाणां महामृधे ।
जानामि तत्त्वं धर्मज्ञ प्राणत्यागं सुदुष्करम् ॥ २
समृद्धे वासमृद्धे वा शुभे वा यदि वाशुभे ।
कारणं तत्र मे ब्रूहि सर्वज्ञो ह्यसि मे मतः ॥ ३

भीष्म उवाच ।

समृद्धे वासमृद्धे वा शुभे वा यदि वाशुभे ।
संसारेऽस्मिन्समाजाताः प्राणिनः पृथिवीपते ॥ ४
निरता येन भावेन तत्र मे शृणु कारणम् ।
सम्यक्चायमनुप्रश्नस्त्वयोक्तश्च युधिष्ठिर ॥ ५
अत्र ते वर्तयिष्यामि पुरावृत्तमिदं नृप ।
द्वैपायनस्य संवादं कीटस्य च युधिष्ठिर ॥ ६
ब्रह्मभूतश्चरन्विप्रः कृष्णद्वैपायनः पुरा ।
ददर्श कीटं धावन्तं शीघ्रं शकटवर्त्मनि ॥ ७
गतिज्ञः सर्वभूतानां रुतज्ञश्च शरीरिणाम् ।

सर्वज्ञः सर्वतो दृष्ट्वा कीटं वचनमब्रवीत् ॥ ८
कीट संत्रस्तरूपोऽसि त्वरितश्चैव लक्ष्यसे ।
क्व धावसि तदाचक्ष्व कुतस्ते भयमागतम् ॥ ९

कीट उवाच ।

शकटस्यास्य महतो घोषं श्रुत्वा भयं मम ।
आगतं वै महाबुद्धे स्वन एष हि दारुणः ।
श्रूयते न स मां हन्यादिति तस्मादपाक्रमे ॥ १०
श्वसतां च शृणोम्येवं गोपुत्राणां प्रचोद्यताम् ।
वहतां सुमहाभारं संनिकर्षे स्वनं प्रभो ।
नृणां च संवाहयतां श्रूयते विविधः स्वनः ॥ ११
सोढुमस्मद्विधेनैष न शक्यः कीटयोनिना ।
तस्मादपक्रमाम्येष भयादस्मात्सुदारुणात् ॥ १२
दुःखं हि मृत्युभूतानां जीवितं च सुदुर्लभम् ।
अतो भीतः पलायामि गच्छेयं नासुखं सुखात् ॥

भीष्म उवाच ।

इत्युक्तः स तु तं प्राह कुतः कीट सुखं तव ।
मरणं ते सुखं मन्ये तिर्यग्योनौ हि वर्तसे ॥ १४
शब्दं स्पर्शं रसं गन्धं भोगांश्चोच्चावचान्बहून् ।
नाभिजानासि कीट त्वं श्रेयो मरणमेव ते ॥ १५

कीट उवाच ।

सर्वत्र निरतो जीव इतीहापि सुखं मम ।
चेतयामि महाप्राज्ञ तस्मादिच्छामि जीवितुम् ॥ १६
इहापि विषयः सर्वो यथादेहं प्रवर्तितः ।
मानुषास्तिर्यगाश्चैव पृथग्भोगा विशेषतः ॥ १७
अहमासं मनुष्यो वै शूद्रो बहुधनः पुरा ।
अब्रह्मण्यो नृशंसश्च कदर्यो वृद्धिजीवनः ॥ १८
वाक्तीक्ष्णो निकृतिप्रज्ञो मोष्टा विश्वस्य सर्वशः ।
मिथःकृतोऽपनिधनः परस्वहरणे रतः ॥ १९
भृत्यातिथिजनश्चापि गृहे पर्युषितो मया ।
मात्सर्यात्स्वादुकामेन नृशंसेन बुभूषता ॥ २०
देवार्थं पितृयज्ञार्थमन्नं श्रद्धाकृतं मया ।
न दत्तमर्थकामेन देयमन्नं पुनाति ह ॥ २१
गुप्तं शरणमाश्रित्य भयेषु शरणागताः ।
अकस्मान्नो भयात्त्यक्ता न च त्राताभयैषिणः ॥२२
धनं धान्यं प्रियान्दारान्यानं वासस्तथाद्भुतम् ।
श्रियं दृष्ट्वा मनुष्याणामसूयामि निरर्थकम् ॥ २३
ईर्ष्युः परसुखं दृष्ट्वा आततायबुभूषकः ।
त्रिवर्गहन्ता चान्येषामात्मकामानुवर्तकः ॥ २४
नृशंसगुणभूयिष्ठं पुरा कर्म कृतं मया ।
स्मृत्वा तदनुतप्येऽहं त्यक्त्वा प्रियमिवात्मजम् ॥
शुभानामपि जानामि कृतानां कर्मणां फलम् ।
माता च पूजिता वृद्धा ब्राह्मणश्चार्चितो मया ॥२६
सकृज्जातिगुणोपेतः संगत्या गृहमागतः ।
अतिथिः पूजितो ब्रह्मंस्तेन मां नाजहात्स्मृतिः ॥ २७
कर्मणा तेन चैवाहं सुखाशामिह लक्षये ।
तच्छ्रोतुमहमिच्छामि त्वत्तः श्रेयस्तपोधन ॥ २८

इति श्रीमहाभारते अनुशासनपर्वणि
अष्टादशाधिकशततमोऽध्यायः ॥ ११८ ॥

११९

व्यास उवाच ।

शुभेन कर्मणा यद्वै तिर्यग्योनौ न मुह्यसे ।
ममैव कीट तत्कर्म येन त्वं न प्रमुह्यसे ॥ १
अहं हि दर्शनादेव तारयामि तपोबलात् ।
तपोबलाद्धि बलवद्बलमन्यन्न विद्यते ॥ २
जानामि पापैः स्वकृतैर्गतं त्वां कीट कीटताम् ।
अवाप्स्यसि परं धर्मं धर्मस्थो यदि मन्यसे ॥ ३
कर्म भूनिकृतं देवा भुञ्जते तिर्यगाश्च ये ।
धर्मादपि मनुष्येषु कामोऽर्थश्च यथा गुणैः ॥ ४
वाग्बुद्धिपाणिपादैश्चाप्युपेतस्य विपश्चितः ।

किं हीयते मनुष्यस्य मन्दस्यापि हि जीवतः ॥ ५
जीवन्हि कुरुते पूजां विप्राग्र्यः शशिसूर्ययोः ।
ब्रुवन्नपि कथां पुण्यां तत्र कीट त्वमेष्यसि ॥ ६
गुणभूतानि भूतानि तत्र त्वमुपभोक्ष्यसे ।
तत्र तेऽहं विनेष्यामि ब्रह्मत्वं यत्र चेच्छसि ॥ ७
स तथेति प्रतिश्रुत्य कीटो वर्त्मन्यतिष्ठत ।
तमृषिं द्रष्टुमगमत्सर्वास्वन्यासु योनिषु ॥ ८
श्वाविद्गोधावराहाणां तथैव मृगपक्षिणाम् ।
श्वपाकवैश्यशूद्राणां क्षत्रियाणां च योनिषु ॥ ९
स कीटेत्येवमाभाष्य ऋषिणा सत्यवादिना ।
प्रतिस्मृत्याथ जग्राह पादौ मूर्ध्ना कृताञ्जलिः ॥ १०

कीट उवाच ।

इदं तदतुलं स्थानमीप्सितं दशभिर्गुणैः ।
यदहं प्राप्य कीटत्वमागतो राजपुत्रताम् ॥ ११
वहन्ति माममतिबलाः कुञ्जरा हेममालिनः ।
स्यन्दनेषु च काम्बोजा युक्ताः परमवाजिनः ॥ १२
उष्ट्राश्वतरयुक्तानि यानानि च वहन्ति माम् ।
सबान्धवः सहामात्यश्चाश्नामि पिशितोदनम् ॥ १३
गृहेषु सुनिवासेषु सुखेषु शयनेषु च ।
परार्ध्येषु महाभाग स्वपामीह सुपूजितः ॥ १४
सर्वेष्वपररात्रेषु सूतमागधबन्दिनः ।
स्तुवन्ति मां यथा देवं महेन्द्रं प्रियवादिनः ॥ १५
प्रसादात्सत्यसंधस्य भवतोऽमिततेजसः ।
यदहं कीटतां प्राप्य संप्राप्तो राजपुत्रताम् ॥ १६
नमस्तेऽस्तु महाप्राज्ञ किं करोमि प्रशाधि माम् ।
त्वत्तपोबलनिर्दिष्टमिदं ह्यधिगतं मया ॥ १७

व्यास उवाच ।

अर्चितोऽहं त्वया राजन्वाग्भिरद्य यदृच्छया ।
अद्य ते कीटतां प्राप्य स्मृतिर्जाताजुगुप्सिता ॥ १८
न तु नाशोऽस्ति पापस्य यत्त्वयोपचितं पुरा ।
शूद्रेणार्थप्रधानेन नृशंसेनाततायिना ॥ १९
मम ते दर्शनं प्राप्तं तच्चैव सुकृतं पुरा ।
तिर्यग्योनौ स्म जातेन मम चाप्यर्चनात्तथा ॥ २०
इतस्त्वं राजपुत्रत्वाद्ब्राह्मण्यं समवाप्स्यसि ।
गोब्राह्मणकृते प्राणान्हुत्वात्मीयान्रणाजिरे ॥ २१
राजपुत्रसुखं प्राप्य ऋतूंश्चैवाप्तदक्षिणान् ।
अथ मोदिष्यसे स्वर्गे ब्रह्मभूतोऽव्ययः सुखी ॥ २२
तिर्यग्योन्याः शूद्रतामभ्युपैति
शूद्रो वैश्यत्वं क्षत्रियत्वं च वैश्यः ।
वृत्तश्लाघी क्षत्रियो ब्राह्मणत्वं
स्वर्गं पुण्यं ब्राह्मणः साधुवृत्तः ॥ २३

इति श्रीमहाभारते अनुशासनपर्वणि
एकोनविंशाधिकशततमोऽध्यायः ॥ ११९ ॥

१२०

भीष्म उवाच ।

क्षत्रधर्ममनुप्राप्तः स्मरन्नेव स वीर्यवान् ।
त्यक्त्वा स कीटतां राजंश्चचार विपुलं तपः ॥ १
तस्य धर्मार्थविदुषो दृष्ट्वा तद्विपुलं तपः ।
आजगाम द्विजश्रेष्ठः कृष्णद्वैपायनस्तदा ॥ २

व्यास उवाच ।

क्षात्रं चैव व्रतं कीट भूतानां परिपालनम् ।
क्षात्रं चैव व्रतं ध्यायंस्ततो विप्रत्वमेष्यसि ॥ ३
पाहि सर्वाः प्रजाः सम्यक्शुभाशुभविदात्मवान् ।
शुभैः संविभजन्कामैरशुभानां च पावनैः ॥ ४
आत्मवान्भव सुप्रीतः स्वधर्मचरणे रतः ।
क्षात्रीं तनुं समुत्सृज्य ततो विप्रत्वमेष्यसि ॥ ५

भीष्म उवाच ।

सोऽथारण्यमभिप्रेत्य पुनरेव युधिष्ठिर ।
महर्षेर्वचनं श्रुत्वा प्रजा धर्मेण पाल्य च ॥ ६

अचिरेणैव कालेन कीटः पार्थिवसत्तम ।
प्रजापालनधर्मेण प्रेत्य विप्रत्वमागतः ॥ ७
ततस्तं ब्राह्मणं दृष्ट्वा पुनरेव महायशाः ।
आजगाम महाप्राज्ञः कृष्णद्वैपायनस्तदा ॥ ८

व्यास उवाच ।

भो भो विप्रर्षभ श्रीमन्मा व्यथिष्ठाः कथंचन ।
शुभकृच्छुभयोनीषु पापकृत्पापयोनिषु ।
उपपद्यति धर्मज्ञ यथाधर्मं यथागमम् ॥ ९
तस्मान्मृत्युभयात्कीट मा व्यथिष्ठाः कथंचन ।
धर्मलोपाद्भयं ते स्यात्तस्माद्धर्मं चरोत्तमम् ॥ १०

कीट उवाच ।

सुखात्सुखतरं प्राप्तो भगवंस्त्वत्कृते ह्यहम् ।
धर्ममूलां श्रियं प्राप्य पाप्मा नष्ट इहाद्य मे ॥ ११

भीष्म उवाच ।

भगवद्वचनात्कीटो ब्राह्मण्यं प्राप्य दुर्लभम् ।
अकरोत्पृथिवीं राजन्यज्ञयूपशताङ्किताम् ।
ततः सालोक्यमगमद्ब्रह्मणो ब्रह्मवित्तमः ॥ १२
अवाप च परं कीटः पार्थ ब्रह्म सनातनम् ।
स्वकर्मफलनिर्वृत्तं व्यासस्य वचनात्तदा ॥ १३
तेऽपि यस्मात्स्वभावेन हताः क्षत्रियपुंगवाः ।
संप्राप्तास्ते गतिं पुण्यां तस्मान्मा शोच पुत्रक ॥१४

इति श्रीमहाभारते अनुशासनपर्वणि
विंशत्यधिकशततमोऽध्यायः ॥ १२० ॥

१२१

युधिष्ठिर उवाच ।

विद्या तपश्च दानं च किमेतेषां विशिष्यते ।
पृच्छामि त्वा सतां श्रेष्ठ तन्मे ब्रूहि पितामह ॥ १

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
मैत्रेयस्य च संवादं कृष्णद्वैपायनस्य च ॥ २
कृष्णद्वैपायनो राजन्नज्ञातचरितं चरन् ।
वाराणस्यामुपातिष्ठन्मैत्रेयं स्वैरिणीकुले ॥ ३
तमुपस्थितमासीनं ज्ञात्वा स मुनिसत्तमम् ।
अर्चित्वा भोजयामास मैत्रेयोऽशनमुत्तमम् ॥ ४
तदन्नमुत्तमं भुक्त्वा गुणवत्सार्वकामिकम् ।
प्रतिष्ठमानोऽस्मयत प्रीतः कृष्णो महामनाः ॥ ५
तमुत्स्मयन्तं संप्रेक्ष्य मैत्रेयः कृष्णमब्रवीत् ।
कारणं ब्रूहि धर्मात्मन्योऽस्मयिष्ठाः कुतश्च ते ।
तपस्विनो धृतिमतः प्रमोदः समुपागतः ॥ ६
एतत्पृच्छामि ते विद्वन्नभिवाद्य प्रणम्य च ।
आत्मनश्च तपोभाग्यं महाभाग्यं तथैव च ॥ ७
पृथगाचरतस्तात पृथगात्मनि चात्मनोः ।
अल्पान्तरमहं मन्ये विशिष्टमपि वा त्वया ॥ ८

व्यास उवाच ।

अतिच्छेदातिवादाभ्यां स्मयोऽयं समुपागतः ।
असत्यं वेदवचनं कस्माद्वेदोऽनृतं वदेत् ॥ ९
त्रीण्येव तु पदान्याहुः पुरुषस्योत्तमं व्रतम् ।
न द्रुह्येच्चैव दद्याच्च सत्यं चैव परं वदेत् ।
इदानीं चैव नः कृत्यं पुरस्ताच्च परं स्मृतम् ॥ १०
अल्पोऽपि तादृशो दायो भवत्युत महाफलः ।
तृषिताय च यद्दत्तं हृदयेनानसूयता ॥ ११
तृषितस्तृषिताय त्वं दत्त्वैतदशनं मम ।
अजैषीर्महतो लोकान्महायज्ञैरिवाभिभो ।
अतो दानपवित्रेण प्रीतोऽस्मि तपसैव च ॥ १२
पुण्यस्यैव हि ते गन्धः पुण्यस्यैव च दर्शनम् ।
पुण्यश्च वाति गन्धस्ते मन्ये कर्मविधानतः ॥ १३
अधिकं मार्जनात्तात तथैवाप्यनुलेपनात् ।
शुभं सर्वपवित्रेभ्यो दानमेव परं भवेत् ॥ १४
यानीमान्युत्तमानीह वेदोक्तानि प्रशंससि ।

तेषां श्रेष्ठतमं दानमिति मे नास्ति संशयः ॥ १५
दानकृद्भिः कृतः पन्था येन यान्ति मनीषिणः ।
ते हि प्राणस्य दातारस्तेषु धर्मः प्रतिष्ठितः ॥ १६
यथा वेदाः स्वधीताश्च यथा चेन्द्रियसंयमः ।
सर्वत्यागो यथा चेह तथा दानमनुत्तमम् ॥ १७
त्वं हि तात सुखादेव सुखमेष्यसि शोभनम् ।
सुखात्सुखतरप्राप्तिमाप्नुते मतिमान्नरः ॥ १८
तन्नः प्रत्यक्षमेवेदमुपलब्धमसंशयम् ।
श्रीमन्तमाप्नुवन्त्यर्था दानं यज्ञस्तथा सुखम् ॥ १९
सुखादेव परं दुःखं दुःखादन्यत्परं सुखम् ।
दृश्यते हि महाप्राज्ञ नियतं वै स्वभावतः ॥ २०
त्रिविधानीह वृत्तानि नरस्याहुर्मनीषिणः ।
पुण्यमन्यत्पापमन्यन्न पुण्यं न च पापकम् ॥ २१
न वृत्तं मन्यतेऽन्यस्य मन्यतेऽन्यस्य पापकम् ।
तथा स्वकर्मनिर्वृत्तं न पुण्यं न च पापकम् ॥ २२
रमस्वैधस्व मोदस्व देहि चैव यजस्व च ।
न त्वामभिभविष्यन्ति वैद्या न च तपस्विनः ॥२३

इति श्रीमहाभारते अनुशासनपर्वणि
एकविंशत्यधिकशततमोऽध्यायः ॥ १२१ ॥

१२२

भीष्म उवाच ।

एवमुक्तः प्रत्युवाच मैत्रेयः कर्मपूजकः ।
अत्यन्तं श्रीमति कुले जातः प्राज्ञो बहुश्रुतः ॥ १
असंशयं महाप्राज्ञ यथैवात्थ तथैव तत् ।
अनुज्ञातस्तु भवता किंचिद्ब्रूयामहं विभो ॥ २

व्यास उवाच ।

यद्यदिच्छसि मैत्रेय यावद्यावद्यथा तथा ।
ब्रूहि तावन्महाप्राज्ञ शुश्रूषे वचनं तव ॥ ३

मैत्रेय उवाच ।

निर्दोषं निर्मलं चैव वचनं दानसंहितम् ।
विद्यातपोभ्यां हि भवान्भावितात्मा न संशयः ॥४
भवतो भावितात्मत्वाद्दायोऽयं सुमहान्मम ।
भूयो बुद्ध्यानुपश्यामि सुसमृद्धतपा इव ॥ ५
अपि मे दर्शनादेव भवतोऽभ्युदयो महान् ।
मन्ये भवत्प्रसादोऽयं तद्धि कर्म स्वभावतः ॥ ६
तपः श्रुतं च योनिश्चाप्येतद्ब्राह्मण्यकारणम् ।
त्रिभिर्गुणैः समुदितस्ततो भवति वै द्विजः ॥ ७
तस्मिंस्तृप्ते च तृप्यन्ते पितरो दैवतानि च ।
न हि श्रुतवतां किंचिदधिकं ब्राह्मणादृते ॥ ८
यथा हि सुकृते क्षेत्रे फलं विन्दति मानवः ।
एवं दत्त्वा श्रुतवति फलं दाता समश्नुते ॥ ९
ब्राह्मणश्चेन्न विद्येत श्रुतवृत्तोपसंहितः ।
प्रतिग्रहीता दानस्य मोघं स्याद्धनिनां धनम् ॥ १०
अदन्ह्यविद्वान्हन्त्यन्नमद्यमानं च हन्ति तम् ।
तं च हन्यति यस्यान्नं स हत्वा हन्यतेऽबुधः ॥११
प्रभुर्ह्यन्नमदन्विद्वान्पुनर्जनयतीश्वरः ।
स चान्नाज्जायते तस्मात्सूक्ष्म एव व्यतिक्रमः ॥१२
यदेव ददतः पुण्यं तदेव प्रतिगृह्णतः ।
न ह्येकचक्रं वर्तेत इत्येवमृषयो विदुः ॥ १३
यत्र वै ब्राह्मणाः सन्ति श्रुतवृत्तोपसंहिताः ।
तत्र दानफलं पुण्यमिह चामुत्र चाश्नुते ॥ १४
ये योनिशुद्धाः सततं तपस्यभिरता भृशम् ।
दानाध्ययनसंपन्नास्ते वै पूज्यतमाः सदा ॥ १५
तैर्हि सद्भिः कृतः पन्थाश्चेतयानो न मुह्यते ।
ते हि स्वर्गस्य नेतारो यज्ञवाहाः सनातनाः ॥ १६

इति श्रीमहाभारते अनुशासनपर्वणि
द्वाविंशत्यधिकशततमोऽध्यायः ॥ १२२ ॥

१२३

भीष्म उवाच ।

एवमुक्तः स भगवान्मैत्रेयं प्रत्यभाषत ।
दिष्ट्यैवं त्वं विजानासि दिष्ट्या ते बुद्धिरीदृशी ।
लोको ह्ययं गुणानेव भूयिष्ठं स्म प्रशंसति ॥ १
रूपमानवयोमानश्रीमानाश्चाप्यसंशयम् ।
दिष्ट्या नाभिभवन्ति त्वां दैवस्तेऽयमनुग्रहः ।
यत्ते भृशतरं दानाद्वर्तयिष्यामि तच्छृणु ॥ २
यानीहागमशास्त्राणि याश्च काश्चित्प्रवृत्तयः ।
तानि वेदं पुरस्कृत्य प्रवृत्तानि यथाक्रमम् ॥ ३
अहं दानं प्रशंसामि भवानपि तपःश्रुते ।
तपः पवित्रं वेदस्य तपः स्वर्गस्य साधनम् ॥ ४
तपसा महदाप्नोति विद्यया चेति नः श्रुतम् ।
तपसैव चापनुदेद्यच्चान्यदपि दुष्कृतम् ॥ ५
यद्यद्धि किंचित्संधाय पुरुषस्तप्यते तपः ।
सर्वमेतदवाप्नोति ब्राह्मणो वेदपारगः ॥ ६
दुरन्वयं दुष्प्रधृष्यं दुरापं दुरतिक्रमम् ।
सर्वं वै तपसाभ्येति तपो हि बलवत्तरम् ॥ ७
सुरापोऽसंमतादायी भ्रूणहा गुरुतल्पगः ।
तपसा तरते सर्वमेनसश्च प्रमुच्यते ॥ ८
सर्वविद्यस्तु चक्षुष्मानपि यादृशतादृशः ।
तपस्विनौ च तावाहुस्ताभ्यां कार्यं सदा नमः ॥ ९
सर्वे पूज्याः श्रुतधनास्तथैव च तपस्विनः ।
दानप्रदाः सुखं प्रेत्य प्राप्नुवन्तीह च श्रियम् ॥१०
इमं च ब्रह्मलोकं च लोकं च बलवत्तरम् ।
अन्नदानैः सुकृतिनः प्रतिपद्यन्ति लौकिकाः ॥ ११
पूजिताः पूजयन्त्येतान्मानिता मानयन्ति च ।
अदाता यत्र यत्रैति सर्वतः संप्रणुद्यते ॥ १२
अकर्ता चैव कर्ता च लभते यस्य यादृशम् ।
यथैवोर्ध्वं यथैवाक्च त्वं लोकमभियास्यसि ॥ १३
प्राप्स्यसे त्वन्नपानानि यानि दास्यसि कानिचित् ।
मेधाव्यसि कुले जातः श्रुतवाननृशंसवान् ॥ १४
कौमारदारव्रतवान्मैत्रेय निरतो भव ।
एतद्गृहाण प्रथमं प्रशस्तं गृहमेधिनाम् ॥ १५
यो भर्ता वासितातुष्टो भर्तुस्तुष्टा च वासिता ।
यस्मिन्नेवं कुले सर्वं कल्याणं तत्र वर्तते ॥ १६
अद्भिर्गात्रान्मलमिव तमोऽग्निप्रभया यथा ।
दानेन तपसा चैव सर्वपापमपोह्यते ॥ १७
स्वस्ति प्राप्नुहि मैत्रेय गृहान्साधु व्रजाम्यहम् ।
एतन्मनसि कर्तव्यं श्रेय एवं भविष्यति ॥ १८
तं प्रणम्याथ मैत्रेयः कृत्वा चाभिप्रदक्षिणम् ।
स्वस्ति प्राप्नोतु भगवानित्युवाच कृताञ्जलिः ॥ १९

इति श्रीमहाभारते अनुशासनपर्वणि
त्रयोविंशत्यधिकशततमोऽध्यायः ॥ १२३ ॥

१२४

युधिष्ठिर उवाच ।

सत्स्त्रीणां समुदाचारं सर्वधर्मभृतां वर ।
श्रोतुमिच्छाम्यहं त्वत्तस्तं मे ब्रूहि पितामह ॥ १

भीष्म उवाच ।

सर्वज्ञां सर्वधर्मज्ञां देवलोके मनस्विनीम् ।
कैकेयी सुमना नाम शाण्डिलीं पर्यपृच्छत ॥ २
केन वृत्तेन कल्याणि समाचारेण केन वा ।
विधूय सर्वपापानि देवलोकं त्वमागता ॥ ३
हुताशनशिखेव त्वं ज्वलमाना स्वतेजसा ।
सुता ताराधिपस्येव प्रभया दिनमागता ॥ ४
अरजांसि च वस्त्राणि धारयन्ती गतक्लमा ।
विमानस्था शुभे भासि सहस्रगुणमोजसा ॥ ५
न त्वमल्पेन तपसा दानेन नियमेन वा ।
इमं लोकमनुप्राप्ता तस्मात्तत्त्वं वदस्व मे ॥ ६
इति पृष्टा सुमनया मधुरं चारुहासिनी ।

शाण्डिली निभृतं वाक्यं सुमनामिदमब्रवीत् ॥ ७
नाहं काषायवसना नापि वल्कलधारिणी ।
न च मुण्डा न जटिला भूत्वा देवत्वमागता ॥ ८
अहितानि च वाक्यानि सर्वाणि परुषाणि च ।
अप्रमत्ता च भर्तारं कदाचिन्नाहमब्रुवम् ॥ ९
देवतानां पितॄणां च ब्राह्मणानां च पूजने ।
अप्रमत्ता सदायुक्ता श्वश्रूश्वशुरवर्तिनी ॥ १०
पैशुन्ये न प्रवर्तामि न ममैतन्मनोगतम् ।
अद्वारे न च तिष्ठामि चिरं न कथयामि च ॥ ११
असद्वा हसितं किंचिदहितं वापि कर्मणा ।
रहस्यमरहस्यं वा न प्रवर्तामि सर्वथा ॥ १२
कार्यार्थे निर्गतं चापि भर्तारं गृहमागतम् ।
आसनेनोपसंयोज्य पूजयामि समाहिता ॥ १३
यद्यच्च नाभिजानाति यद्भोज्यं नाभिनन्दति ।
भक्ष्यं वाप्यथ वा लेह्यं तत्सर्वं वर्जयाम्यहम् ॥ १४
कुटुम्बार्थे समानीतं यत्किंचित्कार्यमेव तु ।
प्रातरुत्थाय तत्सर्वं कारयामि करोमि च ॥ १५
प्रवासं यदि मे भर्ता याति कार्येण केनचित् ।
मङ्गलैर्बहुभिर्युक्ता भवामि नियता सदा ॥ १६
अञ्जनं रोचनां चैव स्नानं माल्यानुलेपनम् ।
प्रसाधनं च निष्क्रान्ते नाभिनन्दामि भर्तरि ॥ १७
नोत्थापयामि भर्तारं सुखसुप्तमहं सदा ।
आतुरेष्वपि कार्येषु तेन तुष्यति मे मनः ॥ १८
नायासयामि भर्तारं कुटुम्बार्थे च सर्वदा ।
गुप्तगुह्या सदा चास्मि सुसंमृष्टनिवेशना ॥ १९
इमं धर्मपथं नारी पालयन्ती समाहिता ।
अरुन्धतीव नारीणां स्वर्गलोके महीयते ॥ २०

भीष्म उवाच ।

एतदाख्याय सा देवी सुमनायै तपस्विनी ।
पतिधर्मं महाभागा जगामादर्शनं तदा ॥ २१
यश्चेदं पाण्डवाख्यानं पठेत्पर्वणि पर्वणि ।
स देवलोकं संप्राप्य नन्दने सुसुखं वसेत् ॥ २२

इति श्रीमहाभारते अनुशासनपर्वणि
चतुर्विंशत्यधिकशततमोऽध्यायः ॥ १२४ ॥

१२५

युधिष्ठिर उवाच ।

साम्ना वापि प्रदाने वा ज्यायः किं भवतो मतम् ।
प्रब्रूहि भरतश्रेष्ठ यदत्र व्यतिरिच्यते ॥ १

भीष्म उवाच ।

साम्ना प्रसाद्यते कश्चिद्दानेन च तथापरः ।
पुरुषः प्रकृतिं ज्ञात्वा तयोरेकतरं भजेत् ॥ २
गुणांस्तु शृणु मे राजन्सान्त्वस्य भरतर्षभ ।
दारुणान्यपि भूतानि सान्त्वेनाराधयेद्यथा ॥ ३
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
गृहीत्वा रक्षसा मुक्तो द्विजातिः कानने यथा ॥ ४
कश्चित्तु बुद्धिसंपन्नो ब्राह्मणो विजने वने ।
गृहीतः कृच्छ्रमापन्नो रक्षसा भक्षयिष्यता ॥ ५
स बुद्धिश्रुतसंपन्नस्तं दृष्ट्वातीव भीषणम् ।
सामैवास्मिन्प्रयुयुजे न मुमोह न विव्यथे ॥ ६
रक्षस्तु वाचा संपूज्य प्रश्नं पप्रच्छ तं द्विजम् ।
मोक्ष्यसे ब्रूहि मे प्रश्नं केनास्मि हरिणः कृशः ॥ ७
मुहूर्तमथ संचिन्त्य ब्राह्मणस्तस्य रक्षसः ।
आभिर्गाथाभिरव्यग्रः प्रश्नं प्रतिजगाद ह ॥ ८
विदेशस्थो विलोकस्थो विना नूनं सुहृज्जनैः ।
विषयानतुलान्भुङ्क्षे तेनासि हरिणः कृशः ॥ ९
नूनं मित्राणि ते रक्षः साधूपचरितान्यपि ।
स्वदोषादपरज्यन्ते तेनासि हरिणः कृशः ॥ १०
धनैश्वर्याधिकाः स्तब्धास्त्वद्गुणैः परमावराः ।
अवजानन्ति नूनं त्वां तेनासि हरिणः कृशः ॥ ११
गुणवान्विगुणानन्यान्नूनं पश्यसि सत्कृतान् ।

प्राज्ञोऽप्राज्ञान्विनीतात्मा तेनासि हरिणः कृशः॥१२
अवृत्त्या क्लिश्यमानोऽपि वृत्त्युपायान्विगर्हयन् ।
माहात्म्याद्व्यथसे नूनं तेनासि हरिणः कृशः ॥१३
संपीड्यात्मानमार्यत्वात्त्वया कश्चिदुपस्कृतः ।
जितं त्वां मन्यते साधो तेनासि हरिणः कृशः ॥१४
क्लिश्यमानान्विमार्गेषु कामक्रोधावृतात्मनः ।
मन्ये नु ध्यायसि जनांस्तेनासि हरिणः कृशः ॥
प्राज्ञैः संभावितो नूनं नप्राज्ञैरुपसंहितः ।
ह्रीमानमर्षी दुर्वृत्तैस्तेनासि हरिणः कृशः ॥ १६
नूनं मित्रमुखः शत्रुः कश्चिदार्यवदाचरन् ।
वञ्चयित्वा गतस्त्वां वै तेनासि हरिणः कृशः ॥१७
प्रकाशार्थगतिर्नूनं रहस्यकुशलः कृती ।
तज्ज्ञैर्न पूज्यसे नूनं तेनासि हरिणः कृशः ॥ १८
असत्स्वभिनिविष्टेषु ब्रुवतो मुक्तसंशयम् ।
गुणास्ते न विराजन्ते तेनासि हरिणः कृशः॥ १९
धनबुद्धिश्रुतैर्हीनः केवलं तेजसान्वितः ।
महत्प्रार्थयसे नूनं तेनासि हरिणः कृशः ॥ २०
तपःप्रणिहितात्मानं मन्ये त्वारण्यकाङ्क्षिणम् ।
बन्धुवर्गो न गृह्णाति तेनासि हरिणः कृशः ॥ २१
नूनमर्थवतां मध्ये तव वाक्यमनुत्तमम् ।
न भाति कालेऽभिहितं तेनासि हरिणः कृशः ॥२२
दृढपूर्वश्रुतं मूर्खं कुपितं हृदयप्रियम् ।
अनुनेतुं न शक्नोषि तेनासि हरिणः कृशः ॥ २३
नूनमासंजयित्वा ते कृत्ये कस्मिंश्चिदीप्सिते ।
कश्चिदर्थयतेऽत्यर्थं तेनासि हरिणः कृशः ॥ २४
नूनं त्वा स्वगुणापेक्षं पूजयानं सुहृद्ब्रुवम् ।
मथार्थ इति जानाति तेनासि हरिणः कृशः ॥ २५
अन्तर्गतमभिप्रायं न नूनं लज्जयेच्छसि ।
विवक्तुं प्राप्तिशैथिल्यात्तेनासि हरिणः कृशः ॥ २६
नानाबुद्धिरुचील्लोँके मनुष्यान्नूनमिच्छसि ।
ग्रहीतुं स्वगुणैः सर्वांस्तेनासि हरिणः कृशः ॥ २७
अविद्वान्भीरुरल्पार्थो विद्याविक्रमदानजम् ।
यशः प्रार्थयसे नूनं तेनासि हरिणः कृशः ॥ २८
चिराभिलषितं किंचित्फलमप्राप्तमेव ते ।
कृतमन्यैरपहृतं तेनासि हरिणः कृशः ॥ २९
नूनमात्मकृतं दोषमपश्यन्किंचिदात्मनि ।
अकारणेऽभिशस्तोऽसि तेनासि हरिणः कृशः ॥३०
सुहृदामप्रमत्तानामप्रमोक्ष्यार्थहानिजम् ।
दुःखमर्थगुणैर्हीनं तेनासि हरिणः कृशः ॥ ३१
साधून्गृहस्थान्दृष्ट्वा च तथासाधून्वनेचरान् ।
मुक्तांश्चावसथे सक्तांस्तेनासि हरिणः कृशः ॥ ३२
धर्म्यमर्थं च काले च देशे चाभिहितं वचः ।
न प्रतिष्ठति ते नूनं तेनासि हरिणः कृशः ॥ ३३
दत्तानकुशलैरर्थान्मनीषी संजिजीविषुः ।
प्राप्य वर्तयसे नूनं तेनासि हरिणः कृशः ॥ ३४
पापान्विवर्धतो दृष्ट्वा कल्याणांश्चावसीदतः ।
ध्रुवं मृगयसे योग्यं तेनासि हरिणः कृशः ॥ ३५
परस्परविरुद्धानां प्रियं नूनं चिकीर्षसि ।
सुहृदामविरोधेन तेनासि हरिणः कृशः ॥ ३६
श्रोत्रियांश्च विकर्मस्थान्प्राज्ञांश्चाप्यजितेन्द्रियान् ।
मन्येऽनुध्यायसि जनांस्तेनासि हरिणः कृशः ॥३७
एवं संपूजितं रक्षो विप्रं तं प्रत्यपूजयत् ।
सखायमकरोच्चैनं संयोज्यार्थैर्मुमोच ह ॥ ३८

इति श्रीमहाभारते अनुशासनपर्वणि
पञ्चविंशत्यधिकशततमोऽध्यायः ॥ १२५ ॥

१२६

युधिष्ठिर उवाच ।

पितामह महाप्राज्ञ सर्वशास्त्रविशारद ।
आगमैर्बहुभिः स्फीतो भवान्नः प्रथितः कुले ॥ १
त्वत्तो धर्मार्थसंयुक्तमायत्यां च सुखोदयम् ।

आश्चर्यभूतं लोकस्य श्रोतुमिच्छाम्यरिंदम ॥ २
अयं च कालः संप्राप्तो दुर्लभज्ञातिबान्धवः ।
शास्ता च न हि नः कश्चित्त्वामृते भरतर्षभ ॥ ३
यदि तेऽहमनुग्राह्यो भ्रातृभिः सहितोऽनघ ।
वक्तुमर्हसि नः प्रश्नं यत्त्वां पृच्छामि पार्थिव ॥ ४
अयं नारायणः श्रीमान्सर्वपार्थिवसंमतः ।
भवन्तं बहुमानेन प्रश्रयेण च सेवते ॥ ५
अस्य चैव समक्षं त्वं पार्थिवानां च सर्वशः ।
भ्रातॄणां च प्रियार्थं मे स्नेहाद्भाषितुमर्हसि ॥ ६

वैशंपायन उवाच ।

तस्य तद्वचनं श्रुत्वा स्नेहादागतसंभ्रमः ।
भीष्मो भागीरथीपुत्र इदं वचनमब्रवीत् ॥ ७
हन्त ते कथयिष्यावि कथामतिमनोरमाम् ।
अस्य विष्णोः पुरा राजन्प्रभावोऽयं मया श्रुतः ॥८
यश्च गोवृषभाङ्कस्य प्रभावस्तं च मे शृणु ।
रुद्राण्याः संशयो यश्च दंपत्योस्तं च मे शृणु ॥ ९
व्रतं चचार धर्मात्मा कृष्णो द्वादशवार्षिकम् ।
दीक्षितं चागतौ द्रष्टुमुभौ नारदपर्वतौ ॥ १०
कृष्णद्वैपायनश्चैव धौम्यश्च जपतां वरः ।
देवलः काश्यपश्चैव हस्तिकाश्यप एव च ॥ ११
अपरे ऋषयः सन्तो दीक्षादमसमन्विताः ।
शिष्यैरनुगताः सर्वे देवकल्पैस्तपोधनैः ॥ १२
तेषामतिथिसत्कारमर्चनीयं कुलोचितम् ।
देवकीतनयः प्रीतो देवकल्पमकल्पयत् ॥ १३
हरितेषु सुवर्णेषु बर्हिष्केषु नवेषु च ।
उपोपविविशुः प्रीता विष्टरेषु महर्षयः ॥ १४
कथाश्चक्रुस्ततस्ते तु मधुरा धर्मसंहिताः ।
राजर्षीणां सुराणां च ये वसन्ति तपोधनाः ॥ १५
ततो नारायणं तेजो व्रतचर्येन्धनोत्थितम् ।
वक्त्रान्निःसृत्य कृष्णस्य वह्निरद्भुतकर्मणः ॥ १६
सोऽग्निर्ददाह तं शैलं सद्रुमं सलताक्षुपम् ।
सपक्षिमृगसंघातं सश्वापदसरीसृपम् ॥ १७
मृगैश्च विविधाकारैर्हाहाभूतमचेतनम् ।
शिखरं तस्य शैलस्य मथितं दीप्तदर्शनम् ॥ १८
स तु वह्निर्महाज्वालो दग्ध्वा सर्वमशेषतः ।
विष्णोः समीपमागम्य पादौ शिष्यवदस्पृशत् ॥१९
ततो विष्णुर्वनं दृष्ट्वा निर्दग्धमरिकर्शनः ।
सौम्यैर्दृष्टिनिपातैस्तत्पुनः प्रकृतिमानयत् ॥ २०
तथैव स गिरिर्भूयः प्रपुष्पितलताद्रुमः ।
सपक्षिगणसंघुष्टः सश्वापदसरीसृपः ॥ २१
तदद्भुतमचिन्त्यं च दृष्ट्वा मुनिगणस्तदा ।
विस्मितो हृष्टरोमा च बभूवास्राविलेक्षणः ॥ २२
ततो नारायणो दृष्ट्वा तानृषीन्विस्मयान्वितान् ।
प्रश्रितं मधुरं स्निग्धं पप्रच्छ वदतां वरः ॥ २३
किमस्य ऋषिपूगस्य त्यक्तसङ्गस्य नित्यशः ।
निर्ममस्यागमवतो विस्मयः समुपागतः ॥ २४
एतं मे संशयं सर्वं याथातथ्यमनिन्दिताः ।
ऋषयो वक्तुमर्हन्ति निश्चितार्थं तपोधनाः ॥ २५

ऋषय ऊचुः ।

भवान्विसृजते लोकान्भवान्संहरते पुनः ।
भवाञ्शीतं भवानुष्णं भवानेव प्रवर्षति ॥ २६
पृथिव्यां यानि भूतानि स्थावराणि चराणि च ।
तेषां पिता त्वं माता च प्रभुः प्रभव एव च ॥२७
एतन्नो विस्मयकरं प्रशंस मधुसूदन ।
त्वमेवार्हसि कल्याण वक्तुं वह्नेर्विनिर्गमम् ॥ २८
ततो विगतसंत्रासा वयमप्यरिकर्शन ।
यच्छ्रुतं यच्च दृष्टं नस्तत्प्रवक्ष्यामहे हरे ॥ २९

वासुदेव उवाच ।

एतत्तद्वैष्णवं तेजो मम वक्त्राद्विनिःसृतम् ।
कृष्णवर्त्मा युगान्ताभो येनायं मथितो गिरिः ॥३०

ऋषयश्चार्तिमापन्ना जितक्रोधा जितेन्द्रियाः ।
भवन्तो व्यथिताश्चासन्देवकल्पास्तपोधनाः ॥ ३१
व्रतचर्यापरीतस्य तपस्विव्रतसेवया ।
मम वह्निः समुद्भूतो न वै व्यथितुमर्हथ ॥ ३२
व्रतं चर्तुमिहायातस्त्वहं गिरिमिमं शुभम् ।
पुत्रं चात्मसमं वीर्ये तपसा स्रष्टुमागतः ॥ ३३
ततो ममात्मा यो देहे सोऽग्निर्भूत्वा विनिःसृतः ।
गतश्च वरदं द्रष्टुं सर्वलोकपितामहम् ॥ ३४
तेन चात्मानुशिष्टो मे पुत्रत्वे मुनिसत्तमाः ।
तेजसोऽर्धेन पुत्रस्ते भवितेति वृषध्वजः ॥ ३५
सोऽयं वह्निरुपागम्य पादमूले ममान्तिकम् ।
शिष्यवत्परिचर्यार्थं शान्तः प्रकृतिमागतः ॥ ३६
एतदस्य रहस्यं वः पद्मनाभस्य धीमतः ।
मया प्रेम्णा समाख्यातं न भीः कार्या तपोधनाः ॥
सर्वत्र गतिरव्यग्रा भवतां दीर्घदर्शनाः ।
तपस्विव्रतसंदीप्ता ज्ञानविज्ञानशोभिताः ॥ ३८
यच्छ्रुतं यच्च वो दृष्टं दिवि वा यदि वा भुवि ।
आश्चर्यं परमं किंचित्तद्भवन्तो ब्रुवन्तु मे ॥ ३९
तस्यामृतनिकाशस्य वाङ्मधोरस्ति मे स्पृहा ।
भवद्भिः कथितस्येह तपोवननिवासिभिः ॥ ४०
यद्यप्यहमदृष्टं वा दिव्यमद्भुतदर्शनम् ।
दिवि वा भुवि वा किंचित्पश्याम्यमलदर्शनाः ॥४१
प्रकृतिः सा मम परा न क्वचित्प्रतिहन्यते ।
न चात्मगतमैश्वर्यमाश्चर्यं प्रतिभाति मे ॥ ४२
श्रद्धेयः कथितो ह्यर्थः सज्जनश्रवणं गतः ।
चिरं तिष्ठति मेदिन्यां शैले लेख्यमिवार्पितम् ॥४३
तदहं सज्जनमुखान्निःसृतं तत्समागमे ।
कथयिष्याम्यहरहर्बुद्धिदीपकरं नृणाम् ॥ ४४
ततो मुनिगणाः सर्वे प्रश्रिताः कृष्णसंनिधौ ।
नेत्रैः पद्मदलप्रख्यैरपश्यन्त जनार्दनम् ॥ ४५
वर्धयन्तस्तथैवान्ये पूजयन्तस्तथापरे ।
वाग्भिर्ऋग्भूषितार्थाभिः स्तुवन्तो मधुसूदनम् ॥४६
ततो मुनिगणाः सर्वे नारदं देवदर्शनम् ।
तदा नियोजयामासुर्वचने वाक्यकोविदम् ॥ ४७
यदाश्चर्यमचिन्त्यं च गिरौ हिमवति प्रभो ।
अनुभूतं मुनिगणैस्तीर्थयात्रापरायणैः ॥ ४८
तद्भवानृषिसंघस्य हितार्थं सर्वचोदितः ।
यथादृष्टं हृषीकेशे सर्वमाख्यातुमर्हति ॥ ४९
एवमुक्तः स मुनिभिर्नारदो भगवानृषिः ।
कथयामास देवर्षिः पूर्ववृत्तां कथां शुभाम् ॥ ५०

इति श्रीमहाभारते अनुशासनपर्वणि
षड्विंशत्यधिकशततमोऽध्यायः ॥ १२६ ॥

१२७

भीष्म उवाच ।

ततो नारायणसुहृन्नारदो भगवानृषिः ।
शंकरस्योमया सार्धं संवादं प्रत्यभाषत ॥ १
तपश्चचार धर्मात्मा वृषभाङ्कः सुरेश्वरः ।
पुण्ये गिरौ हिमवति सिद्धचारणसेविते ॥ २
नानौषधियुते रम्ये नानापुष्पसमाकुले ।
अप्सरोगणसंकीर्णे भूतसंघनिषेविते ॥ ३
तत्र देवो मुदा युक्तो भूतसंघशतैर्वृतः ।
नानारूपैर्विरूपैश्च दिव्यैरद्भुतदर्शनैः ॥ ४
सिंहव्याघ्रगजप्रख्यैः सर्वजातिसमन्वितैः ।
क्रोष्टुकद्वीपिवदनैर्ऋक्षर्षभमुखैस्तथा ॥ ५
उलूकवदनैर्भीमैः श्येनभासमुखैस्तथा ।
नानावर्णमृगप्रख्यैः सर्वजातिसमन्वयैः ।
किंनरैर्देवगन्धर्वैर्यक्षभूतगणैस्तथा ॥ ६
दिव्यपुष्पसमाकीर्णं दिव्यमालाविभूषितम् ।
दिव्यचन्दनसंयुक्तं दिव्यधूपेन धूपितम् ।
तत्सदो वृषभाङ्कस्य दिव्यवादित्रनादितम् ॥ ७

मृदङ्गपणवोद्घुष्टं शङ्खभेरीनिनादितम् ।
नृत्यद्भिर्भूतसंघैश्च बर्हिणैश्च समन्ततः ॥ ८
प्रनृत्ताप्सरसं दिव्यं दिव्यस्त्रीगणसेवितम् ।
दृष्टिकान्तमनिर्देश्यं दिव्यमद्भुतदर्शनम् ॥ ९
स गिरिस्तपसा तस्य भूतेशस्य व्यरोचत ॥ १०
स्वाध्यायपरमैर्विप्रैर्ब्रह्मघोषैर्विनादितः ।
षट्पदैरुपगीतैश्च माधवाप्रतिमो गिरिः ॥ ११
तं महोत्सवसंकाशं भीमरूपधरं पुनः ।
दृष्ट्वा मुनिगणस्यासीत्परा प्रीतिर्जनार्दन ॥ १२
मुनयश्च महाभागाः सिद्धाश्चैवोर्ध्वरेतसः ।
मरुतो वसवः साध्या विश्वेदेवाः सनातनाः ॥ १३
यक्षा नागाः पिशाचाश्च लोकपाला हुताशनाः ।
भावाश्च सर्वे न्यग्भूतास्तत्रैवासन्समागताः ॥ १४
ऋतवः सर्वपुष्पैश्च व्यकिरन्त महाद्भुतैः ।
ओषध्यो ज्वलमानाश्च द्योतयन्ति स्म तद्वनम् ॥१५
विहगाश्च मुदा युक्ताः प्रानृत्यन्व्यनदंश्च ह ।
गिरिपृष्ठेषु रम्येषु व्याहरन्तो जनप्रियाः ॥ १६
तत्र देवो गिरितटे दिव्यधातुविभूषिते ।
पर्यङ्क इव विभ्राजन्नुपविष्टो महामनाः ॥ १७
व्याघ्रचर्माम्बरधरः सिंहचर्मोत्तरच्छदः ।
व्यालयज्ञोपवीती च लोहिताङ्गदभूषणः ॥ १८
हरिश्मश्रुर्जटी भीमो भयकर्ता सुरद्विषाम् ।
अभयः सर्वभूतानां भक्तानां वृषभध्वजः ॥ १९
दृष्ट्वा तमृषयः सर्वे शिरोभिरवनीं गताः ।
विमुक्ताः सर्वपापेभ्यः क्षान्ता विगतकल्मषाः ॥२०
तस्य भूतपतेः स्थानं भीमरूपधरं बभौ ।
अप्रधृष्यतरं चैव महोरगसमाकुलम् ॥ २१
क्षणेनैवाभवत्सर्वमद्भुतं मधुसूदन ।
तत्सदो वृषभाङ्कस्य भीमरूपधरं बभौ ॥ २२
तमभ्ययाच्छैलसुता भूतस्त्रीगणसंवृता ।
हरतुल्याम्बरधरा समानव्रतचारिणी ॥ २३
बिभ्रती कलशं रौक्मं सर्वतीर्थजलोद्भवम् ।
गिरिस्रवाभिः पुण्याभिः सर्वतोऽनुगता शुभा ॥२४
पुष्पवृष्ट्याभिवर्षन्ती गन्धैर्बहुविधैस्तथा ।
सेवन्ती हिमवत्पार्श्वं हरपार्श्वमुपागमत् ॥ २५
ततः स्मयन्ती पाणिभ्यां नर्मार्थं चारुदर्शना ।
हरनेत्रे शुभे देवी सहसा सा समावृणोत् ॥ २६
संवृताभ्यां तु नेत्राभ्यां तमोभूतमचेतनम् ।
निर्होमं निर्वषट्कारं तत्सदः सहसाभवत् ॥ २७
जनश्च विमनाः सर्वो भयत्राससमन्वितः ।
निमीलिते भूतपतौ नष्टसूर्य इवाभवत् ॥ २८
ततो वितिमिरो लोकः क्षणेन समपद्यत ।
ज्वाला च महती दीप्ता ललाटात्तस्य निःसृता ॥२९
तृतीयं चास्य संभूतं नेत्रमादित्यसंनिभम् ।
युगान्तसदृशं दीप्तं येनासौ मथितो गिरिः ॥ ३०
ततो गिरिसुता दृष्ट्वा दीप्ताग्निसदृशेक्षणम् ।
हरं प्रणम्य शिरसा ददर्शायतलोचना ॥ ३१
दह्यमाने वने तस्मिन्ससालसरलद्रुमे ।
सचन्दनवने रम्ये दिव्यौषधिविदीपिते ॥ ३२
मृगयूथैर्द्रुतैर्भीतैर्हरपार्श्वमुपागतैः ।
शरणं चाप्यविन्दद्भिस्तत्सदः संकुलं बभौ ॥ ३३
ततो नभःस्पृशज्ज्वालो विद्युल्लोलार्चिरुज्ज्वलः ।
द्वादशादित्यसदृशो युगान्ताग्निरिवापरः ॥ ३४
क्षणेन तेन दग्धः स हिमवानभवन्नगः ।
सधातुशिखराभोगो दीनदग्धवनौषधिः ॥ ३५
तं दृष्ट्वा मथितं शैलं शैलराजसुता ततः ।
भगवन्तं प्रपन्ना सा साञ्जलिप्रग्रहा स्थिता ॥ ३६
उमां शर्वस्तदा दृष्ट्वा स्त्रीभावागतमार्दवाम् ।
पितुर्दैन्यमनिच्छन्तीं प्रीत्यापश्यत्ततो गिरिम् ॥३७
ततोऽभवत्पुनः सर्वः प्रकृतिस्थः सुदर्शनः ।

प्रहृष्टविहगश्चैव प्रपुष्पितवनद्रुमः ॥ ३८
प्रकृतिस्थं गिरिं दृष्ट्वा प्रीता देवी महेश्वरम् ।
उवाच सर्वभूतानां पतिं पतिमनिन्दिता ॥ ३९
भगवन्सर्वभूतेश शूलपाणे महाव्रत ।
संशयो मे महाञ्जातस्तं मे व्याख्यातुमर्हसि ॥ ४०
किमर्थं ते ललाटे वै तृतीयं नेत्रमुत्थितम् ।
किमर्थं च गिरिर्दग्धः सपक्षिगणकाननः ॥ ४१
किमर्थं च पुनर्देव प्रकृतिस्थः क्षणात्कृतः ।
तथैव द्रुमसंछन्नः कृतोऽयं ते महेश्वर ॥ ४२

महेश्वर उवाच ।

नेत्रे मे संवृते देवि त्वया बाल्यादनिन्दिते ।
नष्टालोकस्ततो लोकः क्षणेन समपद्यत ॥ ४३
नष्टादित्ये तथा लोके तमोभूते नगात्मजे ।
तृतीयं लोचनं दीप्तं सृष्टं ते रक्षता प्रजाः ॥ ४४
तस्य चाक्ष्णो महत्तेजो येनायं मथितो गिरिः ।
त्वत्प्रियार्थं च मे देवि प्रकृतिस्थः क्षणात्कृतः ॥ ४५

उमोवाच ।

भगवन्केन ते वक्त्रं चन्द्रवत्प्रियदर्शनम् ।
पूर्वं तथैव श्रीकान्तमुत्तरं पश्चिमं तथा ॥ ४६
दक्षिणं च मुखं रौद्रं केनोर्ध्वं कपिला जटाः ।
केन कण्ठश्च ते नीलो बर्हिबर्हनिभः कृतः ॥ ४७
हस्ते चैतत्पिनाकं ते सततं केन तिष्ठति ।
जटिलो ब्रह्मचारी च किमर्थमसि नित्यदा ॥ ४८
एतं मे संशयं सर्वं वद भूतपतेऽनघ ।
सधर्मचारिणी चाहं भक्ता चेति वृषध्वज ॥ ४९
एवमुक्तः स भगवाञ्शैलपुत्र्या पिनाकधृक् ।
तस्या धृत्या च बुद्ध्या च प्रीतिमानभवत्प्रभुः ॥
ततस्तामब्रवीद्देवः सुभगे श्रूयतामिति ।
हेतुभिर्यैर्ममैतानि रूपाणि रुचिरानने ॥ ५१

इति श्रीमहाभारते अनुशासनपर्वणि
सप्तविंशत्यधिकशततमोऽध्यायः ॥ १२७ ॥

१२८

महेश्वर उवाच ।

तिलोत्तमा नाम पुरा ब्रह्मणा योषिदुत्तमा ।
तिलं तिलं समुद्धृत्य रत्नानां निर्मिता शुभा ॥ १
साभ्यगच्छत मां देवि रूपेणाप्रतिमा भुवि ।
प्रदक्षिणं लोभयन्ती मां शुभे रुचिरानना ॥ २
यतो यतः सा सुदती मामुपाधावदन्तिके ।
ततस्ततो मुखं चारु मम देवि विनिर्गतम् ॥ ३
तां दिदृक्षुरहं योगाच्चतुर्मूर्तित्वमागतः ।
चतुर्मुखश्च संवृत्तो दर्शयन्योगमात्मनः ॥ ४
पूर्वेण वदनेनाहमिन्द्रत्वमनुशास्मि ह ।
उत्तरेण त्वया सार्धं रमाम्यहमनिन्दिते ॥ ५
पश्चिमं मे मुखं सौम्यं सर्वप्राणिसुखावहम् ।
दक्षिणं भीमसंकाशं रौद्रं संहरति प्रजाः ॥ ६
जटिलो ब्रह्मचारी च लोकानां हितकाम्यया ।
देवकार्यार्थसिद्ध्यर्थं पिनाकं मे करे स्थितम् ॥ ७
इन्द्रेण च पुरा वज्रं क्षिप्तं श्रीकाङ्क्षिणा मम ।
दग्ध्वा कण्ठं तु तद्यातं तेन श्रीकण्ठता मम ॥ ८

उमोवाच ।

वाहनेषु प्रभूतेषु श्रीमत्स्वन्येषु सत्सु ते ।
कथं गोवृषभो देव वाहनत्वमुपागतः ॥ ९

महेश्वर उवाच ।

सुरभीं ससृजे ब्रह्मामृतधेनुं पयोमुचम् ।
सा सृष्टा बहुधा जाता क्षरमाणा पयोऽमृतम् ॥ १०
तस्या वत्समुखोत्सृष्टः फेनो मद्गात्रमागतः ।
ततो दग्धा मया गावो नानावर्णत्वमागताः ॥ ११

ततोऽहं लोकगुरुणा शमं नीतोऽर्थवेदिना ।
वृषं चेमं ध्वजार्थं मे ददौ वाहनमेव च ॥ १२

उमोवाच ।

निवासा बहुरूपास्ते विश्वरूपगुणान्विताः ।
तांश्च संत्यज्य भगवञ्श्मशाने रमसे कथम् ॥ १३
केशास्थिकलिले भीमे कपालघटसंकुले ।
गृध्रगोमायुकलिले चिताग्निशतसंकुले ॥ १४
अशुचौ मांसकलिले वसाशोणितकर्दमे ।
विनिकीर्णामिषचये शिवानादविनादिते ॥ १५

महेश्वर उवाच ।

मेध्यान्वेषी महीं कृत्स्नां विचरामि निशास्वहम् ।
न च मेध्यतरं किंचिच्छ्मशानादिह विद्यते ॥ १६
तेन मे सर्ववासानां श्मशाने रमते मनः ।
न्यग्रोधशाखासंछन्ने निर्भुक्तस्रग्विभूषिते ॥ १७
तत्र चैव रमन्ते मे भूतसंघाः शुभानने ।
न च भूतगणैर्देवि विनाहं वस्तुमुत्सहे ॥ १८
एष वासो हि मे मेध्यः स्वर्गीयश्च मतो हि मे ।
पुण्यः परमकश्चैव मेध्यकामैरुपास्यते ॥ १९

उमोवाच ।

भगवन्सर्वभूतेश सर्वधर्मभृतां वर ।
पिनाकपाणे वरद संशयो मे महानयम् ॥ २०
अयं मुनिगणः सर्वस्तपस्तप इति प्रभो ।
तपोन्वेषकरो लोके भ्रमते विविधाकृतिः ॥ २१
अस्य चैवर्षिसंघस्य मम च प्रियकाम्यया ।
एतं ममेह संदेहं वक्तुमर्हस्यरिंदम ॥ २२
धर्मः किंलक्षणः प्रोक्तः कथं वाचरितुं नरैः ।
शक्यो धर्ममविन्दद्भिर्धर्मज्ञ वद मे प्रभो ॥ २३

नारद उवाच ।

ततो मुनिगणः सर्वस्तां देवीं प्रत्यपूजयत् ।
वाग्भिर्ऋग्भूषितार्थाभिः स्तवैश्चार्थविदां वर ॥ २४

महेश्वर उवाच ।

अहिंसा सत्यवचनं सर्वभूतानुकम्पनम् ।
शमो दानं यथाशक्ति गार्हस्थ्यो धर्म उत्तमः ॥ २५
परदारेष्वसंकल्पो न्यासस्त्रीपरिरक्षणम् ।
अदत्तादानविरमो मधुमांसस्य वर्जनम् ॥ २६
एष पञ्चविधो धर्मो बहुशाखः सुखोदयः ।
देहिभिर्धर्मपरमैः कर्तव्यो धर्मसंचयः ॥ २७

उमोवाच ।

भगवन्संशयं पृष्टस्तं मे व्याख्यातुमर्हसि ।
चातुर्वर्ण्यस्य यो धर्मः स्वे स्वे वर्णे गुणावहः ॥ २८
ब्राह्मणे कीदृशो धर्मः क्षत्रिये कीदृशो भवेत् ।
वैश्ये किंलक्षणो धर्मः शूद्रे किंलक्षणो भवेत् ॥ २९

महेश्वर उवाच ।

न्यायतस्ते महाभागे संशयः समुदीरितः ।
भूमिदेवा महाभागाः सदा लोके द्विजातयः ॥ ३०
उपवासः सदा धर्मो ब्राह्मणस्य न संशयः ।
स हि धर्मार्थमुत्पन्नो ब्रह्मभूयाय कल्पते ॥ ३१
तस्य धर्मक्रिया देवि व्रतचर्या च न्यायतः ।
तथोपनयनं चैव द्विजायैवोपपद्यते ॥ ३२
गुरुदैवतपूजार्थं स्वाध्यायाभ्यसनात्मकः ।
देहिभिर्धर्मपरमैश्चर्तव्यो धर्मसंभवः ॥ ३३

उमोवाच ।

भगवन्संशयो मेऽत्र तं मे व्याख्यातुमर्हसि ।
चातुर्वर्ण्यस्य धर्मं हि नैपुण्येन प्रकीर्तय ॥ ३४

महेश्वर उवाच ।

रहस्यश्रवणं धर्मो वेदव्रतनिषेवणम् ।
व्रतचर्यापरो धर्मो गुरुपादप्रसादनम् ॥ ३५
भैक्षचर्यापरो धर्मो धर्मो नित्योपवासिता ।

नित्यस्वाध्यायिता धर्मो ब्रह्मचर्याश्रमस्तथा ॥ ३६
गुरुणा त्वभ्यनुज्ञातः समावर्तेत वै द्विजः ।
विन्देतानन्तरं भार्यामनुरूपां यथाविधि ॥ ३७
शूद्रान्नवर्जनं धर्मस्तथा सत्पथसेवनम् ।
धर्मो नित्योपवासित्वं ब्रह्मचर्यं तथैव च ॥ ३८
आहिताग्निरधीयानो जुह्वानः संयतेन्द्रियः ।
विघसाशी यताहारो गृहस्थः सत्यवाक्शुचिः ॥ ३९
अतिथिव्रतता धर्मो धर्मस्त्रेताग्निधारणम् ।
इष्टीश्च पशुबन्धांश्च विधिपूर्वं समाचरेत् ॥ ४०
यज्ञश्च परमो धर्मस्तथाहिंसा च देहिषु ।
अपूर्वभोजनं धर्मो विघसाशित्वमेव च ॥ ४१
भुक्ते परिजने पश्चाद्भोजनं धर्म उच्यते ।
ब्राह्मणस्य गृहस्थस्य श्रोत्रियस्य विशेषतः ॥ ४२
दंपत्योः समशीलत्वं धर्मश्च गृहमेधिनाम् ।
गृह्याणां चैव देवानां नित्यं पुष्पबलिक्रिया ॥ ४३
नित्योपलेपनं धर्मस्तथा नित्योपवासिता ।
सुसंमृष्टोपलिप्ते च साज्यधूमोद्गमे गृहे ॥ ४४
एष द्विजजने धर्मो गार्हस्थ्यो लोकधारणः ।
द्विजातीनां सतां नित्यं सदैवैष प्रवर्तते ॥ ४५
यस्तु क्षत्रगतो देवि त्वया धर्म उदीरितः ।
तमहं ते प्रवक्ष्यामि तं मे शृणु समाहिता ॥ ४६
क्षत्रियस्य स्मृतो धर्मः प्रजापालनमादितः ।
निर्दिष्टफलभोक्ता हि राजा धर्मेण युज्यते ॥ ४७
प्रजाः पालयते यो हि धर्मेण मनुजाधिपः ।
तस्य धर्मार्जिता लोकाः प्रजापालनसंचिताः ॥ ४८
तत्र राज्ञः परो धर्मो दमः स्वाध्याय एव च ।
अग्निहोत्रपरिस्पन्दो दानाध्ययनमेव च ॥ ४९
यज्ञोपवीतधरणं यज्ञो धर्मक्रियास्तथा ।
भृत्यानां भरणं धर्मः कृते कर्मण्यमोघता ॥ ५०
सम्यग्दण्डे स्थितिर्धर्मो धर्मो वेदक्रतुक्रियाः ।
व्यवहारस्थितिर्धर्मः सत्यवाक्यरतिस्तथा ॥ ५१
आर्तहस्तप्रदो राजा प्रेत्य चेह महीयते ।
गोब्राह्मणार्थे विक्रान्तः संग्रामे निधनं गतः ।
अश्वमेधजिताँल्लोकान्प्राप्नोति त्रिदिवालये ॥ ५२
वैश्यस्य सततं धर्मः पाशुपाल्यं कृषिस्तथा ।
अग्निहोत्रपरिस्पन्दो दानाध्ययनमेव च ॥ ५३
वाणिज्यं सत्पथस्थानमातिथ्यं प्रशमो दमः ।
विप्राणां स्वागतं त्यागो वैश्यधर्मः सनातनः ॥५४
तिलान्गन्धान्रसांश्चैव न विक्रीणीत वै क्वचित् ।
वणिक्पथमुपासीनो वैश्यः सत्पथमाश्रितः ॥ ५५
सर्वातिथ्यं त्रिवर्गस्य यथाशक्ति यथार्हतः ।
शूद्रधर्मः परो नित्यं शुश्रूषा च द्विजातिषु ॥ ५६
स शूद्रः संशिततपाः सत्यसंधो जितेन्द्रियः ।
शुश्रूषन्नतिथिं प्राप्तं तपः संचिनुते महत् ॥ ५७
त्यक्तहिंसः शुभाचारो देवताद्विजपूजकः ।
शूद्रो धर्मफलैरिष्टैः संप्रयुज्येत बुद्धिमान् ॥ ५८
एतत्ते सर्वमाख्यातं चातुर्वर्ण्यस्य शोभने ।
एकैकस्येह सुभगे किमन्यच्छ्रोतुमिच्छसि ॥ ५९

इति श्रीमहाभारते अनुशासनपर्वणि
अष्टाविंशत्यधिकशततमोऽध्यायः ॥ १२८ ॥

१२९

उमोवाच ।

उक्तास्त्वया पृथग्धर्माश्चातुर्वर्ण्यहिताः शुभाः ।
सर्वव्यापी तु यो धर्मो भगवंस्तं ब्रवीहि मे ॥ १

महेश्वर उवाच ।

ब्राह्मणा लोकसारेण सृष्टा धात्रा गुणार्थिना ।
लोकांस्तारयितुं कृत्स्नान्मर्त्येषु क्षितिदेवताः ॥ २
तेषामिमं प्रवक्ष्यामि धर्मकर्मफलोदयम् ।
ब्राह्मणेषु हि यो धर्मः स धर्मः परमो मतः ॥ ३

इमे तु लोकधर्मार्थं त्रयः सृष्टाः स्वयंभुवा ।
पृथिव्याः सर्जने नित्यं सृष्टास्तानपि मे शृणु ॥ ४
वेदोक्तः परमो धर्मः स्मृतिशास्त्रगतोऽपरः ।
शिष्टाचीर्णः परः प्रोक्तस्त्रयो धर्माः सनातनाः ॥ ५
त्रैविद्यो ब्राह्मणो विद्वान्न चाध्ययनजीवनः ।
त्रिकर्मा त्रिपरिक्रान्तो मैत्र एष स्मृतो द्विजः ॥ ६
षडिमानि तु कर्माणि प्रोवाच भुवनेश्वरः ।
वृत्त्यर्थं ब्राह्मणानां वै शृणु तानि समाहिता ॥ ७
यजनं याजनं चैव तथा दानप्रतिग्रहौ ।
अध्यापनमधीतं च षट्कर्मा धर्मभाग्द्विजः ॥ ८
नित्यस्वाध्यायता धर्मो धर्मो यज्ञः सनातनः ।
दानं प्रशस्यते चास्य यथाशक्ति यथाविधि ॥ ९
अयं तु परमो धर्मः प्रवृत्तः सत्सु नित्यशः ।
गृहस्थता विशुद्धानां धर्मस्य निचयो महान् ॥ १०
पञ्चयज्ञविशुद्धात्मा सत्यवागनसूयकः ।
दाता ब्राह्मणसत्कर्ता सुसंमृष्टनिवेशनः ॥ ११
अमानी च सदाजिह्मः स्निग्धवाणीप्रदस्तथा ।
अतिथ्यभ्यागतरतिः शेषान्नकृतभोजनः ॥ १२
पाद्यमर्घ्यं यथान्यायमासनं शयनं तथा ।
दीपं प्रतिश्रयं चापि यो ददाति स धार्मिकः ॥१३
प्रातरुत्थाय चाचम्य भोजनेनोपमन्त्र्य च ।
सत्कृत्यानुव्रजेद्यश्च तस्य धर्मः सनातनः ॥ १४
सर्वातिथ्यं त्रिवर्गस्य यथाशक्ति दिवानिशम् ।
शूद्रधर्मः समाख्यातस्त्रिवर्णपरिचारणम् ॥ १५
प्रवृत्तिलक्षणो धर्मो गृहस्थेषु विधीयते ।
तमहं कीर्तयिष्यामि सर्वभूतहितं शुभम् ॥ १६
दातव्यमसकृच्छक्त्या यष्टव्यमसकृत्तथा ।
पुष्टिकर्मविधानं च कर्तव्यं भूतिमिच्छता ॥ १७
धर्मेणार्थः समाहार्यो धर्मलब्धं त्रिधा धनम् ।
कर्तव्यं धर्मपरमं मानवेन प्रयत्नतः ॥ १८
एकेनांशेन धर्मार्थश्चर्तव्यो भूतिमिच्छता ।
एकेनांशेन कामार्थ एकमंशं विवर्धयेत् ॥ १९
निवृत्तिलक्षणस्त्वन्यो धर्मो मोक्ष इति स्मृतः ।
तस्य वृत्तिं प्रवक्ष्यामि शृणु मे देवि तत्त्वतः ॥२०
सर्वभूतदया धर्मो न चैकग्रामवासिता ।
आशापाशविमोक्षश्च शस्यते मोक्षकाङ्क्षिणाम् ॥ २१
न कुट्यां नोदके सङ्गो न वाससि न चासने ।
न त्रिदण्डे न शयने नाग्नौ न शरणालये ॥ २२
अध्यात्मगतचित्तो यस्तन्मनास्तत्परायणः ।
युक्तो योगं प्रति सदा प्रतिसंख्यानमेव च ॥ २३
वृक्षमूलशयो नित्यं शून्यागारनिवेशनः ।
नदीपुलिनशायी च नदीतीररतिश्च यः ॥ २४
विमुक्तः सर्वसङ्गेषु स्नेहबन्धेषु च द्विजः ।
आत्मन्येवात्मनो भावं समासज्याटति द्विजः ॥२५
स्थाणुभूतो निराहारो मोक्षदृष्टेन कर्मणा ।
परिव्रजति यो युक्तस्तस्य धर्मः सनातनः ॥ २६
न चैकत्र चिरासक्तो न चैकग्रामगोचरः ।
युक्तो ह्यटति निर्मुक्तो न चैकपुलिनेशयः ॥ २७
एष मोक्षविदां धर्मो वेदोक्तः सत्पथः सताम् ।
यो मार्गमनुयातीमं पदं तस्य न विद्यते ॥ २८
चतुर्विधा भिक्षवस्ते कुटीचरकृतोदकः ।
हंसः परमहंसश्च यो यः पश्चात्स उत्तमः ॥ २९
अतः परतरं नास्ति नाधरं न तिरोऽग्रतः ।
अदुःखमसुखं सौम्यमजरामरमव्ययम् ॥ ३०

उमोवाच ।

गार्हस्थ्यो मोक्षधर्मश्च सज्जनाचरितस्त्वया ।
भाषितो मर्त्यलोकस्य मार्गः श्रेयस्करो महान् ॥३१
ऋषिधर्मं तु धर्मज्ञ श्रोतुमिच्छाम्यनुत्तमम् ।
स्पृहा भवति मे नित्यं तपोवननिवासिषु ॥ ३२
आज्यधूमोद्भवो गन्धो रुणद्धीव तपोवनम् ।

तं दृष्ट्वा मे मनः प्रीतं महेश्वर सदा भवेत् ॥ ३३
एतं मे संशयं देव मुनिधर्मकृतं विभो ।
सर्वधर्मार्थतत्त्वज्ञ देवदेव वदस्व मे ।
निखिलेन मया पृष्टं महादेव यथातथम् ॥ ३४

महेश्वर उवाच ।

हन्त तेऽहं प्रवक्ष्यामि मुनिधर्ममनुत्तमम् ।
यं कृत्वा मुनयो यान्ति सिद्धिं स्वतपसा शुभे ॥
फेनपानामृषीणां यो धर्मो धर्मविदां सदा ।
तं मे शृणु महाभागे धर्मज्ञे धर्ममादितः ॥ ३६
उञ्छन्ति सततं तस्मिन्ब्राह्मं फेनोत्करं शुभम् ।
अमृतं ब्रह्मणा पीतं मधुरं प्रसृतं दिवि ॥ ३७
एष तेषां विशुद्धानां फेनपानां तपोधने ।
धर्मचर्याकृतो मार्गो वालखिल्यगणे शृणु ॥ ३८
वालखिल्यास्तपःसिद्धा मुनयः सूर्यमण्डले ।
उञ्छमुञ्छन्ति धर्मज्ञाः शाकुनीं वृत्तिमास्थिताः ॥
मृगनिर्मोकवसनाश्चीरवल्कलवाससः ।
निर्द्वंद्वाः सत्पथं प्राप्ता वालखिल्यास्तपोधनाः ॥४०
अङ्गुष्ठपर्वमात्रास्ते स्वेष्वङ्गेषु व्यवस्थिताः ।
तपश्चरणमीहन्ते तेषां धर्मफलं महत् ॥ ४१
ते सुरैः समतां यान्ति सुरकार्यार्थसिद्धये ।
द्योतयन्तो दिशः सर्वास्तपसा दग्धकिल्बिषाः ॥४२
ये त्वन्ये शुद्धमनसो दयाधर्मपरायणाः ।
सन्तश्चक्रचराः पुण्याः सोमलोकचराश्च ये ॥ ४३
पितृलोकसमीपस्थास्त उञ्छन्ति यथाविधि ।
संप्रक्षालाश्मकुट्टाश्च दन्तोलूखलिनस्तथा ॥ ४४
सोमपानां च देवानामूष्मपाणां तथैव च ।
उञ्छन्ति ये समीपस्थाः स्वभावनियतेन्द्रियाः ॥४५
तेषामग्निपरिष्यन्दः पितृदेवार्चनं तथा ।
यज्ञानां चापि पञ्चानां यजनं धर्म उच्यते ॥ ४६
एष चक्रचरैर्देवि देवलोकचरैर्द्विजैः ।
ऋषिधर्मः सदा चीर्णो योऽन्यस्तमपि मे शृणु॥४७
सर्वेष्वेवर्षिधर्मेषु जेय आत्मा जितेन्द्रियः ।
कामक्रोधौ ततः पश्चाज्जेतव्याविति मे मतिः ॥४८
अग्निहोत्रपरिस्पन्दो धर्मरात्रिसमासनम् ।
सोमयज्ञाभ्यनुज्ञानं पञ्चमी यज्ञदक्षिणा ॥ ४९
नित्यं यज्ञक्रिया धर्मः पितृदेवार्चने रतिः ।
सर्वातिथ्यं च कर्तव्यमन्नेनोञ्छार्जितेन वै ॥ ५०
निवृत्तिरुपभोगस्य गोरसानां च वै रतिः ।
स्थण्डिले शयनं योगः शाकपर्णनिषेवणम् ॥ ५१
फलमूलाशनं वायुरापः शैवलभक्षणम् ।
ऋषीणां नियमा ह्येते यैर्जयन्त्यजितां गतिम् ॥५२
विधूमे न्यस्तमुसले व्यङ्गारे भुक्तवज्जने ।
अतीतपात्रसंचारे काले विगतभैक्षके ॥ ५३
अतिथिं काङ्क्षमाणो वै शेषान्नकृतभोजनः ।
सत्यधर्मरतिः क्षान्तो मुनिधर्मेण युज्यते ॥ ५४
न स्तम्भी न च मानी यो न प्रमत्तो न विस्मितः
मित्रामित्रसमो मैत्रो यः स धर्मविदुत्तमः ॥ ५५

इति श्रीमहाभारते अनुशासनपर्वणि
एकोनत्रिंशदधिकशततमोऽध्यायः ॥ १२९ ॥

१३०

उमोवाच ।

देशेषु रमणीयेषु गिरीणां निर्झरेषु च ।
स्रवन्तीनां च कुञ्जेषु पर्वतोपवनेषु च ॥ १
देशेषु च विचित्रेषु फलवत्सु समाहिताः ।
मूलवत्सु च देशेषु वसन्ति नियतव्रताः ॥ २
तेषामपि विधिं पुण्यं श्रोतुमिच्छामि शंकर ।
वानप्रस्थेषु देवेश स्वशरीरोपजीविषु ॥ ३

महेश्वर उवाच ।

वानप्रस्थेषु यो धर्मस्तं मे शृणु समाहिता ।
श्रुत्वा चैकमना देवि धर्मबुद्धिपरा भव ॥ ४

संसिद्धैर्नियतैः सद्भिर्वनवासमुपागतैः ।
वानप्रस्थैरिदं कर्म कर्तव्यं शृणु यादृशम् ॥ ५
त्रिकालमभिषेकार्थः पितृदेवार्चनं क्रिया ।
अग्निहोत्रपरिस्पन्द इष्टिहोमविधिस्तथा ॥ ६
नीवारग्रहणं चैव फलमूलनिषेवणम् ।
इङ्गुदैरण्डतैलानां स्नेहार्थं च निषेवणम् ॥ ७
योगचर्याकृतैः सिद्धैः कामक्रोधविवर्जनम् ।
वीरशय्यामुपासद्भिर्वीरस्थानोपसेविभिः ॥ ८
युक्तैर्योगवहैः सद्भिर्ग्रीष्मे पञ्चातपैस्तथा ।
मण्डूकयोगनियतैर्यथान्यायनिषेविभिः ॥ ९
वीरासनगतैर्नित्यं स्थण्डिले शयनैस्तथा ।
शीतयोगोऽग्नियोगश्च चर्तव्यो धर्मबुद्धिभिः ॥ १०
अब्भक्षैर्वायुभक्षैश्च शैवालोत्तरभोजनैः ।
अश्मकुट्टैस्तथा दान्तैः संप्रक्षालैस्तथापरैः ॥ ११
चीरवल्कलसंवीतैर्मृगचर्मनिवासिभिः ।
कार्या यात्रा यथाकालं यथाधर्मं यथाविधि ॥ १२
वननित्यैर्वनचरैर्वनपैर्वनगोचरैः ।
वनं गुरुमिवासाद्य वस्तव्यं वनजीविभिः ॥ १३
तेषां होमक्रिया धर्मः पञ्चयज्ञनिषेवणम् ।
नागपञ्चमयज्ञस्य वेदोक्तस्यानुपालनम् ॥ १४
अष्टमीयज्ञपरता चातुर्मास्यनिषेवणम् ।
पौर्णमास्यां तु यो यज्ञो नित्ययज्ञस्तथैव च ॥ १५
विमुक्ता दारसंयोगैर्विमुक्ताः सर्वसंकरैः ।
विमुक्ताः सर्वपापैश्च चरन्ति मुनयो वने ॥ १६
स्रुग्भाण्डपरमा नित्यं त्रेताग्निशरणाः सदा ।
सन्तः सत्पथनित्या ये ते यान्ति परमां गतिम् ॥
ब्रह्मलोकं महापुण्यं सोमलोकं च शाश्वतम् ।
गच्छन्ति मुनयः सिद्धा ऋषिधर्मव्यपाश्रयात् ॥ १८
एष धर्मो मया देवि वानप्रस्थाश्रितः शुभः ।
विस्तरेणार्थसंपन्नो यथास्थूलमुदाहृतः ॥ १९

उमोवाच ।

भगवन्देवदेवेश सर्वभूतनमस्कृत ।
यो धर्मो मुनिसंघस्य सिद्धिवादेषु तं वद ॥ २०
सिद्धिवादेषु संसिद्धास्तथा वननिवासिनः ।
स्वैरिणो दारसंयुक्तास्तेषां धर्मः कथं स्मृतः ॥ २१

महेश्वर उवाच ।

स्वैरिणस्तापसा देवि सर्वे दारविहारिणः ।
तेषां मौण्ड्यं कषायश्च वासरात्रिश्च कारणम् ॥ २२
त्रिकालमभिषेकश्च होत्रं त्वृषिकृतं महत् ।
समाधिः सत्पथस्थानं यथोदितनिषेवणम् ॥ २३
ये च ते पूर्वकथिता धर्मा वननिवासिनाम् ।
यदि सेवन्ति धर्मांस्तानाप्नुवन्ति तपःफलम् ॥ २४
ये च दंपतिधर्माणः स्वदारनियतेन्द्रियाः ।
चरन्ति विधिदृष्टं तदृतुकालाभिगामिनः ॥ २५
तेषामृषिकृतो धर्मो धर्मिणामुपपद्यते ।
न कामकारात्कामोऽन्यः संसेव्यो धर्मदर्शिभिः ॥
सर्वभूतेषु यः सम्यग्ददात्यभयदक्षिणाम् ।
हिंसारोषविमुक्तात्मा स वै धर्मेण युज्यते ॥ २७
सर्वभूतानुकम्पी यः सर्वभूतार्जवव्रतः ।
सर्वभूतात्मभूतश्च स वै धर्मेण युज्यते ॥ २८
सर्ववेदेषु वा स्नानं सर्वभूतेषु चार्जवम् ।
उभे एते समे स्यातामार्जवं वा विशिष्यते ॥ २९
आर्जवं धर्म इत्याहुरधर्मो जिह्म उच्यते ।
आर्जवेनेह संयुक्तो नरो धर्मेण युज्यते ॥ ३०
आर्जवो भुवने नित्यं वसत्यमरसंनिधौ ।
तस्मादार्जवनित्यः स्याद्य इच्छेद्धर्ममात्मनः ॥ ३१
क्षान्तो दान्तो जितक्रोधो धर्मभूतोऽविहिंसकः ।
धर्मे रतमना नित्यं नरो धर्मेण युज्यते ॥ ३२
व्यपेततन्द्रो धर्मात्मा शक्त्या सत्पथमाश्रितः ।
चारित्रपरमो बुद्धो ब्रह्मभूयाय कल्पते ॥ ३३

उमोवाच ।
आश्रमाभिरता देव तापसा ये तपोधनाः ।
दीप्तिमन्तः कया चैव चर्ययाथ भवन्ति ते ॥ ३४
राजानो राजपुत्राश्च निर्धना वा महाधनाः ।
कर्मणा केन भगवन्प्राप्नुवन्ति महाफलम् ॥ ३५
नित्यं स्थानमुपागम्य दिव्यचन्दनरूषिताः ।
केन वा कर्मणा देव भवन्ति वनगोचराः ॥ ३६
एतं मे संशयं देव तपश्चर्यागतं शुभम् ।
शंस सर्वमशेषेण त्र्यक्ष त्रिपुरनाशन ॥ ३७
महेश्वर उवाच ।
उपवासव्रतैर्दान्ता अहिंस्राः सत्यवादिनः ।
संसिद्धाः प्रेत्य गन्धर्वैः सह मोदन्त्यनामयाः ॥ ३८
मण्डूकयोगशयनो यथास्थानं यथाविधि ।
दीक्षां चरति धर्मात्मा स नागैः सह मोदते ॥ ३९
शष्पं मृगमुखोत्सृष्टं यो मृगैः सह सेवते ।
दीक्षितो वै मुदा युक्तः स गच्छत्यमरावतीम् ॥ ४०
शैवालं शीर्णपर्णं वा तद्व्रतो यो निषेवते ।
शीतयोगवहो नित्यं स गच्छेत्परमां गतिम् ॥ ४१
वायुभक्षोऽम्बुभक्षो वा फलमूलाशनोऽपि वा ।
यक्षेष्वैश्वर्यमाधाय मोदतेऽप्सरसां गणैः ॥ ४२
अग्नियोगवहो ग्रीष्मे विधिदृष्टेन कर्मणा ।
चीर्त्वा द्वादश वर्षाणि राजा भवति पार्थिवः ॥ ४३
आहारनियमं कृत्वा मुनिर्द्वादशवार्षिकम् ।
मरुं संसाध्य यत्नेन राजा भवति पार्थिवः ॥ ४४
स्थण्डिले शुद्धमाकाशं परिगृह्य समन्ततः ।
प्रविश्य च मुदा युक्तो दीक्षां द्वादशवार्षिकीम् ॥
स्थण्डिलस्य फलान्याहुर्यानानि शयनानि च ।
गृहाणि च महार्हाणि चन्द्रशुभ्राणि भामिनि ॥ ४६
आत्मानमुपजीवन्यो नियतो नियताशनः ।
देहं वानशने त्यक्त्वा स स्वर्गं समुपाश्नुते ॥ ४७
आत्मानमुपजीवन्यो दीक्षां द्वादशवार्षिकीम् ।
त्यक्त्वा महार्णवे देहं वारुणं लोकमश्नुते ॥ ४८
आत्मानमुपजीवन्यो दीक्षां द्वादशवार्षिकीम् ।
अश्मना चरणौ भित्त्वा गुह्यकेषु स मोदते ॥ ४९
साधयित्वात्मनात्मानं निर्द्वंद्वो निष्परिग्रहः ।
चीर्त्वा द्वादश वर्षाणि दीक्षामेकां मनोगताम् ।
स्वर्गलोकमवाप्नोति देवैश्च सह मोदते ॥ ५०
आत्मानमुपजीवन्यो दीक्षां द्वादशवार्षिकीम् ।
हुत्वाग्नौ देहमुत्सृज्य वह्निलोके महीयते ॥ ५१
यस्तु देवि यथान्यायं दीक्षितो नियतो द्विजः ।
आत्मन्यात्मानमाधाय निर्द्वंद्वो निष्परिग्रहः ॥ ५२
चीर्त्वा द्वादश वर्षाणि दीक्षामेकां मनोगताम् ।
अरणीसहितं स्कन्धे बद्ध्वा गच्छत्यनावृतः ॥ ५३
वीराध्वानमना नित्यं वीरासनरतस्तथा ।
वीरस्थायी च सततं स वीरगतिमाप्नुयात् ॥ ५४
स शक्रलोकगो नित्यं सर्वकामपुरस्कृतः ।
दिव्यपुष्पसमाकीर्णो दिव्यचन्दनभूषितः ।
सुखं वसति धर्मात्मा दिवि देवगणैः सह ॥ ५५
वीरलोकगतो वीरो वीरयोगवहः सदा ।
सत्त्वस्थः सर्वमुत्सृज्य दीक्षितो नियतः शुचिः ।
वीराध्वानं प्रपद्येद्यस्तस्य लोकाः सनातनाः ॥ ५६
कामगेन विमानेन स वै चरति च्छन्दतः ।
शक्रलोकगतः श्रीमान्मोदते च निरामयः ॥ ५७

इति श्रीमहाभारते अनुशासनपर्वणि
त्रिंशदधिकशततमोऽध्यायः ॥ १३० ॥

१३१

उमोवाच ।
भगवन्भगनेत्रघ्न पूष्णो दशनपातन ।
दक्षक्रतुहर त्र्यक्ष संशयो मे महानयम् ॥ १
चातुर्वर्ण्यं भगवता पूर्वं सृष्टं स्वयंभुवा ।

केन कर्मविपाकेन वैश्यो गच्छति शूद्रताम् ॥ २
वैश्यो वा क्षत्रियः केन द्विजो वा क्षत्रियो भवेत् ।
प्रतिलोमः कथं देव शक्यो धर्मो निषेवितुम् ॥ ३
केन वा कर्मणा विप्रः शूद्रयोनौ प्रजायते ।
क्षत्रियः शूद्रतामेति केन वा कर्मणा विभो ॥ ४
एतं मे संशयं देव वद भूतपतेऽनघ ।
त्रयो वर्णाः प्रकृत्येह कथं ब्राह्मण्यमाप्नुयुः ॥ ५

महेश्वर उवाच ।

ब्राह्मण्यं देवि दुष्प्रापं निसर्गाद्ब्राह्मणः शुभे ।
क्षत्रियो वैश्यशूद्रौ वा निसर्गादिति मे मतिः ॥ ६
कर्मणा दुष्कृतेनेह स्थानाद्भ्रश्यति वै द्विजः ।
ज्येष्ठं वर्णमनुप्राप्य तस्माद्रक्षेत वै द्विजः ॥ ७
स्थितो ब्राह्मणधर्मेण ब्राह्मण्यमुपजीवति ।
क्षत्रियो वाथ वैश्यो वा ब्रह्मभूयाय गच्छति ॥ ८
यस्तु विप्रत्वमुत्सृज्य क्षात्रं धर्मं निषेवते ।
ब्राह्मण्यात्स परिभ्रष्टः क्षत्रयोनौ प्रजायते ॥ ९
वैश्यकर्म च यो विप्रो लोभमोहव्यपाश्रयः ।
ब्राह्मण्यं दुर्लभं प्राप्य करोत्यल्पमतिः सदा ॥ १०
स द्विजो वैश्यतामेति वैश्यो वा शूद्रतामियात् ।
स्वधर्मात्प्रच्युतो विप्रस्ततः शूद्रत्वमाप्नुते ॥ ११
तत्रासौ निरयं प्राप्तो वर्णभ्रष्टो बहिष्कृतः ।
ब्रह्मलोकपरिभ्रष्टः शूद्रः समुपजायते ॥ १२
क्षत्रियो वा महाभागे वैश्यो वा धर्मचारिणि ।
स्वानि कर्माण्यपाहाय शूद्रकर्माणि सेवते ॥ १३
स्वस्थानात्स परिभ्रष्टो वर्णसंकरतां गतः ।
ब्राह्मणः क्षत्रियो वैश्यः शूद्रत्वं याति तादृशः ॥१४
यस्तु शुद्धः स्वधर्मेण ज्ञानविज्ञानवाञ्शुचिः ।
धर्मज्ञो धर्मनिरतः स धर्मफलमश्नुते ॥ १५
इदं चैवापरं देवि ब्रह्मणा समुदीरितम् ।
अध्यात्मं नैष्ठिकं सद्भिर्धर्मकामैर्निषेव्यते ॥ १६
उग्रान्नं गर्हितं देवि गणान्नं श्राद्धसूतकम् ।
घुष्टान्नं नैव भोक्तव्यं शूद्रान्नं नैव कर्हिचित् ॥ १७
शूद्रान्नं गर्हितं देवि देवदेवैर्महात्मभिः ।
पितामहमुखोत्सृष्टं प्रमाणमिति मे मतिः ॥ १८
शूद्रान्नेनावशेषेण जठरे यो म्रियेत वै ।
आहिताग्निस्तथा यज्वा स शूद्रगतिभाग्भवेत् ॥१९
तेन शूद्रान्नशेषेण ब्रह्मस्थानादपाकृतः ।
ब्राह्मणः शूद्रतामेति नास्ति तत्र विचारणा ॥ २०
यस्यान्नेनावशेषेण जठरे यो म्रियेत वै ।
तां तां योनिं व्रजेद्विप्रो यस्यान्नमुपजीवति ॥ २१
ब्राह्मणत्वं शुभं प्राप्य दुर्लभं योऽवमन्यते ।
अभोज्यान्नानि चाश्नाति स द्विजत्वात्पतेत वै ॥२२
सुरापो ब्रह्महा क्षुद्रश्चौरो भग्नव्रतोऽशुचिः ।
स्वाध्यायवर्जितः पापो लुब्धो नैकृतिकः शठः ॥२३
अव्रती वृषलीभर्ता कुण्डाशी सोमविक्रयी ।
निहीनसेवी विप्रो हि पतति ब्रह्मयोनितः ॥ २४
गुरुतल्पी गुरुद्वेषी गुरुकुत्सारतिश्च यः ।
ब्रह्मद्विट्चापि पतति ब्राह्मणो ब्रह्मयोनितः ॥ २५
एभिस्तु कर्मभिर्देवि शुभैराचरितैस्तथा ।
शूद्रो ब्राह्मणतां गच्छेद्वैश्यः क्षत्रियतां व्रजेत् ॥२६
शूद्रकर्माणि सर्वाणि यथान्यायं यथाविधि ।
शुश्रूषां परिचर्यां च ज्येष्ठे वर्णे प्रयत्नतः ।
कुर्यादविमनाः शूद्रः सततं सत्पथे स्थितः ॥ २७
दैवतद्विजसत्कर्ता सर्वातिथ्यकृतव्रतः ।
ऋतुकालाभिगामी च नियतो नियताशनः ॥ २८
चौक्षश्चौक्षजनान्वेषी शेषान्नकृतभोजनः ।
वृथामांसान्यभुञ्जानः शूद्रो वैश्यत्वमृच्छति ॥ २९
ऋतवागनहंवादी निर्द्वंद्वः शमकोविदः ।
यजते नित्ययज्ञैश्च स्वाध्यायपरमः शुचिः ॥ ३०
दान्तो ब्राह्मणसत्कर्ता सर्ववर्णबुभूषकः ।

गृहस्थव्रतमातिष्ठन्द्विकालकृतभोजनः ॥ ३१
शेषाशी विजिताहारो निष्कामो निरहंवदः ।
अग्निहोत्रमुपासंश्च जुह्वानश्च यथाविधि ॥ ३२
सर्वातिथ्यमुपातिष्ठञ्शेषान्नकृतभोजनः ।
त्रेताग्निमन्त्रविहितो वैश्यो भवति वै यदि ।
स वैश्यः क्षत्रियकुले शुचौ महति जायते ॥ ३३
स वैश्यः क्षत्रियो जातो जन्मप्रभृति संस्कृतः ।
उपनीतो व्रतपरो द्विजो भवति सत्कृतः ॥ ३४
ददाति यजते यज्ञैः संस्कृतैराप्तदक्षिणैः ।
अधीते स्वर्गमन्विच्छंस्त्रेताग्निशरणः सदा ॥ ३५
आर्तहस्तप्रदो नित्यं प्रजा धर्मेण पालयन् ।
सत्यः सत्यानि कुरुते नित्यं यः सुखदर्शनः ॥ ३६
धर्मदण्डो न निर्दण्डो धर्मकार्यानुशासकः ।
यन्त्रितः कार्यकरणे षड्भागकृतलक्षणः ॥ ३७
ग्राम्यधर्मान्न सेवेत स्वच्छन्देनार्थकोविदः ।
ऋतुकाले तु धर्मात्मा पत्नीं सेवेत नित्यदा ॥ ३८
सर्वोपवासी नियतः स्वाध्यायपरमः शुचिः ।
बर्हिष्कान्तरिते नित्यं शयानोऽग्निगृहे सदा ॥ ३९
सर्वातिथ्यं त्रिवर्गस्य कुर्वाणः सुमनाः सदा ।
शूद्राणां चान्नकामानां नित्यं सिद्धमिति ब्रुवन् ॥४०
स्वार्थाद्वा यदि वा कामान्न किंचिदुपलक्षयेत् ।
पितृदेवातिथिकृते साधनं कुरुते च यः ॥ ४१
स्ववेश्मनि यथान्यायमुपास्ते भैक्षमेव च ।
त्रिकालमग्निहोत्रं च जुह्वानो वै यथाविधि ॥ ४२
गोब्राह्मणहितार्थाय रणे चाभिमुखो हतः ।
त्रेताग्निमन्त्रपूतं वा समाविश्य द्विजो भवेत् ॥ ४३
ज्ञानविज्ञानसंपन्नः संस्कृतो वेदपारगः ।
विप्रो भवति धर्मात्मा क्षत्रियः स्वेन कर्मणा ॥४४
एतैः कर्मफलैर्देवि न्यूनजातिकुलोद्भवः ।
शूद्रोऽप्यागमसंपन्नो द्विजो भवति संस्कृतः ॥ ४५
ब्राह्मणो वाप्यसद्वृत्तः सर्वसंकरभोजनः ।
ब्राह्मण्यं पुण्यमुत्सृज्य शूद्रो भवति तादृशः ॥ ४६
कर्मभिः शुचिभिर्देवि शुद्धात्मा विजितेन्द्रियः ।
शूद्रोऽपि द्विजवत्सेव्य इति ब्रह्माब्रवीत्स्वयम् ॥४७
स्वभावकर्म च शुभं यत्र शूद्रेऽपि तिष्ठति ।
विशुद्धः स द्विजातिर्वै विज्ञेय इति मे मतिः ॥४८
न योनिर्नापि संस्कारो न श्रुतं न च संनतिः ।
कारणानि द्विजत्वस्य वृत्तमेव तु कारणम् ॥ ४९
सर्वोऽयं ब्राह्मणो लोके वृत्तेन तु विधीयते ।
वृत्ते स्थितश्च सुश्रोणि ब्राह्मणत्वं निगच्छति ॥ ५०
ब्राह्मः स्वभावः कल्याणि समः सर्वत्र मे मतिः ।
निर्गुणं निर्मलं ब्रह्म यत्र तिष्ठति स द्विजः ॥ ५१
एते योनिफला देवि स्थानभागनिदर्शकाः ।
स्वयं च वरदेनोक्ता ब्रह्मणा सृजता प्रजाः ॥ ५२
ब्राह्मणो हि महत्क्षेत्रं लोके चरति पादवत् ।
यत्तत्र बीजं वपति सा कृषिः पारलौकिकी ॥ ५३
मिताशिना सदा भाव्यं सत्पथालम्बिना सदा ।
ब्राह्ममार्गमतिक्रम्य वर्तितव्यं बुभूषता ॥ ५४
संहिताध्यायिना भाव्यं गृहे वै गृहमेधिना ।
नित्यं स्वाध्याययुक्तेन दानाध्ययनजीविना ॥ ५५
एवंभूतो हि यो विप्रः सततं सत्पथे स्थितः ।
आहिताग्निरधीयानो ब्रह्मभूयाय कल्पते ॥ ५६
ब्राह्मण्यमेव संप्राप्य रक्षितव्यं यतात्मभिः ।
योनिप्रतिग्रहादानैः कर्मभिश्च शुचिस्मिते ॥ ५७
एतत्ते सर्वमाख्यातं यथा शूद्रो भवेद्द्विजः ।
ब्राह्मणो वा च्युतो धर्माद्यथा शूद्रत्वमाप्नुते ॥ ५८

इति श्रीमहाभारते अनुशासनपर्वणि

एकत्रिंशदधिकशततमोऽध्यायः ॥ १३१ ॥

१३२

उमोवाच ।

भगवन्सर्वभूतेश सुरासुरनमस्कृत ।
धर्माधर्मे नृणां देव ब्रूहि मे संशयं विभो ॥ १
कर्मणा मनसा वाचा त्रिविधं हि नरः सदा ।
बध्यते बन्धनैः पाशैर्मुच्यतेऽप्यथ वा पुनः ॥ २
केन शीलेन वा देव कर्मणा कीदृशेन वा ।
समाचारैर्गुणैर्वाक्यैः स्वर्गं यान्तीह मानवाः ॥ ३

महेश्वर उवाच ।

देवि धर्मार्थतत्त्वज्ञे सत्यनित्ये दमे रते ।
सर्वप्राणिहितः प्रश्नः श्रूयतां बुद्धिवर्धनः ॥ ४
सत्यधर्मरताः सन्तः सर्वलिप्साविवर्जिताः ।
नाधर्मेण न धर्मेण बध्यन्ते छिन्नसंशयाः ॥ ५
प्रलयोत्पत्तितत्त्वज्ञाः सर्वज्ञाः समदर्शिनः ।
वीतरागा विमुच्यन्ते पुरुषाः सर्वबन्धनैः ॥ ६
कर्मणा मनसा वाचा ये न हिंसन्ति किंचन ।
ये न सज्जन्ति कस्मिंश्चिद्बध्यन्ते ते न कर्मभिः ॥७
प्राणातिपाताद्विरताः शीलवन्तो दयान्विताः ।
तुल्यद्वेष्यप्रिया दान्ता मुच्यन्ते कर्मबन्धनैः ॥ ८
सर्वभूतदयावन्तो विश्वास्याः सर्वजन्तुषु ।
त्यक्तहिंसासमाचारास्ते नराः स्वर्गगामिनः ॥ ९
परस्वे निर्ममा नित्यं परदारविवर्जकाः ।
धर्मलब्धार्थभोक्तारस्ते नराः स्वर्गगामिनः ॥ १०
मातृवत्स्वसृवच्चैव नित्यं दुहितृवच्च ये ।
परदारेषु वर्तन्ते ते नराः स्वर्गगामिनः ॥ ११
स्तैन्यान्निवृत्ताः सततं संतुष्टाः स्वधनेन च ।
स्वभाग्यान्युपजीवन्ति ते नराः स्वर्गगामिनः ॥ १२
स्वदारनिरता ये च ऋतुकालाभिगामिनः ।
अग्राम्यसुखभोगाश्च ते नराः स्वर्गगामिनः ॥ १३
परदारेषु ये नित्यं चारित्रावृतलोचनाः ।
यतेन्द्रियाः शीलपरास्ते नराः स्वर्गगामिनः ॥ १४
एष देवकृतो मार्गः सेवितव्यः सदा नरैः ।
अकषायकृतश्चैव मार्गः सेव्यः सदा बुधैः ॥ १५
दानधर्मतपोयुक्तः शीलशौचदयात्मकः ।
वृत्त्यर्थं धर्महेतोर्वा सेवितव्यः सदा नरैः ।
स्वर्गवासमभीप्सद्भिर्न सेव्यस्त्वत उत्तरः ॥ १६

उमोवाच ।

वाचाथ बध्यते येन मुच्यतेऽप्यथ वा पुनः ।
तानि कर्माणि मे देव वद भूतपतेऽनघ ॥ १७

महेश्वर उवाच ।

आत्महेतोः परार्थे वा नर्महास्याश्रयात्तथा ।
ये मृषा न वदन्तीह ते नराः स्वर्गगामिनः ॥ १८
वृत्त्यर्थं धर्महेतोर्वा कामकारात्तथैव च ।
अनृतं ये न भाषन्ते ते नराः स्वर्गगामिनः ॥ १९
श्लक्ष्णां वाणीं निराबाधां मधुरां पापवर्जिताम् ।
स्वागतेनाभिभाषन्ते ते नराः स्वर्गगामिनः ॥ २०
कटुकां ये न भाषन्ते परुषां निष्ठुरां गिरम् ।
अपैशुन्यरताः सन्तस्ते नराः स्वर्गगामिनः ॥ २१
पिशुनां ये न भाषन्ते मित्रभेदकरीं गिरम् ।
ऋतां मैत्रीं प्रभाषन्ते ते नराः स्वर्गगामिनः ॥ २२
वर्जयन्ति सदा सूच्यं परद्रोहं च मानवाः ।
सर्वभूतसमा दान्तास्ते नराः स्वर्गगामिनः ॥ २३
शठप्रलापाद्विरता विरुद्धपरिवर्जकाः ।
सौम्यप्रलापिनो नित्यं ते नराः स्वर्गगामिनः ॥ २४
न कोपाद्व्याहरन्ते ये वाचं हृदयदारणीम् ।
सान्त्वं वदन्ति क्रुद्धापि ते नराः स्वर्गगामिनः ॥२५
एष वाणीकृतो देवि धर्मः सेव्यः सदा नरैः ।
शुभः सत्यगुणो नित्यं वर्जनीया मृषा बुधैः ॥ २६

उमोवाच ।

मनसा बध्यते येन कर्मणा पुरुषः सदा ।

तन्मे ब्रूहि महाभाग देवदेव पिनाकधृक् ॥ २७

महेश्वर उवाच ।

मानसेनेह धर्मेण संयुक्ताः पुरुषाः सदा ।
स्वर्गं गच्छन्ति कल्याणि तन्मे कीर्तयतः शृणु ॥ २८
दुष्प्रणीतेन मनसा दुष्प्रणीततराकृतिः ।
बध्यते मानवो येन शृणु चान्यच्छुभानने ॥ २९
अरण्ये विजने न्यस्तं परस्वं वीक्ष्य ये नराः ।
मनसापि न हिंसन्ति ते स्वर्गगामिनः ॥ ३०
ग्रामे गृहे वा यद्द्रव्यं पारक्यं विजने स्थितम् ।
नाभिनन्दन्ति वै नित्यं ते नराः स्वर्गगामिनः ॥ ३१
तथैव परदारान्ये कामवृत्तान्रहोगताम् ।
मनसापि न हिंसन्ति ते नराः स्वर्गगामिनः ॥ ३२
शत्रुं मित्रं च ये नित्यं तुल्येन मनसा नराः ।
भजन्ति मैत्राः संगम्य ते नराः स्वर्गगामिनः ॥ ३३
श्रुतवन्तो दयावन्तः शुचयः सत्यसंगराः ।
स्वैरर्थैः परिसंतुष्टास्ते नराः स्वर्गगामिनः ॥ ३४
अवैरा ये त्वनायासा मैत्रचित्तपराः सदा ।
सर्वभूतदयावन्तस्ते नराः स्वर्गगामिनः ॥ ३५
श्रद्धावन्तो दयावन्तश्चोक्षाश्चोक्षजनप्रियाः ।
धर्माधर्मविदो नित्यं ते नराः स्वर्गगामिनः ॥ ३६
शुभानामशुभानां च कर्मणां फलसंचये ।
विपाकज्ञाश्च ये देवि ते नराः स्वर्गगामिनः ॥ ३७
न्यायोपेता गुणोपेता देवद्विजपराः सदा ।
समतां समनुप्राप्तास्ते नराः स्वर्गगामिनः ॥ ३८
शुभैः कर्मफलैर्देवि मयैते परिकीर्तिताः ।
स्वर्गमार्गोपगा भूयः किमन्यच्छ्रोतुमिच्छसि ॥ ३९

उमोवाच ।

महान्मे संशयः कश्चिन्मर्त्यान्प्रति महेश्वर ।
तस्मात्त्वं नैपुणेनाद्य ममाख्यातुं त्वमर्हसि ॥ ४०
केनायुर्लभते दीर्घं कर्मणा पुरुषः प्रभो ।
तपसा वापि देवेश केनायुर्लभते महत् ॥ ४१
क्षीणायुः केन भवति कर्मणा भुवि मानवः ।
विपाकं कर्मणां देव वक्तुमर्हस्यनिन्दित ॥ ४२
अपरे च महाभोगा मन्दभोगास्तथापरे ।
अकुलीनास्तथा चान्ये कुलीनाश्च तथापरे ॥ ४३
दुर्दर्शाः केचिदाभान्ति नराः काष्ठमया इव ।
प्रियदर्शास्तथा चान्ये दर्शनादेव मानवाः ॥ ४४
दुष्प्रज्ञाः केचिदाभान्ति केचिदाभान्ति पण्डिताः ।
महाप्रज्ञास्तथैवान्ये ज्ञानविज्ञानदर्शिनः ॥ ४५
अल्पाबाधास्तथा केचिन्महाबाधास्तथापरे ।
दृश्यन्ते पुरुषा देव तन्मे शंसितुमर्हसि ॥ ४६

महेश्वर उवाच ।

हन्त तेऽहं प्रवक्ष्यामि देवि कर्मफलोदयम् ।
मर्त्यलोके नराः सर्वे येन स्वं भुञ्जते फलम् ॥ ४७
प्राणातिपाती यो रौद्रो दण्डहस्तोद्यतस्तथा ।
नित्यमुद्यतदण्डश्च हन्ति भूतगणान्नरः ॥ ४८
निर्दयः सर्वभूतानां नित्यमुद्वेगकारकः ।
अपि कीटपिपीलानामशरण्यः सुनिर्घृणः ॥ ४९
एवंभूतो नरो देवि निरयं प्रतिपद्यते ।
विपरीतस्तु धर्मात्मा रूपवानभिजायते ॥ ५०
निरयं याति हिंसात्मा याति स्वर्गमहिंसकः ।
यातनां निरये रौद्रां स कृच्छ्रां लभते नरः ॥ ५१
अथ चेन्निरयात्तस्मात्समुत्तरति कर्हिचित् ।
मानुष्यं लभते चापि हीनायुस्तत्र जायते ॥ ५२
पापेन कर्मणा देवि बद्धो हिंसारतिर्नरः ।
अप्रियः सर्वभूतानां हीनायुरुपजायते ॥ ५३
यस्तु शुक्लाभिजातीयः प्राणिघातविवर्जकः ।
निक्षिप्तदण्डो निर्दण्डो न हिनस्ति कदाचन ॥ ५४
न घातयति नो हन्ति घ्नन्तं नैवानुमोदते ।
सर्वभूतेषु सस्नेहो यथात्मनि तथापरे ॥ ५५

ईदृशः पुरुषोत्कर्षो देवि देवत्वमश्नुते ।
उपपन्नान्सुखान्भोगानुपाश्नाति मुदा युतः ॥ ५६
अथ चेन्मानुषे लोके कदाचिदुपपद्यते ।
तत्र दीर्घायुरुत्पन्नः स नरः सुखमेधते ॥ ५७
एवं दीर्घायुषां मार्गः सुवृत्तानां सुकर्मणाम् ।
प्राणिहिंसाविमोक्षेण ब्रह्मणा समुदीरितः ॥ ५८

इति श्रीमहाभारते अनुशासनपर्वणि
द्वात्रिंशदधिकशततमोऽध्यायः ॥ १३२ ॥

१३३

उमोवाच ।

किंशीलाः किंसमाचाराः पुरुषाः कैश्च कर्मभिः ।
स्वर्गं समभिपद्यन्ते संप्रदानेन केन वा ॥ १

महेश्वर उवाच ।

दाता ब्राह्मणसत्कर्ता दीनान्धकृपणादिषु ।
भक्ष्यभोज्यान्नपानानां वाससां च प्रदायकः ॥ २
प्रतिश्रयान्सभाः कूपान्प्रपाः पुष्करिणीस्तथा ।
नैत्यकानि च सर्वाणि किमिच्छकमतीव च ॥ ३
आसनं शयनं यानं धनं रत्नं गृहांस्तथा ।
सस्यजातानि सर्वाणि गाः क्षेत्राण्यथ योषितः ॥ ४
सुप्रतीतमना नित्यं यः प्रयच्छति मानवः ।
एवंभूतो मृतो देवि देवलोकेऽभिजायते ॥ ५
तत्रोष्य सुचिरं कालं भुक्त्वा भोगाननुत्तमान् ।
सहाप्सरोभिर्मुदितो रमित्वा नन्दनादिषु ॥ ६
तस्मात्स्वर्गाच्च्युतो लोकान्मानुषेषूपजायते ।
महाभोगे कुले देवि धनधान्यसमाचिते ॥ ७
तत्र कामगुणैः सर्वैः समुपेतो मुदा युतः ।
महाभोगो महाकोशो धनी भवति मानवः ॥ ८
एते देवि महाभोगाः प्राणिनो दानशीलिनः ।
ब्रह्मणा वै पुरा प्रोक्ताः सर्वस्य प्रियदर्शनाः ॥ ९
अपरे मानवा देवि प्रदानकृपणा द्विजैः ।
याचिता न प्रयच्छन्ति विद्यमानेऽप्यबुद्धयः ॥ १०
दीनान्धकृपणान्दृष्ट्वा भिक्षुकानतिथीनपि ।
याच्यमाना निवर्तन्ते जिह्वालोभसमन्विताः ॥ ११
न धनानि न वासांसि न भोगान्न च काञ्चनम् ।
न गावो नान्नविकृतिं प्रयच्छन्ति कदाचन ॥ १२
अप्रवृत्तास्तु ये लुब्धा नास्तिका दानवर्जिताः ।
एवंभूता नरा देवि निरयं यान्त्यबुद्धयः ॥ १३
ते चेन्मनुष्यतां यान्ति यदा कालस्य पर्ययात् ।
धनरिक्ते कुले जन्म लभन्ते स्वल्पबुद्धयः ॥ १४
क्षुत्पिपासापरीताश्च सर्वभोगबहिष्कृताः ।
निराशाः सर्वभोगेभ्यो जीवन्त्यधमजीविकाम् ॥ १५
अल्पभोगकुले जाता अल्पभोगरता नराः ।
अनेन कर्मणा देवि भवन्त्यधनिनो नराः ॥ १६
अपरे स्तम्भिनो नित्यं मानिनः पापतो रताः ।
आसनार्हस्य ये पीठं न प्रयच्छन्त्यचेतसः ॥ १७
मार्गार्हस्य च ये मार्गं न यच्छन्त्यल्पबुद्धयः ।
पाद्यार्हस्य च ये पाद्यं न ददत्यल्पबुद्धयः ॥ १८
अर्घार्हान्न च सत्कारैरर्चयन्ति यथाविधि ।
अर्घ्यमाचमनीयं वा न यच्छन्त्यल्पबुद्धयः ॥ १९
गुरुं चाभिगतं प्रेम्णा गुरुवन्न बुभूषते ।
अभिमानप्रवृत्तेन लोभेन समवस्थिताः ॥ २०
संमान्यांश्चावमन्यन्ते वृद्धान्परिभवन्ति च ।
एवंविधा नरा देवि सर्वे निरयगामिनः ॥ २१
ते वै यदि नरास्तस्मान्निरयादुत्तरन्ति वै ।
वर्षपूगैस्ततो जन्म लभन्ते कुत्सिते कुले ॥ २२
श्वपाकपुल्कसादीनां कुत्सितानामचेतसाम् ।
कुलेषु तेषु जायन्ते गुरुवृद्धापचायिनः ॥ २३
न स्तम्भी न च मानी यो देवताद्विजपूजकः ।
लोकपूज्यो नमस्कर्ता प्रश्रितो मधुरं वदन् ॥ २४
सर्ववर्णप्रियकरः सर्वभूतहितः सदा ।

अद्वेषी सुमुखः श्लक्ष्णः स्निग्धवाणीप्रदः सदा ॥ २५
स्वागतेनैव सर्वेषां भूतानामविहिंसकः ।
यथार्हसत्क्रियापूर्वमर्चयन्नुपतिष्ठति ॥ २६
मार्गार्हाय ददन्मार्गं गुरुं गुरुवदर्चयन् ।
अतिथिप्रग्रहरतस्तथाभ्यागतपूजकः ॥ २७
एवंभूतो नरो देवि स्वर्गतिं प्रतिपद्यते ।
ततो मानुषतां प्राप्य विशिष्टकुलजो भवेत् ॥ २८
तत्रासौ विपुलैर्भोगैः सर्वरत्नसमायुतः ।
यथार्हदाता चार्हेषु धर्मचर्यापरो भवेत् ॥ २९
संमतः सर्वभूतानां सर्वलोकनमस्कृतः ।
स्वकर्मफलमाप्नोति स्वयमेव नरः सदा ॥ ३०
उदात्तकुलजातीय उदात्ताभिजनः सदा ।
एष धर्मो मया प्रोक्तो विधात्रा स्वयमीरितः ॥ ३१
यस्तु रौद्रसमाचारः सर्वसत्त्वभयंकरः ।
हस्ताभ्यां यदि वा पद्भ्यां रज्ज्वा दण्डेन वा पुनः ॥ ३२
लोष्टैः स्तम्भैरुपायैर्वा जन्तून्बाधति शोभने ।
हिंसार्थं निकृतिप्रज्ञः प्रोद्वेजयति चैव ह ॥ ३३
उपक्रामति जन्तूंश्च उद्वेगजननः सदा ।
एवंशीलसमाचारो निरयं प्रतिपद्यते ॥ ३४
स चेन्मानुषतां गच्छेद्यदि कालस्य पर्ययात् ।
बह्वाबाधपरिक्लिष्टे सोऽधमे जायते कुले ॥ ३५
लोकद्वेष्योऽधमः पुंसां स्वयं कर्मकृतैः फलैः ।
एष देवि मनुष्येषु बोद्धव्यो ज्ञातिबन्धुषु ॥ ३६
अपरः सर्वभूतानि दयावाननुपश्यति ।
मैत्रदृष्टिः पितृसमो निर्वैरो नियतेन्द्रियः ॥ ३७
नोद्वेजयति भूतानि न विहिंसयते तथा ।
हस्तपादैः सुनियतैर्विश्वास्यः सर्वजन्तुषु ॥ ३८
न रज्ज्वा न च दण्डेन न लोष्टैर्नायुधेन च ।
उद्वेजयति भूतानि श्लक्ष्णकर्मा दयापरः ॥ ३९
एवंशीलसमाचारः स्वर्गे समुपजायते ।
तत्रासौ भवने दिव्ये मुदा वसति देववत् ॥ ४०
स चेत्कर्मक्षयान्मर्त्यो मनुष्येषूपजायते ।
अल्पाबाधो निरीतीकः स जातः सुखमेधते ॥ ४१
सुखभागी निरायासो निरुद्वेगः सदा नरः ।
एष देवि सतां मार्गो बाधा यत्र न विद्यते ॥ ४२

उमोवाच ।

इमे मनुष्या दृश्यन्ते ऊहापोहविशारदाः ।
ज्ञानविज्ञानसंपन्नाः प्रज्ञावन्तोऽर्थकोविदाः ।
दुष्प्रज्ञाश्चापरे देव ज्ञानविज्ञानवर्जिताः ॥ ४३
केन कर्मविपाकेन प्रज्ञावान्पुरुषो भवेत् ।
अल्पप्रज्ञो विरूपाक्ष कथं भवति मानवः ।
एतं मे संशयं छिन्धि सर्वधर्मविदां वर ॥ ४४
जात्यन्धाश्चापरे देव रोगार्ताश्चापरे तथा ।
नराः क्लीबाश्च दृश्यन्ते कारणं ब्रूहि तत्र वै ॥ ४५

महेश्वर उवाच ।

ब्राह्मणान्वेदविदुषः सिद्धान्धर्मविदस्तथा ।
परिपृच्छन्त्यहरहः कुशलाकुशलं तथा ॥ ४६
वर्जयन्त्यशुभं कर्म सेवमानाः शुभं तथा ।
लभन्ते स्वर्गतिं नित्यमिह लोके सुखं तथा ॥ ४७
स चेन्मानुषतां याति मेधावी तत्र जायते ।
श्रुतं प्रज्ञानुगं चास्य कल्याणमुपजायते ॥ ४८
परदारेषु ये मूढाश्चक्षुर्दुष्टं प्रयुञ्जते ।
तेन दुष्टस्वभावेन जात्यन्धास्ते भवन्ति ह ॥ ४९
मनसा तु प्रदुष्टेन नग्नां पश्यन्ति ये स्त्रियम् ।
रोगार्तास्ते भवन्तीह नरा दुष्कृतकर्मिणः ॥ ५०
ये तु मूढा दुराचारा वियोनौ मैथुने रताः ।
पुरुषेषु सुदुष्प्रज्ञाः क्लीबत्वमुपयान्ति ते ॥ ५१
पशूंश्च ये बन्धयन्ति ये चैव गुरुतल्पगाः ।
प्रकीर्णमैथुना ये च क्लीबा जायन्ति ते नराः ॥ ५२

उमोवाच ।

सावद्यं किं नु वै कर्म निरवद्यं तथैव च ।
श्रेयः कुर्वन्नवाप्नोति मानवो देवसत्तम ॥ ५३

महेश्वर उवाच ।

श्रेयांसं मार्गमातिष्ठन्सदा यः पृच्छते द्विजान् ।
धर्मान्वेषी गुणाकाङ्क्षी स स्वर्गं समुपाश्नुते ॥ ५४
यदि मानुषतां देवि कदाचित्स निगच्छति ।
मेधावी धारणायुक्तः प्राज्ञस्तत्राभिजायते ॥ ५५
एष देवि सतां धर्मो मन्तव्यो भूतिकारकः ।
नृणां हितार्थाय तव मया वै समुदाहृतः ॥ ५६

उमोवाच ।

अपरे स्वल्पविज्ञाना धर्मविद्वेषिणो नराः ।
ब्राह्मणान्वेदविदुषो नेच्छन्ति परिसर्पितुम् ॥ ५७
व्रतवन्तो नराः केचिच्छ्रद्धादमपरायणाः ।
अव्रता भ्रष्टनियमास्तथान्ये राक्षसोपमाः ॥ ५८
यज्वानश्च तथैवान्ये निर्होमाश्च तथापरे ।
केन कर्मविपाकेन भवन्तीह वदस्व मे ॥ ५९

महेश्वर उवाच ।

आगमाल्लोकधर्माणां मर्यादाः पूर्वनिर्मिताः ।
प्रामाण्येनानुवर्तन्ते दृश्यन्ते हि दृढव्रताः ॥ ६०
अधर्मं धर्ममित्याहुर्ये च मोहवशं गताः ।
अव्रता नष्टमर्यादास्ते प्रोक्ता ब्रह्मराक्षसाः ॥ ६१
ते चेत्कालकृतोद्योगात्संभवन्तीह मानुषाः ।
निर्होमा निर्वषट्कारास्ते भवन्ति नराधमाः ॥ ६२
एष देवि मया सर्वः संशयच्छेदनाय ते ।
कुशलाकुशलो नृणां व्याख्यातो धर्मसागरः ॥ ६३

इति श्रीमहाभारते अनुशासनपर्वणि
त्रयस्त्रिंशदधिकशततमोऽध्यायः ॥ १३३ ॥

१३४

महेश्वर उवाच ।

परावरज्ञे धर्मज्ञे तपोवननिवासिनि ।
साध्वि सुभ्रु सुकेशान्ते हिमवत्पर्वतात्मजे ॥ १
दक्षे शमदमोपेते निर्ममे धर्मचारिणि ।
पृच्छामि त्वां वरारोहे पृष्टा वद ममेप्सितम् ॥ २
सावित्री ब्रह्मणः साध्वी कौशिकस्य शची सती ।
मार्तण्डजस्य धूमोर्णा ऋद्धिर्वैश्रवणस्य च ॥ ३
वरुणस्य तथा गौरी सूर्यस्य च सुवर्चला ।
रोहिणी शशिनः साध्वी स्वाहा चैव विभावसोः ॥
अदितिः कश्यपस्याथ सर्वास्ताः पतिदेवताः ।
पृष्टाश्चोपासिताश्चैव तास्त्वया देवि नित्यशः ॥ ५
तेन त्वां परिपृच्छामि धर्मज्ञे धर्मवादिनि ।
स्त्रीधर्मं श्रोतुमिच्छामि त्वयोदाहृतमादितः ॥ ६
सहधर्मचरी मे त्वं समशीला समव्रता ।
समानसारवीर्या च तपस्तीव्रं कृतं च ते ।
त्वया ह्युक्तो विशेषेण प्रमाणत्वमुपैष्यति ॥ ७
स्त्रियश्चैव विशेषेण स्त्रीजनस्य गतिः सदा ।
गौर्गां गच्छति सुश्रोणि लोकेष्वेषा स्थितिः सदा ॥
मम चार्धं शरीरस्य मम चार्धाद्विनिःसृता ।
सुरकार्यकरी च त्वं लोकसंतानकारिणी ॥ ९
तव सर्वः सुविदितः स्त्रीधर्मः शाश्वतः शुभे ।
तस्मादशेषतो ब्रूहि स्त्रीधर्मं विस्तरेण मे ॥ १०

उमोवाच ।

भगवन्सर्वभूतेश भूतभव्यभवोद्भव ।
त्वत्प्रभावादियं देव वाक्चैव प्रतिभाति मे ॥ ११
इमास्तु नद्यो देवेश सर्वतीर्थोदकैर्युताः ।
उपस्पर्शनहेतोस्त्वा समीपस्था उपासते ॥ १२
एताभिः सह संमन्त्र्य प्रवक्ष्याम्यनुपूर्वशः ।
प्रभवन्योऽनहंवादी स वै पुरुष उच्यते ॥ १३

स्त्री च भूतेश सततं स्त्रियमेवानुधावति ।
मया संमानिताश्चैव भविष्यन्ति सरिद्वराः ॥ १४
एषा सरस्वती पुण्या नदीनामुत्तमा नदी ।
प्रथमा सर्वसरितां नदी सागरगामिनी ॥ १५
विपाशा च वितस्ता च चन्द्रभागा इरावती ।
शतद्रुर्देविका सिन्धुः कौशिकी गोमती तथा ॥ १६
तथा देवनदी चेयं सर्वतीर्थाभिसंवृता ।
गगनाद्गां गता देवी गङ्गा सर्वसरिद्वरा ॥ १७
इत्युक्त्वा देवदेवस्य पत्नी धर्मभृतां वरा ।
स्मितपूर्वमिवाभाष्य सर्वास्ताः सरितस्तदा ॥ १८
अपृच्छद्देवमहिषी स्त्रीधर्मं धर्मवत्सला ।
स्त्रीधर्मकुशलास्ता वै गङ्गाद्याः सरितां वराः ॥ १९
अयं भगवता दत्तः प्रश्नः स्त्रीधर्मसंश्रितः ।
तं तु संमन्त्र्य युष्माभिर्वक्तुमिच्छामि शंकरे ॥ २०
न चैकसाध्यं पश्यामि विज्ञानं भुवि कस्यचित् ।
दिवि वा सागरगमास्तेन वो मानयाम्यहम् ॥ २१

भीष्म उवाच ।

एवं सर्वाः सरिच्छ्रेष्ठाः पृष्टाः पुण्यतमाः शिवाः ।
ततो देवनदी गङ्गा नियुक्ता प्रतिपूज्य ताम् ॥ २२
बह्वीभिर्बुद्धिभिः स्फीता स्त्रीधर्मज्ञा शुचिस्मिता ।
शैलराजसुतां देवीं पुण्या पापापहां शिवाम् ॥ २३
बुद्ध्या विनयसंपन्ना सर्वज्ञानविशारदा ।
सस्मितं बहुबुद्ध्याढ्या गङ्गा वचनमब्रवीत् ॥ २४
धन्याः स्मोऽनुगृहीताः स्मो देवि धर्मपरायणा ।
या त्वं सर्वजगन्मान्या नदीर्मानयसेऽनघे ॥ २५
प्रभवन्पृच्छते यो हि संमानयति वा पुनः ।
नूनं जनमदुष्टात्मा पण्डिताख्यां स गच्छति ॥ २६
ज्ञानविज्ञानसंपन्नानूहापोहविशारदान् ।
प्रवक्तॄन्पृच्छते योऽन्यान्स वै ना पदमर्च्छति ॥
अन्यथा बहुबुद्ध्याढ्यो वाक्यं वदति संसदि ।
अन्यथैव ह्यहंमानी दुर्बलं वदते वचः ॥ २८
दिव्यज्ञाने दिवि श्रेष्ठे दिव्यपुण्ये सदोत्थिते ।
त्वमेवार्हसि नो देवि स्त्रीधर्ममनुशासितुम् ॥ २९

भीष्म उवाच ।

ततः साराधिता देवी गङ्गया बहुभिर्गुणैः ।
प्राह सर्वमशेषेण स्त्रीधर्मं सुरसुन्दरी ॥ ३०
स्त्रीधर्मो मां प्रति यथा प्रतिभाति यथाविधि ।
तमहं कीर्तयिष्यामि तथैव प्रथितो भवेत् ॥ ३१
स्त्रीधर्मः पूर्व एवायं विवाहे बन्धुभिः कृतः ।
सहधर्मचरी भर्तुर्भवत्यग्निसमीपतः ॥ ३२
सुस्वभावा सुवचना सुवृत्ता सुखदर्शना ।
अनन्यचित्ता सुमुखी भर्तुः सा धर्मचारिणी ॥ ३३
सा भवेद्धर्मपरमा सा भवेद्धर्मभागिनी ।
देववत्सततं साध्वी या भर्तारं प्रपश्यति ॥ ३४
शुश्रूषां परिचारं च देववद्या करोति च ।
नान्यभावा ह्यविमनाः सुव्रता सुखदर्शना ॥ ३५
पुत्रवक्त्रमिवाभीक्ष्णं भर्तुर्वदनमीक्षते ।
या साध्वी नियताचारा सा भवेद्धर्मचारिणी ॥ ३६
श्रुत्वा दंपतिधर्मं वै सहधर्मकृतं शुभम् ।
अनन्यचित्ता सुमुखी भर्तुः सा धर्मचारिणी ॥ ३७
परुषाण्यपि चोक्ता या दृष्टा वा क्रूरचक्षुषा ।
सुप्रसन्नमुखी भर्तुर्या नारी सा पतिव्रता ॥ ३८
न चन्द्रसूर्यौ न तरुं पुंनाम्नो या निरीक्षते ।
भर्तृवर्जं वरारोहा सा भवेद्धर्मचारिणी ॥ ३९
दरिद्रं व्याधितं दीनमध्वना परिकर्शितम् ।
पतिं पुत्रमिवोपास्ते सा नारी धर्मभागिनी ॥ ४०
या नारी प्रयता दक्षा या नारी पुत्रिणी भवेत् ।
पतिप्रिया पतिप्राणा सा नारी धर्मभागिनी ॥ ४१
शुश्रूषां परिचर्यां च करोत्यविमनाः सदा ।
सुप्रतीता विनीता च सा नारी धर्मभागिनी ॥ ४२

न कामेषु न भोगेषु नैश्वर्ये न सुखे तथा ।
स्पृहा यस्या यथा पत्यौ सा नारी धर्मभागिनी ॥
कल्योत्थानरता नित्यं गुरुशुश्रूषणे रता ।
सुसंमृष्टक्षया चैव गोशकृत्कृतलेपना ॥ ४४
अग्निकार्यपरा नित्यं सदा पुष्पबलिप्रदा ।
देवतातिथिभृत्यानां निरुप्य पतिना सह ॥ ४५
शेषान्नमुपभुञ्जाना यथान्यायं यथाविधि ।
तुष्टपुष्टजना नित्यं नारी धर्मेण युज्यते ॥ ४६
श्वश्रूश्वशुरयोः पादौ तोषयन्ती गुणान्विता ।
मातापितृपरा नित्यं या नारी सा तपोधना ॥ ४७
ब्राह्मणान्दुर्बलानाथान्दीनान्धकृपणांस्तथा ।
बिभर्त्यन्नेन या नारी सा पतिव्रतभागिनी ॥ ४८
व्रतं चरति या नित्यं दुश्चरं लघुसत्त्वया ।
पतिचित्ता पतिहिता सा पतिव्रतभागिनी ॥ ४९
पुण्यमेतत्तपश्चैव स्वर्गश्चैष सनातनः ।
या नारी भर्तृपरमा भवेद्भर्तृव्रता शिवा ॥ ५०
पतिर्हि देवो नारीणां पतिर्बन्धुः पतिर्गतिः ।
पत्या समा गतिर्नास्ति दैवतं वा यथा पतिः ॥ ५१
पतिप्रसादः स्वर्गो वा तुल्यो नार्या न वा भवेत् ।
अहं स्वर्गं न हीच्छेयं त्वय्यप्रीते महेश्वर ॥ ५२
यद्यकार्यमधर्मं वा यदि वा प्राणनाशनम् ।
पतिर्ब्रूयाद्दरिद्रो वा व्याधितो वा कथंचन ॥ ५३
आपन्नो रिपुसंस्थो वा ब्रह्मशापार्दितोऽपि वा ।
आपद्धर्माननुप्रेक्ष्य तत्कार्यमविशङ्कया ॥ ५४
एष देव मया प्रोक्तः स्त्रीधर्मो वचनात्तव ।
या त्वेवंभाविनी नारी सा भवेद्धर्मभागिनी ॥ ५५

भीष्म उवाच ।

इत्युक्तः स तु देवेशः प्रतिपूज्य गिरेः सुताम् ।
लोकान्विसर्जयामास सर्वैरनुचरैः सह ॥ ५६
ततो ययुर्भूतगणाः सरितश्च यथागतम् ।
गन्धर्वाप्सरसश्चैव प्रणम्य शिरसा भवम् ॥ ५७

इति श्रीमहाभारते अनुशासनपर्वणि
चतुस्त्रिंशदधिकशततमोऽध्यायः ॥ १३४ ॥

१३५

वैशंपायन उवाच ।

श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः ।
युधिष्ठिरः शांतनवं पुनरेवाभ्यभाषत ॥ १
किमेकं दैवतं लोके किं वाप्येकं परायणम् ।
स्तुवन्तः कं कमर्चन्तः प्राप्नुयुर्मानवाः शुभम् ॥ २
को धर्मः सर्वधर्माणां भवतः परमो मतः ।
किं जपन्मुच्यते जन्तुर्जन्मसंसारबन्धनात् ॥ ३

भीष्म उवाच ।

जगत्प्रभुं देवदेवमनन्तं पुरुषोत्तमम् ।
स्तुवन्नामसहस्रेण पुरुषः सततोत्थितः ॥ ४
तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययम् ।
ध्यायन्स्तुवन्नमस्यंश्च यजमानस्तमेव च ॥ ५
अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम् ।
लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत् ॥ ६
ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम् ।
लोकनाथं महद्भूतं सर्वभूतभवोद्भवम् ॥ ७
एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः ।
यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरः सदा ॥ ८
परमं यो महत्तेजः परमं यो महत्तपः ।
परमं यो महद्ब्रह्म परमं यः परायणम् ॥ ९
पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलम् ।
दैवतं देवतानां च भूतानां योऽव्ययः पिता ॥ १०
यतः सर्वाणि भूतानि भवन्त्यादियुगागमे ।
यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये ॥ ११
तस्य लोकप्रधानस्य जगन्नाथस्य भूपते ।
विष्णोर्नामसहस्रं मे शृणु पापभयापहम् ॥ १२

यानि नामानि गौणानि विख्यातानि महात्मनः ।
ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये ॥१३

* * *

विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः ।
भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः ॥ १४
पूतात्मा परमात्मा च मुक्तानां परमा गतिः ।
अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च ॥ १५
योगो योगविदां नेता प्रधानपुरुषेश्वरः ।
नारसिंहवपुः श्रीमान्केशवः पुरुषोत्तमः ॥ १६
सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः ।
संभवो भावनो भर्ता प्रभवः प्रभुरीश्वरः ॥ १७
स्वयंभूः शंभुरादित्यः पुष्कराक्षो महास्वनः ।
अनादिनिधनो धाता विधाता धातुरुत्तमः ॥ १८
अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ।
विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः ॥ १९
अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः ।
प्रभूतस्त्रिककुब्धाम पवित्रं मङ्गलं परम् ॥ २०
ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः ।
हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः ॥ २१
ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः ।
अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान् ॥ २२
सुरेशः शरणं शर्म विश्वरेताः प्रजाभवः ।
अहः संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः ॥ २३
अजः सर्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः ।
वृषाकपिरमेयात्मा सर्वयोगविनिःसृतः ॥ २४
वसुर्वसुमनाः सत्यः समात्मा संमितः समः ।
अमोघः पुण्डरीकाक्षो वृषकर्मा वृषाकृतिः ॥ २५
रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः ।
अमृतः शाश्वतः स्थाणुर्वरारोहो महातपाः ॥ २६
सर्वगः सर्वविद्भानुर्विष्वक्सेनो जनार्दनः ।
वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित्कविः ॥ २७
लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः ।
चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः ॥ २८
भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः ।
अनघो विजयो जेता विश्वयोनिः पुनर्वसुः ॥ २९
उपेन्द्रो वामनः प्रांशुरमोघः शुचिरूर्जितः ।
अतीन्द्रः संग्रहः सर्गो धृतात्मा नियमो यमः ॥३०
वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः ।
अतीन्द्रियो महामायो महोत्साहो महाबलः ॥ ३१
महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः ।
अनिर्देश्यवपुः श्रीमानमेयात्मा महाद्रिधृक् ॥ ३
महेष्वासो महीभर्ता श्रीनिवासः सतां गतिः ।
अनिरुद्धः सुरानन्दो गोविन्दो गोविदां पतिः ॥३
मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः ।
हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः ॥ ३४
अमृत्युः सर्वदृक्सिंहः संधाता संधिमान्स्थिरः ।
अजो दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा ॥ ३
गुरुर्गुरुतमो धाम सत्यः सत्यपराक्रमः ।
निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः ॥ ३
अग्रणीर्ग्रामणीः श्रीमान्न्यायो नेता समीरणः ।
सहस्रमूर्धा विश्वात्मा सहस्राक्षः सहस्रपात् ॥३७
आवर्तनो निवृत्तात्मा संवृतः संप्रमर्दनः ।
अहः संवर्तको वह्निरनिलो धरणीधरः ॥ ३८
सुप्रसादः प्रसन्नात्मा विश्वधृग्विश्वभुग्विभुः ।
सत्कर्ता सत्कृतः साधुर्जह्नुर्नारायणो नरः ॥ ३९
असंख्येयोऽप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः ।
सिद्धार्थः सिद्धसंकल्पः सिद्धिदः सिद्धिसाधनः ॥
वृषाही वृषभो विष्णुर्वृषपर्वा वृषोदरः ।
वर्धनो वर्धमानश्च विविक्तः श्रुतिसागरः ॥ ४१
सुभुजो दुर्धरो वाग्मी महेन्द्रो वसुदो वसुः ।

नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः ॥ ४२
ओजस्तेजो द्युतिधरः प्रकाशात्मा प्रतापनः ।
ऋद्धः स्पष्टाक्षरो मन्त्रश्चन्द्रांशुर्भास्करद्युतिः ॥ ४३
अमृतांशूद्भवो भानुः शशबिन्दुः सुरेश्वरः ।
औषधं जगतः सेतुः सत्यधर्मपराक्रमः ॥ ४४
भूतभव्यभवन्नाथः पवनः पावनोऽनिलः ।
कामहा कामकृत्कान्तः कामः कामप्रदः प्रभुः ॥४५
युगादिकृद्युगावर्तो नैकमायो महाशनः ।
अदृश्यो व्यक्तरूपश्च सहस्रजिदनन्तजित् ॥ ४६
इष्टो विशिष्टः शिष्टेष्टः शिखण्डी नहुषो वृषः ।
क्रोधहा क्रोधकृत्कर्ता विश्वबाहुर्महीधरः ॥ ४७
अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः ।
अपां निधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः ॥ ४८
स्कन्दः स्कन्दधरो धुर्यो वरदो वायुवाहनः ।
वासुदेवो बृहद्भानुरादिदेवः पुरंदरः ॥ ४९
अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः ।
अनुकूलः शतावर्तः पद्मी पद्मनिभेक्षणः ॥ ५०
पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृत् ।
महर्द्धिर्ऋद्धो वृद्धात्मा महाक्षो गरुडध्वजः ॥ ५१
अतुलः शरभो भीमः समयज्ञो हविर्हरिः ।
सर्वलक्षणलक्षण्यो लक्ष्मीवान्समितिंजयः ॥ ५२
विक्षरो रोहितो मार्गो हेतुर्दामोदरः सहः ।
महीधरो महाभागो वेगवानमिताशनः ॥ ५३
उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः ।
करणं कारणं कर्ता विकर्ता गहनो गुहः ॥ ५४
व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः ।
परर्द्धिः परमः स्पष्टस्तुष्टः पुष्टः शुभेक्षणः ॥ ५५
रामो विरामो विरतो मार्गो नेयो नयोऽनयः ।
वीरः शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तमः ॥ ५६
वैकुण्ठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः ।
हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः ॥ ५७
ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः ।
उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः ॥ ५८
विस्तारः स्थावरः स्थाणुः प्रमाणं बीजमव्ययम् ।
अर्थोऽनर्थो महाकोशो महाभोगो महाधनः ॥ ५९
अनिर्विण्णः स्थविष्ठो भूर्धर्मयूपो महामखः ।
नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः ॥ ६०
यज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सतां गतिः ।
सर्वदर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमम् ॥ ६१
सुव्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः सुहृत् ।
मनोहरो जितक्रोधो वीरबाहुर्विदारणः ॥ ६२
स्वापनः स्ववशो व्यापी नैकात्मा नैककर्मकृत् ।
वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः ॥ ६३
धर्मगुब्धर्मकृद्धर्मी सदसत्क्षरमक्षरम् ।
अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः ॥ ६४
गभस्तिनेमिः सत्त्वस्थः सिंहो भूतमहेश्वरः ।
आदिदेवो महादेवो देवेशो देवभृद्गुरुः ॥ ६५
उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ।
शरीरभूतभृद्भोक्ता कपीन्द्रो भूरिदक्षिणः ॥ ६६
सोमपोऽमृतपः सोमः पुरुजित्पुरुसत्तमः ।
विनयो जयः सत्यसंधो दाशार्हः सात्वतां पतिः ॥
जीवो विनयिता साक्षी मुकुन्दोऽमितविक्रमः ।
अम्भोनिधिरनन्तात्मा महोदधिशयोऽन्तकः ॥ ६८
अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः ।
आनन्दो नन्दनो नन्दः सत्यधर्मा त्रिविक्रमः ॥
महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः ।
त्रिपदस्त्रिदशाध्यक्षो महाशृङ्गः कृतान्तकृत् ॥ ७०
महावराहो गोविन्दः सुषेणः कनकाङ्गदी ।
गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः ॥ ७१
वेधाः स्वाङ्गोऽजितः कृष्णो दृढः संकर्षणोऽच्युतः ।

वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः ॥ ७२
भगवान्भगहा नन्दी वनमाली हलायुधः ।
आदित्यो ज्योतिरादित्यः सहिष्णुर्गतिसत्तमः ॥ ७३
सुधन्वा खण्डपरशुर्दारुणो द्रविणप्रदः ।
दिवःस्पृक्सर्वदृग्व्यासो वाचस्पतिरयोनिजः ॥ ७४
त्रिसामा सामगः साम निर्वाणं भेषजं भिषक् ।
संन्यासकृच्छमः शान्तो निष्ठा शान्तिः परायणम् ॥
शुभाङ्गः शान्तिदः स्रष्टा कुमुदः कुवलेशयः ।
गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ॥ ७६
अनिवर्ती निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः ।
श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतां वरः ॥७७
श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः ।
श्रीधरः श्रीकरः श्रेयः श्रीमाँल्लोकत्रयाश्रयः ॥ ७८
स्वक्षः स्वङ्गः शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः ।
विजितात्मा विधेयात्मा सत्कीर्तिश्छिन्नसंशयः ॥७९
उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतः स्थिरः ।
भूशयो भूषणो भूनिर्विशोकः शोकनाशनः ॥ ८०
अर्चिष्मानर्चितः कुम्भो विशुद्धात्मा विशोधनः ।
अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः ॥ ८१
कालनेमिनिहा वीरः शूरः शौरिर्जनेश्वरः ।
त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः ॥८२
कामदेवः कामपालः कामी कान्तः कृतागमः ।
अनिर्देश्यवपुर्विष्णुर्वीरोऽनन्तो धनंजयः ॥ ८३
ब्रह्मण्यो ब्रह्मकृद्ब्रह्मा ब्रह्म ब्रह्मविवर्धनः ।
ब्रह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ॥ ८४
महाक्रमो महाकर्मा महातेजा महोरगः ।
महाक्रतुर्महायज्वा महायज्ञो महाहविः ॥ ८५
स्तव्यः स्तवप्रियः स्तोत्र स्तुतिः स्तोता रणप्रियः ।
पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः ॥ ८६
मनोजवस्तीर्थकरो वसुरेता वसुप्रदः ।
वसुप्रदो वासुदेवो वसुर्वसुमना हविः ॥ ८७
सद्गतिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः ।
शूरसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः ॥ ८८
भूतावासो वासुदेवो सर्वासुनिलयोऽनलः ।
दर्पहा दर्पदो दृप्तो दुर्धरोऽथापराजितः ॥ ८९
विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्तिमान् ।
अनेकमूर्तिरव्यक्तः शतमूर्तिः शताननः ॥ ९०
एको नैकः सवः कः किं यत्तत्पदमनुत्तमम् ।
लोकबन्धुर्लोकनाथो माधवो भक्तवत्सलः ॥ ९१
सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी ।
वीरहा विषमः शून्यो घृताशीरचलश्चलः ॥ ९२
अमानी मानदो मान्यो लोकस्वामी त्रिलोकधृक् ।
सुमेधा मेधजो धन्यः सत्यमेधा धराधरः ॥ ९३
तेजो वृषो द्युतिधरः सर्वशस्त्रभृतां वरः ।
प्रग्रहो निग्रहोऽव्यग्रो नैकशृङ्गो गदाग्रजः ॥ ९४
चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः ।
चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात् ॥ ९५
समावर्तो निवृत्तात्मा दुर्जयो दुरतिक्रमः ।
दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा ॥ ९६
शुभाङ्गो लोकसारङ्गः सुतन्तुस्तन्तुवर्धनः ।
इन्द्रकर्मा महाकर्मा कृतकर्मा कृतागमः ॥ ९७
उद्भवः सुन्दरः सुन्दो रत्ननाभः सुलोचनः ।
अर्को वाजसनः शृङ्गी जयन्तः सर्वविज्जयी ॥९८
सुवर्णबिन्दुरक्षोभ्यः सर्ववागीश्वरेश्वरः ।
महाह्रदो महागर्तो महाभूतो महानिधिः ॥ ९९
कुमुदः कुंदरः कुन्दः पर्जन्यः पवनोऽनिलः ।
अमृतांशोऽमृतवपुः सर्वज्ञः सर्वतोमुखः ॥ १००
सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः ।
न्यग्रोधोदुम्बरोऽश्वत्थश्चाणूरान्ध्रनिषूदनः ॥ १०१
सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः ।

अमूर्तिरनघोऽचिन्त्यो भयकृद्भयनाशनः ॥ १०२
अणुर्बृहत्कृशः स्थूलो गुणभृन्निर्गुणो महान् ।
अधृतः स्वधृतः स्वास्यः प्राग्वंशो वंशवर्धनः ॥१०३
भारभृत्कथितो योगी योगीशः सर्वकामदः ।
आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः ॥१०४
धनुर्धरो धनुर्वेदो दण्डो दमयिता दमः ।
अपराजितः सर्वसहो नियन्ता नियमो यमः ॥१०५
सत्त्ववान्सात्त्विकः सत्यः सत्यधर्मपरायणः ।
अभिप्रायः प्रियार्होऽर्हः प्रियकृत्प्रीतिवर्धनः ॥१०६
विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः ।
रविर्विरोचनः सूर्यः सविता रविलोचनः ॥ १०७
अनन्तो हुतभुग्भोक्ता सुखदो नैकदोऽग्रजः ।
अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतम् ॥१०८
सनात्सनातनतमः कपिलः कपिरव्ययः ।
स्वस्तिदः स्वस्तिकृत्स्वस्ति स्वस्तिभुक्स्वस्तिदक्षिणः ॥
अरौद्रः कुण्डली चक्री विक्रम्यूर्जितशासनः ।
शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः ॥११०
अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणां वरः ।
विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः ॥ १११
उत्तारणो दुष्कृतिहा पुण्यो दुःस्वप्ननाशनः ।
वीरहा रक्षणः सन्तो जीवनः पर्यवस्थितः ॥ ११२
अनन्तरूपोऽनन्तश्रीर्जितमन्युर्भयापहः ।
चतुरस्रो गभीरात्मा विदिशो व्यादिशो दिशः ॥
अनादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिराङ्गदः ।
जननो जनजन्मादिर्भीमो भीमपराक्रमः ॥ ११४
आधारनिलयो धाता पुष्पहासः प्रजागरः ।
ऊर्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः ॥११५
प्रमाणं प्राणनिलयः प्राणकृत्प्राणजीवनः ।
तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः ॥ ११६
भूर्भुवःस्वस्तरुस्तारः सविता प्रपितामहः ।
यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः ॥ ११७
यज्ञभृद्यज्ञकृद्यज्ञी यज्ञभुग्यज्ञसाधनः ।
यज्ञान्तकृद्यज्ञगुह्यमन्नमन्नाद एव च ॥ ११८
आत्मयोनिः स्वयंजातो वैखानः सामगायनः ।
देवकीनन्दनः स्रष्टा क्षितीशः पापनाशनः ॥ ११९
शङ्खभृन्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः ।
रथाङ्गपाणिरक्षोभ्यः सर्वप्रहरणायुधः ॥ १२०

* * * *

इतीदं कीर्तनीयस्य केशवस्य महात्मनः ।
नाम्नां सहस्रं दिव्यानामशेषेण प्रकीर्तितम् ॥१२१
य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत् ।
नाशुभं प्राप्नुयात्किंचित्सोऽमुत्रेह च मानवः ॥१२२
वेदान्तगो ब्राह्मणः स्यात्क्षत्रियो विजयी भवेत् ।
वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवाप्नुयात् ॥१२३
धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थी चार्थमाप्नुयात् ।
कामानवाप्नुयात्कामी प्रजार्थी चाप्नुयात्प्रजाः ॥१२४
भक्तिमान्यः सदोत्थाय शुचिस्तद्गतमानसः ।
सहस्रं वासुदेवस्य नाम्नामेतत्प्रकीर्तयेत् ॥ १२५
यशः प्राप्नोति विपुलं ज्ञातिप्राधान्यमेव च ।
अचलां श्रियमाप्नोति श्रेयश्चाप्नोत्यनुत्तमम् ॥ १२६
न भयं क्वचिदाप्नोति वीर्यं तेजश्च विन्दति ।
भवत्यरोगो द्युतिमान्बलरूपगुणान्वितः ॥ १२७
रोगार्तो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात् ।
भयान्मुच्येत भीतश्च मुच्येतापन्न आपदः ॥ १२८
दुर्गाण्यतितरत्याशु पुरुषः पुरुषोत्तमम् ।
स्तुवन्नामसहस्रेण नित्यं भक्तिसमन्वितः ॥१२९
वासुदेवाश्रयो मर्त्यो वासुदेवपरायणः ।
सर्वपापविशुद्धात्मा याति ब्रह्म सनातनम् ॥ १३०
न वासुदेवभक्तानामशुभं विद्यते क्वचित् ।
जन्ममृत्युजराव्याधिभयं वाप्युपजायते ॥ १३१

इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः ।
युज्येतात्मसुखक्षान्तिश्रीधृतिस्मृतिकीर्तिभिः ॥१३२
न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ।
भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे ॥ १३३
द्यौः सचन्द्रार्कनक्षत्रा खं दिशो भूर्महोदधिः ।
वासुदेवस्य वीर्येण विधृतानि महात्मनः ॥ १३४
ससुरासुरगन्धर्वं सयक्षोरगराक्षसम् ।
जगद्वशे वर्ततेदं कृष्णस्य सचराचरम् ॥ १३५
इन्द्रियाणि मनो बुद्धिः सत्त्वं तेजो बलं धृतिः ।
वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च ॥ १३६
सर्वागमानामाचारः प्रथमं परिकल्प्यते ।
आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः ॥ १३७
ऋषयः पितरो देवा महाभूतानि धातवः ।
जङ्गमाजङ्गमं चेदं जगन्नारायणोद्भवम् ॥ १३८
योगो ज्ञानं तथा सांख्यं विद्याः शिल्पानि कर्म च ।
वेदाः शास्त्राणि विज्ञानमेतत्सर्वं जनार्दनात् ॥१३९
एको विष्णुर्महद्भूतं पृथक्भूतान्यनेकशः ।
त्रींल्लोकान्व्याप्य भूतात्मा भुङ्क्ते विश्वभुगव्ययः ॥
इमं स्तवं भगवतो विष्णोर्व्यासेन कीर्तितम् ।
पठेद्य इच्छेत्पुरुषः श्रेयः प्राप्तुं सुखानि च ॥ १४१
विश्वेश्वरमजं देवं जगतः प्रभवाप्ययम् ।
भजन्ति ये पुष्कराक्षं न ते यान्ति पराभवम् ॥

इति श्रीमहाभारते अनुशासनपर्वणि
पञ्चत्रिंशदधिकशततमोऽध्यायः ॥ १३५ ॥

१३६

युधिष्ठिर उवाच ।

के पूज्याः के नमस्कार्याः कथं वर्तेत केषु च ।
किमाचारः कीदृशेषु पितामह न रिष्यते ॥ १

भीष्म उवाच ।

ब्राह्मणानां परिभवः सादयेदपि देवताः ।
ब्राह्मणानां नमस्कर्ता युधिष्ठिर न रिष्यते ॥ २
ते पूज्यास्ते नमस्कार्या वर्तेथास्तेषु पुत्रवत् ।
ते हि लोकानिमान्सर्वान्धारयन्ति मनीषिणः ॥ ३
ब्राह्मणाः सर्वलोकानां महान्तो धर्मसेतवः ।
धनत्यागाभिरामाश्च वाक्संयमरताश्च ये ॥ ४
रमणीयाश्च भूतानां निधानं च धृतव्रताः ।
प्रणेतारश्च लोकानां शास्त्राणां च यशस्विनः ॥ ५
तपो येषां धनं नित्यं वाक्चैव विपुलं बलम् ।
प्रभवश्चापि धर्माणां धर्मज्ञाः सूक्ष्मदर्शिनः ॥ ६
धर्मकामाः स्थिता धर्मे सुकृतैर्धर्मसेतवः ।
यानुपाश्रित्य जीवन्ति प्रजाः सर्वाश्चतुर्विधाः ॥ ७
पन्थानः सर्वनेतारो यज्ञवाहाः सनातनाः ।
पितृपैतामहीं गुर्वीमुद्वहन्ति धुरं सदा ॥ ८
धुरि ये नावसीदन्ति विषमे सद्गवा इव ।
पितृदेवातिथिमुखा हव्यकव्याग्रभोजिनः ॥ ९
भोजनादेव ये लोकांस्त्रायन्ते महतो भयात् ।
दीपाः सर्वस्य लोकस्य चक्षुश्चक्षुष्मतामपि ॥ १०
सर्वशिल्पादिनिधयो निपुणाः सूक्ष्मदर्शिनः ।
गतिज्ञाः सर्वभूतानामध्यात्मगतिचिन्तकाः ॥ ११
आदिमध्यावसानानां ज्ञातारश्छिन्नसंशयाः ।
परावरविशेषज्ञा गन्तारः परमां गतिम् ॥ १२
विमुक्ता धुतपाप्मानो निर्द्वंद्वा निष्परिग्रहाः ।
मानार्हा मानिता नित्यं ज्ञानविद्भिर्महात्मभिः ॥१३
चन्दने मलपङ्के च भोजनेऽभोजने समाः ।
समं येषां दुकूलं च शाणक्षौमाजिनानि च ॥ १४
तिष्ठेयुरप्यभुञ्जाना बहूनि दिवसान्यपि ।
शोषयेयुश्च गात्राणि स्वाध्यायैः संयतेन्द्रियाः ॥१५
अदैवं दैवतं कुर्युर्दैवतं चाप्यदैवतम् ।
लोकानन्यान्सृजेयुश्च लोकपालांश्च कोपिताः ॥ १६
अपेयः सागरो येषामभिशापान्महात्मनाम् ।

येषां कोपाग्निरद्यापि दण्डके नोपशाम्यति ॥ १७
देवानामपि ये देवाः कारणं कारणस्य च ।
प्रमाणस्य प्रमाणं च कस्तानभिभवेद्बुधः ॥ १८
येषां वृद्धश्च बालश्च सर्वः संमानमर्हति ।
तपोविद्याविशेषात्तु मानयन्ति परस्परम् ॥ १९
अविद्वान्ब्राह्मणो देवः पात्रं वै पावनं महत् ।
विद्वान्भूयस्तरो देवः पूर्णसागरसंनिभः ॥ २०
अविद्वांश्चैव विद्वांश्च ब्राह्मणो दैवतं महत् ।
प्रणीतश्चाप्रणीतश्च यथाग्निर्दैवतं महत् ॥ २१
श्मशाने ह्यपि तेजस्वी पावको नैव दुष्यति ।
हविर्यज्ञेषु च वहन्भूय एवाभिशोभते ॥ २२
एवं यद्यप्यनिष्टेषु वर्तते सर्वकर्मसु ।
सर्वथा ब्राह्मणो मान्यो दैवतं विद्धि तत्परम् ॥२३

इति श्रीमहाभारते अनुशासनपर्वणि
षट्त्रिंशदधिकशततमोऽध्यायः ॥ १३६ ॥

१३७

युधिष्ठिर उवाच ।

कां तु ब्राह्मणपूजायां व्युष्टिं दृष्ट्वा जनाधिप ।
कं वा कर्मोदयं मत्वा तानर्चसि महामते ॥ १

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
पवनस्य च संवादमर्जुनस्य च भारत ॥ २
सहस्रभुजभृच्छ्रीमान्कार्तवीर्योऽभवत्प्रभुः ।
अस्य लोकस्य सर्वस्य माहिष्मत्यां महाबलः ॥ ३
स तु रत्नाकरवतीं सद्वीपां सागराम्बराम् ।
शशास सर्वां पृथिवीं हैहयः सत्यविक्रमः ॥ ४
स्ववित्तं तेन दत्तं तु दत्तात्रेयाय कारणे ।
क्षत्रधर्मं पुरस्कृत्य विनयं श्रुतमेव च ॥ ५
आराधयामास च तं कृतवीर्यात्मजो मुनिम् ।
न्यमन्त्रयत संहृष्टः स द्विजश्च वरैस्त्रिभिः ॥ ६
स वरैश्छन्दितस्तेन नृपो वचनमब्रवीत् ।
सहस्रबाहुर्भूयां वै चमूमध्ये गृहेऽन्यथा ॥ ७
मम बाहुसहस्रं तु पश्यन्तां सैनिका रणे ।
विक्रमेण महीं कृत्स्नां जयेयं विपुलव्रत ।
तां च धर्मेण संप्राप्य पालयेयमतन्द्रितः ॥ ८
चतुर्थं तु वरं याचे त्वामहं द्विजसत्तम ।
तं ममानुग्रहकृते दातुमर्हस्यनिन्दित ।
अनुशासन्तु मां सन्तो मिथ्यावृत्तं तदाश्रयम् ॥ ९
इत्युक्तः स द्विजः प्राह तथास्त्विति नराधिपम् ।
एवं समभवंस्तस्य वरास्ते दीप्ततेजसः ॥ १०
ततः स रथमास्थाय ज्वलनार्कसमद्युतिः ।
अब्रवीद्वीर्यसंमोहात्को न्वस्ति सदृशो मया ।
वीर्यधैर्ययशःशौचैर्विक्रमेणौजसापि वा ॥ ११
तद्वाक्यान्ते चान्तरिक्षे वागुवाचाशरीरिणी ।
न त्वं मूढ विजानीषे ब्राह्मणं क्षत्रियाद्वरम् ।
सहितो ब्राह्मणेनेह क्षत्रियो रक्षति प्रजाः ॥ १२

अर्जुन उवाच ।

कुर्यां भूतानि तुष्टोऽहं क्रुद्धो नाशं तथा नये ।
कर्मणा मनसा वाचा न मत्तोऽस्ति वरो द्विजः ॥
पूर्वो ब्रह्मोत्तरो वादो द्वितीयः क्षत्रियोत्तरः ।
त्वयोक्तौ यौ तु तौ हेतू विशेषस्त्वत्र दृश्यते ॥ १४
ब्राह्मणाः संश्रिताः क्षत्रं न क्षत्रं ब्राह्मणाश्रितम् ।
श्रितान्ब्रह्मोपधा विप्राः खादन्ति क्षत्रियान्भुवि ॥
क्षत्रियेष्वाश्रितो धर्मः प्रजानां परिपालनम् ।
क्षत्राद्वृत्तिर्ब्राह्मणानां तैः कथं ब्राह्मणो वरः ॥ १६
सर्वभूतप्रधानांस्तान्भैक्षवृत्तीनहं सदा ।
आत्मसंभावितान्विप्रान्स्थापयाम्यात्मनो वशे ॥ १७
कथितं ह्यनया सत्यं गायत्र्या कन्यया दिवि ।
विजेष्याम्यवशान्सर्वान्ब्राह्मणांश्चर्मवाससः ॥ १८
न च मां च्यावयेद्राष्ट्रात्त्रिषु लोकेषु कश्चन ।

देवो वा मानुषो वापि तस्माज्ज्येष्ठो द्विजादहम् ॥
अद्य ब्रह्मोत्तरं लोकं करिष्ये क्षत्रियोत्तरम् ।
न हि मे संयुगे कश्चित्सोढुमुत्सहते बलम् ॥ २०
अर्जुनस्य वचः श्रुत्वा वित्रस्ताभून्निशाचरी ।
अथैनमन्तरिक्षस्थस्ततो वायुरभाषत ॥ २१
त्यजैनं कलुषं भावं ब्राह्मणेभ्यो नमस्कुरु ।
एतेषां कुर्वतः पापं राष्ट्रक्षोभो हि ते भवेत् ॥ २२
अथ वा त्वां महीपाल शमयिष्यन्ति वै द्विजाः ।
निरसिष्यन्ति वा राष्ट्राद्धतोत्साहं महाबलाः ॥ २३
तं राजा कस्त्वमित्याह ततस्तं प्राह मारुतः ।
वायुर्वै देवदूतोऽस्मि हितं त्वां प्रब्रवीम्यहम् ॥ २४

अर्जुन उवाच ।

अहो त्वयाद्य विप्रेषु भक्तिरागः प्रदर्शितः ।
यादृशं पृथिवी भूतं तादृशं ब्रूहि वै द्विजम् ॥ २५
वायोर्वा सदृशं किंचिद्ब्रूहि त्वं ब्राह्मणोत्तमम् ।
अपां वै सदृशं ब्रूहि सूर्यस्य नभसोऽपि वा ॥ २६

इति श्रीमहाभारते अनुशासनपर्वणि
सप्तत्रिंशदधिकशततमोऽध्यायः ॥ १३७ ॥

१३८

वायुरुवाच ।

शृणु मूढ गुणान्कांश्चिद्ब्राह्मणानां महात्मनाम् ।
ये त्वया कीर्तिता राजंस्तेभ्योऽथ ब्राह्मणो वरः ॥१
त्यक्त्वा महीत्वं भूमिस्तु स्पर्धयाङ्गनृपस्य ह ।
नाशं जगाम तां विप्रो व्यष्टम्भयत कश्यपः ॥ २
अक्षया ब्राह्मणा राजन्दिवि चेह च नित्यदा ।
अपिबत्तेजसा ह्यापः स्वयमेवाङ्गिराः पुरा ॥ ३
स ताः पिबन्क्षीरमिव नातृप्यत महातपाः ।
अपूरयन्महौघेन महीं सर्वां च पार्थिव ॥ ४
तस्मिन्नहं च क्रुद्धे वै जगत्त्यक्त्वा ततो गतः ।
व्यतिष्ठमग्निहोत्रे च चिरमङ्गिरसो भयात् ॥ ५
अभिशप्तश्च भगवान्गौतमेन पुरंदरः ।
अहल्यां कामयानो वै धर्मार्थं च न हिंसितः ॥ ६
तथा समुद्रो नृपते पूर्णो मृष्टेन वारिणा ।
ब्राह्मणैरभिशप्तः सँल्लवणोदः कृतो विभो ॥ ७
सुवर्णवर्णो निर्धूमः संहतोर्ध्वशिखः कविः ।
क्रुद्धेनाङ्गिरसा शप्तो गुणैरेतैर्विवर्जितः ॥ ८
मरुतश्चूर्णितान्पश्य येऽहसन्त महोदधिम् ।
सुवर्णधारिणा नित्यमवशप्ता द्विजातिना ॥ ९
समो न त्वं द्विजातिभ्यः श्रेष्ठं विद्धि नराधिप ।
गर्भस्थान्ब्राह्मणान्सम्यङ्नमस्यति किल प्रभुः ॥ १०
दण्डकानां महद्राज्यं ब्राह्मणेन विनाशितम् ।
तालजङ्घं महत्क्षत्रमौर्वेणैकेन नाशितम् ॥ ११
त्वया च विपुलं राज्यं बलं धर्मः श्रुतं तथा ।
दत्तात्रेयप्रसादेन प्राप्तं परमदुर्लभम् ॥ १२
अग्निं त्वं यजसे नित्यं कस्मादर्जुन ब्राह्मणम् ।
स हि सर्वस्य लोकस्य हव्यवाड्किं न वेत्सि तम् ॥
अथ वा ब्राह्मणश्रेष्ठमनु भूतानुपालकम् ।
कर्तारं जीवलोकस्य कस्माज्जानन्विमुह्यसे ॥ १४
तथा प्रजापतिर्ब्रह्मा अव्यक्तः प्रभवाप्ययः ।
येनेदं निखिलं विश्वं जनितं स्थावरं चरम् ॥ १५
अण्डजातं तु ब्रह्माणं केचिदिच्छन्त्यपण्डिताः ।
अण्डाद्भिन्नाद्बभुः शैला दिशोऽम्भः पृथिवी दिवम् ॥
द्रष्टव्यं नैतदेवं हि कथं ज्यायस्तमो हि सः ।
स्मृतमाकाशमण्डं तु तस्माज्जातः पितामहः ॥ १७
तिष्ठेत्कथमिति ब्रूहि न किंचिद्धि तदा भवेत् ।
अहंकार इति प्रोक्तः सर्वतेजोगतः प्रभुः ॥ १८
नास्त्यण्डमस्ति तु ब्रह्मा स राजँल्लोकभावनः ।
इत्युक्तः स तदा तूष्णीमभूद्वायुस्तमब्रवीत् ॥ १९

इति श्रीमहाभारते अनुशासनपर्वणि
अष्टत्रिंशदधिकशततमोऽध्यायः ॥ १३८ ॥

१३९

वायुरुवाच ।

इमां भूमिं ब्राह्मणेभ्यो दित्सुर्वै दक्षिणां पुरा ।
अङ्गो नाम नृपो राजंस्ततश्चिन्तां मही ययौ ॥ १
धारणीं सर्वभूतानामयं प्राप्य वरो नृपः ।
कथमिच्छति मां दातुं द्विजेभ्यो ब्रह्मणः सुताम् ॥२
साहं त्यक्त्वा गमिष्यामि भूमित्वं ब्रह्मणः पदम् ।
अयं सराष्ट्रो नृपतिर्मा भूदिति ततोऽगमत् ॥ ३
ततस्तां कश्यपो दृष्ट्वा व्रजन्तीं पृथिवीं तदा ।
प्रविवेश महीं सद्यो मुक्त्वात्मानं समाहितः ॥ ४
रुद्धा सा सर्वतो जज्ञे तृणौषधिसमन्विता ।
धर्मोत्तरा नष्टभया भूमिरासीत्ततो नृप ॥ ५
एवं वर्षसहस्राणि दिव्यानि विपुलव्रतः ।
त्रिंशतं कश्यपो राजन्भूमिरासीदतन्द्रितः ॥ ६
अथागम्य महाराज नमस्कृत्य च कश्यपम् ।
पृथिवी काश्यपी जज्ञे सुता तस्य महात्मनः ॥ ७
एष राजन्नीदृशो वै ब्राह्मणः कश्यपोऽभवत् ।
अन्यं प्रब्रूहि वापि त्वं कश्यपात्क्षत्रियं वरम् ॥ ८
तूष्णीं बभूव नृपतिः पवनस्त्वब्रवीत्पुनः ।
शृणु राजन्नुतथ्यस्य जातस्याङ्गिरसे कुले ॥ ९
भद्रा सोमस्य दुहिता रूपेण परमा मता ।
तस्यास्तुल्यं पतिं सोम उतथ्यं समपश्यत ॥ १०
सा च तीव्रं तपस्तेपे महाभागा यशस्विनी ।
उतथ्यं तु महाभागं तत्कृतेऽवरयत्तदा ॥ ११
तत आहूय सोतथ्यं ददावत्र यशस्विनीम् ।
भार्यार्थे स च जग्राह विधिवद्भूरिदक्षिणः ॥ १२
तां त्वकामयत श्रीमान्वरुणः पूर्वमेव ह ।
स चागम्य वनप्रस्थं यमुनायां जहार ताम् ॥ १३
जलेश्वरस्तु हृत्वा तामनयत्स्वपुरं प्रति ।
परमाद्भुतसंकाशं षट्सहस्रशतह्रदम् ॥ १४
न हि रम्यतरं किंचित्तस्मादन्यत्पुरोत्तमम् ।
प्रासादैरप्सरोभिश्च दिव्यैः कामैश्च शोभितम् ।
तत्र देवस्तया सार्धं रेमे राजञ्जलेश्वरः ॥ १५
अथाख्यातमुतथ्याय ततः पत्न्यवमर्दनम् ॥ १६
तच्छ्रुत्वा नारदात्सर्वमुतथ्यो नारदं तथा ।
प्रोवाच गच्छ ब्रूहि त्वं वरुणं परुषं वचः ।
मद्वाक्यान्मुञ्च मे भार्यां कस्माद्वा हृतवानसि ॥१७
लोकपालोऽसि लोकानां न लोकस्य विलोपकः ।
सोमेन दत्ता भार्या मे त्वया चापहृताद्य वै ॥१८
इत्युक्तो वचनात्तस्य नारदेन जलेश्वरः ।
मुञ्च भार्यामुतथ्यस्येत्यथ तं वरुणोऽब्रवीत् ।
ममैषा सुप्रिया भार्या नैनामुत्स्रष्टुमुत्सहे ॥ १९
इत्युक्तो वरुणेनाथ नारदः प्राप्य तं मुनिम् ।
उतथ्यमब्रवीद्वाक्यं नातिहृष्टमना इव ॥ २०
गले गृहीत्वा क्षिप्तोऽस्मि वरुणेन महामुने ।
न प्रयच्छति ते भार्यां यत्ते कार्यं कुरुष्व तत् ॥२१
नारदस्य वचः श्रुत्वा क्रुद्धः प्राज्वलदङ्गिराः ।
अपिबत्तेजसा वारि विष्टभ्य सुमहातपाः ॥ २२
पीयमाने च सर्वस्मिंस्तोये वै सलिलेश्वरः ।
सुहृद्भिः क्षिप्यमाणोऽपि नैवामुञ्चत तां तदा ॥२३
ततः क्रुद्धोऽब्रवीद्भूमिमुतथ्यो ब्राह्मणोत्तमः ।
दर्शयस्व स्थलं भद्रे षट्सहस्रशतह्रदम् ॥ २४
ततस्तदिरिणं जातं समुद्रश्चापसर्पितः ।
तस्माद्देशान्नदीं चैव प्रोवाचासौ द्विजोत्तमः ॥ २५
अदृश्या गच्छ भीरु त्वं सरस्वति मरुं प्रति ।
अपुण्य एष भवतु देशस्त्यक्तस्त्वया शुभे ॥ २६
तस्मिन्संचूर्णिते देशे भद्रामादाय वारिपः ।
अददाच्छरणं गत्वा भार्यामाङ्गिरसाय वै ॥ २७
प्रतिगृह्य तु तां भार्यामुतथ्यः सुमनाभवत् ।
मुमोच च जगद्दुःखाद्वरुणं चैव हैहय ॥ २८

ततः स लब्ध्वा तां भार्यां वरुणं प्राह धर्मवित् ।
उतथ्यः सुमहातेजा यत्तच्छृणु नराधिप ॥ २९
मयैषा तपसा प्राप्ता क्रोशतस्ते जलाधिप ।
इत्युक्त्वा तामुपादाय स्वमेव भवनं ययौ ॥ ३०
एष राजन्नीदृशो वै उतथ्यो ब्राह्मणर्षभः ।
ब्रवीम्यहं ब्रूहि वा त्वमुतथ्यात्क्षत्रियं वरम् ॥ ३१

इति श्रीमहाभारते अनुशासनपर्वणि
एकोनचत्वारिंशदधिकशततमोऽध्यायः ॥ १३९ ॥

१४०

भीष्म उवाच ।

इत्युक्तः स तदा तूष्णीमभूद्वायुस्ततोऽब्रवीत् ।
शृणु राजन्नगस्त्यस्य माहात्म्यं ब्राह्मणस्य ह ॥ १
असुरैर्निर्जिता देवा निरुत्साहाश्च ते कृताः ।
यज्ञाश्चैषां हृता सर्वे पितृभ्यश्च स्वधा तथा ॥ २
कर्मेज्या मानवानां च दानवैर्हैहयर्षभ ।
भ्रष्टैश्वर्यास्ततो देवाश्चेरुः पृथ्वीमिति श्रुतिः ॥ ३
ततः कदाचित्ते राजन्दीप्तमादित्यवर्चसम् ।
ददृशुस्तेजसा युक्तमगस्त्यं विपुलव्रतम् ॥ ४
अभिवाद्य च तं देवा दृष्ट्वा च यशसा वृतम् ।
इदमूचुर्महात्मानं वाक्यं काले जनाधिप ॥ ५
दानवैर्युधि भग्नाः स्म तथैश्वर्याच्च भ्रंशिताः ।
तदस्मान्नो भयात्तीव्रात्त्राहि त्वं मुनिपुंगव ॥ ६
इत्युक्तः स तदा देवैरगस्त्यः कुपितोऽभवत् ।
प्रजज्वाल च तेजस्वी कालाग्निरिव संक्षये ॥ ७
तेन दीप्तांशुजालेन निर्दग्धा दानवास्तदा ।
अन्तरिक्षान्महाराज न्यपतन्त सहस्रशः ॥ ८
दह्यमानास्तु ते दैत्यास्तस्यागस्त्यस्य तेजसा ।
उभौ लोकौ परित्यज्य ययुः काष्ठां स्म दक्षिणाम् ॥
बलिस्तु यजते यज्ञमश्वमेधं महीं गतः ।
येऽन्ये स्वस्था महीस्थाश्च ते न दग्धा महासुराः ॥

ततो लोकाः पुनः प्राप्ताः सुरैः शान्तं च तद्रजः ।
अथैनमब्रुवन्देवा भूमिष्ठानसुराञ्जहि ॥ ११
इत्युक्त आह देवान्स न शक्नोमि महीगतान् ।
दग्धुं तपो हि क्षीयेन्मे धक्ष्यामीति च पार्थिव ॥
एवं दग्धा भगवता दानवाः स्वेन तेजसा ।
अगस्त्येन तदा राजंस्तपसा भावितात्मना ॥ १३
ईदृशश्चाप्यगस्त्यो हि कथितस्ते मयानघ ।
ब्रवीम्यहं ब्रूहि वा त्वमगस्त्यात्क्षत्रियं वरम् ॥ १४
इत्युक्तः स तदा तूष्णीमभूद्वायुस्ततोऽब्रवीत् ।
शृणु राजन्वसिष्ठस्य मुख्यं कर्म यशस्विनः ॥ १५
आदित्याः सत्रमासन्त सरो वै मानसं प्रति ।
वसिष्ठं मनसा गत्वा श्रुत्वा तत्रास्य गोचरम् ॥ १६
यजमानांस्तु तान्दृष्ट्वा व्यग्रान्दीक्षानुकर्शितान् ।
हन्तुमिच्छन्ति शैलाभाः खलिनो नाम दानवाः ॥
अदूरात्तु ततस्तेषां ब्रह्मदत्तवरं सरः ।
हता हता वै ते तत्र जीवन्त्याप्लुत्य दानवाः ॥ १८
ते प्रगृह्य महाघोरान्पर्वतान्परिघान्द्रुमान् ।
विक्षोभयन्तः सलिलमुत्थिताः शतयोजनम् ॥ १९
अभ्यद्रवन्त देवांस्ते सहस्राणि दशैव ह ।
ततस्तैरर्दिता देवाः शरणं वासवं ययुः ॥ २०
स च तैर्व्यथितः शक्रो वसिष्ठं शरणं ययौ ।
ततोऽभयं ददौ तेभ्यो वसिष्ठो भगवानृषिः ॥ २१
तथा तान्दुःखिताञ्जानन्नानृशंस्यपरो मुनिः ।
अयत्नेनादहत्सर्वान्खलिनः स्वेन तेजसा ॥ २२
कैलासं प्रस्थितां चापि नदीं गङ्गां महातपाः ।
आनयत्तत्सरो दिव्यं तया भिन्नं च तत्सरः ॥ २३
सरो भिन्नं तया नद्या सरयूः सा ततोऽभवत् ।
हताश्च खलिनो यत्र स देशः खलिनोऽभवत् ॥ २४
एवं सेन्द्रा वसिष्ठेन रक्षितास्त्रिदिवौकसः ।
ब्रह्मदत्तवराश्चैव हता दैत्या महात्मना ॥ २५

एतत्कर्म वसिष्ठस्य कथितं ते मयानघ ।
अब्रवीम्यहं ब्रूहि वा त्वं वसिष्ठात्क्षत्रियं वरम् ॥ २६

इति श्रीमहाभारते अनुशासनपर्वणि
चत्वारिंशदधिकशततमोऽध्यायः ॥ १४० ॥

१४१

भीष्म उवाच ।

इत्युक्तस्त्वर्जुनस्तूष्णीमभूद्वायुस्तमब्रवीत् ।
शृणु मे हैहयश्रेष्ठ कर्मात्रेः सुमहात्मनः ॥ १
घोरे तमस्ययुध्यन्त सहिता देवदानवाः ।
अविध्यत शरैस्तत्र स्वर्भानुः सोमभास्करौ ॥ २
अथ ते तमसा ग्रस्ता निहन्यन्ते स्म दानवैः ।
देवा नृपतिशार्दूल सहैव बलिभिस्तदा ॥ ३
असुरैर्वध्यमानास्ते क्षीणप्राणा दिवौकसः ।
अपश्यन्त तपस्यन्तमत्रिं विप्रं महावने ॥ ४
अथैनमब्रुवन्देवाः शान्तक्रोधं जितेन्द्रियम् ।
असुरैरिषुभिर्विद्धौ चन्द्रादित्याविमावुभौ ॥ ५
वयं वध्यामहे चापि शत्रुभिस्तमसावृते ।
नाधिगच्छाम शान्तिं च भयात्त्रायस्व नः प्रभो ॥६
कथं रक्षामि भवतस्तेऽब्रुवंश्चन्द्रमा भव ।
तिमिरघ्नश्च सविता दस्युहा चैव नो भव ॥ ७
एवमुक्तस्तदात्रिस्तु तमोनुदभवच्छशी ।
अपश्यत्सौम्यभावं च सूर्यस्य प्रतिदर्शनम् ॥ ८
दृष्ट्वा नातिप्रभं सोमं तथा सूर्यं च पार्थिव ।
प्रकाशमकरोदत्रिस्तपसा स्वेन संयुगे ॥ ९
जगद्वितिमिरं चापि प्रदीप्तमकरोत्तदा ।
व्यजयच्छत्रुसंघांश्च देवानां स्वेन तेजसा ॥ १०
अत्रिणा दह्यमानांस्तान्दृष्ट्वा देवा महासुरान् ।
पराक्रमैस्तेऽपि तदा व्यत्यघ्नन्नत्रिरक्षिताः ॥ ११
उद्भासितश्च सविता देवास्त्राता हतासुराः ।
अत्रिणा त्वथ सोमत्वं कृतमुत्तमतेजसा ॥ १२
अद्वितीयेन मुनिना जपता चर्मवाससा ।
फलभक्षेण राजर्षे पश्य कर्मात्रिणा कृतम् ॥ १३
तस्यापि विस्तरेणोक्तं कर्मात्रेः सुमहात्मनः ।
अब्रवीम्यहं ब्रूहि वा त्वमत्रितः क्षत्रियं वरम् ॥ १४
इत्युक्तस्त्वर्जुनस्तूष्णीमभूद्वायुस्तमब्रवीत् ।
शृणु राजन्महत्कर्म च्यवनस्य महात्मनः ॥ १५
अश्विनोः प्रतिसंश्रुत्य च्यवनः पाकशासनम् ।
प्रोवाच सहितं देवैः सोमपावश्विनौ कुरु ॥ १६

इन्द्र उवाच ।

अस्माभिर्वर्जितावेतौ भवेतां सोमपौ कथम् ।
देवैर्न संमितावेतौ तस्मान्मैवं वदस्व नः ॥ १७
अश्विभ्यां सह नेच्छामः पातुं सोमं महाव्रत ।
पिबन्त्वन्ये यथाकामं नाहं पातुमिहोत्सहे ॥ १८

च्यवन उवाच ।

न चेत्करिष्यसि वचो मयोक्तं बलसूदन ।
मया प्रमथितः सद्यः सोमं पास्यसि वै मखे ॥१९
ततः कर्म समारब्धं हिताय सहसाश्विनोः ।
च्यवनेन ततो मन्त्रैरभिभूताः सुराभवन् ॥ २०
तत्तु कर्म समारब्धं दृष्ट्वेन्द्रः क्रोधमूर्छितः ।
उद्यम्य विपुलं शैलं च्यवनं समुपाद्रवत् ।
तथा वज्रेण भगवानमर्षाकुललोचनः ॥ २१
तमापतन्तं दृष्ट्वैव च्यवनस्तपसान्वितः ।
अद्भिः सिक्त्वास्तम्भयत्तं सवज्रं सहपर्वतम् ॥२२
अथेन्द्रस्य महाघोरं सोऽसृजच्छत्रुमेव ह ।
मदं मन्त्राहुतिमयं व्यादितास्यं महामुनिः ॥ २३
तस्य दन्तसहस्रं तु बभूव शतयोजनम् ।
द्वियोजनशतास्तस्य दंष्ट्राः परमदारुणाः ।
हनुस्तस्याभवद्भूमावेकश्चास्यास्पृशद्दिवम् ॥ २४
जिह्वामूले स्थितास्तस्य सर्वे देवाः सवासवाः ।
तिमेरास्यमनुप्राप्ता यथा मत्स्या महार्णवे ॥ २५

ते संमन्त्र्य ततो देवा मदस्यास्यगतास्तदा ।
अब्रुवन्सहिताः शक्रं प्रणमास्मै द्विजातये ।
अश्विभ्यां सह सोमं च पिबामो विगतज्वराः ॥२६
ततः स प्रणतः शक्रश्चकार च्यवनस्य तत् ।
च्यवनः कृतवांस्तौ चाप्यश्विनौ सोमपीथिनौ ॥२७
ततः प्रत्याहरत्कर्म मदं च व्यभजन्मुनिः ।
अक्षेषु मृगयायां च पाने स्त्रीषु च वीर्यवान् ॥२८
एतैर्दोषैर्नरो राजन्क्षयं याति न संशयः ।
तस्मादेतान्नरो नित्यं दूरतः परिवर्जयेत् ॥ २९
एतत्ते च्यवनस्यापि कर्म राजन्प्रकीर्तितम् ।
ब्रवीम्यहं ब्रूहि वा त्वं च्यवनात्क्षत्रियं वरम् ॥३०

इति श्रीमहाभारते अनुशासनपर्वणि
एकचत्वारिंशदधिकशततमोऽध्यायः ॥ १४१ ॥

१४२

भीष्म उवाच ।

तूष्णीमासीदर्जुनस्तु पवनस्त्वब्रवीत्पुनः ।
शृणु मे ब्राह्मणेष्वेव मुख्यं कर्म जनाधिप ॥ १
मदस्यास्यमनुप्राप्ता यदा सेन्द्रा दिवौकसः ।
तदेयं च्यवनेनेह हृता तेषां वसुंधरा ॥ २
उभौ लोकौ हृतौ मत्वा ते देवा दुःखिताभवन् ।
शोकार्ताश्च महात्मानं ब्रह्माणं शरणं ययुः ॥ ३

देवा ऊचुः ।

मदास्यव्यतिषिक्तानामस्माकं लोकपूजित ।
च्यवनेन हृता भूमिः कपैश्चापि दिवं प्रभो ॥ ४

ब्रह्मोवाच ।

गच्छध्वं शरणं विप्रानाशु सेन्द्रा दिवौकसः ।
प्रसाद्य तानुभौ लोकाववाप्स्यथ यथा पुरा ॥ ५
ते ययुः शरणं विप्रांस्त ऊचुः काञ्जयामहे ।
इत्युक्तास्ते द्विजान्प्राहुर्जयतेह कपानिति ।
भूगतान्हि विजेतारो वयमित्येव पार्थिव ॥ ६

ततः कर्म समारब्धं ब्राह्मणैः कपनाशनम् ।
तच्छ्रुत्वा प्रेषितो दूतो ब्राह्मणेभ्यो धनी कपैः ॥७
स च तान्ब्राह्मणानाह धनी कपवचो यथा ।
भवद्भिः सदृशाः सर्वे कपाः किमिह वर्तते ॥ ८
सर्वे वेदविदः प्राज्ञाः सर्वे च क्रतुयाजिनः ।
सर्वे सत्यव्रताश्चैव सर्वे तुल्या महर्षिभिः ॥ ९
श्रीश्चैव रमते तेषु धारयन्ति श्रियं च ते ।
वृथा दारान्न गच्छन्ति वृथामांसं न भुञ्जते ॥ १०
दीप्तमग्निं जुह्वति च गुरूणां वचने स्थिताः ।
सर्वे च नियतात्मानो बालानां संविभागिनः ॥११
उपेत्य शकटैर्यान्ति न सेवन्ति रजस्वलाम् ।
अभुक्तवत्सु नाश्नन्ति दिवा चैव न शेरते ॥ १२
एतैश्चान्यैश्च बहुभिर्गुणैर्युक्तान्कथं कपान् ।
विजेष्यथ निवर्तध्वं निवृत्तानां शुभं हि वः ॥ १३

ब्राह्मणा ऊचुः ।

कपान्वयं विजेष्यामो ये देवास्ते वयं स्मृताः ।
तस्माद्वध्याः कपास्माकं धनिन्याहि यथागतम् ॥१४
धनी गत्वा कपानाह न वो विप्राः प्रियंकराः ।
गृहीत्वास्त्राण्यथो विप्रान्कपाः सर्वे समाद्रवन् ॥१५
समुदग्रध्वजान्दृष्ट्वा कपान्सर्वे द्विजातयः ।
व्यसृजञ्ज्वलितानग्नीन्कपानां प्राणनाशनान् ॥ १६
ब्रह्मसृष्टा हव्यभुजः कपान्भुक्त्वा सनातनाः ।
नभसीव यथाभ्राणि व्यराजन्त नराधिप ।
प्रशशंसुर्द्विजांश्चैव ब्रह्माणं च यशस्विनम् ॥ १७
तेषां तेजस्तथा वीर्यं देवानां ववृधे ततः ।
अवाप्नुवंश्चामरत्वं त्रिषु लोकेषु पूजितम् ॥ १८
इत्युक्तवचनं वायुमर्जुनः प्रत्यभाषत ।
प्रतिपूज्य महाबाहो यत्तच्छृणु नराधिप ॥ १९
जीवाम्यहं ब्राह्मणार्थे सर्वथा सततं प्रभो ।
ब्रह्मणे ब्राह्मणेभ्यश्च प्रणमामि च नित्यशः ॥ २०

दत्तात्रेयप्रसादाच्च मया प्राप्तमिदं यशः ।
लोके च परमा कीर्तिर्धर्मश्च चरितो महान् ॥ २१
अहो ब्राह्मणकर्माणि यथा मारुत तत्त्वतः ।
त्वया प्रोक्तानि कार्त्स्न्येन श्रुतानि प्रयतेन ह ॥२२

वायुरुवाच ।

ब्राह्मणान्क्षत्रधर्मेण पालयस्वेन्द्रियाणि च ।
भृगुभ्यस्ते भयं घोरं तत्तु कालाद्भविष्यति ॥ २३

इति श्रीमहाभारते अनुशासनपर्वणि
द्विचत्वारिंशदधिकशततमोऽध्यायः ॥ १४२ ॥

१४३

युधिष्ठिर उवाच ।

ब्राह्मणानर्चसे राजन्सततं संशितव्रतान् ।
कं तु कर्मोदयं दृष्ट्वा तानर्चसि नराधिप ॥ १
कां वा ब्राह्मणपूजायां व्युष्टिं दृष्ट्वा महाव्रत ।
तानर्चसि महाबाहो सर्वमेतद्वदस्व मे ॥ २

भीष्म उवाच ।

एष ते केशवः सर्वमाख्यास्यति महामतिः ।
व्युष्टिं ब्राह्मणपूजायां दृष्टव्युष्टिर्महाव्रतः ॥ ३
बलं श्रोत्रे वाङ्मनश्चक्षुषी च
ज्ञानं तथा न विशुद्धं ममाद्य ।
देहन्यासो नातिचिरान्मतो मे
न चातितूर्णं सविताद्य याति ॥ ४
उक्ता धर्मा ये पुराणे महान्तो
ब्राह्मणानां क्षत्रियाणां विशां च ।
पौराणं ये दण्डमुपासते च
शेषं कृष्णादुपशिक्षस्व पार्थ ॥ ५
अहं ह्येनं वेद्मि तत्त्वेन कृष्णं
योऽयं हि यच्चास्य बलं पुराणम् ।
अमेयात्मा केशवः कौरवेन्द्र
सोऽयं धर्मं वक्ष्यति संशयेषु ॥ ६
कृष्णः पृथ्वीमसृजत्खं दिवं च
वराहोऽयं भीमबलः पुराणः ।
अस्य चाधोऽथान्तरिक्षं दिवं च
दिशश्चतस्रः प्रदिशश्चतस्रः ।
सृष्टिस्तथैवेयमनुप्रसूता
स निर्ममे विश्वमिदं पुराणम् ॥ ७
अस्य नाभ्यां पुष्करं संप्रसूतं
यत्रोत्पन्नः स्वयमेवामितौजाः ।
येनाच्छिन्नं तत्तमः पार्थ घोरं
यत्तत्तिष्ठत्यर्णवं तर्जयानम् ॥ ८
कृते युगे धर्म आसीत्समग्र-
स्त्रेताकाले ज्ञानमनुप्रपन्नः ।
बलं त्वासीद्द्वापरे पार्थ कृष्णः
कलावधर्मः क्षितिमाजगाम ॥ ९
स पूर्वदेवो निजघान दैत्या-
न्स पूर्वदेवश्च बभूव सम्राट् ।
स भूतानां भावनो भूतभव्यः
स विश्वस्यास्य जगतश्चापि गोप्ता ॥ १०
यदा धर्मो ग्लायति वै सुराणां
तदा कृष्णो जायते मानुषेषु ।
धर्मे स्थित्वा स तु वै भावितात्मा
परांश्च लोकानपरांश्च याति ॥ ११
त्याज्यांस्त्यक्त्वाथासुराणां वधाय
कार्याकार्ये कारणं चैव पार्थ ।
कृतं करिष्यत्क्रियते च देवो
मुहुः सोमं विद्धि च शक्रमेतम् ॥ १२
स विश्वकर्मा स च विश्वरूपः
स विश्वभृद्विश्वसृग्विश्वजिच्च ।
स शूलभृच्छोणितभृत्कराल-

स्तं कर्मभिर्विविदितं वै स्तुवन्ति ॥ १३
तं गन्धर्वा अप्सरसश्च नित्य-
मुपतिष्ठन्ते विबुधानां शतानि ।
तं राक्षसाश्च परिसंवहन्ते
रायस्पोषः स विजिगीषुरेकः ॥ १४
तमध्वरे शंसितारः स्तुवन्ति
रथंतरे सामगाश्च स्तुवन्ति ।
तं ब्राह्मणा ब्रह्ममन्त्रैः स्तुवन्ति
तस्मै हविरध्वर्यवः कल्पयन्ति ॥ १५
स पौराणीं ब्रह्मगुहां प्रविष्टो
महीसत्रं भारताग्रे ददर्श ।
स चैव गामुद्दधाराग्र्यकर्मा
विक्षोभ्य दैत्यानुरगान्दानवांश्च ॥ १६
तस्य भक्षान्विविधान्वेदयन्ति
तमेवाजौ वाहनं वेदयन्ति ।
तस्यान्तरिक्षं पृथिवी दिवं च
सर्वं वशे तिष्ठति शाश्वतस्य ॥ १७
स कुम्भरेताः ससृजे पुराणं
यत्रोत्पन्नमृषिमाहुर्वसिष्ठम् ।
स मातरिश्वा विभुरश्ववाजी
स रश्मिमान्सविता चादिदेवः ॥ १८
तेनासुरा विजिताः सर्व एव
तस्य विक्रान्तैर्विजितानीह त्रीणि ।
स देवानां मानुषाणां पितॄणां
तमेवाहुर्यज्ञविदां वितानम् ॥ १९
स एव कालं विभजन्नुदेति
तस्योत्तरं दक्षिणं चायने द्वे ।
तस्यैवोर्ध्वं तिर्यगधश्चरन्ति
गभस्तयो मेदिनीं तापयन्तः ॥ २०
तं ब्राह्मणा वेदविदो जुषन्ति
तस्यादित्यो भामुपयुज्य भाति ।
स मासि मास्यध्वरकृद्विधत्ते
तमध्वरे वेदविदः पठन्ति ॥ २१
स एकयुक्चक्रमिदं त्रिनाभि
सप्ताश्वयुक्तं वहते वै त्रिधामा ।
महातेजाः सर्वगः सर्वसिंहः
कृष्णो लोकान्धारयते तथैकः ।
अश्नन्ननश्नंश्च तथैव धीरः
कृष्णं सदा पार्थ कर्तारमेहि ॥ २२
स एकदा कक्षगतो महात्मा
तृप्तो विभुः खाण्डवे धूमकेतुः ।
स राक्षसानुरगांश्चावजित्य
सर्वत्रगः सर्वमग्नौ जुहोति ॥ २३
स एवाश्वः श्वेतमश्वं प्रयच्छ-
त्स एवाश्वानथ सर्वांश्चकार ।
त्रिवन्धुरस्तस्य रथस्त्रिचक्र-
स्त्रिवृच्छिराश्चतुरस्रश्च तस्य ॥ २४
स विहायो व्यदधात्पञ्चनाभिः
स निर्ममे गां दिवमन्तरिक्षम् ।
एवं रम्यानसृजत्पर्वतांश्च
हृषीकेशोऽमितदीप्ताग्नितेजाः ॥ २५
स लङ्घयन्वै सरितो जिघांस-
न्स तं वज्रं प्रहरन्तं निरास ।
स महेन्द्रः स्तूयते वै महाध्वरे
विप्रैरेको ऋक्सहस्रैः पुराणैः ॥ २६
दुर्वासा वै तेन नान्येन शक्यो
गृहे राजन्वासयितुं महौजाः ।
तमेवाहुरृषिमेकं पुराणं
स विश्वकृद्विदधात्यात्मभावान् ॥ २७
वेदांश्च यो वेदयतेऽधिदेवो -

विधींश्च यश्चाश्रयते पुराणान् ।
कामे वेदे लौकिके यत्फलं च
विष्वक्सेने सर्वमेतत्प्रतीहि ॥ २८
ज्योतींषि शुक्लानि च सर्वलोके
त्रयो लोका लोकपालास्त्रयश्च ।
त्रयोऽग्नयो व्याहृतयश्च तिस्रः
सर्वे देवा देवकीपुत्र एव ॥ २९
संवत्सरः स ऋतुः सोऽर्धमासः
सोऽहोरात्रः स कला वै स काष्ठाः ।
मात्रा मुहूर्ताश्च लवाः क्षणाश्च
विष्वक्सेने सर्वमेतत्प्रतीहि ॥ ३०
चन्द्रादित्यौ ग्रहनक्षत्रताराः
सर्वाणि दर्शान्यथ पौर्णमास्यः ।
नक्षत्रयोगा ऋतवश्च पार्थ
विष्वक्सेनात्सर्वमेतत्प्रसूतम् ॥ ३१
रुद्रादित्या वसवोऽथाश्विनौ च
साध्या विश्वे मरुतां षड्गणाश्च ।
प्रजापतिर्देवमातादितिश्च
सर्वे कृष्णादृषयश्चैव सप्त ॥ ३२
वायुर्भूत्वा विक्षिपते च विश्व-
मग्निर्भूत्वा दहते विश्वरूपः ।
आपो भूत्वा मज्जयते च सर्वं
ब्रह्मा भूत्वा सृजते विश्वसंघान् ॥ ३३
वेद्यं च यद्वेदयते च वेदा-
न्विधिश्च यश्चाश्रयते विधेयान् ।
धर्मे च वेदे च बले च सर्वं
चराचरं केशवं त्वं प्रतीहि ॥ ३४
ज्योतिर्भूतः परमोऽसौ पुरस्ता-
त्प्रकाशयन्प्रभया विश्वरूपः ।
अपः सृष्ट्वा ह्यात्मभूरात्मयोनिः
पुराकरोत्सर्वमेवाथ विश्वम् ॥ ३५
ऋतूनुत्पातान्विविधान्यद्भुतानि
मेघान्विद्युत्सर्वमैरावतं च ।
सर्वं कृष्णात्स्थावरं जङ्गमं च
विश्वाख्याताद्विष्णुमेनं प्रतीहि ॥ ३६
विश्वावासं निर्गुणं वासुदेवं
संकर्षणं जीवभूतं वदन्ति ।
ततः प्रद्युम्नमनिरुद्धं चतुर्थ-
माज्ञापयत्यात्मयोनिर्महात्मा ॥ ३७
स पञ्चधा पञ्चजनोपपन्नं
संचोदयन्विश्वमिदं सिसृक्षुः ।
ततश्चकारावनिमारुतौ च
खं ज्योतिरापश्च तथैव पार्थ ॥ ३८
स स्थावरं जङ्गमं चैवमेत-
च्चतुर्विधं लोकमिमं च कृत्वा ।
ततो भूमिं व्यदधात्पञ्चबीजां
द्यौः पृथिव्यां धास्यति भूरि वारि ।
तेन विश्वं कृतमेतद्धि राज-
न्स जीवयत्यात्मनैवात्मयोनिः ॥ ३९
ततो देवानसुरान्मानुषांश्च
लोकानृषींश्चाथ पितॄन्प्रजाश्च ।
समासेन विविधान्प्राणिलोका-
न्सर्वान्सदा भूतपतिः सिसृक्षुः ॥ ४०
शुभाशुभं स्थावरं जङ्गमं च
विष्वक्सेनात्सर्वमेतत्प्रतीहि ।
यद्वर्तते यच्च भविष्यतीह
सर्वमेतत्केशवं त्वं प्रतीहि ॥ ४१
मृत्युश्चैव प्राणिनामन्तकाले
साक्षात्कृष्णः शाश्वतो धर्मवाहः ।
भूतं च यच्चेह न विद्म किंचि-

द्विष्वक्सेनात्सर्वमेतत्प्रतीहि ॥ ४२
यत्प्रशस्तं च लोकेषु पुण्यं यच्च शुभाशुभम् ।
तत्सर्वं केशवोऽचिन्त्यो विपरीतमतो भवेत् ॥ ४३
एतादृशः केशवोऽयं स्वयंभू-
र्नारायणः परमश्चाव्ययश्च ।
मध्यं चास्य जगतस्तस्थुषश्च
सर्वेषां भूतानां प्रभवश्चाप्ययश्च ॥ ४४

इति श्रीमहाभारते अनुशासनपर्वणि
त्रिचत्वारिंशदधिकशततमोऽध्यायः ॥ १४३ ॥

१४४

युधिष्ठिर उवाच ।

ब्रूहि ब्राह्मणपूजायां व्युष्टिं त्वं मधुसूदन ।
वेत्ता त्वमस्य चार्थस्य वेद त्वां हि पितामहः ॥ १

वासुदेव उवाच ।

शृणुष्वावहितो राजन्द्विजानां भरतर्षभ ।
यथातत्त्वेन वदतो गुणान्मे कुरुसत्तम ॥ २
प्रद्युम्नः परिपप्रच्छ ब्राह्मणैः परिकोपितः ।
किं फलं ब्राह्मणेष्वस्ति पूजायां मधुसूदन ।
ईश्वरस्य सतस्तस्य इह चैव परत्र च ॥ ३
सदा द्विजातीन्संपूज्य किं फलं तत्र मानद ।
एतद्ब्रूहि पितः सर्वं सुमहान्संशयोऽत्र मे ॥ ४
इत्युक्तवचनस्तेन प्रद्युम्नेन तदा त्वहम् ।
प्रत्यब्रुवं महाराज यत्तच्छृणु समाहितः ॥ ५
व्युष्टिं ब्राह्मणपूजायां रौक्मिणेय निबोध मे ।
एते हि सोमराजान ईश्वराः सुखदुःखयोः ॥ ६
अस्मिँल्लोके रौक्मिणेय तथामुष्मिंश्च पुत्रक ।
ब्राह्मणप्रमुखं सौख्यं न मेऽत्रास्ति विचारणा ॥ ७
ब्राह्मणप्रमुखं वीर्यमायुः कीर्तिर्यशो बलम् ।
लोका लोकेश्वराश्चैव सर्वे ब्राह्मणपूर्वकाः ॥ ८
तत्कथं नाद्रियेयं वै ईश्वरोऽस्मीति पुत्रक ।
मा ते मन्युर्महाबाहो भवत्वत्र द्विजान्प्रति ॥ ९
ब्राह्मणो हि महद्भूतमस्मिँल्लोके परत्र च ।
भस्म कुर्युर्जगदिदं क्रुद्धाः प्रत्यक्षदर्शिनः ॥ १०
अन्यानपि सृजेयुश्च लोकाँल्लोकेश्वरांस्तथा ।
कथं तेषु न वर्तेय सम्यग्ज्ञानात्सुतेजसः ॥ ११
अवसन्मद्गृहे तात ब्राह्मणो हरिपिङ्गलः ।
चीरवासा बिल्वदण्डी दीर्घश्मश्रुनखादिमान् ।
दीर्घेभ्यश्च मनुष्येभ्यः प्रमाणादधिको भुवि ॥ १२
स स्म संचरते लोकान्ये दिव्या ये च मानुषाः ।
इमा गाथा गायमानश्चत्वरेषु सभासु च ॥ १३
दुर्वाससं वासयेत्को ब्राह्मणं सत्कृतं गृहे ।
परिभाषां च मे श्रुत्वा को नु दद्यात्प्रतिश्रयम् ।
यो मां कश्चिद्वासयेत न स मां कोपयेदिह ॥ १४
तं स्म नाद्रियते कश्चित्ततोऽहं तमवासयम् ॥ १५
स स्म भुङ्क्ते सहस्राणां बहूनामन्नमेकदा ।
एकदा स्माल्पकं भुङ्क्ते न वैति च पुनर्गृहान् ॥ १६
अकस्माच्च प्रहसति तथाकस्मात्प्ररोदिति ।
न चास्य वयसा तुल्यः पृथिव्यामभवत्तदा ॥ १७
सोऽस्मदावसथं गत्वा शय्याश्चास्तरणानि च ।
कन्याश्चालंकृता दग्ध्वा ततो व्यपगतः स्वयम् ॥
अथ मामब्रवीद्भूयः स मुनिः संशितव्रतः ।
कृष्ण पायसमिच्छामि भोक्तुमित्येव सत्वरः ॥ १९
सदैव तु मया तस्य चित्तज्ञेन गृहे जनः ।
सर्वाण्येवान्नपानानि भक्ष्याश्चोच्चावचास्तथा ।
भवन्तु सत्कृतानीति पूर्वमेव प्रचोदितः ॥ २०
ततोऽहं ज्वलमानं वै पायसं प्रत्यवेदयम् ।
तद्भुक्त्वैव तु स क्षिप्रं ततो वचनमब्रवीत् ।
क्षिप्रमङ्गानि लिम्पस्व पायसेनेति स स्म ह ॥ २१
अविमृश्यैव च ततः कृतवानस्मि तत्तथा ।
तेनोच्छिष्टेन गात्राणि शिरश्चैवाभ्यमृक्षयम् ॥ २२

स ददर्श तदाभ्याशे मातरं ते शुभाननाम् ।
तामपि स्मयमानः स पायसेनाभ्यलेपयत् ॥ २३
मुनिः पायसदिग्धाङ्गीं रथे तूर्णमयोजयत् ।
तमारुह्य रथं चैव निर्ययौ स गृहान्मम ॥ २४
अग्निवर्णो ज्वलन्धीमान्स द्विजो रथधुर्यवत् ।
प्रतोदेनातुदद्बालां रुक्मिणीं मम पश्यतः ॥ २५
न च मे स्तोकमप्यासीद्दुःखमीर्ष्याकृतं तदा ।
ततः स राजमार्गेण महता निर्ययौ बहिः ॥ २६
तद्दृष्ट्वा महदाश्चर्यं दाशार्हा जातमन्यवः ।
तत्राजल्पन्मिथः केचित्संमाभाष्य परस्परम् ॥ २७
ब्राह्मणा एव जायेरन्नान्यो वर्णः कथंचन ।
को ह्येनं रथमास्थाय जीवेदन्यः पुमानिह ॥ २८
आशीविषविषं तीक्ष्णं ततस्तीक्ष्णतरं विषम् ।
ब्रह्माशीविषदग्धस्य नास्ति कश्चिच्चिकित्सकः ॥ २९
तस्मिन्व्रजति दुर्धर्षे प्रास्खलद्रुक्मिणी पथि ।
तां नामर्षयत श्रीमांस्ततस्तूर्णमचोदयत् ॥ ३०
ततः परमसंक्रुद्धो रथात्प्रस्कन्द्य स द्विजः ।
पदातिरुत्पथेनैव प्राधावद्दक्षिणामुखः ॥ ३१
तमुत्पथेन धावन्तमन्वधावं द्विजोत्तमम् ।
तथैव पायसादिग्धः प्रसीद भगवन्निति ॥ ३२
ततो विलोक्य तेजस्वी ब्राह्मणो मामुवाच ह ।
जितः क्रोधस्त्वया कृष्ण प्रकृत्यैव महाभुज ॥ ३३
न तेऽपराधमिह वै दृष्टवानस्मि सुव्रत ।
प्रीतोऽस्मि तव गोविन्द वृणु कामान्यथेप्सितान् ।
प्रसन्नस्य च मे तात पश्य व्युष्टिर्यथाविधा ॥ ३४
यावदेव मनुष्याणामन्ने भावो भविष्यति ।
यथैवान्ने तथा तेषां त्वयि भावो भविष्यति ॥ ३५
यावच्च पुण्या लोकेषु त्वयि कीर्तिर्भविष्यति ।
त्रिषु लोकेषु तावच्च वैशिष्ट्यं प्रतिपत्स्यसे ।
सुप्रियः सर्वलोकस्य भविष्यसि जनार्दन ॥ ३६
यत्ते भिन्नं च दग्धं च यच्च किंचिद्विनाशितम् ।
सर्वं तथैव द्रष्टासि विशिष्टं वा जनार्दन ॥ ३७
तावदेतत्प्रलिप्तं ते गात्रेषु मधुसूदन ।
अतो मृत्युभयं नास्ति यावदिच्छा तवाच्युत ॥ ३८
न तु पादतले लिप्ते कस्मात्ते पुत्रकाद्य वै ।
नैतन्मे प्रियमित्येव स मां प्रीतोऽब्रवीत्तदा ।
इत्युक्तोऽहं शरीरं स्वमपश्यं श्रीसमायुतम् ॥ ३९
रुक्मिणीं चाब्रवीत्प्रीतः सर्वस्त्रीणां वरं यशः ।
कीर्तिं चानुत्तमां लोके समवाप्स्यसि शोभने ॥ ४०
न त्वां जरा वा रोगो वा वैवर्ण्यं चापि भामिनि ।
स्प्रक्ष्यन्ति पुण्यगन्धा च कृष्णमाराधयिष्यसि ॥ ४१
षोडशानां सहस्राणां वधूनां केशवस्य ह ।
वरिष्ठा सहलोक्या च केशवस्य भविष्यसि ॥ ४२
तव मातरमित्युक्त्वा ततो मां पुनरब्रवीत् ।
प्रस्थितः सुमहातेजा दुर्वासा वह्निवज्ज्वलन् ॥ ४३
एषैव ते बुद्धिरस्तु ब्राह्मणान्प्रति केशव ।
इत्युक्त्वा स तदा पुत्र तत्रैवान्तरधीयत ॥ ४४
तस्मिन्नन्तर्हिते चाहमुपांशुव्रतमादिशम् ।
यत्किंचिद्ब्राह्मणो ब्रूयात्सर्वं कुर्यामिति प्रभो ॥ ४५
एतद्व्रतमहं कृत्वा मात्रा ते सह पुत्रक ।
ततः परमहृष्टात्मा प्राविशं गृहमेव च ॥ ४६
प्रविष्टमात्रश्च गृहे सर्वं पश्यामि तन्नवम् ।
यद्भिन्नं यच्च वै दग्धं तेन विप्रेण पुत्रक ॥ ४७
ततोऽहं विस्मयं प्राप्तः सर्वं दृष्ट्वा नवं दृढम् ।
अपूजयं च मनसा रौक्मिणेय द्विजं तदा ॥ ४८
इत्यहं रौक्मिणेयस्य पृच्छतो भरतर्षभ ।
माहात्म्यं द्विजमुख्यस्य सर्वमाख्यातवांस्तदा ॥ ४९
तथा त्वमपि कौन्तेय ब्राह्मणान्सततं प्रभो ।
पूजयस्व महाभागान्वाग्भिर्दानैश्च नित्यदा ॥ ५०
एवं व्युष्टिमहं प्राप्तो ब्राह्मणानां प्रसादजाम् ।

यश्च मामाह भीष्मोऽयं तत्सत्यं भरतर्षभ ।। ५१

इति श्रीमहाभारते अनुशासनपर्वणि
चतुश्चत्वारिंशदधिकशततमोऽध्यायः ।। १४४ ।।

१४५

युधिष्ठिर उवाच ।

दुर्वाससः प्रसादात्ते यत्तदा मधुसूदन ।
अवाप्तमिह विज्ञानं तन्मे व्याख्यातुमर्हसि ।। १
महाभाग्यं च यत्तस्य नामानि च महात्मनः ।
तत्त्वतो ज्ञातुमिच्छामि सर्वं मतिमतां वर ।। २

वासुदेव उवाच ।

हन्त ते कथयिष्यामि नमस्कृत्वा कपर्दिने ।
यदवाप्तं महाराज श्रेयो यच्चार्जितं यशः ।। ३
प्रयतः प्रातरुत्थाय यदधीये विशां पते ।
प्राञ्जलिः शतरुद्रीयं तन्मे निगदतः शृणु ।। ४
प्रजापतिस्तत्ससृजे तपसोऽन्ते महातपाः ।
शंकरस्त्वसृजत्तात प्रजाः स्थावरजङ्गमाः ।। ५
नास्ति किंचित्परं भूतं महादेवाद्विशां पते ।
इह त्रिष्वपि लोकेषु भूतानां प्रभवो हि सः ।। ६
न चैवोत्सहते स्थातुं कश्चिदग्रे महात्मनः ।
न हि भूतं समं तेन त्रिषु लोकेषु विद्यते ।। ७
गन्धेनापि हि संग्रामे तस्य क्रुद्धस्य शत्रवः ।
विसंज्ञा हतभूयिष्ठा वेपन्ति च पतन्ति च ।। ८
घोरं च निनदं तस्य पर्जन्यनिनदोपमम् ।
श्रुत्वा विदीर्येद्धृदयं देवानामपि संयुगे ।। ९
यांश्च घोरेण रूपेण पश्येत्क्रुद्धः पिनाकधृक् ।
न सुरा नासुरा लोके न गन्धर्वा न पन्नगाः ।
कुपिते सुखमेधन्ते तस्मिन्नपि गुहागताः ।। १०
प्रजापतेश्च दक्षस्य यजतो वितते क्रतौ ।
विव्याध कुपितो यज्ञं निर्भयस्तु भवस्तदा ।
धनुषा बाणमुत्सृज्य सघोषं विननाद च ।। ११
ते न शर्म कुतः शान्तिं विषादं लेभिरे सुराः ।
विद्रुते सहसा यज्ञे कुपिते च महेश्वरे ।। १२
तेन ज्यातलघोषेण सर्वे लोकाः समाकुलाः ।
बभूवुरवशाः पार्थ विषेदुश्च सुरासुराः ।। १३
आपश्चुक्षुभिरे चैव चकम्पे च वसुंधरा ।
व्यद्रवन्गिरयश्चापि द्यौः पफाल च सर्वशः ।। १४
अन्धेन तमसा लोकाः प्रावृता न चकाशिरे ।
प्रनष्टा ज्योतिषां भाश्च सह सूर्येण भारत ।। १५
भृशं भीतास्ततः शान्तिं चक्रुः स्वस्त्ययनानि च ।
ऋषयः सर्वभूतानामात्मनश्च हितैषिणः ।। १६
ततः सोऽभ्यद्रवद्देवान्क्रुद्धो रौद्रपराक्रमः ।
भगस्य नयने क्रुद्धः प्रहारेण व्यशातयत् ।। १७
पूषाणं चाभिदुद्राव परेण वपुषान्वितः ।
पुरोडाशं भक्षयतो दशनान्वै व्यशातयत् ।। १८
ततः प्रणेमुर्देवास्ते वेपमानाः स्म शंकरम् ।
पुनश्च संदधे रुद्रो दीप्तं सुनिशितं शरम् ।। १९
रुद्रस्य विक्रमं दृष्ट्वा भीता देवाः सहर्षिभिः ।
ततः प्रसादयामासुः शर्वं ते विबुधोत्तमाः ।। २०
जेपुश्च शतरुद्रीयं देवाः कृत्वाञ्जलिं ततः ।
संस्तूयमानस्त्रिदशैः प्रससाद महेश्वरः ।। २१
रुद्रस्य भागं यज्ञे च विशिष्टं ते त्वकल्पयन् ।
भयेन त्रिदशा राजञ्शरणं च प्रपेदिरे ।। २२
तेन चैवातिकोपेन स यज्ञः संधितोऽभवत् ।
यद्यच्चापि हतं तत्र तत्तथैव प्रदीयते ।। २३
असुराणां पुराण्यासंस्त्रीणि वीर्यवतां दिवि ।
आयसं राजतं चैव सौवर्णमपरं तथा ।। २४
नाशकत्तानि मघवा भेत्तुं सर्वायुधैरपि ।
अथ सर्वेऽमरा रुद्रं जग्मुः शरणमर्दिताः ।। २५
तत ऊचुर्महात्मानो देवाः सर्वे समागताः ।
रुद्र रौद्रा भविष्यन्ति पशवः सर्वकर्मसु ।

जहि दैत्यान्सह पुरैर्लोकांस्त्रायस्व मानद ॥ २६
स तथोक्तस्तथेत्युक्त्वा विष्णुं कृत्वा शरोत्तमम् ।
शल्यमग्निं तथा कृत्वा पुङ्खं वैवस्वतं यमम् ।
वेदान्कृत्वा धनुः सर्वाञ्ज्यां च सावित्रिमुत्तमाम् ॥
देवान्रथवरं कृत्वा विनियुज्य च सर्वशः ।
त्रिपर्वणा त्रिशल्येन तेन तानि बिभेद सः ॥ २८
शरेणादित्यवर्णेन कालाग्निसमतेजसा ।
तेऽसुराः सपुरास्तत्र दग्धा रुद्रेण भारत ॥ २९
तं चैवाङ्कगतं दृष्ट्वा बालं पञ्चशिखं पुनः ।
उमा जिज्ञासमाना वै कोऽयमित्यब्रवीत्तदा ॥ ३०
असूयतश्च शक्रस्य वज्रेण प्रहरिष्यतः ।
सवज्रं स्तम्भयामास तं बाहुं परिघोपमम् ॥ ३१
न संबुबुधिरे चैनं देवास्तं भुवनेश्वरम् ।
सप्रजापतयः सर्वे तस्मिन्मुमुहुरीश्वरे ॥ ३२
ततो ध्यात्वाथ भगवान्ब्रह्मा तममितौजसम् ।
अयं श्रेष्ठ इति ज्ञात्वा ववन्दे तमुमापतिम् ॥ ३३
ततः प्रसादयामासुरुमां रुद्रं च ते सुराः ।
बभूव स तदा बाहुर्बलहन्तुर्यथा पुरा ॥ ३४
स चापि ब्राह्मणो भूत्वा दुर्वासा नाम वीर्यवान् ।
द्वारवत्यां मम गृहे चिरं कालमुपावसत् ॥ ३५
विप्रकारान्प्रयुङ्क्ते स्म सुबहून्मम वेश्मनि ।
तानुदारतया चाहमक्षमं तस्य दुःसहम् ॥ ३६
स देवेन्द्रश्च वायुश्च सोऽश्विनौ स च विद्युतः ।
स चन्द्रमाः स चेशानः स सूर्यो वरुणश्च सः ॥
स कालः सोऽन्तको मृत्युः स तमो रात्र्यहानि च ।
मासार्धमासा ऋतवः संध्ये संवत्सरश्च सः ॥ ३८
स धाता स विधाता च विश्वकर्मा च सर्ववित् ।
नक्षत्राणि दिशश्चैव प्रदिशोऽथ ग्रहास्तथा ।
विश्वमूर्तिरमेयात्मा भगवानमितद्युतिः ॥ ३९
एकधा च द्विधा चैव बहुधा च स एव च ।
शतधा सहस्रधा चैव तथा शतसहस्रधा ॥ ४०
ईदृशः स महादेवो भूयश्च भगवानतः ।
न हि शक्या गुणा वक्तुमपि वर्षशतैरपि ॥ ४१

इति श्रीमहाभारते अनुशासनपर्वणि
पञ्चचत्वारिंशदधिकशततमोऽध्यायः ॥ १४५ ॥

१४६

वासुदेव उवाच ।

युधिष्ठिर महाबाहो महाभाग्यं महात्मनः ।
रुद्राय बहुरूपाय बहुनाम्ने निबोध मे ॥ १
वदन्त्यग्निं महादेवं तथा स्थाणुं महेश्वरम् ।
एकाक्षं त्र्यम्बकं चैव विश्वरूपं शिवं तथा ॥ २
द्वे तनू तस्य देवस्य वेदज्ञा ब्राह्मणा विदुः ।
घोरामन्यां शिवामन्यां ते तनू बहुधा पुनः ॥ ३
उग्रा घोरा तनूर्यास्य सोऽग्निर्विद्युत्स भास्करः ।
शिवा सौम्या च या तस्य धर्मस्त्वापोऽथ चन्द्रमाः ॥
आत्मनोऽर्धं तु तस्याग्निरुच्यते भरतर्षभ ।
ब्रह्मचर्यं चरत्येष शिवा यास्य तनुस्तथा ॥ ५
यास्य घोरतमा मूर्तिर्जगत्संहरते तथा ।
ईश्वरत्वान्महत्त्वाच्च महेश्वर इति स्मृतः ॥ ६
यन्निर्दहति यत्तीक्ष्णो यदुग्रो यत्प्रतापवान् ।
मांसशोणितमज्जादो यत्ततो रुद्र उच्यते ॥ ७
देवानां सुमहान्यच्च यच्चास्य विषयो महान् ।
यच्च विश्वं महत्पाति महादेवस्ततः स्मृतः ॥ ८
समेधयति यन्नित्यं सर्वार्थान्सर्वकर्मभिः ।
शिवमिच्छन्मनुष्याणां तस्मादेष शिवः स्मृतः ॥ ९
दहत्यूर्ध्वं स्थितो यच्च प्राणोत्पत्तिः स्थितिश्च यत् ।
स्थिरलिङ्गश्च यन्नित्यं तस्मात्स्थाणुरिति स्मृतः ॥ १०
यदस्य बहुधा रूपं भूतं भव्यं भवत्तथा ।
स्थावरं जङ्गमं चैव बहुरूपस्ततः स्मृतः ॥ ११
धूम्रं रूपं च यत्तस्य धूर्जटीत्यत उच्यते ।

विश्वे देवाश्च यत्तस्मिन्विश्वरूपस्ततः स्मृतः ॥ १२
सहस्राक्षोऽयुताक्षो वा सर्वतोक्षिमयोऽपि वा ।
चक्षुषः प्रभवस्तेजो नास्त्यन्तोऽथास्य चक्षुषाम् ॥
सर्वथा यत्पशून्पाति तैश्च यद्रमते पुनः ।
तेषामधिपतिर्यच्च तस्मात्पशुपतिः स्मृतः ॥ १४
नित्येन ब्रह्मचर्येण लिङ्गमस्य यदा स्थितम् ।
महयन्त्यस्य लोकाश्च महेश्वर इति स्मृतः ॥ १५
विग्रहं पूजयेद्यो वै लिङ्गं वापि महात्मनः ।
लिङ्गं पूजयिता नित्यं महतीं श्रियमश्नुते ॥ १६
ऋषयश्चापि देवाश्च गन्धर्वाप्सरसस्तथा ।
लिङ्गमेवार्चयन्ति स्म यत्तदूर्ध्वं समास्थितम् ॥ १७
पूज्यमाने ततस्तस्मिन्मोदते स महेश्वरः ।
सुखं ददाति प्रीतात्मा भक्तानां भक्तवत्सलः ॥१८
एष एव श्मशानेषु देवो वसति नित्यशः ।
यजन्ते तं जनास्तत्र वीरस्थाननिषेविणम् ॥ १९
विषमस्थः शरीरेषु स मृत्युः प्राणिनामिह ।
स च वायुः शरीरेषु प्राणोऽपानः शरीरिणाम् ॥
तस्य घोराणि रूपाणि दीप्तानि च बहूनि च ।
लोके यान्यस्य पूज्यन्ते विप्रास्तानि विदुर्बुधाः ॥२१
नामधेयानि वेदेषु बहून्यस्य यथार्थतः ।
निरुच्यन्ते महत्त्वाच्च विभुत्वात्कर्मभिस्तथा ॥ २२
वेदे चास्य विदुर्विप्राः शतरुद्रीयमुत्तमम् ।
व्यासादनन्तरं यच्चाप्युपस्थानं महात्मनः ॥ २३
प्रदाता सर्वलोकानां विश्वं चाप्युच्यते महत् ।
ज्येष्ठभूतं वदन्त्येनं ब्राह्मणा ऋषयोऽपरे ॥ २४
प्रथमो ह्येष देवानां मुखादग्निरजायत ।
ग्रहैर्बहुविधैः प्राणान्संरुद्धानुत्सृजत्यपि ॥ २५
स मोचयति पुण्यात्मा शरण्यः शरणागतान् ।
आयुरारोग्यमैश्वर्यं वित्तं कामांश्च पुष्कलान् ॥ २६
स ददाति मनुष्येभ्यः स एवाक्षिपते पुनः ।
शक्रादिषु च देवेषु तस्य चैश्वर्यमुच्यते ॥ २७
स एवाभ्यधिको नित्यं त्रैलोक्यस्य शुभाशुभे ।
ऐश्वर्याच्चैव कामानामीश्वरः पुनरुच्यते ॥ २८
महेश्वरश्च लोकानां महतामीश्वरश्च सः ।
बहुभिर्विविधै रूपैर्विश्वं व्याप्तमिदं जगत् ।
तस्य देवस्य यद्वक्त्रं समुद्रे वडवामुखम् ॥ २९

इति श्रीमहाभारते अनुशासनपर्वणि
षट्चत्वारिंशदधिकशततमोऽध्यायः ॥ १४६ ॥

१४७

वैशंपायन उवाच ।

इत्युक्तवति वाक्यं तु कृष्णे देवकिनन्दने ।
भीष्मं शांतनवं भूयः पर्यपृच्छद्युधिष्ठिरः ॥ १
निर्णये वा महाबुद्धे सर्वधर्मभृतां वर ।
प्रत्यक्षमागमो वेति किं तयोः कारणं भवेत् ॥ २

भीष्म उवाच ।

नास्त्यत्र संशयः कश्चिदिति मे वर्तते मतिः ।
शृणु वक्ष्यामि ते प्राज्ञ सम्यक्त्वमनुपृच्छसि ॥
संशयः सुगमो राजन्निर्णयस्त्वत्र दुर्गमः ।
दृष्टं श्रुतमनन्तं हि यत्र संशयदर्शनम् ॥ ४
प्रत्यक्षं कारणं दृष्टं हेतुकाः प्राज्ञमानिनः ।
नास्तीत्येवं व्यवस्यन्ति सत्यं संशयमेव च ।
तदयुक्तं व्यवस्यन्ति बालाः पण्डितमानिनः ॥ ५
अथ चेन्मन्यसे चैकं कारणं किं भवेदिति ।
शक्यं दीर्घेण कालेन युक्तेनातन्द्रितेन च ।
प्राणयात्रामनेकां च कल्पयानेन भारत ॥ ६
तत्परेणैव नान्येन शक्यं ह्येतत्तु कारणम् ।
हेतूनामन्तमासाद्य विपुलं ज्ञानमुत्तमम् ।
ज्योतिः सर्वस्य लोकस्य विपुलं प्रतिपद्यते ॥ ७
तत्त्वेनागमनं राजन्हेत्वन्तगमनं तथा ।
अग्राह्यमनिबद्धं च वाचः संपरिवर्जनम् ॥ ८

युधिष्ठिर उवाच ।

प्रत्यक्षं लोकतः सिद्धं लोकाश्चागमपूर्वकाः ।
शिष्टाचारो बहुविधो ब्रूहि तन्मे पितामह ॥ ९

भीष्म उवाच ।

धर्मस्य ह्रियमाणस्य बलवद्भिर्दुरात्मभिः ।
संस्था यत्नैरपि कृता कालेन परिभिद्यते ॥ १०
अधर्मा धर्मरूपेण तृणैः कूपा इवावृताः ।
ततस्तैर्भिद्यते वृत्तं शृणु चैव युधिष्ठिर ॥ ११
अवृत्त्या ये च भिन्दन्ति श्रुतत्यागपरायणाः ।
धर्मविद्वेषिणो मन्दा इत्युक्तस्तेषु संशयः ॥ १२
अतृप्यन्तस्तु साधूनां य एवागमबुद्धयः ।
परमित्येव संतुष्टास्तानुपास्व च पृच्छ च ॥ १३
कामार्थौ पृष्ठतः कृत्वा लोभमोहानुसारिणौ ।
धर्म इत्येव संबुद्धास्तानुपास्व च पृच्छ च ॥१४
न तेषां भिद्यते वृत्तं यज्ञस्वाध्यायकर्मभिः ।
आचारः कारणं चैव धर्मश्चैव त्रयं पुनः ॥ १५

युधिष्ठिर उवाच ।

पुनरेवेह मे बुद्धिः संशये परिमुह्यते ।
अपारे मार्गमाणस्य परं तीरमपश्यतः ॥ १६
वेदाः प्रत्यक्षमाचारः प्रमाणं तत्त्रयं यदि ।
पृथक्त्वं लभ्यते चैषां धर्मश्चैकस्त्रयं कथम् ॥ १७

भीष्म उवाच ।

धर्मस्य ह्रियमाणस्य बलवद्भिर्दुरात्मभिः ।
यद्येवं मन्यसे राजंस्त्रिधा धर्मविचारणा ॥ १८
एक एवेति जानीहि त्रिधा तस्य प्रदर्शनम् ।
पृथक्त्वे चैव मे बुद्धिस्त्रयाणामपि वै तथा ॥ १९
उक्तो मार्गस्त्रयाणां च तत्तथैव समाचर ।
जिज्ञासा तु न कर्तव्या धर्मस्य परितर्कणात् ॥२०
सदैव भरतश्रेष्ठ मा ते भूदत्र संशयः ।
अन्धो जड इवाशङ्को यद्ब्रवीमि तदाचर ॥ २१
अहिंसा सत्यमक्रोधो दानमेतच्चतुष्टयम् ।
अजातशत्रो सेवस्व धर्म एष सनातनः ॥ २२
ब्राह्मणेषु च वृत्तिर्या पितृपैतामहोचिता ।
तामन्वेहि महाबाहो स्वर्गस्यैते हि देशिकाः ॥ २३
प्रमाणमप्रमाणं वै यः कुर्यादबुधो नरः ।
न स प्रमाणतामर्हो विवादजननो हि सः ॥ २४
ब्राह्मणानेव सेवस्व सत्कृत्य बहुमन्य च ।
एतेष्वेव त्विमे लोकाः कृत्स्ना इति निबोध तान् ॥

इति श्रीमहाभारते अनुशासनपर्वणि
सप्तचत्वारिंशदधिकशततमोऽध्यायः ॥ १४७ ॥

१४८

युधिष्ठिर उवाच ।

ये च धर्ममसूयन्ति ये चैनं पर्युपासते ।
ब्रवीतु भगवानेतत्क्व ते गच्छन्ति तादृशाः ॥ १

भीष्म उवाच ।

रजसा तमसा चैव समवस्तीर्णचेतसः ।
नरकं प्रतिपद्यन्ते धर्मविद्वेषिणो नराः ॥ २
ये तु धर्मं महाराज सततं पर्युपासते ।
सत्यार्जवपराः सन्तस्ते वै स्वर्गभुजो नराः ॥ ३
धर्म एव रतिस्तेषामाचार्योपासनाद्भवेत् ।
देवलोकं प्रपद्यन्ते ये धर्मं पर्युपासते ॥ ४
मनुष्या यदि वा देवाः शरीरमुपताप्य वै ।
धर्मिणः सुखमेधन्ते लोभद्वेषविवर्जिताः ॥ ५
प्रथमं ब्राह्मणः पुत्रं धर्ममाहुर्मनीषिणः ।
धर्मिणः पर्युपासन्ते फलं पक्वमिवाशयः ॥ ६

युधिष्ठिर उवाच ।

असतां कीदृशं रूपं साधवः किं च कुर्वते ।
ब्रवीतु मे भवानेतत्सन्तोऽसन्तश्च कीदृशाः ॥ ७

भीष्म उवाच ।

दुराचाराश्च दुर्धर्षा दुर्मुखाश्चाप्यसाधवः ।
साधवः शीलसंपन्नाः शिष्टाचारस्य लक्षणम् ॥ ८
राजमार्गे गवां मध्ये गोष्ठमध्ये च धर्मिणः ।
नोपसेवन्ति राजेन्द्र सर्गं मूत्रपुरीषयोः ॥ ९
पञ्चानामशनं दत्त्वा शेषमश्नन्ति साधवः ।
न जल्पन्ति च भुञ्जाना न निद्रान्त्यार्द्रपाणयः ॥ १०
चित्रभानुमनड्वाहं देवं गोष्ठं चतुष्पथम् ।
ब्राह्मणं धार्मिकं चैत्यं ते कुर्वन्ति प्रदक्षिणम् ॥ ११
वृद्धानां भारतप्तानां स्त्रीणां बालातुरस्य च ।
ब्राह्मणानां गवां राज्ञां पन्थानं ददते च ते ॥ १२
अतिथीनां च सर्वेषां प्रेष्याणां स्वजनस्य च ।
तथा शरणकामानां गोप्ता स्यात्स्वागतप्रदः ॥ १३
सायं प्रातर्मनुष्याणामशनं देवनिर्मितम् ।
नान्तरा भोजनं दृष्टमुपवासविधिर्हि सः ॥ १४
होमकाले यथा वह्निः कालमेव प्रतीक्षते ।
ऋतुकाले तथा नारी ऋतुमेव प्रतीक्षते ।
न चान्यां गच्छते यस्तु ब्रह्मचर्यं हि तत्स्मृतम् ॥ १५
अमृतं ब्राह्मणा गाव इत्येतत्त्रयमेकतः ।
तस्माद्गोब्राह्मणं नित्यमर्चयेत यथाविधि ॥ १६
यजुषा संस्कृतं मांसमुपभुञ्जन्न दुष्यति ।
पृष्ठमांसं वृथामांसं पुत्रमांसं च तत्समम् ॥ १७
स्वदेशे परदेशे वाप्यतिथिं नोपवासयेत् ।
कर्म वै सफलं कृत्वा गुरूणां प्रतिपादयेत् ॥ १८
गुरुभ्य आसनं देयमभिवाद्याभिपूज्य च ।
गुरूनभ्यर्च्य वर्धन्ते आयुषा यशसा श्रिया ॥ १९
वृद्धान्नातिवदेज्जातु न च संप्रेषयेदपि ।
नासीनः स्यात्स्थितेष्वेवमायुरस्य न रिष्यते ॥ २०
न नग्नामीक्षते नारीं न विद्वान्पुरुषानपि ।
मैथुनं सततं गुप्तमाहारं च समाचरेत् ॥ २१

तीर्थानां गुरवस्तीर्थं शुचीनां हृदयं शुचि ।
दर्शनानां परं ज्ञानं संतोषः परमं सुखम् ॥ २२
सायं प्रातश्च वृद्धानां शृणुयात्पुष्कला गिरः ।
श्रुतमाप्नोति हि नरः सततं वृद्धसेवया ॥ २३
स्वाध्याये भोजने चैव दक्षिणं पाणिमुद्धरेत् ।
यच्छेद्वाङ्मनसी नित्यमिन्द्रियाणां च विभ्रमम् ॥
संस्कृतं पायसं नित्यं यवागूं कृसरं हविः ।
अष्टकाः पितृदैवत्या वृद्धानामभिपूजनम् ॥ २५
श्मश्रुकर्मणि मङ्गल्यं क्षुतानामभिनन्दनम् ।
व्याधितानां च सर्वेषामायुषः प्रतिनन्दनम् ॥ २६
न जातु त्वमिति ब्रूयादापन्नोऽपि महत्तरम् ।
त्वंकारो वा वधो वेति विद्वत्सु न विशिष्यते ।
अवराणां समानानां शिष्याणां च समाचरेत् ॥ २७
पापमाचक्षते नित्यं हृदयं पापकर्मिणाम् ।
ज्ञानपूर्वं विनश्यन्ति गूहमाना महाजने ॥ २८
ज्ञानपूर्वं कृतं कर्म च्छादयन्ते ह्यसाधवः ।
न मां मनुष्याः पश्यन्ति न मां पश्यन्ति देवताः ।
पापेनाभिहतः पापः पापमेवाभिजायते ॥ २९
यथा वार्धुषिको वृद्धिं देहभेदे प्रतीक्षते ।
धर्मेणापिहितं पापं धर्ममेवाभिवर्धयेत् ॥ ३०
यथा लवणमम्भोभिराप्लुतं प्रविलीयते ।
प्रायश्चित्तहतं पापं तथा सद्यः प्रणश्यति ॥ ३१
तस्मात्पापं न गूहेत गूहमानं विवर्धते ।
कृत्वा तु साधुष्वाख्येयं ते तत्प्रशमयन्त्युत ॥ ३२
आशया संचितं द्रव्यं यत्काले नोपभुज्यते ।
अन्ये चैतत्प्रपद्यन्ते वियोगे तस्य देहिनः ॥ ३३
मानसं सर्वभूतानां धर्ममाहुर्मनीषिणः ।
तस्मात्सर्वाणि भूतानि धर्ममेव समासते ॥ ३४
एक एव चरेद्धर्मं न धर्मध्वजिको भवेत् ।
धर्मवाणिजका ह्येते ये धर्ममुपभुञ्जते ॥ ३५

अर्चेद्देवानदम्भेन सेवेतामायया गुरून् ।
निधिं निदध्यात्पारत्र्यं यात्रार्थं दानशब्दितम् ॥ ३६

इति श्रीमहाभारते अनुशासनपर्वणि
अष्टचत्वारिंशदधिकशततमोऽध्यायः ॥ १४८ ॥

१४९

युधिष्ठिर उवाच ।

नाभागधेयः प्राप्नोति धनं सुबलवानपि ।
भागधेयान्वितस्त्वर्थान्कृशो बालश्च विन्दति ॥ १
नालाभकाले लभते प्रयत्नेऽपि कृते सति ।
लाभकालेऽप्रयत्नेन लभते विपुलं धनम् ।
कृतयत्नाफलाश्चैव दृश्यन्ते शतशो नराः ॥ २
यदि यत्नो भवेन्मर्त्यः स सर्वं फलमाप्नुयात् ।
नालभ्यं चोपलभ्येत नृणां भरतसत्तम ॥ ३
यदा प्रयत्नं कृतवान्दृश्यते ह्यफलो नरः ।
मार्गन्नयशतैरर्थानमार्गश्चापरः सुखी ॥ ४
अकार्यमसकृत्कृत्वा दृश्यन्ते ह्यधना नराः ।
धनयुक्तास्त्वधर्मस्था दृश्यन्ते चापरे जनाः ॥ ५
अधीत्य नीतिं यस्माच्च नीतियुक्तो न दृश्यते ।
अनभिज्ञश्च साचिव्यं गमितः केन हेतुना ।
विद्यायुक्तो ह्यविद्यश्च धनवान्दुर्गतस्तथा ॥ ६
यदि विद्यामुपाश्रित्य नरः सुखमवाप्नुयात् ।
न विद्वान्विद्यया हीनं वृत्त्यर्थमुपसंश्रयेत् ॥ ७
यथा पिपासां जयति पुरुषः प्राप्य वै जलम् ।
दृष्टार्थो विद्ययाप्येवमविद्यां प्रजहेन्नरः ॥ ८
नाप्राप्तकालो म्रियते विद्धः शरशतैरपि ।
तृणाग्रेणापि संस्पृष्टः प्राप्तकालो न जीवति ॥ ९

भीष्म उवाच ।

ईहमानः समारम्भान्यदि नासादयेद्धनम् ।
उग्रं तपः समारोहेन्न ह्यनुप्तं प्ररोहति ॥ १०
दानेन भोगी भवति मेधावी वृद्धसेवया ।
अहिंसया च दीर्घायुरिति प्राहुर्मनीषिणः ॥ ११
तस्माद्दद्यान्न याचेत पूजयेद्धार्मिकानपि ।
स्वाभाषी प्रियकृच्छुद्धः सर्वसत्त्वाविहिंसकः ॥ १२
यदा प्रमाणप्रभवः स्वभावश्च सुखासुखे ।
मशकीटपिपीलानां स्थिरो भव युधिष्ठिर ॥ १३

इति श्रीमहाभारते अनुशासनपर्वणि
एकोनपञ्चाशदधिकशततमोऽध्यायः ॥ १४९ ॥

१५०

भीष्म उवाच ।

कार्यते यच्च क्रियते सच्चासच्च कृतं ततः ।
तत्राश्वसीत सत्कृत्वा असत्कृत्वा न विश्वसेत् ॥ १
काल एवात्र कालेन निग्रहानुग्रहौ ददत् ।
बुद्धिमाविश्य भूतानां धर्मार्थेषु प्रवर्तते ॥ २
यदा त्वस्य भवेद्बुद्धिर्धर्म्या चार्थप्रदर्शिनी ।
तदाश्वसीत धर्मात्मा दृढबुद्धिर्न विश्वसेत् ॥ ३
एतावन्मात्रमेतद्धि भूतानां प्राज्ञलक्षणम् ।
कालयुक्तोऽप्युभयविच्छेषमर्थं समाचरेत् ॥ ४
यथा ह्युपस्थितैश्वर्याः पूजयन्ते नरा नरान् ।
एवमेवात्मनात्मानं पूजयन्तीह धार्मिकाः ॥ ५
न ह्यधर्मतया धर्मं दद्यात्कालः कथंचन ।
तस्माद्विशुद्धमात्मानं जानीयाद्धर्मचारिणम् ॥ ६
स्प्रष्टुमप्यसमर्थो हि ज्वलन्तमिव पावकम् ।
अधर्मः सततो धर्मं कालेन परिरक्षितम् ॥ ७
कार्यावेतौ हि कालेन धर्मो हि विजयावहः ।
त्रयाणामपि लोकानामालोककरणो भवेत् ॥ ८
तत्र कश्चिन्नयेत्प्राज्ञो गृहीत्वैव करे नरम् ।
उह्यमानः स धर्मेण धर्मे बहुभयच्छले ॥ ९

इति श्रीमहाभारते अनुशासनपर्वणि
पञ्चाशदधिकशततमोऽध्यायः ॥ १५० ॥

१५१

युधिष्ठिर उवाच ।

किं श्रेयः पुरुषस्येह किं कुर्वन्सुखमेधते ।
विपाप्मा च भवेत्केन किं वा कल्मषनाशनम् ॥ १

भीष्म उवाच ।

अयं दैवतवंशो वै ऋषिवंशसमन्वितः ।
द्विसंध्यं पठितः पुत्र कल्मषापहरः परः ॥ २
देवासुरगुरुर्देवः सर्वभूतनमस्कृतः ।
अचिन्त्योऽथाप्यनिर्देश्यः सर्वप्राणो ह्ययोनिजः ॥३
पितामहो जगन्नाथः सावित्री ब्रह्मणः सती ।
वेदभूरथ कर्ता च विष्णुर्नारायणः प्रभुः ॥ ४
उमापतिर्विरूपाक्षः स्कन्दः सेनापतिस्तथा ।
विशाखो हुतभुग्वायुश्चन्द्रादित्यौ प्रभाकरौ ॥ ५
शक्रः शचीपतिर्देवो यमो धूमोर्णया सह ।
वरुणः सह गौर्या च सह ऋद्ध्या धनेश्वरः ॥ ६
सौम्या गौः सुरभिर्देवी विश्रवाश्च महानृषिः ।
षट्कालः सागरो गङ्गा स्रवन्त्योऽथ मरुद्गणाः ॥ ७
वालखिल्यास्तपःसिद्धाः कृष्णद्वैपायनस्तथा ।
नारदः पर्वतश्चैव विश्वावसुर्हहाहुहूः ॥ ८
तुम्बरुश्चित्रसेनश्च देवदूतश्च विश्रुतः ।
देवकन्या महाभागा दिव्याश्चाप्सरसां गणाः ॥ ९
उर्वशी मेनका रम्भा मिश्रकेशी अलम्बुषा ।
विश्वाची च घृताची च पञ्चचूडा तिलोत्तमा ॥१०
आदित्या वसवो रुद्राः साश्विनः पितरोऽपि च ।
धर्मः सत्यं तपो दीक्षा व्यवसायः पितामहः ॥११
शर्वर्यो दिवसाश्चैव मारीचः कश्यपस्तथा ।
शुक्रो बृहस्पतिर्भौमो बुधो राहुः शनैश्चरः ॥ १२
नक्षत्राण्यृतवश्चैव मासाः संध्याः सवत्सराः ।
वैनतेयाः समुद्राश्च कद्रुजाः पन्नगास्तथा ॥ १३
शतद्रूश्च विपाशा च चन्द्रभागा सरस्वती ।
सिन्धुश्च देविका चैव पुष्करं तीर्थमेव च ॥ १४
गङ्गा महानदी चैव कपिला नर्मदा तथा ।
कम्पुना च विशल्या च करतोयाम्बुवाहिनी ॥१५
सरयूर्गण्डकी चैव लोहित्यश्च महानदः ।
ताम्रारुणा वेत्रवती पर्णाशा गौतमी तथा ॥ १६
गोदावरी च वेण्णा च कृष्णवेणा तथाद्रिजा ।
दृषद्वती च कावेरी वंक्षुर्मन्दाकिनी तथा ॥ १७
प्रयागं च प्रभासं च पुण्यं नैमिषमेव च ।
तच्च विश्वेश्वरस्थानं यत्र तद्विमलं सरः ॥ १८
पुण्यतीर्थैश्च कलिलं कुरुक्षेत्रं प्रकीर्तितम् ।
सिन्धूत्तमं तपोदानं जम्बूमार्गमथापि च ॥ १९
हिरण्वती वितस्ता च तथैवेक्षुमती नदी ।
वेदस्मृतिर्वेदसिनी मलवासाश्च नद्यपि ॥ २०
भूमिभागास्तथा पुण्या गङ्गाद्वारमथापि च ।
ऋषिकुल्यास्तथा मेध्या नदी चित्रपथा तथा ॥२१
कौशिकी यमुना सीता तथा चर्मण्वती नदी ।
नदी भीमरथी चैव बाहुदा च महानदी ।
महेन्द्रवाणी त्रिदिवा नीलिका च सरस्वती ॥ २२
नन्दा चापरनन्दा च तथा तीर्थं महाह्रदम् ।
गयाथ फल्गुतीर्थं च धर्मारण्यं सुरैर्वृतम् ॥ २३
तथा देवनदी पुण्या सरश्च ब्रह्मनिर्मितम् ।
पुण्यं त्रिलोकविख्यातं सर्वपापहरं शिवम् ॥ २४
हिमवान्पर्वतश्चैव दिव्यौषधिसमन्वितः ।
विन्ध्यो धातुविचित्राङ्गस्तीर्थवानौषधान्वितः ॥२५
मेरुर्महेन्द्रो मलयः श्वेतश्च रजताचितः ।
शृङ्गवान्मन्दरो नीलो निषधो दर्दुरस्तथा ॥ २६
चित्रकूटोऽञ्जनाभश्च पर्वतो गन्धमादनः ।
पुण्यः सोमगिरिश्चैव तथैवान्ये महीधराः ।
दिशश्च विदिशश्चैव क्षितिः सर्वे महीरुहाः ॥२७
विश्वेदेवा नभश्चैव नक्षत्राणि ग्रहास्तथा ।

पान्तु वः सततं देवा कीर्तिताकीर्तिता मया ॥२८
कीर्तयानो नरो ह्येतान्मुच्यते सर्वकिल्बिषैः ।
स्तुवंश्च प्रतिनन्दंश्च मुच्यते सर्वतो भयात् ।
सर्वसंकरपापेभ्यो देवतास्तवनन्दकः ॥ २९
देवतानन्तरं विप्रांस्तपःसिद्धांस्तपोधिकान् ।
कीर्तितान्कीर्तयिष्यामि सर्वपापप्रमोचनान् ॥ ३०
यवक्रीतोऽथ रैभ्यश्च कक्षीवानौशिजस्तथा ।
भृग्वङ्गिरास्तथा कण्वो मेधातिथिरथ प्रभुः ।
बर्ही च गुणसंपन्नः प्राचीं दिशमुपाश्रिताः ॥ ३१
भद्रां दिशं महाभागा उल्मुचुः प्रमुचुस्तथा ।
मुमुचुश्च महाभागः स्वस्त्यात्रेयश्च वीर्यवान् ॥ ३२
मित्रावरुणयोः पुत्रस्तथागस्त्यः प्रतापवान् ।
दृढायुश्चोर्ध्वबाहुश्च विश्रुतावृषिसत्तमौ ॥ ३३
पश्चिमां दिशमाश्रित्य य एधन्ते निबोध तान् ।
उषद्गुः सह सोदर्यैः परिव्याधश्च वीर्यवान् ॥ ३४
ऋषिर्दीर्घतमाश्चैव गौतमः कश्यपस्तथा ।
एकतश्च द्वितश्चैव त्रितश्चैव महर्षयः ।
अत्रेः पुत्रश्च धर्मात्मा तथा सारस्वतः प्रभुः ॥३५
उत्तरां दिशमाश्रित्य य एधन्ते निबोध तान् ।
अत्रिर्वसिष्ठः शक्तिश्च पाराशर्यश्च वीर्यवान् ॥ ३६
विश्वामित्रो भरद्वाजो जमदग्निस्तथैव च ।
ऋचीकपौत्रो रामश्च ऋषिरौद्दालकिस्तथा ॥ ३७
श्वेतकेतुः कोहलश्च विपुलो देवलस्तथा ।
देवशर्मा च धौम्यश्च हस्तिकाश्यप एव च ॥ ३८
लोमशो नाचिकेतश्च लोमहर्षण एव च ।
ऋषिरुग्रश्रवाश्चैव भार्गवश्च्यवनस्तथा ॥ ३९
एष वै समवायस्ते ऋषिदेवसमन्वितः ।
आद्यः प्रकीर्तितो राजन्सर्वपापप्रमोचनः ॥ ४०
नृगो ययातिर्नहुषो यदुः पूरुश्च वीर्यवान् ।
धुन्धुमारो दिलीपश्च सगरश्च प्रतापवान् ॥ ४१
कृशाश्वो यौवनाश्वश्च चित्राश्वः सत्यवांस्तथा ।
दुःषन्तो भरतश्चैव चक्रवर्ती महायशाः ॥ ४२
यवनो जनकश्चैव तथा दृढरथो नृपः ।
रघुर्नरवरश्चैव तथा दशरथो नृपः ॥ ४३
रामो राक्षसहा वीरः शशबिन्दुर्भगीरथः ।
हरिश्चन्द्रो मरुत्तश्च जह्नुर्जाह्नविसेविता ॥ ४४
महोदयो ह्यलर्कश्च ऐलश्चैव नराधिपः ।
करंधमो नरश्रेष्ठः कध्मोरश्च नराधिपः ॥ ४५
दक्षोऽम्बरीषः कुकुरो रैवतश्च महायशाः ।
मुचुकुन्दश्च राजर्षिर्मित्रभानुः प्रियंकरः ॥ ४६
त्रसदस्युस्तथा राजा श्वेतो राजर्षिसत्तमः ।
महाभिषश्च विख्यातो निमिराजस्तथाष्टकः ॥ ४७
आयुः क्षुपश्च राजर्षिः कक्षेयुश्च नराधिपः ।
शिबिरौशीनरश्चैव गयश्चैव नराधिपः ॥ ४८
प्रतर्दनो दिवोदासः सौदासः कोसलेश्वरः ।
ऐलो नलश्च राजर्षिर्मनुश्चैव प्रजापतिः ॥ ४९
हविध्रश्च पृषध्रश्च प्रतीपः शंतनुस्तथा ।
कक्षसेनश्च राजर्षिर्ये चान्ये नानुकीर्तिताः ॥ ५०
मा विघ्नं मा च मे पापं मा च मे परिपन्थिनः ।
ध्रुवो जयो मे नित्यं स्यात्परत्र च परा गतिः ॥५१

इति श्रीमहाभारते अनुशासनतपर्वणि
एकपञ्चाशदधिकशततमोऽध्यायः ॥ १५१ ॥

१५२

वैशंपायन उवाच ।

तूष्णींभूते तदा भीष्मे पटे चित्रमिवार्पितम् ।
मुहूर्तमिव च ध्यात्वा व्यासः सत्यवतीसुतः ।
नृपं शयानं गाङ्गेयमिदमाह वचस्तदा ॥ १
राजन्प्रकृतिमापन्नः कुरुराजो युधिष्ठिरः ।
सहितो भ्रातृभिः सर्वैः पार्थिवैश्चानुयायिभिः ॥ २
उपास्ते त्वां नरव्याघ्र सह कृष्णेन धीमता ।

तमिमं पुरयानाय त्वमनुज्ञातुमर्हसि ॥ ३
एवमुक्तो भगवता व्यासेन पृथिवीपतिः ।
युधिष्ठिरं सहामात्यमनुजज्ञे नदीसुतः ॥ ४
उवाच चैनं मधुरं ततः शांतनवो नृपः ।
प्रविशस्व पुरं राजन्व्येतु ते मानसो ज्वरः ॥ ५
यजस्व विविधैर्यज्ञैर्बह्वन्नैः स्वाप्तदक्षिणैः ।
ययातिरिव राजेन्द्र श्रद्धादमपुरःसरः ॥ ६
क्षत्रधर्मरतः पार्थ पितॄन्देवांश्च तर्पय ।
श्रेयसा योक्ष्यसे चैव व्येतु ते मानसो ज्वरः ॥ ७
रञ्जयस्व प्रजाः सर्वाः प्रकृतीः परिसान्त्वय ।
सुहृदः फलसत्कारैरभ्यर्चय यथार्हतः ॥ ८
अनु त्वां तात जीवन्तु मित्राणि सुहृदस्तथा ।
चैत्यस्थाने स्थितं वृक्षं फलवन्तमिव द्विजाः ॥ ९
आगन्तव्यं च भवता समये मम पार्थिव ।
विनिवृत्ते दिनकरे प्रवृत्ते चोत्तरायणे ॥ १०
तथेत्युक्त्वा तु कौन्तेयः सोऽभिवाद्य पितामहम् ।
प्रययौ सपरीवारो नगरं नागसाह्वयम् ॥ ११
धृतराष्ट्रं पुरस्कृत्य गान्धारीं च पतिव्रताम् ।
सह तैरृषिभिः सर्वैर्भ्रातृभिः केशवेन च ॥ १२
पौरजानपदैश्चैव मन्त्रिवृद्धैश्च पार्थिवः ।
प्रविवेश कुरुश्रेष्ठ पुरं वारणसाह्वयम् ॥ १३

इति श्रीमहाभारते अनुशासनपर्वणि
द्विपञ्चाशदधिकशततमोऽध्यायः ॥ १५२ ॥

॥ समाप्तं दानधर्मपर्व ॥

१५३

वैशंपायन उवाच ।

ततः कुन्तीसुतो राजा पौरजानपदं जनम् ।
पूजयित्वा यथान्यायमनुजज्ञे गृहान्प्रति ॥ १
सान्त्वयामास नारीश्च हतवीरा हतेश्वराः ।
विपुलैरर्थदानैश्च तदा पाण्डुसुतो नृपः ॥ २
सोऽभिषिक्तो महाप्राज्ञः प्राप्य राज्यं युधिष्ठिरः ।
अवस्थाप्य नरश्रेष्ठः सर्वाः स्वप्रकृतीस्तदा ॥ ३
द्विजेभ्यो बलमुख्येभ्यो नैगमेभ्यश्च सर्वशः ।
प्रतिगृह्याशिषो मुख्यास्तदा धर्मभृतां वरः ॥ ४
उषित्वा शर्वरीः श्रीमान्पञ्चाशन्नगरोत्तमे ।
समयं कौरवाग्र्यस्य सस्मार पुरुषर्षभः ॥ ५
स निर्ययौ गजपुराद्याजकैः परिवारितः ।
दृष्ट्वा निवृत्तमादित्यं प्रवृत्तं चोत्तरायणम् ॥ ६
घृतं माल्यं च गन्धांश्च क्षौमाणि च युधिष्ठिरः ।
चन्दनागरुमुख्यानि तथा कालागरूणि च ॥ ७
प्रस्थाप्य पूर्वं कौन्तेयो भीष्मसंसाधनाय वै ।
माल्यानि च महार्हाणि रत्नानि विविधानि च ॥८
धृतराष्ट्रं पुरस्कृत्य गान्धारीं च यशस्विनीम् ।
मातरं च पृथां धीमान्भ्रातॄंश्च पुरुषर्षभः ॥ ९
जनार्दनेनानुगतो विदुरेण च धीमता ।
युयुत्सुना च कौरव्यो युयुधानेन चाभिभो ॥ १०
महता राजभोग्येन परिबर्हेण संवृतः ।
स्तूयमानो महाराज भीष्मस्याग्नीननुव्रजन् ॥ ११
निश्चक्राम पुरात्तस्माद्यथा देवपतिस्तथा ।
आससाद कुरुक्षेत्रे ततः शांतनवं नृपम् ॥ १२
उपास्यमानं व्यासेन पाराशर्येण धीमता ।
नारदेन च राजर्षे देवलेनासितेन च ॥ १३
हतशिष्टैर्नृपैश्चान्यैर्नानादेशसमागतैः ।
रक्षिभिश्च महात्मानं रक्ष्यमाणं समन्ततः ॥ १४
शयानं वीरशयने ददर्श नृपतिस्ततः ।
ततो रथादवारोहद्भ्रातृभिः सह धर्मराट् ॥ १५
अभिवाद्याथ कौन्तेयः पितामहमरिंदमम् ।
द्वैपायनादीन्विप्रांश्च तैश्च प्रत्यभिनन्दितः ॥ १६
ऋत्विग्भिर्ब्रह्मकल्पैश्च भ्रातृभिश्च सहाच्युतः ।
आसाद्य शरतल्पस्थमृषिभिः परिवारितम् ॥ १७

अब्रवीद्भरतश्रेष्ठं धर्मराजो युधिष्ठिरः ।
भ्रातृभिः सह कौरव्य शयानं निम्नगासुतम् ॥ १८
युधिष्ठिरोऽहं नृपते नमस्ते जाह्नवीसुत ।
शृणोषि चेन्महाबाहो ब्रूहि किं करवाणि ते ॥१९
प्राप्तोऽस्मि समये राजन्नग्नीनादाय ते विभो ।
आचार्या ब्राह्मणाश्चैव ऋत्विजो भ्रातरश्च मे ॥२०
पुत्रश्च ते महातेजा धृतराष्ट्रो जनेश्वरः ।
उपस्थितः सहामात्यो वासुदेवश्च वीर्यवान् ॥ २१
हतशिष्टाश्च राजानः सर्वे च कुरुजाङ्गलाः ।
तान्पश्य कुरुशार्दूल समुन्मीलय लोचने ॥ २२
यच्चेह किंचित्कर्तव्यं तत्सर्वं प्रापितं मया ।
यथोक्तं भवता काले सर्वमेव च तत्कृतम् ॥ २३
एवमुक्तस्तु गाङ्गेयः कुन्तीपुत्रेण धीमता ।
ददर्श भारतान्सर्वान्स्थितान्संपरिवार्य तम् ॥ २४
ततश्चलवलिर्भीष्मः प्रगृह्य विपुलं भुजम् ।
ओघमेघस्वनो वाग्मी काले वचनमब्रवीत् ॥ २५
दिष्ट्या प्राप्तोऽसि कौन्तेय सहामात्यो युधिष्ठिर ।
परिवृत्तो हि भगवान्सहस्रांशुर्दिवाकरः ॥ २६
अष्टपञ्चाशतं रात्र्यः शयानस्याद्य मे गताः ।
शरेषु निशिताग्रेषु यथा वर्षशतं तथा ॥ २७
माघोऽयं समनुप्राप्तो मासः पुण्यो युधिष्ठिर ।
त्रिभागशेषः पक्षोऽयं शुक्लो भवितुमर्हति ॥ २८
एवमुक्त्वा तु गाङ्गेयो धर्मपुत्रं युधिष्ठिरम् ।
धृतराष्ट्रमथामन्त्र्य काले वचनमब्रवीत् ॥ २९
राजन्विदितधर्मोऽसि सुनिर्णीतार्थसंशयः ।
बहुश्रुता हि ते विप्रा बहवः पर्युपासिताः ॥ ३०
वेदशास्त्राणि सर्वाणि धर्मांश्च मनुजेश्वर ।
वेदांश्च चतुरः साङ्गान्निखिलेनावबुध्यसे ॥ ३१
न शोचितव्यं कौरव्य भवितव्यं हि तत्तथा ।
श्रुतं देवरहस्यं ते कृष्णद्वैपायनादपि ॥ ३२
यथा पाण्डोः सुता राजंस्तथैव तव धर्मतः ।
तान्पालय स्थितो धर्मे गुरुशुश्रूषणे रतान् ॥ ३३
धर्मराजो हि शुद्धात्मा निदेशे स्थास्यते तव ।
आनृशंस्यपरं ह्येनं जानामि गुरुवत्सलम् ॥ ३४
तव पुत्रा दुरात्मानः क्रोधलोभपरायणाः ।
ईर्ष्याभिभूता दुर्वृत्तास्तान्न शोचितुमर्हसि ॥ ३५

वैशंपायन उवाच ।

एतावदुक्त्वा वचनं धृतराष्ट्रं मनीषिणम् ।
वासुदेवं महाबाहुमभ्यभाषत कौरवः ॥ ३६
भगवन्देवदेवेश सुरासुरनमस्कृत ।
त्रिविक्रम नमस्तेऽस्तु शङ्खचक्रगदाधर ॥ ३७
अनुजानीहि मां कृष्ण वैकुण्ठ पुरुषोत्तम ।
रक्ष्याश्च ते पाण्डवेया भवान्ह्येषां परायणम् ॥३८
उक्तवानस्मि दुर्बुद्धिं मन्दं दुर्योधनं पुरा ।
यतः कृष्णस्ततो धर्मो यतो धर्मस्ततो जयः ॥३९
वासुदेवेन तीर्थेन पुत्र संशाम्य पाण्डवैः ।
संधानस्य परः कालस्तवेति च पुनः पुनः ॥ ४०
न च मे तद्वचो मूढः कृतवान्स सुमन्दधीः ।
घातयित्वेह पृथिवीं ततः स निधनं गतः ॥ ४१
त्वां तु जानाम्यहं वीर पुराणमृषिसत्तमम् ।
नरेण सहितं देवं बदर्यां सुचिरोषितम् ॥ ४२
तथा मे नारदः प्राह व्यासश्च सुमहातपाः ।
नरनारायणावेतौ संभूतौ मनुजेष्विति ॥ ४३

वासुदेव उवाच ।

अनुजानामि भीष्म त्वां वसूनाप्नुहि पार्थिव ।
न तेऽस्ति वृजिनं किंचिन्मया दृष्टं महाद्युते ॥४४
पितृभक्तोऽसि राजर्षे मार्कण्डेय इवापरः ।
तेन मृत्युस्तव वशे स्थितो भृत्य इवानतः ॥ ४५

वैशंपायन उवाच ।

एवमुक्तस्तु गाङ्गेयः पाण्डवानिदमब्रवीत् ।

धृतराष्ट्रमुखांश्चापि सर्वान्ससुहृदस्तथा ॥ ४६
प्राणानुत्स्रष्टुमिच्छामि तन्मानुज्ञातुमर्हथ ।
सत्ये प्रयतितव्यं वः सत्यं हि परमं बलम् ॥ ४७
आनृशंस्यपरैर्भाव्यं सदैव नियतात्मभिः ।
ब्रह्मण्यैर्धर्मशीलैश्च तपोनित्यैश्च भारत ॥ ४८
इत्युक्त्वा सुहृदः सर्वान्संपरिष्वज्य चैव ह ।
पुनरेवाब्रवीद्धीमान्युधिष्ठिरमिदं वचः ॥ ४९
ब्राह्मणाश्चैव ते नित्यं प्राज्ञाश्चैव विशेषतः ।
आचार्या ऋत्विजश्चैव पूजनीया नराधिप ॥ ५०

इति श्रीमहाभारते अनुशासनपर्वणि
त्रिपञ्चाशदधिकशततमोऽध्यायः ॥ १५३ ॥

१५४

वैशंपायन उवाच ।

एवमुक्त्वा कुरून्सर्वान्भीष्मः शांतनवस्तदा ।
तूष्णीं बभूव कौरव्यः स मुहूर्तमरिंदम ॥ १
धारयामास चात्मानं धारणासु यथाक्रमम् ।
तस्योर्ध्वमगमन्प्राणाः संनिरुद्धा महात्मनः ॥ २
इदमाश्चर्यमासीच्च मध्ये तेषां महात्मनाम् ।
यद्यन्मुञ्चति गात्राणां स शंतनुसुतस्तदा ।
तत्तद्विशल्यं भवति योगयुक्तस्य तस्य वै ॥ ३
क्षणेन प्रेक्षतां तेषां विशल्यः सोऽभवत्तदा ।
तं दृष्ट्वा विस्मिताः सर्वे वासुदेवपुरोगमाः ।
सह तैर्मुनिभिः सर्वैस्तदा व्यासादिभिर्नृप ॥ ४
संनिरुद्धस्तु तेनात्मा सर्वेष्वायतनेषु वै ।
जगाम भित्त्वा मूर्धानं दिवमभ्युत्पपात च ॥ ५
महोल्केव च भीष्मस्य मूर्धदेशाज्जनाधिप ।
निःसृत्याकाशमाविश्य क्षणेनान्तरधीयत ॥ ६
एवं स नृपशार्दूल नृपः शांतनवस्तदा ।
समयुज्यत लोकैः स्वैर्भरतानां कुलोद्वहः ॥ ७
ततस्त्वादाय दारूणि गन्धांश्च विविधान्बहून् ।
चितां चक्रुर्महात्मानः पाण्डवा विदुरस्तथा ।
युयुत्सुश्चापि कौरव्यः प्रेक्षकास्त्वितरेऽभवन् ॥ ८
युधिष्ठिरस्तु गाङ्गेयं विदुरश्च महामतिः ।
छादयामासतुरुभौ क्षौमैर्माल्यैश्च कौरवम् ॥ ९
धारयामास तस्याथ युयुत्सुश्छत्रमुत्तमम् ।
चामरव्यजने शुभ्रे भीमसेनार्जुनावुभौ ।
उष्णीषे पर्यगृह्णीतां माद्रीपुत्रावुभौ तदा ॥ १०
स्त्रियः कौरवनाथस्य भीष्मं कुरुकुलोद्भवम् ।
तालवृन्तान्युपादाय पर्यवीजन्समन्ततः ॥ ११
ततोऽस्य विधिवच्चक्रुः पितृमेधं महात्मनः ।
याजका जुहुवुश्चाग्निं जगुः सामानि सामगाः ॥१२
ततश्चन्दनकाष्ठैश्च तथा कालेयकैरपि ।
कालागरुप्रभृतिभिर्गन्धैश्चोच्चावचैस्तथा ॥ १३
समवच्छाद्य गाङ्गेयं प्रज्वाल्य च हुताशनम् ।
अपसव्यमकुर्वन्त धृतराष्ट्रमुखा नृपाः ॥ १४
संस्कृत्य च कुरुश्रेष्ठं गाङ्गेयं कुरुसत्तमाः ।
जग्मुर्भागीरथीतीरमृषिजुष्टं कुरूद्वहाः ॥ १५
अनुगम्यमाना व्यासेन नारदेनासितेन च ।
कृष्णेन च भरतस्त्रीभिर्ये च पौराः समागताः ॥१६
उदकं चक्रिरे चैव गाङ्गेयस्य महात्मनः ।
विधिवत्क्षत्रियश्रेष्ठाः स च सर्वो जनस्तदा ॥ १७
ततो भागीरथी देवी तनयस्योदके कृते ।
उत्थाय सलिलात्तस्माद्रुदती शोकलालसा ॥ १८
परिदेवयती तत्र कौरवानभ्यभाषत ।
निबोधत यथावृत्तमुच्यमानं मयानघाः ॥ १९
राजवृत्तेन संपन्नः प्रज्ञयाभिजनेन च ।
सत्कर्ता कुरुवृद्धानां पितृभक्तो दृढव्रतः ॥ २०
जामदग्न्येन रामेण पुरा यो न पराजितः ।
दिव्यैरस्त्रैर्महावीर्यः स हतोऽद्य शिखण्डिना ॥२१
अश्मसारमयं नूनं हृदयं मम पार्थिवाः ।

अपश्यन्त्याः प्रियं पुत्रं यत्र दीर्यति मेऽद्य वै ॥२२
समेतं पार्थिवं क्षत्रं काशिपुर्यां स्वयंवरे ।
विजित्यैकरथेनाजौ कन्यास्ता यो जहार ह ॥ २३
यस्य नास्ति बले तुल्यः पृथिव्यामपि कश्चन ।
हतं शिखण्डिना श्रुत्वा यन्न दीर्यति मे मनः ॥२४
जामदग्न्यः कुरुक्षेत्रे युधि येन महात्मना ।
पीडितो नातियत्नेन निहतः स शिखण्डिना ॥२५
एवंविधं बहु तदा विलपन्तीं महानदीम् ।
आश्वासयामास तदा साम्ना दामोदरो विभुः ॥२६
समाश्वसिहि भद्रे त्वं मा शुचः शुभदर्शने ।
गतः स परमां सिद्धिं तव पुत्रो न संशयः ॥ २७
वसुरेष महातेजाः शापदोषेण शोभने ।
मनुष्यतामनुप्राप्तो नैनं शोचितुमर्हसि ॥ २८
स एष क्षत्रधर्मेण युध्यमानो रणाजिरे ।
धनंजयेन निहतो नैष नुन्नः शिखण्डिना ॥ २९
भीष्मं हि कुरुशार्दूलमुद्यतेषु महारणे ।
न शक्तः संयुगे हन्तुं साक्षादपि शतक्रतुः ॥ ३०
स्वच्छन्देन सुतस्तुभ्यं गतः स्वर्गं शुभानने ।
न शक्ताः स्युर्निहन्तुं हि रणे तं सर्वदेवताः ॥ ३१
तस्मान्मा त्वं सरिच्छ्रेष्ठे शोचस्व कुरुनन्दनम् ।
वसूनेष गतो देवि पुत्रस्ते विज्वरा भव ॥ ३२
इत्युक्ता सा तु कृष्णेन व्यासेन च सरिद्वरा ।
त्यक्त्वा शोकं महाराज स्वं वार्यवततार ह ॥ ३३
सत्कृत्य ते तां सरितं ततः कृष्णमुखा नृपाः ।
अनुज्ञातास्तया सर्वे न्यवर्तन्त जनाधिपाः ॥ ३४

इति श्रीमहाभारते अनुशासनपर्वणि
चतुष्पञ्चाशदधिकशततमोऽध्यायः ॥ १५४ ॥
समाप्तं भीष्मस्वर्गारोहणपर्व ॥

॥ समाप्तमनुशासनपर्व ॥

१४

आश्वमेधिकपर्व

१

वैशंपायन उवाच ।

कृतोदकं तु राजानं धृतराष्ट्रं युधिष्ठिरः ।
पुरस्कृत्य महाबाहुरुत्ततारकुलेन्द्रियः ॥ १
उत्तीर्य च महीपालो बाष्पव्याकुललोचनः ।
पपात तीरे गङ्गाया व्याधविद्ध इव द्विपः ॥ २
तं सीदमानं जग्राह भीमः कृष्णेन चोदितः ।
मैवमित्यब्रवीच्चैनं कृष्णः परबलार्दनः ॥ ३
तमार्तं पतितं भूमौ निश्वसन्तं पुनः पुनः ।
ददृशुः पाण्डवा राजन्धर्मात्मानं युधिष्ठिरम् ॥ ४
तं दृष्ट्वा दीनमनसं गतसत्त्वं जनेश्वरम् ।
भूयः शोकसमाविष्टाः पाण्डवाः समुपाविशन् ॥ ५
राजा च धृतराष्ट्रस्तमुपासीनो महाभुजः ।
वाक्यमाह महाप्राज्ञो महाशोकप्रपीडितम् ॥ ६
उत्तिष्ठ कुरुशार्दूल कुरु कार्यमनन्तरम् ।
क्षत्रधर्मेण कौरव्य जितेयमवनिस्त्वया ॥ ७
तां भुङ्क्ष्व भ्रातृभिः सार्धं सुहृद्भिश्च जनेश्वर ।
न शोचितव्यं पश्यामि त्वया धर्मभृतां वर ॥ ८
शोचितव्यं मया चैव गान्धार्या च विशां पते ।
पुत्रैर्विहीनो राज्येन स्वप्नलब्धधनो यथा ॥ ९
अश्रुत्वा हितकामस्य विदुरस्य महात्मनः ।
वाक्यानि सुमहार्थानि परितप्यामि दुर्मतिः ॥१०
उक्तवानेष मां पूर्वं धर्मात्मा दिव्यदर्शनः ।
दुर्योधनापराधेन कुलं ते विनशिष्यति ॥ ११
स्वस्ति चेदिच्छसे राजन्कुलस्यात्मन एव च ।
वध्यतामेष दुष्टात्मा मन्दो राजा सुयोधनः ॥ १२
कर्णश्च शकुनिश्चैव मैनं पश्यतु कर्हिचित् ।
द्यूतसंपातमप्येषामप्रमत्तो निवारय ॥ १३
अभिषेचय राजानं धर्मात्मानं युधिष्ठिरम् ।
स पालयिष्यति वशी धर्मेण पृथिवीमिमाम् ॥ १४
अथ नेच्छसि राजानं कुन्तीपुत्रं युधिष्ठिरम् ।
मेढीभूतः स्वयं राज्यं प्रतिगृह्णीष्व पार्थिव ॥ १५
समं सर्वेषु भूतेषु वर्तमानं नराधिप ।
अनुजीवन्तु सर्वे त्वां ज्ञातयो ज्ञातिवर्धन ॥ १६
एवं ब्रुवति कौन्तेय विदुरे दीर्घदर्शिनि ।
दुर्योधनमहं पापमन्ववर्तं वृथामतिः ॥ १७
अश्रुत्वा ह्यस्य वीरस्य वाक्यानि मधुराण्यहम् ।
फलं प्राप्य महद्दुःखं निमग्नः शोकसागरे ॥ १८
वृद्धौ हि ते स्वः पितरौ पश्यावां दुःखितौ नृप ।
न शोचितव्यं भवता पश्यामीह जनाधिप ॥ १९

इति श्रीमहाभारते आश्वमेधिकपर्वणि
प्रथमोऽध्यायः ॥ १ ॥

२

वैशंपायन उवाच ।

एवमुक्तस्तु राज्ञा स धृतराष्ट्रेण धीमता ।
तूष्णीं बभूव मेधावी तमुवाचाथ केशवः ॥ १

अतीव मनसा शोकः क्रियमाणो जनाधिप ।
संतापयति वैतस्य पूर्वप्रेतान्पितामहान् ॥ २
यजस्व विविधैर्यज्ञैर्बहुभिः स्वाप्तदक्षिणैः ।
देवांस्तर्पय सोमेन स्वधया च पितॄनपि ॥ ३
त्वद्विधस्य महाबुद्ध नैतदद्योपपद्यते ।
विदितं वेदितव्यं ते कर्तव्यमपि ते कृतम् ॥ ४
श्रुताश्च राजधर्मास्ते भीष्माद्भागीरथीसुतात् ।
कृष्णद्वैपायनाच्चैव नारदाद्विदुरात्तथा ॥ ५
नेमामर्हसि मूढानां वृत्तिं त्वमनुवर्तितुम् ।
पितृपैतामहीं वृत्तिमास्थाय धुरमुद्वह ॥ ६
युक्तं हि यशसा क्षत्रं स्वर्गं प्राप्तुमसंशयम् ।
न हि कश्चन शूराणां निहतोऽत्र पराङ्मुखः ॥७
त्यज शोकं महाराज भवितव्यं हि तत्तथा ।
न शक्यास्ते पुनर्द्रष्टुं त्वया ह्यस्मिन्रणे हताः ॥ ८
एतावदुक्त्वा गोविन्दो धर्मराजं युधिष्ठिरम् ।
विरराम महातेजास्तमुवाच युधिष्ठिरः ॥ ९
गोविन्द मयि या प्रीतिस्तव सा विदिता मम ।
सौहृदेन तथा प्रेम्णा सदा मामनुकम्पसे ॥ १०
प्रियं तु मे स्यात्सुमहत्कृतं चक्रगदाधर ।
श्रीमन्प्रीतेन मनसा सर्वं यादवनन्दन ॥ ११
यदि मामनुजानीयाद्भवान्गन्तुं तपोवनम् ।
न हि शान्तिं प्रपश्यामि घातयित्वा पितामहम् ।
कर्णं च पुरुषव्याघ्रं संग्रामेष्वपलायिनम् ॥ १२
कर्मणा येन मुच्येयमस्मात्क्रूरादरिंदम ।
कर्मणस्तद्विधत्स्वेह येन शुध्यति मे मनः ॥ १३
तमेवंवादिनं व्यासस्ततः प्रोवाच धर्मवित् ।
सान्त्वयन्सुमहातेजाः शुभं वचनमर्थवत् ॥ १४
अकृता ते मतिस्तात पुनर्बाल्येन मुह्यसे ।
किमाकाशे वयं सर्वे प्रलपाम मुहुर्मुहुः ॥ १५
विदिताः क्षत्रधर्मास्ते येषां युद्धेन जीविका ।
यथा प्रवृत्तो नृपतिर्नाधिबन्धेन युज्यते ॥ १६
मोक्षधर्माश्च निखिला याथातथ्येन ते श्रुताः ।
असकृच्चैव संदेहाश्छिन्नास्ते कामजा मया ॥ १७
अश्रद्दधानो दुर्मेधा लुप्तस्मृतिरसि ध्रुवम् ।
मैवं भव न ते युक्तमिदमज्ञानमीदृशम् ॥ १८
प्रायश्चित्तानि सर्वाणि विदितानि च तेऽनघ ।
युद्धधर्माश्च ते सर्वे दानधर्माश्च ते श्रुताः ॥ १९
स कथं सर्वधर्मज्ञः सर्वागमविशारदः ।
परिमुह्यसि भूयस्त्वमज्ञानादिव भारत ॥ २०

इति श्रीमहाभारते आश्वमेधिकपर्वणि
द्वितीयोऽध्यायः ॥ २ ॥

३

व्यास उवाच ।

युधिष्ठिर तव प्रज्ञा न सम्यगिति मे मतिः ।
न हि कश्चित्स्वयं मर्त्यः स्ववशः कुरुते क्रियाः ॥१
ईश्वरेण नियुक्तोऽयं साध्वसाधु च मानवः ।
करोति पुरुषः कर्म तत्र का परिदेवना ॥ २
आत्मानं मन्यसे चाथ पापकर्माणमन्ततः ।
शृणु तत्र यथा पापमपकृष्येत भारत ॥ ३
तपोभिः क्रतुभिश्चैव दानेन च युधिष्ठिर ।
तरन्ति नित्यं पुरुषा ये स्म पापानि कुर्वते ॥ ४
यज्ञेन तपसा चैव दानेन च नराधिप ।
पूयन्ते राजशार्दूल नरा दुष्कृतकर्मिणः ॥ ५
असुराश्च सुराश्चैव पुण्यहेतोर्मखक्रियाम् ।
प्रयतन्ते महात्मानस्तस्माद्यज्ञाः परायणम् ॥ ६
यज्ञैरेव महात्मानो बभूवुरधिकाः सुराः ।
ततो देवाः क्रियावन्तो दानवानभ्यधर्षयन् ॥ ७
राजसूयाश्वमेधौ च सर्वमेधं च भारत ।
नरमेधं च नृपते त्वमाहर युधिष्ठिर ॥ ८
यजस्व वाजिमेधेन विधिवद्दक्षिणावता ।

बहुकामान्नवित्तेन रामो दाशरथिर्यथा ॥ ९
यथा च भरतो राजा दौःषन्तिः पृथिवीपतिः ।
शाकुन्तलो महावीर्यस्तव पूर्वपितामहः ॥ १०

युधिष्ठिर उवाच ।

असंशयं वाजिमेधः पावयेत्पृथिवीमपि ।
अभिप्रायस्तु मे कश्चित्तं त्वं श्रोतुमिहार्हसि ॥ ११
इमं ज्ञातिवधं कृत्वा सुमहान्तं द्विजोत्तम ।
दानमल्पं न शक्यामि दातुं वित्तं च नास्ति मे ॥
न च बालानिमान्दीनानुत्सहे वसु याचितुम् ।
तथैवार्द्रव्रणान्कृच्छ्रे वर्तमानान्नृपात्मजान् ॥ १३
स्वयं विनाश्य पृथिवीं यज्ञार्थे द्विजसत्तम ।
करमाहारयिष्यामि कथं शोकपरायणान् ॥ १४
दुर्योधनापराधेन वसुधा वसुधाधिपाः ।
प्रनष्टा योजयित्वास्मानकीर्त्या मुनिसत्तम ॥ १५
दुर्योधनेन पृथिवी क्षयिता वित्तकारणात् ।
कोशश्चापि विशीर्णोऽसौ धार्तराष्ट्रस्य दुर्मतेः ॥१६
पृथिवी दक्षिणा चात्र विधिः प्रथमकल्पिकः ।
विद्वद्भिः परिदृष्टोऽयं शिष्टो विधिविपर्ययः ॥ १७
न च प्रतिनिधिं कर्तुं चिकीर्षामि तपोधन ।
अत्र मे भगवन्सम्यक्साचिव्यं कर्तुमर्हसि ॥१८

वैशंपायन उवाच ।

एवमुक्तस्तु पार्थेन कृष्णद्वैपायनस्तदा ।
मुहूर्तमनुसंचिन्त्य धर्मराजानमब्रवीत् ॥ १९
विद्यते द्रविणं पार्थ गिरौ हिमवति स्थितम् ।
उत्सृष्टं ब्राह्मणैर्यज्ञे मरुत्तस्य महीपतेः ।
तदानयस्व कौन्तेय पर्याप्तं तद्भविष्यति ॥ २०

युधिष्ठिर उवाच ।

कथं यज्ञे मरुत्तस्य द्रविणं तत्समाचितम् ।
कस्मिंश्च काले स नृपो बभूव वदतां वर ॥ २१

व्यास उवाच ।

यदि शुश्रूषसे पार्थ शृणु कारंधमं नृपम् ।
यस्मिन्काले महावीर्यः स राजासीन्महाधनः ॥२

इति श्रीमहाभारते आश्वमेधिकपर्वणि
तृतीयोऽध्यायः ॥ ३ ॥

४

युधिष्ठिर उवाच ।

शुश्रूषे तस्य धर्मज्ञ राजर्षेः परिकीर्तनम् ।
द्वैपायन मरुत्तस्य कथां प्रब्रूहि मेऽनघ ॥ १

व्यास उवाच ।

आसीत्कृतयुगे पूर्वं मनुर्दण्डधरः प्रभुः ।
तस्य पुत्रो महेष्वासः प्रजातिरिति विश्रुतः ॥ २
प्रजातेरभवत्पुत्रः क्षुप इत्यभिविश्रुतः ।
क्षुपस्य पुत्रस्त्विक्ष्वाकुर्महीपालोऽभवत्प्रभुः ॥ ३
तस्य पुत्रशतं राजन्नासीत्परमधार्मिकम् ।
तांस्तु सर्वान्महीपालानिक्ष्वाकुरकरोत्प्रभुः ॥ ४
तेषां ज्येष्ठस्तु विंशोऽभूत्प्रतिमानं धनुष्मताम् ।
विंशस्य पुत्रः कल्याणो विविंशो नाम भारत ॥
विविंशस्य सुता राजन्बभूवुर्दश पञ्च च ।
सर्वे धनुषि विक्रान्ता ब्रह्मण्याः सत्यवादिनः ॥
दानधर्मरताः सन्तः सततं प्रियवादिनः ।
तेषां ज्येष्ठः खनीनेत्रः स तान्सर्वानपीडयत् ॥ ७
खनीनेत्रस्तु विक्रान्तो जित्वा राज्यमकण्टकम् ।
नाशक्नोद्रक्षितुं राज्यं नान्वरज्यन्त तं प्रजाः ॥ ८
तमपास्य च तद्राष्ट्रं तस्य पुत्रं सुवर्चसम् ।
अभ्यषिञ्चत राजेन्द्र मुदितं चाभवत्तदा ॥ ९
स पितुर्विक्रियां दृष्ट्वा राज्यान्निरसनं तथा ।
नियतो वर्तयामास प्रजाहितचिकीर्षया ॥ १०
ब्रह्मण्यः सत्यवादी च शुचिः शमदमान्वितः ।

प्रजास्तं चान्वरज्यन्त धर्मनित्यं मनस्विनम् ।। ११
तस्य धर्मप्रवृत्तस्य व्यशीर्यत्कोशवाहनम् ।
तं क्षीणकोशं सामन्ताः समन्तात्पर्यपीडयन् ।। १२
स पीड्यमानो बहुभिः क्षीणकोशस्त्ववाहनः ।
आर्तिमार्छत्परां राजा सह भृत्यैः पुरेण च ।। १३
न चैनं परिहर्तुं तेऽशक्नुवन्परिसंक्षये ।
सम्यग्वृत्तो हि राजा स धर्मनित्यो युधिष्ठिर ।।१४
यदा तु परमामार्तिं गतोऽसौ सपुरो नृपः ।
ततः प्रदध्मौ स करं प्रादुरासीत्ततो बलम् ।। १५
ततस्तानजयत्सर्वान्प्रातिसीमान्नराधिपान् ।
एतस्मात्कारणाद्राजन्विश्रुतः स करंधमः ।। १६
तस्य कारंधमः पुत्रस्त्रेतायुगमुखेऽभवत् ।
इन्द्रादनवरः श्रीमान्देवैरपि सुदुर्जयः ।। १७
तस्य सर्वे महीपाला वर्तन्ते स्म वशे तदा ।
स हि सम्राडभूत्तेषां वृत्तेन च बलेन च ।। १८
अविक्षिन्नाम धर्मात्मा शौर्येणेन्द्रसमोऽभवत् ।
यज्ञशीलः कर्मरतिर्धृतिमान्संयतेन्द्रियः ।। १९
तेजसादित्यसदृशः क्षमया पृथिवीसमः ।
बृहस्पतिसमो बुद्ध्या हिमवानिव सुस्थिरः ।। २०
कर्मणा मनसा वाचा दमेन प्रशमेन च ।
मनांस्याराधयामास प्रजानां स महीपतिः ।। २१
य ईजे हयमेधानां शतेन विधिवत्प्रभुः ।
याजयामास यं विद्वान्स्वयमेवाङ्गिराः प्रभुः ।। २२
तस्य पुत्रोऽतिचक्राम पितरं गुणवत्तया ।
मरुत्तो नाम धर्मज्ञश्चक्रवर्ती महायशाः ।। २३
नागायुतसमप्राणः साक्षाद्विष्णुरिवापरः ।
स यक्ष्यमाणो धर्मात्मा शातकुम्भमयान्युत ।
कारयामास शुभ्राणि भाजनानि सहस्रशः ।। २४
मेरुं पर्वतमासाद्य हिमवत्पार्श्व उत्तरे ।
काञ्चनः सुमहान्पादस्तत्र कर्म चकार सः ।। २५
ततः कुण्डानि पात्रीश्च पिठराण्यासनानि च ।
चक्रुः सुवर्णकर्तारो येषां संख्या न विद्यते ।। २६
तस्यैव च समीपे स यज्ञवाटो बभूव ह ।
ईजे तत्र स धर्मात्मा विधिवत्पृथिवीपतिः ।
मरुत्तः सहितैः सर्वैः प्रजापालैर्नराधिपः ।। २७

इति श्रीमहाभारते आश्वमेधिकपर्वणि
चतुर्थोऽध्यायः ।। ४ ।।

५

युधिष्ठिर उवाच ।

कथंवीर्यः समभवत्स राजा वदतां वरः ।
कथं च जातरूपेण समयुज्यत स द्विज ।। १
क्व च तत्सांप्रतं द्रव्यं भगवन्नवतिष्ठते ।
कथं च शक्यमस्माभिस्तदवाप्तुं तपोधन ।। २

व्यास उवाच ।

असुराश्चैव देवाश्च दक्षस्यासन्प्रजापतेः ।
अपत्यं बहुलं तात तेऽस्पर्धन्त परस्परम् ।। ३
तथैवाङ्गिरसः पुत्रौ व्रततुल्यौ बभूवतुः ।
बृहस्पतिर्बृहत्तेजाः संवर्तश्च तपोधनः ।। ४
तावपि स्पर्धिनौ राजन्पृथगास्तां परस्परम् ।
बृहस्पतिश्च संवर्तं बाधते स्म पुनः पुनः ।। ५
स बाध्यमानः सततं भ्रात्रा ज्येष्ठेन भारत ।
अर्थानुत्सृज्य दिग्वासा वनवासमरोचयत् ।। ६
वासवोऽप्यसुरान्सर्वान्निर्जित्य च निहत्य च ।
इन्द्रत्वं प्राप्य लोकेषु ततो वव्रे पुरोहितम् ।
पुत्रमङ्गिरसो ज्येष्ठं विप्रश्रेष्ठं बृहस्पतिम् ।। ७
याज्यस्त्वङ्गिरसः पूर्वमासीद्राजा करंधमः ।
वीर्येणाप्रतिमो लोके वृत्तेन च बलेन च ।
शतक्रतुरिवौजस्वी धर्मात्मा संशितव्रतः ।। ८
वाहनं यस्य योधाश्च द्रव्याणि विविधानि च ।
ध्यानादेवाभवद्राजन्मुखवातेन सर्वशः ।। ९

स गुणैः पार्थिवान्सर्वान्वशे चक्रे नराधिपः ।
संजीव्य कालमिष्टं च सशरीरो दिवं गतः ॥ १०
बभूव तस्य पुत्रस्तु ययातिरिव धर्मवित् ।
अविक्षिन्नाम शत्रुक्षित्स वशे कृतवान्महीम् ।
विक्रमेण गुणैश्चैव पितेवासीत्स पार्थिवः ॥ ११
तस्य वासवतुल्योऽभून्मरुत्तो नाम वीर्यवान् ।
पुत्रस्तमनुरक्ताभूत्पृथिवी सागराम्बरा ॥ १२
स्पर्धते सततं स स्म देवराजेन पार्थिवः ।
वासवोऽपि मरुत्तेन स्पर्धते पाण्डुनन्दन ॥ १३
शुचिः स गुणवानासीन्मरुत्तः पृथिवीपतिः ।
यतमानोऽपि यं शक्रो न विशेषयति स्म ह ॥१४
सोऽशक्नुवन्विशेषाय समाहूय बृहस्पतिम् ।
उवाचेदं वचो देवैः सहितो हरिवाहनः ॥ १५
बृहस्पते मरुत्तस्य मा स्म कार्षीः कथंचन ।
दैवं कर्माथ वा पित्र्यं कर्तासि मम चेत्प्रियम् ॥
अहं हि त्रिषु लोकेषु सुराणां च बृहस्पते ।
इन्द्रत्वं प्राप्तवानेको मरुत्तस्तु महीपतिः ॥ १७
कथं ह्यमर्त्यं ब्रह्मंस्त्वं याजयित्वा सुराधिपम् ।
याजयेर्मृत्युसंयुक्तं मरुत्तमविशङ्कया ॥ १८
मां वा वृणीष्व भद्रं ते मरुत्तं वा महीपतिम् ।
परित्यज्य मरुत्तं वा यथाजोषं भजस्व माम् ॥ १९
एवमुक्तः स कौरव्य देवराज्ञा बृहस्पतिः ।
मुहूर्तमिव संचिन्त्य देवराजानमब्रवीत् ॥ २०
त्वं भूतानामधिपतिस्त्वयि लोकाः प्रतिष्ठिताः ।
नमुचेर्विश्वरूपस्य निहन्ता त्वं बलस्य च ॥ २१
त्वमाजहर्थ देवानामेको वीर श्रियं पराम् ।
त्वं बिभर्षि भुवं द्यां च सदैव बलसूदन ॥ २२
पौरोहित्यं कथं कृत्वा तव देवगणेश्वर ।
याजयेयमहं मर्त्यं मरुत्तं पाकशासन ॥ २३
समाश्वसिहि देवेश नाहं मर्त्याय कर्हिचित् ।
ग्रहीष्यामि स्रुवं यज्ञे शृणु चेदं वचो मम ॥ २४
हिरण्यरेतसोऽम्भः स्यात्परिवर्तेत मेदिनी ।
भासं च न रविः कुर्यान्मत्सत्यं विचलेद्यदि ॥२५
बृहस्पतिवचः श्रुत्वा शक्रो विगतमत्सरः ।
प्रशस्यैनं विवेशाथ स्वमेव भवनं तदा ॥ २६

इति श्रीमहाभारते आश्वमेधिकपर्वणि
पञ्चमोऽध्यायः ॥ ५ ॥

६

व्यास उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
बृहस्पतेश्च संवादं मरुत्तस्य च भारत ॥ १
देवराजस्य समयं कृतमाङ्गिरसेन ह ।
श्रुत्वा मरुत्तो नृपतिर्मन्युमाहारयत्तदा ॥ २
संकल्प्य मनसा यज्ञं करंधमसुतात्मजः ।
बृहस्पतिमुपागम्य वाग्मी वचनमब्रवीत् ॥ ३
भगवन्यन्मया पूर्वमभिगम्य तपोधन ।
कृतोऽभिसंधिर्यज्ञाय भवतो वचनाद्गुरो ॥ ४
तमहं यष्टुमिच्छामि संभाराः संभृताश्च मे ।
याज्योऽस्मि भवतः साधो तत्प्राप्नुहि विधत्स्व च ॥

बृहस्पतिरुवाच ।

न कामये याजयितुं त्वामहं पृथिवीपते ।
वृतोऽस्मि देवराजेन प्रतिज्ञातं च तस्य मे ॥ ६

मरुत्त उवाच ।

पित्र्यमस्मि तव क्षेत्रं बहु मन्ये च ते भृशम् ।
न चास्म्ययाज्यतां प्राप्तो भजमानं भजस्व माम् ॥

बृहस्पतिरुवाच ।

अमर्त्यं याजयित्वाहं याजयिष्ये न मानुषम् ।
मरुत्त गच्छ वा मा वा निवृत्तोऽस्म्यद्य याजनात् ॥
न त्वां याजयितास्म्यद्य वृणु त्वं यमिहेच्छसि ।

उपाध्यायं महाबाहो यस्ते यज्ञं करिष्यति ॥ ९

व्यास उवाच ।

एवमुक्तस्तु नृपतिर्मरुत्तो व्रीडितोऽभवत् ।
प्रत्यागच्छच्च संविग्नो ददर्श पथि नारदम् ॥ १०
देवर्षिणा समागम्य नारदेन स पार्थिवः ।
विधिवत्प्राञ्जलिस्तस्थावथैनं नारदोऽब्रवीत् ॥ ११
राजर्षे नातिहृष्टोऽसि कच्चित्क्षेमं तवानघ ।
क्व गतोऽसि कुतो वेदमप्रीतिस्थानमागतम् ॥ १२
श्रोतव्यं चेन्मया राजन्ब्रूहि मे पार्थिवर्षभ ।
व्यपनेष्यामि ते मन्युं सर्वयत्नैर्नराधिप ॥ १३
एवमुक्तो मरुत्तस्तु नारदेन महर्षिणा ।
विप्रलम्भमुपाध्यायात्सर्वमेव न्यवेदयत् ॥ १४
गतोऽस्म्यङ्गिरसः पुत्रं देवाचार्यं बृहस्पतिम् ।
यज्ञार्थमृत्विजं द्रष्टुं स च मां नाभ्यनन्दत ॥ १५
प्रत्याख्यातश्च तेनाहं जीवितुं नाद्य कामये ।
परित्यक्तश्च गुरुणा दूषितश्चास्मि नारद ॥ १६
एवमुक्तस्तु राज्ञा स नारदः प्रत्युवाच ह ।
आविक्षितं महाराज वाचा संजीवयन्निव ॥ १७
राजन्नङ्गिरसः पुत्रः संवर्तो नाम धार्मिकः ।
चङ्क्रमीति दिशः सर्वा दिग्वासा मोहयन्प्रजाः ॥ १८
तं गच्छ यदि याज्यं त्वां न वाञ्छति बृहस्पतिः ।
प्रसन्नस्त्वां महाराज संवर्तो याजयिष्यति ॥ १९

मरुत्त उवाच ।

संजीवितोऽहं भवता वाक्येनानेन नारद ।
पश्येयं क्व नु संवर्तं शंस मे वदतां वर ॥ २०
कथं च तस्मै वर्तेयं कथं मां न परित्यजेत् ।
प्रत्याख्यातश्च तेनापि नाहं जीवितुमुत्सहे ॥ २१

नारद उवाच ।

उन्मत्तवेषं बिभ्रत्स चङ्क्रमीति यथासुखम् ।
वाराणसीं तु नगरीमभीक्ष्णमुपसेवते ॥ २२
तस्या द्वारं समासाद्य न्यसेथाः कुणपं क्वचित् ।
तं दृष्ट्वा यो निवर्तेत स संवर्तो महीपते ॥ २३
तं पृष्ठतोऽनुगच्छेथा यत्र गच्छेत्स वीर्यवान् ।
तमेकान्ते समासाद्य प्राञ्जलिः शरणं व्रजेः ॥ २४
पृच्छेत्त्वां यदि केनाहं तवाख्यात इति स्म ह ।
ब्रूयास्त्वं नारदेनेति संतप्त इव शत्रुहन् ॥ २५
स चेत्त्वामनुयुञ्जीत ममाभिगमनेप्सया ।
शंसेथा वह्निमारूढं मामपि त्वमशङ्कया ॥ २६

व्यास उवाच ।

स तथेति प्रतिश्रुत्य पूजयित्वा च नारदम् ।
अभ्यनुज्ञाय राजर्षिर्ययौ वाराणसीं पुरीम् ॥ २७
तत्र गत्वा यथोक्तं स पुर्या द्वारे महायशाः ।
कुणपं स्थापयामास नारदस्य वचः स्मरन् ॥ २८
यौगपद्येन विप्रश्च स पुरीद्वारमाविशत् ।
ततः स कुणपं दृष्ट्वा सहसा स न्यवर्तत ॥ २९
स तं निवृत्तमालक्ष्य प्राञ्जलिः पृष्ठतोऽन्वगात् ।
आविक्षितो महीपालः संवर्तमुपशिक्षितुम् ॥ ३०
स एनं विजने दृष्ट्वा पांसुभिः कर्दमेन च ।
श्लेष्मणा चापि राजानं ष्ठीवनैश्च समाकिरत् ॥ ३१
स तथा बाध्यमानोऽपि संवर्तेन महीपतिः ।
अन्वगादेव तमृषिं प्राञ्जलिः संप्रसादयन् ॥ ३२
ततो निवृत्य संवर्तः परिश्रान्त उदाविशत् ।
शीतलच्छायमासाद्य न्यग्रोधं बहुशाखिनम् ॥ ३३

इति श्रीमहाभारते आश्वमेधिकपर्वणि
षष्ठोऽध्यायः ॥ ६ ॥

७

संवर्त उवाच ।

कथमस्मि त्वया ज्ञातः केन वा कथितोऽस्मि ते ।
एतदाचक्ष्व मे तत्त्वमिच्छसे चेत्प्रियं मम ॥ १
सत्यं ते ब्रुवतः सर्वे संपत्स्यन्ते मनोरथाः ।

मिथ्या तु ब्रुवतो मूर्धा सप्तधा ते फलिष्यति ॥२

मरुत्त उवाच ।

नारदेन भवान्मह्यमाख्यातो ह्यटता पथि ।
गुरुपुत्रो ममेति त्वं ततो मे प्रीतिरुत्तमा ॥ ३

संवर्त उवाच ।

सत्यमेतद्भवानाह स मां जानाति सत्रिणम् ।
कथयस्वैतदेकं मे क्व नु संप्रति नारदः ॥ ४

मरुत्त उवाच ।

भवन्तं कथयित्वा तु मम देवर्षिसत्तमः ।
ततो मामभ्यनुज्ञाय प्रविष्टो हव्यवाहनम् ॥ ५

व्यास उवाच ।

श्रुत्वा तु पार्थिवस्यैतत्संवर्तः परया मुदा ।
एतावदहमप्येनं कुर्यामिति तदाब्रवीत् ॥ ६
ततो मरुत्तमुन्मत्तो वाचा निर्भर्त्सयन्निव ।
रूक्षया ब्राह्मणो राजन्पुनः पुनरथाब्रवीत् ॥ ७
वातप्रधानेन मया स्वचित्तवशवर्तिना ।
एवं विकृतरूपेण कथं याजितुमिच्छसि ॥ ८
भ्राता मम समर्थश्च वासवेन च सत्कृतः ।
वर्तते याजने चैव तेन कर्माणि कारय ॥ ९
गृहं स्वं चैव याज्याश्च सर्वा गृह्याश्च देवताः ।
पूर्वजेन ममाक्षिप्तं शरीरं वर्जितं त्विदम् ॥ १०
नाहं तेनाननुज्ञातस्त्वामाविक्षित कर्हिचित् ।
याजयेयं कथंचिद्वै स हि पूज्यतमो मम ॥ ११
स त्वं बृहस्पतिं गच्छ तमनुज्ञाप्य चाव्रज ।
ततोऽहं याजयिष्ये त्वां यदि यष्टुमिहेच्छसि ॥१२

मरुत्त उवाच ।

बृहस्पतिं गतः पूर्वमहं संवर्त तच्छृणु ।
न मां कामयते याज्यमसौ वासववारितः ॥ १३
अमरं याज्यमासाद्य मामृषे मा स्म मानुषम् ।
याजयेथा मरुत्तं त्वं मर्त्यधर्माणमातुरम् ॥ १४
स्पर्धते च मया विप्र सदा वै स हि पार्थिवः ।
एवमस्त्विति चाप्युक्तो भ्रात्रा ते बलवृत्रहा ॥ १५
स मामभिगतं प्रेम्णा याज्यवन्न बुभूषति ।
देवराजमुपाश्रित्य तद्विद्धि मुनिपुंगव ॥ १६
सोऽहमिच्छामि भवता सर्वस्वेनापि याजितुम् ।
कामये समतिक्रान्तुं वासवं त्वत्कृतैर्गुणैः ॥ १७
न हि मे वर्तते बुद्धिर्गन्तुं ब्रह्मबृहस्पतिम् ।
प्रत्याख्यातो हि तेनास्मि तथानपकृते सति ॥ १८

संवर्त उवाच ।

चिकीर्षसि यथाकामं सर्वमेतत्त्वयि ध्रुवम् ।
यदि सर्वानभिप्रायान्कर्तासि मम पार्थिव ॥ १९
याज्यमानं मया हि त्वां बृहस्पतिपुरंदरौ ।
द्विषेतां समभिक्रुद्धावेतदेकं समर्थय ॥ २०
स्थैर्यमत्र कथं ते स्यात्स त्वं निःसंशयं कुरु ।
कुपितस्त्वां न हीदानीं भस्म कुर्यां सबान्धवम् ॥

मरुत्त उवाच ।

यावत्तपेत्सहस्रांशुस्तिष्ठेरंश्चापि पर्वताः ।
तावल्लोकान्न लभेयं त्यजेयं संगतं यदि ॥ २२
मा चापि शुभबुद्धित्वं लभेयमिह कर्हिचित् ।
सम्यग्ज्ञाने वैषये वा त्यजेयं संगतं यदि ॥ २३

संवर्त उवाच ।

आविक्षित शुभा बुद्धिर्धीयतां तव कर्मसु ।
याजनं हि ममाप्येवं वर्तते त्वयि पार्थिव ॥ २४
संविधास्ये च ते राजन्नक्षयं द्रव्यमुत्तमम् ।
येन देवान्सगन्धर्वाञ्शक्रं चाभिभविष्यसि ॥ २५
न तु मे वर्तते बुद्धिर्धने याज्येषु वा पुनः ।
विप्रियं तु चिकीर्षामि भ्रातुश्चेन्द्रस्य चोभयोः ॥
गमयिष्यामि चेन्द्रेण समतामपि ते ध्रुवम् ।

प्रियं च ते करिष्यामि सत्यमेतद्ब्रवीमि ते ॥ २७

इति श्रीमहाभारते आश्वमेधिकपर्वणि
सप्तमोऽध्यायः ॥ ७ ॥

८

संवर्त उवाच ।

गिरेर्हिमवतः पृष्ठे मुञ्जवान्नाम पर्वतः ।
तप्यते यत्र भगवांस्तपो नित्यमुमापतिः ॥ १
वनस्पतीनां मूलेषु टङ्केषु शिखरेषु च ।
गुहासु शैलराजस्य यथाकामं यथासुखम् ॥ २
उमासहायो भगवान्यत्र नित्यं महेश्वरः ।
आस्ते शूली महातेजा नानाभूतगणावृतः ॥ ३
तत्र रुद्राश्च साध्याश्च विश्वेऽथ वसवस्तथा ।
यमश्च वरुणश्चैव कुबेरश्च सहानुगः ॥ ४
भूतानि च पिशाचाश्च नासत्यावश्विनावपि ।
गन्धर्वाप्सरसश्चैव यक्षा देवर्षयस्तथा ॥ ५
आदित्या मरुतश्चैव यातुधानाश्च सर्वशः ।
उपासन्ते महात्मानं बहुरूपमुमापतिम् ॥ ६
रमते भगवांस्तत्र कुबेरानुचरैः सह ।
विकृतैर्विकृताकारैः क्रीडद्भिः पृथिवीपते ।
श्रिया ज्वलन्दृश्यते वै बालादित्यसमद्युतिः ॥ ७
न रूपं दृश्यते तस्य संस्थानं वा कथंचन ।
निर्देष्टुं प्राणिभिः कैश्चित्प्राकृतैर्मांसलोचनैः ॥ ८
नोष्णं न शिशिरं तत्र न वायुर्न च भास्करः ।
न जरा क्षुत्पिपासे वा न मृत्युर्न भयं नृप ॥ ९
तस्य शैलस्य पार्श्वेषु सर्वेषु जयतां वर ।
धातवो जातरूपस्य रश्मयः सवितुर्यथा ॥ १०
रक्ष्यन्ते ते कुबेरस्य सहायैरुद्यतायुधैः ।
चिकीर्षद्भिः प्रियं राजन्कुबेरस्य महात्मनः ॥ ११
तस्मै भगवते कृत्वा नमः शर्वाय वेधसे ।
रुद्राय शितिकण्ठाय सुरूपाय सुवर्चसे ॥ १२
कपर्दिने करालाय हर्यक्ष्णे वरदाय च ।
त्र्यक्ष्णे पूष्णो दन्तभिदे वामनाय शिवाय च ॥ १३
याम्यायाव्यक्तकेशाय सद्वृत्ते शंकराय च ।
क्षेम्याय हरिनेत्राय स्थाणवे पुरुषाय च ॥ १४
हरिकेशाय मुण्डाय कृशायोत्तारणाय च ।
भास्कराय सुतीर्थाय देवदेवाय रंहसे ॥ १५
उष्णीषिणे सुवक्त्राय सहस्राक्षाय मीढुषे ।
गिरिशाय प्रशान्ताय यतये चीरवाससे ॥ १६
बिल्वदण्डाय सिद्धाय सर्वदण्डधराय च ।
मृगव्याधाय महते धन्विनेऽथ भवाय च ॥ १७
वराय सौम्यवक्त्राय पशुहस्ताय वर्षिणे ।
हिरण्यबाहवे राजन्नुग्राय पतये दिशाम् ॥ १८
पशूनां पतये चैव भूतानां पतये तथा ।
वृषाय मातृभक्ताय सेनान्ये मध्यमाय च ॥ १९
स्रुवहस्ताय पतये धन्विने भार्गवाय च ।
अजाय कृष्णनेत्राय विरूपाक्षाय चैव ह ॥ २०
तीक्ष्णदंष्ट्राय तीक्ष्णाय वैश्वानरमुखाय च ।
महाद्युतयेऽनङ्गाय सर्वाङ्गाय प्रजावते ॥ २१
तथा शुक्राधिपतये पृथवे कृत्तिवाससे ।
कपालमालिने नित्यं सुवर्णमुकुटाय च ॥ २२
महादेवाय कृष्णाय त्र्यम्बकायानघाय च ।
क्रोधनाय नृशंसाय मृदवे बाहुशालिने ॥ २३
दण्डिने तप्ततपसे तथैव क्रूरकर्मणे ।
सहस्रशिरसे चैव सहस्रचरणाय च ।
नमः स्वधास्वरूपाय बहुरूपाय दंष्ट्रिणे ॥ २४
पिनाकिनं महादेवं महायोगिनमव्ययम् ।
त्रिशूलपाणिं वरदं त्र्यम्बकं भुवनेश्वरम् ॥ २५
त्रिपुरघ्नं त्रिनयनं त्रिलोकेशं महौजसम् ।
प्रभवं सर्वभूतानां धारणं धरणीधरम् ॥ २६
ईशानं शंकरं सर्वं शिवं विश्वेश्वरं भवम् ।

उमापतिं पशुपतिं विश्वरूपं महेश्वरम् ॥ २७
विरूपाक्षं दशभुजं तिष्यगोवृषभध्वजम् ।
उग्रं स्थाणुं शिवं घोरं शर्वं गौरीशमीश्वरम् ॥ २८
शितिकण्ठमजं शुक्रं पृथुं पृथुहरं हरम् ।
विश्वरूपं विरूपाक्षं बहुरूपमुमापतिम् ॥ २९
प्रणम्य शिरसा देवमनङ्गाङ्गहरं हरम् ।
शरण्यं शरणं याहि महादेवं चतुर्मुखम् ॥ ३०
एवं कृत्वा नमस्तस्मै महादेवाय रंहसे ।
महात्मने क्षितिपते तत्सुवर्णमवाप्स्यसि ।
सुवर्णमाहरिष्यन्तस्तत्र गच्छन्तु ते नराः ॥ ३१

व्यास उवाच ।

इत्युक्तः स वचस्तस्य चक्रे कारंधमात्मजः ।
ततोऽतिमानुषं सर्वं चक्रे यज्ञस्य संविधिम् ।
सौवर्णानि च भाण्डानि संचक्रुस्तत्र शिल्पिनः ॥
बृहस्पतिस्तु तां श्रुत्वा मरुत्तस्य महीपतेः ।
समृद्धिमति देवेभ्यः संतापमकरोद्भृशम् ॥ ३३
स तप्यमानो वैवर्ण्यं कृशत्वं चागमत्परम् ।
भविष्यति हि मे शत्रुः संवर्तो वसुमानिति ॥ ३४
तं श्रुत्वा भृशसंतप्तं देवराजो बृहस्पतिम् ।
अभिगम्यामरवृतः प्रोवाचेदं वचस्तदा ॥ ३५

इति श्रीमहाभारते आश्वमेधिकपर्वणि
अष्टमोऽध्यायः ॥ ८ ॥

९

इन्द्र उवाच ।

कच्चित्सुखं स्वपिषि त्वं बृहस्पते
कच्चिन्मनोज्ञाः परिचारकास्ते ।
कच्चिद्देवानां सुखकामोऽसि विप्र
कच्चिद्देवास्त्वां परिपालयन्ति ॥ १

बृहस्पतिरुवाच ।

सुखं शयेऽहं शयने महेन्द्र
तथा मनोज्ञाः परिचारका मे ।
तथा देवानां सुखकामोऽस्मि शक्र
देवाश्च मां सुभृशं पालयन्ति ॥ २

इन्द्र उवाच ।

कुतो दुःखं मानसं देहजं वा
पाण्डुर्विवर्णश्च कुतस्त्वमद्य ।
आचक्ष्व मे तद्द्विज यावदेता-
न्निहन्मि सर्वांस्तव दुःखकर्तॄन् ॥ ३

बृहस्पतिरुवाच ।

मरुत्तमाहुर्मघवन्यक्ष्यमाणं
महायज्ञेनोत्तमदक्षिणेन ।
तं संवर्तो याजयितेति मे श्रुतं
तदिच्छामि न स तं याजयेत ॥ ४

इन्द्र उवाच ।

सर्वान्कामाननुजातोऽसि विप्र
यस्त्वं देवानां मन्त्रयसे पुरोधाः ।
उभौ च ते जन्ममृत्यू व्यतीतौ
किं संवर्तस्तव कर्ताद्य विप्र ॥ ५

बृहस्पतिरुवाच ।

देवैः सह त्वमसुरान्संप्रणुद्य
जिघांससेऽप्युत सानुबन्धान् ।
यं यं समृद्धं पश्यसि तत्र तत्र
दुःखं सपत्नेषु समृद्धभावः ॥ ६
अतोऽस्मि देवेन्द्र विवर्णरूपः
सपत्नो मे वर्धते तन्निशम्य ।
सर्वोपायैर्मघवन्संनियच्छ
संवर्तं वा पार्थिवं वा मरुत्तम् ॥ ७

इन्द्र उवाच ।

एहि गच्छ प्रहितो जातवेदो-

बृहस्पतिं परिदातुं मरुत्ते
अयं वै त्वा याजयिता बृहस्पति-
स्तथामरं चैव करिष्यतीति ॥ ८

अग्निरुवाच ।

अयं गच्छामि तव शक्राय दूतो
बृहस्पतिं परिदातुं मरुत्ते ।
वाचं सत्यां पुरुहूतस्य कर्तुं
बृहस्पतेश्चापचितिं चिकीर्षुः ॥ ९

व्यास उवाच ।

ततः प्रायाद्धूमकेतुर्महात्मा
वनस्पतीन्वीरुधश्चावमृद्नन् ।
कामाद्धिमान्ते परिवर्तमानः
काष्ठातिगो मातरिश्वेव नर्दन् ॥ १०

मरुत्त उवाच ।

आश्चर्यमद्य पश्यामि रूपिणं वह्निमागतम् ।
आसनं सलिलं पाद्यं गां चोपानय वै मुने ॥ ११

अग्निरुवाच ।

आसनं सलिलं पाद्यं प्रतिनन्दामि तेऽनघ ।
इन्द्रेण तु समादिष्टं विद्धि मा दूतमागतम् ॥ १२

मरुत्त उवाच ।

कच्चिच्छ्रीमान्देवराजः सुखी च
कच्चिच्चास्मान्प्रीयते धूमकेतो ।
कच्चिद्देवाश्चास्य वशे यथाव-
त्तद्ब्रूहि त्वं मम कार्त्स्न्येन देव ॥ १३

अग्निरुवाच ।

शक्रो भृशं सुसुखी पार्थिवेन्द्र
प्रीतिं चेच्छत्यजरां वै त्वया सः ।
देवाश्च सर्वे वशगास्तस्य राज-
न्संदेशं त्वं शृणु मे देवराज्ञः ॥ १४

यदर्थं मां प्राहिणोत्त्वत्सकाशं
बृहस्पतिं परिदातुं मरुत्ते ।
अयं गुरुर्याजयिता नृप त्वां
मर्त्यं सन्तममरं त्वा करोतु ॥ १५

मरुत्त उवाच ।

संवर्तोऽयं याजयिता द्विजो मे
बृहस्पतेरञ्जलिरेष तस्य ।
नासौ देवं याजयित्वा महेन्द्रं
मर्त्यं सन्तं याजयन्नद्य शोभेत् ॥ १६

अग्निरुवाच ।

ये वै लोका देवलोके महान्तः
संप्राप्स्यसे तान्देवराजप्रसादात् ।
त्वां चेदसौ याजयेद्वै बृहस्पति-
र्नूनं स्वर्गं त्वं जयेः कीर्तियुक्तः ॥ १७

तथा लोका मानुषा ये च दिव्याः
प्रजापतेश्चापि ये वै महान्तः ।
ते ते जिता देवराज्यं च कृत्स्नं
बृहस्पतिश्चेद्याजयेत्त्वां नरेन्द्र ॥ १८

संवर्त उवाच ।

मास्मानेवं त्वं पुनरागाः कथंचि-
द्बृहस्पतिं परिदातुं मरुत्ते ।
मा त्वां धक्ष्ये चक्षुषा दारुणेन
संक्रुद्धोऽहं पावक तन्निबोध ॥ १९

व्यास उवाच ।

ततो देवानगमद्धूमकेतु-
र्दाहाद्भीतो व्यथितोऽश्वत्थपर्णवत् ।
तं वै दृष्ट्वा प्राह शक्रो महात्मा
बृहस्पतेः संनिधौ हव्यवाहम् ॥ २०

यत्त्वं गतः प्रहितो जातवेदो

बृहस्पतिं परिदातुं मरुत्ते
तत्किं प्राह स नृपो यक्ष्यमाणः
कच्चिद्वचः प्रतिगृह्णाति तच्च ॥ २१

अग्निरुवाच ।

न ते वाचं रोचयते मरुत्तो
बृहस्पतेरञ्जलिं प्राहिणोत्सः ।
संवर्तो मां याजयितेत्यभीक्ष्णं
पुनः पुनः स मया प्रोच्यमानः ॥ २२
उवाचेदं मानुषा ये च दिव्याः
प्रजापतेर्ये च लोका महान्तः ।
तांश्चेल्लभेयं संविदं तेन कृत्वा
तथापि नेच्छेयमिति प्रतीतः ॥ २३

इन्द्र उवाच ।

पुनर्भवान्पार्थिवं तं समेत्य
वाक्यं मदीयं प्रापय स्वार्थयुक्तम् ।
पुनर्यद्युक्तो न करिष्यते वच-
स्ततो वज्रं संप्रहर्तास्मि तस्मै ॥ २४

अग्निरुवाच ।

गन्धर्वराड्यात्वयं तत्र दूतो
बिभेम्यहं वासव तत्र गन्तुम् ।
संरब्धो मामब्रवीत्तीक्ष्णरोषः
संवर्तो वाक्यं चरितब्रह्मचर्यः ॥ २५
यद्यागच्छेः पुनरेवं कथंचि-
द्बृहस्पतिं परिदातुं मरुत्ते ।
दहेयं त्वां चक्षुषा दारुणेन
संक्रुद्ध इत्येतदवैहि शक्र ॥ २६

इन्द्र उवाच ।

त्वमेवान्यान्दहसे जातवेदो
न हि त्वदन्यो विद्यते भस्मकर्ता ।
त्वत्संस्पर्शात्सर्वलोको बिभे-
त्यश्रद्धेयं वदसे हव्यवाह ॥ २७

अग्निरुवाच ।

दिवं देवेन्द्र पृथिवीं चैव सर्वां
संवेष्टयेस्त्वं स्वबलेनैव शक्र ।
एवंविधस्येह सतस्तवासौ
कथं वृत्रस्त्रिदिवं प्राग्जहार ॥ २८

इन्द्र उवाच ।

न चण्डिका जङ्गमा नो करेणु-
र्न वारिसोमं प्रपिबामि वह्ने ।
न दुर्बले वै विसृजामि वज्रं
को मेऽसुखाय प्रहरेन्मनुष्यः ॥ २९
प्रव्राजयेयं कालकेयान्पृथिव्या-
मपाकर्षं दानवानन्तरिक्षात् ।
दिवः प्रह्रादमवसानमानयं
को मेऽसुखाय प्रहरेत मर्त्यः ॥ ३०

अग्निरुवाच ।

यत्र शर्यातिं च्यवनो याजयिष्य-
न्सहाश्विभ्यां सोममगृह्णदेकः ।
तं त्वं क्रुद्धः प्रत्यषेधीः पुरस्ता-
च्छर्यातियज्ञं स्मर तं महेन्द्र ॥ ३१
वज्रं गृहीत्वा च पुरंदर त्वं
संप्राहार्षीश्च्यवनस्यातिघोरम् ।
स ते विप्रः सह वज्रेण बाहु-
मपागृह्णात्तपसा जातमन्युः ॥ ३२
ततो रोषात्सर्वतो घोररूपं
सपत्नं ते जनयामास भूयः ।
मदं नामासुरं विश्वरूपं
यं त्वं दृष्ट्वा चक्षुषी संन्यमीलः ॥ ३३

हनुरेका जगतीस्था तथैका
दिवं गता महतो दानवस्य ।
सहस्रं दन्तानां शतयोजनानां
सुतीक्ष्णानां घोररूपं बभूव ॥ ३४
वृत्ताः स्थूला रजतस्तम्भवर्णा
दंष्ट्राश्चतस्रो द्वे शते योजनानाम् ।
स त्वां दन्तान्विदशन्नभ्यधाव-
ज्जिघांसया शूलमुद्यम्य घोरम् ॥ ३५
अपश्यस्त्वं तं तदा घोररूपं
सर्वे त्वन्ये ददृशुर्दर्शनीयम् ।
यस्माद्भीतः प्राञ्जलिस्त्वं महर्षि-
मागच्छेथाः शरणं दानवघ्न ॥ ३६
क्षत्रादेवं ब्रह्मबलं गरीयो
न ब्रह्मतः किंचिदन्यद्गरीयः ।
सोऽहं जानन्ब्रह्मतेजो यथाव-
न्न संवर्तं गन्तुमिच्छामि शक्र ॥ ३७

इति श्रीमहाभारते आश्वमेधिकपर्वणि
नवमोऽध्यायः ॥ ९ ॥

१०

इन्द्र उवाच ।

एवमेतद्ब्रह्मबलं गरीयो
न ब्रह्मतः किंचिदन्यद्गरीयः ।
आविक्षितस्य तु बलं न मृष्ये
वज्रमस्मै प्रहरिष्यामि घोरम् ॥ १
धृतराष्ट्र प्रहितो गच्छ मरुत्तं
संवर्तेन सहितं तं वदस्व ।
बृहस्पतिं त्वमुपशिक्षस्व राज-
न्वज्रं वा ते प्रहरिष्यामि घोरम् ॥ २

व्यास उवाच ।

ततो गत्वा धृतराष्ट्रो नरेन्द्रं
प्रोवाचेदं वचनं वासवस्य ।
गन्धर्वं मां धृतराष्ट्रं निबोध
त्वामागतं वक्तुकामं नरेन्द्र ॥ ३
ऐन्द्रं वाक्यं शृणु मे राजसिंह
यत्प्राह लोकाधिपतिर्महात्मा ।
बृहस्पतिं याजकं त्वं वृणीष्व
वज्रं वा ते प्रहरिष्यामि घोरम् ।
वचश्चेदेतन्न करिष्यसे मे
प्राहैतदेतावदचिन्त्यकर्मा ॥ ४

मरुत्त उवाच ।

त्वं चैवैतद्वेत्थ पुरंदरश्च
विश्वेदेवा वसवश्चाश्विनौ च ।
मित्रद्रोहे निष्कृतिर्वै यथैव
नास्तीति लोकेषु सदैव वादः ॥ ५
बृहस्पतिर्याजयिता महेन्द्रं
देवश्रेष्ठं वज्रभृतां वरिष्ठम् ।
संवर्तो मां याजयिताद्य राज-
न्न ते वाक्यं तस्य वा रोचयामि ॥ ६

गन्धर्व उवाच ।

घोरो नादः श्रूयते वासवस्य
नभस्तले गर्जतो राजसिंह ।
व्यक्तं वज्रं मोक्ष्यते ते महेन्द्रः
क्षेमं राजंश्चिन्त्यतामेष कालः ॥ ७

व्यास उवाच ।

इत्येवमुक्तो धृतराष्ट्रेण राजा
श्रुत्वा नादं नदतो वासवस्य ।
तपोनित्यं धर्मविदां वरिष्ठं
संवर्तं तं ज्ञापयामास कार्यम् ॥ ८

मरुत्त उवाच ।

इममश्मानं प्लवमानमारा-

दध्वा दूरं तेन न दृश्यतेऽद्य ।
प्रपद्येऽहं शर्म विप्रेन्द्र त्वत्तः
प्रयच्छ तस्मादभयं विप्रमुख्य ॥ ९
अयमायाति वै वज्री दिशो विद्योतयन्दश ।
अमानुषेण घोरेण सदस्यास्त्रासिता हि नः ॥१०

संवर्त उवाच ।

भयं शक्राद्व्येतु ते राजसिंह
प्रणोत्स्येऽहं भयमेतत्सुघोरम् ।
संस्तम्भिन्या विद्यया क्षिप्रमेव
मा भैस्त्वमस्माद्भव चापि प्रतीतः ॥ ११
अहं संस्तम्भयिष्यामि मा भैस्त्वं शक्रतो नृप ।
सर्वेषामेव देवानां क्षपितान्यायुधानि मे ॥ १२
दिशो वज्रं व्रजतां वायुरेतु
वर्षं भूत्वा निपततु काननेषु ।
आपः प्लवन्त्वन्तरिक्षे वृथा च
सौदामिनी दृश्यतां मा बिभस्त्वम् ॥ १३
अथो वह्निस्त्रातु वा सर्वतस्ते
कामं वर्षं वर्षतु वासवो वा ।
वज्रं तथा स्थापयतां च वायु-
र्महाघोरं प्लवमानं जलौघैः ॥ १४

मरुत्त उवाच ।

घोरः शब्दः श्रूयते वै महास्वनो
वज्रस्यैष सहितो मारुतेन
आत्मा हि मे प्रव्यथते मुहुर्मुहु-
र्न मे स्वास्थ्यं जायते चाद्य विप्र ॥ १५

संवर्त उवाच ।

वज्रादुग्राद्व्येतु भयं तवाद्य
वातो भूत्वा हन्मि नरेन्द्र वज्रम् ।
भयं त्यक्त्वा वरमन्यं वृणीष्व
कं ते कामं तपसा साधयामि ॥ १६

मरुत्त उवाच ।

इन्द्रः साक्षात्सहसाभ्येतु विप्र
हविर्यज्ञे प्रतिगृह्णातु चैव ।
स्वं स्वं धिष्ण्यं चैव जुषन्तु देवाः
सुतं सोमं प्रतिगृह्णन्तु चैव ॥ १७

संवर्त उवाच ।

अयमिन्द्रो हरिभिरायाति राज-
न्देवैः सर्वैः सहितः सोमपीथी ।
मन्त्राहूतो यज्ञमिमं मयाद्य
पश्यस्वैनं मन्त्रविस्रस्तकायम् ॥ १८

व्यास उवाच ।

ततो देवैः सहितो देवराजो
रथे युक्त्वा तान्हरीन्वाजिमुख्यान् ।
आयाद्यज्ञमधि राज्ञः पिपासु-
राविक्षितस्याप्रमेयस्य सोमम् ॥ १९
तमायान्तं सहितं देवसंघैः
प्रत्युद्ययौ सपुरोधा मरुत्तः ।
चक्रे पूजां देवराजाय चाग्र्यां
यथाशास्त्रं विधिवत्प्रीयमाणः ॥ २०

संवर्त उवाच ।

स्वागतं ते पुरुहूतेह विद्व-
न्यज्ञोऽद्यायं संनिहिते त्वयीन्द्र ।
शोशुभ्यते बलवृत्रघ्न भूयः
पिबस्व सोमं सुतमुद्यतं मया ॥ २१

मरुत्त उवाच ।

शिवेन मां पश्य नमश्च तेऽस्तु
प्राप्तो यज्ञः सफलं जीवितं मे ।
अयं यज्ञं कुरुते मे सुरेन्द्र.

बृहस्पतेरवरो जन्मना यः ॥ २२

इन्द्र उवाच ।

जानामि ते गुरुमेनं तपोधनं
बृहस्पतेरनुजं तिग्मतेजसम् ।
यस्याह्वानादागतोऽहं नरेन्द्र
प्रीतिर्मेऽद्य त्वयि मन्युः प्रनष्टः ॥ २३

संवर्त उवाच ।

यदि प्रीतस्त्वमसि वै देवराज
तस्मात्स्वयं शाधि यज्ञे विधानम् ।
स्वयं सर्वान्कुरु मार्गान्सुरेन्द्र
जानात्वयं सर्वलोकश्च देव ॥ २४

व्यास उवाच ।

एवमुक्तस्त्वाङ्गिरसेन शक्रः
समादिदेश स्वयमेव देवान् ।
सभाः क्रियन्तामावसथाश्च मुख्याः
सहस्रशश्चित्रभौमाः समृद्धाः ॥ २५
क्लृप्तस्थूणाः कुरुतारोहणानि
गन्धर्वाणामप्सरसां च शीघ्रम् ।
येषु नृत्येरन्नप्सरसः सहस्रशः
स्वर्गोद्देशः क्रियतां यज्ञवाटः ॥ २६
इत्युक्तास्ते चक्रुराशु प्रतीता
दिवौकसः शक्रवाक्यान्नरेन्द्र ।
ततो वाक्यं प्राह राजानमिन्द्रः
प्रीतो राजन्पूजयानो मरुत्तम् ॥ २७
एष त्वयाहमिह राजन्समेत्य
ये चाप्यन्ये तव पूर्वे नरेन्द्राः ।
सर्वाश्चान्या देवताः प्रीयमाणा
हविस्तुभ्यं प्रतिगृह्णन्तु राजन् ॥ २८
आग्नेयं वै लोहितमालभन्तां
वैश्वदेवं बहुरूपं विराजन् ।
नीलं चोक्षाणं मेध्यमभ्यालभन्तां
चलच्छिश्नं मत्प्रदिष्टं द्विजेन्द्राः ॥ २९
ततो यज्ञो ववृधे तस्य राज्ञो
यत्र देवाः स्वयमन्नानि जह्रुः ।
यस्मिञ्शक्रो ब्राह्मणैः पूज्यमानः
सदस्योऽभूद्धरिमान्देवराजः ॥ ३०
ततः संवर्तश्चित्यगतो महात्मा
यथा वह्निः प्रज्वलितो द्वितीयः ।
हवींष्युच्चैराह्वयन्देवसंघा-
ञ्जुहावाग्नौ मन्त्रवत्सुप्रतीतः ॥ ३१
ततः पीत्वा बलभित्सोममग्र्यं
ये चाप्यन्ये सोमपा वै दिवौकसः ।
सर्वेऽनुज्ञाताः प्रययुः पार्थिवेन
यथाजोषं तर्पिताः प्रीतिमन्तः ॥ ३२
ततो राजा जातरूपस्य राशी-
न्पदे पदे कारयामास हृष्टः ।
द्विजातिभ्यो विसृजन्भूरि वित्तं
रराज वित्तेश इवारिहन्ता ॥ ३३
ततो वित्तं विविधं संनिधाय
यथोत्साहं कारयित्वा च कोशम् ।
अनुज्ञातो गुरुणा संनिवृत्य
शशास गामखिलां सागरान्ताम् ॥ ३४
एवंगुणः संबभूवेह राजा
यस्य क्रतौ तत्सुवर्णं प्रभूतम् ।
तत्त्वं समादाय नरेन्द्र वित्तं
यजस्व देवांस्तर्पयानो विधानैः ॥ ३५

वैशंपायन उवाच ।

ततो राजा पाण्डवो हृष्टरूपः
श्रुत्वा वाक्यं सत्यवत्याः सुतस्य ।

मनश्चक्रे तेन वित्तेन यष्टुं
ततोऽमात्यैर्मन्त्रयामास भूयः ॥ ३६
इति श्रीमहाभारते आश्वमेधिकपर्वणि
दशमोऽध्यायः ॥ १० ॥

११

वैशंपायन उवाच ।

इत्युक्ते नृपतौ तस्मिन्व्यासेनाद्भुतकर्मणा ।
वासुदेवो महातेजास्ततो वचनमाददे ॥ १
तं नृपं दीनमनसं निहतज्ञातिबान्धवम् ।
उपप्लुतमिवादित्यं सधूममिव पावकम् ॥ २
निर्विण्णमनसं पार्थं ज्ञात्वा वृष्णिकुलोद्वहः ।
आश्वासयन्धर्मसुतं प्रवक्तुमुपचक्रमे ॥ ३

वासुदेव उवाच ।

सर्वं जिह्मं मृत्युपदमार्जवं ब्रह्मणः पदम् ।
एतावाञ्ज्ञानविषयः किं प्रलापः करिष्यति ॥ ४
नैव ते निष्ठितं कर्म नैव ते शत्रवो जिताः ।
कथं शत्रुं शरीरस्थमात्मानं नावबुध्यसे ॥ ५
अत्र ते वर्तयिष्यामि यथाधर्मं यथाश्रुतम् ।
इन्द्रस्य सह वृत्रेण यथा युद्धमवर्तत ॥ ६
वृत्रेण पृथिवी व्याप्ता पुरा किल नराधिप ।
दृष्ट्वा स पृथिवीं व्याप्तां गन्धस्य विषये हृते ।
धराहरणदुर्गन्धो विषयः समपद्यत ॥ ७
शतक्रतुश्चुकोपाथ गन्धस्य विषये हृते ।
वृत्रस्य स ततः क्रुद्धो वज्रं घोरमवासृजत् ॥ ८
स वध्यमानो वज्रेण पृथिव्यां भूरितेजसा ।
विवेश सहसैवापो जग्राह विषयं ततः ॥ ९
व्याप्तास्वथासु वृत्रेण रसे च विषये हृते ।
शतक्रतुरभिक्रुद्धस्तासु वज्रमवासृजत् ॥ १०
स वध्यमानो वज्रेण सलिले भूरितेजसा ।
विवेश सहसा ज्योतिर्जग्राह विषयं ततः ॥ ११
व्याप्ते ज्योतिषि वृत्रेण रूपेऽथ विषये हृते ।
शतक्रतुरभिक्रुद्धस्तत्र वज्रमवासृजत् ॥ १२
स वध्यमानो वज्रेण सुभृशं भूरितेजसा ।
विवेश सहसा वायुं जग्राह विषयं ततः ॥ १३
व्याप्ते वायौ तु वृत्रेण स्पर्शेऽथ विषये हृते ।
शतक्रतुरभिक्रुद्धस्तत्र वज्रमवासृजत् ॥ १४
स वध्यमानो वज्रेण तस्मिन्नमिततेजसा ।
आकाशमभिदुद्राव जग्राह विषयं ततः ॥ १५
आकाशे वृत्रभूते च शब्दे च विषये हृते ।
शतक्रतुरभिक्रुद्धस्तत्र वज्रमवासृजत् ॥ १६
स वध्यमानो वज्रेण तस्मिन्नमिततेजसा ।
विवेश सहसा शक्रं जग्राह विषयं ततः ॥ १७
तस्य वृत्रगृहीतस्य मोहः समभवन्महान् ।
रथंतरेण तं तात वसिष्ठः प्रत्यबोधयत् ॥ १८
ततो वृत्रं शरीरस्थं जघान भरतर्षभ ।
शतक्रतुरदृश्येन वज्रेणेतीह नः श्रुतम् ॥ १९
इदं धर्मरहस्यं च शक्रेणोक्तं महर्षिषु ।
ऋषिभिश्च मम प्रोक्तं तन्निबोध नराधिप ॥ २०
इति श्रीमहाभारते आश्वमेधिकपर्वणि
एकादशोऽध्यायः ॥ ११ ॥

१२

वासुदेव उवाच ।

द्विविधो जायते व्याधिः शारीरो मानसस्तथा ।
परस्परं तयोर्जन्म निर्द्वंद्वं नोपलभ्यते ॥ १
शरीरे जायते व्याधिः शारीरो नात्र संशयः ।
मानसो जायते व्याधिर्मनस्येवेति निश्चयः ॥ २
शीतोष्णे चैव वायुश्च गुणा राजञ्शरीरजाः ।
तेषां गुणानां साम्यं चेत्तदाहुः स्वस्थलक्षणम् ।
उष्णेन बाध्यते शीतं शीतेनोष्णं च बाध्यते ॥ ३
सत्त्वं रजस्तमश्चेति त्रयस्त्वात्मगुणाः स्मृताः ।

तेषां गुणानां साम्यं चेत्तदाहुः स्वस्थलक्षणम् ।
तेषामन्यतमोत्सेके विधानमुपदिश्यते ॥ ॥ ४
हर्षेण बाध्यते शोको हर्षः शोकेन बाध्यते ।
कश्चिद्दुःखे वर्तमानः सुखस्य स्मर्तुमिच्छति ।
कश्चित्सुखे वर्तमानो दुःखस्य स्मर्तुमिच्छति ॥ ५
स त्वं न दुःखी दुःखस्य न सुखी सुसुखस्य वा ।
स्मर्तुमिच्छसि कौन्तेय दिष्टं हि बलवत्तरम् ॥ ६
अथ वा ते स्वभावोऽयं येन पार्थावकृष्यसे ।
दृष्ट्वा सभागतां कृष्णामेकवस्त्रां रजस्वलाम् ।
मिषतां पाण्डवेयानां न तत्संस्मर्तुमिच्छसि ॥ ७
प्रव्राजनं च नगरादजिनैश्च विवासनम् ।
महारण्यनिवासश्च न तस्य स्मर्तुमिच्छसि ॥ ८
जटासुरात्परिक्लेशश्चित्रसेनेन चाहवः ।
सैन्धवाच्च परिक्लेशो न तस्य स्मर्तुमिच्छसि ॥ ९
पुनरज्ञातचर्यायां कीचकेन पदा वधः ।
याज्ञसेन्यास्तदा पार्थ न तस्य स्मर्तुमिच्छसि ॥१०
यच्च ते द्रोणभीष्माभ्यां युद्धमासीदरिंदम ।
मनसैकेन योद्धव्यं तत्ते युद्धमुपस्थितम् ।
तस्मादभ्युपगन्तव्यं युद्धाय भरतर्षभ ॥ ११
परमव्यक्तरूपस्य परं मुक्त्वा स्वकर्मभिः ।
यत्र नैव शरैः कार्यं न भृत्यैर्न च बन्धुभिः ।
आत्मनैकेन योद्धव्यं तत्ते युद्धमुपस्थितम् ॥ १२
तस्मिन्ननिर्जिते युद्धे कामवस्थां गमिष्यसि ।
एतज्ज्ञात्वा तु कौन्तेय कृतकृत्यो भविष्यसि ॥१३
एतां बुद्धिं विनिश्चित्य भूतानामागतिं गतिम् ।
पितृपैतामहे वृत्ते शाधि राज्यं यथोचितम् ॥ १४

इति श्रीमहाभारते आश्वमेधिकपर्वणि
द्वादशोऽध्यायः ॥ १२ ॥

१३

वासुदेव उवाच ।

न बाह्यं द्रव्यमुत्सृज्य सिद्धिर्भवति भारत ।
शारीरं द्रव्यमुत्सृज्य सिद्धिर्भवति वा न वा ॥ १
बाह्यद्रव्यविमुक्तस्य शारीरेषु च गृध्यतः ।
यो धर्मो यत्सुखं चैव द्विषतामस्तु तत्तथा ॥ २
द्व्यक्षरस्तु भवेन्मृत्युस्त्र्यक्षरं ब्रह्म शाश्वतम् ।
ममेति द्व्यक्षरो मृत्युर्न ममेति च शाश्वतम् ॥ ३
ब्रह्म मृत्युश्च तौ राजन्नात्मन्येव व्यवस्थितौ ।
अदृश्यमानौ भूतानि योधयेतामसंशयम् ॥ ४
अविनाशोऽस्य सत्त्वस्य नियतो यदि भारत ।
भित्त्वा शरीरं भूतानामहिंसां प्रतिपद्यते ॥ ५
लब्ध्वापि पृथिवीं सर्वां सहस्थावरजङ्गमाम् ।
ममत्वं यस्य नैव स्यात्किं तया स करिष्यति ॥ ६
अथ वा वसतः पार्थ वने वन्येन जीवतः ।
ममता यस्य द्रव्येषु मृत्योरास्ये स वर्तते ॥ ७
बाह्यान्तराणां शत्रूणां स्वभावं पश्य भारत ।
यन्न पश्यति तद्भूतं मुच्यते स महाभयात् ॥ ८
कामात्मानं न प्रशंसन्ति लोके
न चाकामात्काचिदस्ति प्रवृत्तिः ।
दानं हि वेदाध्ययनं तपश्च
कामेन कर्माणि च वैदिकानि ॥ ९
व्रतं यज्ञान्नियमान्ध्यानयोगा-
न्कामेन यो नारभते विदित्वा ।
यद्यद्ध्ययं कामयते स धर्मो
न यो धर्मो नियमस्तस्य मूलम् ॥ १०
अत्र गाथाः कामगीताः कीर्तयन्ति पुराविदः ।
शृणु संकीर्त्यमानास्ता निखिलेन युधिष्ठिर ॥ ११
नाहं शक्योऽनुपायेन हन्तुं भूतेन केनचित् ।
यो मां प्रयतते हन्तुं ज्ञात्वा प्रहरणे बलम् ।

तस्य तस्मिन्प्रहरणे पुनः प्रादुर्भवाम्यहम् ॥ १२
यो मां प्रयतते हन्तुं यज्ञैर्विविधदक्षिणैः ।
जङ्गमेष्विव कर्मात्मा पुनः प्रादुर्भवाम्यहम् ॥ १३
यो मां प्रयतते हन्तुं वेदैर्वेदान्तसाधनैः ।
स्थावरेष्विव शान्तात्मा तस्य प्रादुर्भवाम्यहम् ॥ १४
यो मां प्रयतते हन्तुं धृत्या सत्यपराक्रमः ।
भावो भवामि तस्याहं स च मां नावबुध्यते ॥ १५
यो मां प्रयतते हन्तुं तपसा संशितव्रतः ।
ततस्तपसि तस्याथ पुनः प्रादुर्भवाम्यहम् ॥ १६
यो मां प्रयतते हन्तुं मोक्षमास्थाय पण्डितः ।
तस्य मोक्षरतिस्थस्य नृत्यामि च हसामि च ।
अवध्यः सर्वभूतानामहमेकः सनातनः ॥ १७
तस्मात्त्वमपि तं कामं यज्ञैर्विविधदक्षिणैः ।
धर्मं कुरु महाराज तत्र मे स भविष्यति ॥ १८
यजस्व वाजिमेधेन विधिवद्दक्षिणावता ।
अन्यैश्च विविधैर्यज्ञैः समृद्धैराप्तदक्षिणैः ॥ १९
मा ते व्यथास्तु निहतान्बन्धून्वीक्ष्य पुनः पुनः ।
न शक्यास्ते पुनर्द्रष्टुं ये हतास्मिन्रणाजिरे ॥ २०
स त्वमिष्ट्वा महायज्ञैः समृद्धैराप्तदक्षिणैः ।
लोके कीर्तिं परां प्राप्य गतिमग्र्यां गमिष्यसि ॥

इति श्रीमहाभारते आश्वमेधिकपर्वणि
त्रयोदशोऽध्यायः ॥ १३ ॥

१४

वैशंपायन उवाच ।

एवं बहुविधैर्वाक्यैर्मुनिभिस्तैस्तपोधनैः ।
समाश्वस्यत राजर्षिर्हतबन्धुर्युधिष्ठिरः ॥ १
सोऽनुनीतो भगवता विष्टरश्रवसा स्वयम् ।
द्वैपायनेन कृष्णेन देवस्थानेन चाभिभूः ॥ २
नारदेनाथ भीमेन नकुलेन च पार्थिवः ।
कृष्णया सहदेवेन विजयेन च धीमता ॥ ३
अन्यैश्च पुरुषव्याघ्रैर्ब्राह्मणैः शास्त्रदृष्टिभिः ।
व्यजहाच्छोकजं दुःखं संतापं चैव मानसम् ॥ ४
अर्चयामास देवांश्च ब्राह्मणांश्च युधिष्ठिरः ।
कृत्वाथ प्रेतकार्याणि बन्धूनां स पुनर्नृपः ।
अन्वशासत धर्मात्मा पृथिवीं सागराम्बराम् ॥ ५
प्रशान्तचेताः कौरव्यः स्वराज्यं प्राप्य केवलम् ।
व्यासं च नारदं चैव तांश्चान्यानब्रवीन्नृपः ॥ ६
आश्वासितोऽहं प्राग्वृद्धैर्भवद्भिर्मुनिपुंगवैः ।
न सूक्ष्ममपि मे किंचिद्व्यलीकमिह विद्यते ॥ ७
अर्थश्च सुमहान्प्राप्तो येन यक्ष्यामि देवताः ।
पुरस्कृत्येह भवतः समानेष्यामहे मखम् ॥ ८
हिमवन्तं त्वया गुप्ता गमिष्यामः पितामह ।
बह्वाश्चर्यो हि देशः स श्रूयते द्विजसत्तम ॥ ९
तथा भगवता चित्रं कल्याणं बहु भाषितम् ।
देवर्षिणा नारदेन देवस्थानेन चैव ह ॥ १०
नाभागधेयः पुरुषः कश्चिदेवंविधान्गुरून् ।
लभते व्यसनं प्राप्य सुहृदः साधुसंमतान् ॥ ११
एवमुक्तास्तु ते राज्ञा सर्व एव महर्षयः ।
अभ्यनुज्ञाप्य राजानं तथोभौ कृष्णफल्गुनौ ।
पश्यतामेव सर्वेषां तत्रैवादर्शनं ययुः ॥ १२
ततो धर्मसुतो राजा तत्रैवोपाविशत्प्रभुः ।
एवं नातिमहान्कालः स तेषामभ्यवर्तत ॥ १३
कुर्वतां शौचकर्माणि भीष्मस्य निधने तदा ।
महादानानि विप्रेभ्यो ददतामौर्ध्वदैहिकम् ॥ १४
भीष्मकर्णपुरोगाणां कुरूणां कुरुनन्दन ।
सहितो धृतराष्ट्रेण प्रददावौर्ध्वदैहिकम् ॥ १५
ततो दत्त्वा बहु धनं विप्रेभ्यः पाण्डवर्षभः ।
धृतराष्ट्रं पुरस्कृत्य विवेश गजसाह्वयम् ॥ १६
स समाश्वास्य पितरं प्रज्ञाचक्षुषमीश्वरम् ।

अन्वशाद्वै स धर्मात्मा पृथिवीं भ्रातृभिः सह ॥१७

इति श्रीमहाभारते आश्वमेधिकपर्वणि
चतुर्दशोऽध्यायः ॥ १४ ॥

१५

जनमेजय उवाच ।

विजिते पाण्डवेयैस्तु प्रशान्ते च द्विजोत्तम ।
राष्ट्रे किं चक्रतुर्वीरौ वासुदेवधनंजयौ ॥ १

वैशंपायन उवाच ।

विजिते पाण्डवेयैस्तु प्रशान्ते च विशां पते ।
राष्ट्रे बभूवतुर्हृष्टौ वासुदेवधनंजयौ ॥ २
विजह्राते मुदा युक्तौ दिवि देवेश्वराविव ।
तौ वनेषु विचित्रेषु पर्वतानां च सानुषु ॥ ३
शैलेषु रमणीयेषु पल्वलेषु नदीषु च ।
चङ्क्रम्यमाणौ संहृष्टावश्विनाविव नन्दने ॥ ४
इन्द्रप्रस्थे महात्मानौ रेमाते कृष्णपाण्डवौ ।
प्रविश्य तां सभां रम्यां विजह्राते च भारत ॥ ५
तत्र युद्धकथाश्चित्राः परिक्लेशांश्च पार्थिव ।
कथायोगे कथायोगे कथयामासतुस्तदा ॥ ६
ऋषीणां देवतानां च वंशांस्तावाहतुस्तदा ।
प्रीयमाणौ महात्मानौ पुराणावृषिसत्तमौ ॥ ७
मधुरास्तु कथाश्चित्राश्चित्रार्थपदनिश्चयाः ।
निश्चयज्ञः स पार्थाय कथयामास केशवः ॥ ८
पुत्रशोकाभिसंतप्तं ज्ञातीनां च सहस्रशः ।
कथाभिः शमयामास पार्थं शौरिर्जनार्दनः ॥ ९
स तमाश्वास्य विधिवद्विधानज्ञो महातपाः ।
अपहृत्यात्मनो भारं विशश्रामेव सात्वतः ॥ १०
ततः कथान्ते गोविन्दो गुडाकेशमुवाच ह ।
सान्त्वयञ्श्लक्ष्णया वाचा हेतुयुक्तमिदं वचः ॥११
विजितेयं धरा कृत्स्ना सव्यसाचिन्परंतप ।
तद्बाहुबलमाश्रित्य राज्ञा धर्मसुतेन ह ॥ १२
असपत्नां महीं भुङ्क्ते धर्मराजो युधिष्ठिरः ।
भीमसेनप्रभावेन यमयोश्च नरोत्तम ॥ १३
धर्मेण राज्ञा धर्मज्ञ प्राप्तं राज्यमकण्टकम् ।
धर्मेण निहतः संख्ये स च राजा सुयोधनः ॥१४
अधर्मरुचयो लुब्धाः सदा चाप्रियवादिनः ।
धार्तराष्ट्रा दुरात्मानः सानुबन्धा निपातिताः ॥१५
प्रशान्तामखिलां पार्थ पृथिवीं पृथिवीपतिः ।
भुङ्क्ते धर्मसुतो राजा त्वया गुप्तः कुरूद्वह ॥ १६
रमे चाहं त्वया सार्धमरण्येष्वपि पाण्डव ।
किमु यत्र जनोऽयं वै पृथा चामित्रकर्शन ॥ १७
यत्र धर्मसुतो राजा यत्र भीमो महाबलः ।
यत्र माद्रवतीपुत्रौ रतिस्तत्र परा मम ॥ १८
तथैव स्वर्गकल्पेषु सभोद्देशेषु भारत ।
रमणीयेषु पुण्येषु सहितस्य त्वयानघ ॥ १९
कालो महांस्त्वतीतो मे शूरपुत्रमपश्यतः ।
बलदेवं च कौरव्य तथान्यान्वृष्णिपुंगवान् ॥ २०
सोऽहं गन्तुमभीप्सामि पुरीं द्वारवतीं प्रति ।
रोचतां गमनं मह्यं तवापि पुरुषर्षभ ॥ २१
उक्तो बहुविधं राजा तत्र तत्र युधिष्ठिरः ।
स ह भीष्मेण यद्युक्तमस्माभिः शोककारिते ॥२२
शिष्टो युधिष्ठिरोऽस्माभिः शास्ता सन्नपि पाण्डवः ।
तेन तच्च वचः सम्यग्गृहीतं सुमहात्मना ॥ २३
धर्मपुत्रे हि धर्मज्ञे कृतज्ञे सत्यवादिनि ।
सत्यं धर्मो मतिश्चाग्र्या स्थितिश्च सततं स्थिरा ॥
तद्गत्वा तं महात्मानं यदि ते रोचतेऽर्जुन ।
अस्मद्गमनसंयुक्तं वचो ब्रूहि जनाधिपम् ॥ २५
न हि तस्याप्रियं कुर्यां प्राणत्यागेऽप्युपस्थिते ।
कुतो गन्तुं महाबाहो पुरीं द्वारवतीं प्रति ॥ २६
सर्वं त्विदमहं पार्थ त्वत्प्रीतिहितकाम्यया ।
ब्रवीमि सत्यं कौरव्य न मिथ्यैतत्कथंचन ॥ २७

प्रयोजनं च निर्वृत्तमिह वासे ममार्जुन ।
धार्तराष्ट्रो हतो राजा सबलः सपदानुगः ॥ २८
पृथिवी च वशे तात धर्मपुत्रस्य धीमतः ।
स्थिता समुद्रवसना सशैलवनकानना ।
चिता रत्नैर्बहुविधैः कुरुराजस्य पाण्डव ॥ २९
धर्मेण राजा धर्मज्ञः पातु सर्वां वसुंधराम् ।
उपास्यमानो बहुभिः सिद्धैश्चापि महात्मभिः ।
स्तूयमानश्च सततं बन्दिभिर्भरतर्षभ ॥ ३०
तन्मया सह गत्वाद्य राजानं कुरुवर्धनम् ।
आपृच्छ कुरुशार्दूल गमनं द्वारकां प्रति ॥ ३१

इदं शरीरं वसु यच्च मे गृहे
निवेदितं पार्थ सदा युधिष्ठिरे ।
प्रियश्च मान्यश्च हि मे युधिष्ठिरः
सदा कुरूणामधिपो महामतिः ॥ ३२
प्रयोजनं चापि निवासकारणे
न विद्यते मे त्वदृते महाभुज ।
स्थिता हि पृथ्वी तव पार्थ शासने
गुरोः सुवृत्तस्य युधिष्ठिरस्य ह ॥ ३३
इतीदमुक्तं स तदा महात्मना
जनार्दनेनामितविक्रमोऽर्जुनः ।
तथेति कृच्छ्रादिव वाचमीरय-
ञ्जनार्दनं संप्रतिपूज्य पार्थिव ॥ ३४

इति श्रीमहाभारते आश्वमेधिकपर्वणि
पञ्चदशोऽध्यायः ॥ १५ ॥

१६

जनमेजय उवाच ।

सभायां वसतोस्तस्यां निहत्यारीन्महात्मनोः ।
केशवार्जुनयोः का नु कथा समभवद्द्विज ॥ १

वैशंपायन उवाच ।

कृष्णेन सहितः पार्थः स्वराज्यं प्राप्य केवलम् ।
तस्यां सभायां रम्यायां विजहार मुदा युतः ॥ २
ततः कंचित्सभोद्देशं स्वर्गोद्देशसमं नृप ।
यदृच्छया तौ मुदितौ जग्मतुः स्वजनावृतौ ॥ ३
ततः प्रतीतः कृष्णेन सहितः पाण्डवोऽर्जुनः ।
निरीक्ष्य तां सभां रम्यामिदं वचनमब्रवीत् ॥ ४
विदितं ते महाबाहो संग्रामे समुपस्थिते ।
माहात्म्यं देवकीमातस्तच्च ते रूपमैश्वरम् ॥ ५
यत्तु तद्भवता प्रोक्तं तदा केशव सौहृदात् ।
तत्सर्वं पुरुषव्याघ्र नष्टं मे नष्टचेतसः ॥ ६
मम कौतूहलं त्वस्ति तेष्वर्थेषु पुनः प्रभो ।
भवांश्च द्वारकां गन्ता नचिरादिव माधव ॥ ७
एवमुक्तस्ततः कृष्णः फल्गुनं प्रत्यभाषत ।
परिष्वज्य महातेजा वचनं वदतां वरः ॥ ८
श्रावितस्त्वं मया गुह्यं ज्ञापितश्च सनातनम् ।
धर्मं स्वरूपिणं पार्थ सर्वलोकांश्च शाश्वतान् ॥ ९
अबुद्ध्या यन्न गृह्णीथास्तन्मे सुमहदप्रियम् ।
नूनमश्रद्दधानोऽसि दुर्मेधाश्चासि पाण्डव ॥ १०
स हि धर्मः सुपर्याप्तो ब्रह्मणः पदवेदने ।
न शक्यं तन्मया भूयस्तथा वक्तुमशेषतः ॥ ११
परं हि ब्रह्म कथितं योगयुक्तेन तन्मया ।
इतिहासं तु वक्ष्यामि तस्मिन्नर्थे पुरातनम् ॥ १२
यथा तां बुद्धिमास्थाय गतिमग्र्यां गमिष्यसि ।
शृणु धर्मभृतां श्रेष्ठ गदतः सर्वमेव मे ॥ १३
आगच्छद्ब्राह्मणः कश्चित्स्वर्गलोकादरिंदम ।
ब्रह्मलोकाच्च दुर्धर्षः सोऽस्माभिः पूजितोऽभवत् ॥
अस्माभिः परिपृष्टश्च यदाह भरतर्षभ ।
दिव्येन विधिना पार्थ तच्छृणुष्वाविचारयन् ॥१५

ब्राह्मण उवाच ।

मोक्षधर्मं समाश्रित्य कृष्ण यन्मानुपृच्छसि ।
भूतानामनुकम्पार्थं यन्मोहच्छेदनं प्रभो ॥ १६

तत्तेऽहं संप्रवक्ष्यामि यथावन्मधुसूदन ।
शृणुष्वावहितो भूत्वा गदतो मम माधव ॥ १७
कश्चिद्विप्रस्तपोयुक्तः काश्यपो धर्मवित्तमः ।
आससाद द्विजं कंचिद्धर्माणामागतागमम् ॥ १८
गतागते सुबहुशो ज्ञानविज्ञानपारगम् ।
लोकतत्त्वार्थकुशलं ज्ञातारं सुखदुःखयोः ॥ १९
जातीमरणतत्त्वज्ञं कोविदं पुण्यपापयोः
द्रष्टारमुच्चनीचानां कर्मभिर्देहिनां गतिम् ॥ २०
चरन्तं मुक्तवत्सिद्धं प्रशान्तं संयतेन्द्रियम् ।
दीप्यमानं श्रिया ब्राह्म्या क्रममाणं च सर्वशः ॥
अन्तर्धानगतिज्ञं च श्रुत्वा तत्त्वेन काश्यपः ।
तथैवान्तर्हितैः सिद्धैर्यान्तं चक्रधरैः सह ॥ २२
संभाषमाणमेकान्ते समासीनं च तैः सह ।
यदृच्छया च गच्छन्तमसक्तं पवनं यथा ॥ २३
तं समासाद्य मेधावी स तदा द्विजसत्तमः ।
चरणौ धर्मकामो वै तपस्वी सुसमाहितः ।
प्रतिपेदे यथान्यायं भक्त्या परमया युतः ॥ २४
विस्मितश्चाद्भुतं दृष्ट्वा काश्यपस्तं द्विजोत्तमम् ।
परिचारेण महता गुरुं वैद्यमतोषयत् ॥ २५
प्रीतात्मा चोपपन्नश्च श्रुतचारित्रसंयुतः ।
भावेन तोषयच्चैनं गुरुवृत्त्या परंतपः ॥ २६
तस्मै तुष्टः स शिष्याय प्रसन्नोऽथाब्रवीद्गुरुः ।
सिद्धिं परामभिप्रेक्ष्य शृणु तन्मे जनार्दन ॥ २७
विविधैः कर्मभिस्तात पुण्ययोगैश्च केवलैः ।
गच्छन्तीह गतिं मर्त्या देवलोकेऽपि च स्थितिम् ॥
न क्वचित्सुखमत्यन्तं न क्वचिच्छाश्वती स्थितिः ।
स्थानाच्च महतो भ्रंशो दुःखलब्धात्पुनः पुनः ॥२९
अशुभा गतयः प्राप्ताः कष्टा मे पापसेवनात् ।
काममन्युपरीतेन तृष्णया मोहितेन च ॥ ३०
पुनः पुनश्च मरणं जन्म चैव पुनः पुनः ।
आहारा विविधा भुक्ताः पीता नानाविधाः स्तनाः ॥
मातरो विविधा दृष्टाः पितरश्च पृथग्विधाः ।
सुखानि च विचित्राणि दुःखानि च मयानघ ॥
प्रियैर्विवासो बहुशः संवासश्चाप्रियैः सह ।
धननाशश्च संप्राप्तो लब्ध्वा दुःखेन तद्धनम् ॥ ३३
अवमानाः सुकष्टाश्च परतः स्वजनात्तथा ।
शारीरा मानसाश्चापि वेदना भृशदारुणाः ॥ ३४
प्राप्ता विमाननाश्चोग्रा वधबन्धाश्च दारुणाः ।
पतनं निरये चैव यातनाश्च यमक्षये ॥ ३५
जरा रोगाश्च सततं वासनानि च भूरिशः ।
लोकेऽस्मिन्ननुभूतानि द्वंद्वजानि भृशं मया ॥ ३६
ततः कदाचिन्निर्वेदान्निकारान्निकृतेन च ।
लोकतन्त्रं परित्यक्तं दुःखार्तेन भृशं मया ।
ततः सिद्धिरियं प्राप्ता प्रसादादात्मनो मया ॥ ३७
नाहं पुनरिहागन्ता लोकानालोकयाम्यहम् ।
आ सिद्धेरा प्रजासर्गादात्मनो मे गतिः शुभा ॥
उपलब्धा द्विजश्रेष्ठ तथेयं सिद्धिरुत्तमा ।
इतः परं गमिष्यामि ततः परतरं पुनः ।
ब्रह्मणः पदमव्यग्रं मा ते भूदत्र संशयः ॥ ३९
नाहं पुनरिहागन्ता मर्त्यलोकं परंतप ।
प्रीतोऽस्मि ते महाप्राज्ञ ब्रूहि किं करवाणि ते ॥४०
यदीप्सुरुपपन्नस्त्वं तस्य कालोऽयमागतः ।
अभिजाने च तदहं यदर्थं मा त्वमागतः ।
अचिरात्तु गमिष्यामि येनाहं त्वामचूचुदम् ॥ ४१
भृशं प्रीतोऽस्मि भवतश्चारित्रेण विचक्षण ।
परिपृच्छ यावद्भवते भाषेयं यत्तवेप्सितम् ॥ ४२
बहु मन्ये च ते बुद्धिं भृशं संपूजयामि च ।
येनाहं भवता बुद्धो मेधावी ह्यसि काश्यप ॥ ४३

इति श्रीमहाभारते आश्वमेधिकपर्वणि
षोडशोऽध्यायः ॥ १६ ॥

१७

वासुदेव उवाच ।

ततस्तस्योपसंगृह्य पादौ प्रश्नान्सुदुर्वचान् ।
पप्रच्छ तांश्च सर्वान्स प्राह धर्मभृतां वरः ॥ १

काश्यप उवाच ।

कथं शरीरं च्यवते कथं चैवोपपद्यते ।
कथं कष्टाच्च संसारात्संसरन्परिमुच्यते ॥ २
आत्मानं वा कथं युक्त्वा तच्छरीरं विमुञ्चति ।
शरीरतश्च निर्मुक्तः कथमन्यत्प्रपद्यते ॥ ३
कथं शुभाशुभे चायं कर्मणी स्वकृते नरः ।
उपभुङ्क्ते क्व वा कर्म विदेहस्योपतिष्ठति ॥ ४

ब्राह्मण उवाच ।

एवं संचोदितः सिद्धः प्रश्नांस्तान्प्रत्यभाषत ।
आनुपूर्व्येण वार्ष्णेय यथा तन्मे वचः शृणु ॥ ५

सिद्ध उवाच ।

आयुःकीर्तिकराणीह यानि कर्माणि सेवते ।
शरीरग्रहणेऽन्यस्मिंस्तेषु क्षीणेषु सर्वशः ॥ ६
आयुःक्षयपरीतात्मा विपरीतानि सेवते ।
बुद्धिर्व्यावर्तते चास्य विनाशे प्रत्युपस्थिते ॥ ७
सत्त्वं बलं च कालं चाप्यविदित्वात्मनस्तथा ।
अतिवेलमुपाश्नाति तैर्विरुद्धान्यनात्मवान् ॥ ८
यदायमतिकष्टानि सर्वाण्युपनिषेवते ।
अत्यर्थमपि वा भुङ्क्ते न वा भुङ्क्ते कदाचन ॥ ९
दुष्टान्नं विषमान्नं च सोऽन्योन्येन विरोधि च ।
गुरु वापि समं भुङ्क्ते नातिजीर्णेऽपि वा पुनः ॥ १०
व्यायाममतिमात्रं वा व्यवायं चोपसेवते ।
सततं कर्मलोभाद्वा प्राप्तं वेगविधारणम् ॥ ११
रसाभियुक्तमन्नं वा दिवास्वप्नं निषेवते ।
अपक्वानागते काले स्वयं दोषान्प्रकोपयन् ॥ १२
स्वदोषकोपनाद्रोगं लभते मरणान्तिकम् ।
अथ चोद्बन्धनादीनि परीतानि व्यवस्यति ॥ १३
तस्य तैः कारणैर्जन्तोः शरीराच्च्यवते यथा ।
जीवितं प्रोच्यमानं तद्यथावदुपधारय ॥ १४
ऊष्मा प्रकुपितः काये तीव्रवायुसमीरितः ।
शरीरमनुपर्येति सर्वान्प्राणान्रुणद्धि वै ॥ १५
अत्यर्थं बलवानूष्मा शरीरे परिकोपितः ।
भिनत्ति जीवस्थानानि तानि मर्माणि विद्धि च ॥
ततः सवेदनः सद्यो जीवः प्रच्यवते क्षरन् ।
शरीरं त्यजते जन्तुश्छिद्यमानेषु मर्मसु ।
वेदनाभिः परीतात्मा तद्विद्धि द्विजसत्तम ॥ १७
जातीमरणसंविग्नाः सततं सर्वजन्तवः ।
दृश्यन्ते संत्यजन्तश्च शरीराणि द्विजर्षभ ॥ १८
गर्भसंक्रमणे चापि मर्मणामतिसर्पणे ।
तादृशीमेव लभते वेदनां मानवः पुनः ॥ १९
भिन्नसंधिरथ क्लेदमद्भिः स लभते नरः ।
यथा पञ्चसु भूतेषु संश्रितत्वं निगच्छति ।
शैत्यात्प्रकुपितः काये तीव्रवायुसमीरितः ॥ २०
यः स पञ्चसु भूतेषु प्राणापाने व्यवस्थितः ।
स गच्छत्यूर्ध्वगो वायुः कृच्छ्रान्मुक्त्वा शरीरिणम् ॥
शरीरं च जहात्येव निरुच्छ्वासश्च दृश्यते ।
निरूष्मा स निरुच्छ्वासो निःश्रीको गतचेतनः ॥ २२
ब्रह्मणा संपरित्यक्तो मृत इत्युच्यते नरः ।
स्रोतोभिर्यैर्विजानाति इन्द्रियार्थाञ्शरीरभृत् ।
तैरेव न विजानाति प्राणमाहारसंभवम् ॥ २३
तत्रैव कुरुते काये यः स जीवः सनातनः ।
तेषां यद्यद्भवेद्युक्तं संनिपाते क्वचित्क्वचित् ।
तत्तन्मर्म विजानीहि शास्त्रदृष्टं हि तत्तथा ॥ २४
तेषु मर्मसु भिन्नेषु ततः स समुदीरयन् ।
आविश्य हृदयं जन्तोः सत्त्वं चाशु रुणद्धि वै ।

ततः स चेतनो जन्तुर्नाभिजानाति किंचन ।। २५
तमसा संवृतज्ञानः संवृतेष्वथ मर्मसु ।
स जीवो निरधिष्ठानश्चाल्यते मातरिश्वना ।। २६
ततः स तं महोच्छ्वासं भृशमुच्छ्वस्य दारुणम् ।
निष्क्रामन्कम्पयत्याशु तच्छरीरमचेतनम् ।। २७
स जीवः प्रच्युतः कायात्कर्मभिः स्वैः समावृतः ।
अङ्कितः स्वैः शुभैः पुण्यैः पापैर्वाप्युपपद्यते ।। २८
ब्राह्मणा ज्ञानसंपन्ना यथावच्छ्रुतनिश्चयाः ।
इतरं कृतपुण्यं वा तं विजानन्ति लक्षणैः ।। २९
यथान्धकारे खद्योतं लीयमानं ततस्ततः ।
चक्षुष्मन्तः प्रपश्यन्ति तथा तं ज्ञानचक्षुषः ।।३०
पश्यन्त्येवंविधाः सिद्धा जीवं दिव्येन चक्षुषा ।
च्यवन्तं जायमानं च योनिं चानुप्रवेशितम् ।।३१
तस्य स्थानानि दृष्टानि त्रिविधानीह शास्त्रतः ।
कर्मभूमिरियं भूमिर्यत्र तिष्ठन्ति जन्तवः ।। ३२
ततः शुभाशुभं कृत्वा लभन्ते सर्वदेहिनः ।
इहैवोच्चावचान्भोगान्प्राप्नुवन्ति स्वकर्मभिः ।। ३३
इहैवाशुभकर्मा तु कर्मभिर्निरयं गतः ।
अवाक्स निरये पापो मानवः पच्यते भृशम् ।
तस्मात्सुदुर्लभो मोक्ष आत्मा रक्ष्यो भृशं ततः ।।३४
ऊर्ध्वं तु जन्तवो गत्वा येषु स्थानेष्ववस्थिताः ।
कीर्त्यमानानि तानीह तत्त्वतः संनिबोध मे ।
तच्छ्रुत्वा नैष्ठिकीं बुद्धिं बुद्ध्येथाः कर्मनिश्चयात् ।।
तारारूपाणि सर्वाणि यच्चैतच्चन्द्रमण्डलम् ।
यच्च विभ्राजते लोके स्वभासा सूर्यमण्डलम् ।
स्थानान्येतानि जानीहि नराणां पुण्यकर्मणाम् ।।३६
कर्मक्षयाच्च ते सर्वे च्यवन्ते वै पुनः पुनः ।
तत्रापि च विशेषोऽस्ति दिवि नीचोच्चमध्यमः ।।
न तत्राप्यस्ति संतोषो दृष्ट्वा दीप्ततरां श्रियम् ।
इत्येता गतयः सर्वाः पृथक्त्वे समुदीरिताः ।। ३८
उपपत्तिं तु गर्भस्य वक्ष्याम्यहमतः परम् ।
यथावत्तां निगदतः शृणुष्वावहितो द्विज ।। ३९

इति श्रीमहाभारते आश्वमेधिकपर्वणि
सप्तदशोऽध्यायः ।। १७ ।।

१८

ब्राह्मण उवाच ।

शुभानामशुभानां च नेह नाशोऽस्ति कर्मणाम् ।
प्राप्य प्राप्य तु पच्यन्ते क्षेत्रं क्षेत्रं तथा तथा ।। १
यथा प्रसूयमानस्तु फली दद्यात्फलं बहु ।
तथा स्याद्विपुलं पुण्यं शुद्धेन मनसा कृतम् ।। २
पापं चापि तथैव स्यात्पापेन मनसा कृतम् ।
पुरोधाय मनो हीह कर्मण्यात्मा प्रवर्तते ।। ३
यथा कर्मसमादिष्टं काममन्युसमावृतः ।
नरो गर्भं प्रविशति तच्चापि शृणु चोत्तरम् ।। ४
शुक्रं शोणितसंसृष्टं स्त्रिया गर्भाशयं गतम् ।
क्षेत्रं कर्मजमाप्नोति शुभं वा यदि वाशुभम् ।। ५
सौक्ष्म्यादव्यक्तभावाच्च न स क्वचन सज्जते ।
संप्राप्य ब्रह्मणः कायं तस्मात्तद्ब्रह्म शाश्वतम् ।
तद्बीजं सर्वभूतानां तेन जीवन्ति जन्तवः ।। ६
स जीवः सर्वगात्राणि गर्भस्याविश्य भागशः ।
दधाति चेतसा सद्यः प्राणस्थानेष्ववस्थितः ।
ततः स्पन्दयतेऽङ्गानि स गर्भश्चेतनान्वितः ।। ७
यथा हि लोहनिष्यन्दो निषिक्तो बिम्बविग्रहम् ।
उपैति तद्वज्जानीहि गर्भे जीवप्रवेशनम् ।। ८
लोहपिण्डं यथा वह्निः प्रविशत्यभितापयन् ।
तथा त्वमपि जानीहि गर्भे जीवोपपादनम् ।। ९
यथा च दीपः शरणं दीप्यमानः प्रकाशयेत् ।
एवमेव शरीराणि प्रकाशयति चेतना ।। १०
यद्यच्च कुरुते कर्म शुभं वा यदि वाशुभम् ।
पूर्वदेहकृतं सर्वमवश्यमुपभुज्यते ।। ११

ततस्तत्क्षीयते चैव पुनश्चान्यत्प्रचीयते ।
यावत्तन्मोक्षयोगस्थं धर्मं नैवावबुध्यते ॥ १२
तत्र धर्मं प्रवक्ष्यामि सुखी भवति येन वै ।
आवर्तमानो जातीषु तथान्योन्यासु सत्तम ॥ १३
दानं व्रतं ब्रह्मचर्यं यथोक्तव्रतधारणम् ।
दमः प्रशान्तता चैव भूतानां चानुकम्पनम् ॥ १४
संयमश्चानृशंस्यं च परस्वादानवर्जनम् ।
व्यलीकानामकरणं भूतानां यत्र सा भुवि ॥ १५
मातापित्रोश्च शुश्रूषा देवतातिथिपूजनम् ।
गुरुपूजा घृणा शौचं नित्यमिन्द्रियसंयमः ॥ १६
प्रवर्तनं शुभानां च तत्सतां वृत्तमुच्यते ।
ततो धर्मः प्रभवति यः प्रजाः पाति शाश्वतीः ॥
एवं सत्सु सदा पश्येत्तत्र ह्येषा ध्रुवा स्थितिः ।
आचारो धर्ममाचष्टे यस्मिन्सन्तो व्यवस्थिताः ॥
तेषु तद्धर्मनिक्षिप्तं यः स धर्मः सनातनः ।
यस्तं समभिपद्येत न स दुर्गतिमाप्नुयात् ॥ १९
अतो नियम्यते लोकः प्रमुह्य धर्मवर्त्मसु ।
यस्तु योगी च मुक्तश्च स एतेभ्यो विशिष्यते ॥
वर्तमानस्य धर्मेण पुरुषस्य यथा तथा ।
संसारतारणं ह्यस्य कालेन महता भवेत् ॥ २१
एवं पूर्वकृतं कर्म सर्वो जन्तुर्निषेवते ।
सर्वं तत्कारणं येन निकृतोऽयमिहागतः ॥ २२
शरीरग्रहणं चास्य केन पूर्वं प्रकल्पितम् ।
इत्येवं संशयो लोके तच्च वक्ष्याम्यतः परम् ॥ २३
शरीरमात्मनः कृत्वा सर्वभूतपितामहः ।
त्रैलोक्यमसृजद्ब्रह्मा कृत्स्नं स्थावरजङ्गमम् ॥ २४
ततः प्रधानमसृजच्चेतना सा शरीरिणाम् ।
यया सर्वमिदं व्याप्तं यां लोके परमां विदुः ॥२५
इह तत्क्षरमित्युक्तं परं त्वमृतमक्षरम् ।
त्रयाणां मिथुनं सर्वमेकैकस्य पृथक्पृथक् ॥ २६
असृजत्सर्वभूतानि पूर्वसृष्टः प्रजापतिः ।
स्थावराणि च भूतानि इत्येषा पौर्विकी श्रुतिः ॥२७
तस्य कालपरीमाणमकरोत्स पितामहः ।
भूतेषु परिवृत्तिं च पुनरावृत्तिमेव च ॥ २८
यथात्र कश्चिन्मेधावी दृष्टात्मा पूर्वजन्मनि ।
यत्प्रवक्ष्यामि तत्सर्वं यथावदुपपद्यते ॥ २९
सुखदुःखे सदा सम्यगनित्ये यः प्रपश्यति ।
कायं चामेध्यसंघातं विनाशं कर्मसंहितम् ॥ ३०
यच्च किंचित्सुखं तच्च सर्वं दुःखमिति स्मरन् ।
संसारसागरं घोरं तरिष्यति सुदुस्तरम् ॥ ३१
जातीमरणरोगैश्च समाविष्टः प्रधानवित् ।
चेतनावत्सु चैतन्यं समं भूतेषु पश्यति ॥ ३२
निर्विद्यते ततः कृत्स्नं मार्गमाणः परं पदम् ।
तस्योपदेशं वक्ष्यामि याथातथ्येन सत्तम ॥ ३३
शाश्वतस्याव्ययस्याथ पदस्य ज्ञानमुत्तमम् ।
प्रोच्यमानं मया विप्र निबोधेदमशेषतः ॥ ३४

इति श्रीमहाभारते आश्वमेधिकपर्वणि
अष्टादशोऽध्यायः ॥ १८ ॥

१९

ब्राह्मण उवाच ।

यः स्यादेकायने लीनस्तूष्णीं किंचिदचिन्तयन् ।
पूर्वं पूर्वं परित्यज्य स निरारम्भको भवेत् ॥ १
सर्वमित्रः सर्वसहः समरक्तो जितेन्द्रियः ।
व्यपेतभयमन्युश्च कामहा मुच्यते नरः ॥ २
आत्मवत्सर्वभूतेषु यश्चरेन्नियतः शुचिः ।
अमानी निरभीमानः सर्वतो मुक्त एव सः ॥ ३
जीवितं मरणं चोभे सुखदुःखे तथैव च ।
लाभालाभे प्रियद्वेष्ये यः समः स च मुच्यते ॥४
न कस्यचित्स्पृहयते नावजानाति किंचन ।
निर्द्वंद्वो वीतरागात्मा सर्वतो मुक्त एव सः ॥ ५

अनमित्रोऽथ निर्बन्धुरनपत्यश्च यः क्वचित् ।
त्यक्तधर्मार्थकामश्च निराकाङ्क्षी स मुच्यते ॥ ६
नैव धर्मी न चाधर्मी पूर्वोपचितहा च यः ।
धातुक्षयप्रशान्तात्मा निर्द्वंद्वः स विमुच्यते ॥ ७
अकर्मा चाविकाङ्क्षश्च पश्यञ्जगदशाश्वतम् ।
अस्वस्थमवशं नित्यं जन्मसंसारमोहितम् ॥ ८
वैराग्यबुद्धिः सततं तापदोषव्यपेक्षकः ।
आत्मबन्धविनिर्मोक्षं स करोत्यचिरादिव ॥ ९
अगन्धरसमस्पर्शमशब्दमपरिग्रहम् ।
अरूपमनभिज्ञेयं दृष्ट्वात्मानं विमुच्यते ॥ १०
पञ्चभूतगुणैर्हीनममूर्तिमदलेपकम् ।
अगुणं गुणभोक्तारं यः पश्यति स मुच्यते ॥ ११
विहाय सर्वसंकल्पान्बुद्ध्या शारीरमानसान् ।
शनैर्निर्वाणमाप्नोति निरिन्धन इवानलः ॥ १२
विमुक्तः सर्वसंस्कारैस्ततो ब्रह्म सनातनम् ।
परमाप्नोति संशान्तमचलं दिव्यमक्षरम् ॥ १३
अतः परं प्रवक्ष्यामि योगशास्त्रमनुत्तमम् ।
यज्ज्ञात्वा सिद्धमात्मानं लोके पश्यन्ति योगिनः ॥
तस्योपदेशं पश्यामि यथावत्तन्निबोध मे ।
यैर्द्वारैश्चारयन्नित्यं पश्यत्यात्मानमात्मनि ॥ १५
इन्द्रियाणि तु संहृत्य मन आत्मनि धारयेत् ।
तीव्रं तप्त्वा तपः पूर्वं ततो योक्तुमुपक्रमेत् ॥ १६
तपस्वी त्यक्तसंकल्पो दम्भाहंकारवर्जितः ।
मनीषी मनसा विप्रः पश्यत्यात्मानमात्मनि ॥१७
स चेच्छक्नोत्ययं साधुर्योक्तुमात्मानमात्मनि ।
तत एकान्तशीलः स पश्यत्यात्मानमात्मनि ॥ १८
संयतः सततं युक्त आत्मवान्विजितेन्द्रियः ।
तथायमात्मनात्मानं साधु युक्तः प्रपश्यति ॥ १९
यथा हि पुरुषः स्वप्ने दृष्ट्वा पश्यत्यसाविति ।
तथारूपमिवात्मानं साधु युक्तः प्रपश्यति ॥ २०
इषीकां वा यथा मुञ्जात्कश्चिन्निर्हृत्य दर्शयेत् ।
योगी निष्कृष्टमात्मानं तथा संपश्यते तनौ ॥ २१
मुञ्जं शरीरं तस्याहुरिषीकामात्मनि श्रिताम् ।
एतन्निदर्शनं प्रोक्तं योगविद्भिरनुत्तमम् ॥ २२
यदा हि युक्तमात्मानं सम्यक्पश्यति देहभृत् ।
तदास्य नेशते कश्चित्त्रैलोक्यस्यापि यः प्रभुः ॥२३
अन्योन्याश्चैव तनवो यथेष्टं प्रतिपद्यते ।
विनिवृत्य जरामृत्यू न हृष्यति न शोचति ॥ २४
देवानामपि देवत्वं युक्तः कारयते वशी ।
ब्रह्म चाव्ययमाप्नोति हित्वा देहमशाश्वतम् ॥ २५
विनश्यत्स्वपि लोकेषु न भयं तस्य जायते ।
क्लिश्यमानेषु भूतेषु न स क्लिश्यति केनचित् ॥२६
दुःखशोकमयैर्घोरैः सङ्गस्नेहसमुद्भवैः ।
न विचाल्येत युक्तात्मा निःस्पृहः शान्तमानसः ॥
नैनं शस्त्राणि विध्यन्ते न मृत्युश्चास्य विद्यते ।
नातः सुखतरं किंचिल्लोके क्वचन विद्यते ॥ २८
सम्यग्युक्त्वा यदात्मानमात्मन्येव प्रपश्यति ।
तदैव न स्पृहयते साक्षादपि शतक्रतोः ॥ २९
निर्वेदस्तु न गन्तव्यो युञ्जानेन कथंचन ।
योगमेकान्तशीलस्तु यथा युञ्जीत तच्छृणु ॥ ३०
दृष्टपूर्वां दिशं चिन्त्य यस्मिन्संनिवसेत्पुरे ।
पुरस्याभ्यन्तरे तस्य मनश्चार्यं न बाह्यतः ॥ ३१
पुरस्याभ्यन्तरे तिष्ठन्यस्मिन्नावसथे वसेत् ।
तस्मिन्नावसथे धार्यं सबाह्याभ्यन्तरं मनः ॥ ३२
प्रचिन्त्यावसथं कृत्स्नं यस्मिन्कायेऽवतिष्ठते ।
तस्मिन्काये मनश्चार्यं न कथंचन बाह्यतः ॥ ३३
संनियम्येन्द्रियग्रामं निर्घोषे निर्जने वने ।
कायमभ्यन्तरं कृत्स्नमेकाग्रः परिचिन्तयेत् ॥ ३४
दन्तांस्तालु च जिह्वां च गलं ग्रीवां तथैव च ।
हृदयं चिन्तयेच्चापि तथा हृदयबन्धनम् ॥ ३५

इत्युक्तः स मया शिष्यो मेधावी मधुसूदन ।
पप्रच्छ पुनरेवेमं मोक्षधर्मं सुदुर्वचम् ॥ ३६
भुक्तं भुक्तं कथमिदमन्नं कोष्ठे विपच्यते ।
कथं रसत्वं व्रजति शोणितं जायते कथम् ।
तथा मांसं च मेदश्च स्नाय्वस्थीनि च पोषति ॥ ३७
कथमेतानि सर्वाणि शरीराणि शरीरिणाम् ।
वर्धन्ते वर्धमानस्य वर्धते च कथं बलम् ।
निरोजसां निष्क्रमणं मलानां च पृथक् पृथक् ॥ ३८
कुतो वायं प्रश्वसिति उच्छ्वसित्यपि वा पुनः ।
कं च देशमधिष्ठाय तिष्ठत्यात्मायमात्मनि ॥ ३९
जीवः कायं वहति चेचेष्टयानः कलेवरम् ।
किंवर्णं कीदृशं चैव निवेशयति वै मनः ।
याथातथ्येन भगवन्वक्तुमर्हसि मेऽनघ ॥ ४०
इति संपरिपृष्टोऽहं तेन विप्रेण माधव ।
प्रत्यब्रुवं महाबाहो यथाश्रुतमरिंदम ॥ ४१
यथा स्वकोष्ठे प्रक्षिप्य कोष्ठं भाण्डमना भवेत् ।
तथा स्वकाये प्रक्षिप्य मनो द्वारैरनिश्चलैः ।
आत्मानं तत्र मार्गेत प्रमादं परिवर्जयेत् ॥ ४२
एवं सततमुद्युक्तः प्रीतात्मा नचिरादिव ।
आसादयति तद्ब्रह्म यद्दृष्ट्वा स्यात्प्रधानवित् ॥ ४३
न त्वसौ चक्षुषा ग्राह्यो न च सर्वैरपीन्द्रियैः ।
मनसैव प्रदीपेन महानात्मनि दृश्यते ॥ ४४
सर्वतःपाणिपादं तं सर्वतोक्षिशिरोमुखम् ।
जीवो निष्क्रान्तमात्मानं शरीरात्संप्रपश्यति ॥ ४५
स तदुत्सृज्य देहं स्वं धारयन्ब्रह्म केवलम् ।
आत्मानमालोकयति मनसा प्रहसन्निव ॥ ४६
इदं सर्वरहस्यं ते मयोक्तं द्विजसत्तम ।
आपृच्छे साधयिष्यामि गच्छ शिष्य यथासुखम् ॥
इत्युक्तः स तदा कृष्ण मया शिष्यो महातपाः ।
अगच्छत यथाकामं ब्राह्मणश्छिन्नसंशयः ॥ ४८

वासुदेव उवाच ।

इत्युक्त्वा स तदा वाक्यं मां पार्थ द्विजपुंगवः ।
मोक्षधर्माश्रितः सम्यक्तत्रैवान्तरधीयत ॥ ४९
कच्चिदेतत्त्वया पार्थ श्रुतमेकाग्रचेतसा ।
तदापि हि रथस्थस्त्वं श्रुतवानेतदेव हि ॥ ५०
नैतत्पार्थ सुविज्ञेयं व्यामिश्रेणेति मे मतिः ।
नरेणाकृतसंज्ञेन विदग्धेनाकृतात्मना ॥ ५१
सुरहस्यमिदं प्रोक्तं देवानां भरतर्षभ ।
कच्चिन्नेदं श्रुतं पार्थ मर्त्येनान्येन केनचित् ॥ ५२
न ह्येतच्छ्रोतुमर्होऽन्यो मनुष्यस्त्वामृतेऽनघ ।
नैतदद्य सुविज्ञेयं व्यामिश्रेणान्तरात्मना ॥ ५३
क्रियावद्भिर्हि कौन्तेय देवलोकः समावृतः ।
न चैतदिष्टं देवानां मर्त्यै रूपनिवर्तनम् ॥ ५४
परा हि सा गतिः पार्थ यत्तद्ब्रह्म सनातनम् ।
यत्रामृतत्वं प्राप्नोति त्यक्त्वा दुःखं सदा सुखी ॥
एवं हि धर्ममास्थाय येऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ॥
किं पुनर्ब्राह्मणाः पार्थ क्षत्रिया वा बहुश्रुताः ।
स्वधर्मरतयो नित्यं ब्रह्मलोकपरायणाः ॥ ५७
हेतुमच्चैतदुद्दिष्टमुपायाश्चास्य साधने ।
सिद्धेः फलं च मोक्षश्च दुःखस्य च विनिर्णयः ।
अतः परं सुखं त्वन्यत्किं नु स्याद्भरतर्षभ ॥ ५८
श्रुतवाञ्श्रद्दधानश्च पराक्रान्तश्च पाण्डव ।
यः परित्यजते मर्त्यो लोकतन्त्रमसारवत् ।
एतैरुपायैः स क्षिप्रं परां गतिमवाप्नुयात् ॥ ५९
एतावदेव वक्तव्यं नातो भूयोऽस्ति किंचन ।
षण्मासान्नित्ययुक्तस्य योगः पार्थ प्रवर्तते ॥ ६०

इति श्रीमहाभारते आश्वमेधिकपर्वणि
एकोनविंशोऽध्यायः ॥ १९ ॥

२०

वासुदेव उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
दंपत्योः पार्थ संवादमभयं नाम नामतः ॥ १
ब्राह्मणी ब्राह्मणं कंचिज्ज्ञानविज्ञानपारगम् ।
दृष्ट्वा विविक्त आसीनं भार्या भर्तारमब्रवीत् ॥ २
कं नु लोकं गमिष्यामि त्वामहं पतिमाश्रिता ।
न्यस्तकर्माणमासीनं कीनाशमविचक्षणम् ॥ ३
भार्याः पतिकृताँल्लोकानाप्नुवन्तीति नः श्रुतम् ।
त्वामहं पतिमासाद्य कां गमिष्यामि वै गतिम् ॥ ४
एवमुक्तः स शान्तात्मा तामुवाच हसन्निव ।
सुभगे नाभ्यसूयामि वाक्यस्यास्य तवानघे ॥ ५
ग्राह्यं दृश्यं च श्राव्यं च यदिदं कर्म विद्यते ।
एतदेव व्यवस्यन्ति कर्म कर्मेति कर्मिणः ॥ ६
मोहमेव नियच्छन्ति कर्मणा ज्ञानवर्जिताः ।
नैष्कर्म्यं न च लोकेऽस्मिन्मौर्तमित्युपलभ्यते ॥ ७
कर्मणा मनसा वाचा शुभं वा यदि वाशुभम् ।
जन्मादिमूर्तिभेदानां कर्म भूतेषु वर्तते ॥ ८
रक्षोभिर्वध्यमानेषु दृश्यद्रव्येषु कर्मसु ।
आत्मस्थमात्मना तेन दृष्टमायतनं मया ॥ ९
यत्र तद्ब्रह्म निर्द्वंद्वं यत्र सोमः सहाग्निना ।
व्यवायं कुरुते नित्यं धीरो भूतानि धारयन् ॥१०
यत्र ब्रह्मादयो युक्तास्तदक्षरमुपासते ।
विद्वांसः सुव्रता यत्र शान्तात्मानो जितेन्द्रियाः ॥
घ्राणेन न तदाघ्रेयं न तदाद्यं च जिह्वया ।
स्पर्शेन च न तत्स्पृश्यं मनसा त्वेव गम्यते ॥१२
चक्षुषा न विषह्यं च यत्किंचिच्छ्रवणात्परम् ।
अगन्धमरसस्पर्शमरूपाशब्दमव्ययम् ॥ १३
यतः प्रवर्तते तन्त्रं यत्र च प्रतितिष्ठति ।
प्राणोऽपानः समानश्च व्यानश्चोदान एव च ॥१४
तत एव प्रवर्तन्ते तमेव प्रविशन्ति च ।
समानव्यानयोर्मध्ये प्राणापानौ विचेरतुः ॥ १५
तस्मिन्सुप्ते प्रलीयेते समानो व्यान एव च ।
अपानप्राणयोर्मध्ये उदानो व्याप्य तिष्ठति ।
तस्माच्छयानं पुरुषं प्राणापानौ न मुञ्चतः ॥ १६
प्राणानायम्यते येन तमुदानं प्रचक्षते ।
तस्मात्तपो व्यवस्यन्ति तद्भवं ब्रह्मवादिनः ॥ १७
तेषामन्योन्यभक्षाणां सर्वेषां देहचारिणाम् ।
अग्निर्वैश्वानरो मध्ये सप्तधा विहितोऽन्तरा ॥ १८
घ्राणं जिह्वा च चक्षुश्च त्वक्च श्रोत्रं च पञ्चमम् ।
मनो बुद्धिश्च सप्तैता जिह्वा वैश्वानरार्चिषः ॥ १९
घ्रेयं पेयं च दृश्यं च स्पृश्यं श्रव्यं तथैव च ।
मन्तव्यमथ बोद्धव्यं ताः सप्त समिधो मम ॥२०
घ्राता भक्षयिता द्रष्टा स्प्रष्टा श्रोता च पञ्चमः ।
मन्ता बोद्धा च सप्तैते भवन्ति परमर्त्विजः ॥ २१
घ्रेये पेये च दृश्ये च स्पृश्ये श्रव्ये तथैव च ।
हवींष्यग्निषु होतारः सप्तधा सप्त सप्तसु ।
सम्यक्प्रक्षिप्य विद्वांसो जनयन्ति स्वयोनिषु ॥२२
पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमम् ।
मनो बुद्धिश्च सप्तैते योनिरित्येव शब्दिताः ॥२३
हविर्भूता गुणाः सर्वे प्रविशन्त्यग्निजं मुखम् ।
अन्तर्वासमुषित्वा च जायन्ते स्वासु योनिषु ।
तत्रैव च निरुध्यन्ते प्रलये भूतभावने ॥ २४
ततः संजायते गन्धस्ततः संजायते रसः ।
ततः संजायते रूपं ततः स्पर्शोऽभिजायते ॥ २५
ततः संजायते शब्दः संशयस्तत्र जायते ।
ततः संजायते निष्ठा जन्मैतत्सप्तधा विदुः ॥ २६
अनेनैव प्रकारेण प्रगृहीतं पुरातनैः ।

पूर्णाहुतिभिरापूर्णास्तेऽभिपूर्यन्ति तेजसा ॥ २७

इति श्रीमहाभारते आश्वमेधिकपर्वणि
विंशोऽध्यायः ॥ २० ॥

२१

ब्राह्मण उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
निबोध दशहोतॄणां विधानमिह यादृशम् ॥ १
सर्वमेवात्र विज्ञेयं चित्तं ज्ञानमवेक्षते ।
रेतः शरीरभृत्काये विज्ञाता तु शरीरभृत् ॥ २
शरीरभृद्गार्हपत्यस्तस्मादन्यः प्रणीयते ।
ततश्चाहवनीयस्तु तस्मिन्संक्षिप्यते हविः ॥ ३
ततो वाचस्पतिर्जज्ञे समानः पर्यवेक्षते ।
रूपं भवति वै व्यक्तं तदनुद्रवते मनः ॥ ४

ब्राह्मण्युवाच ।

कस्माद्वागभवत्पूर्वं कस्मात्पश्चान्मनोऽभवत् ।
मनसा चिन्तितं वाक्यं यदा समभिपद्यते ॥ ५
केन विज्ञानयोगेन मतिश्चित्तं समास्थिता ।
समुन्नीता नाध्यगच्छत्को वैनां प्रतिषेधति ॥ ६

ब्राह्मण उवाच ।

तामपानः पतिर्भूत्वा तस्मात्प्रेष्यत्यपानताम् ।
तां मतिं मनसः प्राहुर्मनस्तस्मादवेक्षते ॥ ७
प्रश्नं तु वाङ्मनसोर्मां यस्मात्त्वमनुपृच्छसि ।
तस्मात्ते वर्तयिष्यामि तयोरेव समाह्वयम् ॥ ८
उभे वाङ्मनसी गत्वा भूतात्मानमपृच्छताम् ।
आवयोः श्रेष्ठमाचक्ष्व छिन्धि नौ संशयं विभो ॥
मन इत्येव भगवांस्तदा प्राह सरस्वतीम् ।
अहं वै कामधुक्तुभ्यमिति तं प्राह वागथ ॥ १०
स्थावरं जङ्गमं चैव विद्ध्युभे मनसी मम ।
स्थावरं मत्सकाशे वै जङ्गमं विषये तव ॥ ११
यस्तु ते विषयं गच्छेन्मन्त्रो वर्णः स्वरोऽपि वा ।
तन्मनो जङ्गमं नाम तस्मादसि गरीयसी ॥ १२
यस्मादसि च मा वोचः स्वयमभ्येत्य शोभने ।
तस्मादुच्छ्वासमासाद्य न वक्ष्यसि सरस्वति ॥ १३
प्राणापानान्तरे देवी वाग्वै नित्यं स्म तिष्ठति ।
प्रेर्यमाणा महाभागे विना प्राणमपानती ।
प्रजापतिमुपाधावत्प्रसीद भगवन्निति ॥ १४
ततः प्राणः प्रादुरभूद्वाचमाप्याययन्पुनः ।
तस्मादुच्छ्वासमासाद्य न वाग्वदति कर्हिचित् ॥
घोषिणी जातनिर्घोषा नित्यमेव प्रवर्तते ।
तयोरपि च घोषिण्योर्निर्घोषैव गरीयसी ॥ १६
गौरिव प्रस्रवत्येषा रसमुत्तमशालिनी ।
सततं स्यन्दते ह्येषा शाश्वतं ब्रह्मवादिनी ॥ १७
दिव्यादिव्यप्रभावेन भारती गौः शुचिस्मिते ।
एतयोरन्तरं पश्य सूक्ष्मयोः स्यन्दमानयोः ॥ १८
अनुत्पन्नेषु वाक्येषु चोद्यमाना सिसृक्षया ।
किं नु पूर्वं ततो देवी व्याजहार सरस्वती ॥ १९

प्राणेन या संभवते शरीरे
प्राणादपानं प्रतिपद्यते च ।
उदानभूता च विसृज्य देहं
व्यानेन सर्वं दिवमावृणोति ॥ २०
ततः समाने प्रतितिष्ठतीह
इत्येव पूर्वं प्रजजल्प चापि ।
तस्मान्मनः स्थावरत्वाद्विशिष्टं
तथा देवी जङ्गमत्वाद्विशिष्टा ॥ २१

इति श्रीमहाभारते आश्वमेधिकपर्वणि
एकविंशोऽध्यायः ॥ २१ ॥

२२

ब्राह्मण उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
सुभगे सप्तहोतॄणां विधानमिह यादृशम् ॥ १

घ्राणं चक्षुश्च जिह्वा च त्वक्श्रोत्रं चैव पञ्चमम् ।
मनो बुद्धिश्च सप्तैते होतारः पृथगाश्रिताः ॥ २
सूक्ष्मेऽवकाशे सन्तस्ते न पश्यन्तीतरेतरम् ।
एतान्वै सप्तहोतॄंस्त्वं स्वभावाद्विद्धि शोभने ॥ ३

ब्राह्मण्युवाच ।

सूक्ष्मेऽवकाशे सन्तस्ते कथं नान्योन्यदर्शिनः ।
कथंस्वभावा भगवन्नेतदाचक्ष्व मे विभो ॥ ४

ब्राह्मण उवाच ।

गुणाज्ञानमविज्ञानं गुणिज्ञानमभिज्ञता ।
परस्परगुणानेते न विजानन्ति कर्हिचित् ॥ ५
जिह्वा चक्षुस्तथा श्रोत्रं त्वङ्मनो बुद्धिरेव च ।
न गन्धानधिगच्छन्ति घ्राणस्तानधिगच्छति ॥ ६
घ्राणं चक्षुस्तथा श्रोत्रं त्वङ्मनो बुद्धिरेव च ।
न रसानधिगच्छन्ति जिह्वा तानधिगच्छति ॥ ७
घ्राणं जिह्वा तथा श्रोत्रं त्वङ्मनो बुद्धिरेव च ।
न रूपाण्यधिगच्छन्ति चक्षुस्तान्यधिगच्छति ॥ ८
घ्राणं जिह्वा च चक्षुश्च श्रोत्रं बुद्धिर्मनस्तथा ।
न स्पर्शानधिगच्छन्ति त्वक्च तानधिगच्छति ॥ ९
घ्राणं जिह्वा च चक्षुश्च त्वङ्मनो बुद्धिरेव च ।
न शब्दानधिगच्छन्ति श्रोत्रं तानधिगच्छति ॥ १०
घ्राणं जिह्वा च चक्षुश्च त्वक्श्रोत्रं बुद्धिरेव च ।
संशयान्नाधिगच्छन्ति मनस्तानधिगच्छति ॥ ११
घ्राणं जिह्वा च चक्षुश्च त्वक्श्रोत्रं मन एव च ।
न निष्ठामधिगच्छन्ति बुद्धिस्तामधिगच्छति ॥ १२
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
इन्द्रियाणां च संवादं मनसश्चैव भामिनि ॥ १३

मन उवाच ।

न घ्राति मामृते घ्राणं रसं जिह्वा न बुध्यते ।
रूपं चक्षुर्न गृह्णाति त्वक्स्पर्शं नावबुध्यते ॥ १४
न श्रोत्रं बुध्यते शब्दं मया हीनं कथंचन ।
प्रवरं सर्वभूतानामहमस्मि सनातनम् ॥ १५
अगाराणीव शून्यानि शान्तार्चिष इवाग्नयः ।
इन्द्रियाणि न भासन्ते मया हीनानि नित्यशः ॥
काष्ठानीवार्द्रशुष्काणि यतमानैरपीन्द्रियैः ।
गुणार्थान्नाधिगच्छन्ति मामृते सर्वजन्तवः ॥ १७

इन्द्रियाण्यूचुः ।

एवमेतद्भवेत्सत्यं यथैतन्मन्यते भवान् ।
ऋतेऽस्मानस्मदर्थांस्तु भोगान्भुङ्क्ते भवान्यदि ॥ १८
यद्यस्मासु प्रलीनेषु तर्पणं प्राणधारणम् ।
भोगान्भुङ्क्ष्व रसान्भुङ्क्ष्व यथैतन्मन्यते तथा ॥ १९
अथ वास्मासु लीनेषु तिष्ठत्सु विषयेषु च ।
यदि संकल्पमात्रेण भुङ्क्ते भोगान्यथार्थवत् ॥ २०
अथ चेन्मन्यसे सिद्धिमस्मदर्थेषु नित्यदा ।
घ्राणेन रूपमादत्स्व रसमादत्स्व चक्षुषा ॥ २१
श्रोत्रेण गन्धमादत्स्व निष्ठामादत्स्व जिह्वया ।
त्वचा च शब्दमादत्स्व बुद्ध्या स्पर्शमथापि च ॥
बलवन्तो ह्यनियमा नियमा दुर्बलीयसाम् ।
भोगानपूर्वानादत्स्व नोच्छिष्टं भोक्तुमर्हसि ॥ २३
यथा हि शिष्यः शास्तारं श्रुत्यर्थमभिधावति ।
ततः श्रुतमुपादाय श्रुतार्थमुपतिष्ठति ॥ २४
विषयानेवमस्माभिर्दर्शितानभिमन्यसे ।
अनागतानतीतांश्च स्वप्ने जागरणे तथा ॥ २५
वैमनस्यं गतानां च जन्तूनामल्पचेतसाम् ।
अस्मदर्थे कृते कार्ये दृश्यते प्राणधारणम् ॥ २६
बहूनपि हि संकल्पान्मत्वा स्वप्नानुपास्य च ।
बुभुक्षया पीड्यमानो विषयानेव धावसि ॥ २७
अगारमद्वारमिव प्रविश्य
संकल्पभोगो विषयानविन्दन् ।
प्राणक्षये शान्तिमुपैति नित्यं

दारुक्षयेऽग्निर्ज्वलितो यथैव ॥ २८
कामं तु नः स्वेषु गुणेषु सङ्गः
कामं च नान्योन्यगुणोपलब्धिः ।
अस्मानृते नास्ति तवोपलब्धि-
स्त्वामप्यृतेऽस्मान्न भजेत हर्षः ॥ २९

इति श्रीमहाभारते आश्वमेधिकपर्वणि
द्वाविंशोऽध्यायः ॥ २२ ॥

२३

ब्राह्मण उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
सुभगे पञ्चहोतॄणां विधानमिह यादृशम् ॥ १
प्राणापानावुदानश्च समानो व्यान एव च ।
पञ्चहोतॄनथैतान्वै परं भावं विदुर्बुधाः ॥ २

ब्राह्मण्युवाच ।

स्वभावात्सप्त होतार इति ते पूर्विका मतिः ।
यथा वै पञ्च होतारः परो भावस्तथोच्यताम् ॥ ३

ब्राह्मण उवाच ।

प्राणेन संभृतो वायुरपानो जायते ततः ।
अपाने संभृतो वायुस्ततो व्यानः प्रवर्तते ॥ ४
व्यानेन संभृतो वायुस्ततोदानः प्रवर्तते ।
उदाने संभृतो वायुः समानः संप्रवर्तते ॥ ५
तेऽपृच्छन्त पुरा गत्वा पूर्वजातं प्रजापतिम् ।
यो नो ज्येष्ठस्तमाचक्ष्व स नः श्रेष्ठो भविष्यति ॥

ब्रह्मोवाच ।

यस्मिन्प्रलीने प्रलयं व्रजन्ति
सर्वे प्राणाः प्राणभृतां शरीरे ।
यस्मिन्प्रचीर्णे च पुनश्चरन्ति
स वै श्रेष्ठो गच्छत यत्र कामः ॥ ७

प्राण उवाच ।

मयि प्रलीने प्रलयं व्रजन्ति
सर्वे प्राणाः प्राणभृतां शरीरे ।
मयि प्रचीर्णे च पुनश्चरन्ति
श्रेष्ठो ह्यहं पश्यत मां प्रलीनम् ॥ ८

ब्राह्मण उवाच ।

प्राणः प्रलीयत ततः पुनश्च प्रचचार ह ।
समानश्चाप्युदानश्च वचोऽब्रूतां ततः शुभे ॥ ९
न त्वं सर्वमिदं व्याप्य तिष्ठसीह यथा वयम् ।
न त्वं श्रेष्ठोऽसि नः प्राण अपानो हि वशे तव ।
प्रचचार पुनः प्राणस्तमपानोऽभ्यभाषत ॥ १०
मयि प्रलीने प्रलयं व्रजन्ति
सर्वे प्राणाः प्राणभृतां शरीरे ।
मयि प्रचीर्णे च पुनश्चरन्ति
श्रेष्ठो ह्यहं पश्यत मां प्रलीनम् ॥ ११
व्यानश्च तमुदानश्च भाषमाणमथोचतुः ।
अपान न त्वं श्रेष्ठोऽसि प्राणो हि वशगस्तव ॥१२
अपानः प्रचचाराथ व्यानस्तं पुनरब्रवीत् ।
श्रेष्ठोऽहमस्मि सर्वेषां श्रूयतां येन हेतुना ॥ १३
मयि प्रलीने प्रलयं व्रजन्ति
सर्वे प्राणाः प्राणभृतां शरीरे ।
मयि प्रचीर्णे च पुनश्चरन्ति
श्रेष्ठो ह्यहं पश्यत मां प्रलीनम् ॥ १४
प्रालीयत ततो व्यानः पुनश्च प्रचचार ह ।
प्राणापानावुदानश्च समानश्च तमब्रुवन् ।
न त्वं श्रेष्ठोऽसि नो व्यान समानो हि वशे तव ॥१५
प्रचचार पुनर्व्यानः समानः पुनरब्रवीत् ।
श्रेष्ठोऽहमस्मि सर्वेषां श्रूयतां येन हेतुना ॥ १६
मयि प्रलीने प्रलयं व्रजन्ति
सर्वे प्राणाः प्राणभृतां शरीरे ।
मयि प्रचीर्णे च पुनश्चरन्ति
श्रेष्ठो ह्यहं पश्यत मां प्रलीनम् ॥ १७

ततः समानः प्रालिल्ये पुनश्च प्रचचार ह ।
प्राणापानावुदानश्च व्यानश्चैव तमब्रुवन् ।
समान न त्वं श्रेष्ठोऽसि व्यान एव वशे तव ।१८
समानः प्रचचाराथ उदानस्तमुवाच ह ।
श्रेष्ठोऽहमस्मि सर्वेषां श्रूयतां येन हेतुना ॥ १९
मयि प्रलीने प्रलयं व्रजन्ति
सर्वे प्राणाः प्राणभृतां शरीरे ।
मयि प्रचीर्णे च पुनश्चरन्ति
श्रेष्ठो ह्यहं पश्यत मां प्रलीनम् ॥ २०
ततः प्रालीयतोदानः पुनश्च प्रचचार ह ।
प्राणापानौ समानश्च व्यानश्चैव तमब्रुवन् ।
उदान न त्वं श्रेष्ठोऽसि व्यान एव वशे तव ॥२१
ततस्तानब्रवीद्ब्रह्मा समवेतान्प्रजापतिः ।
सर्वे श्रेष्ठा न वा श्रेष्ठाः सर्वे चान्योन्यधर्मिणः ।
सर्वे स्वविषये श्रेष्ठाः सर्वे चान्योन्यरक्षिणः ॥ २२
एकः स्थिरश्चास्थिरश्च विशेषात्पञ्च वायवः ।
एक एव ममैवात्मा बहुधाप्युपचीयते ॥ २३
परस्परस्य सुहृदो भावयन्तः परस्परम् ।
स्वस्ति व्रजत भद्रं वो धारयध्वं परस्परम् ॥ २४

इति श्रीमहाभारते आश्वमेधिकपर्वणि
त्रयोविंशोऽध्यायः ॥ २३ ॥

२४

ब्राह्मण उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
नारदस्य च संवादमृषेर्देवमतस्य च ॥ १

देवमत उवाच ।

जन्तोः संजायमानस्य किं नु पूर्वं प्रवर्तते ।
प्राणोऽपानः समानो वा व्यानो वोदान एव च ॥

नारद उवाच ।

येनायं सृज्यते जन्तुस्ततोऽन्यः पूर्वमेति तम् ।
प्राणद्वंद्वं च विज्ञेयं तिर्यगं चोर्ध्वगं च यत् ॥ ३

देवमत उवाच ।

केनायं सृज्यते जन्तुः कश्चान्यः पूर्वमेति तम् ।
प्राणद्वंद्वं च मे ब्रूहि तिर्यगूर्ध्वं च निश्चयात् ॥ ४

नारद उवाच ।

संकल्पाज्जायते हर्षः शब्दादपि च जायते ।
रसात्संजायते चापि रूपादपि च जायते ॥ ५
स्पर्शात्संजायते चापि गन्धादपि च जायते ।
एतद्रूपमुदानस्य हर्षो मिथुनसंभवः ॥ ६
कामात्संजायते शुक्रं कामात्संजायते रसः ।
समानव्यानजनिते सामान्ये शुक्रशोणिते ॥ ७
शुक्राच्छोणितसंसृष्टात्पूर्वं प्राणः प्रवर्तते ।
प्राणेन विकृते शुक्रे ततोऽपानः प्रवर्तते ॥ ८
प्राणापानाविदं द्वंद्वमवाक्चोर्ध्वं च गच्छतः ।
व्यानः समानश्चैवोभौ तिर्यग्द्वंद्वत्वमुच्यते ॥ ९
अग्निर्वै देवताः सर्वा इति वेदस्य शासनम् ।
संजायते ब्राह्मणेषु ज्ञानं बुद्धिसमन्वितम् ॥ १०
तस्य धूमस्तमोरूपं रजो भस्म सुरेतसः ।
सत्त्वं संजायते तस्य यत्र प्रक्षिप्यते हविः ॥ ११
आघारौ समानो व्यानश्च इति यज्ञविदो विदुः ।
प्राणापानावाज्यभागौ तयोर्मध्ये हुताशनः ।
एतद्रूपमुदानस्य परमं ब्राह्मणा विदुः ॥ १२
निर्द्वंद्वमिति यत्त्वेतत्तन्मे निगदतः शृणु ॥ १३
अहोरात्रमिदं द्वंद्वं तयोर्मध्ये हुताशनः ।
एतद्रूपमुदानस्य परमं ब्राह्मणा विदुः ॥ १४
उभे चैवायने द्वंद्वं तयोर्मध्ये हुताशनः ।
एतद्रूपमुदानस्य परमं ब्राह्मणा विदुः ॥ १५
उभे सत्यानृते द्वंद्वं तयोर्मध्ये हुताशनः ।
एतद्रूपमुदानस्य परमं ब्राह्मणा विदुः ॥ १६
उभे शुभाशुभे द्वंद्वं तयोर्मध्ये हुताशनः ।

एतद्रूपमुदानस्य परमं ब्राह्मणा विदुः ॥ १७
सप्तासप्तैव तद्द्वंद्वं तयोर्मध्ये हुताशनः ।
एतद्रूपमुदानस्य परमं ब्राह्मणा विदुः ॥ १८
प्रथमं समानो व्यानो व्यस्यते कर्म तेन तत् ।
तृतीयं तु समानेन पुनरेव व्यवस्यते ॥ १९
शान्त्यर्थं वामदेवं च शान्तिर्ब्रह्म सनातनम् ।
एतद्रूपमुदानस्य परमं ब्राह्मणा विदुः ॥ २०

इति श्रीमहाभारते आश्वमेधिकपर्वणि
चतुर्विंशोऽध्यायः ॥ २४ ॥

२५

ब्राह्मण उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
चातुर्होत्रविधानस्य विधानमिह यादृशम् ॥ १
तस्य सर्वस्य विधिवद्विधानमुपदेक्ष्यते ।
शृणु मे गदतो भद्रे रहस्यमिदमुत्तमम् ॥ २
करणं कर्म कर्ता च मोक्ष इत्येव भामिनि ।
चत्वार एते होतारो यैरिदं जगदावृतम् ॥ ३
होतॄणां साधनं चैव शृणु सर्वमशेषतः ।
घ्राणं जिह्वा च चक्षुश्च त्वक्च श्रोत्रं च पञ्चमम् ।
मनो बुद्धिश्च सप्तैते विज्ञेया गुणहेतवः ॥ ४
गन्धो रसश्च रूपं च शब्दः स्पर्शश्च पञ्चमः ।
मन्तव्यमथ बोद्धव्यं सप्तैते कर्महेतवः ॥ ५
घ्राता भक्षयिता द्रष्टा स्प्रष्टा श्रोता च पञ्चमः ।
मन्ता बोद्धा च सप्तैते विज्ञेयाः कर्तृहेतवः ॥ ६
स्वगुणं भक्षयन्त्येते गुणवन्तः शुभाशुभम् ।
अहं च निर्गुणोऽत्रेति सप्तैते मोक्षहेतवः ॥ ७
विदुषां बुध्यमानानां स्वं स्वं स्थानं यथाविधि ।
गुणास्ते देवताभूताः सततं भुञ्जते हविः ॥ ८
अदन्ह्यविद्वानन्नानि ममत्वेनोपपद्यते ।
आत्मार्थं पाचयन्नित्यं ममत्वेनोपहन्यते ॥ ९
अभक्ष्यभक्षणं चैव मद्यपानं च हन्ति तम् ।
स चान्नं हन्ति तच्चान्नं स हत्वा हन्यते बुधः ॥१०
अत्ता ह्यन्नमिदं विद्वान्पुनर्जनयतीश्वरः ।
स चान्नाज्जायते तस्मिन्सूक्ष्मो नाम व्यतिक्रमः ॥
मनसा गम्यते यच्च यच्च वाचा निरुद्यते ।
श्रोत्रेण श्रूयते यच्च चक्षुषा यच्च दृश्यते ॥ १२
स्पर्शेन स्पृश्यते यच्च घ्राणेन घ्रायते च यत् ।
मनःषष्ठानि संयम्य हवींष्येतानि सर्वशः ॥ १३
गुणवत्पावको मह्यं दीप्यते हव्यवाहनः ।
योगयज्ञः प्रवृत्तो मे ज्ञानब्रह्ममनोद्भवः ।
प्राणस्तोत्रोऽपानशस्त्रः सर्वत्यागसुदक्षिणः ॥ १४
कर्मानुमन्ता ब्रह्मा मे कर्ताध्वर्युः कृतस्तुतिः ।
कृतप्रशास्ता तच्छास्त्रमपवर्गोऽस्य दक्षिणा ॥ १५
ऋचश्चाप्यत्र शंसन्ति नारायणविदो जनाः ।
नारायणाय देवाय यदबध्नन्पशून्पुरा ॥ १६
तत्र सामानि गायन्ति तानि चाहुर्निदर्शनम् ।
देवं नारायणं भीरु सर्वात्मानं निबोध मे ॥ १७

इति श्रीमहाभारते आश्वमेधिकपर्वणि
पञ्चविंशोऽध्यायः ॥ २५ ॥

२६

ब्राह्मण उवाच ।

एकः शास्ता न द्वितीयोऽस्ति शास्ता
यथा नियुक्तोऽस्मि तथा चरामि ।
हृद्येष तिष्ठन्पुरुषः शास्ति शास्ता
तेनैव युक्तः प्रवणादिवोदकम् ॥ १
एको गुरुर्नास्ति ततो द्वितीयो
यो हृच्छयस्तमहमनुब्रवीमि ।
तेनानुशिष्टा गुरुणा सदैव
पराभूता दानवाः सर्व एव ॥ २
एको बन्धुर्नास्ति ततो द्वितीयो

यो हृच्छयस्तमहमनुब्रवीमि ।
तेनानुशिष्टा बान्धवा बन्धुमन्तः
सप्तर्षयः सप्त दिवि प्रभान्ति ॥ ३
एकः श्रोता नास्ति ततो द्वितीयो
यो हृच्छयस्तमहमनुब्रवीमि ।
तस्मिन्गुरौ गुरुवासं निरुष्य
शक्रो गतः सर्वलोकामरत्वम् ॥ ४
एको द्वेष्टा नास्ति ततो द्वितीयो
यो हृच्छयस्तमहमनुब्रवीमि ।
तेनानुशिष्टा गुरुणा सदैव
लोकद्विष्टाः पन्नगाः सर्व एव ॥ ५
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
प्रजापतौ पन्नगानां देवर्षीणां च संविदम् ॥ ६
देवर्षयश्च नागाश्च असुराश्च प्रजापतिम् ।
पर्यपृच्छन्नुपासीनाः श्रेयो नः प्रोच्यतामिति ॥ ७
तेषां प्रोवाच भगवाञ्श्रेयः समनुपृच्छताम् ।
ओमित्येकाक्षरं ब्रह्म ते श्रुत्वा प्राद्रवन्दिशः ॥ ८
तेषां प्राद्रवमाणानामुपदेशार्थमात्मनः ।
सर्पाणां दशने भावः प्रवृत्तः पूर्वमेव तु ॥ ९
असुराणां प्रवृत्तस्तु दम्भभावः स्वभावजः ।
दानं देवा व्यवसिता दममेव महर्षयः ॥ १०
एकं शास्तारमासाद्य शब्देनैकेन संस्कृताः ।
नाना व्यवसिताः सर्वे सर्पदेवर्षिदानवाः ॥ ११
शृणोत्ययं प्रोच्यमानं गृह्णाति च तथातथम् ।
पृच्छतस्तावतो भूयो गुरुरन्योऽनुमन्यते ॥ १२
तस्य चानुमते कर्म ततः पश्चात्प्रवर्तते ।
गुरुर्बोद्धा च शत्रुश्च द्वेष्टा च हृदि संश्रितः ॥१३
पापेन विचरँल्लोके पापचारी भवत्ययम् ।
शुभेन विचरँल्लोके शुभचारी भवत्युत ॥ १४
कामचारी तु कामेन य इन्द्रियसुखे रतः ।
व्रतचारी सदैवैष य इन्द्रियजये रतः ॥ १५
अपेतव्रतकर्मा तु केवलं ब्रह्मणि श्रितः ।
ब्रह्मभूतश्चरँल्लोके ब्रह्मचारी भवत्ययम् ॥ १६
ब्रह्मैव समिधस्तस्य ब्रह्माग्निर्ब्रह्मसंस्तरः ।
आपो ब्रह्म गुरुर्ब्रह्म स ब्रह्मणि समाहितः ॥ १७
एतदेतादृशं सूक्ष्मं ब्रह्मचर्यं विदुर्बुधाः ।
विदित्वा चान्वपद्यन्त क्षेत्रज्ञेनानुदर्शिनः ॥ १८

इति श्रीमहाभारते आश्वमेधिकपर्वणि
षड्विंशोऽध्यायः ॥ २६ ॥

२७

ब्राह्मण उवाच ।

संकल्पदंशमशकं शोकहर्षहिमातपम् ।
मोहान्धकारतिमिरं लोभव्यालसरीसृपम् ॥ १
विषयैकात्ययाध्वानं कामक्रोधविरोधकम् ।
तदतीत्य महादुर्गं प्रविष्टोऽस्मि महद्वनम् ॥ २

ब्राह्मण्युवाच ।

क तद्वनं महाप्राज्ञ के वृक्षाः सरितश्च काः ।
गिरयः पर्वताश्चैव कियत्यध्वनि तद्वनम् ॥ ३

ब्राह्मण उवाच ।

न तदस्ति पृथग्भावे किंचिदन्यत्ततः समम् ।
न तदस्त्यपृथग्भावे किंचिद्दूरतरं ततः ॥ ४
तस्माद्ध्रस्वतरं नास्ति न ततोऽस्ति बृहत्तरम् ।
नास्ति तस्माद्दुःखतरं नास्त्यन्यत्तत्समं सुखम् ॥ ५
न तत्प्रविश्य शोचन्ति न प्रहृष्यन्ति च द्विजाः ।
न च बिभ्यति केषांचित्तेभ्यो बिभ्यति के च न ॥६
तस्मिन्वने सप्त महाद्रुमाश्च
फलानि सप्तातिथयश्च सप्त ।
सप्ताश्रमाः सप्त समाधयश्च
दीक्षाश्च सप्तैतदरण्यरूपम् ॥ ७

पञ्चवर्णानि दिव्यानि पुष्पाणि च फलानि च ।
सृजन्तः पादपास्तत्र व्याप्य तिष्ठन्ति तद्वनम् ॥ ८
सुवर्णानि द्विवर्णानि पुष्पाणि च फलानि च ।
सृजन्तः पादपास्तत्र व्याप्य तिष्ठन्ति तद्वनम् ॥ ९
चतुर्वर्णानि दिव्यानि पुष्पाणि च फलानि च ।
सृजन्तः पादपास्तत्र व्याप्य तिष्ठन्ति तद्वनम् ॥१०
शंकराणि त्रिवर्णानि पुष्पाणि च फलानि च ।
सृजन्तः पादपास्तत्र व्याप्य तिष्ठन्ति तद्वनम् ॥११
सुरभीण्येकवर्णानि पुष्पाणि च फलानि च ।
सृजन्तः पादपास्तत्र व्याप्य तिष्ठन्ति तद्वनम् ॥१२
बहून्यव्यक्तवर्णानि पुष्पाणि च फलानि च ।
विसृजन्तौ महावृक्षौ तद्वनं व्याप्य तिष्ठतः ॥ १३
एको ह्यग्निः सुमना ब्राह्मणोऽत्र
पञ्चेन्द्रियाणि समिधश्चात्र सन्ति ।
तेभ्यो मोक्षाः सप्त भवन्ति दीक्षा
गुणाः फलान्यतिथयः फलाशाः ॥ १४
आतिथ्यं प्रतिगृह्णन्ति तत्र सप्त महर्षयः ।
अर्चितेषु प्रलीनेषु तेष्वन्यद्रोचते वनम् ॥ १५
प्रतिज्ञावृक्षमफलं शान्तिच्छायासमन्वितम् ।
ज्ञानाश्रयं तृप्तितोयमन्तःक्षेत्रज्ञभास्करम् ॥ १६
येऽधिगच्छन्ति तत्सन्तस्तेषां नास्ति भयं पुनः ।
ऊर्ध्वं चावाक्च तिर्यक्च तस्य नान्तोऽधिगम्यते ॥
सप्त स्त्रियस्तत्र वसन्ति सद्यो
अवाङ्मुखा भानुमत्यो जनित्र्यः ।
ऊर्ध्वं रसानां ददते प्रजाभ्यः
सर्वान्यथा सर्वमनित्यतां च ॥ १८
तत्रैव प्रतितिष्ठन्ति पुनस्तत्रोदयन्ति च ।
सप्त सप्तर्षयः सिद्धा वसिष्ठप्रमुखाः सह ॥ १९
यशो वर्चो भगश्चैव विजयः सिद्धितेजसी ।
एवमेवानुवर्तन्ते सप्त ज्योतींषि भास्करम् ॥ २०
गिरयः पर्वताश्चैव सन्ति तत्र समासतः ।
नद्यश्च सरितो वारि वहन्त्यो ब्रह्मसंभवम् ॥ २१
नदीनां संगमस्तत्र वैतानः समुपह्वरे ।
स्वात्मतृप्ता यतो यान्ति साक्षाद्दान्ताः पितामहम् ॥
कृशाशाः सुव्रताशाश्च तपसा दग्धकिल्बिषाः ।
आत्मन्यात्मानमावेश्य ब्रह्माणं समुपासते ॥ २३
ऋचमप्यत्र शंसन्ति विद्यारण्यविदो जनाः ।
तदरण्यमभिप्रेत्य यथाधीरमजायत ॥ २४
एतदेतादृशं दिव्यमरण्यं ब्राह्मणा विदुः ।
विदित्वा चान्वतिष्ठन्त क्षेत्रज्ञेनानुदर्शितम् ॥ २५

इति श्रीमहाभारते आश्वमेधिकपर्वणि
सप्तविंशोऽध्यायः ॥ २७ ॥

२८

ब्राह्मण उवाच ।

गन्धान्न जिघ्रामि रसान्न वेद्मि
रूपं न पश्यामि न च स्पृशामि ।
न चापि शब्दान्विविधाञ्शृणोमि
न चापि संकल्पमुपैमि किंचित् ॥ १
अर्थानिष्टान्कामयते स्वभावः
सर्वान्द्वेष्यान्प्रद्विषते स्वभावः ।
कामद्वेषावुद्भवतः स्वभावा-
त्प्राणापानौ जन्तुदेहान्निवेश्य ॥ २
तेभ्यश्चान्यांस्तेष्वनित्यांश्च भावा-
न्भूतात्मानं लक्षयेयं शरीरे ।
तस्मिंस्तिष्ठन्नास्मि शक्यः कथंचि-
त्कामक्रोधाभ्यां जरया मृत्युना च ॥ ३
अकामयानस्य च सर्वकामा-
नविद्विषाणस्य च सर्वदोषान् ।
न मे स्वभावेषु भवन्ति लेपा-
स्तोयस्य बिन्दोरिव पुष्करेषु ॥ ४

नित्यस्य चैतस्य भवन्ति नित्या
निरीक्षमाणस्य बहून्स्वभावान् ।
न सज्जते कर्मसु भोगजालं
दिवीव सूर्यस्य मयूखजालम् ॥ ५
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
अध्वर्युयतिसंवादं तं निबोध यशस्विनि ॥ ६
प्रोक्ष्यमाणं पशुं दृष्ट्वा यज्ञकर्मण्यथाब्रवीत् ।
यतिरध्वर्युमासीनो हिंसेयमिति कुत्सयन् ॥ ७
तमध्वर्युः प्रत्युवाच नायं छागो विनश्यति ।
श्रेयसा योक्ष्यते जन्तुर्यदि श्रुतिरियं तथा ॥ ८
यो ह्यस्य पार्थिवो भागः पृथिवीं स गमिष्यति ।
यदस्य वारिजं किंचिदपस्तत्प्रतिपद्यते ॥ ९
सूर्यं चक्षुर्दिशः श्रोत्रे प्राणोऽस्य दिवमेव च ।
आगमे वर्तमानस्य न मे दोषोऽस्ति कश्चन ॥ १०

यतिरुवाच ।

प्राणैर्वियोगे छागस्य यदि श्रेयः प्रपश्यसि ।
छागार्थे वर्तते यज्ञो भवतः किं प्रयोजनम् ॥ ११
अनु त्वा मन्यतां माता पिता भ्राता सखापि च ।
मन्त्रयस्वैनमुन्नीय परवन्तं विशेषतः ॥ १२
स एवमनुमन्येरंस्तान्भवान्प्रष्टुमर्हति ।
तेषामनुमतं श्रुत्वा शक्या कर्तुं विचारणा ॥ १३
प्राणा अप्यस्य छागस्य प्रापितास्ते स्वयोनिषु ।
शरीरं केवलं शिष्टं निश्चेष्टमिति मे मतिः ॥ १४
इन्धनस्य तु तुल्येन शरीरेण विचेतसा ।
हिंसा निर्वेष्टुकामानामिन्धनं पशुसंज्ञितम् ॥ १५
अहिंसा सर्वधर्माणामिति वृद्धानुशासनम् ।
यदहिंस्रं भवेत्कर्म तत्कार्यमिति विद्महे ॥ १६
अहिंसेति प्रतिज्ञेयं यदि वक्ष्याम्यतः परम् ।
शक्यं बहुविधं वक्तुं भवतः कार्यदूषणम् ॥ १७
अहिंसा सर्वभूतानां नित्यमस्मासु रोचते ।
प्रत्यक्षतः साधयामो न परोक्षमुपास्महे ॥ १८

अध्वर्युरुवाच ।

भूमेर्गन्धगुणान्भुङ्क्षे पिबस्यापोमयान्रसान् ।
ज्योतिषां पश्यसे रूपं स्पृशस्यनिलजान्गुणान् ॥ १९
शृणोष्याकाशजं शब्दं मनसा मन्यसे मतिम् ।
सर्वाण्येतानि भूतानि प्राणा इति च मन्यसे ॥ २०
प्राणादाने च नित्योऽसि हिंसायां वर्तते भवान् ।
नास्ति चेष्टा विना हिंसां किं वा त्वं मन्यसे द्विज ॥

यतिरुवाच ।

अक्षरं च क्षरं चैव द्वैधीभावोऽयमात्मनः ।
अक्षरं तत्र सद्भावः स्वभावः क्षर उच्यते ॥ २२
प्राणो जिह्वा मनः सत्त्वं स्वभावो रजसा सह ।
भावैरेतैर्विमुक्तस्य निर्द्वंद्वस्य निराशिषः ॥ २३
समस्य सर्वभूतेषु निर्ममस्य जितात्मनः ।
समन्तात्परिमुक्तस्य न भयं विद्यते क्वचित् ॥ २४

अध्वर्युरुवाच ।

सद्भिरेवेह संवासः कार्यो मतिमतां वर ।
भवतो हि मतं श्रुत्वा प्रतिभाति मतिर्मम ॥ २५
भगवन्भगवद्बुद्ध्या प्रतिबुद्धो ब्रवीम्यहम् ।
मतं मन्तुं क्रतुं कर्तुं नापराधोऽस्ति मे द्विज ॥ २६

ब्राह्मण उवाच ।

उपपत्त्या यतिस्तूष्णीं वर्तमानस्ततः परम् ।
अध्वर्युरपि निर्मोहः प्रचचार महामखे ॥ २७
एवमेतादृशं मोक्षं सुसूक्ष्मं ब्राह्मणा विदुः ।
विदित्वा चानुतिष्ठन्ति क्षेत्रज्ञेनानुदर्शिना ॥ २८

इति श्रीमहाभारते आश्वमेधिकपर्वणि
अष्टाविंशोऽध्यायः ॥ २८ ॥

२९

ब्राह्मण उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
कार्तवीर्यस्य संवादं समुद्रस्य च भामिनि ॥ १
कार्तवीर्यार्जुनो नाम राजा बाहुसहस्रवान् ।
येन सागरपर्यन्ता धनुषा निर्जिता मही ॥ २
स कदाचित्समुद्रान्ते विचरन्बलदर्पितः ।
अवाकिरच्छरशतैः समुद्रमिति न श्रुतम् ॥ ३
तं समुद्रो नमस्कृत्य कृताञ्जलिरुवाच ह ।
मा मुञ्च वीर नाराचान्ब्रूहि किं करवाणि ते ॥ ४
मदाश्रयाणि भूतानि त्वद्विसृष्टैर्महेषुभिः ।
वध्यन्ते राजशार्दूल तेभ्यो देह्यभयं विभो ॥ ५

अर्जुन उवाच ।

मत्समो यदि संग्रामे शरासनधरः क्वचित् ।
विद्यते तं ममाचक्ष्व यः समासीत मां मृधे ॥ ६

समुद्र उवाच ।

महर्षिर्जमदग्निस्ते यदि राजन्परिश्रुतः ।
तस्य पुत्रस्तवातिथ्यं यथावत्कर्तुमर्हति ॥ ७
ततः स राजा प्रययौ क्रोधेन महता वृतः ।
स तमाश्रममागम्य राममेवान्वपद्यत ॥ ८
स रामप्रतिकूलानि चकार सह बन्धुभिः ।
आयासं जनयामास रामस्य च महात्मनः ॥ ९
ततस्तेजः प्रजज्वाल रामस्यामिततेजसः ।
प्रदहद्रिपुसैन्यानि तदा कमललोचने ॥ १०
ततः परशुमादाय स तं बाहुसहस्रिणम् ।
चिच्छेद सहसा रामो बाहुशाखमिव द्रुमम् ॥ ११
तं हतं पतितं दृष्ट्वा समेताः सर्वबान्धवाः ।
असीनादाय शक्तीश्च भार्गवं पर्यवारयन् ॥ १२
रामोऽपि धनुरादाय रथमारुह्य सत्वरः ।
विसृजञ्शरवर्षाणि व्यधमत्पार्थिवं बलम् ॥ १३
ततस्तु क्षत्रियाः केचिज्जमदग्निं निहत्य च ।
विविशुर्गिरिदुर्गाणि मृगाः सिंहार्दिता इव ॥ १४
तेषां स्वविहितं कर्म तद्भयान्नानुतिष्ठताम् ।
प्रजा वृषलतां प्राप्ता ब्राह्मणानामदर्शनात् ॥ १५
त एते द्रमिडाः काशाः पुण्ड्राश्च शबरैः सह ।
वृषलत्वं परिगता व्युत्थानात्क्षत्रधर्मतः ॥ १६
ततस्तु हतवीरासु क्षत्रियासु पुनः पुनः ।
द्विजैरुत्पादितं क्षत्रं जामदग्न्यो न्यकृन्तत ॥ १७
एकविंशतिमेधान्ते रामं वागशरीरिणी ।
दिव्या प्रोवाच मधुरा सर्वलोकपरिश्रुता ॥ १८
राम राम निवर्तस्व कं गुणं तात पश्यसि ।
क्षत्रबन्धूनिमान्प्राणैर्विप्रयोज्य पुनः पुनः ॥ १९
तथैव तं महात्मानमृचीकप्रमुखास्तदा ।
पितामहा महाभाग निवर्तस्वेत्यथाब्रुवन् ॥ २०
पितुर्वधममृष्यंस्तु रामः प्रोवाच तानृषीन् ।
नार्हन्तीह भवन्तो मां निवारयितुमित्युत ॥ २१

पितर ऊचुः ।

नार्हसे क्षत्रबन्धूंस्त्वं निहन्तुं जयतां वर ।
न हि युक्तं त्वया हन्तुं ब्राह्मणेन सता नृपान् ॥२२

इति श्रीमहाभारते आश्वमेधिकपर्वणि
एकोनत्रिंशोऽध्यायः ॥ २९ ॥

३०

पितर ऊचुः ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
श्रुत्वा च तत्तथा कार्यं भवता द्विजसत्तम ॥ १
अलर्को नाम राजर्षिरभवत्सुमहातपाः ।
धर्मज्ञः सत्यसंधश्च महात्मा सुमहाव्रतः ॥ २
स सागरान्तां धनुषा विनिर्जित्य महीमिमाम् ।
कृत्वा सुदुष्करं कर्म मनः सूक्ष्मे समादधे ॥ ३

स्थितस्य वृक्षमूलेऽथ तस्य चिन्ता बभूव ह ।
उत्सृज्य सुमहद्राज्यं सूक्ष्मं प्रति महामते ॥ ४

अलर्क उवाच ।

मनसो मे बलं जातं मनो जित्वा ध्रुवो जयः ।
अन्यत्र बाणानस्यामि शत्रुभिः परिवारितः ॥ ५
यदिदं चापलान्मूर्तेः सर्वमेतच्चिकीर्षति ।
मनः प्रति सुतीक्ष्णाग्रानहं मोक्ष्यामि सायकान् ॥

मन उवाच ।

नेमे बाणास्तरिष्यन्ति मामलर्क कथंचन ।
तवैव मर्म भेत्स्यन्ति भिन्नमर्मा मरिष्यसि ॥ ७
अन्यान्बाणान्समीक्षस्व यैस्त्वं मां सूदयिष्यसि ।
तच्छ्रुत्वा स विचिन्त्याथ ततो वचनमब्रवीत् ॥ ८

अलर्क उवाच ।

आघ्राय सुबहून्गन्धांस्तानेव प्रतिगृध्यति ।
तस्माद्घ्राणं प्रति शरान्प्रतिमोक्ष्याम्यहं शितान् ॥९

घ्राण उवाच ।

नेमे बाणास्तरिष्यन्ति मामलर्क कथंचन ।
तवैव मर्म भेत्स्यन्ति भिन्नमर्मा मरिष्यसि ॥ १०
अन्यान्बाणान्समीक्षस्व यैस्त्वं मां सूदयिष्यसि ।
तच्छ्रुत्वा स विचिन्त्याथ ततो वचनमब्रवीत् ॥११

अलर्क उवाच ।

इयं स्वादून्रसान्भुक्त्वा तानेव प्रतिगृध्यति ।
तस्माज्जिह्वां प्रति शरान्प्रतिमोक्ष्याम्यहं शितान् ॥

जिह्वोवाच ।

नेमे बाणास्तरिष्यन्ति मामलर्क कथंचन ।
तवैव मर्म भेत्स्यन्ति भिन्नमर्मा मरिष्यसि ॥ १३
अन्यान्बाणान्समीक्षस्व यैस्त्वं मां सूदयिष्यसि ।
तच्छ्रुत्वा स विचिन्त्याथ ततो वचनमब्रवीत् ॥१४

अलर्क उवाच ।

स्पृष्ट्वा त्वग्विविधान्स्पर्शांस्तानेव प्रतिगृध्यति ।
तस्मात्त्वचं पाटयिष्ये विविधैः कङ्कपत्रिभिः ॥ १५

त्वगुवाच ।

नेमे बाणास्तरिष्यन्ति मामलर्क कथंचन ।
तवैव मर्म भेत्स्यन्ति भिन्नमर्मा मरिष्यसि ॥ १६
अन्यान्बाणान्समीक्षस्व यैस्त्वं मां सूदयिष्यसि ।
तच्छ्रुत्वा स विचिन्त्याथ ततो वचनमब्रवीत् ॥१७

अलर्क उवाच ।

श्रुत्वा वै विविधाञ्शब्दांस्तानेव प्रतिगृध्यति ।
तस्माच्छ्रोत्रं प्रति शरान्प्रतिमोक्ष्याम्यहं शितान्॥१८

श्रोत्र उवाच ।

नेमे बाणास्तरिष्यन्ति मामलर्क कथंचन ।
तवैव मर्म भेत्स्यन्ति ततो हास्यसि जीवितम् ॥१९
अन्यान्बाणान्समीक्षस्व यैस्त्वं मां सूदयिष्यसि ।
तच्छ्रुत्वा स विचिन्त्याथ ततो वचनमब्रवीत् ॥२०

अलर्क उवाच ।

दृष्ट्वा वै विविधान्भावांस्तानेव प्रतिगृध्यति ।
तस्माच्चक्षुः प्रति शरान्प्रतिमोक्ष्याम्यहं शितान् ॥

चक्षुरुवाच ।

नेमे बाणास्तरिष्यन्ति मामलर्क कथंचन ।
तवैव मर्म भेत्स्यन्ति भिन्नमर्मा मरिष्यसि ॥ २२
अन्यान्बाणान्समीक्षस्व यैस्त्वं मां सूदयिष्यसि ।
तच्छ्रुत्वा स विचिन्त्याथ ततो वचनमब्रवीत् ॥२३

अलर्क उवाच ।

इयं निष्ठा बहुविधा प्रज्ञया त्वध्यवस्यति ।
तस्माद्बुद्धिं प्रति शरान्प्रतिमोक्ष्याम्यहं शितान् ॥२४

बुद्धिरुवाच ।

नेमे बाणास्तरिष्यन्ति मामलर्क कथंचन ।

तवैव मर्म भेत्स्यन्ति भिन्नमर्मा मरिष्यसि ॥ २५

पितर ऊचुः ।

ततोऽलर्कस्तपो घोरमास्थायाथ सुदुष्करम् ।
नाध्यगच्छत्परं शक्त्या बाणमेतेषु सप्तसु ।
सुसमाहितचेतास्तु ततोऽचिन्तयत प्रभुः ॥ २६
स विचिन्त्य चिरं कालमलर्को द्विजसत्तम ।
नाध्यगच्छत्परं श्रेयो योगान्मतिमतां वरः ॥ २७
स एकाग्रं मनः कृत्वा निश्चलो योगमास्थितः ।
इन्द्रियाणि जघानाशु बाणेनैकेन वीर्यवान् ।
योगेनात्मानमाविश्य संसिद्धिं परमां ययौ ॥ २८
विस्मितश्चापि राजर्षिरिमां गाथां जगाद ह ।
अहो कष्टं यदस्माभिः पूर्वं राज्यमनुष्ठितम् ।
इति पश्चान्मया ज्ञातं योगान्नास्ति परं सुखम् ॥
इति त्वमपि जानीहि राम मा क्षत्रियाञ्जहि ।
तपो घोरमुपातिष्ठ ततः श्रेयोऽभिपत्स्यसे ॥ ३०

ब्राह्मण उवाच ।

इत्युक्तः स तपो घोरं जामदग्न्यः पितामहैः ।
आस्थितः सुमहाभागो ययौ सिद्धिं च दुर्गमाम् ॥

इति श्रीमहाभारते आश्वमेधिकपर्वणि
त्रिंशोऽध्यायः ॥ ३० ॥

३१

ब्राह्मण उवाच ।

त्रयो वै रिपवो लोके नव वै गुणतः स्मृताः ।
हर्षः स्तम्भोऽभिमानश्च त्रयस्ते सात्त्विका गुणाः ॥
शोकः क्रोधोऽतिसंरम्भो राजसास्ते गुणाः स्मृताः ।
स्वप्नस्तन्द्री च मोहश्च त्रयस्ते तामसा गुणाः ॥ २
एतान्निकृत्य धृतिमान्बाणसंघैरतन्द्रितः ।
जेतुं परानुत्सहते प्रशान्तात्मा जितेन्द्रियः ॥ ३
अत्र गाथाः कीर्तयन्ति पुराकल्पविदो जनाः ।
अम्बरीषेण या गीता राज्ञा राज्यं प्रशासता ॥ ४
समुदीर्णेषु दोषेण वध्यमानेषु साधुषु ।
जग्राह तरसा राज्यमम्बरीष इति श्रुतिः ॥ ५
स निगृह्य महादोषान्साधून्समभिपूज्य च ।
जगाम महतीं सिद्धिं गाथां चेमां जगाद ह ॥ ६
भूयिष्ठं मे जिता दोषा निहताः सर्वशत्रवः ।
एको दोषोऽवशिष्टस्तु वध्यः स न हतो मया ॥ ७
येन युक्तो जन्तुरयं वैतृष्ण्यं नाधिगच्छति ।
तृष्णार्त इव निम्नानि धावमानो न बुध्यते ॥ ८
अकार्यमपि येनेह प्रयुक्तः सेवते नरः ।
तं लोभमसिभिस्तीक्ष्णैर्निकृन्तन्तं निकृन्तत ॥ ९
लोभाद्धि जायते तृष्णा ततश्चिन्ता प्रसज्यते ।
स लिप्समानो लभते भूयिष्ठं राजसान्गुणान् ॥१०

स तैर्गुणैः संहतदेहबन्धनः
पुनः पुनर्जायति कर्म चेहते ।
जन्मक्षये भिन्नविकीर्णदेहः
पुनर्मृत्युं गच्छति जन्मनि स्वे ॥ ११
तस्मादेनं सम्यगवेक्ष्य लोभं
निगृह्य धृत्यात्मनि राज्यमिच्छेत् ।
एतद्राज्यं नान्यदस्तीति विद्या-
द्यस्त्वत्र राजा विजितो ममैकः ॥ १२

इति राज्ञाम्बरीषेण गाथा गीता यशस्विना ।
आधिराज्यं पुरस्कृत्य लोभमेकं निकृन्तता ॥ १३

इति श्रीमहाभारते आश्वमेधिपर्वणि
एकत्रिंशोऽध्यायः ॥ ३१ ॥

३२

ब्राह्मण उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
ब्राह्मणस्य च संवादं जनकस्य च भामिनि ॥ १
ब्राह्मणं जनको राजा सन्नं कस्मिंश्चिदागमे ।

विषये मे न वस्तव्यमिति शिष्ट्यर्थमब्रवीत् ॥ २
इत्युक्तः प्रत्युवाचाथ ब्राह्मणो राजसत्तमम् ।
आचक्ष्व विषयं राजन्यावांस्तव वशे स्थितः ॥ ३
सोऽन्यस्य विषये राज्ञो वस्तुमिच्छाम्यहं विभो ।
वचस्ते कर्तुमिच्छामि यथाशास्त्रं महीपते ॥ ४
इत्युक्तः स तदा राजा ब्राह्मणेन यशस्विना ।
मुहुरुष्णं च निःश्वस्य न स तं प्रत्यभाषत ॥ ५
तमासीनं ध्यायमानं राजानममितौजसम् ।
कश्मलं सहसागच्छद्भानुमन्तमिव ग्रहः ॥ ६
समाश्वास्य ततो राजा व्यपेते कश्मले तदा ।
ततो मुहूर्तादिव तं ब्राह्मणं वाक्यमब्रवीत् ॥ ७
पितृपैतामहे राज्ये वश्ये जनपदे सति ।
विषयं नाधिगच्छामि विचिन्वन्पृथिवीमिमाम् ॥ ८
नाध्यगच्छं यदा पृथ्व्यां मिथिला मार्गिता मया ।
नाध्यगच्छं यदा तस्यां स्वप्रजा मार्गिता मया ॥ ९
नाध्यगच्छं यदा तासु तदा मे कश्मलोऽभवत् ।
ततो मे कश्मलस्यान्ते मतिः पुनरुपस्थिता ॥ १०
तया न विषयं मन्ये सर्वो वा विषयो मम ।
आत्मापि चायं न मम सर्वा वा पृथिवी मम ।
उष्यतां यावदुत्साहो भुज्यतां यावदिष्यते ॥ ११
पितृपैतामहे राज्ये वश्ये जनपदे सति ।
ब्रूहि कां बुद्धिमास्थाय ममत्वं वर्जितं त्वया ॥ १२
कां वा बुद्धिं विनिश्चित्य सर्वो वै विषयस्तव ।
नावैषि विषयं येन सर्वो वा विषयस्तव ॥ १३

जनक उवाच ।

अन्तवन्त इहारम्भा विदिताः सर्वकर्मसु ।
नाध्यगच्छमहं यस्मान्ममेदमिति यद्भवेत् ॥ १४
कस्येदमिति कस्य स्वमिति वेदवचस्तथा ।
नाध्यगच्छमहं बुद्ध्या ममेदमिति यद्भवेत् ॥ १५
एतां बुद्धिं विनिश्चित्य ममत्वं वर्जितं मया ।
शृणु बुद्धिं तु यां ज्ञात्वा सर्वत्र विषयो मम ॥ १६
नाहमात्मार्थमिच्छामि गन्धान्घ्राणगतानपि ।
तस्मान्मे निर्जिता भूमिर्वशे तिष्ठति नित्यदा ॥ १७
नाहमात्मार्थमिच्छामि रसानास्येऽपि वर्ततः ।
आपो मे निर्जितास्तस्माद्वशे तिष्ठन्ति नित्यदा ॥
नाहमात्मार्थमिच्छामि रूपं ज्योतिश्च चक्षुषा ।
तस्मान्मे निर्जितं ज्योतिर्वशे तिष्ठति नित्यदा ॥ १९
नाहमात्मार्थमिच्छामि स्पर्शांस्त्वचि गताश्च ये ।
तस्मान्मे निर्जितो वायुर्वशे तिष्ठति नित्यदा ॥ २०
नाहमात्मार्थमिच्छामि शब्दाञ्श्रोत्रगतानपि ।
तस्मान्मे निर्जिताः शब्दा वशे तिष्ठन्ति नित्यदा ॥
नाहमात्मार्थमिच्छामि मनो नित्यं मनोन्तरे ।
मनो मे निर्जितं तस्माद्वशे तिष्ठति नित्यदा ॥ २२
देवेभ्यश्च पितृभ्यश्च भूतेभ्योऽतिथिभिः सह ।
इत्यर्थं सर्व एवेमे समारम्भा भवन्ति वै ॥ २३
ततः प्रहस्य जनकं ब्राह्मणः पुनरब्रवीत् ।
त्वज्जिज्ञासार्थमद्येह विद्धि मां धर्ममागतम् ॥ २४
त्वमस्य ब्रह्मनाभस्य बुद्ध्यारस्यानिवर्तिनः ।
सत्त्वनेमिनिरुद्धस्य चक्रस्यैकः प्रवर्तकः ॥ २५

इति श्रीमहाभारते आश्वमेधिकपर्वणि
द्वात्रिंशोऽध्यायः ॥ ३२ ॥

३३

ब्राह्मण उवाच ।

नाहं तथा भीरु चरामि लोके
तथा त्वं मां तर्कयसे स्वबुद्ध्या ।
विप्रोऽस्मि मुक्तोऽस्मि वनेचरोऽस्मि
गृहस्थधर्मा ब्रह्मचारी तथास्मि ॥ १
नाहमस्मि यथा मां त्वं पश्यसे चक्षुषा शुभे ।
मया व्याप्तमिदं सर्वं यत्किंचिज्जगतीगतम् ॥ २
ये केचिज्जन्तवो लोके जङ्गमाः स्थावराश्च ह ।

तेषां मामन्तकं विद्धि दारूणामिव पावकम् ॥ ३
राज्यं पृथिव्यां सर्वस्यामथ वापि त्रिविष्टपे ।
तथा बुद्धिरियं वेत्ति बुद्धिरेव धनं मम ॥ ४
एकः पन्था ब्राह्मणानां येन गच्छन्ति तद्विदः ।
गृहेषु वनवासेषु गुरुवासेषु भिक्षुषु ।
लिङ्गैर्बहुभिरव्यग्रैरेका बुद्धिरुपास्यते ॥ ५
नानालिङ्गाश्रमस्थानां येषां बुद्धिः शमात्मिका ।
ते भावमेकमायान्ति सरितः सागरं यथा ॥ ६
बुद्ध्यायं गम्यते मार्गः शरीरेण न गम्यते ।
आद्यन्तवन्ति कर्माणि शरीरं कर्मबन्धनम् ॥ ७
तस्मात्ते सुभगे नास्ति परलोककृतं भयम् ।
मद्भावभावनिरता ममैवात्मानमेष्यसि ॥ ८

इति श्रीमहाभारते आश्वमेधिकपर्वणि
त्रयस्त्रिंशोऽध्यायः ॥ ३३

३४

ब्राह्मण्युवाच ।

नेदमल्पात्मना शक्यं वेदितुं नाकृतात्मना ।
बहु चाल्पं च संक्षिप्तं विप्लुतं च मतं मम ॥ १
उपायं तु मम ब्रूहि येनैषा लभ्यते मतिः ।
तन्मन्ये कारणतमं यत एषा प्रवर्तते ॥ २

ब्राह्मण उवाच ।

अरणीं ब्राह्मणीं विद्धि गुरुरस्योत्तरारणिः ।
तपःश्रुतेऽभिमथ्नीतो ज्ञानाग्निर्जायते ततः ॥ ३

ब्राह्मण्युवाच ।

यदिदं ब्रह्मणो लिङ्गं क्षेत्रज्ञमिति संज्ञितम् ।
ग्रहीतुं येन तच्छक्यं लक्षणं तस्य तत्क नु ॥ ४

ब्राह्मण उवाच ।

अलिङ्गो निर्गुणश्चैव कारणं नास्य विद्यते ।
उपायमेव वक्ष्यामि येन गृह्येत वा न वा ॥ ५
सम्यगप्युपदिष्टश्च भ्रमरैरिव लक्ष्यते ।
कर्मबुद्धिरबुद्धित्वाज्ज्ञानलिङ्गैरिवाश्रितम् ॥ ६
इदं कार्यमिदं नेति न मोक्षेषूपदिश्यते ।
पश्यतः शृण्वतो बुद्धिरात्मनो येषु जायते ॥ ७
यावन्त इह शक्येरंस्तावतोंऽशान्प्रकल्पयेत् ।
व्यक्तानव्यक्तरूपांश्च शतशोऽथ सहस्रशः ॥ ८
सर्वान्नानात्वयुक्तांश्च सर्वान्प्रत्यक्षहेतुकान् ।
यतः परं न विद्येत ततोऽभ्यासे भविष्यति ॥ ९

वासुदेव उवाच ।

ततस्तु तस्या ब्राह्मण्या मतिः क्षेत्रज्ञसंक्षये ।
क्षेत्रज्ञादेव परतः क्षेत्रज्ञोऽन्यः प्रवर्तते ॥ १०

अर्जुन उवाच ।

क नु सा ब्राह्मणी कृष्ण क चासौ ब्राह्मणर्षभः ।
याभ्यां सिद्धिरियं प्राप्ता तावुभौ वद मेऽच्युत ॥

वासुदेव उवाच ।

मनो मे ब्राह्मणं विद्धि बुद्धिं मे विद्धि ब्राह्मणीम् ।
क्षेत्रज्ञ इति यश्चोक्तः सोऽहमेव धनंजय ॥ १२

इति श्रीमहाभारते आश्वमेधिकपर्वणि
चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

३५

अर्जुन उवाच ।

ब्रह्म यत्परमं वेद्यं तन्मे व्याख्यातुमर्हसि ।
भवतो हि प्रसादेन सूक्ष्मे मे रमते मतिः ॥ १

वासुदेव उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
संवादं मोक्षसंयुक्तं शिष्यस्य गुरुणा सह ॥ २
कश्चिद्ब्राह्मणमासीनमाचार्यं संशितव्रतम् ।
शिष्यः पप्रच्छ मेधावी किंस्विच्छ्रेयः परंतप ॥ ३
भगवन्तं प्रपन्नोऽहं निःश्रेयसपरायणः ।

याचे त्वां शिरसा विप्र यद्ब्रूयां तद्विचक्ष्व मे ॥ ४
तमेवंवादिनं पार्थ शिष्यं गुरुरुवाच ह ।
कथयस्व प्रवक्ष्यामि यत्र ते संशयो द्विज ॥ ५
इत्युक्तः स कुरुश्रेष्ठ गुरुणा गुरुवत्सलः ।
प्राञ्जलिः परिपप्रच्छ यत्तच्छृणु महामते ॥ ६

शिष्य उवाच ।

कुतश्चाहं कुतश्च त्वं तत्सत्यं ब्रूहि यत्परम् ।
कुतो जातानि भूतानि स्थावराणि चराणि च ॥ ७
केन जीवन्ति भूतानि तेषामायुः किमात्मकम् ।
किं सत्यं किं तपो विप्र के गुणाः सद्भिरीरिताः ।
के पन्थानः शिवाः सन्ति किं सुखं किं च दुष्कृतम् ॥
एतान्मे भगवन्प्रश्नान्याथातथ्येन सत्तम ।
वक्तुमर्हसि विप्रर्षे यथावदिह तत्त्वतः ॥ ९

वासुदेव उवाच ।

तस्मै संप्रतिपन्नाय यथावत्परिपृच्छते ।
शिष्याय गुणयुक्ताय शान्ताय गुरुवर्तिने ।
छायाभूताय दान्ताय यतये ब्रह्मचारिणे ॥ १०
तान्प्रश्नानब्रवीत्पार्थ मेधावी स धृतव्रतः ।
गुरुः कुरुकुलश्रेष्ठ सम्यक्सर्वानरिंदम ॥ ११
ब्रह्मप्रोक्तमिदं धर्ममृषिप्रवरसेवितम् ।
वेदविद्यासमावाप्यं तत्त्वभूतार्थभावनम् ॥ १२
भूतभव्यभविष्यादिधर्मकामार्थनिश्चयम् ।
सिद्धसंघपरिज्ञातं पुराकल्पं सनातनम् ॥ १३
प्रवक्ष्येऽहं महाप्राज्ञ पदमुत्तममद्य ते ।
बुद्ध्वा यदिह संसिद्धा भवन्तीह मनीषिणः ॥ १४
उपगम्यर्षयः पूर्वं जिज्ञासन्तः परस्परम् ।
बृहस्पतिभरद्वाजौ गौतमो भार्गवस्तथा ॥ १५
वसिष्ठः काश्यपश्चैव विश्वामित्रोऽत्रिरेव च ।
मार्गान्सर्वान्परिक्रम्य परिश्रान्ताः स्वकर्मभिः ॥१६
ऋषिमाङ्गिरसं वृद्धं पुरस्कृत्य तु ते द्विजाः ।
ददृशुर्ब्रह्मभवने ब्रह्माणं वीतकल्मषम् ॥ १७
तं प्रणम्य महात्मानं सुखासीनं महर्षयः ।
पप्रच्छुर्विनयोपेता निःश्रेयसमिदं परम् ॥ १८
कथं कर्म क्रियात्साधु कथं मुच्येत किल्बिषात् ।
के नो मार्गाः शिवाश्च स्युः किं सत्यं किं च दुष्कृतम् ॥
केनोभौ कर्मपन्थानौ महत्त्वं केन विन्दति ।
प्रलयं चापवर्गं च भूतानां प्रभवाप्ययौ ॥ २०
इत्युक्तः स मुनिश्रेष्ठैर्यदाह प्रपितामहः ।
तत्तेऽहं संप्रवक्ष्यामि शृणु शिष्य यथागमम् ॥२१

ब्रह्मोवाच ।

सत्याद्भूतानि जातानि स्थावराणि चराणि च ।
तपसा तानि जीवन्ति इति तद्वित्त सुव्रताः ॥ २२
स्वां योनिं पुनरागम्य वर्तन्ते स्वेन कर्मणा ।
सत्यं हि गुणसंयुक्तं नियतं पञ्चलक्षणम् ॥ २३
ब्रह्म सत्यं तपः सत्यं सत्यं चैव प्रजापतिः ।
सत्याद्भूतानि जातानि भूतं सत्यमयं महत् ॥ २४
तस्मात्सत्याश्रया विप्रा नित्यं योगपरायणाः ।
अतीतक्रोधसंतापा नियता धर्मसेतवः ॥ २५
अन्योन्यनियतान्वैद्यान्धर्मसेतुप्रवर्तकान् ।
तानहं संप्रवक्ष्यामि शाश्वताल्लोकभावनान् ॥ २६
चातुर्विद्यं तथा वर्णांश्चतुरश्चाश्रमान्पृथक् ।
धर्ममेकं चतुष्पादं नित्यमाहुर्मनीषिणः ॥ २७
पन्थानं वः प्रवक्ष्यामि शिवं क्षेमकरं द्विजाः ।
नियतं ब्रह्मभावाय यातं पूर्वं मनीषिभिः ॥ २८
गदतस्तं ममाद्येह पन्थानं दुर्विदं परम् ।
निबोधत महाभागा निखिलेन परं पदम् ॥ २९
ब्रह्मचारिकमेवाहुराश्रमं प्रथमं पदम् ।
गार्हस्थ्यं तु द्वितीयं स्याद्वानप्रस्थमतः परम् ।
ततः परं तु विज्ञेयमध्यात्मं परमं पदम् ॥ ३०
ज्योतिराकाशमादित्यो वायुरिन्द्रः प्रजापतिः ।

नोपैति यावदध्यात्मं तावदेतान्न पश्यति ।
तस्योपायं प्रवक्ष्यामि पुरस्तात्तं निबोधत ॥ ३१
फलमूलानिलभुजां मुनीनां वसतां वने ।
वानप्रस्थं द्विजातीनां त्रयाणामुपदिश्यते ॥ ३२
सर्वेषामेव वर्णानां गार्हस्थ्यं तद्विधीयते ।
श्रद्धालक्षणमित्येवं धर्मं धीराः प्रचक्षते ॥ ३३
इत्येते देवयाना वः पन्थानः परिकीर्तिताः ।
सद्भिरध्यासिता धीरैः कर्मभिर्धर्मसेतवः ॥ ३४
एतेषां पृथगध्यास्ते यो धर्मं संशितव्रतः ।
कालात्पश्यति भूतानां सदैव प्रभवाप्ययौ ॥ ३५
अतस्तत्त्वानि वक्ष्यामि याथातथ्येन हेतुना ।
विषयस्थानि सर्वाणि वर्तमानानि भागशः ॥ ३६
महानात्मा तथाव्यक्तमहंकारस्तथैव च ।
इन्द्रियाणि दशैकं च महाभूतानि पञ्च च ॥ ३७
विशेषाः पञ्चभूतानामित्येषा वैदिकी श्रुतिः ।
चतुर्विंशतिरेषा वस्तत्त्वानां संप्रकीर्तिता ॥ ३८
तत्त्वानामथ यो वेद सर्वेषां प्रभवाप्ययौ ।
स धीरः सर्वभूतेषु न मोहमधिगच्छति ॥ ३९

तत्त्वानि यो वेदयते यथातथं
गुणांश्च सर्वानखिलाश्च देवताः ।
विधूतपाप्मा प्रविमुच्य बन्धनं
स सर्वलोकानमलान्समश्नुते ॥ ४०

इति श्रीमहाभारते आश्वमेधिकपर्वणि
पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

३६

ब्रह्मोवाच ।

तदव्यक्तमनुद्रिक्तं सर्वव्यापि ध्रुवं स्थिरम् ।
नवद्वारं पुरं विद्यात्त्रिगुणं पञ्चधातुकम् ॥ १
एकादशपरिक्षेपं मनो व्याकरणात्मकम् ।
बुद्धिस्वामिकमित्येतत्परमेकादशं भवेत् ॥ २
त्रीणि स्रोतांसि यान्यस्मिन्नाप्यायन्ते पुनः पुनः ।
प्रणाड्यस्तिस्र एवैताः प्रवर्तन्ते गुणात्मिकाः ॥ ३
तमो रजस्तथा सत्त्वं गुणानेतान्प्रचक्षते ।
अन्योन्यमिथुनाः सर्वे तथान्योन्यानुजीविनः ॥ ४
अन्योन्यापाश्रयाश्चैव तथान्योन्यानुवर्तिनः ।
अन्योन्यव्यतिषक्ताश्च त्रिगुणाः पञ्च धातवः ॥ ५
तमसो मिथुनं सत्त्वं सत्त्वस्य मिथुनं रजः ।
रजसश्चापि सत्त्वं स्यात्सत्त्वस्य मिथुनं तमः ॥ ६
नियम्यते तमो यत्र रजस्तत्र प्रवर्तते ।
नियम्यते रजो यत्र सत्त्वं तत्र प्रवर्तते ॥ ७
नैशात्मकं तमो विद्यात्त्रिगुणं मोहसंज्ञितम् ।
अधर्मलक्षणं चैव नियतं पापकर्मसु ॥ ८
प्रवृत्त्यात्मकमेवाहू रजः पर्यायकारकम् ।
प्रवृत्तं सर्वभूतेषु दृश्यतोत्पत्तिलक्षणम् ॥ ९
प्रकाशं सर्वभूतेषु लाघवं श्रद्दधानता ।
सात्त्विकं रूपमेवं तु लाघवं साधुसंमितम् ॥ १०
एतेषां गुणतत्त्वं हि वक्ष्यते हेत्वहेतुभिः ।
समासव्यासयुक्तानि तत्त्वतस्तानि वित्त मे ॥ ११
संमोहोऽज्ञानमत्यागः कर्मणामविनिर्णयः ।
स्वप्नः स्तम्भो भयं लोभः शोकः सुकृतदूषणम् ॥
अस्मृतिश्चाविपाकश्च नास्तिक्यं भिन्नवृत्तिता ।
निर्विशेषत्वमन्धत्वं जघन्यगुणवृत्तिता ॥ १३
अकृते कृतमानित्वमज्ञाने ज्ञानमानिता ।
अमैत्री विकृतो भावो अश्रद्धा मूढभावना ॥ १४
अनार्जवमसंज्ञत्वं कर्म पापमचेतना ।
गुरुत्वं सन्नभावत्वमसितत्वमवाग्गतिः ॥ १५
सर्व एते गुणा विप्रास्तामसाः संप्रकीर्तिताः ।
ये चान्ये नियता भावा लोकेऽस्मिन्मोहसंज्ञिताः ॥
तत्र तत्र नियम्यन्ते सर्वे ते तामसा गुणाः ।
परिवादकथा नित्यं देवब्राह्मणवैदिकाः ॥ १७

अत्यागश्चाभिमानश्च मोहो मन्युस्तथाक्षमा ।
मत्सरश्चैव भूतेषु तामसं वृत्तमिष्यते ॥ १८
वृथारम्भाश्च ये केचिद्वृथादानानि यानि च ।
वृथाभक्षणमित्येतत्तामसं वृत्तमिष्यते ॥ १९
अतिवादोऽतितिक्षा च मात्सर्यमतिमानिता ।
अश्रद्दधानता चैव तामसं वृत्तमिष्यते ॥ २०
एवंविधास्तु ये केचिल्लोकेऽस्मिन्पापकर्मिणः ।
मनुष्या भिन्नमर्यादाः सर्वे ते तामसा जनाः ॥२१
तेषां योनिं प्रवक्ष्यामि नियतां पापकर्मणाम् ।
अवाङ्निरयभावाय तिर्यङ्निरयगामिनः ॥ २२
स्थावराणि च भूतानि पशवो वाहनानि च ।
क्रव्यादा दन्दशूकाश्च कृमिकीटविहंगमाः ॥ २३
अण्डजा जन्तवो ये च सर्वे चापि चतुष्पदाः ।
उन्मत्ता बधिरा मूका ये चान्ये पापरोगिणः ॥२४
मग्नास्तमसि दुर्वृत्ताः स्वकर्मकृतलक्षणाः ।
अवाक्स्रोतस इत्येते मग्नास्तमसि तामसाः ॥ २५
तेषामुत्कर्षमुद्रेकं वक्ष्याम्यहमतः परम् ।
यथा ते सुकृताँल्लोकाँल्लभन्ते पुण्यकर्मिणः ॥ २६
अन्यथा प्रतिपन्नास्तु विवृद्धा ये च कर्मसु ।
स्वकर्मनिरतानां च ब्राह्मणानां शुभैषिणाम् ॥ २७
संस्कारेणोर्ध्वमायान्ति यतमानाः सलोकताम् ।
स्वर्गं गच्छन्ति देवानामित्येषा वैदिकी श्रुतिः ॥२८
अन्यथा प्रतिपन्नास्तु विवृद्धाः स्वेषु कर्मसु ।
पुनरावृत्तिधर्माणस्ते भवन्तीह मानुषाः ॥ २९
पापयोनिं समापन्नाश्चण्डाला मूकचूचुकाः ।
वर्णान्पर्यायशश्चापि प्राप्नुवन्त्युत्तरोत्तरम् ॥ ३०
शूद्रयोनिमतिक्रम्य ये चान्ये तामसा गुणाः ।
स्रोतोमध्ये समागम्य वर्तन्ते तामसे गुणे ॥ ३१
अभिषङ्गस्तु कामेषु महामोह इति स्मृतः ।
ऋषयो मुनयो देवा मुह्यन्त्यत्र सुखेप्सवः ॥ ३२
तमो मोहो महामोहस्तामिस्रः क्रोधसंज्ञितः ।
मरणं त्वन्धतामिस्रं तामिस्रं क्रोध उच्यते ॥ ३३
भावतो गुणतश्चैव योनितश्चैव तत्त्वतः ।
सर्वमेतत्तमो विप्राः कीर्तितं वो यथाविधि ॥ ३४
को न्वेतद्बुध्यते साधु को न्वेतत्साधु पश्यति ।
अतत्त्वे तत्त्वदर्शी यस्तमसस्तत्त्वलक्षणम् ॥ ३५
तमोगुणा वो बहुधा प्रकीर्तिता
यथावदुक्तं च तमः परावरम् ।
नरो हि यो वेद गुणानिमान्सदा
स तामसैः सर्वगुणैः प्रमुच्यते ॥ ३६

इति श्रीमहाभारते आश्वमेधिकपर्वणि
षट्त्रिंशोऽध्यायः ॥ ३६ ॥

३७

ब्रह्मोवाच ।

रजोऽहं वः प्रवक्ष्यामि याथातथ्येन सत्तमाः ।
निबोधत महाभागा गुणवृत्तं च सर्वशः ॥ १
संघातो रूपमायासः सुखदुःखे हिमातपौ ।
ऐश्वर्यं विग्रहः संधिर्हेतुवादोऽरतिः क्षमा ॥ २
बलं शौर्यं मदो रोषो व्यायामकलहावपि ।
ईर्ष्येप्सा पैशुनं युद्धं ममत्वं परिपालनम् ॥ ३
वधबन्धपरिक्लेशाः क्रयो विक्रय एव च ।
निकृन्त छिन्धि भिन्धीति परमर्मावकर्तनम् ॥ ४
उग्रं दारुणमाक्रोशः परवित्तानुशासनम् ।
लोकचिन्ता विचिन्ता च मत्सरः परिभावणम् ॥५
मृषावादो मृषादानं विकल्पः परिभाषणम् ।
निन्दा स्तुतिः प्रशंसा च प्रतापः परितर्पणम् ॥ ६
परिचर्या च शुश्रूषा सेवा तृष्णा व्यपाश्रयः ।
व्यूहोऽनयः प्रमादश्च परितापः परिग्रहः ॥ ७
संस्कारा ये च लोकेऽस्मिन्प्रवर्तन्ते पृथक्पृथक् ।
नृषु नारीषु भूतेषु द्रव्येषु शरणेषु च ॥ ८

संतापोऽप्रत्ययश्चैव व्रतानि नियमाश्च ये ।
प्रदानमाशीर्युक्तं च सततं मे भवत्विति ॥ ९
स्वधाकारो नमस्कारः स्वाहाकारो वषट्क्रिया ।
याजनाध्यापने चोभे तथैवाहुः परिग्रहम् ॥ १०
इदं मे स्यादिदं मे स्यात्स्नेहो गुणसमुद्भवः ।
अभिद्रोहस्तथा माया निकृतिर्मान एव च ॥ ११
स्तैन्यं हिंसा परीवादः परितापः प्रजागरः ।
स्तम्भो दम्भोऽथ रागश्च भक्तिः प्रीतिः प्रमोदनम् ॥
द्यूतं च जनवादश्च संबन्धाः स्त्रीकृताश्च ये ।
नृत्तवादित्रगीतानि प्रसङ्गा ये च केचन ।
सर्व एते गुणा विप्रा राजसाः संप्रकीर्तिताः ॥१३
भूतभव्यभविष्याणां भावानां भुवि भावनाः ।
त्रिवर्गनिरता नित्यं धर्मोऽर्थः काम इत्यपि ॥ १४
कामवृत्ताः प्रमोदन्ते सर्वकामसमृद्धिभिः ।
अर्वाक्स्रोतस इत्येते तैजसा रजसावृताः ॥ १५
अस्मिँल्लोके प्रमोदन्ते जायमानाः पुनः पुनः ।
प्रेत्यभाविकमीहन्त इह लौकिकमेव च ।
ददति प्रतिगृह्णन्ति जपन्त्यथ च जुह्वति ॥ १६

रजोगुणा वो बहुधानुकीर्तिता
यथावदुक्तं गुणवृत्तमेव च ।
नरो हि यो वेद गुणानिमान्सदा
स राजसैः सर्वगुणैर्विमुच्यते ॥ १७

इति श्रीमहाभारते आश्वमेधिकपर्वणि
सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

३८

ब्रह्मोवाच ।

अतः परं प्रवक्ष्यामि तृतीयं गुणमुत्तमम् ।
सर्वभूतहितं लोके सतां धर्ममनिन्दितम् ॥ १
आनन्दः प्रीतिरुद्रेकः प्राकाश्यं सुखमेव च ।
अकार्पण्यमसंरम्भः संतोषः श्रद्दधानता ॥ २
क्षमा धृतिरहिंसा च समता सत्यमार्जवम् ।
अक्रोधश्चानसूया च शौचं दाक्ष्यं पराक्रमः ॥ ३
मुधा ज्ञानं मुधा वृत्तं मुधा सेवा मुधा श्रमः ।
एवं यो युक्तधर्मः स्यात्सोऽमुत्रानन्त्यमश्नुते ॥ ४
निर्ममो निरहंकारो निराशीः सर्वतः समः ।
अकामहत इत्येष सतां धर्मः सनातनः ॥ ५
विश्रम्भो ह्रीस्तितिक्षा च त्यागः शौचमतन्द्रिता ।
आनृशंस्यमसंमोहो दया भूतेष्वपैशुनम् ॥ ६
हर्षस्तुष्टिर्विस्मयश्च विनयः साधुवृत्तता ।
शान्तिकर्म विशुद्धिश्च शुभा बुद्धिर्विमोचनम् ॥ ७
उपेक्षा ब्रह्मचर्यं च परित्यागश्च सर्वशः ।
निर्ममत्वमनाशीस्त्वमपरिक्रीतधर्मता ॥ ८
मुधा दानं मुधा यज्ञो मुधाधीतं मुधा व्रतम् ।
मुधा प्रतिग्रहश्चैव मुधा धर्मो मुधा तपः ॥ ९
एवंवृत्तास्तु ये केचिल्लोकेऽस्मिन्सत्त्वसंश्रयाः ।
ब्राह्मणा ब्रह्मयोनिस्थास्ते धीराः साधुदर्शिनः ॥१०
हित्वा सर्वाणि पापानि निःशोका ह्यजरामराः ।
दिवं प्राप्य तु ते धीराः कुर्वते वै ततस्ततः ॥ ११
ईशित्वं च वशित्वं च लघुत्वं मनसश्च ते ।
विकुर्वते महात्मानो देवास्त्रिदिवगा इव ॥ १२
ऊर्ध्वस्रोतस इत्येते देवा वैकारिकाः स्मृताः ।
विकुर्वते प्रकृत्या वै दिवं प्राप्तास्ततस्ततः ।
यद्यदिच्छन्ति तत्सर्वं भजन्ते विभजन्ति च ॥
इत्येतत्सात्त्विकं वृत्तं कथितं वो द्विजर्षभाः ।
एतद्विज्ञाय विधिवल्लभते यद्यदिच्छति ॥ १४

प्रकीर्तिताः सत्त्वगुणा विशेषतो
यथावदुक्तं गुणवृत्तमेव च ।
नरस्तु यो वेद गुणानिमान्सदा

गुणान्स भुङ्क्ते न गुणैः स भुज्यते ॥ ५१

इति श्रीमहाभारते आश्वमेधिकपर्वणि
अष्टात्रिंशोऽध्यायः ॥ ३८ ॥

३९

ब्रह्मोवाच ।

नैव शक्या गुणा वक्तुं पृथक्त्वेनेह सर्वशः ।
अविच्छिन्नानि दृश्यन्ते रजः सत्त्वं तमस्तथा ॥ १
अन्योन्यमनुषज्जन्ते अन्योन्यं चानुजीविनः ।
अन्योन्यापाश्रयाः सर्वे तथान्योन्यानुवर्तिनः ॥ २
यावत्सत्त्वं तमस्तावद्वर्तते नात्र संशयः ।
यावत्तमश्च सत्त्वं च रजस्तावदिहोच्यते ॥ ३
संहत्य कुर्वते यात्रां सहिताः संघचारिणः ।
संघातवृत्तयो ह्येते वर्तन्ते हेत्वहेतुभिः ॥ ४
उद्रेकव्यतिरेकाणां तेषामन्योन्यवर्तिनाम् ।
वर्तते तद्यथान्यूनं व्यतिरिक्तं च सर्वशः ॥ ५
व्यतिरिक्तं तमो यत्र तिर्यग्भावगतं भवेत् ।
अल्पं तत्र रजो ज्ञेयं सत्त्वं चाल्पतरं ततः ॥ ६
उद्रिक्तं च रजो यत्र मध्यस्रोतोगतं भवेत् ।
अल्पं तत्र तमो ज्ञेयं सत्त्वं चाल्पतरं ततः ॥ ७
उद्रिक्तं च यदा सत्त्वमूर्ध्वस्रोतोगतं भवेत् ।
अल्पं तत्र रजो ज्ञेयं तमश्चाल्पतरं ततः ॥ ८
सत्त्वं वैकारिकं योनिरिन्द्रियाणां प्रकाशिका ।
न हि सत्त्वात्परो भावः कश्चिदन्यो विधीयते ॥ ९
ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणसंयुक्ता यान्त्यधस्तामसा जनाः ॥ १०
तमः शूद्रे रजः क्षत्रे ब्राह्मणे सत्त्वमुत्तमम् ।
इत्येवं त्रिषु वर्णेषु विवर्तन्ते गुणास्त्रयः ॥ ११
दूरादपि हि दृश्यन्ते सहिताः संघचारिणः ।
तमः सत्त्वं रजश्चैव पृथक्त्वं नानुशुश्रुम ॥ १२
दृष्ट्वा चादित्यमुद्यन्तं कुचोराणां भयं भवेत् ।
अध्वगाः परितप्येरंस्तृष्णार्ता दुःखभागिनः ॥ १३
आदित्यः सत्त्वमुद्दिष्टं कुचोरास्तु यथा तमः ।
परितापोऽध्वगानां च राजसो गुण उच्यते ॥ १४
प्राकाश्यं सत्त्वमादित्ये संतापो राजसो गुणः ।
उपप्लवस्तु विज्ञेयस्तामसस्तस्य पर्वसु ॥ १५
एवं ज्योतिःषु सर्वेषु विवर्तन्ते गुणास्त्रयः ।
पर्यायेण च वर्तन्ते तत्र तत्र तथा तथा ॥ १६
स्थावरेषु च भूतेषु तिर्यग्भावगतं तमः ।
राजसास्तु विवर्तन्ते स्नेहभावस्तु सात्त्विकः ॥ १७
अहस्त्रिधा तु विज्ञेयं त्रिधा रात्रिर्विधीयते ।
मासार्धमासवर्षाणि ऋतवः संधयस्तथा ॥ १८
त्रिधा दानानि दीयन्ते त्रिधा यज्ञः प्रवर्तते ।
त्रिधा लोकास्त्रिधा वेदास्त्रिधा विद्यास्त्रिधा गतिः ॥
भूतं भव्यं भविष्यच्च धर्मोऽर्थः काम इत्यपि ।
प्राणापानावुदानश्चाप्येत एव त्रयो गुणाः ॥ २०
यत्किंचिदिह वै लोके सर्वमेष्वेव तत्त्रिषु ।
त्रयो गुणाः प्रवर्तन्ते अव्यक्ता नित्यमेव तु ।
सत्त्वं रजस्तमश्चैव गुणसर्गः सनातनः ॥ २१
तमोऽव्यक्तं शिवं नित्यमजं योनिः सनातनः ।
प्रकृतिर्विकारः प्रलयः प्रधानं प्रभवाप्ययौ ॥ २२
अनुद्रिक्तमनूनं च ह्यकम्पमचलं ध्रुवम् ।
सदसच्चैव तत्सर्वमव्यक्तं त्रिगुणं स्मृतम् ।
ज्ञेयानि नामधेयानि नरैरध्यात्मचिन्तकैः ॥ २३
अव्यक्तनामानि गुणांश्च तत्त्वतो
यो वेद सर्वाणि गतीश्च केवलाः ।
विमुक्तदेहः प्रविभागतत्त्ववि-
त्स मुच्यते सर्वगुणैर्निरामयः ॥ २४

इति श्रीमहाभारते आश्वमेधिकपर्वणि
एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

४०

ब्रह्मोवाच ।

अव्यक्तात्पूर्वमुत्पन्नो महानात्मा महामतिः ।
आदिर्गुणानां सर्वेषां प्रथमः सर्ग उच्यते ॥ १
महानात्मा मतिर्विष्णुर्विश्वः शंभुश्च वीर्यवान् ।
बुद्धिः प्रज्ञोपलब्धिश्च तथा ख्यातिर्धृतिः स्मृतिः ॥
पर्यायवाचकैः शब्दैर्महानात्मा विभाव्यते ।
तं जानन्ब्राह्मणो विद्वान्न प्रमोहं निगच्छति ॥ ३
सर्वतःपाणिपादश्च सर्वतोक्षिशिरोमुखः ।
सर्वतःश्रुतिमाँल्लोके सर्वं व्याप्य स तिष्ठति ॥ ४
महाप्रभार्चिः पुरुषः सर्वस्य हृदि निश्रितः ।
अणिमा लघिमा प्राप्तिरीशानो ज्योतिरव्ययः ॥ ५
तत्र बुद्धिमतां लोकाः संन्यासनिरताश्च ये ।
ध्यानिनो नित्ययोगाश्च सत्यसंधा जितेन्द्रियाः ॥६
ज्ञानवन्तश्च ये केचिदलुब्धा जितमन्यवः ।
प्रसन्नमनसो धीरा निर्ममा निरहंकृताः ।
विमुक्ताः सर्व एवैते महत्त्वमुपयान्ति वै ॥ ७
आत्मनो महतो वेद यः पुण्यां गतिमुत्तमाम् ।
स धीरः सर्वलोकेषु न मोहमधिगच्छति ।
विष्णुरेवादिसर्गेषु स्वयंभूर्भवति प्रभुः ॥ ८
एवं हि यो वेद गुहाशयं प्रभुं
नरः पुराणं पुरुषं विश्वरूपम् ।
हिरण्मयं बुद्धिमतां परां गतिं
स बुद्धिमान्बुद्धिमतीत्य तिष्ठति ॥ ९

इति श्रीमहाभारते आश्वमेधिकपर्वणि
चत्वारिंशोऽध्यायः ॥ ४० ॥

४१

ब्रह्मोवाच ।

य उत्पन्नो महान्पूर्वमहंकारः स उच्यते ।
अहमित्येव संभूतो द्वितीयः सर्ग उच्यते ॥ १
अहंकारश्च भूतादिर्वैकारिक इति स्मृतः ।
तेजसश्चेतना धातुः प्रजासर्गः प्रजापतिः ॥ २
देवानां प्रभवो देवो मनसश्च त्रिलोककृत् ।
अहमित्येव तत्सर्वमभिमन्ता स उच्यते ॥ ३
अध्यात्मज्ञाननित्यानां मुनीनां भावितात्मनाम् ।
स्वाध्यायक्रतुसिद्धानामेष लोकः सनातनः ॥ ४
अहंकारेणाहरतो गुणानिमा-
न्भूतादिरेवं सृजते स भूतकृत् ।
वैकारिकः सर्वमिदं विचेष्टते
स्वतेजसा रञ्जयते जगत्तथा ॥ ५

इति श्रीमहाभारते आश्वमेधिकपर्वणि
एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

४२

ब्रह्मोवाच ।

अहंकारात्प्रसूतानि महाभूतानि पञ्च वै ।
पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमम् ॥ १
तेषु भूतानि मुह्यन्ते महाभूतेषु पञ्चसु ।
शब्दस्पर्शनरूपेषु रसगन्धक्रियासु च ॥ २
महाभूतविनाशान्ते प्रलये प्रत्युपस्थिते ।
सर्वप्राणभृतां धीरा महदुत्पद्यते भयम् ॥ ३
यद्यस्माज्जायते भूतं तत्र तत्प्रविलीयते ।
लीयन्ते प्रतिलोमानि जायन्ते चोत्तरोत्तरम् ॥ ४
ततः प्रलीने सर्वस्मिन्भूते स्थावरजङ्गमे ।
स्मृतिमन्तस्तदा धीरा न लीयन्ते कदाचन ॥ ५
शब्दः स्पर्शस्तथा रूपं रसो गन्धश्च पञ्चमः ।
क्रियाकारणयुक्ताः स्युरनित्या मोहसंज्ञिताः ॥ ६
लोभप्रजनसंयुक्ता निर्विशेषा ह्यकिंचनाः ।
मांसशोणितसंघाता अन्योन्यस्योपजीविनः ॥ ७
बहिरात्मान इत्येते दीनाः कृपणवृत्तयः ।
प्राणापानावुदानश्च समानो व्यान एव च ॥ ८

अन्तरात्मेति चाप्येते नियताः पञ्च वायवः ।
वाङ्मनोबुद्धिरित्येभिः सार्धमष्टात्मकं जगत् ॥ ९
त्वग्घ्राणश्रोत्रचक्षूंषि रसनं वाक्च संयता ।
विशुद्धं च मनो यस्य बुद्धिश्चाव्यभिचारिणी ॥१०
अष्टौ यस्याग्नयो ह्येते न दहन्ते मनः सदा ।
स तद्ब्रह्म शुभं याति यस्माद्भूयो न विद्यते ॥ ११
एकादश च यान्याहुरिन्द्रियाणि विशेषतः ।
अहंकारप्रसूतानि तानि वक्ष्याम्यहं द्विजाः ॥ १२
श्रोत्रं त्वक्चक्षुषी जिह्वा नासिका चैव पञ्चमी ।
पादौ पायुरुपस्थं च हस्तौ वाग्दशमी भवेत् ॥१३
इन्द्रियग्राम इत्येष मन एकादशं भवेत् ।
एतं ग्रामं जयेत्पूर्वं ततो ब्रह्म प्रकाशते ॥ १४
बुद्धीन्द्रियाणि पञ्चाहुः पञ्च कर्मेन्द्रियाणि च ।
श्रोत्रादीन्यपि पञ्चाहुर्बुद्धियुक्तानि तत्त्वतः ॥ १५
अविशेषाणि चान्यानि कर्मयुक्तानि तानि तु ।
उभयत्र मनो ज्ञेयं बुद्धिर्द्वादशमी भवेत् ॥ १६
इत्युक्तानीन्द्रियाणीमान्येकादश मया क्रमात् ।
मन्यन्ते कृतमित्येव विदित्वैतानि पण्डिताः ॥ १७
त्रीणि स्थानानि भूतानां चतुर्थं नोपपद्यते ।
स्थलमापस्तथाकाशं जन्म चापि चतुर्विधम् ॥ १८
अण्डजोद्भिज्जसंस्वेदजरायुजमथापि च ।
चतुर्धा जन्म इत्येतद्भूतग्रामस्य लक्ष्यते ॥ १९
अचराण्यपि भूतानि खेचराणि तथैव च ।
अण्डजानि विजानीयात्सर्वांश्चैव सरीसृपान् ॥२०
संस्वेदाः कृमयः प्रोक्ता जन्तवश्च तथाविधाः ।
जन्म द्वितीयमित्येतज्जघन्यतरमुच्यते ॥ २१
भित्त्वा तु पृथिवीं यानि जायन्ते कालपर्ययात् ।
उद्भिज्जानीति तान्याहुर्भूतानि द्विजसत्तमाः ॥ २२
द्विपादबहुपादानि तिर्यग्गतिमतीनि च ।
जरायुजानि भूतानि वित्त तान्यपि सत्तमाः ॥२३
द्विविधापीह विज्ञेया ब्रह्मयोनिः सनातना ।
तपः कर्म च यत्पुण्यमित्येष विदुषां नयः ॥ २४
द्विविधं कर्म विज्ञेयमिज्या दानं च यन्मखे ।
जातस्याध्ययनं पुण्यमिति वृद्धानुशासनम् ॥ २५
एतद्यो वेद विधिवत्स मुक्तः स्याद्द्विजर्षभाः ।
विमुक्तः सर्वपापेभ्य इति चैव निबोधत ॥ २६
आकाशं प्रथमं भूतं श्रोत्रमध्यात्ममुच्यते ।
अधिभूतं तथा शब्दो दिशस्तत्राधिदैवतम् ॥ २७
द्वितीयं मारुतो भूतं त्वगध्यात्मं च विश्रुतम् ।
स्प्रष्टव्यमधिभूतं च विद्युत्तत्राधिदैवतम् ॥ २८
तृतीयं ज्योतिरित्याहुश्चक्षुरध्यात्ममुच्यते ।
अधिभूतं ततो रूपं सूर्यस्तत्राधिदैवतम् ॥ २९
चतुर्थमापो विज्ञेयं जिह्वा चाध्यात्ममिष्यते ।
अधिभूतं रसश्चात्र सोमस्तत्राधिदैवतम् ॥ ३०
पृथिवी पञ्चमं भूतं घ्राणश्चाध्यात्ममिष्यते ।
अधिभूतं तथा गन्धो वायुस्तत्राधिदैवतम् ॥ ३१
एष पञ्चसु भूतेषु चतुष्टयविधिः स्मृतः ।
अतः परं प्रवक्ष्यामि सर्वं त्रिविधमिन्द्रियम् ॥ ३२
पादावध्यात्ममित्याहुर्ब्राह्मणास्तत्त्वदर्शिनः ।
अधिभूतं तु गन्तव्यं विष्णुस्तत्राधिदैवतम् ॥ ३३
अवाग्गतिरपानश्च पायुरध्यात्ममिष्यते ।
अधिभूतं विसर्गश्च मित्रस्तत्राधिदैवतम् ३४
प्रजनः सर्वभूतानामुपस्थोऽध्यात्ममुच्यते ।
अधिभूतं तथा शुक्रं दैवतं च प्रजापतिः ॥ ३५
हस्तावध्यात्ममित्याहुरध्यात्मविदुषो जनाः ।
अधिभूतं तु कर्माणि शक्रस्तत्राधिदैवतम् ॥ ३६
वैश्वदेवी मनःपूर्वा वागध्यात्मं सिहोच्यते ।
वक्तव्यमधिभूतं च वह्निस्तत्राधिदैवतम् ॥ ३७
अध्यात्मं मन इत्याहुः पञ्चभूतानुचारकम् ।
अधिभूतं च मन्तव्यं चन्द्रमाश्चाधिदैवतम् ॥ ३८

अध्यात्मं बुद्धिरित्याहुः षडिन्द्रियविचारिणी ।
अधिभूतं तु विज्ञेयं ब्रह्मा तत्राधिदैवतम् ॥ ३९
यथावदध्यात्मविधिरेष वः कीर्तितो मया ।
ज्ञानमस्य हि धर्मज्ञाः प्राप्तं बुद्धिमतामिह ॥ ४०
इन्द्रियाणीन्द्रियार्थाश्च महाभूतानि पञ्च च ।
सर्वाण्येतानि संधाय मनसा संप्रधारयेत् ॥ ४१
क्षीणे मनसि सर्वस्मिन्न जन्मसुखमिष्यते ।
ज्ञानसंपन्नसत्त्वानां तत्सुखं विदुषां मतम् ॥ ४२
अतः परं प्रवक्ष्यामि सूक्ष्मभावकरीं शिवाम् ।
निवृत्तिं सर्वभूतेषु मृदुना दारुणेन वा ॥ ४३
गुणागुणमनासङ्गमेकचर्यमनन्तरम् ।
एतद्ब्राह्मणतो वृत्तमाहुरेकपदं सुखम् ॥ ४४
विद्वान्कूर्म इवाङ्गानि कामान्संहृत्य सर्वशः ।
विरजाः सर्वतो मुक्तो यो नरः स सुखी सदा ॥
कामानात्मनि संयम्य क्षीणतृष्णः समाहितः ।
सर्वभूतसुहृन्मैत्रो ब्रह्मभूयं स गच्छति ॥ ४६
इन्द्रियाणां निरोधेन सर्वेषां विषयैषिणाम् ।
मुनेर्जनपदत्यागादध्यात्माग्निः समिध्यते ॥ ४७
यथाग्निरिन्धनैरिद्धो महाज्योतिः प्रकाशते ।
तथेन्द्रियनिरोधेन महानात्मा प्रकाशते ॥ ४८
यदा पश्यति भूतानि प्रसन्नात्मात्मनो हृदि ।
स्वयंयोनिस्तदा सूक्ष्मात्सूक्ष्ममाप्नोत्यनुत्तमम् ॥ ४९
अग्नी रूपं पयः स्रोतो वायुः स्पर्शनमेव च ।
मही पङ्कधरं घोरमाकाशं श्रवणं तथा ॥ ५०
रागशोकसमाविष्टं पञ्चस्रोतःसमावृतम् ।
पञ्चभूतसमायुक्तं नवद्वारं द्विदैवतम् ॥ ५१
रजस्वलमथादृश्यं त्रिगुणं च त्रिधातुकम् ।
संसर्गाभिरतं मूढं शरीरमिति धारणा ॥ ५२
दुश्चरं जीवलोकेऽस्मिन्सत्त्वं प्रति समाश्रितम् ।
एतदेव हि लोकेऽस्मिन्कालचक्रं प्रवर्तते ॥ ५३
एतन्महार्णवं घोरमगाधं मोहसंज्ञितम् ।
विसृजेत्संक्षिपेच्चैव बोधयेत्सामरं जगत् ॥ ५४
कामक्रोधौ भयं मोहमभिद्रोहमथानृतम् ।
इन्द्रियाणां निरोधेन स तांस्त्यजति दुस्त्यजान् ॥
यस्यैते निर्जिता लोके त्रिगुणाः पञ्च धातवः ।
व्योम्नि तस्य परं स्थानमनन्तमथ लक्ष्यते ॥ ५६
कामकूलामपारान्तां मनःस्रोतोभयावहाम् ।
नदीं दुर्गह्रदां तीर्णः कामक्रोधावुभौ जयेत् ॥ ५७
स सर्वदोषनिर्मुक्तस्ततः पश्यति यत्परम् ।
मनो मनसि संधाय पश्यत्यात्मानमात्मनि ॥ ५८
सर्ववित्सर्वभूतेषु वीक्षत्यात्मानमात्मनि ।
एकधा बहुधा चैव विकुर्वाणस्ततस्ततः ॥ ५९
ध्रुवं पश्यति रूपाणि दीपाद्दीपशतं यथा ।
स वै विष्णुश्च मित्रश्च वरुणोऽग्निः प्रजापतिः ॥
स हि धाता विधाता च स प्रभुः सर्वतोमुखः ।
हृदयं सर्वभूतानां महानात्मा प्रकाशते ॥ ६१
तं विप्रसंघाश्च सुरासुराश्च
यक्षाः पिशाचाः पितरो वयांसि ।
रक्षोगणा भूतगणाश्च सर्वे
महर्षयश्चैव सदा स्तुवन्ति ॥ ६२

इति श्रीमहाभारते आश्वमेधिकपर्वणि
द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

४३

ब्रह्मोवाच ।

मनुष्याणां तु राजन्यः क्षत्रियो मध्यमो गुणः ।
कुञ्जरो वाहनानां च सिंहश्चारण्यवासिनाम् ॥ १
अविः पशूनां सर्वेषामाखुश्च बिलवासिनाम् ।
गवां गोवृषभश्चैव स्त्रीणां पुरुष एव च ॥ २
न्यग्रोधो जम्बुवृक्षश्च पिप्पलः शाल्मलिस्तथा ।
शिंशपा मेषशृङ्गश्च तथा कीचकवेणवः ।

एते द्रुमाणां राजानो लोकेऽस्मिन्नात्र संशयः ॥ ३
हिमवान्पारियात्रश्च सह्यो विन्ध्यस्त्रिकूटवान् ।
श्वेतो नीलश्च भासश्च काष्ठवांश्चैव पर्वतः ॥ ४
शुभस्कन्धो महेन्द्रश्च माल्यवान्पर्वतस्तथा ।
एते पर्वतराजानो गणानां मरुतस्तथा ॥ ५
सूर्यो ग्रहाणामधिपो नक्षत्राणां च चन्द्रमाः ।
यमः पितॄणामधिपः सरितामथ सागरः ॥ ६
अम्भसां वरुणो राजा सत्त्वानां मित्र उच्यते ।
अर्कोऽधिपतिरुष्णानां ज्योतिषामिन्दुरुच्यते ॥ ७
अग्निर्भूतपतिर्नित्यं ब्राह्मणानां बृहस्पतिः ।
ओषधीनां पतिः सोमो विष्णुर्बलवतां वरः ॥ ८
त्वष्टाधिराजो रूपाणां पशूनामीश्वरः शिवः ।
दक्षिणानां तथा यज्ञो वेदानामृषयस्तथा ॥ ९
दिशामुदीची विप्राणां सोमो राजा प्रतापवान् ।
कुबेरः सर्वयक्षाणां देवतानां पुरंदरः ।
एष भूतादिकः सर्गः प्रजानां च प्रजापतिः ॥१०
सर्वेषामेव भूतानामहं ब्रह्ममयो महान् ।
भूतं परतरं मत्तो विष्णोर्वापि न विद्यते ॥ ११
राजाधिराजः सर्वासां विष्णुर्ब्रह्ममयो महान् ।
ईश्वरं तं विजानीमः स विभुः स प्रजापतिः ॥१२
नरकिंनरयक्षाणां गन्धर्वोरगरक्षसाम् ।
देवदानवनागानां सर्वेषामीश्वरो हि सः ॥ १३
भगदेवानुयातानां सर्वासां वामलोचना ।
माहेश्वरी महादेवी प्रोच्यते पार्वतीति या ॥ १४
उमां देवीं विजानीत नारीणामुत्तमां शुभाम् ।
रतीनां वसुमत्यस्तु स्त्रीणामप्सरसस्तथा ॥ १५
धर्मकामाश्च राजानो ब्राह्मणा धर्मलक्षणाः ।
तस्माद्राजा द्विजातीनां प्रयतेतेह रक्षणे ॥ १६
राज्ञां हि विषये येषामवसीदन्ति साधवः ।
हीनास्ते स्वगुणैः सर्वैः प्रेत्यावाङ्मार्गगामिनः ॥१७
राज्ञां तु विषये येषां साधवः परिरक्षिताः ।
तेऽस्मिँल्लोके प्रमोदन्ते प्रेत्य चानन्त्यमेव च ।
प्राप्नुवन्ति महात्मान इति वित्त द्विजर्षभाः ॥ १८
अत ऊर्ध्वं प्रवक्ष्यामि नियतं धर्मलक्षणम् ।
अहिंसालक्षणो धर्मो हिंसा चाधर्मलक्षणा ॥ १९
प्रकाशलक्षणा देवा मनुष्याः कर्मलक्षणाः ।
शब्दलक्षणमाकाशं वायुस्तु स्पर्शलक्षणः ॥ २०
ज्योतिषां लक्षणं रूपमापश्च रसलक्षणाः ।
धरणी सर्वभूतानां पृथिवी गन्धलक्षणा ॥ २१
स्वरव्यञ्जनसंस्कारा भारती सत्यलक्षणा ।
मनसो लक्षणं चिन्ता तथोक्ता बुद्धिरन्वयात् ॥२२
मनसा चिन्तयानोऽर्थान्बुद्ध्या चैव व्यवस्यति ।
बुद्धिर्हि व्यवसायेन लक्ष्यते नात्र संशयः ॥ २३
लक्षणं महतो ध्यानमव्यक्तं साधुलक्षणम् ।
प्रवृत्तिलक्षणो योगो ज्ञानं संन्यासलक्षणम् ॥ २४
तस्माज्ज्ञानं पुरस्कृत्य संन्यसेदिह बुद्धिमान् ।
संन्यासी ज्ञानसंयुक्तः प्राप्नोति परमां गतिम् ।
अतीतोऽद्वंद्वमभ्येति तमोमृत्युजरातिगम् ॥ २५
धर्मलक्षणसंयुक्तमुक्तं वो विधिवन्मया ।
गुणानां ग्रहणं सम्यग्वक्ष्याम्यहमतः परम् ॥ २६
पार्थिवो यस्तु गन्धो वै घ्राणेनेह स गृह्यते ।
घ्राणस्थश्च तथा वायुर्गन्धज्ञाने विधीयते ॥ २७
अपां धातुरसो नित्यं जिह्वया स तु गृह्यते ।
जिह्वास्थश्च तथा सोमो रसज्ञाने विधीयते ॥ २८
ज्योतिषश्च गुणो रूपं चक्षुषा तच्च गृह्यते ।
चक्षुःस्थश्च तथादित्यो रूपज्ञाने विधीयते॥ २९
वायव्यस्तु तथा स्पर्शस्त्वचा प्रज्ञायते च सः ।
त्वक्स्थश्चैव तथा वायुः स्पर्शज्ञाने विधीयते ॥ ३०
आकाशस्य गुणो घोषः श्रोत्रेण स तु गृह्यते ।
श्रोत्रस्थाश्च दिशः सर्वाः शब्दज्ञाने प्रकीर्तिताः ॥३१

मनसस्तु गुणश्चिन्ता प्रज्ञया स तु गृह्यते ।
हृदिस्थचेतनाधातुर्मनोज्ञाने विधीयते ॥ ३२
बुद्धिरध्यवसायेन ध्यानेन च महांस्तथा ।
निश्चित्य ग्रहणं नित्यमव्यक्तं नात्र संशयः ॥ ३३
अलिङ्गग्रहणो नित्यः क्षेत्रज्ञो निर्गुणात्मकः ।
तस्मादलिङ्गः क्षेत्रज्ञः केवलं ज्ञानलक्षणः ॥ ३४
अव्यक्तं क्षेत्रमुद्दिष्टं गुणानां प्रभवाप्ययम् ।
सदा पश्याम्यहं लीनं विजानामि शृणोमि च ॥
पुरुषस्तद्विजानीते तस्मात्क्षेत्रज्ञ उच्यते ।
गुणवृत्तं तथा कृत्स्नं क्षेत्रज्ञः परिपश्यति ॥ ३६
आदिमध्यावसानान्तं सृज्यमानमचेतनम् ।
न गुणा विदुरात्मानं सृज्यमानं पुनः पुनः ॥ ३७
न सत्यं वेद वै कश्चित्क्षेत्रज्ञस्त्वेव विन्दति ।
गुणानां गुणभूतानां यत्परं परतो महत् ॥ ३८
तस्माद्गुणांश्च तत्त्वं च परित्यज्येह तत्त्ववित् ।
क्षीणदोषो गुणान्हित्वा क्षेत्रज्ञं प्रविशत्यथ ॥ ३९
निर्द्वंद्वो निर्नमस्कारो निःस्वधाकार एव च ।
अचलश्चानिकेतश्च क्षेत्रज्ञः स परो विभुः ॥ ४०

इति श्रीमहाभारते आश्वमेधिकपर्वणि
त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

४४

ब्रह्मोवाच ।

यदादिमध्यपर्यन्तं ग्रहणोपायमेव च ।
नामलक्षणसंयुक्तं सर्वं वक्ष्यामि तत्त्वतः ॥ १
अहः पूर्वं ततो रात्रिर्मासाः शुक्लादयः स्मृताः ।
श्रविष्ठादीनि ऋक्षाणि ऋतवः शिशिरादयः ॥ २
भूमिरादिस्तु गन्धानां रसानामाप एव च ।
रूपाणां ज्योतिरादिस्तु स्पर्शादिर्वायुरुच्यते ।
शब्दस्यादिस्तथाकाशमेष भूतकृतो गुणः ॥ ३
अतः परं प्रवक्ष्यामि भूतानामादिमुत्तमम् ।
आदित्यो ज्योतिषामादिरग्निर्भूतादिरिष्यते ॥ ४
सावित्री सर्वविद्यानां देवतानां प्रजापतिः ।
ओंकारः सर्ववेदानां वचसां प्राण एव च ।
यद्यस्मिन्नियतं लोके सर्वं सावित्रमुच्यते ॥ ५
गायत्री छन्दसामादिः पशूनामज उच्यते ।
गावश्चतुष्पदामादिर्मनुष्याणां द्विजातयः ॥ ६
श्येनः पतत्रिणामादिर्यज्ञानां हुतमुत्तमम् ।
परिसर्पिणां तु सर्वेषां ज्येष्ठः सर्पो द्विजोत्तमाः ॥
कृतमादिर्युगानां च सर्वेषां नात्र संशयः ।
हिरण्यं सर्वरत्नानामोषधीनां यवास्तथा ॥ ८
सर्वेषां भक्ष्यभोज्यानामन्नं परममुच्यते ।
द्रवाणां चैव सर्वेषां पेयानामाप उत्तमाः ॥ ९
स्थावराणां च भूतानां सर्वेषामविशेषतः ।
ब्रह्मक्षेत्रं सदा पुण्यं प्लक्षः प्रथमजः स्मृतः ॥ १०
अहं प्रजापतीनां च सर्वेषां नात्र संशयः ।
मम विष्णुरचिन्त्यात्मा स्वयंभूरिति स स्मृतः ॥११
पर्वतानां महामेरुः सर्वेषामग्रजः स्मृतः ।
दिशां च प्रदिशां चोर्ध्वा दिग्जाता प्रथमं तथा ॥
तथा त्रिपथगा गङ्गा नदीनामग्रजा स्मृता ।
तथा सरोदपानानां सर्वेषां सागरोऽग्रजः ॥ १३
देवदानवभूतानां पिशाचोरगरक्षसाम् ।
नरकिंनरयक्षाणां सर्वेषामीश्वरः प्रभुः ॥ १४
आदिर्विश्वस्य जगतो विष्णुर्ब्रह्ममयो महान् ।
भूतं परतरं तस्मात्त्रैलोक्ये नेह विद्यते ॥ १५
आश्रमाणां च गार्हस्थ्यं सर्वेषां नात्र संशयः ।
लोकानामादिरव्यक्तं सर्वस्यान्तस्तदेव च ॥ १६
अहान्यस्तमयान्तानि उदयान्ता च शर्वरी ।
सुखस्यान्तः सदा दुःखं दुःखस्यान्तः सदा सुखम् ॥
सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः ।
संयोगा विप्रयोगान्ता मरणान्तं हि जीवितम् ॥१८

सर्वं कृतं विनाशान्तं जातस्य मरणं ध्रुवम् ।
अशाश्वतं हि लोकेऽस्मिन्सर्वं स्थावरजङ्गमम् ॥१९
इष्टं दत्तं तपोऽधीतं व्रतानि नियमाश्च ये ।
सर्वमेतद्विनाशान्तं ज्ञानस्यान्तो न विद्यते ॥ २०
तस्माज्ज्ञानेन शुद्धेन प्रसन्नात्मा समाहितः ।
निर्ममो निरहंकारो मुच्यते सर्वपाप्मभिः ॥ २१

इति श्रीमहाभारते आश्वमेधिकपर्वणि
चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

४५

ब्रह्मोवाच ।

बुद्धिसारं मनस्तम्भमिन्द्रियग्रामबन्धनम् ।
महाभूतारविष्कम्भं निमेषपरिवेष्टनम् ॥ १
जराशोकसमाविष्टं व्याधिव्यसनसंचरम् ।
देशकालविचारीदं श्रमव्यायामनिस्वनम् ॥ २
अहोरात्रपरिक्षेपं शीतोष्णपरिमण्डलम् ।
सुखदुःखान्तसंक्लेशं क्षुत्पिपासावकीलनम् ॥ ३
छायातपविलेखं च निमेषोन्मेषविह्वलम् ।
घोरमोहजनाकीर्णं वर्तमानमचेतनम् ॥ ४
मासार्धमासगणितं विषमं लोकसंचरम् ।
तमोनिचयपङ्कं च रजोवेगप्रवर्तकम् ॥ ५
सत्त्वालंकारदीप्तं च गुणसंघातमण्डलम् ।
स्वरविग्रहनाभीकं शोकसंघातवर्तनम् ॥ ६
क्रियाकारणसंयुक्तं रागविस्तारमायतम् ।
लोभेप्सापरिसंख्यातं विविक्तज्ञानसंभवम् ॥ ७
भयमोहपरीवारं भूतसंमोहकारकम् ।
आनन्दप्रीतिधारं च कामक्रोधपरिग्रहम् ॥ ८
महदादिविशेषान्तमसक्तप्रभवाव्ययम् ।
मनोजवनमश्रान्तं कालचक्रं प्रवर्तते ॥ ९
एतद्द्वंद्वसमायुक्तं कालचक्रमचेतनम् ।
विसृजेत्संक्षिपेच्चापि बोधयेत्सामरं जगत् ॥ १०
कालचक्रप्रवृत्तिं च निवृत्तिं चैव तत्त्वतः ।
यस्तु वेद नरो नित्यं न स भूतेषु मुह्यति ॥ ११
विमुक्तः सर्वसंक्लेशैः सर्वद्वंद्वातिगो मुनिः ।
विमुक्तः सर्वपापेभ्यः प्राप्नोति परमां गतिम् ॥१२
गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथ भिक्षुकः ।
चत्वार आश्रमाः प्रोक्ताः सर्वे गार्हस्थ्यमूलकाः ॥
यः कश्चिदिह लोके च ह्यागमः संप्रकीर्तितः ।
तस्यान्तगमनं श्रेयः कीर्तिरेषा सनातनी ॥ १४
संस्कारैः संस्कृतः पूर्वं यथावच्चरितव्रतः ।
जातौ गुणविशिष्टायां समावर्तेत वेदवित् ॥ १५
स्वदारनिरतो दान्तः शिष्टाचारो जितेन्द्रियः ।
पञ्चभिश्च महायज्ञैः श्रद्दधानो यजेत ह ॥ १६
देवतातिथिशिष्टाशी निरतो वेदकर्मसु ।
इज्याप्रदानयुक्तश्च यथाशक्ति यथाविधि ॥ १७
न पाणिपादचपलो न नेत्रचपलो मुनिः ।
न च वागङ्गचपल इति शिष्टस्य गोचरः ॥ १८
नित्ययज्ञोपवीती स्याच्छुक्लवासाः शुचिव्रतः ।
नियतो दमदानाभ्यां सदा शिष्टैश्च संविशेत् ॥१९
जितशिश्नोदरो मैत्रः शिष्टाचारसमाहितः ।
वैणवीं धारयेद्यष्टिं सोदकं च कमण्डलुम् ॥ २०
अधीत्याध्यापनं कुर्यात्तथा यजनयाजने ।
दानं प्रतिग्रहं चैव षड्गुणां वृत्तिमाचरेत् ॥ २१
त्रीणि कर्माणि यानीह ब्राह्मणानां तु जीविका ।
याजनाध्यापने चोभे शुद्धाच्चापि प्रतिग्रहः ॥ २२
अवशेषाणि चान्यानि त्रीणि कर्माणि यानि तु ।
दानमध्ययनं यज्ञो धर्मयुक्तानि तानि तु ॥ २३
तेष्वप्रमादं कुर्वीत त्रिषु कर्मसु धर्मवित् ।
दान्तो मैत्रः क्षमायुक्तः सर्वभूतसमो मुनिः ॥२४
सर्वमेतद्यथाशक्ति विप्रो निर्वर्तयञ्शुचिः ।

एवं युक्तो जयेत्स्वर्गं गृहस्थः संशितव्रतः ॥ २५

इति श्रीमहाभारते आश्वमेधिकपर्वणि
पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

४६

ब्रह्मोवाच ।

एवमेतेन मार्गेण पूर्वोक्तेन यथाविधि ।
अधीतवान्यथाशक्ति तथैव ब्रह्मचर्यवान् ॥ १
स्वधर्मनिरतो विद्वान्सर्वेन्द्रिययतो मुनिः ।
गुरोः प्रियहिते युक्तः सत्यधर्मपरः शुचिः ॥ २
गुरुणा समनुज्ञातो भुञ्जीतान्नमकुत्सयन् ।
हविष्यभैक्ष्यभुक्चापि स्थानासनविहारवान् ॥ ३
द्विकालमग्निं जुह्वानः शुचिर्भूत्वा समाहितः ।
धारयीत सदा दण्डं बैल्वं पालाशमेव वा ॥ ४
क्षौमं कार्पासिकं वापि मृगाजिनमथापि वा ।
सर्वं काषायरक्तं स्याद्वासो वापि द्विजस्य ह ॥ ५
मेखला च भवेन्मौञ्जी जटी नित्योदकस्तथा ।
यज्ञोपवीती स्वाध्यायी अलुप्तनियतव्रतः ॥ ६
पूताभिश्च तथैवाद्भिः सदा दैवततर्पणम् ।
भावेन नियतः कुर्वन्ब्रह्मचारी प्रशस्यते ॥ ७
एवं युक्तो जयेत्स्वर्गमूर्ध्वरेताः समाहितः ।
न संसरति जातीषु परमं स्थानमाश्रितः ॥ ८
संस्कृतः सर्वसंस्कारैस्तथैव ब्रह्मचर्यवान् ।
ग्रामान्निष्क्रम्य चारण्यं मुनिः प्रव्रजितो वसेत् ॥ ९
चर्मवल्कलसंवीतः स्वयं प्रातरुपस्पृशेत् ।
अरण्यगोचरो नित्यं न ग्रामं प्रविशेत्पुनः ॥ १०
अर्चयन्नतिथीन्काले दद्याच्चापि प्रतिश्रयम् ।
फलपत्रावरैर्मूलैः श्यामाकेन च वर्तयन् ॥ ११
प्रवृत्तमुदकं वायुं सर्वं वानेयमा तृणात् ।
प्राश्नीयादानुपूर्व्येण यथादीक्षमतन्द्रितः ॥ १२
आमूलफलभिक्षाभिरर्चेदतिथिमागतम् ।
यद्भक्षः स्यात्ततो दद्याद्भिक्षां नित्यमतन्द्रितः ॥ १३
देवतातिथिपूर्वं च सदा भुञ्जीत वाग्यतः ।
अस्कन्दितमनाश्चैव लघ्वाशी देवताश्रयः ॥ १४
दान्तो मैत्रः क्षमायुक्तः केशश्मश्रु च धारयन् ।
जुह्वन्स्वाध्यायशीलश्च सत्यधर्मपरायणः ॥ १५
त्यक्तदेहः सदा दक्षो वननित्यः समाहितः ।
एवं युक्तो जयेत्स्वर्गं वानप्रस्थो जितेन्द्रियः ॥ १६
गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथ वा पुनः ।
य इच्छेन्मोक्षमास्थातुमुत्तमां वृत्तिमाश्रयेत् ॥ १७
अभयं सर्वभूतेभ्यो दत्त्वा नैष्कर्म्यमाचरेत् ।
सर्वभूतहितो मैत्रः सर्वेन्द्रिययतो मुनिः ॥ १८
अयाचितमसंक्लृप्तमुपपन्नं यदृच्छया ।
जोषयेत सदा भोज्यं ग्रासमागतमस्पृहः ॥ १९
यात्रामात्रं च भुञ्जीत केवलं प्राणयात्रिकम् ।
धर्मलब्धं तथाश्नीयान्न काममनुवर्तयेत् ॥ २०
ग्रासादाच्छादनाच्चान्यन्न गृह्णीयात्कथंचन ।
यावदाहारयेत्तावत्प्रतिगृह्णीत नान्यथा ॥ २१
परेभ्यो न प्रतिग्राह्यं न च देयं कदाचन ।
दैन्यभावाच्च भूतानां संविभज्य सदा बुधः ॥ २२
नाददीत परस्वानि न गृह्णीयादयाचितम् ।
न किंचिद्विषयं भुक्त्वा स्पृहयेत्तस्य वै पुनः ॥ २३
मृदमापस्तथाश्मानं पत्रपुष्पफलानि च ।
असंवृतानि गृह्णीयात्प्रवृत्तानीह कार्यवान् ॥ २४
न शिल्पजीविकां जीवेद्द्विरन्नं नोत कामयेत् ।
न द्वेष्टा नोपदेष्टा च भवेत निरुपस्कृतः ।
श्रद्धापूतानि भुञ्जीत निमित्तानि विवर्जयेत् ॥ २५
मुधावृत्तिरसक्तश्च सर्वभूतैरसंविदम् ।
कृत्वा वह्निं चरेद्भैक्ष्यं विधूमे भुक्तवज्जने ॥ २६
वृत्ते शरावसंपाते भैक्ष्यं लिप्सेत मोक्षवित् ।
लाभे न च प्रहृष्येत नालाभे विमना भवेत् ॥ २७

मात्राशी कालमाकाङ्क्षंश्चरेद्भैक्ष्यं समाहितः ।
लाभं साधारणं नेच्छेन्न भुञ्जीताभिपूजितः ।
अभिपूजितलाभाद्धि विजुगुप्सेत भिक्षुकः ॥ २८
शुक्तान्यम्लानि तिक्तानि कषायकटुकानि च ।
नास्वादयीत भुञ्जानो रसांश्च मधुरांस्तथा ।
यात्रामात्रं च भुञ्जीत केवलं प्राणयात्रिकम् ॥ २९
असंरोधेन भूतानां वृत्तिं लिप्सेत मोक्षवित् ।
न चान्यमनुभिक्षेत भिक्षमाणः कथंचन ॥ ३०
न संनिकाशयेद्धर्मं विविक्ते विरजाश्चरेत् ।
शून्यागारमरण्यं वा वृक्षमूलं नदीं तथा ।
प्रतिश्रयार्थं सेवेत पार्वतीं वा पुनर्गुहाम् ॥ ३१
ग्रामैकरात्रिको ग्रीष्मे वर्षास्वेकत्र वा वसेत् ।
अध्वा सूर्येण निर्दिष्टः कीटवच्च चरेन्महीम् ॥ ३२
दयार्थं चैव भूतानां समीक्ष्य पृथिवीं चरेत् ।
संचयांश्च न कुर्वीत स्नेहवासं च वर्जयेत् ॥ ३३
पूतेन चाम्भसा नित्यं कार्यं कुर्वीत मोक्षवित् ।
उपस्पृशेदुद्धृताभिरद्भिश्च पुरुषः सदा ॥ ३४
अहिंसा ब्रह्मचर्यं च सत्यमार्जवमेव च ।
अक्रोधश्चानसूया च दमो नित्यमपैशुनम् ॥ ३५
अष्टास्वेतेषु युक्तः स्याद्व्रतेषु नियतेन्द्रियः ।
अपापमशठं वृत्तमजिह्मं नित्यमाचरेत् ॥ ३६
आशीर्युक्तानि कर्माणि हिंसायुक्तानि यानि च ।
लोकसंग्रहधर्मं च नैव कुर्यान्न कारयेत् ॥ ३७
सर्वभावानतिक्रम्य लघुमात्रः परिव्रजेत् ।
समः सर्वेषु भूतेषु स्थावरेषु चरेषु च ॥ ३८
परं नोद्वेजयेत्कंचिन्न च कस्यचिदुद्विजेत् ।
विश्वास्यः सर्वभूतानामग्र्यो मोक्षविदुच्यते ॥ ३९
अनागतं च न ध्यायेन्नातीतमनुचिन्तयेत् ।
वर्तमानमुपेक्षेत कालाकाङ्क्षी समाहितः ॥ ४०
न चक्षुषा न मनसा न वाचा दूषयेत्क्वचित् ।
न प्रत्यक्षं परोक्षं वा किंचिद्दुष्टं समाचरेत् ॥ ४१
इन्द्रियाण्युपसंहृत्य कूर्मोऽङ्गानीव सर्वशः ।
क्षीणेन्द्रियमनोबुद्धिर्निरीक्षेत निरिन्द्रियः ॥ ४२
निर्द्वंद्वो निर्नमस्कारो निःस्वाहाकार एव च ।
निर्ममो निरहंकारो निर्योगक्षेम एव च ॥ ४३
निराशीः सर्वभूतेषु निरासङ्गो निराश्रयः ।
सर्वज्ञः सर्वतो मुक्तो मुच्यते नात्र संशयः ॥ ४४
अपाणिपादपृष्ठं तमशिरस्कमनूदरम् ।
प्रहीणगुणकर्माणं केवलं विमलं स्थिरम् ॥ ४५
अगन्धरसमस्पर्शमरूपाशब्दमेव च ।
अत्वगस्थ्यथ वामज्जममांसमपि चैव ह ॥ ४६
निश्चिन्तमव्ययं नित्यं हृदिस्थमपि नित्यदा ।
सर्वभूतस्थमात्मानं ये पश्यन्ति न ते मृताः ॥४७
न तत्र क्रमते बुद्धिर्नेन्द्रियाणि न देवताः ।
वेदा यज्ञाश्च लोकाश्च न तपो न पराक्रमः ।
यत्र ज्ञानवतां प्राप्तिरलिङ्गग्रहणा स्मृता ॥ ४८
तस्मादलिङ्गो धर्मज्ञो धर्मव्रतमनुव्रतः ।
गूढधर्माश्रितो विद्वानज्ञातचरितं चरेत् ॥ ४९
अमूढो मूढरूपेण चरेद्धर्ममदूषयन् ।
यथैनमवमन्येरन्परे सततमेव हि ॥ ५०
तथावृत्तश्चरेद्धर्मं सतां वर्त्माविदूषयन् ।
यो ह्येवं वृत्तसंपन्नः स मुनिः श्रेष्ठ उच्यते ॥ ५१
इन्द्रियाणीन्द्रियार्थांश्च महाभूतानि पञ्च च ।
मनोबुद्धिरथात्मानमव्यक्तं पुरुषं तथा ॥ ५२
सर्वमेतत्प्रसंख्याय सम्यक्संत्यज्य निर्मलः ।
ततः स्वर्गमवाप्नोति विमुक्तः सर्वबन्धनैः ॥ ५३
एतदेवान्तवेलायां परिसंख्याय तत्त्ववित् ।
ध्यायेदेकान्तमास्थाय मुच्यतेऽथ निराश्रयः ॥ ५४
निर्मुक्तः सर्वसङ्गेभ्यो वायुराकाशगो यथा ।

क्षीणकोशो निरातङ्कः प्राप्नोति परमं पदम् ॥ ५५

इति श्रीमहाभारते आश्वमेधिकपर्वणि
षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

४७

ब्रह्मोवाच ।

संन्यासं तप इत्याहुर्वृद्धा निश्चितदर्शिनः ।
ब्राह्मणा ब्रह्मयोनिस्था ज्ञानं ब्रह्म परं विदुः ॥ १
अविदूरात्परं ब्रह्म वेदविद्याव्यपाश्रयम् ।
निर्द्वंद्वं निर्गुणं नित्यमचिन्त्यं गुह्यमुत्तमम् ॥ २
ज्ञानेन तपसा चैव धीराः पश्यन्ति तत्पदम् ।
निर्णिक्ततमसः पूता व्युत्क्रान्तरजसोऽमलाः ॥ ३
तपसा क्षेममध्वानं गच्छन्ति परमैषिणः ।
संन्यासनिरता नित्यं ये ब्रह्मविदुषो जनाः ॥ ४
तपः प्रदीप इत्याहुराचारो धर्मसाधकः ।
ज्ञानं त्वेव परं विद्म संन्यासस्तप उत्तमम् ॥ ५
यस्तु वेद निराबाधं ज्ञानं तत्त्वविनिश्चयात् ।
सर्वभूतस्थमात्मानं स सर्वगतिरिष्यते ॥ ६
यो विद्वान्सहवासं च विवासं चैव पश्यति ।
तथैवैकत्वनानात्वे स दुःखात्परिमुच्यते ॥ ७
यो न कामयते किंचिन्न किंचिदवमन्यते ।
इहलोकस्थ एवैष ब्रह्मभूयाय कल्पते ॥ ८
प्रधानगुणतत्त्वज्ञः सर्वभूतविधानवित् ।
निर्ममो निरहंकारो मुच्यते नात्र संशयः ॥ ९
निर्द्वंद्वो निर्नमस्कारो निःस्वधाकार एव च ।
निर्गुणं नित्यमद्वंद्वं प्रशमेनैव गच्छति ॥ १०
हित्वा गुणमयं सर्वं कर्म जन्तुः शुभाशुभम् ।
उभे सत्यानृते हित्वा मुच्यते नात्र संशयः ॥ ११
अव्यक्तबीजप्रभवो बुद्धिस्कन्धमयो महान् ।
महाहंकारविटप इन्द्रियान्तरकोटरः ॥ १२
महाभूतविशाखश्च विशेषप्रतिशाखवान् ।
सदापर्णः सदापुष्पः शुभाशुभफलोदयः ।
आजीवः सर्वभूतानां ब्रह्मवृक्षः सनातनः ॥ १३
एतच्छित्त्वा च भित्त्वा च ज्ञानेन परमासिना ।
हित्वा चामरतां प्राप्य जह्याद्वै मृत्युजन्मनी ।
निर्ममो निरहंकारो मुच्यते नात्र संशयः ॥ १४
द्वावेतौ पक्षिणौ नित्यौ सखायौ चाप्यचेतनौ ।
एताभ्यां तु परो यस्य चेतनावानिति स्मृतः ॥ १५
अचेतनः सत्त्वसंघातयुक्तः
सत्त्वात्परं चेतयतेऽन्तरात्मा ।
स क्षेत्रज्ञः सत्त्वसंघातबुद्धि-
र्गुणातिगो मुच्यते मृत्युपाशात् ॥ १६

इति श्रीमहाभारते आश्वमेधिकपर्वणि
सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

४८

ब्रह्मोवाच ।

केचिद्ब्रह्ममयं वृक्षं केचिद्ब्रह्ममयं महत् ।
केचित्पुरुषमव्यक्तं केचित्परमनामयम् ।
मन्यन्ते सर्वमप्येतदव्यक्तप्रभवाव्ययम् ॥ १
उच्छ्वासमात्रमपि चेद्योऽन्तकाले समो भवेत् ।
आत्मानमुपसंगम्य सोऽमृतत्वाय कल्पते ॥ २
निमेषमात्रमपि चेत्संयम्यात्मानमात्मनि ।
गच्छत्यात्मप्रसादेन विदुषां प्राप्तिमव्ययाम् ॥ ३
प्राणायामैरथ प्राणान्संयम्य स पुनः पुनः ।
दशद्वादशभिर्वापि चतुर्विंशात्परं ततः ॥ ४
एवं पूर्वं प्रसन्नात्मा लभते यद्यदिच्छति ।
अव्यक्तात्सत्त्वमुद्रिक्तममृतत्वाय कल्पते ॥ ५
सत्त्वात्परतरं नान्यत्प्रशंसन्तीह तद्विदः ।
अनुमानाद्विजानीमः पुरुषं सत्त्वसंश्रयम् ।
न शक्यमन्यथा गन्तुं पुरुषं तमथो द्विजाः ॥ ६
क्षमा धृतिरहिंसा च समता सत्यमार्जवम् ।

ज्ञानं त्यागोऽथ संन्यासः सात्त्विकं वृत्तमिष्यते ॥
एतेनैवानुमानेन मन्यन्तेऽथ मनीषिणः ।
सत्त्वं च पुरुषश्चैकस्तत्र नास्ति विचारणा ॥ ८
आहुरेके च विद्वांसो ये ज्ञाने सुप्रतिष्ठिताः ।
क्षेत्रज्ञसत्त्वयोरैक्यमित्येतन्नोपपद्यते ॥ ९
पृथग्भूतस्ततो नित्यमित्येतदविचारितम् ।
पृथग्भावश्च विज्ञेयः सहजश्चापि तत्त्वतः ॥ १०
तथैवैकत्वनानात्वमिष्यते विदुषां नयः ।
मशकोदुम्बरे त्वैक्यं पृथक्त्वमपि दृश्यते ॥ ११
मत्स्यो यथान्यः स्यादप्सु संप्रयोगस्तथानयोः ।
संबन्धस्तोयबिन्दूनां पर्णे कोकनदस्य च ॥ १२

गुरुरुवाच ।

इत्युक्तवन्तं ते विप्रास्तदा लोकपितामहम् ।
पुनः संशयमापन्नाः पप्रच्छुर्द्विजसत्तमाः ॥ १३

ऋषयः ऊचुः ।

किंस्विदेवेह धर्माणामनुष्ठेयतमं स्मृतम् ।
व्याहतामिव पश्यामो धर्मस्य विविधां गतिम् ॥
ऊर्ध्वं देहाद्वदन्त्येके नैतदस्तीति चापरे ।
केचित्संशयितं सर्वं निःसंशयमथापरे ॥ १५
अनित्यं नित्यमित्येके नास्त्यस्तीत्यपि चापरे ।
एकरूपं द्विधेत्येके व्यामिश्रमिति चापरे ।
एकमेके पृथक्चान्ये बहुत्वमिति चापरे ॥ १६
मन्यन्ते ब्राह्मणा एवं प्राज्ञास्तत्त्वार्थदर्शिनः ।
जटाजिनधराश्चान्ये मुण्डाः केचिदसंवृताः ॥ १७
अस्नानं केचिदिच्छन्ति स्नानमित्यपि चापरे ।
आहारं केचिदिच्छन्ति केचिच्चानशने रताः ॥ १८
कर्म केचित्प्रशंसन्ति प्रशान्तिमपि चापरे ।
देशकालावुभौ केचिन्नैतदस्तीति चापरे ।
केचिन्मोक्षं प्रशंसन्ति केचिद्भोगान्पृथग्विधान् ॥
धनानि केचिदिच्छन्ति निर्धनत्वं तथापरे ।
उपास्यसाधनं त्वेके नैतदस्तीति चापरे ॥ २०
अहिंसानिरताश्चान्ये केचिद्धिंसापरायणाः ।
पुण्येन यशसेत्येके नैतदस्तीति चापरे ॥ २१
सद्भावनिरताश्चान्ये केचित्संशयिते स्थिताः ।
दुःखादन्ये सुखादन्ये ध्यानमित्यपरे स्थिताः ॥२२
यज्ञमित्यपरे धीराः प्रदानमिति चापरे ।
सर्वमेके प्रशंसन्ति न सर्वमिति चापरे ॥ २३
तपस्त्वन्ये प्रशंसन्ति स्वाध्यायमपरे जनाः ।
ज्ञानं संन्यासमित्येके स्वभावं भूतचिन्तकाः ॥२४
एवं व्युत्थापिते धर्मे बहुधा विप्रधावति ।
निश्चयं नाधिगच्छामः संमूढाः सुरसत्तम ॥ २५
इदं श्रेय इदं श्रेय इत्येवं प्रस्थितो जनः ।
यो हि यस्मिन्रतो धर्मे स तं पूजयते सदा ॥२६
तत्र नो विहता प्रज्ञा मनश्च बहुलीकृतम् ।
एतदाख्यातुमिच्छामः श्रेयः किमिति सत्तम ॥२७
अतः परं च यद्गुह्यं तद्भवान्वक्तुमर्हति ।
सत्त्वक्षेत्रज्ञयोश्चैव संबन्धः केन हेतुना ॥ २८
एवमुक्तः स तैर्विप्रैर्भगवाँल्लोकभावनः ।
तेभ्यः शशंस धर्मात्मा याथातथ्येन बुद्धिमान् ॥

इति श्रीमहाभारते आश्वमेधिकपर्वणि
अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

४९

ब्रह्मोवाच ।

हन्त वः संप्रवक्ष्यामि यन्मां पृच्छथ सत्तमाः ।
समस्तमिह तच्छ्रुत्वा सम्यगेवावधार्यताम् ॥ १
अहिंसा सर्वभूतानामेतत्कृत्यतमं मतम् ।
एतत्पदमनुद्विग्नं वरिष्ठं धर्मलक्षणम् ॥ २
ज्ञानं निःश्रेय इत्याहुर्वृद्धा निश्चयदर्शिनः ।
तस्माज्ज्ञानेन शुद्धेन मुच्यते सर्वपातकैः ॥ ३
हिंसापराश्च ये लोके ये च नास्तिकवृत्तयः ।

लोभमोहसमायुक्तास्ते वै निरयगामिनः ॥ ४
आशीर्युक्तानि कर्माणि कुर्वते ये त्वतन्द्रिताः ।
तेऽस्मिँल्लोके प्रमोदन्ते जायमानाः पुनः पुनः ॥५
कुर्वते ये तु कर्माणि श्रद्दधाना विपश्चितः ।
अनाशीर्योगसंयुक्तास्ते धीराः साधुदर्शिनः ॥ ६
अतः परं प्रवक्ष्यामि सत्त्वक्षेत्रज्ञयोर्यथा ।
संयोगो विप्रयोगश्च तन्निबोधत सत्तमाः ॥ ७
विषयो विषयित्वं च संबन्धोऽयमिहोच्यते ।
विषयी पुरुषो नित्यं सत्त्वं च विषयः स्मृतः ॥८
व्याख्यातं पूर्वकल्पेन मशकोदुम्बरं यथा ।
भुज्यमानं न जानीते नित्यं सत्त्वमचेतनम् ।
यस्त्वेव तु विजानीते यो भुङ्क्ते यश्च भुज्यते ॥ ९
अनित्यं द्वंद्वसंयुक्तं सत्त्वमाहुर्गुणात्मकम् ।
निर्द्वंद्वो निष्कलो नित्यः क्षेत्रज्ञो निर्गुणात्मकः ॥
समः संज्ञागतस्त्वेवं यदा सर्वत्र दृश्यते ।
उपभुङ्क्ते सदा सत्त्वमापः पुष्करपर्णवत् ॥ ११
सर्वैरपि गुणैर्विद्वान्व्यतिषक्तो न लिप्यते ।
जलबिन्दुर्यथा लोलः पद्मिनीपत्रसंस्थितः ।
एवमेवाप्यसंसक्तः पुरुषः स्यान्न संशयः ॥ १२
द्रव्यमात्रमभूत्सत्त्वं पुरुषस्येति निश्चयः ।
यथा द्रव्यं च कर्ता च संयोगोऽप्यनयोस्तथा ॥
यथा प्रदीपमादाय कश्चित्तमसि गच्छति ।
तथा सत्त्वप्रदीपेन गच्छन्ति परमैषिणः ॥ १४
यावद्द्रव्यगुणस्तावत्प्रदीपः संप्रकाशते ।
क्षीणद्रव्यगुणं ज्योतिरन्तर्धानाय गच्छति ॥ १५
व्यक्तः सत्त्वगुणस्त्वेवं पुरुषोऽव्यक्त इष्यते ।
एतद्विप्रा विजानीत हन्त भूयो ब्रवीमि वः ॥ १६
सहस्रेणापि दुर्मेधा न वृद्धिमधिगच्छति ।
चतुर्थेनाप्यथांशेन बुद्धिमान्सुखमेधते ॥ १७
एवं धर्मस्य विज्ञेयं संसाधनमुपायतः ।
उपायज्ञो हि मेधावी सुखमत्यन्तमश्नुते ॥ १८
यथाध्वानमपाथेयः प्रपन्नो मानवः कश्चित् ।
क्लेशेन याति महता विनश्यत्यन्तरापि वा ॥ १९
तथा कर्मसु विज्ञेयं फलं भवति वा न वा ।
पुरुषस्यात्मनिःश्रेयः शुभाशुभनिदर्शनम् ॥ २०
यथा च दीर्घमध्वानं पद्भ्यामेव प्रपद्यते ।
अदृष्टपूर्वं सहसा तत्त्वदर्शनवर्जितः ॥ २१
तमेव च यथाध्वानं रथेनेहाशुगामिना ।
यायादश्वप्रयुक्तेन तथा बुद्धिमतां गतिः ॥ २२
उच्चं पर्वतमारुह्य नान्ववेक्षेत भूगतम् ।
रथेन रथिनं पश्येत्क्लिश्यमानमचेतनम् ॥ २३
यावद्रथपथस्तावद्रथेन स तु गच्छति ।
क्षीणे रथपथे प्राज्ञो रथमुत्सृज्य गच्छति ॥ २४
एवं गच्छति मेधावी तत्त्वयोगविधानवित् ।
समाज्ञाय महाबुद्धिरुत्तरादुत्तरोत्तरम् ॥ २५
यथा महार्णवं घोरमप्लवः संप्रगाहते ।
बाहुभ्यामेव संमोहाद्वधं प्रच्छत्यसंशयम् ॥ २६
नावा चापि यथा प्राज्ञो विभागज्ञस्तरित्रया ।
अक्लान्तः सलिलं गाहेत्क्षिप्रं संतरति ध्रुवम् ॥ २७
तीर्णो गच्छेत्परं पारं नावमुत्सृज्य निर्ममः ।
व्याख्यातं पूर्वकल्पेन यथा रथिपदातिनौ ॥ २८
स्नेहात्संमोहमापन्नो नावि दाशो यथा तथा ।
ममत्वेनाभिभूतः स तत्रैव परिवर्तते ॥ २९
नावं न शक्यमारुह्य स्थले विपरिवर्तितुम् ।
तथैव रथमारुह्य नाप्सु चर्या विधीयते ॥ ३०
एवं कर्म कृतं चित्रं विषयस्थं पृथक्पृथक् ।
यथा कर्म कृतं लोके तथा तदुपपद्यते ॥ ३१
यन्नैव गन्धि नो रस्यं न रूपस्पर्शशब्दवत् ।
मन्यन्ते मुनयो बुद्ध्या तत्प्रधानं प्रचक्षते ॥ ३२
तत्र प्रधानमव्यक्तमव्यक्तस्य गुणो महान् ।

महतः प्रधानभूतस्य गुणोऽहंकार एव च ॥ ३३
अहंकारप्रधानस्य महाभूतकृतो गुणः ।
पृथक्त्वेन हि भूतानां विषया वै गुणाः स्मृताः ॥
बीजधर्मं यथाव्यक्तं तथैव प्रसवात्मकम् ।
बीजधर्मा महानात्मा प्रसवश्चेति नः श्रुतम् ॥ ३५
बीजधर्मा त्वहंकारः प्रसवश्च पुनः पुनः ।
बीजप्रसवधर्माणि महाभूतानि पञ्च वै ॥ ३६
बीजधर्मिण इत्याहुः प्रसवं च न कुर्वते ।
विशेषाः पञ्चभूतानां तेषां वित्तं विशेषणम् ॥ ३७
तत्रैकगुणमाकाशं द्विगुणो वायुरुच्यते ।
त्रिगुणं ज्योतिरित्याहुरापश्चापि चतुर्गुणाः ॥ ३८
पृथ्वी पञ्चगुणा ज्ञेया त्रसस्थावरसंकुला ।
सर्वभूतकरी देवी शुभाशुभनिदर्शना ॥ ३९
शब्दः स्पर्शस्तथा रूपं रसो गन्धश्च पञ्चमः ।
एते पञ्च गुणा भूमेर्विज्ञेया द्विजसत्तमाः ॥ ४०
पार्थिवश्च सदा गन्धो गन्धश्च बहुधा स्मृतः ।
तस्य गन्धस्य वक्ष्यामि विस्तरेण बहून्गुणान् ॥४१
इष्टश्चानिष्टगन्धश्च मधुरोऽम्लः कटुस्तथा ।
निर्हारी संहतः स्निग्धो रूक्षो विशद एव च ।
एवं दशविधो ज्ञेयः पार्थिवो गन्ध इत्युत ॥ ४२
शब्दः स्पर्शस्तथा रूपं रसश्चापां गुणाः स्मृताः ।
रसज्ञानं तु वक्ष्यामि रसस्तु बहुधा स्मृतः ॥ ४३
मधुरोऽम्लः कटुस्तिक्तः कषायो लवणस्तथा ।
एवं षड्विधविस्तारो रसो वारिमयः स्मृतः ॥ ४४
शब्दः स्पर्शस्तथा रूपं त्रिगुणं ज्योतिरुच्यते ।
ज्योतिषश्च गुणो रूपं रूपं च बहुधा स्मृतम् ॥४५
शुक्लं कृष्णं तथा रक्तं नीलं पीतारुणं तथा ।
ह्रस्वं दीर्घं तथा स्थूलं चतुरस्राणु वृत्तकम् ॥ ४६
एवं द्वादशविस्तारं तेजसो रूपमुच्यते ।
विज्ञेयं ब्राह्मणैर्नित्यं धर्मज्ञैः सत्यवादिभिः ॥ ४७
शब्दस्पर्शौ च विज्ञेयौ द्विगुणो वायुरुच्यते ।
वायोश्चापि गुणः स्पर्शः स्पर्शश्च बहुधा स्मृतः ॥४८
उष्णः शीतः सुखो दुःखः स्निग्धो विशद एव च ।
कठिनश्चिक्कणः श्लक्ष्णः पिच्छिलो दारुणो मृदुः ॥
एवं द्वादशविस्तारो वायव्यो गुण उच्यते ।
विधिवद्ब्राह्मणैः सिद्धैर्धर्मज्ञैस्तत्त्वदर्शिभिः ॥ ५०
तत्रैकगुणमाकाशं शब्द इत्येव च स्मृतः ।
तस्य शब्दस्य वक्ष्यामि विस्तरेण बहून्गुणान् ॥५१
षड्जर्षभौ च गान्धारो मध्यमः पञ्चमस्तथा ।
अतः परं तु विज्ञेयो निषादो धैवतस्तथा ॥ ५२
इष्टोऽनिष्टश्च शब्दस्तु संहतः प्रविभागवान् ।
एवं बहुविधो ज्ञेयः शब्दः आकाशसंभवः ॥ ५३
आकाशमुत्तमं भूतमहंकारस्ततः परम् ।
अहंकारात्परा बुद्धिर्बुद्धेरात्मा ततः परः ॥ ५४
तस्मात्तु परमव्यक्तमव्यक्तात्पुरुषः परः ।
परावरज्ञो भूतानां यं प्राप्यानन्त्यमश्नुते ॥ ५५

इति श्रीमहाभारते आश्वमेधिकपर्वणि
एकोनपञ्चाशोऽध्यायः ॥ ४९ ॥

५०

ब्रह्मोवाच ।

भूतानामथ पञ्चानां यथैषामीश्वरं मनः ।
नियमे च विसर्गे च भूतात्मा मन एव च ॥ १
अधिष्ठाता मनो नित्यं भूतानां महतां तथा ।
बुद्धिरैश्वर्यमाचष्टे क्षेत्रज्ञः सर्व उच्यते ॥ २
इन्द्रियाणि मनो युङ्क्ते सदश्वानिव सारथिः ।
इन्द्रियाणि मनो बुद्धिं क्षेत्रज्ञो युञ्जते सदा ॥ ३
महाभूतसमायुक्तं बुद्धिसंयमनं रथम् ।
तमारुह्य स भूतात्मा समन्तात्परिधावति ॥ ४
इन्द्रियग्रामसंयुक्तो मनःसारथिरेव च ।
बुद्धिसंयमनो नित्यं महान्ब्रह्ममयो रथः ॥ ५

एवं यो वेत्ति विद्वान्वै सदा ब्रह्ममयं रथम् ।
स धीरः सर्वलोकेषु न मोहमधिगच्छति ॥ ६
अव्यक्तादि विशेषान्तं त्रसस्थावरसंकुलम् ।
चन्द्रसूर्यप्रभालोकं ग्रहनक्षत्रमण्डितम् ॥ ७
नदीपर्वतजालैश्च सर्वतः परिभूषितम् ।
विविधाभिस्तथाद्भिश्च सततं समलंकृतम् ॥ ८
आजीवः सर्वभूतानां सर्वप्राणभृतां गतिः ।
एतद्ब्रह्मवनं नित्यं यस्मिंश्चरति क्षेत्रवित् ॥ ९
लोकेऽस्मिन्यानि भूतानि स्थावराणि चराणि च ।
तान्येवाग्रे प्रलीयन्ते पश्चाद्भूतकृता गुणाः ।
गुणेभ्यः पञ्चभूतानि एष भूतसमुच्छ्रयः ॥ १०
देवा मनुष्या गन्धर्वाः पिशाचासुरराक्षसाः ।
सर्वे स्वभावतः सृष्टा न क्रियाभ्यो न कारणात् ॥
एते विश्वकृतो विप्रा जायन्ते ह पुनः पुनः ।
तेभ्यः प्रसूतास्तेष्वेव महाभूतेषु पञ्चसु ।
प्रलीयन्ते यथाकालमूर्मयः सागरे यथा ॥ १२
विश्वसृग्भ्यस्तु भूतेभ्यो महाभूतानि गच्छति ।
भूतेभ्यश्चापि पञ्चभ्यो मुक्तो गच्छेत्प्रजापतिम् ॥
प्रजापतिरिदं सर्वं तपसैवासृजत्प्रभुः ।
तथैव वेदानृषयस्तपसा प्रतिपेदिरे ॥ १४
तपसश्चानुपूर्व्येण फलमूलाशिनस्तथा ।
त्रैलोक्यं तपसा सिद्धाः पश्यन्तीह समाहिताः ॥
औषधान्यगदादीनि नानाविद्याश्च सर्वशः ।
तपसैव प्रसिध्यन्ति तपोमूलं हि साधनम् ॥ १६
यद्दुरापं दुराम्नायं दुराधर्षं दुरन्वयम् ।
तत्सर्वं तपसा साध्यं तपो हि दुरतिक्रमम् ॥ १७
सुरापो ब्रह्महा स्तेयी भ्रूणहा गुरुतल्पगः ।
तपसैव सुतप्तेन मुच्यन्ते किल्बिषात्ततः ॥ १८
मनुष्याः पितरो देवाः पशवो मृगपक्षिणः ।
यानि चान्यानि भूतानि त्रसानि स्थावराणि च ॥
तपःपरायणा नित्यं सिध्यन्ते तपसा सदा ।
तथैव तपसा देवा महाभागा दिवं गताः ॥ २०
आशीर्युक्तानि कर्माणि कुर्वते ये त्वतन्द्रिताः ।
अहंकारसमायुक्तास्ते सकाशे प्रजापतेः ॥ २१
ध्यानयोगेन शुद्धेन निर्ममा निरहंकृताः ।
प्राप्नुवन्ति महात्मानो महान्तं लोकमुत्तमम् ॥ २२
ध्यानयोगादुपागम्य प्रसन्नमतयः सदा ।
सुखोपचयमव्यक्तं प्रविशन्त्यात्मवत्तया ॥ २३
ध्यानयोगादुपागम्य निर्ममा निरहंकृताः ।
अव्यक्तं प्रविशन्तीह महान्तं लोकमुत्तमम् ॥ २४
अव्यक्तादेव संभूतः समयज्ञो गतः पुनः ।
तमोरजोभ्यां निर्मुक्तः सत्त्वमास्थाय केवलम् ॥२५
विमुक्तः सर्वपापेभ्यः सर्वं त्यजति निष्कलः ।
क्षेत्रज्ञ इति तं विद्याद्यस्तं वेद स वेदवित् ॥ २६
चित्तं चित्तादुपागम्य मुनिरासीत संयतः ।
यच्चित्तस्तन्मना भूत्वा गुह्यमेतत्सनातनम् ॥ २७
अव्यक्तादि विशेषान्तमविद्यालक्षणं स्मृतम् ।
निबोधत यथा हीदं गुणैर्लक्षणमित्युत ॥ २८
द्व्यक्षरस्तु भवेन्मृत्युस्त्र्यक्षरं ब्रह्म शाश्वतम् ।
ममेति च भवेन्मृत्युर्न ममेति च शाश्वतम् ॥ २९
कर्म केचित्प्रशंसन्ति मन्दबुद्धितरा नराः ।
ये तु बुद्धा महात्मानो न प्रशंसन्ति कर्म ते ॥ ३०
कर्मणा जायते जन्तुर्मूर्तिमान्षोडशात्मकः ।
पुरुषं सृजतेऽविद्या अग्राह्यममृताशिनम् ॥ ३१
तस्मात्कर्मसु निःस्नेहा ये केचित्पारदर्शिनः ।
विद्यामयोऽयं पुरुषो न तु कर्ममयः स्मृतः ॥ ३२
अपूर्वममृतं नित्यं य एनमविचारिणम् ।
य एनं विन्दतेऽऽत्मानमग्राह्यममृताशिनम् ॥ ३३
अग्राह्योऽमृतो भवति य एभिः कारणैर्ध्रुवः ।
अपोह्य सर्वसंकल्पान्संयम्यात्मानमात्मनि ।

स तद्ब्रह्म शुभं वेत्ति यस्माद्भूयो न विद्यते ॥ ३४
प्रसादेनैव सत्त्वस्य प्रसादं समवाप्नुयात् ।
लक्षणं हि प्रसादस्य यथा स्यात्स्वप्नदर्शनम् ॥ ३५
गतिरेषा तु मुक्तानां ये ज्ञानपरिनिष्ठिताः ।
प्रवृत्तयश्च याः सर्वाः पश्यन्ति परिणामजाः ॥३६
एषा गतिरसक्तानामेष धर्मः सनातनः ।
एषा ज्ञानवतां प्राप्तिरेतद्वृत्तमनिन्दितम् ॥ ३७
समेन सर्वभूतेषु निःस्पृहेण निराशिषा ।
शक्या गतिरियं गन्तुं सर्वत्र समदर्शिना ॥ ३८
एतद्वः सर्वमाख्यातं मया विप्रर्षिसत्तमाः ।
एवमाचरत क्षिप्रं ततः सिद्धिमवाप्स्यथ ॥ ३९

गुरुरुवाच ।

इत्युक्तास्ते तु मुनयो ब्रह्मणा गुरुणा तथा ।
कृतवन्तो महात्मानस्ततो लोकानवाप्नुवन् ॥ ४०
त्वमप्येतन्महाभाग यथोक्तं ब्रह्मणो वचः ।
सम्यगाचर शुद्धात्मंस्ततः सिद्धिमवाप्स्यसि ॥ ४१

वासुदेव उवाच ।

इत्युक्तः स तदा शिष्यो गुरुणा धर्ममुत्तमम् ।
चकार सर्वं कौन्तेय ततो मोक्षमवाप्तवान् ॥ ४२
कृतकृत्यश्च स तदा शिष्यः कुरुकुलोद्वह ।
तत्पदं समनुप्राप्तो यत्र गत्वा न शोचति ॥ ४३

अर्जुन उवाच ।

को न्वसौ ब्राह्मणः कृष्ण कश्च शिष्यो जनार्दन ।
श्रोतव्यं चेन्मयैतद्वै तत्त्वमाचक्ष्व मे विभो ॥ ४४

वासुदेव उवाच ।

अहं गुरुर्महाबाहो मनः शिष्यं च विद्धि मे ।
त्वत्प्रीत्या गुह्यमेतच्च कथितं मे धनंजय ॥ ४५
मयि चेदस्ति ते प्रीतिर्नित्यं कुरुकुलोद्वह ।
अध्यात्ममेतच्छ्रुत्वा त्वं सम्यगाचर सुव्रत ॥ ४६
ततस्त्वं सम्यगाचीर्णे धर्मेऽस्मिन्कुरुनन्दन ।
सर्वपापविशुद्धात्मा मोक्षं प्राप्स्यसि केवलम् ॥ ४७
पूर्वमप्येतदेवोक्तं युद्धकाल उपस्थिते ।
मया तव महाबाहो तस्मादत्र मनः कुरु ॥ ४८
मया तु भरतश्रेष्ठ चिरदृष्टः पिता विभो ।
तमहं द्रष्टुमिच्छामि संमते तव फल्गुन ॥ ४९

वैशंपायन उवाच ।

इत्युक्तवचनं कृष्णं प्रत्युवाच धनंजयः ।
गच्छावो नगरं कृष्ण गजसाह्वयमद्य वै ॥ ५०
समेत्य तत्र राजानं धर्मात्मानं युधिष्ठिरम् ।
समनुज्ञाप्य दुर्धर्षं स्वां पुरीं यातुमर्हसि ॥ ५१

इति श्रीमहाभारते आश्वमेधिकपर्वणि
पञ्चाशोऽध्यायः ॥ ५० ॥

५१

वैशंपायन उवाच ।

ततोऽभ्यचोदयत्कृष्णो युज्यतामिति दारुकम् ।
मुहूर्तादिव चाचष्ट युक्तमित्येव दारुकः ॥ १
तथैव चानुयात्राणि चोदयामास पाण्डवः ।
सज्जयध्वं प्रयास्यामो नगरं गजसाह्वयम् ॥ २
इत्युक्ताः सैनिकास्ते तु सज्जीभूता विशां पते ।
आचख्युः सज्जमित्येव पार्थायामिततेजसे ॥ ३
ततस्तौ रथमास्थाय प्रयातौ कृष्णपाण्डवौ ।
विकुर्वाणौ कथाश्चित्राः प्रीयमाणौ विशां पते ॥ ४
रथस्थं तु महातेजा वासुदेवं धनंजयः ।
पुनरेवाब्रवीद्वाक्यमिदं भरतसत्तम ॥ ५
त्वत्प्रसादाज्जयः प्राप्तो राज्ञा वृष्णिकुलोद्वह ।
निहताः शत्रवश्चापि प्राप्तं राज्यमकण्टकम् ॥ ६
नाथवन्तश्च भवता पाण्डवा मधुसूदन ।
भवन्तं प्लवमासाद्य तीर्णाः स्म कुरुसागरम् ॥ ७
विश्वकर्मन्नमस्तेऽस्तु विश्वात्मन्विश्वसंभव ।

यथाहं त्वा विजानामि यथा चाहं भवन्मनाः ॥ ८
त्वत्तेजःसंभवो नित्यं हुताशो मधुसूदन ।
रतिः क्रीडामयी तुभ्यं माया ते रोदसी विभो ॥ ९
त्वयि सर्वमिदं विश्वं यदिदं स्थाणुजङ्गमम् ।
त्वं हि सर्वं विकुरुषे भूतग्रामं सनातनम् ॥ १०
पृथिवीं चान्तरिक्षं च तथा स्थावरजङ्गमम् ।
हसितं तेऽमला ज्योत्स्ना ऋतवश्चेन्द्रियान्वयाः ॥ ११
प्राणो वायुः सततगः क्रोधो मृत्युः सनातनः ।
प्रसादे चापि पद्मा श्रीर्नित्यं त्वयि महामते ॥ १२
रतिस्तुष्टिर्धृतिः क्षान्तिस्त्वयि चेदं चराचरम् ।
त्वमेवेह युगान्तेषु निधनं प्रोच्यसेऽनघ ॥ १३
सुदीर्घेणापि कालेन न ते शक्या गुणा मया ।
आत्मा च परमो वक्तुं नमस्ते नलिनेक्षण ॥ १४
विदितो मेऽसि दुर्धर्ष नारदाद्देवलात्तथा ।
कृष्णद्वैपायनाच्चैव तथा कुरुपितामहात् ॥ १५
त्वयि सर्वं समासक्तं त्वमेवैको जनेश्वरः ।
यच्चानुग्रहसंयुक्तमेतदुक्तं त्वयानघ ॥ १६
एतत्सर्वमहं सम्यगाचरिष्ये जनार्दन ।
इदं चाद्भुतमत्यर्थं कृतमस्मत्प्रियेप्सया ॥ १७
यत्पापो निहतः संख्ये कौरव्यो धृतराष्ट्रजः ।
त्वया दग्धं हि तत्सैन्यं मया विजितमाहवे ॥ १८
भवता तत्कृतं कर्म येनावाप्तो जयो मया ।
दुर्योधनस्य संग्रामे तव बुद्धिपराक्रमैः ॥ १९
कर्णस्य च वधोपायो यथावत्संप्रदर्शितः ।
सैन्धवस्य च पापस्य भूरिश्रवस एव च ॥ २०
अहं च प्रीयमाणेन त्वया देवकिनन्दन ।
यदुक्तस्तत्करिष्यामि न हि मेऽत्र विचारणा ॥ २१
राजानं च समासाद्य धर्मात्मानं युधिष्ठिरम् ।
चोदयिष्यामि धर्मज्ञ गमनार्थं त्वयानघ ॥ २२
रुचितं हि ममैतत्ते द्वारकागमनं प्रभो ।
अचिराच्चैव द्रष्टा त्वं मातुलं मधुसूदन ।
बलदेवं च दुर्धर्षं तथान्यान्वृष्णिपुंगवान् ॥ २३
एवं संभाषमाणौ तौ प्राप्तौ वारणसाह्वयम् ।
तथा विविशतुश्चोभौ संप्रहृष्टनराकुलम् ॥ २४
तौ गत्वा धृतराष्ट्रस्य गृहं शक्रगृहोपमम् ।
ददृशाते महाराज धृतराष्ट्रं जनेश्वरम् ॥ २५
विदुरं च महाबुद्धिं राजानं च युधिष्ठिरम् ।
भीमसेनं च दुर्धर्षं माद्रीपुत्रौ च पाण्डवौ ।
धृतराष्ट्रमुपासीनं युयुत्सुं चापराजितम् ॥ २६
गान्धारीं च महाप्राज्ञां पृथां कृष्णां च भामिनीम् ।
सुभद्राद्याश्च ताः सर्वा भरतानां स्त्रियस्तथा ।
ददृशाते स्थिताः सर्वा गान्धारीं परिवार्य वै ॥ २७
ततः समेत्य राजानं धृतराष्ट्रमरिंदमौ ।
निवेद्य नामधेये स्वे तस्य पादावगृह्णताम् ॥ २८
गान्धार्याश्च पृथायाश्च धर्मराज्ञस्तथैव च ।
भीमस्य च महात्मानौ तथा पादावगृह्णताम् ॥ २९
क्षत्तारं चापि संपूज्य पृष्ट्वा कुशलमव्ययम् ।
तैः सार्धं नृपतिं वृद्धं ततस्तं पर्युपासताम् ॥ ३०
ततो निशि महाराज धृतराष्ट्रः कुरूद्वहान् ।
जनार्दनं च मेधावी व्यसर्जयत वै गृहान् ॥ ३१
तेऽनुज्ञाता नृपतिना ययुः स्वं स्वं निवेशनम् ।
धनंजयगृहानेव ययौ कृष्णस्तु वीर्यवान् ॥ ३२
तत्रार्चितो यथान्यायं सर्वकामैरुपस्थितः ।
कृष्णः सुष्वाप मेधावी धनंजयसहायवान् ॥ ३३
प्रभातायां तु शर्वर्यां कृतपूर्वाह्णिकक्रियौ ।
धर्मराजस्य भवनं जग्मतुः परमार्चितौ ।
यत्रास्ते स महामात्यो धर्मराजो महामनाः ॥ ३४
ततस्तौ तत्प्रविश्याथ ददृशाते महाबलौ ।
धर्मराजानमासीनं देवराजमिवाश्विनौ ॥ ३५
तौ समासाद्य राजानं वार्ष्णेयकुरुपुंगवौ ।

निषीदतुरनुज्ञातौ प्रीयमाणेन तेन वै ॥ ३६
ततः स राजा मेधावी विवक्षू प्रेक्ष्य तावुभौ ।
प्रोवाच वदतां श्रेष्ठो वचनं राजसत्तमः ॥ ३७
विवक्षू हि युवां मन्ये वीरौ यदुकुरूद्वहौ ।
ब्रूत कर्तास्मि सर्वं वां न चिरान्मा विचार्यताम् ॥
इत्युक्ते फल्गुनस्तत्र धर्मराजानमब्रवीत् ।
विनीतवदुपागम्य वाक्यं वाक्यविशारदः ॥ ३९
अयं चिरोषितो राजन्वासुदेवः प्रतापवान् ।
भवन्तं समनुज्ञाप्य पितरं द्रष्टुमिच्छति ॥ ४०
स गच्छेदभ्यनुज्ञातो भवता यदि मन्यसे ।
आनर्तनगरीं वीरस्तदनुज्ञातुमर्हसि ॥ ४१

युधिष्ठिर उवाच ।

पुण्डरीकाक्ष भद्रं ते गच्छ त्वं मधुसूदन ।
पुरीं द्वारवतीमद्य द्रष्टुं शूरसुतं प्रभुम् ॥ ४२
रोचते मे महाबाहो गमनं तव केशव ।
मातुलश्चिरदृष्टो मे त्वया देवी च देवकी ॥ ४३
मातुलं वसुदेवं त्वं बलदेवं च माधव ।
पूजयेथा महाप्राज्ञ मद्वाक्येन यथार्हतः ॥ ४४
स्मरेथाश्चापि मां नित्यं भीमं च बलिनां वरम् ।
फल्गुनं नकुलं चैव सहदेवं च माधव ॥ ४५
आनर्तानवलोक्य त्वं पितरं च महाभुज ।
वृष्णींश्च पुनरागच्छेर्हयमेधे ममानघ ॥ ४६
स गच्छ रत्नान्यादाय विविधानि वसूनि च ।
यच्चाप्यन्यन्मनोज्ञं ते तदप्यादत्स्व सात्वत ॥ ४७
इयं हि वसुधा सर्वा प्रसादात्तव माधव ।
अस्मानुपगता वीर निहताश्चापि शत्रवः ॥ ४८
एवं ब्रुवति कौरव्ये धर्मराजे युधिष्ठिरे ।
वासुदेवो वरः पुंसामिदं वचनमब्रवीत् ॥ ४९
तवैव रत्नानि धनं च केवलम्
धरा च कृत्स्ना तु महाभुजाद्य वै ।
यदस्ति चान्यद्द्रविणं गृहेषु मे
त्वमेव तस्येश्वर नित्यमीश्वरः ॥ ५०
तथेत्यथोक्तः प्रतिपूजितस्तदा
गदाग्रजो धर्मसुतेन वीर्यवान् ।
पितृष्वसामभ्यवदद्यथाविधि
संपूजितश्चाप्यगमत्प्रदक्षिणम् ॥ ५१
तया स सम्यक्प्रतिनन्दितस्तदा
तथैव सर्वैर्विदुरादिभिस्ततः ।
विनिर्ययौ नागपुराद्गदाग्रजो
रथेन दिव्येन चतुर्युजा हरिः ॥ ५२
रथं सुभद्रामधिरोप्य भामिनीं
युधिष्ठिरस्यानुमते जनार्दनः ।
पितृष्वसायाश्च तथा महाभुजो
विनिर्ययौ पौरजनाभिसंवृतः ॥ ५३
तमन्वगाद्वानरवर्यकेतनः
ससात्यकिर्माद्रवतीसुतावपि ।
अगाधबुद्धिर्विदुरश्च माधवं
स्वयं च भीमो गजराजविक्रमः ॥ ५४
निवर्तयित्वा कुरुराष्ट्रवर्धनां-
स्ततः स सर्वान्विदुरं च वीर्यवान् ।
जनार्दनो दारुकमाह सत्वरः
प्रचोदयाश्वानिति सात्यकिस्तदा ॥ ५५
ततो ययौ शत्रुगणप्रमर्दनः
शिनिप्रवीरानुगतो जनार्दनः ।
यथा निहत्यारिगणाञ्शतक्रतु-
र्दिवं तथानर्तपुरीं प्रतापवान् ॥ ५६

इति श्रीमहाभारते आश्वमेधिकपर्वणि

एकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

५२

वैशंपायन उवाच ।

तथा प्रयान्तं वार्ष्णेयं द्वारकां भरतर्षभाः ।
परिष्वज्य न्यवर्तन्त सानुयात्राः परंतपाः ॥ १
पुनः पुनश्च वार्ष्णेयं पर्यष्वजत फल्गुनः ।
आ चक्षुर्विषयाच्चैनं ददर्श च पुनः पुनः ॥ २
कृच्छ्रेणैव च तां पार्थो गोविन्दे विनिवेशिताम् ।
संजहार तदा दृष्टिं कृष्णश्चाप्यपराजितः ॥ ३
तस्य प्रयाणे यान्यासन्निमित्तानि महात्मनः ।
बहून्यद्भुतरूपाणि तानि मे गदतः शृणु ॥ ४
वायुर्वेगेन महता रथस्य पुरतो ववौ ।
कुर्वन्निःशर्करं मार्गं विरजस्कमकण्टकम् ॥ ५
ववर्ष वासवश्चापि तोयं शुचि सुगन्धि च ।
दिव्यानि चैव पुष्पाणि पुरतः शार्ङ्गधन्वनः ॥ ६
स प्रयातो महाबाहुः समेषु मरुधन्वसु ।
ददर्शाथ मुनिश्रेष्ठमुत्तङ्कममितौजसम् ॥ ७
स तं संपूज्य तेजस्वी मुनिं पृथुललोचनः ।
पूजितस्तेन च तदा पर्यपृच्छदनामयम् ॥ ८
स पृष्टः कुशलं तेन संपूज्य मधुसूदनम् ।
उत्तङ्को ब्राह्मणश्रेष्ठस्ततः पप्रच्छ माधवम् ॥ ९
कच्चिच्छौरे त्वया गत्वा कुरुपाण्डवसद्म तत् ।
कृतं सौभ्रात्रमचलं तन्मे व्याख्यातुमर्हसि ॥ १०
अभिसंधाय तान्वीरानुपावृत्तोऽसि केशव ।
संबन्धिनः सुदयितान्सततं वृष्णिपुंगव ॥ ११
कच्चित्पाण्डुसुताः पञ्च धृतराष्ट्रस्य चात्मजाः ।
लोकेषु विहरिष्यन्ति त्वया सह परंतप ॥ १२
स्वराष्ट्रेषु च राजानः कच्चित्प्राप्स्यन्ति वै सुखम् ।
कौरवेषु प्रशान्तेषु त्वया नाथेन माधव ॥ १३
या मे संभावना तात त्वयि नित्यमवर्तत ।
अपि सा सफला कृष्ण कृता ते भारतान्प्रति ॥ १४

वासुदेव उवाच ।

कृतो यत्नो मया ब्रह्मन्सौभ्रात्रे कौरवान्प्रति ।
न चाशक्यन्त संधातुं तेऽधर्मरुचयो मया ॥ १५
ततस्ते निधनं प्राप्ताः सर्वे ससुतबान्धवाः ।
न दिष्टमभ्यतिक्रान्तुं शक्यं बुद्ध्या बलेन वा ।
महर्षे विदितं नूनं सर्वमेतत्तवानघ ॥ १६
तेऽत्यक्रामन्मतिं मह्यं भीष्मस्य विदुरस्य च ।
ततो यमक्षयं जग्मुः समासाद्येतरेतरम् ॥ १७
पञ्च वै पाण्डवाः शिष्टा हतमित्रा हतात्मजाः ।
धार्तराष्ट्राश्च निहताः सर्वे ससुतबान्धवाः ॥ १८
इत्युक्तवचने कृष्णे भृशं क्रोधसमन्वितः ।
उत्तङ्कः प्रत्युवाचैनं रोषादुत्फाल्य लोचने ॥ १९
यस्माच्छक्तेन ते कृष्ण न त्राताः कुरुपाण्डवाः ।
संबन्धिनः प्रियास्तस्माच्छप्स्येऽहं त्वामसंशयम् ॥
न च ते प्रसभं यस्मात्ते निगृह्य निवर्तिताः ।
तस्मान्मन्युपरीतस्त्वां शप्स्यामि मधुसूदन ॥ २१
त्वया हि शक्तेन सता मिथ्याचारेण माधव ।
उपचीर्णाः कुरुश्रेष्ठा यस्त्वेतान्समुपेक्षथाः ॥ २२

वासुदेव उवाच ।

शृणु मे विस्तरेणेदं यद्वक्ष्ये भृगुनन्दन ।
गृहाणानुनयं चापि तपस्वी ह्यसि भार्गव ॥ २३
श्रुत्वा त्वमेतदध्यात्मं मुञ्चेथाः शापमद्य वै ।
न च मां तपसाल्पेन शक्तोऽभिभवितुं पुमान् ॥
न च ते तपसो नाशमिच्छामि जपतां वर ।
तपस्ते सुमहद्दीप्तं गुरवश्चापि तोषिताः ॥ २५
कौमारं ब्रह्मचर्यं ते जानामि द्विजसत्तम ।
दुःखार्जितस्य तपसस्तस्मान्नेच्छामि ते व्ययम् ॥

इति श्रीमहाभारते आश्वमेधिकपर्वणि
द्विपञ्चाशोऽध्यायः ॥ ५२ ॥

५३

उत्तङ्क उवाच ।

ब्रूहि केशव तत्त्वेन त्वमध्यात्ममनिन्दितम् ।
श्रुत्वा श्रेयोऽभिधास्यामि शापं वा ते जनार्दन ॥१

वासुदेव उवाच ।

तमो रजश्च सत्त्वं च विद्धि भावान्मदाश्रयान् ।
तथा रुद्रान्वसूंश्चापि विद्धि मत्प्रभवान्द्विज ॥ २
मयि सर्वाणि भूतानि सर्वभूतेषु चाप्यहम् ।
स्थित इत्यभिजानीहि मा तेऽभूदत्र संशयः ॥ ३
तथा दैत्यगणान्सर्वान्यक्षराक्षसपन्नगान् ।
गन्धर्वाप्सरसश्चैव विद्धि मत्प्रभवान्द्विज ॥ ४
सदसच्चैव यत्प्राहुरव्यक्तं व्यक्तमेव च ।
अक्षरं च क्षरं चैव सर्वमेतन्मदात्मकम् ॥ ५
ये चाश्रमेषु वै धर्माश्चतुर्षु विहिता मुने ।
दैवानि चैव कर्माणि विद्धि सर्वं मदात्मकम् ॥ ६
असच्च सदसच्चैव यद्विश्वं सदसतः परम् ।
ततः परं नास्ति चैव देवदेवात्सनातनात् ॥ ७
ओंकारप्रभवान्वेदान्विद्धि मां त्वं भृगूद्वह ।
यूपं सोमं तथैवेह त्रिदशाप्यायनं मखे ॥ ८
होतारमपि हव्यं च विद्धि मां भृगुनन्दन ।
अध्वर्युः कल्पकश्चापि हविः परमसंस्कृतम् ॥ ९
उद्गाता चापि मां स्तौति गीतघोषैर्महाध्वरे ।
प्रायश्चित्तेषु मां ब्रह्मञ्शान्तिमङ्गलवाचकाः ।
स्तुवन्ति विश्वकर्माणं सततं द्विजसत्तमाः ॥ १०
विद्धि मह्यं सुतं धर्ममग्रजं द्विजसत्तम ।
मानसं दयितं विप्र सर्वभूतदयात्मकम् ॥ ११
तत्राहं वर्तमानैश्च निवृत्तैश्चैव मानवैः ।
बह्वीः संसरमाणो वै योनीर्हि द्विजसत्तम ॥ १२
धर्मसंरक्षणार्थाय धर्मसंस्थापनाय च ।
तैस्तैर्वेषैश्च रूपैश्च त्रिषु लोकेषु भार्गव ॥ १३
अहं विष्णुरहं ब्रह्मा शक्रोऽथ प्रभवाप्ययः ।
भूतग्रामस्य सर्वस्य स्रष्टा संहार एव च ॥ १४
अधर्मे वर्तमानानां सर्वेषामहमप्युत ।
धर्मस्य सेतुं बध्नामि चलिते चलिते युगे ।
तास्ता योनीः प्रविश्याहं प्रजानां हितकाम्यया ॥
यदा त्वहं देवयोनौ वर्तामि भृगुनन्दन ।
तदाहं देववत्सर्वमाचरामि न संशयः ॥ १६
तदा गन्धर्वयोनौ तु वर्तामि भृगुनन्दन ।
तदा गन्धर्ववच्चेष्टाः सर्वाश्चेष्टामि भार्गव ॥ १७
नागयोनौ यदा चैव तदा वर्तामि नागवत् ।
यक्षराक्षसयोनीश्च यथावद्विचराम्यहम् ॥ १८
मानुष्ये वर्तमाने तु कृपणं याचिता मया ।
न च ते जातसंमोहा वचो गृह्णन्ति मे हितम् ॥
भयं च महदुद्दिश्य त्रासिताः कुरवो मया ।
क्रुद्धेव भूत्वा च पुनर्यथावदनुदर्शिताः ॥ २०
तेऽधर्मेणेह संयुक्ताः परीताः कालधर्मणा ।
धर्मेण निहता युद्धे गताः स्वर्गं न संशयः ॥ २१
लोकेषु पाण्डवाश्चैव गताः ख्यातिं द्विजोत्तम ।
एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि ॥ २२

इति श्रीमहाभारते आश्वमेधिकपर्वणि
त्रिपञ्चाशोऽध्यायः ॥ ५३ ॥

५४

उत्तङ्क उवाच ।

अभिजानामि जगतः कर्तारं त्वां जनार्दन ।
नूनं भवत्प्रसादोऽयमिति मे नास्ति संशयः ॥ १
चित्तं च सुप्रसन्नं मे त्वद्भावगतमच्युत ।
विनिवृत्तश्च मे कोप इति विद्धि परंतप ॥ २
यदि त्वनुग्रहं कंचित्त्वत्तोऽर्होऽहं जनार्दन ।
द्रष्टुमिच्छामि ते रूपमैश्वरं तन्निदर्शय ॥ ३

वैशंपायन उवाच ।

ततः स तस्मै प्रीतात्मा दर्शयामास तद्वपुः ।
शाश्वतं वैष्णवं धीमान्ददृशे यद्धनंजयः ॥ ४
स ददर्श महात्मानं विश्वरूपं महाभुजम् ।
विस्मयं च ययौ विप्रस्तद्दृष्ट्वा रूपमैश्वरम् ॥ ५

उत्तङ्क उवाच ।

विश्वकर्मन्नमस्तेऽस्तु यस्य ते रूपमीदृशम् ।
पद्भ्यां ते पृथिवी व्याप्ता शिरसा चावृतं नभः ॥
द्यावापृथिव्योर्यन्मध्यं जठरेण तदावृतम् ।
भुजाभ्यामावृताश्चाशास्त्वमिदं सर्वमच्युत ॥ ७
संहरस्व पुनर्देव रूपमक्षय्यमुत्तमम् ।
पुनस्त्वां स्वेन रूपेण द्रष्टुमिच्छामि शाश्वतम् ॥ ८

वैशंपायन उवाच ।

तमुवाच प्रसन्नात्मा गोविन्दो जनमेजय ।
वरं वृणीष्वेति तदा तमुत्तङ्कोऽब्रवीदिदम् ॥ ९
पर्याप्त एष एवाद्य वरस्त्वत्तो महाद्युते ।
यत्ते रूपमिदं कृष्ण पश्यामि प्रभवाप्ययम् ॥ १०
तमब्रवीत्पुनः कृष्णो मा त्वमत्र विचारय ।
अवश्यमेतत्कर्तव्यममोघं दर्शनं मम ॥ ११

उत्तङ्क उवाच ।

अवश्यकरणीयं वै यद्येतन्मन्यसे विभो ।
तोयमिच्छामि यत्रेष्टं मरुष्वेतद्धि दुर्लभम् ॥ १२

वैशंपायन उवाच ।

ततः संहृत्य तत्तेजः प्रोवाचोत्तङ्कमीश्वरः ।
एष्टव्ये सति चिन्त्योऽहमित्युक्त्वा द्वारकां ययौ ॥
ततः कदाचिद्भगवानुत्तङ्कस्तोयकाङ्क्षया ।
तृषितः परिचक्राम मरौ सस्मार चाच्युतम् ॥ १४
ततो दिग्वाससं धीमान्मातङ्गं मलपङ्किनम् ।
अपश्यत मरौ तस्मिञ्श्वयूथपरिवारितम् ॥ १५
भीषणं बद्धनिर्स्त्रिंशं बाणकार्मुकधारिणम् ।
तस्याधः स्रोतसोऽपश्यद्वारि भूरि द्विजोत्तम ॥ १६
स्मरन्नेव च तं प्राह मातङ्गः प्रहसन्निव ।
एह्युत्तङ्क प्रतीच्छस्व मत्तो वारि भृगूद्वह ।
कृपा हि मे सुमहती त्वां दृष्ट्वा तृट्समाहतम् ॥ १७
इत्युक्तस्तेन स मुनिस्तत्तोयं नाभ्यनन्दत ।
चिक्षेप च स तं धीमान्वाग्भिरुग्राभिरच्युतम् ॥ १८
पुनः पुनश्च मातङ्गः पिबस्वेति तमब्रवीत् ।
न चापिबत्स सक्रोधः क्षुभितेनान्तरात्मना ॥ १९
स तथा निश्चयात्तेन प्रत्याख्यातो महात्मना ।
श्वभिः स महाराज तत्रैवान्तरधीयत ॥ २०
उत्तङ्कस्तं तथा दृष्ट्वा ततो व्रीडितमानसः ।
मेने प्रलब्धमात्मानं कृष्णेनामित्रघातिना ॥ २१
अथ तेनैव मार्गेण शङ्खचक्रगदाधरः ।
आजगाम महाबाहुरुत्तङ्कश्चैनमब्रवीत् ॥ २२
न युक्तं तादृशं दातुं त्वया पुरुषसत्तम ।
सलिलं विप्रमुख्येभ्यो मातङ्गस्रोतसा विभो ॥ २३
इत्युक्तवचनं धीमान्महाबुद्धिर्जनार्दनः ।
उत्तङ्कं श्लक्ष्णया वाचा सान्त्वयन्निदमब्रवीत् ॥ २४
यादृशेनेह रूपेण योग्यं दातुं वृतेन वै ।
तादृशं खलु मे दत्तं त्वं तु तन्नावबुध्यसे ॥ २५
मया त्वदर्थमुक्तो हि वज्रपाणिः पुरंदरः ।
उत्तङ्कायामृतं देहि तोयरूपमिति प्रभुः ॥ २६
स मामुवाच देवेन्द्रो न मर्त्योऽमर्त्यतां व्रजेत् ।
अन्यमस्मै वरं देहीत्यसकृद्भृगुनन्दन ॥ २७
अमृतं देयमित्येव मयोक्तः स शचीपतिः ।
स मां प्रसाद्य देवेन्द्रः पुनरेवेदमब्रवीत् ॥ २८
यदि देयमवश्यं वै मातङ्गोऽहं महाद्युते ।
भूत्वामृतं प्रदास्यामि भार्गवाय महात्मने ॥ २९
यद्येवं प्रतिगृह्णाति भार्गवोऽमृतमद्य वै ।

प्रदातुमेष गच्छामि भार्गवायामृतं प्रभो ।
प्रत्याख्यातस्त्वहं तेन न दद्यामिति भार्गव ॥ ३०
स तथा समयं कृत्वा तेन रूपेण वासवः ।
उपस्थितस्त्वया चापि प्रत्याख्यातोऽमृतं ददत् ।
चण्डालरूपी भगवान्सुमहांस्ते व्यतिक्रमः ॥ ३१
यत्तु शक्यं मया कर्तुं भूय एव तवेप्सितम् ।
तोयेप्सां तव दुर्धर्ष करिष्ये सफलामहम् ॥ ३२
येष्वहःसु तव ब्रह्मन्सलिलेच्छा भविष्यति ।
तदा मरौ भविष्यन्ति जलपूर्णाः पयोधराः ॥ ३३
रसवच्च प्रदास्यन्ति ते तोयं भृगुनन्दन ।
उत्तङ्कमेघा इत्युक्ताः ख्यातिं यास्यन्ति चापि ते ॥
इत्युक्तः प्रीतिमान्विप्रः कृष्णेन स बभूव ह ।
अद्याप्युत्तङ्कमेघाश्च मरौ वर्षन्ति भारत ॥ ३५

इति श्रीमहाभारते आश्वमेधिकपर्वणि
चतुःपञ्चाशोऽध्यायः ॥ ५४ ॥

५५

जनमेजय उवाच ।

उत्तङ्कः केन तपसा संयुक्तः सुमहातपाः ।
यः शापं दातुकामोऽभूद्विष्णवे प्रभविष्णवे ॥ १

वैशंपायन उवाच ।

उत्तङ्को महता युक्तस्तपसा जनमेजय ।
गुरुभक्तः स तेजस्वी नान्यं कंचिदपूजयत् ॥ २
सर्वेषामृषिपुत्राणामेष चासीन्मनोरथः ।
औत्तङ्कीं गुरुवृत्तिं वै प्राप्नुयामिति भारत ॥ ३
गौतमस्य तु शिष्याणां बहूनां जनमेजय ।
उत्तङ्केऽभ्यधिका प्रीतिः स्नेहश्चैवाभवत्तदा ॥ ४
स तस्य दमशौचाभ्यां विक्रान्तेन च कर्मणा ।
सम्यक्चैवोपचारेण गौतमः प्रीतिमानभूत् ॥ ५
अथ शिष्यसहस्राणि समनुज्ञाय गौतमः ।
उत्तङ्कं परया प्रीता नाभ्यनुज्ञातुमैच्छत ॥ ६
तं क्रमेण जरा तात प्रतिपेदे महामुनिम् ।
न चान्वबुध्यत तदा स मुनिर्गुरुवत्सलः ॥ ७
ततः कदाचिद्राजेन्द्र काष्ठान्यानयितुं ययौ ।
उत्तङ्कः काष्ठभारं च महान्तं समुपानयत् ॥ ८
स तु भाराभिभूतात्मा काष्ठभारमरिंदम ।
निष्पिपेष क्षितौ राजन्परिश्रान्तो बुभुक्षितः ॥ ९
तस्य काष्ठे विलग्नाभूज्जटा रूप्यसमप्रभा ।
ततः काष्ठैः सह तदा पपात धरणीतले ॥ १०
ततः स भारनिष्पिष्टः क्षुधाविष्टश्च भार्गवः ।
दृष्ट्वा तां वयसोऽवस्थां रुरोदार्तस्वरं तदा ॥ ११
ततो गुरुसुता तस्य पद्मपत्रनिभेक्षणा ।
जग्राहाश्रूणि सुश्रोणी करेण पृथुलोचना ।
पितुर्नियोगाद्धर्मज्ञा शिरसावनता तदा ॥ १२
तस्या निपेततुर्दग्धौ करौ तैरश्रुबिन्दुभिः ।
न हि तानश्रुपातान्वै शक्ता धारयितुं मही ॥ १३
गौतमस्त्वब्रवीद्विप्रमुत्तङ्कं प्रीतमानसः ।
कस्मात्तात तवाद्येह शोकोत्तरमिदं मनः ।
स स्वैरं ब्रूहि विप्रर्षे श्रोतुमिच्छामि ते वचः ॥१४

उत्तङ्क उवाच ।

भवद्गतेन मनसा भवत्प्रियचिकीर्षया ।
भवद्भक्तिगतेनेह भवद्भावानुगेन च ॥ १५
जरेयं नावबुद्धा मे नाभिज्ञातं सुखं च मे ।
शतवर्षोषितं हि त्वं न मामभ्यनुजानथाः ॥ १६
भवता ह्यभ्यनुज्ञाताः शिष्याः प्रत्यवरा मया ।
उपपन्ना द्विजश्रेष्ठ शतशोऽथ सहस्रशः ॥ १७

गौतम उवाच ।

त्वत्प्रीतियुक्तेन मया गुरुशुश्रूषया तव ।
व्यतिक्रामन्महान्कालो नावबुद्धो द्विजर्षभ ॥ १८
किं त्वद्य यदि ते श्रद्धा गमनं प्रति भार्गव ।
अनुज्ञां गृह्य मत्तस्त्वं गृहान्गच्छस्व मा चिरम् ॥

उत्तङ्क उवाच ।

गुर्वर्थं कं प्रयच्छामि ब्रूहि त्वं द्विजसत्तम ।
तमुपाकृत्य गच्छेयमनुज्ञातस्त्वया विभो ॥ २०

गौतम उवाच ।

दक्षिणा परितोषो वै गुरूणां सद्भिरुच्यते ।
तव ह्याचरतो ब्रह्मंस्तुष्टोऽहं वै न संशयः ॥ २१
इत्थं च परितुष्टं मां विजानीहि भृगूद्वह ।
युवा षोडशवर्षो हि यदद्य भविता भवान् ॥ २२
ददामि पत्नीं कन्यां च स्वां ते दुहितरं द्विज ।
एतामृते हि नान्या वै त्वत्तेजोऽर्हति सेवितुम् ॥
ततस्तां प्रतिजग्राह युवा भूत्वा यशस्विनीम् ।
गुरुणा चाभ्यनुज्ञातो गुरुपत्नीमथाब्रवीत् ॥ २४
किं भवत्यै प्रयच्छामि गुर्वर्थं विनियुङ्क्ष्व माम् ।
प्रियं हि तव काङ्क्षामि प्राणैरपि धनैरपि ॥ २५
यद्दुर्लभं हि लोकेऽस्मिन्रत्नमत्यद्भुतं भवेत् ।
तदानयेयं तपसा न हि मेऽत्रास्ति संशयः ॥ २६

अहल्योवाच ।

परितुष्टास्मि ते पुत्र नित्यं भगवता सह ।
पर्याप्तये तद्भद्रं ते गच्छ तात यथेच्छकम् ॥ २७

वैशंपायन उवाच ।

उत्तङ्कस्तु महाराज पुनरेवाब्रवीद्वचः ।
आज्ञापयस्व मां मातः कर्तव्यं हि प्रियं तव ॥२८

अहल्योवाच ।

सौदासपत्न्या विदिते दिव्ये वै मणिकुण्डले ।
ते समानय भद्रं ते गुर्वर्थः सुकृतो भवेत् ॥ २९
स तथेति प्रतिश्रुत्य जगाम जनमेजय ।
गुरुपत्नीप्रियार्थं वै ते समानयितुं तदा ॥ ३०
स जगाम ततः शीघ्रमुत्तङ्को ब्राह्मणर्षभः ।
सौदासं पुरुषादं वै भिक्षितुं मणिकुण्डले ॥ ३१
गौतमस्त्वब्रवीत्पत्नीमुत्तङ्को नाद्य दृश्यते ।
इति पृष्टा तमाचष्ट कुण्डलार्थं गतं तु वै ॥ ३२
ततः प्रोवाच पत्नीं स न ते सम्यगिदं कृतम् ।
शप्तः स पार्थिवो नूनं ब्राह्मणं तं वधिष्यति ॥ ३३

अहल्योवाच ।

अजानन्त्या नियुक्तः स भगवन्ब्राह्मणोऽद्य मे ।
भवत्प्रसादान्न भयं किंचित्तस्य भविष्यति ॥ ३४
इत्युक्तः प्राह तां पत्नीमेवमस्त्विति गौतमः ।
उत्तङ्कोऽपि वने शून्ये राजानं तं ददर्श ह ॥ ३५

इति श्रीमहाभारते आश्वमेधिकपर्वणि
पञ्चपञ्चाशोऽध्यायः ॥ ५५ ॥

५६

वैशंपायन उवाच ।

स तं दृष्ट्वा तथाभूतं राजानं घोरदर्शनम् ।
दीर्घश्मश्रुधरं नृणां शोणितेन समुक्षितम् ॥ १
चकार न व्यथां विप्रो राजा त्वेनमथाब्रवीत् ।
प्रत्युत्थाय महातेजा भयकर्ता यमोपमः ॥ २
दिष्ट्या त्वमसि कल्याण षष्ठे काले ममान्तिकम् ।
भक्षं मृगयमाणस्य संप्राप्तो द्विजसत्तम ॥ ३

उत्तङ्क उवाच ।

राजन्गुर्वर्थिनं विद्धि चरन्तं मामिहागतम् ।
न च गुर्वर्थमुद्युक्तं हिंस्यमाहुर्मनीषिणः ॥ ४

राजोवाच ।

षष्ठे काले ममाहारो विहितो द्विजसत्तम ।
न च शक्यः समुत्स्रष्टुं क्षुधितेन मयाद्य वै ॥ ५

उत्तङ्क उवाच ।

एवमस्तु महाराज समयः क्रियतां तु मे ।
गुर्वर्थमभिनिर्वर्त्य पुनरेष्यामि ते वशम् ॥ ६
संश्रुतश्च मया योऽर्थो गुरवे राजसत्तम ।

त्वदधीनः स राजेन्द्र तं त्वा भिक्षे नरेश्वर ॥ ७
ददासि विप्रमुख्येभ्यस्त्वं हि रत्नानि सर्वशः ।
दाता त्वं च नरव्याघ्र पात्रभूतः क्षिताविह ।
पात्रं प्रतिग्रहे चापि विद्धि मां नृपसत्तम ॥ ८
उपाकृत्य गुरोरर्थं त्वदायत्तमरिंदम ।
समयेनेह राजेन्द्र पुनरेष्यामि ते वशम् ॥ ९
सत्यं ते प्रतिजानामि नात्र मिथ्यास्ति किंचन ।
अनृतं नोक्तपूर्वं मे स्वैरेष्वपि कुतोऽन्यथा ॥ १०

सौदास उवाच ।

यदि मत्तस्त्वदायत्तो गुर्वर्थः कृत एव सः ।
यदि चास्मि प्रतिग्राह्यः सांप्रतं तद्ब्रवीहि मे ॥ ११

उत्तङ्क उवाच ।

प्रतिग्राह्यो मतो मे त्वं सदैव पुरुषर्षभ ।
सोऽहं त्वामनुसंप्राप्तो भिक्षितुं मणिकुण्डले ॥ १२

सौदास उवाच ।

पत्न्यास्ते मम विप्रर्षे रुचिरे मणिकुण्डले ।
वरयार्थं त्वमन्यं वै तं ते दास्यामि सुव्रत ॥ १३

उत्तङ्क उवाच ।

अलं ते व्यपदेशेन प्रमाणं यदि ते वयम् ।
प्रयच्छ कुण्डले मे त्वं सत्यवाग्भव पार्थिव ॥ १४

वैशंपायन उवाच ।

इत्युक्तस्त्वब्रवीद्राजा तमुत्तङ्कं पुनर्वचः ।
गच्छ मद्वचनाद्देवीं ब्रूहि देहीति सत्तम ॥ १५
सैवमुक्ता त्वया नूनं मद्वाक्येन शुचिस्मिता ।
प्रदास्यति द्विजश्रेष्ठ कुण्डले ते न संशयः ॥ १६

उत्तङ्क उवाच ।

क पत्नी भवतः शक्या मया द्रष्टुं नरेश्वर ।
स्वयं वापि भवान्पत्नीं किमर्थं नोपसर्पति ॥ १७

सौदास उवाच ।

द्रक्ष्यते तां भवानद्य कस्मिंश्चिद्वननिर्झरे ।
षष्ठे काले न हि मया सा शक्या द्रष्टुमद्य वै ॥
उत्तङ्कस्तु तथोक्तः स जगाम भरतर्षभ ।
मदयन्तीं च दृष्ट्वा सोऽज्ञापयत्स्वं प्रयोजनम् ॥ १९
सौदासवचनं श्रुत्वा ततः सा पृथुलोचना ।
प्रत्युवाच महाबुद्धिमुत्तङ्कं जनमेजय ॥ २०
एवमेतन्महाब्रह्मन्नानृतं वदसेऽनघ ।
अभिज्ञानं तु किंचित्त्वं समानेतुमिहार्हसि ॥ २१

इमे हि दिव्ये मणिकुण्डले मे
देवाश्च यक्षाश्च महोरगाश्च ।
तैस्तैरुपायैः परिहर्तुकामा-
श्छिद्रेषु नित्यं परितर्कयन्ति ॥ २२
निक्षिप्तमेतद्भुवि पन्नगास्तु
रत्नं समासाद्य परामृषेयुः ।
यक्षास्तथोच्छिष्टधृतं सुराश्च
निद्रावशं त्वा परिधर्षयेयुः ॥ २३

छिद्रेष्वेतेषु हि सदा ह्यधृष्येषु द्विजर्षभ ।
देवराक्षसनागानामप्रमत्तेन धार्यते ॥ २४
स्यन्देते हि दिवा रुक्मं रात्रौ च द्विजसत्तम ।
नक्तं नक्षत्रताराणां प्रभामाक्षिप्य वर्तते ॥ २५
एते ह्यामुच्य भगवन्क्षुत्पिपासाभयं कुतः ।
विषाग्निश्वापदेभ्यश्च भयं जातु न विद्यते ॥ २६
ह्रस्वेन चैते आमुक्ते भवतो ह्रस्वके तदा ।
अनुरूपेण चामुक्ते तत्प्रमाणे हि जायतः ॥ २७
एवंविधे ममैते वै कुण्डले परमार्चिते ।
त्रिषु लोकेषु विख्याते तदभिज्ञानमानय ॥ २८

इति श्रीमहाभारते आश्वमेधिकपर्वणि
षट्पञ्चाशोऽध्यायः ॥ ५६ ॥

५७

वैशंपायन उवाच ।

स मित्रसहमासाद्य त्वभिज्ञानमयाचत ।
तस्मै ददावभिज्ञानं स चेक्ष्वाकुवरस्तदा ॥ १

सौदास उवाच ।

न चैवैषा गतिः क्षेम्या न चान्या विद्यते गतिः ।
एतन्मे मतमाज्ञाय प्रयच्छ मणिकुण्डले ॥ २

वैशंपायन उवाच ।

इत्युक्तस्तामुत्तङ्कस्तु भर्तुर्वाक्यमथाब्रवीत् ।
श्रुत्वा च सा ततः प्रादात्तस्मै ते मणिकुण्डले ॥ ३
अवाप्य कुण्डले ते तु राजानं पुनरब्रवीत् ।
किमेतद्गुह्यवचनं श्रोतुमिच्छामि पार्थिव ॥ ४

सौदास उवाच ।

प्रजा निसर्गाद्विप्रान्वै क्षत्रियाः पूजयन्ति ह ।
विप्रेभ्यश्चापि बहवो दोषाः प्रादुर्भवन्ति नः ॥ ५
सोऽहं द्विजेभ्यः प्रणतो विप्राद्दोषमवाप्तवान् ।
गतिमन्यां न पश्यामि मदयन्तीसहायवान् ।
स्वर्गद्वारस्य गमने स्थाने चेह द्विजोत्तम ॥ ६
न हि राज्ञा विशेषेण विरुद्धेन द्विजातिभिः ।
शक्यं नृलोके संस्थातुं प्रेत्य वा सुखमेधितुम् ॥ ७
तदिष्टे ते मयैवैते दत्ते स्वे मणिकुण्डले ।
यः कृतस्तेऽद्य समयः सफलं तं कुरुष्व मे ॥ ८

उत्तङ्क उवाच ।

राजंस्तथेह कर्तास्मि पुनरेष्यामि ते वशम् ।
प्रश्नं तु कंचित्प्रष्टुं त्वां व्यवसिष्ये परंतप ॥ ९

सौदास उवाच ।

ब्रूहि विप्र यथाकामं प्रतिवक्तास्मि ते वचः ।
छेत्तास्मि संशयं तेऽद्य न मेऽत्रास्ति विचारणा ॥

उत्तङ्क उवाच ।

प्राहुर्वाक्संगतं मित्रं धर्मनैपुण्यदर्शिनः ।
मित्रेषु यश्च विषमः स्तेन इत्येव तं विदुः ॥ ११
स भवान्मित्रतामद्य संप्राप्तो मम पार्थिव ।
स मे बुद्धिं प्रयच्छस्व समां बुद्धिमतां वर ॥ १२
अवाप्तार्थोऽहमद्येह भवांश्च पुरुषादकः ।
भवत्सकाशमागन्तुं क्षमं मम न वेति वा ॥ १३

सौदास उवाच ।

क्षमं चेदिह वक्तव्यं मया द्विजवरोत्तम ।
मत्समीपं द्विजश्रेष्ठ नागन्तव्यं कथंचन ॥ १४
एवं तव प्रपश्यामि श्रेयो भृगुकुलोद्वह ।
आगच्छतो हि ते विप्र भवेन्मृत्युरसंशयम् ॥ १५

वैशंपायन उवाच ।

इत्युक्तः स तदा राज्ञा क्षमं बुद्धिमता हितम् ।
समनुज्ञाप्य राजानमहल्यां प्रति जग्मिवान् ॥ १६
गृहीत्वा कुण्डले दिव्ये गुरुपत्न्याः प्रियंकरः ।
जवेन महता प्रायाद्गौतमस्याश्रमं प्रति ॥ १७
यथा तयो रक्षणं च मदयन्त्याभिभाषितम् ।
तथा ते कुण्डले बद्ध्वा तथा कृष्णाजिनेऽनयत् ॥
स कस्मिंश्चित्क्षुधाविष्टः फलभारसमन्वितम् ।
बिल्वं ददर्श कस्मिंश्चिदारुरोह क्षुधान्वितः ॥ १९
शाखास्वासज्य तस्यैव कृष्णाजिनमरिंदम ।
यस्मिंस्ते कुण्डले बद्धे तदा द्विजवरेण वै ॥ २०
विशीर्णबन्धने तस्मिन्गते कृष्णाजिने महीम् ।
अपश्यद्भुजगः कश्चित्ते तत्र मणिकुण्डले ॥ २१
ऐरावतकुलोत्पन्नः शीघ्रो भूत्वा तदा स वै ।
विदश्यास्येन वल्मीकं विवेशाथ स कुण्डले ॥ २२
ह्रियमाणे तु दृष्ट्वा स कुण्डले भुजगेन ह ।
पपात वृक्षात्सोद्वेगो दुःखात्परमकोपनः ॥ २३

स दण्डकाष्ठमादाय वल्मीकमखनत्तदा ।
क्रोधामर्षाभितप्ताङ्गस्ततो वै द्विजपुंगवः ॥ २४
तस्य वेगमसह्यं तमसहन्ती वसुंधरा ।
दण्डकाष्ठाभिनुन्नाङ्गी चचाल भृशमातुरा ॥ २५
ततः खनत एवाथ विप्रर्षेर्धरणीतलम् ।
नागलोकस्य पन्थानं कर्तुकामस्य निश्चयात् ॥२६
रथेन हरियुक्तेन तं देशमुपजग्मिवान् ।
वज्रपाणिर्महातेजा ददर्श च द्विजोत्तमम् ॥ २७
स तु तं ब्राह्मणो भूत्वा तस्य दुःखेन दुःखितः ।
उत्तङ्कमब्रवीत्तात नैतच्छक्यं त्वयेति वै ॥ २८
इतो हि नागलोको वै योजनानि सहस्रशः ।
न दण्डकाष्ठसाध्यं च मन्ये कार्यमिदं तव ॥ २९

उत्तङ्क उवाच ।

नागलोके यदि ब्रह्मन्न शक्ये कुण्डले मया ।
प्राप्तुं प्राणान्विमोक्ष्यामि पश्यतस्ते द्विजोत्तम ॥३०
यदा स नाशकत्तस्य निश्चयं कर्तुमन्यथा ।
वज्रपाणिस्तदा दण्डं वज्रास्त्रेण युयोज ह ॥ ३१
ततो वज्रप्रहारैस्तैर्दार्यमाणा वसुंधरा ।
नागलोकस्य पन्थानमकरोज्जनमेजय ॥ ३२
स तेन मार्गेण तदा नागलोकं विवेश ह ।
ददर्श नागलोकं च योजनानि सहस्रशः ॥ ३३
प्राकारनिचयैर्दिव्यैर्मणिमुक्ताभ्यलंकृतैः ।
उपपन्नं महाभाग शातकुम्भमयैस्तथा ॥ ३४
वापीः स्फटिकसोपाना नदीश्च विमलोदकाः ।
ददर्श वृक्षांश्च बहून्नानाद्विजगणायुतान् ॥ ३५
तस्य लोकस्य च द्वारं ददर्श स भृगूद्वहः ।
पञ्चयोजनविस्तारमायतं शतयोजनम् ॥ ३६
नागलोकमुत्तङ्कस्तु प्रेक्ष्य दीनोऽभवत्तदा ।
निराशश्चाभवत्तात कुण्डलाहरणे पुनः ॥ ३७
तत्र प्रोवाच तुरगस्तं कृष्णश्वेतवालधिः ।
ताम्रास्यनेत्रः कौरव्य प्रज्वलन्निव तेजसा ॥ ३८
धमस्वापानमेतन्मे ततस्त्वं विप्र लप्स्यसे ।
ऐरावतसुतेनेह तवानीते हि कुण्डले ॥ ३९
मा जुगुप्सां कृथाः पुत्र त्वमत्रार्थे कथंचन ।
त्वयैतद्धि समाचीर्णं गौतमस्याश्रमे तदा ॥ ४०

उत्तङ्क उवाच ।

कथं भवन्तं जानीयामुपाध्यायाश्रमं प्रति ।
यन्मया चीर्णपूर्वं च श्रोतुमिच्छामि तद्ध्यहम् ॥४१

अश्व उवाच ।

गुरोर्गुरुं मां जानीहि ज्वलितं जातवेदसम् ।
त्वया ह्यहं सदा वत्स गुरोरर्थेऽभिपूजितः ॥ ४२
सततं पूजितो विप्र शुचिना भृगुनन्दन ।
तस्माच्छ्रेयो विधास्यामि तवैवं कुरु मा चिरम् ॥
इत्युक्तः स तथाकार्षीदुत्तङ्कश्चित्रभानुना ।
घृतार्चिः प्रीतिमांश्चापि प्रजज्वाल दिधक्षया ॥ ४४
ततोऽस्य रोमकूपेभ्यो ध्मायमानस्य भारत ।
घनः प्रादुरभूद्धूमो नागलोकभयावहः ॥ ४५
तेन धूमेन सहसा वर्धमानेन भारत ।
नागलोके महाराज न प्रज्ञायत किंचन ॥ ४६
हाहाकृतमभूत्सर्वमैरावतनिवेशनम् ।
वासुकिप्रमुखानां च नागानां जनमेजय ॥ ४७
न प्रकाशन्त वेश्मानि धूमरुद्धानि भारत ।
नीहारसंवृतानीह वनानि गिरयस्तथा ॥ ४८
ते धूमरक्तनयना वह्नितेजोभितापिताः ।
आजग्मुर्निश्चयं ज्ञातुं भार्गवस्यातितेजसः ॥ ४९
श्रुत्वा च निश्चयं तस्य महर्षेस्तिग्मतेजसः ।
संभ्रान्तमनसः सर्वे पूजां चक्रुर्यथाविधि ॥ ५०
सर्वे प्राञ्जलयो नागा वृद्धबालपुरोगमाः ।
शिरोभिः प्रणिपत्योचुः प्रसीद भगवन्निति ॥ ५१
प्रसाद्य ब्राह्मणं ते तु पाद्यमर्घ्यं निवेद्य च ।

प्रायच्छन्कुण्डले दिव्ये पन्नगाः परमार्चिते ॥ ५२
ततः संपूजितो नागैस्तत्रोत्तङ्कः प्रतापवान् ।
अग्निं प्रदक्षिणं कृत्वा जगाम गुरुसद्म तत् ॥ ५३
स गत्वा त्वरितो राजन्गौतमस्य निवेशनम् ।
प्रायच्छत्कुण्डले दिव्ये गुरुपत्न्यै तदानघ ॥ ५४
एवं महात्मना तेन त्रीँल्लोकाञ्जनमेजय ।
परिक्रम्याहृते दिव्ये ततस्ते मणिकुण्डले ॥ ५५
एवंप्रभावः स मुनिरुत्तङ्को भरतर्षभ ।
परेण तपसा युक्तो यन्मां त्वं परिपृच्छसि ॥ ५६

इति श्रीमहाभारते आश्वमेधिकपर्वणि
सप्तपञ्चाशोऽध्यायः ॥ ५७ ॥

५८

जनमेजय उवाच ।

उत्तङ्काय वरं दत्त्वा गोविन्दो द्विजसत्तम ।
अत ऊर्ध्वं महाबाहुः किं चकार महायशाः ॥ १

वैशंपायन उवाच ।

दत्त्वा वरमुत्तङ्काय प्रायात्सात्यकिना सह ।
द्वारकामेव गोविन्दः शीघ्रवेगैर्महाहयैः ॥ २
सरांसि च नदीश्चैव वनानि विविधानि च ।
अतिक्रम्य ससादाथ रम्यां द्वारवतीं पुरीम् ॥ ३
वर्तमाने महाराज महे रैवतकस्य च ।
उपायात्पुण्डरीकाक्षो युयुधानानुगस्तदा ॥ ४
अलंकृतस्तु स गिरिर्नानारूपविचित्रितैः ।
बभौ रुक्ममयैः कोशैः सर्वतः पुरुषर्षभ ॥ ५
काञ्चनस्रग्भिरग्र्याभिः सुमनोभिस्तथैव च ।
वासोभिश्च महाशैलः कल्पवृक्षैश्च सर्वशः ॥ ६
दीपवृक्षैश्च सौवर्णैरभीक्ष्णमुपशोभितः ।
गुहानिर्झरदेशेषु दिवाभूतो बभूव ह ॥ ७
पताकाभिर्विचित्राभिः सघण्टाभिः समन्ततः ।
पुंभिः स्त्रीभिश्च संघुष्टः प्रगीत इव चाभवत् ।
अतीव प्रेक्षणीयोऽभून्मेरुर्मुनिगणैरिव ॥ ८
मत्तानां हृष्टरूपाणां स्त्रीणां पुंसां च भारत ।
गायतां पर्वतेन्द्रस्य दिवस्पृगिव निस्वनः ॥ ९
प्रमत्तमत्तसंमत्तक्ष्वेडितोत्कृष्टसंकुला ।
तथा किलकिलाशब्दैर्भूरभूत्सुमनोहरा ॥ १०
विपणापणवान्रम्यो भक्ष्यभोज्यविहारवान् ।
वस्त्रमाल्योत्करयुतो वीणावेणुमृदङ्गवान् ॥ ११
सुरामैरेयमिश्रेण भक्ष्यभोज्येन चैव ह ।
दीनान्धकृपणादिभ्यो दीयमानेन चानिशम् ।
बभौ परमकल्याणो महस्तस्य महागिरेः ॥ १२
पुण्यावसथवान्वीर पुण्यकृद्भिर्निषेवितः ।
विहारो वृष्णिवीराणां महे रैवतकस्य ह ।
स नगो वेश्मसंकीर्णो देवलोक इवाबभौ ॥ १३
तदा च कृष्णसांनिध्यमासाद्य भरतर्षभ ।
शक्रसद्मप्रतीकाशो बभूव स हि शैलराट् ॥ १४
ततः संपूज्यमानः स विवेश भवनं शुभम् ।
गोविन्दः सात्यकिश्चैव जगाम भवनं स्वकम् ॥१५
विवेश च स हृष्टात्मा चिरकालप्रवासकः ।
कृत्वा नसुकरं कर्म दानवेष्विव वासवः ॥ १६
उपयातं तु वार्ष्णेयं भोजवृष्ण्यन्धकास्तदा ।
अभ्यगच्छन्महात्मानं देवा इव शतक्रतुम् ॥ १७
स तानभ्यर्च्य मेधावी पृष्ट्वा च कुशलं तदा ।
अभ्यवादयत प्रीतः पितरं मातरं तथा ॥ १८
ताभ्यां च संपरिष्वक्तः सान्त्वितश्च महाभुजः ।
उपोपविष्टस्तैः सर्वैर्वृष्णिभिः परिवारितः ॥ १९
स विश्रान्तो महातेजाः कृतपादावसेचनः ।
कथयामास तं कृष्णः पृष्टः पित्रा महाहवम् ॥२०

इति श्रीमहाभारते आश्वमेधिकपर्वणि
अष्टपञ्चाशोऽध्यायः ॥ ५८ ॥

५९

वसुदेव उवाच ।

श्रुतवानस्मि वार्ष्णेय संग्रामं परमाद्भुतम् ।
नराणां वदतां पुत्र कथोद्घातेषु नित्यशः ॥ १
त्वं तु प्रत्यक्षदर्शी च कार्यज्ञश्च महाभुज ।
तस्मात्प्रब्रूहि संग्रामं याथातथ्येन मेऽनघ ॥ २
यथा तदभवद्युद्धं पाण्डवानां महात्मनाम् ।
भीष्मकर्णकृपद्रोणशल्यादिभिरनुत्तमम् ॥ ३
अन्येषां क्षत्रियाणां च कृतास्त्राणामनेकशः ।
नानावेषाकृतिमतां नानादेशनिवासिनाम् ॥ ४
इत्युक्तः पुण्डरीकाक्षः पित्रा मातुस्तदन्तिके ।
शशंस कुरुवीराणां संग्रामे निधनं यथा ॥ ५

वासुदेव उवाच ।

अत्यद्भुतानि कर्माणि क्षत्रियाणां महात्मनाम् ।
बहुलत्वान्न संख्यातुं शक्यान्यब्दशतैरपि ॥ ६
प्राधान्यतस्तु गदतः समासेनैव मे शृणु ।
कर्माणि पृथिवीशानां यथावदमरद्युते ॥ ७
भीष्मः सेनापतिरभूदेकादशचमूपतिः ।
कौरव्यः कौरवेयाणां देवानामिव वासवः ॥ ८
शिखण्डी पाण्डुपुत्राणां नेता सप्तचमूपतिः ।
बभूव रक्षितो धीमान्धीमता सव्यसाचिना ॥ ९
तेषां तदभवद्युद्धं दशाहानि महात्मनाम् ।
कुरूणां पाण्डवानां च सुमहद्रोमहर्षणम् ॥ १०
ततः शिखण्डी गाङ्गेयमयुध्यन्तं महाहवे ।
जघान बहुभिर्बाणैः सह गाण्डीवधन्वना ॥ ११
अकरोत्स ततः कालं शरतल्पगतो मुनिः ।
अयनं दक्षिणं हित्वा संप्राप्ते चोत्तरायणे ॥ १२
ततः सेनापतिरभूद्द्रोणोऽस्त्रविदुषां वरः ।
प्रवीरः कौरवेन्द्रस्य काव्यो दैत्यपतेरिव ॥ १३
अक्षौहिणीभिः शिष्टाभिर्नवभिर्द्विजसत्तमः ।
संवृतः समरश्लाघी गुप्तः कृपवृषादिभिः ॥ १४
धृष्टद्युम्नस्त्वभून्नेता पाण्डवानां महास्त्रवित् ।
गुप्तो भीमेन तेजस्वी मित्रेण वरुणो यथा ॥ १५
पञ्चसेनापरिवृतो द्रोणप्रेप्सुर्महामनाः ।
पितुर्निकारान्संस्मृत्य रणे कर्माकरोन्महत् ॥ १६
तस्मिंस्ते पृथिवीपाला द्रोणपार्षतसंगरे ।
नानादिगागता वीराः प्रायशो निधनं गताः ॥ १७
दिनानि पञ्च तद्युद्धमभूत्परमदारुणम् ।
ततो द्रोणः परिश्रान्तो धृष्टद्युम्नवशं गतः ॥ १८
ततः सेनापतिरभूत्कर्णो दौर्योधने बले ।
अक्षौहिणीभिः शिष्टाभिर्वृतः पञ्चभिराहवे ॥ १९
तिस्रस्तु पाण्डुपुत्राणां चम्वो बीभत्सुपालिताः ।
हतप्रवीरभूयिष्ठा बभूवुः समवस्थिताः ॥ २०
ततः पार्थं समासाद्य पतंग इव पावकम् ।
पञ्चत्वमगमत्सौतिर्द्वितीयेऽहनि दारुणे ॥ २१
हते कर्णे तु कौरव्या निरुत्साहा हतौजसः ।
अक्षौहिणीभिस्तिसृभिर्मद्रेशं पर्यवारयन् ॥ २२
हतवाहनभूयिष्ठाः पाण्डवास्तु युधिष्ठिरम् ।
अक्षौहिण्या निरुत्साहाः शिष्टया पर्यवारयन् ॥ २३
अवधीन्मद्रराजानं कुरुराजो युधिष्ठिरः ।
तस्मिंस्तथार्धदिवसे कर्म कृत्वा सुदुष्करम् ॥ २४
हते शल्ये तु शकुनिं सहदेवो महामनाः ।
आहर्तारं कलेस्तस्य जघानामितविक्रमः ॥ २५
निहते शकुनौ राजा धार्तराष्ट्रः सुदुर्मनाः ।
अपाक्रामद्गदापाणिर्हतभूयिष्ठसैनिकः ॥ २६
तमन्वधावत्संक्रुद्धो भीमसेनः प्रतापवान् ।
ह्रदे द्वैपायने चापि सलिलस्थं ददर्श तम् ॥ २७
ततः शिष्टेन सैन्येन समन्तात्परिवार्य तम् ।
उपोपविविशुर्हृष्टा ह्रदस्थं पञ्च पाण्डवाः ॥ २८
विगाह्य सलिलं त्वाशु वाग्बाणैर्भृशविक्षतः ।

उत्थाय स गदापाणिर्युद्धाय समुपस्थितः ॥ २९
ततः स निहतो राजा धार्तराष्ट्रो महामृधे ।
भीमसेनेन विक्रम्य पश्यतां पृथिवीक्षिताम् ॥ ३०
ततस्तत्पाण्डवं सैन्यं संसुप्तं शिबिरे निशि ।
निहतं द्रोणपुत्रेण पितुर्वधममृष्यता ॥ ३१
हतपुत्रा हतबला हतमित्रा मया सह ।
युयुधानद्वितीयेन पञ्च शिष्टाः स्म पाण्डवाः ॥३२
सहैव कृपभोजाभ्यां द्रौणिर्युद्धादमुच्यत ।
युयुत्सुश्चापि कौरव्यो मुक्तः पाण्डवसंश्रयात् ॥३३
निहते कौरवेन्द्रे च सानुबन्धे सुयोधने ।
विदुरः संजयश्चैव धर्मराजमुपस्थितौ ॥ ३४
एवं तदभवद्युद्धमहान्यष्टादश प्रभो ।
यत्र ते पृथिवीपाला निहता स्वर्गमावसन् ॥ ३५

वैशंपायन उवाच ।

शृण्वतां तु महाराज कथां तां रोमहर्षणीम् ।
दुःखहर्षपरिक्लेशा वृष्णीनामभवंस्तदा ॥ ३६

इति श्रीमहाभारते आश्वमेधिकपर्वणि
एकोनषष्टितमोऽध्यायः ॥ ५९ ॥

६०

वैशंपायन उवाच ।

कथयन्नेव तु तदा वासुदेवः प्रतापवान् ।
महाभारतयुद्धं तत्कथान्ते पितुरग्रतः ॥ १
अभिमन्योर्वधं वीरः सोऽत्यक्रामत भारत ।
अप्रियं वसुदेवस्य मा भूदिति महामनाः ॥ २
मा दौहित्रवधं श्रुत्वा वसुदेवो महात्ययम् ।
दुःखशोकाभिसंतप्तो भवेदिति महामतिः ॥ ३
सुभद्रा तु तमुत्क्रान्तमात्मजस्य वधं रणे ।
आचक्ष्व कृष्ण सौभद्रवधमित्यपतद्भुवि ॥ ४
तामपश्यन्निपतितां वसुदेवः क्षितौ तदा ।
दृष्ट्वैव च पपातोर्व्यां सोऽपि दुःखेन मूर्छितः ॥५
ततः स दौहित्रवधाद्दुःखशोकसमन्वितः ।
वसुदेवो महाराज कृष्णं वाक्यमथाब्रवीत् ॥ ६
ननु त्वं पुण्डरीकाक्ष सत्यवाग्भुवि विश्रुतः ।
यद्दौहित्रवधं मेऽद्य न ख्यापयसि शत्रुहन् ॥ ७
तद्भागिनेयनिधनं तत्त्वेनाचक्ष्व मे विभो ।
सदृशाक्षस्तव कथं शत्रुभिर्निहतो रणे ॥ ८
दुर्मरं बत वार्ष्णेय कालेऽप्राप्ते नृभिः सदा ।
यत्र मे हृदयं दुःखाच्छतधा न विदीर्यते ॥ ९
किमब्रवीत्त्वा संग्रामे सुभद्रां मातरं प्रति ।
मां चापि पुण्डरीकाक्ष चपलाक्षः प्रियो मम ॥१०
आहवं पृष्ठतः कृत्वा कच्चिन्न निहतः परैः ।
कच्चिन्मुखं न गोविन्द तेनाजौ विकृतं कृतम् ॥११
स हि कृष्ण महातेजाः श्लाघन्निव ममाग्रतः ।
बालभावेन विजयमात्मनोऽकथयत्प्रभुः ॥ १२
कच्चिन्न विकृतो बालो द्रोणकर्णकृपादिभिः ।
धरण्यां निहतः शेते तन्ममाचक्ष्व केशव ॥ १३
स हि द्रोणं च भीष्मं च कर्णं च रथिनां वरम् ।
स्पर्धते स्म रणे नित्यं दुहितुः पुत्रको मम ॥ १४
एवंविधं बहु तदा विलपन्तं सुदुःखितम् ।
पितरं दुःखिततरो गोविन्दो वाक्यमब्रवीत् ॥ १५
न तेन विकृतं वक्त्रं कृतं संग्राममूर्धनि ।
न पृष्ठतः कृतश्चापि संग्रामस्तेन दुस्तरः ॥ १६
निहत्य पृथिवीपालान्सहस्रशतसंघशः ।
खेदितो द्रोणकर्णाभ्यां दौःशासनिवशं गतः ॥ १७
एको ह्येकेन सततं युध्यमानो यदि प्रभो ।
न स शक्येत संग्रामे निहन्तुमपि वज्रिणा ॥ १८
समाहूते तु संग्रामे पार्थे संशप्तकैस्तदा ।
पर्यवार्यत संक्रुद्धैः स द्रोणादिभिराहवे ॥ १९
ततः शत्रुक्षयं कृत्वा सुमहान्तं रणे पितुः ।

दौहित्रस्तत्र वार्ष्णेय दौःशासनिवशं गतः ॥ २०
नूनं च स गतः स्वर्गं जहि शोकं महामते ।
न हि व्यसनमासाद्य सीदन्ते सन्नराः क्वचित् ॥
द्रोणकर्णप्रभृतयो येन प्रतिसमासिताः ।
रणे महेन्द्रप्रतिमाः स कथं नाप्नुयाद्दिवम् ॥ २२
स शोकं जहि दुर्धर्ष मा च मन्युवशं गमः ।
शस्त्रपूतां हि स गतिं गतः परपुरंजयः ॥ २३
तस्मिंस्तु निहते वीरे सुभद्रेयं स्वसा मम ।
दुःखार्तायो पृथां प्राप्य कुररीव ननाद ह ॥ २४
द्रौपदीं च समासाद्य पर्यपृच्छत दुःखिता ।
आर्ये क दारकाः सर्वे द्रष्टुमिच्छामि तानहम् ॥
अस्यास्तु वचनं श्रुत्वा सर्वास्ताः कुरुयोषितः ।
भुजाभ्यां परिगृह्यैनां चुक्रुशुः परमार्तवत् ॥ २६
उत्तरां चाब्रवीद्भद्रा भद्रे भर्ता क ते गतः ।
क्षिप्रमागमनं मह्यं तस्मै त्वं वेदयस्व ह ॥ २७
ननु नाम स वैराटि श्रुत्वा मम गिरं पुरा ।
भवनान्निष्पतत्याशु कस्मान्नाभ्येति ते पतिः ॥ २८
अभिमन्यो कुशलिनो मातुलास्ते महारथाः ।
कुशलं चाब्रुवन्सर्वे त्वां युयुत्सुमिहागतम् ॥ २९
आचक्ष्व मेऽद्य संग्रामं यथापूर्वमरिंदम ।
कस्मादेवं विलपतीं नाद्येह प्रतिभाषसे ॥ ३०
एवमादि तु वार्ष्णेय्यास्तदस्याः परिदेवितम् ।
श्रुत्वा पृथा सुदुःखार्ता शनैर्वाक्यमथाब्रवीत् ॥३१
सुभद्रे वासुदेवेन तथा सात्यकिना रणे ।
पित्रा च पालितो बालः स हतः कालधर्मणा ॥ ३२
ईदृशो मर्त्यधर्मोऽयं मा शुचो यदुनन्दिनि ।
पुत्रो हि तव दुर्धर्षः संप्राप्तः परमां गतिम् ॥ ३३
कुले महति जातासि क्षत्रियाणां महात्मनाम् ।
मा शुचश्चपलाक्षं त्वं पुण्डरीकनिभेक्षणे ॥ ३४
उत्तरां त्वमवेक्षस्व गर्भिणीं मा शुचः शुभे ।
पुत्रमेषा हि तस्याशु जनयिष्यति भामिनी ॥ ३५
एवमाश्वासयित्वैनां कुन्ती यदुकुलोद्वह ।
विहाय शोकं दुर्धर्षं श्राद्धमस्य ह्यकल्पयत् ॥ ३६
समनुज्ञाप्य धर्मज्ञा राजानं भीममेव च ।
यमौ यमोपमौ चैव ददौ दानान्यनेकशः ॥ ३७
ततः प्रदाय बह्वीर्गा ब्राह्मणेभ्यो यदूद्वह ।
समहृष्यत वार्ष्णेयी वैराटीं चाब्रवीदिदम् ॥ ३८
वैराटि नेह संतापस्त्वया कार्यो यशस्विनि ।
भर्तारं प्रति सुश्रोणि गर्भस्थं रक्ष मे शिशुम् ॥३९
एवमुक्त्वा ततः कुन्ती विरराम महाद्युते ।
तामनुज्ञाप्य चैवेमां सुभद्रां समुपानयम् ॥ ४०
एवं स निधनं प्राप्तो दौहित्रस्तव माधव ।
संतापं जहि दुर्धर्ष मा च शोके मनः कृथाः ॥४१

इति श्रीमहाभारते आश्वमेधिकपर्वणि
षष्टितमोऽध्यायः ॥ ६० ॥

६१

वैशंपायन उवाच ।

एतच्छ्रुत्वा तु पुत्रस्य वचः शूरात्मजस्तदा ।
विहाय शोकं धर्मात्मा ददौ श्राद्धमनुत्तमम् ॥ १
तथैव वासुदेवोऽपि स्वस्रीयस्य महात्मनः ।
दयितस्य पितुर्नित्यमकरोदौर्ध्वदेहिकम् ॥ २
षष्टिं शतसहस्राणि ब्राह्मणानां महाभुजः ।
विधिवद्भोजयामास भोज्यं सर्वगुणान्वितम् ॥ ३
आच्छाद्य च महाबाहुर्धनतृष्णामपानुदत् ।
ब्राह्मणानां तदा कृष्णस्तदभूद्रोमहर्षणम् ॥ ४
सुवर्णं चैव गाश्चैव शयनाच्छादनं तथा ।
दीयमानं तदा विप्राः प्रभूतमिति चाब्रुवन् ॥ ५
वासुदेवोऽथ दाशार्हो बलदेवः ससात्यकिः ।
अभिमन्योस्तदा श्राद्धमकुर्वन्सत्यकस्तदा ।

अतीव दुःखसंतप्ता न शमं चोपलेभिरे ॥ ६
तथैव पाण्डवा वीरा नगरे नागसाह्वये ।
नोपगच्छन्ति वै शान्तिमभिमन्युविनाकृताः ॥ ७
सुबहूनि च राजेन्द्र दिवसानि विराटजा ।
नाभुङ्क्त पतिशोकार्ता तदभूत्करुणं महत् ।
कुक्षिस्थ एव तस्यास्तु स गर्भः संप्रलीयत ॥ ८
आजगाम ततो व्यासो ज्ञात्वा दिव्येन चक्षुषा ।
आगम्य चाब्रवीद्धीमान्पृथां पृथुललोचनाम् ।
उत्तरां च महातेजाः शोकः संत्यज्यतामयम् ॥ ९
जनिष्यति महातेजाः पुत्रस्तव यशस्विनि ।
प्रभावाद्वासुदेवस्य मम व्याहरणादपि ।
पाण्डवानामयं चान्ते पालयिष्यति मेदिनीम् ॥१०
धनंजयं च संप्रेक्ष्य धर्मराजस्य पश्यतः ।
व्यासो वाक्यमुवाचेदं हर्षयन्निव भारत ॥ ११
पौत्रस्तव महाबाहो जनिष्यति महामनाः ।
पृथ्वीं सागरपर्यन्तां पालयिष्यति चैव ह ॥ १२
तस्माच्छोकं कुरुश्रेष्ठ जहि त्वमरिकर्शन ।
विचार्यमत्र न हि ते सत्यमेतद्भविष्यति ॥ १३
यच्चापि वृष्णिवीरेण कृष्णेन कुरुनन्दन ।
पुरोक्तं तत्तथा भावि मा तेऽत्रास्तु विचारणा ॥१४
विबुधानां गतो लोकानक्षयानात्मनिर्जितान् ।
न स शोच्यस्त्वया तात न चान्यैः कुरुभिस्तथा ॥
एवं पितामहेनोक्तो धर्मात्मा स धनंजयः ।
त्यक्त्वा शोकं महाराज हृष्टरूपोऽभवत्तदा ॥ १६
पितापि तव धर्मज्ञ गर्भे तस्मिन्महामते ।
अवर्धत यथाकालं शुक्लपक्षे यथा शशी ॥ १७
ततः संचोदयामास व्यासो धर्मात्मजं नृपम् ।
अश्वमेधं प्रति तदा ततः सोऽन्तर्हितोऽभवत् ॥१८
धर्मराजोऽपि मेधावी श्रुत्वा व्यासस्य तद्वचः ।
वित्तोपनयने तात चकार गमने मतिम् ॥ १९

इति श्रीमहाभारते आश्वमेधिकपर्वणि
एकषष्टितमोऽध्यायः ॥ ६१ ॥

६२

जनमेजय उवाच ।

श्रुत्वैतद्वचनं ब्रह्मन्व्यासेनोक्तं महात्मना ।
अश्वमेधं प्रति तदा किं नृप प्रचकार ह ॥ १
रत्नं च यन्मरुत्तेन निहितं पृथिवीतले ।
तदवाप कथं चेति तन्मे ब्रूहि द्विजोत्तम ॥ २

वैशंपायन उवाच ।

श्रुत्वा द्वैपायनवचो धर्मराजो युधिष्ठिरः ।
भ्रातॄन्सर्वान्समानाय्य काले वचनमब्रवीत् ।
अर्जुनं भीमसेनं च माद्रीपुत्रौ यमावपि ॥ ३
श्रुतं वो वचनं वीराः सौहृदाद्यन्महात्मना ।
कुरूणां हितकामेन प्रोक्तं कृष्णेन धीमता ॥ ४
तपोवृद्धेन महता सुहृदां भूतिमिच्छता ।
गुरुणा धर्मशीलेन व्यासेनाद्भुतकर्मणा ॥ ५
भीष्मेण च महाप्राज्ञ गोविन्देन च धीमता ।
संस्मृत्य तदहं सम्यक्कर्तुमिच्छामि पाण्डवाः ॥ ६
आयत्यां च तदात्वे च सर्वेषां तद्धि नो हितम् ।
अनुबन्धे च कल्याणं यद्वचो ब्रह्मवादिनः ॥ ७
इयं हि वसुधा सर्वा क्षीणरत्ना कुरूद्वहाः ।
तच्चाचष्ट बहु व्यासो मरुत्तस्य धनं नृपाः ॥ ८
यद्येतद्वो बहुमतं मन्यध्वं वा क्षमं यदि ।
तदानयामहे सर्वे कथं वा भीम मन्यसे ॥ ९
इत्युक्तवाक्ये नृपतौ तदा कुरुकुलोद्वह ।
भीमसेनो नृपश्रेष्ठं प्राञ्जलिर्वाक्यमब्रवीत् ॥ १०
रोचते मे महाबाहो यदिदं भाषितं त्वया ।
व्यासाख्यातस्य वित्तस्य समुपानयनं प्रति ॥ ११
यदि तत्प्राप्नुयामेह धनमाविक्षितं प्रभो ।

कृतमेव महाराज भवेदिति मतिर्मम ॥ १२
ते वयं प्रणिपातेन गिरीशस्य महात्मनः ।
तदानयाम भद्रं ते समभ्यर्च्य कपर्दिनम् ॥ १३
तं विभुं देवदेवेशं तस्यैवानुचरांश्च तान् ।
प्रसाद्यार्थमवाप्स्यामो नूनं वाग्बुद्धिकर्मभिः ॥ १४
रक्षन्ते ये च तद्द्रव्यं किंकरा रौद्रदर्शनाः ।
ते च वश्या भविष्यन्ति प्रसन्ने वृषभध्वजे ॥ १५
श्रुत्वैवं वदतस्तस्य वाक्यं भीमस्य भारत ।
प्रीतो धर्मात्मजो राजा बभूवातीव भारत ।
अर्जुनप्रमुखाश्चापि तथेत्येवाब्रुवन्मुदा ॥ १६
कृत्वा तु पाण्डवाः सर्वे रत्नाहरणनिश्चयम् ।
सेनामाज्ञापयामासुर्नक्षत्रेऽहनि च ध्रुवे ॥ १७
ततो ययुः पाण्डुसुता ब्राह्मणान्स्वस्ति वाच्य च ।
अर्चयित्वा सुरश्रेष्ठं पूर्वमेव महेश्वरम् ॥ १८
मोदकैः पायसेनाथ मांसापूपैस्तथैव च ।
आशास्य च महात्मानं प्रययुर्मुदिता भृशम् ॥ १९
तेषां प्रयास्यतां तत्र मङ्गलानि शुभान्यथ ।
प्राहुः प्रहृष्टमनसो द्विजाग्र्या नागराश्च ते ॥ २०
ततः प्रदक्षिणीकृत्य शिरोभिः प्रणिपत्य च ।
ब्राह्मणानग्निसहितान्प्रययुः पाण्डुनन्दनाः ॥ २१
समनुज्ञाप्य राजानं पुत्रशोकसमाहतम् ।
धृतराष्ट्रं सभार्यं वै पृथां पृथुललोचनाम् ॥ २२
मूले निक्षिप्य कौरव्यं युयुत्सुं धृतराष्ट्रजम् ।
संपूज्यमानाः पौरैश्च ब्राह्मणैश्च मनीषिभिः ॥ २३

इति श्रीमहाभारते आश्वमेधिकपर्वणि
द्विषष्टितमोऽध्यायः ॥ ६२ ॥

६३

वैशंपायन उवाच ।

ततस्ते प्रययुर्हृष्टाः प्रहृष्टनरवाहनाः ।
रथघोषेण महता पूरयन्तो वसुंधराम् ॥ १
संस्तूयमानाः स्तुतिभिः सूतमागधबन्दिभिः ।
स्वेन सैन्येन संवीता यथादित्याः स्वरश्मिभिः ॥२
पाण्डुरेणातपत्रेण ध्रियमाणेन मूर्धनि ।
बभौ युधिष्ठिरस्तत्र पौर्णमास्यामिवोडुराट् ॥ ३
जयाशिषः प्रहृष्टानां नराणां पथि पाण्डवः ।
प्रत्यगृह्णाद्यथान्यायं यथावत्पुरुषर्षभः ॥ ४
तथैव सैनिका राजन्राजानमनुयान्ति ये ।
तेषां हलहलाशब्दो दिवं स्तब्ध्वा व्यतिष्ठत ॥ ५
स सरांसि नदीश्चैव वनान्युपवनानि च ।
अत्यक्रामन्महाराजो गिरिं चैवान्वपद्यत ॥ ६
तस्मिन्देशे च राजेन्द्र यत्र तद्द्रव्यमुत्तमम् ।
चक्रे निवेशनं राजा पाण्डवः सह सैनिकैः ।
शिवे देशे समे चैव तदा भरतसत्तम ॥ ७
अग्रतो ब्राह्मणान्कृत्वा तपोविद्यादमान्वितान् ।
पुरोहितं च कौरव्य वेदवेदाङ्गपारगम् ॥ ८
प्राङ्निवेशात्तु राजानं ब्राह्मणाः सपुरोधसः ।
कृत्वा शान्तिं यथान्यायं सर्वतः पर्यवारयन् ॥ ९
कृत्वा च मध्ये राजानममात्यांश्च यथाविधि ।
षट्पथं नवसंस्थानं निवेशं चक्रिरे द्विजाः ॥ १०
मत्तानां वारणेन्द्राणां निवेशं च यथाविधि ।
कारयित्वा स राजेन्द्रो ब्राह्मणानिदमब्रवीत् ॥ ११
अस्मिन्कार्ये द्विजश्रेष्ठा नक्षत्रे दिवसे शुभे ।
यथा भवन्तो मन्यन्ते कर्तुमर्हथ तत्तथा ॥ १२
न नः कालात्ययो वै स्यादिहैव परिलम्बताम् ।
इति निश्चित्य विप्रेन्द्राः क्रियतां यदनन्तरम् ॥१३
श्रुत्वैतद्वचनं राज्ञो ब्राह्मणाः सपुरोधसः ।
इदमूचुर्वचो हृष्टा धर्मराजप्रियेप्सवः ॥ १४
अद्यैव नक्षत्रमहश्च पुण्यं
यतामहे श्रेष्ठतमं क्रियासु ।
अम्भोभिरद्येह वसाम राज-

ह्युपोष्यतां चापि भवद्भिरद्य ॥ १५
श्रुत्वा तु तेषां द्विजसत्तमानां
कृतोपवासा रजनीं नरेन्द्राः ।
ऊषुः प्रतीताः कुशसंस्तरेषु
यथाध्वरेषु ज्वलिता हव्यवाहाः ॥ १६
ततो निशा सा व्यगमन्महात्मनां
संशृण्वतां विप्रसमीरिता गिरः ।
ततः प्रभाते विमले द्विजर्षभा
वचोऽब्रुवन्धर्मसुतं नराधिपम् ॥ १७

इति श्रीमहाभारते आश्वमेधिकपर्वणि
त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

६४

ब्राह्मणा ऊचुः ।

क्रियतामुपहारोऽद्य त्र्यम्बकस्य महात्मनः ।
कृत्वोपहारं नृपते ततः स्वार्थे यतामहे ॥ १

वैशंपायन उवाच ।

श्रुत्वा तु वचनं तेषां ब्राह्मणानां युधिष्ठिरः ।
गिरीशस्य यथान्यायमुपहारमुपाहरत् ॥ २
आज्येन तर्पयित्वाग्निं विधिवत्संस्कृतेन ह ।
मन्त्रसिद्धं चरुं कृत्वा पुरोधाः प्रययौ तदा ॥ ३
स गृहीत्वा सुमनसो मन्त्रपूता जनाधिप ।
मोदकैः पायसेनाथ मांसैश्चोपाहरद्बलिम् ॥ ४
सुमनोभिश्च चित्राभिर्लाजैरुच्चावचैरपि ।
सर्वं स्विष्टकृतं कृत्वा विधिवद्वेदपारगः ।
किंकराणां ततः पश्चाच्चकार बलिमुत्तमम् ॥ ५
यक्षेन्द्राय कुबेराय मणिभद्राय चैव ह ।
तथान्येषां च यक्षाणां भूताधिपतयश्च ये ॥ ६
कृसरेण समांसेन निवापैस्तिलसंयुतैः ।
शुशुभे स्थानमत्यर्थं देवदेवस्य पार्थिव ॥ ७
कृत्वा तु पूजां रुद्रस्य गणानां चैव सर्वशः ।
ययौ व्यासं पुरस्कृत्य नृपो रत्ननिधिं प्रति ॥ ८
पूजयित्वा धनाध्यक्षं प्रणिपत्याभिवाद्य च ।
सुमनोभिर्विचित्राभिरपूपैः कृसरेण च ॥ ९
शङ्खादींश्च निधीन्सर्वान्निधिपालांश्च सर्वशः ।
अर्चयित्वा द्विजाग्र्यान्स स्वस्ति वाच्य च वीर्यवान् ॥
तेषां पुण्याहघोषेण तेजसा समवस्थितः ।
प्रीतिमान्स कुरुश्रेष्ठः खानयामास तं निधिम् ॥
ततः पात्र्यः सकरकाः साश्मन्तकमनोरमाः ।
भृङ्गाराणि कटाहानि कलशान्वर्धमानकान् ॥ १२
बहूनि च विचित्राणि भाजनानि सहस्रशः ।
उद्धारयामास तदा धर्मराजो युधिष्ठिरः ॥ १३
तेषां लक्षणमप्यासीन्महान्करपुटस्तथा ।
त्रिलक्षं भाजनं राजंस्तुलार्धमभवन्नृप ॥ १४
वाहनं पाण्डुपुत्रस्य तत्रासीत्तु विशां पते ।
षष्टिरुष्ट्रसहस्राणि शतानि द्विगुणा हयाः ॥ १५
वारणाश्च महाराज सहस्रशतसंमिताः ।
शकटानि रथाश्चैव तावदेव करेणवः ।
खराणां पुरुषाणां च परिसंख्या न विद्यते ॥ १६
एतद्वित्तं तदभवद्यदुद्दध्रे युधिष्ठिरः ।
षोडशाष्टौ चतुर्विंशत्सहस्रं भारलक्षणम् ॥ १७
एतेष्वाधाय तद्द्रव्यं पुनरभ्यर्च्य पाण्डवः ।
महादेवं प्रति ययौ पुरं नागाह्वयं प्रति ॥ १८
द्वैपायनाभ्यनुज्ञातः पुरस्कृत्य पुरोहितम् ।
गोयुते गोयुते चैव न्यवसत्पुरुषर्षभः ॥ १९
सा पुराभिमुखी राजञ्जगाम महती चमूः ।
कृच्छ्राद्द्रविणभारार्ता हर्षयन्ती कुरूद्वहान् ॥ २०

इति श्रीमहाभारते आश्वमेधिकपर्वणि
चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

६५

वैशंपायन उवाच ।

एतस्मिन्नेव काले तु वासुदेवोऽपि वीर्यवान् ।
उपायाद्वृष्णिभिः सार्धं पुरं वारणसाह्वयम् ॥ १
समयं वाजिमेधस्य विदित्वा पुरुषर्षभः ।
यथोक्तो धर्मपुत्रेण व्रजन्स स्वपुरीं प्रति ॥ २
रौक्मिणेयेन सहितो युयुधानेन चैव ह ।
चारुदेष्णेन साम्बेन गदेन कृतवर्मणा ॥ ३
सारणेन च वीरेण निशठेनोल्मुकेन च ।
बलदेवं पुरस्कृत्य सुभद्रासहितस्तदा ॥ ४
द्रौपदीमुत्तरां चैव पृथां चाप्यवलोककः ।
समाश्वासयितुं चापि क्षत्रिया निहतेश्वराः ॥ ५
तानागतान्समीक्ष्यैव धृतराष्ट्रो महीपतिः ।
प्रत्यगृह्णाद्यथान्यायं विदुरश्च महामनाः ॥ ६
तत्रैव न्यवसत्कृष्णः स्वर्चितः पुरुषर्षभः ।
विदुरेण महातेजास्तथैव च युयुत्सुना ॥ ७
वसत्सु वृष्णिवीरेषु तत्राथ जनमेजय ।
जज्ञे तव पिता राजन्परिक्षित्परवीरहा ॥ ८
स तु राजा महाराज ब्रह्मास्त्रेणाभिपीडितः ।
शवो बभूव निश्चेष्टो हर्षशोकविवर्धनः ॥ ९
हृष्टानां सिंहनादेन जनानां तत्र निस्वनः ।
आविश्य प्रदिशः सर्वाः पुनरेव व्युपारमत् ॥ १०
ततः सोऽतित्वरः कृष्णो विवेशान्तःपुरं तदा ।
युयुधानद्वितीयो वै व्यथितेन्द्रियमानसः ॥ ११
ततस्त्वरितमायान्तीं ददर्श स्वां पितृष्वसाम् ।
क्रोशन्तीमभिधावेति वासुदेवं पुनः पुनः ॥ १२
पृष्ठतो द्रौपदीं चैव सुभद्रां च यशस्विनीम् ।
सविक्रोशं सकरुणं बान्धवानां स्त्रियो नृप ॥ १३
ततः कृष्णं समासाद्य कुन्ती राजसुता तदा ।
प्रोवाच राजशार्दूल बाष्पगद्गदया गिरः ॥ १४
वासुदेव महाबाहो सुप्रजा देवकी त्वया ।
त्वं नो गतिः प्रतिष्ठा च त्वदायत्तमिदं कुलम् ॥ १५
यदुप्रवीर योऽयं ते स्वस्रीयस्यात्मजः प्रभो ।
अश्वत्थाम्ना हतो जातस्तमुज्जीवय केशव ॥ १६
त्वया ह्येतत्प्रतिज्ञातमैषीके यदुनन्दन ।
अहं संजीवयिष्यामि मृतं जातमिति प्रभो ॥ १७
सोऽयं जातो मृतस्तात पश्यैनं पुरुषर्षभ ।
उत्तरां च सुभद्रां च द्रौपदीं मां च माधव ॥ १८
धर्मपुत्रं च भीमं च फल्गुनं नकुलं तथा ।
सहदेवं च दुर्धर्ष सर्वान्नस्त्रातुमर्हसि ॥ १९
अस्मिन्प्राणाः समायत्ताः पाण्डवानां ममैव च ।
पाण्डोश्च पिण्डो दाशार्ह तथैव श्वशुरस्य मे ॥ २०
अभिमन्योश्च भद्रं ते प्रियस्य सदृशस्य च ।
प्रियमुत्पादयाद्य त्वं प्रेतस्यापि जनार्दन ॥ २१
उत्तरा हि प्रियोक्तं वै कथयत्यरिसूदन ।
अभिमन्योर्वचः कृष्ण प्रियत्वात्ते न संशयः ॥ २२
अब्रवीत्किल दाशार्ह वैराटीमार्जुनिः पुरा ।
मातुलस्य कुलं भद्रे तव पुत्रो गमिष्यति ॥ २३
गत्वा वृष्ण्यन्धककुलं धनुर्वेदं ग्रहीष्यति ।
अस्त्राणि च विचित्राणि नीतिशास्त्रं च केवलम् ॥
इत्येतत्प्रणयात्तात सौभद्रः परवीरहा ।
कथयामास दुर्धर्षस्तथा चैतन्न संशयः ॥ २५
तास्त्वां वयं प्रणम्येह याचामो मधुसूदन ।
कुलस्यास्य हितार्थं त्वं कुरु कल्याणमुत्तमम् ॥ २६
एवमुक्त्वा तु वार्ष्णेयं पृथा पृथुललोचना ।
उच्छ्रित्य बाहू दुःखार्ता ताश्चान्याः प्रापतन्भुवि ॥
अब्रुवंश्च महाराज सर्वाः सास्राविलेक्षणाः ।
स्वस्रीयो वासुदेवस्य मृतो जात इति प्रभो ॥ २८
एवमुक्ते ततः कुन्तीं प्रत्यगृह्णाज्जनार्दनः ।

भूमौ निपतितां चैनां सान्त्वयामास भारत ।। २९

इति श्रीमहाभारते आश्वमेधिकपर्वणि
पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

६६

वैशंपायन उवाच ।

उत्थितायां पृथायां तु सुभद्रा भ्रातरं तदा ।
दृष्ट्वा चुक्रोश दुःखार्ता वचनं चेदमब्रवीत् ।। १
पुण्डरीकाक्ष पश्यस्व पौत्रं पार्थस्य धीमतः ।
परिक्षीणेषु कुरुषु परिक्षीणं गतायुषम् ।। २
इषीका द्रोणपुत्रेण भीमसेनार्थमुद्यता ।
सोत्तरायां निपतिता विजये मयि चैव ह ।। ३
सेयं ज्वलन्ती हृदये मयि तिष्ठति केशव ।
यन्न पश्यामि दुर्धर्ष मम पुत्रसुतं विभो ।। ४
किं नु वक्ष्यति धर्मात्मा धर्मराजो युधिष्ठिरः ।
भीमसेनार्जुनौ चापि माद्रवत्याः सुतौ च तौ ।।५
श्रुत्वाभिमन्योस्तनयं जातं च मृतमेव च ।
मुषिता इव वार्ष्णेय द्रोणपुत्रेण पाण्डवाः ।। ६
अभिमन्युः प्रियः कृष्ण पितॄणां नात्र संशयः ।
ते श्रुत्वा किं नु वक्ष्यन्ति द्रोणपुत्रास्त्रनिर्जिताः ।।७
भवितातः परं दुःखं किं नु मन्ये जनार्दन ।
अभिमन्योः सुतात्कृष्ण मृताज्जातादरिंदम ।। ८
साहं प्रसादये कृष्ण त्वामद्य शिरसा नता ।
पृथेयं द्रौपदी चैव ताः पश्य पुरुषोत्तम ।। ९
यदा द्रोणसुतो गर्भान्पाण्डूनां हन्ति माधव ।
तदा किल त्वया द्रौणिः क्रुद्धेनोक्तोऽरिमर्दन ।।१०
अकामं त्वा करिष्यामि ब्रह्मबन्धो नराधम ।
अहं संजीवयिष्यामि किरीटितनयात्मजम् ।। ११
इत्येतद्वचनं श्रुत्वा जानमाना बलं तव ।
प्रसादये त्वा दुर्धर्ष जीवतामभिमन्युजः ।। १२
यद्येवं त्वं प्रतिश्रुत्य न करोषि वचः शुभम् ।
सफलं वृष्णिशार्दूल मृतां मामुपधारय ।। १३
अभिमन्योः सुतो वीर न संजीवति यद्ययम् ।
जीवति त्वयि दुर्धर्ष किं करिष्याम्यहं त्वया ।।१४
संजीवयैनं दुर्धर्ष मृतं त्वमभिमन्युजम् ।
सदृशाक्षसुतं वीर सस्यं वर्षन्निवाम्बुदः ।। १५
त्वं हि केशव धर्मात्मा सत्यवान्सत्यविक्रमः ।
स तां वाचमृतां कर्तुमर्हसि त्वमरिंदम ।। १६
इच्छन्नपि हि लोकांस्त्रीञ्जीवयेथा मृतानिमान् ।
किं पुनर्दयितं जातं स्वस्रीयस्यात्मजं मृतम् ।। १७
प्रभावज्ञास्मि ते कृष्ण तस्मादेतद्ब्रवीमि ते ।
कुरुष्व पाण्डुपुत्राणामिमं परमनुग्रहम् ।। १८
स्वसेति च महाबाहो हतपुत्रेति वा पुनः ।
प्रपन्ना मामियं वेति दयां कर्तुमिहार्हसि ।। १९

इति श्रीमहाभारते आश्वमेधिकपर्वणि
षट्षष्टितमोऽध्यायः ॥ ६६ ॥

६७

वैशंपायन उवाच ।

एवमुक्तस्तु राजेन्द्र केशिहा दुःखमूर्छितः ।
तथेति व्याजहारोच्चैर्ह्लादयन्निव तं जनम् ।। १
वाक्येन तेन हि तदा तं जनं पुरुषर्षभः ।
ह्लादयामास स विभुर्घर्मार्तं सलिलैरिव ।। २
ततः स प्राविशत्तूर्णं जन्मवेश्म पितुस्तव ।
अर्चितं पुरुषव्याघ्र सितैर्माल्यैर्यथाविधि ।। ३
अपां कुम्भैः सुपूर्णैश्च विन्यस्तैः सर्वतोदिशम् ।
घृतेन तिन्दुकालातैः सर्षपैश्च महाभुज ।। ४
शस्त्रैश्च विमलैर्न्यस्तैः पावकैश्च समन्ततः ।
वृद्धाभिश्चाभिरामाभिः परिचारार्थमच्युतः ।। ५
दक्षैश्च परितो वीर भिषग्भिः कुशलैस्तथा ।
ददर्श च स तेजस्वी रक्षोघ्नान्यपि सर्वशः ।
द्रव्याणि स्थापितानि स्म विधिवत्कुशलैर्जनैः ।। ६

तथायुक्तं च तद्दृष्ट्वा जन्मवेश्म पितुस्तव ।
हृष्टोऽभवद्धृषीकेशः साधु साध्विति चाब्रवीत् ॥ ७
तथा ब्रुवति वार्ष्णेये प्रहृष्टवदने तदा ।
द्रौपदी त्वरिता गत्वा वैराटीं वाक्यमब्रवीत् ॥ ८
अयमायाति ते भद्रे श्वशुरो मधुसूदनः ।
पुराणर्षिरचिन्त्यात्मा समीपमपराजितः ॥ ९
सापि बाष्पकलां वाचं निगृह्याश्रूणि चैव ह ।
सुसंवीताभवद्देवी देववत्कृष्णमीक्षती ॥ १०
सा तथा दूयमानेन हृदयेन तपस्विनी ।
दृष्ट्वा गोविन्दमायान्तं कृपणं पर्यदेवयत् ॥ ११
पुण्डरीकाक्ष पश्यस्व बालाविह विनाकृतौ ।
अभिमन्युं च मां चैव हतौ तुल्यं जनार्दन ॥ १२
वार्ष्णेय मधुहन्वीर शिरसा त्वां प्रसादये ।
द्रोणपुत्रास्त्रनिर्दग्धं जीवयैनं ममात्मजम् ॥ १३
यदि स्म धर्मराज्ञा वा भीमसेनेन वा पुनः ।
त्वया वा पुण्डरीकाक्ष वाक्यमुक्तमिदं भवेत् ॥ १४
अजानतीमिषीकेयं जनित्रीं हन्त्विति प्रभो ।
अहमेव विनष्टा स्यां नेदमेवंगतं भवेत् ॥ १५
गर्भस्थस्यास्य बालस्य ब्रह्मास्त्रेण निपातनम् ।
कृत्वा नृशंसं दुर्बुद्धिर्द्रौणिः किं फलमश्नुते ॥ १६
सा त्वा प्रसाद्य शिरसा याचे शत्रुनिबर्हण ।
प्राणांस्त्यक्ष्यामि गोविन्द नायं संजीवते यदि ॥ १७
अस्मिन्हि बहवः साधो ये ममासन्मनोरथाः ।
ते द्रोणपुत्रेण हताः किं नु जीवामि केशव ॥ १८
आसीन्मम मतिः कृष्ण पूर्णोत्सङ्गा जनार्दन ।
अभिवादयिष्ये दिष्ट्येति तदिदं वितथीकृतम् ॥ १९
चपलाक्षस्य दायादे मृतेऽस्मिन्पुरुषर्षभ ।
विफला मे कृताः कृष्ण हृदि सर्वे मनोरथाः ॥ २०
चपलाक्षः किलातीव प्रियस्ते मधुसूदन ।
सुतं पश्यस्व तस्येमं ब्रह्मास्त्रेण निपातितम् ॥ २१
कृतघ्नोऽयं नृशंसोऽयं यथास्य जनकस्तथा ।
यः पाण्डवीं श्रियं त्यक्त्वा गतोऽद्य यमसादनम् ॥
मया चैतत्प्रतिज्ञातं रणमूर्धनि केशव ।
अभिमन्यौ हते वीर त्वामेष्याम्यचिरादिति ॥ २३
तच्च नाकरवं कृष्ण नृशंसा जीवितप्रिया ।
इदानीमागतां तत्र किं नु वक्ष्यति फाल्गुनिः ॥ २४

इति श्रीमहाभारते आश्वमेधिकपर्वणि
सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

६८

वैशंपायन उवाच ।

सैवं विलप्य करुणं सोन्मादेव तपस्विनी ।
उत्तरा न्यपतद्भूमौ कृपणा पुत्रगृद्धिनी ॥ १
तां तु दृष्ट्वा निपतितां हतबन्धुपरिच्छदाम् ।
चुक्रोश कुन्ती दुःखार्ता सर्वाश्च भरतस्त्रियः ॥ २
मुहूर्तमिव तद्राजन्पाण्डवानां निवेशनम् ।
अप्रेक्षणीयमभवदार्तस्वरनिनादितम् ॥ ३
सा मुहूर्तं च राजेन्द्र पुत्रशोकाभिपीडिता ।
कश्मलाभिहता वीर वैराटी त्वभवत्तदा ॥ ४
प्रतिलभ्य तु सा संज्ञामुत्तरा भरतर्षभ ।
अङ्कमारोप्य तं पुत्रमिदं वचनमब्रवीत् ॥ ५
धर्मज्ञस्य सुतः संस्त्वमधर्ममवबुध्यसे ।
यस्त्वं वृष्णिप्रवीरस्य कुरुषे नाभिवादनम् ॥ ६
पुत्र गत्वा मम वचो ब्रूयास्त्वं पितरं तव ।
दुर्मरं प्राणिनां वीर काले प्राप्ते कथंचन ॥ ७
याहं त्वया विहीनाद्य पत्या पुत्रेण चैव ह ।
मर्तव्ये सति जीवामि हतस्वस्तिरकिंचना ॥ ८
अथ वा धर्मराज्ञाहमनुज्ञाता महाभुज ।
भक्षयिष्ये विषं तीक्ष्णं प्रवेक्ष्ये वा हुताशनम् ॥९
अथ वा दुर्मरं तात यदिदं मे सहस्रधा ।
पतिपुत्रविहीनाया हृदयं न विदीर्यते ॥ १०

उत्तिष्ठ पुत्र पश्येमां दुःखितां प्रपितामहीम् ।
आर्तामुपप्लुतां दीनां निमग्नां शोकसागरे ॥ ११
आर्यां च पश्य पाञ्चालीं सात्वतीं च तपस्विनीम् ।
मां च पश्य सुदुःखार्तां व्याधविद्धां मृगीमिव ॥
उत्तिष्ठ पश्य वदनं लोकनाथस्य धीमतः ।
पुण्डरीकपलाशाक्षं पुरेव चपलेक्षणम् ॥ १३
एवं विप्रलपन्तीं तु दृष्ट्वा निपतितां पुनः ।
उत्तरां ताः स्त्रियः सर्वाः पुनरुत्थापयन्त्युत ॥ १४
उत्थाय तु पुनर्धैर्यात्तदा मत्स्यपतेः सुता ।
प्राञ्जलिः पुण्डरीकाक्षं भूमावेवाभ्यवादयत् ॥ १५
श्रुत्वा स तस्या विपुलं विलापं पुरुषर्षभः ।
उपस्पृश्य ततः कृष्णो ब्रह्मास्त्रं संजहार तत् ॥१६
प्रतिजज्ञे च दाशार्हस्तस्य जीवितमच्युतः ।
अब्रवीच्च विशुद्धात्मा सर्वं विश्रावयञ्जगत् ॥ १७
न ब्रवीम्युत्तरे मिथ्या सत्यमेतद्भविष्यति ।
एष संजीवयाम्येनं पश्यतां सर्वदेहिनाम् ॥ १८
नोक्तपूर्वं मया मिथ्या स्वैरेष्वपि कदाचन ।
न च युद्धे परावृत्तस्तथा संजीवतामयम् ॥ १९
यथा मे दयितो धर्मो ब्राह्मणाश्च विशेषतः ।
अभिमन्योः सुतो जातो मृतो जीवत्वयं तथा ॥२०
यथाहं नाभिजानामि विजयेन कदाचन ।
विरोधं तेन सत्येन मृतो जीवत्वयं शिशुः ॥ २१
यथा सत्यं च धर्मश्च मयि नित्यं प्रतिष्ठितौ ।
तथा मृतः शिशुरयं जीवतामभिमन्युजः ॥ २२
यथा कंसश्च केशी च धर्मेण निहतौ मया ।
तेन सत्येन बालोऽयं पुनरुज्जीवतामिह ॥ २३
इत्युक्तो वासुदेवेन स बालो भरतर्षभ ।
शनैः शनैर्महाराज प्रास्पन्दत सचेतनः ॥ २४

इति श्रीमहाभारते आश्वमेधिकपर्वणि
अष्टषष्टितमोऽध्यायः ॥ ६८ ॥

६९

वैशंपायन उवाच ।

ब्रह्मास्त्रं तु यदा राजन्कृष्णेन प्रतिसंहृतम् ।
तदा तद्वेश्म ते पित्रा तेजसाभिविदीपितम् ॥ १
ततो रक्षांसि सर्वाणि नेशुस्त्यक्त्वा गृहं तु तत् ।
अन्तरिक्षे च वागासीत्साधु केशव साध्विति ॥ २
तदस्त्रं ज्वलितं चापि पितामहमगात्तदा ।
ततः प्राणान्पुनर्लेभे पिता तव जनेश्वर ।
व्यचेष्टत च बालोऽसौ यथोत्साहं यथाबलम् ॥ ३
बभूवुर्मुदिता राजंस्ततस्ता भरतस्त्रियः ।
ब्राह्मणान्वाचयामासुर्गोविन्दस्य च शासनात् ॥ ४
ततस्ता मुदिताः सर्वाः प्रशशंसुर्जनार्दनम् ।
स्त्रियो भरतसिंहानां नावं लब्ध्वेव पारगाः ॥ ५
कुन्ती द्रुपदपुत्री च सुभद्रा चोत्तरा तथा ।
स्त्रियश्चान्या नृसिंहानां बभूवुर्हृष्टमानसाः ॥ ६
तत्र मल्ला नटा झल्ला ग्रन्थिकाः सौखशायिकाः ।
सूतमागधसंघाश्चाप्यस्तुवन्वै जनार्दनम् ।
कुरुवंशस्तवाख्याभिराशीर्भिर्भरतर्षभ ॥ ७
उत्थाय तु यथाकालमुत्तरा यदुनन्दनम् ।
अभ्यवादयत प्रीता सह पुत्रेण भारत ।
ततस्तस्यै ददौ प्रीतो बहुरत्नं विशेषतः ॥ ८
तथान्ये वृष्णिशार्दूला नाम चास्याकरोत्प्रभुः ।
पितुस्तव महाराज सत्यसंधो जनार्दनः ॥ ९
परिक्षीणे कुले यस्माज्जातोऽयमभिमन्युजः ।
परिक्षिदिति नामास्य भवत्वित्यब्रवीत्तदा ॥ १०
सोऽवर्धत यथाकालं पिता तव नराधिप ।
मनःप्रह्लादनश्चासीत्सर्वलोकस्य भारत ॥ ११
मासजातस्तु ते वीर पिता भवति भारत ।
अथाजग्मुः सुबहुलं रत्नमादाय पाण्डवाः ॥ १२
तान्समीपगताञ्श्रुत्वा निर्ययुर्वृष्णिपुंगवाः ।

अलंचक्रुश्च माल्यौघैः पुरुषा नागसाह्वयम् ॥ १३
पताकाभिर्विचित्राभिर्ध्वजैश्च विविधैरपि ।
वेश्मानि समलंचक्रुः पौराश्चापि जनाधिप ॥ १४
देवतायतनानां च पूजा बहुविधास्तथा ।
संदिदेशाथ विदुरः पाण्डुपुत्रप्रियेप्सया ॥ १५
राजमार्गाश्च तत्रासन्सुमनोभिरलंकृताः ।
शुशुभे तत्पुरं चापि समुद्रौघनिभस्वनम् ॥ १६
नर्तकैश्चापि नृत्यद्भिर्गायनानां च निस्वनैः ।
आसीद्वैश्रवणस्येव निवासस्तत्पुरं तदा ॥ १७
बन्दिभिश्च नरै राजन्स्त्रीसहायैः सहस्रशः ।
तत्र तत्र विविक्तेषु समन्तादुपशोभितम् ॥ १८
पताका धूयमानाश्च श्वसता मातरिश्वना ।
अदर्शयन्निव तदा कुरून्वै दक्षिणोत्तरान् ॥ १९
अघोषयत्तदा चापि पुरुषो राजधूर्गतः ।
सर्वरात्रिविहारोऽद्य रत्नाभरणलक्षणः ॥ २०

इति श्रीमहाभारते आश्वमेधिकपर्वणि
एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

७०

वैशंपायन उवाच ।

तान्समीपगताञ्श्रुत्वा पाण्डवाञ्शत्रुकर्शनः ।
वासुदेवः सहामात्यः प्रत्युद्यातो दिदृक्षया ॥ १
ते समेत्य यथान्यायं पाण्डवा वृष्णिभिः सह ।
विविशुः सहिता राजन्पुरं वारणसाह्वयम् ॥ २
महतस्तस्य सैन्यस्य खुरनेमिस्वनेन च ।
द्यावापृथिव्यौ खं चैव शब्देनासीत्समावृतम् ॥ ३
ते कोशमग्रतः कृत्वा विविशुः स्वपुरं तदा ।
पाण्डवाः प्रीतमनसः सामात्याः ससुहृद्गणाः ॥ ४
ते समेत्य यथान्यायं धृतराष्ट्रं जनाधिपम् ।
कीर्तयन्तः स्वनामानि तस्य पादौ ववन्दिरे ॥ ५
धृतराष्ट्रादनु च ते गान्धारीं सुबलात्मजाम् ।
कुन्तीं च राजशार्दूल तदा भरतसत्तमाः ॥ ६
विदुरं पूजयित्वा च वैश्यापुत्रं समेत्य च ।
पूज्यमानाः स्म ते वीरा व्यराजन्त विशां पते ॥ ७
ततस्तत्परमाश्चर्यं विचित्रं महदद्भुतम् ।
शुश्रुवुस्ते तदा वीराः पितुस्ते जन्म भारत ॥ ८
तदुपश्रुत्य ते कर्म वासुदेवस्य धीमतः ।
पूजार्हं पूजयामासुः कृष्णं देवकिनन्दनम् ॥ ९
ततः कतिपयाहस्य व्यासः सत्यवतीसुतः ।
आजगाम महातेजा नगरं नागसाह्वयम् ॥ १०
तस्य सर्वे यथान्यायं पूजां चक्रुः कुरूद्वहाः ।
सह वृष्ण्यन्धकव्याघ्रैरुपासांचक्रिरे तदा ॥ ११
तत्र नानाविधाकाराः कथाः समनुकीर्त्य वै ।
युधिष्ठिरो धर्मसुतो व्यासं वचनमब्रवीत् ॥ १२
भवत्प्रसादाद्भगवन्यदिदं रत्नमाहृतम् ।
उपयोक्तुं तदिच्छामि वाजिमेधे महाक्रतौ ॥ १३
तदनुज्ञातुमिच्छामि भवता मुनिसत्तम ।
त्वदधीना वयं सर्वे कृष्णस्य च महात्मनः ॥ १४

व्यास उवाच ।

अनुजानामि राजंस्त्वां क्रियतां यदनन्तरम् ।
यजस्व वाजिमेधेन विधिवद्दक्षिणावता ॥ १५
अश्वमेधो हि राजेन्द्र पावनः सर्वपाप्मनाम् ।
तेनेष्ट्वा त्वं विपाप्मा वै भविता नात्र संशयः ॥ १६

वैशंपायन उवाच ।

इत्युक्तः स तु धर्मात्मा कुरुराजो युधिष्ठिरः ।
अश्वमेधस्य कौरव्य चकाराहरणे मतिम् ॥ १७
समनुज्ञाप्य तु स तं कृष्णद्वैपायनं नृपः ।
वासुदेवमथामन्त्र्य वाग्मी वचनमब्रवीत् ॥ १८
देवकी सुप्रजा देवी त्वया पुरुषसत्तम ।
यद्ब्रूयां त्वां महाबाहो तत्कृथास्त्वमिहाच्युत ॥ १९
त्वत्प्रभावार्जितान्भोगानश्नीम यदुनन्दन ।

पराक्रमेण बुद्ध्या च त्वयेयं निर्जिता मही ॥ २०
दीक्षयस्व त्वमात्मानं त्वं नः परमको गुरुः ।
त्वयीष्टवति धर्मज्ञ विपाप्मा स्यामहं विभो ।
त्वं हि यज्ञोऽक्षरः सर्वस्त्वं धर्मस्त्वं प्रजापतिः ॥२१

वासुदेव उवाच ।

त्वमेवैतन्महाबाहो वक्तुमर्हस्यरिंदम ।
त्वं गतिः सर्वभूतानामिति मे निश्चिता मतिः ॥२२
त्वं चाद्य कुरुवीराणां धर्मेणाभिविराजसे ।
गुणभूताः स्म ते राजंस्त्वं नो राजन्मतो गुरुः ॥२३
यजस्व मदनुज्ञातः प्राप्त एव क्रतुर्मया ।
युनक्तु नो भवान्कार्ये यत्र वाञ्छसि भारत ।
सत्यं ते प्रतिजानामि सर्वं कर्तास्मि तेऽनघ ॥२४
भीमसेनार्जुनौ चैव तथा माद्रवतीसुतौ ।
इष्टवन्तो भविष्यन्ति त्वयीष्टवति भारत ॥ २५

इति श्रीमहाभारते आश्वमेधिकपर्वणि
सप्ततितमोऽध्यायः ॥ ७० ॥

७१

वैशंपायन उवाच ।

एवमुक्तस्तु कृष्णेन धर्मपुत्रो युधिष्ठिरः ।
व्यासमामन्त्र्य मेधावी ततो वचनमब्रवीत् ॥ १
यथा कालं भवान्वेत्ति हयमेधस्य तत्त्वतः ।
दीक्षयस्व तदा मा त्वं त्वय्यायत्तो हि मे क्रतुः ॥२

व्यास उवाच ।

अहं पैलोऽथ कौन्तेय याज्ञवल्क्यस्तथैव च ।
विधानं यद्यथाकालं तत्कर्तारो न संशयः ॥ ३
चैत्र्यां हि पौर्णमास्यां च तव दीक्षा भविष्यति ।
संभाराः संभ्रियन्तां ते यज्ञार्थं पुरुषर्षभ ॥ ४
अश्वविद्याविदश्चैव सूता विप्राश्च तद्विदः ।
मेध्यमश्वं परीक्षन्तां तव यज्ञार्थसिद्धये ॥ ५
तमुत्सृज्य यथाशास्त्रं पृथिवीं सागराम्बराम् ।
स पर्येतु यशो नाम्ना तव पार्थिव वर्धयन् ॥ ६

वैशंपायन उवाच ।

इत्युक्तः स तथेत्युक्त्वा पाण्डवः पृथिवीपतिः ।
चकार सर्वं राजेन्द्र यथोक्तं ब्रह्मवादिना ।
संभाराश्चैव राजेन्द्र सर्वे संकल्पिताभवन् ॥ ७
स संभारान्समाहृत्य नृपो धर्मात्मजस्तदा ।
न्यवेदयदमेयात्मा कृष्णद्वैपायनाय वै ॥ ८
ततोऽब्रवीन्महातेजा व्यासो धर्मात्मजं नृपम् ।
यथाकालं यथायोगं सज्जाः स्म तव दीक्षणे ॥ ९
स्फ्यश्च कूर्चश्च सौवर्णो यच्चान्यदपि कौरव ।
तत्र योग्यं भवेत्किंचित्तद्रौक्मं क्रियतामिति ॥१०
अश्वश्चोत्सृज्यतामद्य पृथ्व्यामथ यथाक्रमम् ।
सुगुप्तश्च चरत्वेष यथाशास्त्रं युधिष्ठिर ॥ ११

युधिष्ठिर उवाच ।

अयमश्वो मया ब्रह्मन्नुत्सृष्टः पृथिवीमिमाम् ।
चरिष्यति यथाकामं तत्र वै संविधीयताम् ॥ १२
पृथिवीं पर्यटन्तं हि तुरगं कामचारिणम् ।
कः पालयेदिति मुने तद्भवान्वक्तुमर्हति ॥ १३

वैशंपायन उवाच ।

इत्युक्तः स तु राजेन्द्र कृष्णद्वैपायनोऽब्रवीत् ।
भीमसेनादवरजः श्रेष्ठः सर्वधनुष्मताम् ॥ १४
जिष्णुः सहिष्णुर्धृष्णुश्च स एनं पालयिष्यति ।
शक्तः स हि महीं जेतुं निवातकवचान्तकः ॥ १५
तस्मिन्ह्यस्त्राणि दिव्यानि दिव्यं संहननं तथा ।
दिव्यं धनुश्चेषुधी च स एनमनुयास्यति ॥ १६
स हि धर्मार्थकुशलः सर्वविद्याविशारदः ।
यथाशास्त्रं नृपश्रेष्ठ चारयिष्यति ते हयम् ॥ १७
राजपुत्रो महाबाहुः श्यामो राजीवलोचनः ।

अभिमन्योः पिता वीरः स एनमनुयास्यति ॥ १८
भीमसेनोऽपि तेजस्वी कौन्तेयोऽमितविक्रमः ।
समर्थो रक्षितुं राष्ट्रं नकुलश्च विशां पते ॥ १९
सहदेवस्तु कौरव्य समाधास्यति बुद्धिमान् ।
कुटुम्बतन्त्रं विधिवत्सर्वमेव महायशाः ॥ २०
तत्तु सर्वं यथान्यायमुक्तं कुरुकुलोद्वहः ।
चकार फल्गुनं चापि संदिदेश हयं प्रति ॥ २१

युधिष्ठिर उवाच ।

एह्यर्जुन त्वया वीर हयोऽयं परिपाल्यताम् ।
त्वमर्हो रक्षितुं ह्येनं नान्यः कश्चन मानवः ॥ २२
ये चापि त्वां महाबाहो प्रत्युदीयुर्नराधिपाः ।
तैर्विग्रहो यथा न स्यात्तथा कार्यं त्वयानघ ॥ २३
आख्यातव्यश्च भवता यज्ञोऽयं मम सर्वशः ।
पार्थिवेभ्यो महाबाहो समये गम्यतामिति ॥ २४
एवमुक्त्वा स धर्मात्मा भ्रातरं सव्यसाचिनम् ।
भीमं च नकुलं चैव पुरगुप्तौ समादधत् ॥ २५
कुटुम्बतन्त्रे च तथा सहदेवं युधां पतिम् ।
अनुमान्य महीपालं धृतराष्ट्रं युधिष्ठिरः ॥ २६

इति श्रीमहाभारते आश्वमेधिकपर्वणि
एकसप्ततितमोऽध्यायः ॥ ७१ ॥

७२

वैशंपायन उवाच ।

दीक्षाकाले तु संप्राप्ते ततस्ते सुमहर्त्विजः ।
विधिवद्दीक्षयामासुरश्वमेधाय पार्थिवम् ॥ १
कृत्वा स पशुबन्धांश्च दीक्षितः पाण्डुनन्दनः ।
धर्मराजो महातेजाः सहर्त्विग्भिर्व्यरोचत ॥ २
हयश्च हयमेधार्थं स्वयं स ब्रह्मवादिना ।
उत्सृष्टः शास्त्रविधिना व्यासेनामिततेजसा ॥ ३
स राजा धर्मजो राजन्दीक्षितो विबभौ तदा ।
हेममाली रुक्मकण्ठः प्रदीप्त इव पावकः ॥ ४
कृष्णाजिनी दण्डपाणिः क्षौमवासाः स धर्मजः ।
विबभौ द्युतिमान्भूयः प्रजापतिरिवाध्वरे ॥ ५
तथैवास्यर्त्विजः सर्वे तुल्यवेषा विशां पते ।
बभूवुरर्जुनश्चैव प्रदीप्त इव पावकः ॥ ६
श्वेताश्वः कृष्णसारं तं ससाराश्वं धनंजयः ।
विधिवत्पृथिवीपाल धर्मराजस्य शासनात् ॥ ७
विक्षिपन्गाण्डिवं राजन्बद्धगोधाङ्गुलित्रवान् ।
तमश्वं पृथिवीपाल मुदा युक्तः ससार ह ॥ ८
आकुमारं तदा राजन्नागमत्तत्पुरं विभो ।
द्रष्टुकामं कुरुश्रेष्ठं प्रयास्यन्तं धनंजयम् ॥ ९
तेषामन्योन्यसंमर्दादूष्मेव समजायत ।
दिदृक्षूणां हयं तं च तं चैव हयसारिणम् ॥ १०
ततः शब्दो महाराज दशाशाः प्रतिपूरयन् ।
बभूव प्रेक्षतां नृणां कुन्तीपुत्रं धनंजयम् ॥ ११
एष गच्छति कौन्तेयस्तुरगश्चैव दीप्तिमान् ।
यमन्वेति महाबाहुः संस्पृशन्धनुरुत्तमम् ॥ १२
एवं शुश्राव वदतां गिरो जिष्णुरुदारधीः ।
स्वस्ति तेऽस्तु व्रजारिष्टं पुनश्चैहीति भारत ॥ १३
अथापरे मनुष्येन्द्र पुरुषा वाक्यमब्रुवन् ।
नैनं पश्याम संमर्दे धनुरेतत्प्रदृश्यते ॥ १४
एतद्धि भीमनिर्ह्रादं विश्रुतं गाण्डिवं धनुः ।
स्वस्ति गच्छत्वरिष्टं वै पन्थानमकुतोभयम् ।
निवृत्तमेनं द्रक्ष्यामः पुनरेवं च तेऽब्रुवन् ॥ १५
एवमाद्या मनुष्याणां स्त्रीणां च भरतर्षभ ।
शुश्राव मधुरा वाचः पुनः पुनरुदीरिताः ॥ १६
याज्ञवल्क्यस्य शिष्यश्च कुशलो यज्ञकर्मणि ।
प्रायात्पार्थेन सहितः शान्त्यर्थं वेदपारगः ॥ १७
ब्राह्मणाश्च महीपाल बहवो वेदपारगाः ।
अनुजग्मुर्महात्मानं क्षत्रियाश्च विशोऽपि च ॥ १८
पाण्डवैः पृथिवीमश्वो निर्जितामस्त्रतेजसा ।

चचार स महाराज यथादेशं स सत्तम ॥ १९
तत्र युद्धानि वृत्तानि यान्यासन्पाण्डवस्य ह ।
तानि वक्ष्यामि ते वीर विचित्राणि महान्ति च ॥
स हयः पृथिवीं राजन्प्रदक्षिणमरिंदम ।
ससारोत्तरतः पूर्वं तन्निबोध महीपते ॥ २१
अवमृद्नन्स राष्ट्राणि पार्थिवानां हयोत्तमः ।
शनैस्तदा परिययौ श्वेताश्वश्च महारथः ॥ २२
तत्र संकलना नास्ति राज्ञामयुतशस्तदा ।
येऽयुध्यन्त महाराज क्षत्रिया हतबान्धवाः ॥ २३
किराता विकृता राजन्बहवोऽसिधनुर्धराः ।
म्लेच्छाश्चान्ये बहुविधाः पूर्वं विनिकृता रणे ॥२४
आर्याश्च पृथिवीपालाः प्रहृष्टनरवाहनाः ।
समीयुः पाण्डुपुत्रेण बहवो युद्धदुर्मदाः ॥ २५
एवं युद्धानि वृत्तानि तत्र तत्र महीपते ।
अर्जुनस्य महीपालैर्नानादेशनिवासिभिः ॥ २६
यानि तूभयतो राजन्प्रतप्तानि महान्ति च ।
तानि युद्धानि वक्ष्यामि कौन्तेयस्य तवानघ ॥२७

इति श्रीमहाभारते आश्वमेधिकपर्वणि
द्विसप्ततितमोऽध्यायः ॥ ७२ ॥

७३

वैशंपायन उवाच ।

त्रिगर्तैरभवद्युद्धं कृतवैरैः किरीटिनः ।
महारथसमाज्ञातैर्हतानां पुत्रनप्तृभिः ॥ १
ते समाज्ञाय संप्राप्तं यज्ञियं तुरगोत्तमम् ।
विषयान्ते ततो वीरा दंशिताः पर्यवारयन् ॥ २
रथिनो बद्धतूणीराः सदश्वैः समलंकृतैः ।
परिवार्य हयं राजन्महीतुं संप्रचक्रमुः ॥ ३
ततः किरीटी संचिन्त्य तेषां राज्ञां चिकीर्षितम् ।
वारयामास तान्वीरान्सान्त्वपूर्वमरिंदमः ॥ ४
तमनादृत्य ते सर्वे शरैरभ्यहनंस्तदा ।
तमोरजोभ्यां संछन्नांस्तान्किरीटी न्यवारयत् ॥ ५
अब्रवीच्च ततो जिष्णुः प्रहसन्निव भारत ।
निवर्तध्वमधर्मज्ञाः श्रेयो जीवितमेव वः ॥ ६
स हि वीरः प्रयास्यन्वै धर्मराजेन वारितः ।
हतबान्धवा न ते पार्थ हन्तव्याः पार्थिवा इति ॥
स तदा तद्वचः श्रुत्वा धर्मराजस्य धीमतः ।
तान्निवर्तध्वमित्याह न न्यवर्तन्त चापि ते ॥ ८
ततस्त्रिगर्तराजानं सूर्यवर्माणमाहवे ।
वितत्य शरजालेन प्रजहास धनंजयः ॥ ९
ततस्ते रथघोषेण खुरनेमिस्वनेन च ।
पूरयन्तो दिशः सर्वा धनंजयमुपाद्रवन् ॥ १०
सूर्यवर्मा ततः पार्थे शराणां नतपर्वणाम् ।
शतान्यमुञ्चद्राजेन्द्र लघ्वस्त्रमभिदर्शयन् ॥ ११
तथैवान्ये महेष्वासा ये तस्यैवानुयायिनः ।
मुमुचुः शरवर्षाणि धनंजयवधैषिणः ॥ १२
स ताञ्ज्यापुङ्खनिर्मुक्तैर्बहुभिः सुबहूञ्शरान् ।
चिच्छेद पाण्डवो राजंस्ते भूमौ न्यपतंस्तदा ॥१३
केतुवर्मा तु तेजस्वी तस्यैवावरजो युवा ।
युयुधे भ्रातुरर्थाय पाण्डवेन महात्मना ॥ १४
तमापतन्तं संप्रेक्ष्य केतुवर्माणमाहवे ।
अभ्यघ्नन्निशितैर्बाणैर्बीभत्सुः परवीरहा ॥ १५
केतुवर्मण्यभिहते धृतवर्मा महारथः ।
रथेनाशु समावृत्य शरैर्जिष्णुमवाकिरत् ॥ १६
तस्य तां शीघ्रतामीक्ष्य तुतोषातीव वीर्यवान् ।
गुडाकेशो महातेजा बालस्य धृतवर्मणः ॥ १७
न संदधानं ददृशे नाददानं च तं तदा ।
किरन्तमेव स शरान्ददृशे पाकशासनिः ॥ १८
स तु तं पूजयामास धृतवर्माणमाहवे ।
मनसा स मुहूर्तं वै रणे समभिहर्षयन् ॥ १९
तं पन्नगमिव क्रुद्धं कुरुवीरः स्मयन्निव ।

प्रीतिपूर्वं महाराज प्राणैर्न व्यपरोपयत् ॥ २०
स तथा रक्ष्यमाणो वै पार्थेनामिततेजसा ।
धृतवर्मा शरं तीक्ष्णं मुमोच विजये तदा ॥ २१
स तेन विजयस्तूर्णमस्यन्विद्धः करे भृशम् ।
मुमोच गाण्डिवं दुःखात्तत्पपाताथ भूतले ॥ २२
धनुषः पततस्तस्य सव्यसाचिकराद्विभो ।
इन्द्रस्येवायुधस्यासीद्रूपं भरतसत्तम ॥ २३
तस्मिन्निपतिते दिव्ये महाधनुषि पार्थिव ।
जहास सस्वनं हासं धृतवर्मा महाहवे ॥ २४
ततो रोषान्वितो जिष्णुः प्रमृज्य रुधिरं करात् ।
धनुरादत्त तद्दिव्यं शरवर्षं ववर्ष च ॥ २५
ततो हलहलाशब्दो दिवस्पृगभवत्तदा ।
नानाविधानां भूतानां तत्कर्मातीव शंसताम् ॥ २६
ततः संप्रेक्ष्य तं क्रुद्धं कालान्तकयमोपमम् ।
जिष्णुं त्रैगर्तका योधास्त्वरिताः पर्यवारयन् ॥ २७
अभिसृत्य परीप्सार्थं ततस्ते धृतवर्मणः ।
परिवव्रुर्गुडाकेशं तत्राक्रुध्यद्धनंजयः ॥ २८
ततो योधाञ्जघानाशु तेषां स दश चाष्ट च ।
महेन्द्रवज्रप्रतिमैरायसैर्निशितैः शरैः ॥ २९
तांस्तु प्रभग्नान्संप्रेक्ष्य त्वरमाणो धनंजयः ।
शैराशीविषाकारैर्जघान स्वनवद्धसन् ॥ ३०
ते भग्नमनसः सर्वे त्रैगर्तकमहारथाः ।
दिशो विदुद्रुवुः सर्वा धनंजयशरार्दिताः ॥ ३१
त ऊचुः पुरुषव्याघ्रं संशप्तकनिषूदनम् ।
तव स्म किंकराः सर्वे सर्वे च वशगास्तव ॥ ३२
आज्ञापयस्व नः पार्थ प्रह्वान्प्रेष्यानवस्थितान् ।
करिष्यामः प्रियं सर्वं तव कौरवनन्दन ॥ ३३
एतदाज्ञाय वचनं सर्वांस्तानब्रवीत्तदा ।
जीवितं रक्षत नृपाः शासनं गृह्यतामिति ॥ ३४

इति श्रीमहाभारते आश्वमेधिकपर्वणि
त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥

७४

वैशंपायन उवाच ।

प्राग्ज्योतिषमथाभ्येत्य व्यचरत्स हयोत्तमः ।
भगदत्तात्मजस्तत्र निर्ययौ रणकर्कशः ॥ १
स हयं पाण्डुपुत्रस्य विषयान्तमुपागतम् ।
युयुधे भरतश्रेष्ठ वज्रदत्तो महीपतिः ॥ २
सोऽभिनिर्याय नगराद्भगदत्तसुतो नृपः ।
अश्वमायान्तमुन्मथ्य नगराभिमुखो ययौ ॥ ३
तमालक्ष्य महाबाहुः कुरूणामृषभस्तदा ।
गाण्डीवं विक्षिपंस्तूर्णं सहसा समुपाद्रवत् ॥ ४
ततो गाण्डीवनिर्मुक्तैरिषुभिर्मोहितो नृपः ।
हयमुत्सृज्य तं वीरस्ततः पार्थमुपाद्रवत् ॥ ५
पुनः प्रविश्य नगरं दंशितः स नृपोत्तमः ।
आरुह्य नागप्रवरं निर्ययौ युद्धकाङ्क्षया ॥ ६
पाण्डुरेणातपत्रेण ध्रियमाणेन मूर्धनि ।
दोधूयता चामरेण श्वेतेन च महारथः ॥ ७
ततः पार्थं समासाद्य पाण्डवानां महारथम् ।
आह्वयामास कौरव्यं बाल्यान्मोहाच्च संयुगे ॥ ८
स वारणं नगप्रख्यं प्रभिन्नकरटामुखम् ।
प्रेषयामास संक्रुद्धस्ततः श्वेतहयं प्रति ॥ ९
विक्षरन्तं यथा मेघं परवारणवारणम् ।
शास्त्रवत्कल्पितं संख्ये त्रिसाहं युद्धदुर्मदम् ॥ १०
प्रचोद्यमानः स गजस्तेन राज्ञा महाबलः ।
तदाङ्कुशेन विबभावुत्पतिष्यन्निवाम्बरम् ॥ ११
तमापतन्तं संप्रेक्ष्य क्रुद्धो राजन्धनंजयः ।
भूमिष्ठो वारणगतं योधयामास भारत ॥ १२
वज्रदत्तस्तु संक्रुद्धो मुमोचाशु धनंजये ।

तोमरानग्निसंकाशाञ्शलभानिव वेगितान् ॥ १३
अर्जुनस्तानसंप्राप्तान्गाण्डीवप्रेषितैः शरैः ।
द्विधा त्रिधा च चिच्छेद ख एव खगमैस्तदा ॥१४
स तान्दृष्ट्वा तथा छिन्नांस्तोमरान्भगदत्तजः ।
इषूनसक्तांस्त्वरितः प्राहिणोत्पाण्डवं प्रति ॥ १५
ततोऽर्जुनस्तूर्णतरं रुक्मपुङ्खानजिह्मगान् ।
प्रेषयामास संक्रुद्धो भगदत्तात्मजं प्रति ॥ १६
स तैर्विद्धो महातेजा वज्रदत्तो महाहवे ।
भृशाहतः पपातोर्व्यां न त्वेनमजहात्स्मृतिः ॥ १७
ततः स पुनरारुह्य वारणप्रवरं रणे ।
अव्यग्रः प्रेषयामास जयार्थी विजयं प्रति ॥ १८
तस्मै बाणांस्ततो जिष्णुर्निर्मुक्ताशीविषोपमान् ।
प्रेषयामास संक्रुद्धो ज्वलितानिव पावकान् ॥ १९
स तैर्विद्धो महानागो विस्रवन्रुधिरं बभौ ।
हिमवानिव शैलेन्द्रो बहुप्रस्रवणस्तदा ॥ २०

इति श्रीमहाभारते आश्वमेधिकपर्वणि
चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥

७५

वैशंपायन उवाच ।

एवं त्रिरात्रमभवत्तद्युद्धं भरतर्षभ ।
अर्जुनस्य नरेन्द्रेण वृत्रेणेव शतक्रतोः ॥ १
ततश्चतुर्थे दिवसे वज्रदत्तो महाबलः ।
जहास सस्वनं हासं वाक्यं चेदमथाब्रवीत् ॥ २
अर्जुनार्जुन तिष्ठस्व न मे जीवन्विमोक्ष्यसे ।
त्वां निहत्य करिष्यामि पितुस्तोयं यथाविधि ॥ ३
त्वया वृद्धो मम पिता भगदत्तः पितुः सखा ।
हतो वृद्धोऽपचायित्वाच्छिशुं मामद्य योधय ॥ ४
इत्येवमुक्त्वा संक्रुद्धो वज्रदत्तो नराधिपः ।
प्रेषयामास कौरव्य वारणं पाण्डवं प्रति ॥ ५
संप्रेष्यमाणो नागेन्द्रो वज्रदत्तेन धीमता ।
उत्पतिष्यन्निवाकाशमभिदुद्राव पाण्डवम् ॥ ६
अग्रहस्तप्रमुक्तेन शीकरेण स फल्गुनम् ।
समुक्षत महाराज शैलं नील इवाम्बुदः ॥ ७
स तेन प्रेषितो राज्ञा मेघवन्निनदन्मुहुः ।
मुखाडम्बरघोषेण समाद्रवत फल्गुनम् ॥ ८
स नृत्यन्निव नागेन्द्रो वज्रदत्तप्रचोदितः ।
आससाद द्रुतं राजन्कौरवाणां महारथम् ॥ ९
तमापतन्तं संप्रेक्ष्य वज्रदत्तस्य वारणम् ।
गाण्डीवमाश्रित्य बली न व्यकम्पत शत्रुहा ॥ १०
चुक्रोध बलवच्चापि पाण्डवस्तस्य भूपतेः ।
कार्यविघ्नमनुस्मृत्य पूर्ववैरं च भारत ॥ ११
ततस्तं वारणं क्रुद्धः शरजालेन पाण्डवः ।
निवारयामास तदा वेलेव मकरालयम् ॥ १२
स नागप्रवरो वीर्यादर्जुनेन निवारितः ।
तस्थौ शरैर्वितुन्नाङ्गः श्वाविच्छललितो यथा ॥ १३
निवारितं गजं दृष्ट्वा भगदत्तात्मजो नृपः ।
उत्ससर्ज शितान्बाणानर्जुने क्रोधमूर्छितः ॥ १४
अर्जुनस्तु महाराज शरैः शरविघातिभिः ।
वारयामास तानस्तांस्तदद्भुतमिवाभवत् ॥ १५
ततः पुनरतिक्रुद्धो राजा प्राग्ज्योतिषाधिपः ।
प्रेषयामास नागेन्द्रं बलवच्छ्वसनोपमम् ॥ १६
समापतन्तं संप्रेक्ष्य बलवान्पाकशासनिः ।
नाराचमग्निसंकाशं प्राहिणोद्वारणं प्रति ॥ १७
स तेन वारणो राजन्मर्मण्यभिहतो भृशम् ।
पपात सहसा भूमौ वज्ररुग्ण इवाचलः ॥ १८
स पतञ्शुशुभे नागो धनंजयशराहतः ।
विशन्निव महाशैलो महीं वज्रप्रपीडितः ॥ १९
तस्मिन्निपतिते नागे वज्रदत्तस्य पाण्डवः ।
तं न भेतव्यमित्याह ततो भूमिगतं नृपम् ॥ २०
अब्रवीद्धि महातेजाः प्रस्थितं मां युधिष्ठिरः ।

राजानस्ते न हन्तव्या धनंजय कथंचन ॥ २१
सर्वमेतन्नरव्याघ्र भवत्वेतावता कृतम् ।
योधाश्चापि न हन्तव्या धनंजय रणे त्वया ॥ २२
वक्तव्याश्चापि राजानः सर्वैः सह सुहृज्जनैः ।
युधिष्ठिरस्याश्वमेधो भवद्भिरनुभूयताम् ॥ २३
इति भ्रातृवचः श्रुत्वा न हन्मि त्वां जनाधिप ।
उत्तिष्ठ न भयं तेऽस्ति स्वस्तिमान्गच्छ पार्थिव ॥
आगच्छेथा महाराज परां चैत्रीमुपस्थिताम् ।
तदाश्वमेधो भविता धर्मराजस्य धीमतः ॥ २५
एवमुक्तः स राजा तु भगदत्तात्मजस्तदा ।
तथेत्येवाब्रवीद्वाक्यं पाण्डवेनाभिनिर्जितः ॥ २६

इति श्रीमहाभारते आश्वमेधिकपर्वणि
पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥

७६

वैशंपायन उवाच ।

सैन्धवैरभवद्युद्धं ततस्तस्य किरीटिनः ।
हतशेषैर्महाराज हतानां च सुतैरपि ॥ १
तेऽवतीर्णमुपश्रुत्य विषयं श्वेतवाहनम् ।
प्रत्युद्ययुरमृष्यन्तो राजानः पाण्डवर्षभम् ॥ २
अश्वं च तं परामृश्य विषयान्ते विषोपमाः ।
न भयं चक्रिरे पार्थाद्भीमसेनादनन्तरात् ॥ ३
तेऽविदूराद्धनुष्पाणिं यज्ञियस्य हयस्य च ।
बीभत्सुं प्रत्यपद्यन्त पदातिनमवस्थितम् ॥ ४
ततस्ते तु महावीर्या राजानः पर्यवारयन् ।
जिगीषन्तो नरव्याघ्राः पूर्वं विनिकृता युधि ॥ ५
ते नामान्यथ गोत्राणि कर्माणि विविधानि च ।
कीर्तयन्तस्तदा पार्थं शरवर्षैरवाकिरन् ॥ ६
ते किरन्तः शरांस्तीक्ष्णान्वारणेन्द्रनिवारणान् ।
रणे जयमभीप्सन्तः कौन्तेयं पर्यवारयन् ॥ ७
तेऽसमीक्ष्यैव तं वीरमुग्रकर्माणमाहवे ।
सर्वे युयुधिरे वीरा रथस्थास्तं पदातिनम् ॥ ८
ते तमाजघ्निरे वीरं निवातकवचान्तकम् ।
संशप्तकनिहन्तारं हन्तारं सैन्धवस्य च ॥ ९
ततो रथसहस्रेण हयानामयुतेन च ।
कोष्ठकीकृत्य कौन्तेयं संप्रहृष्टमयोधयन् ॥ १०
संस्मरन्तो वधं वीराः सिन्धुराजस्य धीमतः ।
जयद्रथस्य कौरव्य समरे सव्यसाचिना ॥ ११
ततः पर्जन्यवत्सर्वे शरवृष्टिमवासृजन् ।
तैः कीर्णः शुशुभे पार्थो रविर्मेघान्तरे यथा ॥ १२
स शरैः समवच्छन्नो ददृशे पाण्डवर्षभः ।
पञ्जरान्तरसंचारी शकुन्त इव भारत ॥ १३
ततो हाहाकृतं सर्वं कौन्तेये शरपीडिते ।
त्रैलोक्यमभवद्राजन्रविश्चासीद्रजोरुणः ॥ १४
ततो ववौ महाराज मारुतो रोमहर्षणः ।
राहुरग्रसदादित्यं युगपत्सोममेव च ॥ १५
उल्काश्च जघ्निरे सूर्यं विकीर्यन्त्यः समन्ततः ।
वेपथुश्चाभवद्राजन्कैलासस्य महागिरेः ॥ १६
मुमुचुश्चास्रमत्युष्णं दुःखशोकसमन्विताः ।
सप्तर्षयो जातभयास्तथा देवर्षयोऽपि च ॥ १७
शशश्चाशु विनिर्भिद्य मण्डलं शशिनोऽपतत् ।
विपरीतस्तदा राजंस्तस्मिन्नुत्पातलक्षणे ॥ १८
रासभारुणसंकाशा धनुष्मन्तः सविद्युतः ।
आवृत्य गगनं मेघा मुमुचुर्मांसशोणितम् ॥ १९
एवमासीत्तदा वीरे शरवर्षाभिसंवृते ।
लोकेऽस्मिन्भरतश्रेष्ठ तदद्भुतमिवाभवत् ॥ २०
तस्य तेनावकीर्णस्य शरजालेन सर्वशः ।
मोहात्पपात गाण्डीवमावापश्च करादपि ॥ २१
तस्मिन्मोहमनुप्राप्ते शरजालं महत्तरम् ।
सैन्धवा मुमुचुस्तूर्णं गतसत्त्वे महारथे ॥ २२
ततो मोहसमापन्नं ज्ञात्वा पार्थं दिवौकसः ।

सर्वे वित्रस्तमनसस्तस्य शान्तिपराभवन् ॥ २३
ततो देवर्षयः सर्वे तथा सप्तर्षयोऽपि च ।
ब्रह्मर्षयश्च विजयं जेपुः पार्थस्य धीमतः ॥ २४
ततः प्रदीपिते देवैः पार्थतेजसि पार्थिव ।
तस्थावचलवद्धीमान्संग्रामे परमास्त्रवित् ॥ २५
विचकर्ष धनुर्दिव्यं ततः कौरवनन्दनः ।
यन्त्रस्येवेह शब्दोऽभून्महांस्तस्य पुनः पुनः ॥ २६
ततः स शरवर्षाणि प्रत्यमित्रान्प्रति प्रभुः ।
ववर्ष धनुषा पार्थो वर्षाणीव सुरेश्वरः ॥ २७
ततस्ते सैन्धवा योधाः सर्व एव सराजकाः ।
नादृश्यन्त शरैः कीर्णाः शलभैरिव पावकाः ॥२८
तस्य शब्देन वित्रेसुर्भयार्ताश्च विदुद्रुवुः ।
मुमुचुश्चाश्रु शोकार्ताः सुषुपुश्चापि सैन्धवाः ॥२९
तांस्तु सर्वान्नरश्रेष्ठः सर्वतो विचरन्बली ।
अलातचक्रवद्राजञ्शरजालैः समर्पयत् ॥ ३०
तदिन्द्रजालप्रतिमं बाणजालममित्रहा ।
व्यसृजद्दिक्षु सर्वासु महेन्द्र इव वज्रभृत् ॥ ३१
मेघजालनिभं सैन्यं विदार्य स रविप्रभः ।
विबभौ कौरवश्रेष्ठः शरदीव दिवाकरः ॥ ३२

इति श्रीमहाभारते आश्वमेधिकपर्वणि
षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

७७

वैशंपायन उवाच ।

ततो गाण्डीवभृच्छूरो युद्धाय समवस्थितः ।
विबभौ युधि दुर्धर्षो हिमवानचलो यथा ॥ १
ततः सैन्धवयोधास्ते पुनरेव व्यवस्थिताः ।
विमुञ्चन्तः सुसंरब्धाः शरवर्षाणि भारत ॥ २
तान्प्रसह्य महावीर्यः पुनरेव व्यवस्थितान ।
ततः प्रोवाच कौन्तेयो मुमूर्षूञ्श्लक्ष्णया गिरा ॥ ३
युध्यध्वं परया शक्त्या यतध्वं च वधे मम ।
कुरुध्वं सर्वकार्याणि महद्वो भयमागतम ॥ ४
एष योत्स्यामि वः सर्वान्निवार्य शरवागुराम् ।
तिष्ठध्वं युद्धमनसो दर्पं विनयितास्मि वः ॥ ५
एतावदुक्त्वा कौरव्यो रुषा गाण्डीवभृत्तदा ।
ततोऽथ वचनं स्मृत्वा भ्रातुर्ज्येष्ठस्य भारत ॥ ६
न हन्तव्या रणे तात क्षत्रिया विजिगीषवः ।
जेतव्याश्चेति यत्प्रोक्तं धर्मराज्ञा महात्मना ।
चिन्तयामास च तदा फल्गुनः पुरुषर्षभः ॥ ७
इत्युक्तोऽहं नरेन्द्रेण न हन्तव्या नृपा इति ।
कथं तन्न मृषेह स्याद्धर्मराजवचः शुभम् ॥ ८
न हन्येरंश्च राजानो राज्ञश्चाज्ञा कृता भवेत् ।
इति संचिन्त्य स तदा भ्रातुः प्रियहिते रतः ।
प्रोवाच वाक्यं धर्मज्ञः सैन्धवान्युद्धदुर्मदान् ॥ ९
बालान्स्त्रियो वा युष्माकं न हनिष्ये व्यवस्थितान् ।
यश्च वक्ष्यति संग्रामे तवास्मीति पराजितः ॥ १०
एतच्छ्रुत्वा वचो मह्यं कुरुध्वं हितमात्मनः ।
अतोऽन्यथा कृच्छ्रगता भविष्यथ मयार्दिताः ॥११
एवमुक्त्वा तु तान्वीरान्युयुधे कुरुपुंगवः ।
अत्वरावानसंरब्धः संरब्धैर्विजिगीषुभिः ॥ १२
ततः शतसहस्राणि शराणां नतपर्वणाम् ।
मुमुचुः सैन्धवा राजंस्तदा गाण्डीवधन्वनि ॥ १३
स तानापततः क्रूरानाशीविषविषोपमान् ।
चिच्छेद निशितैर्बाणैरन्तरैव धनंजयः ॥ १४
छित्त्वा तु तानाशुगमान्कङ्कपत्राञ्शिलाशितान् ।
एकैकमेष दशभिर्बिभेद समरे शरैः ॥ १५
ततः प्रासांश्च शक्तीश्च पुनरेव धनंजये ।
जयद्रथं हतं स्मृत्वा चिक्षिपुः सैन्धवा नृपाः ॥१६
तेषां किरीटी संकल्पं मोघं चक्रे महामनाः ।
सर्वांस्तानन्तरा छित्त्वा मुदा चुक्रोश पाण्डवः ॥१७
तथैवापततां तेषां योधानां जयगृद्धिनाम् ।

शिरांसि पातयामास भल्लैः संनतपर्वभिः ॥ १८
तेषां प्रद्रवतां चैव पुनरेव च धावताम् ।
निवर्ततां च शब्दोऽभूत्पूर्णस्येव महोदधेः ॥ १९
ते वध्यमानास्तु तदा पार्थेनामिततेजसा ।
यथाप्राणं यथोत्साहं योधयामासुरर्जुनम् ॥ २०
ततस्ते फल्गुनेनाजौ शरैः संनतपर्वभिः ।
कृता विसंज्ञा भूयिष्ठाः क्लान्तवाहनसैनिकाः ॥ २१
तांस्तु सर्वान्परिम्लानान्विदित्वा धृतराष्ट्रजा ।
दुःशला बालमादाय नप्तारं प्रययौ तदा ।
सुरथस्य सुतं वीरं रथेनानागसं तदा ॥ २२
शान्त्यर्थं सर्वयोधानामभ्यगच्छत पाण्डवम् ।
सा धनंजयमासाद्य मुमोचार्तस्वरं तदा ।
धनंजयोऽपि तां दृष्ट्वा धनुर्विससृजे प्रभुः ॥ २३
समुत्सृष्टधनुः पार्थो विधिवद्भगिनीं तदा ।
प्राह किं करवाणीति सा च तं वाक्यमब्रवीत् ॥२४
एष ते भरतश्रेष्ठ स्वस्रीयस्यात्मजः शिशुः ।
अभिवादयते वीर तं पश्य पुरुषर्षभ ॥ २५
इत्युक्तस्तस्य पितरं स पप्रच्छार्जुनस्तदा ।
क्वासाविति ततो राजन्दुःशला वाक्यमब्रवीत् ॥२६
पितृशोकाभिसंतप्तो विषादार्तोऽस्य वै पिता ।
पञ्चत्वमगमद्वीर यथा तन्मे निबोध ह ॥ २७
स पूर्वं पितरं श्रुत्वा हतं युद्धे त्वयानघ ।
त्वामागतं च संश्रुत्य युद्धाय हयसारिणम् ।
पितुश्च मृत्युदुःखार्तोऽजहात्प्राणान्धनंजय ॥ २८
प्राप्तो बीभत्सुरित्येव नाम श्रुत्वैव तेऽनघ ।
विषादार्तः पपातोर्व्यां ममार च ममात्मजः ॥ २९
तं तु दृष्ट्वा निपतितं ततस्तस्यात्मजं विभो ।
गृहीत्वा समनुप्राप्ता त्वामद्य शरणैषिणी ॥ ३०
इत्युक्त्वार्तस्वरं सा तु मुमोच धृतराष्ट्रजा ।
दीना दीनं स्थितं पार्थमब्रवीच्चाप्यधोमुखम् ॥ ३१
स्वसारं मामवेक्षस्व स्वस्रीयात्मजमेव च ।
कर्तुमर्हसि धर्मज्ञ दयां मयि कुरूद्वह ।
विस्मृत्य कुरुराजानं तं च मन्दं जयद्रथम् ॥ ३२
अभिमन्योर्यथा जातः परिक्षित्परवीरहा ।
तथायं सुरथाज्जातो मम पौत्रो महाभुज ॥ ३३
तमादाय नरव्याघ्र संप्राप्तास्मि तवान्तिकम् ।
शमार्थं सर्वयोधानां शृणु चेदं वचो मम ॥ ३४
आगतोऽयं महाबाहो तस्य मन्दस्य पौत्रकः ।
प्रसादमस्य बालस्य तस्मात्त्वं कर्तुमर्हसि ॥ ३५
एष प्रसाद्य शिरसा मया सार्धमरिंदम ।
याचते त्वां महाबाहो शमं गच्छ धनंजय ॥ ३६
बालस्य हतबन्धोश्च पार्थ किंचिदजानतः ।
प्रसादं कुरु धर्मज्ञ मा मन्युवशमन्वगाः ॥ ३७
तमनार्यं नृशंसं च विस्मृत्यास्य पितामहम् ।
आगस्कारिणमत्यर्थं प्रसादं कर्तुमर्हसि ॥ ३८
एवं ब्रुवत्यां करुणं दुःशलायां धनंजयः ।
संस्मृत्य देवीं गान्धारीं धृतराष्ट्रं च पार्थिवम् ।
प्रोवाच दुःखशोकार्तः क्षत्रधर्मं विगर्हयन् ॥ ३९
धिक्तं दुर्योधनं क्षुद्रं राज्यलुब्धं च मानिनम् ।
यत्कृते बान्धवाः सर्वे मया नीता यमक्षयम् ॥ ४०
इत्युक्त्वा बहु सान्त्वादि प्रसादमकरोज्जयः ।
परिष्वज्य च तां प्रीतो विससर्ज गृहान्प्रति ॥ ४१
दुःशला चापि तान्योधान्निवार्य महतो रणात् ।
संपूज्य पार्थं प्रययौ गृहान्प्रति शुभानना ॥ ४२
ततः सैन्धवकान्योधान्विनिर्जित्य नरर्षभः ।
पुनरेवान्वधावत्स तं हयं कामचारिणम् ॥ ४३
ससार यज्ञियं वीरो विधिवत्स विशां पते ।
तारामृगमिवाकाशे देवदेवः पिनाकधृक् ॥ ४४
स च वाजी यथेष्टेन तांस्तान्देशान्यथासुखम् ।
विचचार यथाकामं कर्म पार्थस्य वर्धयन् ॥ ४५

क्रमेण स हयस्त्वेवं विचरन्भरतर्षभ ।
मणिपूरपतेर्देशमुपायात्सहपाण्डवः ॥ ४६

इति श्रीमहाभारते आश्वमेधिकपर्वणि
सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥

७८

वैशंपायन उवाच ।

श्रुत्वा तु नृपतिर्वीरं पितरं बभ्रुवाहनः ।
निर्ययौ विनयेनार्यो ब्राह्मणार्घ्यपुरःसरः ॥ १
मणिपूरेश्वरं त्वेवमुपयातं धनंजयः ।
नाभ्यनन्दत मेधावी क्षत्रधर्ममनुस्मरन् ॥ २
उवाच चैनं धर्मात्मा समन्युः फल्गुनस्तदा ।
प्रक्रियेयं न ते युक्ता बहिस्त्वं क्षत्रधर्मतः ॥ ३
संरक्ष्यमाणं तुरगं यौधिष्ठिरमुपागतम् ।
यज्ञियं विषयान्ते मां नायोत्सीः किं नु पुत्रक ॥
धिक्त्वामस्तु सुदुर्बुद्धिं क्षत्रधर्मविशारदम् ।
यो मां युद्धाय संप्राप्तं साम्नैवाथो त्वमग्रहीः ॥ ५
न त्वया पुरुषार्थश्च कश्चिदस्तीह जीवता ।
यस्त्वं स्त्रीवद्युधा प्राप्तं साम्ना मां प्रत्यगृह्णथाः ॥ ६
यद्यहं न्यस्तशस्त्रस्त्वामागच्छेयं सुदुर्मते ।
प्रक्रियेयं ततो युक्ता भवेत्तव नराधम ॥ ७
तमेवमुक्तं भर्त्रा तु विदित्वा पन्नगात्मजा ।
अमृष्यमाणा भित्त्वोर्वीमुलूपी तमुपागमत् ॥ ८
सा ददर्श ततः पुत्रं विमृशन्तमधोमुखम् ।
संतर्ज्यमानमसकृद्भर्त्रा युद्धार्थिना विभो ॥ ९
ततः सा चारुसर्वाङ्गी तमुपेत्योरगात्मजा ।
उलूपी प्राह वचनं क्षत्रधर्मविशारदा ॥ १०
उलूपीं मां निबोध त्वं मातरं पन्नगात्मजाम् ।
कुरुष्व वचनं पुत्र धर्मस्ते भविता परः ॥ ११
युध्यस्वैनं कुरुश्रेष्ठं धनंजयमरिंदम ।
एवमेष हि ते प्रीतो भविष्यति न संशयः ॥ १२

एवमुद्धर्षितो मात्रा स राजा बभ्रुवाहनः ।
मनश्चक्रे महातेजा युद्धाय भरतर्षभ ॥ १३
संनह्य काञ्चनं वर्म शिरस्त्राणं च भानुमत् ।
तूणीरशतसंबाधमारुरोह महारथम् ॥ १४
सर्वोपकरणैर्युक्तं युक्तमश्वैर्मनोजवैः ।
सुचक्रोपस्करं धीमान्हेमभाण्डपरिष्कृतम् ॥ १५
परमार्चितमुच्छ्रित्य ध्वजं सिंहं हिरण्मयम् ।
प्रययौ पार्थमुद्दिश्य स राजा बभ्रुवाहनः ॥ १६
ततोऽभ्येत्य हयं वीरो यज्ञियं पार्थरक्षितम् ।
ग्राहयामास पुरुषैर्हयशिक्षाविशारदैः ॥ १७
गृहीतं वाजिनं दृष्ट्वा प्रीतात्मा स धनंजयः ।
पुत्रं रथस्थं भूमिष्ठः संन्यवारयदाहवे ॥ १८
ततः स राजा तं वीरं शरव्रातैः सहस्रशः ।
अर्दयामास निशितैराशीविषविषोपमैः ॥ १९
तयोः समभवद्युद्धं पितुः पुत्रस्य चातुलम् ।
देवासुररणप्रख्यमुभयोः प्रीयमाणयोः ॥ २०
किरीटिनं तु विव्याध शरेण नतपर्वणा ।
जत्रुदेशे नरव्याघ्रः प्रहसन्बभ्रुवाहनः ॥ २१
सोऽभ्यगात्सह पुङ्खेन वल्मीकमिव पन्नगः ।
विनिर्भिद्य च कौन्तेयं महीतलमथाविशत् ॥ २२
स गाढवेदनो धीमानालम्ब्य धनुरुत्तमम् ।
दिव्यं तेजः समाविश्य प्रमीत इव संबभौ ॥ २३
स संज्ञामुपलभ्याथ प्रशस्य पुरुषर्षभः ।
पुत्रं शक्रात्मजो वाक्यमिदमाह महीपते ॥ २४
साधु साधु महाबाहो वत्स चित्राङ्गदात्मज ।
सदृशं कर्म ते दृष्ट्वा प्रीतिमानस्मि पुत्रक ॥ २५
विमुञ्चाम्येष बाणांस्ते पुत्र युद्धे स्थिरो भव ।
इत्येवमुक्त्वा नाराचैरभ्यवर्षदमित्रहा ॥ २६
तान्स गाण्डीवनिर्मुक्तान्वज्राशनिसमप्रभान् ।
नाराचैरच्छिनद्राजा सर्वानेव त्रिधा त्रिधा ॥ २७

तस्य पार्थः शरैर्दिव्यैर्ध्वजं हेमपरिष्कृतम् ।
सुवर्णतालप्रतिमं क्षुरेणापाहरद्रथात् ॥ २८
हयांश्चास्य महाकायान्महावेगपराक्रमान् ।
चकार राज्ञो निर्जीवान्प्रहसन्पाण्डवर्षभः ॥ २९
स रथादवतीर्याशु राजा परमकोपनः ।
पदातिः पितरं कोपाद्योधयामास पाण्डवम् ॥ ३०
संप्रीयमाणः पाण्डूनामृषभः पुत्रविक्रमात् ।
नात्यर्थं पीडयामास पुत्रं वज्रधरात्मजः ॥ ३१
स हन्यमानो विमुखं पितरं बभ्रुवाहनः ।
शरैराशीविषाकारैः पुनरेवार्दयद्बली ॥ ३२
ततः स बाल्यात्पितरं विव्याध हृदि पत्रिणा ।
निशितेन सुपुङ्खेन बलवद्बभ्रुवाहनः ॥ ३३
स बाणस्तेजसा दीप्तो ज्वलन्निव हुताशनः ।
विवेश पाण्डवं राजन्मर्म भित्त्वातिदुःखकृत् ॥ ३४
स तेनातिभृशं विद्धः पुत्रेण कुरुनन्दनः ।
महीं जगाम मोहार्तस्ततो राजन्धनंजयः ॥ ३५
तस्मिन्निपतिते वीरे कौरवाणां धुरंधरे ।
सोऽपि मोहं जगामाशु ततश्चित्राङ्गदासुतः ॥ ३६
व्यायम्य संयुगे राजा दृष्ट्वा च पितरं हतम् ।
पूर्वमेव च बाणौघैर्गाढविद्धोऽर्जुनेन सः ॥ ३७
भर्तारं निहतं दृष्ट्वा पुत्रं च पतितं भुवि ।
चित्राङ्गदा परित्रस्ता प्रविवेश रणाजिरम् ॥ ३८
शोकसंतप्तहृदया रुदती सा ततः शुभा ।
मणिपूरपतेर्माता ददर्श निहतं पतिम् ॥ ३९

इति श्रीमहाभारते आश्वमेधिकपर्वणि
अष्टसप्ततितमोऽध्यायः ॥ ७८ ॥

७९

वैशंपायन उवाच ।

ततो बहुविधं भीरुर्विलप्य कमलेक्षणा ।
मुमोह दुःखाद्दुर्धर्षा निपपात च भूतले ॥ १
प्रतिलभ्य च सा संज्ञां देवी दिव्यवपुर्धरा ।
उलूपीं पन्नगसुतां दृष्ट्वेदं वाक्यमब्रवीत् ॥ २
उलूपि पश्य भर्तारं शयानं निहतं रणे ।
त्वत्कृते मम पुत्रेण बालेन समितिंजयम् ॥ ३
ननु त्वमार्ये धर्मज्ञा ननु चासि पतिव्रता ।
यत्त्वत्कृतेऽयं पतितः पतिस्ते निहतो रणे ॥ ४
किं नु सर्वापराधोऽयं यदि तेऽद्य धनंजयः ।
क्षमस्व याच्यमाना मे संजीवय धनंजयम् ॥ ५
ननु त्वमार्ये धर्मज्ञा त्रैलोक्यविदिता शुभे ।
यद्घातयित्वा भर्तारं पुत्रेणेह न शोचसि ॥ ६
नाहं शोचामि तनयं निहतं पन्नगात्मजे ।
पतिमेव तु शोचामि यस्यातिथ्यमिदं कृतम् ॥ ७
इत्युक्त्वा सा तदा देवीमुलूपीं पन्नगात्मजाम् ।
भर्तारमभिगम्येदमित्युवाच यशस्विनी ॥ ८
उत्तिष्ठ कुरुमुख्यस्य प्रियकाम मम प्रिय ।
अयमश्वो महाबाहो मया ते परिमोक्षितः ॥ ९
ननु नाम त्वया वीर धर्मराजस्य यज्ञियः ।
अयमश्वोऽनुसर्तव्यः स शेषे किं महीतले ॥ १०
त्वयि प्राणाः समायत्ताः कुरूणां कुरुनन्दन ।
स कस्मात्प्राणदोऽन्येषां प्राणान्संत्यक्तवानसि ॥ ११
उलूपि साधु संपश्य भर्तारं निहतं रणे ।
पुत्रं चैनं समुत्साह्य घातयित्वा न शोचसि ॥ १२
कामं स्वपितु बालोऽयं भूमौ प्रेतगतिं गतः ।
लोहिताक्षो गुडाकेशो विजयः साधु जीवतु ॥ १३
नापराधोऽस्ति सुभगे नराणां बहुभार्यता ।
नारीणां तु भवत्येतन्मा ते भूद्बुद्धिरीदृशी ॥ १४
सख्यं ह्येतत्कृतं धात्रा शाश्वतं चाव्ययं च ह ।
सख्यं समभिजानीहि सत्यं संगतमस्तु ते ॥ १५
पुत्रेण घातयित्वेमं पतिं यदि न मेऽद्य वै ।
जीवन्तं दर्शयस्यद्य परित्यक्ष्यामि जीवितम् ॥ १६

साहं दुःखान्विता भीरु पतिपुत्रविनाकृता ।
इहैव प्रायमासिष्ये प्रेक्षन्त्यास्ते न संशयः ॥ १७
इत्युक्त्वा पन्नगसुतां सपत्नीं चैत्रवाहिनी ।
ततः प्रायमुपासीना तूष्णीमासीज्जनाधिप ॥ १८

इति श्रीमहाभारते आश्वमेधिकपर्वणि
एकोनाशीतितमोऽध्यायः ॥ ७९ ॥

८०

वैशंपायन उवाच ।

ततो विलप्योपरता भर्तुः पादौ प्रगृह्य सा ।
उपविष्टाभवद्देवी सोच्छ्वासं पुत्रमीक्षती ॥ १
ततः संज्ञां पुनर्लब्ध्वा स राजा बभ्रुवाहनः ।
मातरं तामथालोक्य रणभूमावथाब्रवीत् ॥ २
इतो दुःखतरं किं नु यन्मे माता सुखैधिता ।
भूमौ निपतितं वीरमनुशेते मृतं पतिम् ॥ ३
निहन्तारं रणेऽरीणां सर्वशस्त्रभृतां वरम् ।
मया विनिहतं संख्ये प्रेक्षते दुर्मरं बत ॥ ४
अहोऽस्या हृदयं देव्या दृढं यन्न विदीर्यते ।
व्यूढोरस्कं महाबाहुं प्रेक्षन्त्या निहतं पतिम् ॥ ५
दुर्मरं पुरुषेणेह मन्ये ह्यध्वन्यनागते ।
यत्र नाहं न मे माता विप्रयुज्येत जीवितात् ॥ ६
अहो धिक्कुरुवीरस्य उरःस्थं काञ्चनं भुवि ।
व्यपविद्धं हतस्येह मया पुत्रेण पश्यत ॥ ७
भो भो पश्यत मे वीरं पितरं ब्राह्मणा भुवि ।
शयानं वीरशयने मया पुत्रेण पातितम् ॥ ८
ब्राह्मणाः कुरुमुख्यस्य प्रयुक्ता हयसारिणः ।
कुर्वन्तु शान्तिकां त्वद्य रणे योऽयं मया हतः ॥ ९
व्यादिशन्तु च किं विप्राः प्रायश्चित्तमिहाद्य मे ।
सुनृशंसस्य पापस्य पितृहन्तू रणाजिरे ॥ १०
दुश्चरा द्वादश समा हत्वा पितरमद्य वै ।
ममेह सुनृशंसस्य संवीतस्यास्य चर्मणा ॥ ११
शिरःकपाले चास्यैव भुञ्जतः पितुरद्य मे ।
प्रायश्चित्तं हि नास्त्यन्यद्धत्वाद्य पितरं मम ॥ १२
पश्य नागोत्तमसुते भर्तारं निहतं मया ।
कृतं प्रियं मया तेऽद्य निहत्य समरेऽर्जुनम् ॥ १३
सोऽहमप्यद्य यास्यामि गतिं पितृनिषेविताम् ।
न शक्नोम्यात्मनात्मानमहं धारयितुं शुभे ॥ १४
सा त्वं मयि मृते मातस्तथा गाण्डीवधन्वनि ।
भव प्रीतिमती देवि सत्येनात्मानमालभे ॥ १५
इत्युक्त्वा स तदा राजा दुःखशोकसमाहतः ।
उपस्पृश्य महाराज दुःखाद्वचनमब्रवीत् ॥ १६
शृण्वन्तु सर्वभूतानि स्थावराणि चराणि च ।
त्वं च मातर्यथा सत्यं ब्रवीमि भुजगोत्तमे ॥ १७
यदि नोत्तिष्ठति जयः पिता मे भरतर्षभः ।
अस्मिन्नेव रणोद्देशे शोषयिष्ये कलेवरम् ॥ १८
न हि मे पितरं हत्वा निष्कृतिर्विद्यते क्वचित् ।
नरकं प्रतिपत्स्यामि ध्रुवं गुरुवधार्दितः ॥ १९
वीरं हि क्षत्रियं हत्वा गोशतेन प्रमुच्यते ।
पितरं तु निहत्यैवं दुस्तरा निष्कृतिर्मया ॥ २०
एष ह्येको महातेजाः पाण्डुपुत्रो धनंजयः ।
पिता च मम धर्मात्मा तस्य मे निष्कृतिः कुतः ॥
इत्येवमुक्त्वा नृपते धनंजयसुतो नृपः ।
उपस्पृश्याभवत्तूष्णीं प्रायोपेतो महामतिः ॥ २२

इति श्रीमहाभारते आश्वमेधिकपर्वणि
अशीतितमोऽध्यायः ॥ ८० ॥

८१

वैशंपायन उवाच ।

प्रायोपविष्टे नृपतौ मणिपूरेश्वरे तदा ।
पितृशोकसमाविष्टे सह मात्रा परंतप ॥ १
उलूपी चिन्तयामास तदा संजीवनं मणिम् ।
स चोपातिष्ठत तदा पन्नगानां परायणम् ॥ २

तं गृहीत्वा तु कौरव्य नागराजपतेः सुता ।
मनःप्रह्लादनीं वाचं सैनिकानामथाब्रवीत् ॥ ३
उत्तिष्ठ मा शुचः पुत्र नैष जिष्णुस्त्वया हतः ।
अजेयः पुरुषैरेष देवैर्वापि सवासवैः ॥ ४
मया तु मोहिनी नाम मायैषा संप्रयोजिता ।
प्रियार्थं पुरुषेन्द्रस्य पितुस्तेऽद्य यशस्विनः ॥ ५
जिज्ञासुर्ह्येष वै पुत्र बलस्य तव कौरवः ।
संग्रामे युध्यतो राजन्नागतः परवीरहा ॥ ६
तस्मादसि मया पुत्र युद्धार्थं परिचोदितः ।
मा पापमात्मनः पुत्र शङ्केथास्त्वण्वपि प्रभो ॥ ७
ऋषिरेष महातेजाः पुरुषः शाश्वतोऽव्ययः ।
नैनं शक्तो हि संग्रामे जेतुं शक्रोऽपि पुत्रक ॥ ८
अयं तु मे मणिर्दिव्यः समानीतो विशां पते ।
मृतान्मृतान्पन्नगेन्द्रान्यो जीवयति नित्यदा ॥ ९
एतमस्योरसि त्वं तु स्थापयस्व पितुः प्रभो ।
संजीवितं पुनः पुत्र ततो द्रष्टासि पाण्डवम् ॥ १०
इत्युक्तः स्थापयामास तस्योरसि मणिं तदा ।
पार्थस्यामिततेजाः स पितुः स्नेहादपापकृत् ॥ ११
तस्मिन्न्यस्ते मणौ वीरः जिष्णुरुज्जीवितः प्रभुः ।
सुप्तोत्थित इवोत्तस्थौ मृष्टलोहितलोचनः ॥ १२
तमुत्थितं महात्मानं लब्धसंज्ञं मनस्विनम् ।
समीक्ष्य पितरं स्वस्थं ववन्दे बभ्रुवाहनः ॥ १३
उत्थिते पुरुषव्याघ्रे पुनर्लक्ष्मीवति प्रभो ।
दिव्याः सुमनसः पुण्या ववृषे पाकशासनः ॥ १४
अनाहता दुन्दुभयः प्रणेदुर्मेघनिस्वनाः ।
साधु साध्विति चाकाशे बभूव सुमहान्स्वनः ॥ १५
उत्थाय तु महाबाहुः पर्याश्वस्तो धनंजयः ।
बभ्रुवाहनमालिङ्ग्य समाजिघ्रत मूर्धनि ॥ १६
ददर्श चाविदूरेऽस्य मातरं शोककर्शिताम् ।
उलूप्या सह तिष्ठन्तीं ततोऽपृच्छद्धनंजयः ॥ १७
किमिदं लक्ष्यते सर्वं शोकविस्मयहर्षवत् ।
रणाजिरममित्रघ्न यदि जानासि शंस मे ॥ १८
जननी च किमर्थं ते रणभूमिमुपागता ।
नागेन्द्रदुहिता चेयमुलूपी किमिहागता ॥ १९
जानाम्यहमिदं युद्धं त्वया मद्वचनात्कृतम् ।
स्त्रीणामागमने हेतुमहमिच्छामि वेदितुम् ॥ २०
तमुवाच ततः पृष्टो मणिपूरपतिस्तदा ।
प्रसाद्य शिरसा विद्वानुलूपी पृच्छ्यतामिति ॥ २१

इति श्रीमहाभारते आश्वमेधिकपर्वणि
एकाशीतितमोऽध्यायः ॥ ८१ ॥

८२

अर्जुन उवाच ।

किमागमनकृत्यं ते कौरव्यकुलनन्दिनि ।
मणिपूरपतेर्मातुस्तथैव च रणाजिरे ॥ १
कच्चित्कुशलकामासि राज्ञोऽस्य भुजगात्मजे ।
मम वा चञ्चलापाङ्गे कच्चित्त्वं शुभमिच्छसि ॥ २
कच्चित्ते पृथुलश्रोणि नाप्रियं शुभदर्शने ।
अकार्षमहमज्ञानादयं वा बभ्रुवाहनः ॥ ३
कच्चिच्च राजपुत्री ते सपत्नी चैत्रवाहिनी ।
चित्राङ्गदा वरारोहा नापराध्यति किंचन ॥ ४
तमुवाचोरगपतेर्दुहिता प्रहसन्त्यथ ।
न मे त्वमपराद्धोऽसि न नृपो बभ्रुवाहनः ।
न जनित्री तथास्येयं मम या प्रेष्यवत्स्थिता ॥ ५
श्रूयतां यद्यथा चेदं मया सर्वं विचेष्टितम् ।
न मे कोपस्त्वया कार्यः शिरसा त्वां प्रसादये ॥ ६
त्वत्प्रीत्यर्थं हि कौरव्य कृतमेतन्मयानघ ।
यत्तच्छृणु महाबाहो निखिलेन धनंजय ॥ ७
महाभारतयुद्धे यत्त्वया शांतनवो नृपः ।
अधर्मेण हतः पार्थ तस्यैषा निष्कृतिः कृता ॥ ८
न हि भीष्मस्त्वया वीर युध्यमानो निपातितः ।

शिखण्डिना तु संसक्तस्तमाश्रित्य हतस्त्वया ॥ ९
तस्य शान्तिमकृत्वा तु त्यजेस्त्वं यदि जीवितम् ।
कर्मणा तेन पापेन पतेथा निरये ध्रुवम् ॥ १०
एषा तु विहिता शान्तिः पुत्राद्यां प्राप्तवानसि ।
वसुभिर्वसुधापाल गङ्गया च महामते ॥ ११
पुरा हि श्रुतमेतद्वै वसुभिः कथितं मया ।
गङ्गायास्तीरमागम्य हते शांतनवे नृपे ॥ १२
आप्लुत्य देवा वसवः समेत्य च महानदीम् ।
इदमूचुर्वचो घोरं भागीरथ्या मते तदा ॥ १३
एष शांतनवो भीष्मो निहतः सव्यसाचिना ।
अयुध्यमानः संग्रामे संसक्तोऽन्येन भामिनि ॥ १४
तदनेनाभिषङ्गेण वयमप्यर्जुनं शुभे ।
शापेन योजयामेति तथास्त्विति च साब्रवीत् ॥ १५
तदहं पितुरावेद्य भृशं प्रव्यथितेन्द्रिया ।
अभवं स च तच्छ्रुत्वा विषादमगमत्परम् ॥ १६
पिता तु मे वसून्गत्वा त्वदर्थं समयाचत ।
पुनः पुनः प्रसाद्यैनांस्त एनमिदमब्रुवन् ॥ १७
पुनस्तस्य महाभाग मणिपूरेश्वरो युवा ।
स एनं रणमध्यस्थं शरैः पातयिता भुवि ॥ १८
एवं कृते स नागेन्द्र मुक्तशापो भविष्यति ।
गच्छेति वसुभिश्चोक्तो मम चेदं शशंस सः ॥ १९
तच्छ्रुत्वा त्वं मया तस्माच्छापादसि विमोक्षितः ।
न हि त्वां देवराजोऽपि समरेषु पराजयेत् ॥ २०
आत्मा पुत्रः स्मृतस्तस्मात्तेनेहासि पराजितः ।
नात्र दोषो मम मतः कथं वा मन्यसे विभो ॥२१
इत्येवमुक्तो विजयः प्रसन्नात्माब्रवीदिदम् ।
सर्वं मे सुप्रियं देवि यदेतत्कृतवत्यसि ॥ २२
इत्युक्त्वाथाब्रवीत्पुत्रं मणिपूरेश्वरं जयः ।
चित्राङ्गदायाः शृण्वन्त्याः कौरव्यदुहितुस्तथा ॥२३
युधिष्ठिरस्याश्वमेधः परां चैत्रीं भविष्यति ।
तत्रागच्छेः सहामात्यो मातृभ्यां सहितो नृप ॥२४
इत्येवमुक्तः पार्थेन स राजा बभ्रुवाहनः ।
उवाच पितरं धीमानिदमस्राविलेक्षणः ॥ २५
उपयास्यामि धर्मज्ञ भवतः शासनादहम् ।
अश्वमेधे महायज्ञे द्विजातिपरिवेषकः ॥ २६
मम त्वनुग्रहार्थाय प्रविशस्व पुरं स्वकम् ।
भार्याभ्यां सह शत्रुघ्न मा भूत्तेऽत्र विचारणा ॥२७
उषित्वेह विशल्यस्त्वं सुखं स्वे वेश्मनि प्रभो ।
पुनरश्वानुगमनं कर्तासि जयतां वर ॥ २८
इत्युक्तः स तु पुत्रेण तदा वानरकेतनः ।
स्मयन्प्रोवाच कौन्तेयस्तदा चित्राङ्गदासुतम् ॥ २९
विदितं ते महाबाहो यथा दीक्षां चराम्यहम् ।
न स तावत्प्रवेक्ष्यामि पुरं ते पृथुलोचन ॥ ३०
यथाकामं प्रयात्येष यज्ञियश्च तुरंगमः ।
स्वस्ति तेऽस्तु गमिष्यामि न स्थानं विद्यते मम ॥
स तत्र विधिवत्तेन पूजितः पाकशासनिः ।
भार्याभ्यामभ्यनुज्ञातः प्रायाद्भरतसत्तमः ॥ ३२

इति श्रीमहाभारते आश्वमेधिकपर्वणि
द्व्यशीतितमोऽध्यायः ॥ ८२ ॥

८३

वैशंपायन उवाच ।

स तु वाजी समुद्रान्तां पर्येत्य पृथिवीमिमाम् ।
निवृत्तोऽभिमुखो राजन्येन नागाह्वयं पुरम् ॥ १
अनुगच्छंश्च तेजस्वी निवृत्तोऽथ किरीटभृत् ।
यदृच्छया समापेदे पुरं राजगृहं तदा ॥ २
तमभ्याशगतं राजा जरासंधात्मजात्मजः ।
क्षत्रधर्मे स्थितो वीरः समरायाजुहाव ह ॥ ३
ततः पुरात्स निष्क्रम्य रथी धन्वी शरी तली ।
मेघसंधिः पदातिं तं धनंजयमुपाद्रवत् ॥ ४
आसाद्य च महातेजा मेघसंधिर्धनंजयम् ।

बालभावान्महाराज प्रोवाचेदं न कौशलात् ॥ ५
किमयं चार्यते वाजी स्त्रीमध्य इव भारत ।
हयमेनं हरिष्यामि प्रयतस्व विमोक्षणे ॥ ६
अदत्तानुनयो युद्धे यदि त्वं पितृभिर्मम ।
करिष्यामि तवातिथ्यं प्रहर प्रहरामि वा ॥ ७
इत्युक्तः प्रत्युवाचैनं पाण्डवः प्रहसन्निव ।
विघ्नकर्ता मया वार्य इति मे व्रतमाहितम् ॥ ८
भ्रात्रा ज्येष्ठेन नृपते तवापि विदितं ध्रुवम् ।
प्रहरस्व यथाशक्ति न मन्युर्विद्यते मम ॥ ९
इत्युक्तः प्राहरत्पूर्वं पाण्डवं मगधेश्वरः ।
किरञ्शरसहस्राणि वर्षाणीव सहस्रदृक् ॥ १०
ततो गाण्डीवभृच्छूरो गाण्डीवप्रेषितैः शरैः ।
चकार मोघांस्तान्बाणानयत्नाद्भरतर्षभ ॥ ११
स मोघं तस्य बाणौघं कृत्वा वानरकेतनः ।
शरान्मुमोच ज्वलितान्दीप्तास्यानिव पन्नगान् ॥ १२
ध्वजे पताकादण्डेषु रथयन्त्रे हयेषु च ।
अन्येषु च रथाङ्गेषु न शरीरे न सारथौ ॥ १३
संरक्ष्यमाणः पार्थेन शरीरे फल्गुनस्य ह ।
मन्यमानः स्ववीर्यं तन्मागधः प्राहिणोच्छरान् ॥ १४
ततो गाण्डीवभृच्छूरो मागधेन समाहतः ।
बभौ वासन्तिक इव पलाशः पुष्पितो महान् ॥ १५
अवध्यमानः सोऽभ्यघ्नन्मागधः पाण्डवर्षभम् ।
तेन तस्थौ स कौरव्य लोकवीरस्य दर्शने ॥ १६
सव्यसाची तु संक्रुद्धो विकृष्य बलवद्धनुः ।
हयांश्चकार निर्देहान्सारथेश्च शिरोऽहरत् ॥ १७
धनुश्चास्य महच्चित्रं क्षुरेण प्रचकर्त ह ।
हस्तावापं पताकां च ध्वजं चास्य न्यपातयत् ॥ १८
स राजा व्यथितो व्यश्वो विधनुर्हतसारथिः ।
गदामादाय कौन्तेयमभिदुद्राव वेगवान् ॥ १९
तस्यापतत एवाशु गदां हेमपरिष्कृताम् ।
शरैश्चकर्त बहुधा बहुभिर्गृध्रवाजितैः ॥ २०
सा गदा शकलीभूता विशीर्णमणिबन्धना ।
व्याली निर्मुच्यमानेव पपातास्य सहस्रधा ॥ २१
विरथं तं विधन्वानं गदया परिवर्जितम् ।
नैच्छत्ताडयितुं धीमानर्जुनः समराग्रणीः ॥ २२
तत एनं विमनसं क्षत्रधर्मे समास्थितम् ।
सान्त्वपूर्वमिदं वाक्यमब्रवीत्कपिकेतनः ॥ २३
पर्याप्तः क्षत्रधर्मोऽयं दर्शितः पुत्र गम्यताम् ।
बह्वेतत्समरे कर्म तव बालस्य पार्थिव ॥ २४
युधिष्ठिरस्य संदेशो न हन्तव्या नृपा इति ।
तेन जीवसि राजंस्त्वमपराद्धोऽपि मे रणे ॥ २५
इति मत्वा स चात्मानं प्रत्यादिष्टं स्म मागधः ।
तथ्यमित्यवगम्यैनं प्राञ्जलिः प्रत्यपूजयत् ॥ २६
तमर्जुनः समाश्वास्य पुनरेवेदमब्रवीत् ।
आगन्तव्यं परां चैत्रीमश्वमेधे नृपस्य नः ॥ २७
इत्युक्तः स तथेत्युक्त्वा पूजयामास तं हयम् ।
फल्गुनं च युधां श्रेष्ठं विधिवत्सहदेवजः ॥ २८
ततो यथेष्टमगमत्पुनरेव स केसरी ।
ततः समुद्रतीरेण वङ्गान्पुण्ड्रान्सकेरलान् ॥ २९
तत्र तत्र च भूरीणि म्लेच्छसैन्यान्यनेकशः ।
विजिग्ये धनुषा राजन्गाण्डीवेन धनंजयः ॥ ३०

इति श्रीमहाभारते आश्वमेधिकपर्वणि
त्र्यशीतितमोऽध्यायः ॥ ८३ ॥

८४

वैशंपायन उवाच ।

मागधेनार्चितो राजन्पाण्डवः श्वेतवाहनः ।
दक्षिणां दिशमास्थाय चारयामास तं हयम् ॥ १
ततः स पुनरावृत्य हयः कामचरो बली ।
आससाद पुरीं रम्यां चेदीनां शुक्तिसाह्वयाम् ॥ २
शरभेणार्चितस्तत्र शिशुपालात्मजेन सः ।

युद्धपूर्वेण मानेन पूजया च महाबलः ॥ ३
तत्रार्चितो ययौ राजंस्तदा स तुरगोत्तमः ।
काशीनन्ध्रान्कोसलांश्च किरातानथ तङ्गणान् ॥४
तत्र पूजां यथान्यायं प्रतिगृह्य स पाण्डवः ।
पुनरावृत्य कौन्तेयो दशार्णानगमत्तदा ॥ ५
तत्र चित्राङ्गदो नाम बलवान्वसुधाधिपः ।
तेन युद्धमभूत्तस्य विजयस्यातिभैरवम् ॥ ६
तं चापि वशमानीय किरीटी पुरुषर्षभः ।
निषादराज्ञो विषयमेकलव्यस्य जग्मिवान् ॥ ७
एकलव्यसुतश्चैनं युद्धेन जगृहे तदा ।
ततश्चक्रे निषादैः स संग्रामं रोमहर्षणम् ॥ ८
ततस्तमपि कौन्तेयः समरेष्वपराजितः ।
जिगाय समरे वीरो यज्ञविघ्नार्थमुद्यतम् ॥ ९
स तं जित्वा महाराज नैषादिं पाकशासनिः ।
अर्चितः प्रययौ भूयो दक्षिणं सलिलार्णवम् ॥१०
तत्रापि द्रविडैरन्ध्रै रौद्रैर्माहिषकैरपि ।
तथा कोल्लगिरेयैश्च युद्धमासीत्किरीटिनः ॥ ११
तुरगस्य वशेनाथ सुराष्ट्रानभितो ययौ ।
गोकर्णमपि चासाद्य प्रभासमपि जग्मिवान् ॥ १२
ततो द्वारवतीं रम्यां वृष्णिवीराभिरक्षिताम् ।
आससाद हयः श्रीमान्कुरुराजस्य यज्ञियः ॥ १३
तमुन्मथ्य हयश्रेष्ठं यादवानां कुमारकाः ।
प्रययुस्तांस्तदा राजन्नुग्रसेनो न्यवारयत् ॥ १४
ततः पुर्या विनिष्क्रम्य वृष्ण्यन्धकपतिस्तदा ।
सहितो वसुदेवेन मातुलेन किरीटिनः ॥ १५
तौ समेत्य कुरुश्रेष्ठं विधिवत्प्रीतिपूर्वकम् ।
परया भरतश्रेष्ठं पूजया समवस्थितौ ।
ततस्ताभ्यामनुज्ञातो ययौ येन हयो गतः ॥ १६
ततः स पश्चिमं देशं समुद्रस्य तदा हयः ।
क्रमेण व्यचरत्स्फीतं ततः पञ्चनदं ययौ ॥ १७
तस्मादपि स कौरव्य गान्धारविषयं हयः ।
विचचार कथाकामं कौन्तेयानुगतस्तदा ॥ १८
तत्र गान्धारराजेन युद्धमासीन्महात्मनः ।
घोरं शकुनिपुत्रेण पूर्ववैरानुसारिणा ॥ १९

इति श्रीमहाभारते आश्वमेधिकपर्वणि
चतुरशीतितमोऽध्यायः ॥ ८४ ॥

८५

वैशंपायन उवाच ।

शकुनेस्तु सुतो वीरो गान्धाराणां महारथः ।
प्रत्युद्ययौ गुडाकेशं सैन्येन महता वृतः ।
हस्त्यश्वरथपूर्णेन पताकाध्वजमालिना ॥ १
अमृष्यमाणास्ते योधा नृपतेः शकुनेर्वधम् ।
अभ्ययुः सहिताः पार्थं प्रगृहीतशरासनाः ॥ २
तानुवाच स धर्मात्मा बीभत्सुरपराजितः ।
युधिष्ठिरस्य वचनं न च ते जगृहुर्हितम् ॥ ३
वार्यमाणास्तु पार्थेन सान्त्वपूर्वममर्षिताः ।
परिवार्य हयं जग्मुस्ततश्चुक्रोध पाण्डवः ॥ ४
ततः शिरांसि दीप्ताग्रैस्तेषां चिच्छेद पाण्डवः ।
क्षुरैर्गाण्डीवनिर्मुक्तैर्नातियत्नादिवार्जुनः ॥ ५
ते वध्यमानाः पार्थेन हयमुत्सृज्य संभ्रमात् ।
न्यवर्तन्त महाराज शरवर्षार्दिता भृशम् ॥ ६
वितुद्यमानस्तैश्चापि गान्धारैः पाण्डवर्षभः ।
आदिश्यादिश्य तेजस्वी शिरांस्येषां न्यपातयत् ॥७
वध्यमानेषु तेष्वाजौ गान्धारेषु समन्ततः ।
स राजा शकुनेः पुत्रः पाण्डवं प्रत्यवारयत् ॥ ८
तं युध्यमानं राजानं क्षत्रधर्मे व्यवस्थितम् ।
पार्थोऽब्रवीन्न मे वध्या राजानो राजशासनात् ।
अलं युद्धेन ते वीर न तेऽस्त्यद्य पराजयः ॥ ९
इत्युक्तस्तदनादृत्य वाक्यमज्ञानमोहितः ।
स शक्रसमकर्माणमवाकिरत सायकैः ॥ १०

तस्य पार्थः शिरस्त्राणमर्धचन्द्रेण पत्रिणा ।
अपाहरदसंभ्रान्तो जयद्रथशिरो यथा ॥ ११
तद्दृष्ट्वा विस्मयं जग्मुर्गान्धाराः सर्व एव ते ।
इच्छता तेन न हतो राजेत्यपि च ते विदुः ॥ १२
गान्धारराजपुत्रस्तु पलायनकृतक्षणः ।
बभौ तैरेव सहितस्त्रस्तैः क्षुद्रमृगैरिव ॥ १३
तेषां तु तरसा पार्थस्तत्रैव परिधावताम् ।
विजहारोत्तमाङ्गानि भल्लैः संनतपर्वभिः ॥ १४
उच्छ्रितांस्तु भुजान्केचिन्नाबुध्यन्त शरैर्हृतान् ।
शरैर्गाण्डीवनिर्मुक्तैः पृथुभिः पार्थचोदितैः ॥ १५
संभ्रान्तनरनागाश्वमथ तद्विद्रुतं बलम् ।
हतविध्वस्तभूयिष्ठमावर्तत मुहुर्मुहुः ॥ १६
न ह्यदृश्यन्त वीरस्य केचिदग्रेऽग्र्यकर्मणः ।
रिपवः पात्यमाना वै ये सहेयुर्महाशरान् ॥ १७
ततो गान्धारराजस्य मन्त्रिवृद्धपुरःसरा ।
जननी निर्ययौ भीता पुरस्कृत्यार्घ्यमुत्तमम् ॥ १८
सा न्यवारयदव्यग्रा तं पुत्रं युद्धदुर्मदम् ।
प्रसादयामास च तं जिष्णुमक्लिष्टकारिणम् ॥ १९
तां पूजयित्वा कौन्तेयः प्रसादमकरोत्तदा ।
शकुनेश्चापि तनयं सान्त्वयन्निदमब्रवीत् ॥ २०
न मे प्रियं महाबाहो यत्ते बुद्धिरियं कृता ।
प्रतियोद्धुममित्रघ्न भ्रातैव त्वं ममानघ ॥ २१
गान्धारीं मातरं स्मृत्वा धृतराष्ट्रकृतेन च ।
तेन जीवसि राजंस्त्वं निहतास्त्वनुगास्तव ॥ २२
मैवं भूः शाम्यतां वैरं मा ते भूद्बुद्धिरीदृशी ।
आगन्तव्यं परां चैत्रीमश्वमेधे नृपस्य नः ॥ २३

इति श्रीमहाभारते आश्वमेधिकपर्वणि
पञ्चाशीतितमोऽध्यायः ॥ ८५ ॥

८६

वैशंपायन उवाच ।

इत्युक्त्वानुययौ पार्थो हयं तं कामचारिणम् ।
न्यवर्तत ततो वाजी येन नागाह्वयं पुरम् ॥ १
तं निवृत्तं तु शुश्राव चारेणैव युधिष्ठिरः ।
श्रुत्वार्जुनं कुशलिनं स च हृष्टमनाभवत् ॥ २
विजयस्य च तत्कर्म गान्धारविषये तदा ।
श्रुत्वान्येषु च देशेषु स सुप्रीतोऽभवन्नृपः ॥ ३
एतस्मिन्नेव काले तु द्वादशीं माघपाक्षिकीम् ।
इष्टं गृहीत्वा नक्षत्रं धर्मराजो युधिष्ठिरः ॥ ४
समानाय्य महातेजाः सर्वान्भ्रातॄन्महामनाः ।
भीमं च नकुलं चैव सहदेवं च कौरवः ॥ ५
प्रोवाचेदं वचः काले तदा धर्मभृतां वरः ।
आमन्त्र्य वदतां श्रेष्ठो भीमं भीमपराक्रमम् ॥ ६
आयाति भीमसेनासौ सहाश्वेन तवानुजः ।
यथा मे पुरुषाः प्राहुर्ये धनंजयसारिणः ॥ ७
उपस्थितश्च कालोऽयमभितो वर्तते हयः ।
माघी च पौर्णमासीयं मासः शेषो वृकोदर ॥ ८
तत्प्रस्थाप्यन्तु विद्वांसो ब्राह्मणा वेदपारगाः ।
वाजिमेधार्थसिद्ध्यर्थं देशं पश्यन्तु यज्ञियम् ॥ ९
इत्युक्तः स तु तच्चक्रे भीमो नृपतिशासनम् ।
हृष्टः श्रुत्वा नरपतेरायान्तं सव्यसाचिनम् ॥ १०
ततो ययौ भीमसेनः प्राज्ञैः स्थपतिभिः सह ।
ब्राह्मणानग्रतः कृत्वा कुशलान्यज्ञकर्मसु ॥ ११
तं सशालचयग्रामं संप्रतोलीविटङ्किनम् ।
मापयामास कौरव्यो यज्ञवाटं यथाविधि ॥ १२
सदः सपत्नीसदनं साग्नीध्रमपि चोत्तरम् ।
कारयामास विधिवन्मणिहेमविभूषितम् ॥ १३
स्तम्भान्कनकचित्रांश्च तोरणानि बृहन्ति च ।
यज्ञायतनदेशेषु दत्त्वा शुद्धं च काञ्चनम् ॥ १४

अन्तःपुराणि राज्ञां च नानादेशनिवासिनाम् ।
कारयामास धर्मात्मा तत्र तत्र यथाविधि ॥ १५
ब्राह्मणानां च वेश्मानि नानादेशसमेयुषाम् ।
कारयामास भीमः स विविधानि ह्यनेकशः ॥ १६
तथा संप्रेषयामास दूतान्नृपतिशासनात् ।
भीमसेनो महाराज राज्ञामक्लिष्टकर्मणाम् ॥ १७
ते प्रियार्थं कुरुपतेराययुर्नृपसत्तमाः ।
रत्नान्यनेकान्यादाय स्त्रियोऽश्वानायुधानि च ॥१८
तेषां निविशतां तेषु शिबिरेषु सहस्रशः ।
नर्दतः सागरस्येव शब्दो दिवमिवास्पृशत् ॥ १९
तेषामभ्यागतानां स राजा राजीवलोचनः ।
व्यादिदेशान्नपानानि शय्याश्चाप्यतिमानुषाः ॥ २०
वाहनानां च विविधाः शालाः शालीक्षुगोरसैः ।
उपेताः पुरुषव्याघ्र व्यादिदेश स धर्मराट् ॥ २१
तथा तस्मिन्महायज्ञे धर्मराजस्य धीमतः ।
समाजग्मुर्मुनिगणा बहवो ब्रह्मवादिनः ॥ २२
ये च द्विजातिप्रवरास्तत्रासन्पृथिवीपते ।
समाजग्मुः सशिष्यांस्तान्प्रतिजग्राह कौरवः ॥ २३
सर्वांश्च ताननुययौ यावदावसथादिति ।
स्वयमेव महातेजा दम्भं त्यक्त्वा युधिष्ठिरः ॥ २४
ततः कृत्वा स्थपतयः शिल्पिनोऽन्ये च ये तदा ।
कृत्स्नं यज्ञविधिं राजन्धर्मराज्ञे न्यवेदयन् ॥ २५
तच्छ्रुत्वा धर्मराजः स कृतं सर्वमनिन्दितम् ।
हृष्टरूपोऽभवद्राजा सह भ्रातृभिरच्युतः ॥ २६

इति श्रीमहाभारते आश्वमेधिकपर्वणि
षडशीतितमोऽध्यायः ॥ ८६ ॥

८७

वैशंपायन उवाच ।

तस्मिन्यज्ञे प्रवृत्ते तु वाग्मिनो हेतुवादिनः ।
हेतुवादान्बहून्प्राहुः परस्परजिगीषवः ॥ १
ददृशुस्तं नृपतयो यज्ञस्य विधिमुत्तमम् ।
देवेन्द्रस्येव विहितं भीमेन कुरुनन्दन ॥ २
ददृशुस्तोरणान्यत्र शातकुम्भमयानि ते ।
शय्यासनविहारांश्च सुबहून्रत्नभूषितान् ॥ ३
घटान्पात्रीः कटाहानि कलशान्वर्धमानकान् ।
न हि किंचिदसौवर्णमपश्यंस्तत्र पार्थिवाः ॥ ४
यूपांश्च शास्त्रपठितान्दारवान्हेमभूषितान् ।
उपक्लृप्तान्यथाकालं विधिवद्भूरिवर्चसः ॥ ५
स्थलजा जलजा ये च पशवः केचन प्रभो ।
सर्वानेव समानीतांस्तानपश्यन्त ते नृपाः ॥ ६
गाश्चैव महिषीश्चैव तथा वृद्धाः स्त्रियोऽपि च ।
औदकानि च सत्त्वानि श्वापदानि वयांसि च ॥७
जरायुजान्यण्डजानि स्वेदजान्युद्भिदानि च ।
पर्वतानूपवन्यानि भूतानि ददृशुश्च ते ॥ ८
एवं प्रमुदितं सर्वं पशुगोधनधान्यतः ।
यज्ञवाटं नृपा दृष्ट्वा परं विस्मयमागमन् ।
ब्राह्मणानां विशां चैव बहुमृष्टान्नमृद्धिमत् ॥ ९
पूर्णे शतसहस्रे तु विप्राणां तत्र भुञ्जताम् ।
दुन्दुभिर्मेघनिर्घोषो मुहुर्मुहुरताड्यत ॥ १०
विननादासकृत्सोऽथ दिवसे दिवसे तदा ।
एवं स ववृते यज्ञो धर्मराजस्य धीमतः ॥ ११
अन्नस्य बहवो राजन्नुत्सर्गाः पर्वतोपमाः ।
दधिकुल्याश्च ददृशुः सर्पिषश्च ह्रदाञ्जनाः ॥ १२
जम्बूद्वीपो हि सकलो नानाजनपदायुतः ।
राजन्नदृश्यतैकस्थो राज्ञस्तस्मिन्महाक्रतौ ॥ १३
तत्र जातिसहस्राणि पुरुषाणां ततस्ततः ।
गृहीत्वा धनमाजग्मुर्बहूनि भरतर्षभ ॥ १४
राजानः स्रग्विणश्चापि सुमृष्टमणिकुण्डलाः ।
पर्यवेषन्द्विजाग्र्यांस्ताञ्शतशोऽथ सहस्रशः ॥ १५
विविधान्यन्नपानानि पुरुषा येऽनुयायिनः ।

तेषां नृपोपभोज्यानि ब्राह्मणेभ्यो ददुः स्म ते ॥१६

इति श्रीमहाभारते आश्वमेधिकपर्वणि
सप्ताशीतितमोऽध्यायः ॥ ८७ ॥

८८

वैशंपायन उवाच ।

समागतान्वेदविदो राज्ञश्च पृथिवीश्वरान् ।
दृष्ट्वा युधिष्ठिरो राजा भीमसेनमथाब्रवीत् ॥ १
उपयाता नरव्याघ्रा य इमे जगदीश्वराः ।
एतेषां क्रियतां पूजा पूजार्हा हि नरेश्वराः ॥ २
इत्युक्तः स तथा चक्रे नरेन्द्रेण यशस्विना ।
भीमसेनो महातेजा यमाभ्यां सह भारत ॥ ३
अथाभ्यगच्छद्गोविन्दो वृष्णिभिः सह धर्मजम् ।
बलदेवं पुरस्कृत्य सर्वप्राणभृतां वरः ॥ ४
युयुधानेन सहितः प्रद्युम्नेन गदेन च ।
निशठेनाथ साम्बेन तथैव कृतवर्मणा ॥ ५
तेषामपि परां पूजां चक्रे भीमो महाभुजः ।
विविशुस्ते च वेश्मानि रत्नवन्ति नरर्षभाः ॥ ६
युधिष्ठिरसमीपे तु कथान्ते मधुसूदनः ।
अर्जुनं कथयामास बहुसंग्रामकर्शितम् ॥ ७
स तं पप्रच्छ कौन्तेयः पुनः पुनररिंदमम् ।
धर्मराड् भ्रातरं जिष्णुं समाचष्ट जगत्पतिः ॥ ८
आगमद्द्वारकावासी ममाप्तः पुरुषो नृप ।
योऽद्राक्षीत्पाण्डवश्रेष्ठं बहुसंग्रामकर्शितम् ॥ ९
समीपे च महाबाहुमाचष्ट च मम प्रभो ।
कुरु कार्याणि कौन्तेय हयमेधार्थसिद्धये ॥ १०
इत्युक्तः प्रत्युवाचैनं धर्मराजो युधिष्ठिरः ।
दिष्ट्या स कुशली जिष्णुरुपयाति च माधव ॥११
यदस्संदिदेशासौ पाण्डवानां बलाग्रणीः ।
तदाख्यातुमिहेच्छामि भवता यदुनन्दन ॥ १२
इत्युक्ते राजशार्दूल वृष्ण्यन्धकपतिस्तदा ।
प्रोवाचेदं वचो वाग्मी धर्मात्मानं युधिष्ठिरम् ॥ १३
इदमाह महाराज पार्थवाक्यं नरः स माम् ।
वाच्यो युधिष्ठिरः कृष्ण काले वाक्यमिदं मम ॥
आगमिष्यन्ति राजानः सर्वतः कौरवान्प्रति ।
तेषामेकैकशः पूजा कार्येत्येतत्क्षमं हि नः ॥ १५
इत्येतद्वचनाद्राजा विज्ञाप्यो मम मानद ।
न तदात्ययिकं हि स्याद्यदर्घ्यानयने भवेत् ॥ १६
कर्तुमर्हति तद्राजा भवांश्चाप्यनुमन्यताम् ।
राजद्वेषाद्विनश्येयुर्नेमा राजन्प्रजाः पुनः ॥ १७
इदमन्यच्च कौन्तेय वचः स पुरुषोऽब्रवीत् ।
धनंजयस्य नृपते तन्मे निगदतः शृणु ॥ १८
उपयास्यति यज्ञं नो मणिपूरपतिर्नृपः ।
पुत्रो मम महातेजा दयितो बभ्रुवाहनः ॥ १९
तं भवान्मदपेक्षार्थं विधिवत्प्रतिपूजयेत् ।
स हि भक्तोऽनुरक्तश्च मम नित्यमिति प्रभो ॥२०
इत्येतद्वचनं श्रुत्वा धर्मराजो युधिष्ठिरः ।
अभिनन्द्यास्य तद्वाक्यमिदं वचनमब्रवीत् ॥ २१

इति श्रीमहाभारते आश्वमेधिकपर्वणि
अष्टाशीतितमोऽध्यायः ॥ ८८ ॥

८९

युधिष्ठिर उवाच ।

श्रुतं प्रियमिदं कृष्ण यत्त्वमर्हसि भाषितुम् ।
तन्मेऽमृतरसप्रख्यं मनो ह्लादयते विभो ॥१
बहूनि किल युद्धानि विजयस्य नराधिपैः ।
पुनरासन्हृषीकेश तत्र तत्रेति मे श्रुतम् ॥ २
मन्निमित्तं हि स सदा पार्थः सुखविवर्जितः ।
अतीव विजयो धीमानिति मे दूयते मनः ॥ ३
संचिन्तयामि वार्ष्णेय सदा कुन्तीसुतं रहः ।
किं नु तस्य शरीरेऽस्ति सर्वलक्षणपूजिते ।
अनिष्टं लक्षणं कृष्ण येन दुःखान्युपाश्नुते ॥ ४

अतीव दुःखभागी स सततं कुन्तिनन्दनः ।
न च पश्यामि बीभत्सोर्निन्द्यं गात्रेषु किंचन ॥ ५
श्रोतव्यं चेन्मयैतद्वै तन्मे व्याख्यातुमर्हसि ।
इत्युक्तः स हृषीकेशो ध्यात्वा सुमहदन्तरम् ।
राजानं भोजराजन्यवर्धनो विष्णुरब्रवीत् ॥ ६
न ह्यस्य नृपते किंचिदनिष्टमुपलक्षये ।
ऋते पुरुषसिंहस्य पिण्डिकेऽस्यातिकायतः ॥ ७
ताभ्यां स पुरुषव्याघ्रो नित्यमध्वसु युज्यते ।
न ह्यन्यदनुपश्यामि येनासौ दुःखभाग्जयः ॥ ८
इत्युक्तः स कुरुश्रेष्ठस्तथ्यं कृष्णेन धीमता ।
प्रोवाच वृष्णिशार्दूलमेवमेतदिति प्रभो ॥ ९
कृष्णा तु द्रौपदी कृष्णं तिर्यक्सासूयमैक्षत ।
प्रतिजग्राह तस्यास्तं प्रणयं चापि केशिहा ।
सख्युः सखा हृषीकेशः साक्षादिव धनंजयः ॥ १०
तत्र भीमादयस्ते तु कुरवो यादवास्तथा ।
रेमुः श्रुत्वा विचित्रार्था धनंजयकथा विभो ॥ ११
तथा कथयतामेव तेषामर्जुनसंकथाः ।
उपायाद्वचनान्मर्त्यो विजयस्य महात्मनः ॥ १२
सोऽभिगम्य कुरुश्रेष्ठं नमस्कृत्य च बुद्धिमान् ।
उपायातं नरव्याघ्रमर्जुनं प्रत्यवेदयत् ॥ १३
तच्छ्रुत्वा नृपतिस्तस्य हर्षबाष्पाकुलेक्षणः ।
प्रियाख्याननिमित्तं वै ददौ बहु धनं तदा ॥ १४
ततो द्वितीये दिवसे महाञ्शब्दो व्यवर्धत ।
आयाति पुरुषव्याघ्रे पाण्डवानां धुरंधरे ॥ १५
ततो रेणुः समुद्भूतो विबभौ तस्य वाजिनः ।
अभितो वर्तमानस्य यथोच्चैःश्रवसस्तथा ॥ १६
तत्र हर्षकला वाचो नराणां शुश्रुवेऽर्जुनः ।
दिष्ट्यासि पार्थ कुशली धन्यो राजा युधिष्ठिरः ॥
कोऽन्यो हि पृथिवीं कृत्स्नामवजित्य सपार्थिवाम् ।
चारयित्वा हयश्रेष्ठमुपायायादृतेऽर्जुनम् ॥ १८
ये व्यतीता महात्मानो राजानः सगरादयः ।
तेषामपीदृशं कर्म न किंचिदनुशुश्रुम ॥ १९
नैतदन्ये करिष्यन्ति भविष्याः पृथिवीक्षितः ।
यत्त्वं कुरुकुलश्रेष्ठ दुष्करं कृतवानिह ॥ २०
इत्येवं वदतां तेषां नृणां श्रुतिसुखा गिरः ।
शृण्वन्विवेश धर्मात्मा फल्गुनो यज्ञसंस्तरम् ॥ २१
ततो राजा सहामात्यः कृष्णश्च यदुनन्दनः ।
धृतराष्ट्रं पुरस्कृत्य ते तं प्रत्युद्ययुस्तदा ॥ २२
सोऽभिवाद्य पितुः पादौ धर्मराजस्य धीमतः ।
भीमादींश्चापि संपूज्य पर्यष्वजत केशवम् ॥ २३
तैः समेत्यार्चितस्तान्स प्रत्यर्च्य च यथाविधि ।
विशश्रामाथ धर्मात्मा तीरं लब्ध्वेव पारगः ॥ २४
एतस्मिन्नेव काले तु स राजा बभ्रुवाहनः ।
मातृभ्यां सहितो धीमान्कुरूनभ्याजगाम ह ॥ २५
स समेत्य कुरून्सर्वान्सर्वैस्तैरभिनन्दितः ।
प्रविवेश पितामह्याः कुन्त्या भवनमुत्तमम् ॥ २६

इति श्रीमहाभारते आश्वमेधिकपर्वणि
एकोननवतितमोऽध्यायः ॥ ८९ ॥

९०

वैशंपायन उवाच ।

स प्रविश्य यथान्यायं पाण्डवानां निवेशनम् ।
पितामहीमभ्यवदत्साम्ना परमवल्गुना ॥ १
तथा चित्राङ्गदा देवी कौरव्यस्यात्मजापि च ।
पृथां कृष्णां च सहिते विनयेनाभिजग्मतुः ।
सुभद्रां च यथान्यायं याश्चान्याः कुरुयोषितः ॥ २
ददौ कुन्ती ततस्ताभ्यां रत्नानि विविधानि च ।
द्रौपदी च सुभद्रा च याश्चाप्यन्या ददुः स्त्रियः ।
ऊषतुस्तत्र ते देव्यौ महार्हशयनासने ।
सुपूजिते स्वयं कुन्त्या पार्थस्य प्रियकाम्यया ॥ ४
स च राजा महावीर्यः पूजितो बभ्रुवाहनः ।

धृतराष्ट्रं महीपालमुपतस्थे यथाविधि ॥ ५
युधिष्ठिरं च राजानं भीमादींश्चापि पाण्डवान् ।
उपगम्य महातेजा विनयेनाभ्यवादयत् ॥ ६
स तैः प्रेम्णा परिष्वक्तः पूजितश्च यथाविधि ।
धनं चास्मै ददुर्भूरि प्रीयमाणा महारथाः ॥ ७
तथैव स महीपालः कृष्णं चक्रगदाधरम् ।
प्रद्युम्न इव गोविन्दं विनयेनोपतस्थिवान् ॥ ८
तस्मै कृष्णो ददौ राज्ञे महार्हमभिपूजितम् ।
रथं हेमपरिष्कारं दिव्याश्वयुजमुत्तमम् ॥ ९
धर्मराजश्च भीमश्च यमजौ फल्गुनस्तथा ।
पृथक्पृथगतीवैनं मानार्हं समपूजयन् ॥ १०
ततस्तृतीये दिवसे सत्यवत्याः सुतो मुनिः ।
युधिष्ठिरं समभ्येत्य वाग्मी वचनमब्रवीत् ॥ ११
अद्य प्रभृति कौन्तेय यजस्व समयो हि ते ।
मुहूर्तो यज्ञियः प्राप्तश्चोदयन्ति च याजकाः ॥१२
अहीनो नाम राजेन्द्र क्रतुस्तेऽयं विकल्पवान् ।
बहुत्वात्काञ्चनस्यास्य ख्यातो बहुसुवर्णकः ॥ १३
एवमेव महाराज दक्षिणां त्रिगुणां कुरु ।
त्रित्वं व्रजतु ते राजन्ब्राह्मणा ह्यत्र कारणम् ॥ १४
त्रीनश्वमेधानत्र त्वं संप्राप्य बहुदक्षिणान् ।
ज्ञातिवध्याकृतं पापं प्रहास्यसि नराधिप ॥ १५
पवित्रं परमं ह्येतत्पावनानां च पावनम् ।
यदश्वमेधावभृथं प्राप्स्यसे कुरुनन्दन ॥ १६
इत्युक्तः स तु तेजस्वी व्यासेनामिततेजसा ।
दीक्षां विवेश धर्मात्मा वाजिमेधाप्तये तदा ।
नराधिपः प्रायजत वाजिमेधं महाक्रतुम् ॥ १७
तत्र वेदविदो राजंश्चक्रुः कर्माणि याजकाः ।
परिक्रमन्तः शास्त्रज्ञा विधिवत्साधुशिक्षिताः ॥ १८
न तेषां स्खलितं तत्र नासीदपहुतं तथा ।
क्रमयुक्तं च युक्तं च चक्रुस्तत्र द्विजर्षभाः ॥ १९
कृत्वा प्रवर्ग्यं धर्मज्ञा यथावद्द्विजसत्तमाः ।
चक्रुस्ते विधिवद्राजंस्तथैवाभिषवं द्विजाः ॥ २०
अभिषूय ततो राजन्सोमं सोमपसत्तमाः ।
सवनान्यानुपूर्व्येण चक्रुः शास्त्रानुसारिणः ॥ २१
न तत्र कृपणः कश्चिन्न दरिद्रो बभूव ह ।
क्षुधितो दुःखितो वापि प्राकृतो वापि मानवः॥२२
भोजनं भोजनार्थिभ्यो दापयामास नित्यदा ।
भीमसेनो महातेजाः सततं राजशासनात् ॥ २३
संस्तरे कुशलाश्चापि सर्वकर्माणि याजकाः ।
दिवसे दिवसे चक्रुर्यथाशास्त्रार्थचक्षुषः ॥ २४
नाषडङ्गविदत्रासीत्सदस्यस्तस्य धीमतः ।
नाव्रतो नानुपाध्यायो न च वादाक्षमो द्विजः ॥२५
ततो यूपोच्छ्रये प्राप्ते षड्बैल्वान्भरतर्षभ ।
खादिरान्बिल्वसमितांस्तावतः सर्ववर्णिनः ॥ २६
देवदारुमयौ द्वौ तु यूपौ कुरुपतेः क्रतौ ।
श्लेष्मातकमयं चैकं याजकाः समकारयन् ॥ २७
शोभार्थं चापरान्यूपान्काञ्चनान्पुरुषर्षभ ।
स भीमः कारयामास धर्मराजस्य शासनात् ॥ २८
ते व्यराजन्त राजर्षे वासोभिरुपशोभिताः ।
नरेन्द्राभिगता देवान्यथा सप्तर्षयो दिवि ॥ २९
इष्टकाः काञ्चनीश्चात्र चयनार्थं कृताभवन् ।
शुशुभे चयनं तत्र दक्षस्येव प्रजापतेः ॥ ३०
चतुश्चित्यः स तस्यासीदष्टादशकरात्मकः ।
स रुक्मपक्षो निचितस्त्रिगुणो गरुडाकृतिः ॥ ३१
ततो नियुक्ताः पशवो यथाशास्त्रं मनीषिभिः ।
तं तं देवं समुद्दिश्य पक्षिणः पशवश्च ये ॥ ३२
ऋषभाः शास्त्रपठितास्तथा जलचराश्च ये ।
सर्वांस्तानभ्ययुञ्जंस्ते तत्राग्निचयकर्मणि ॥ ३३
यूपेषु नियतं चासीत्पशूनां त्रिशतं तथा ।
अश्वरत्नोत्तरं राज्ञः कौन्तेयस्य महात्मनः ॥ ३४

स यज्ञः शुशुभे तस्य साक्षाद्देवर्षिसंकुलः ।
गन्धर्वगणसंकीर्णः शोभितोऽप्सरसां गणैः ॥ ३५
स किंपुरुषगीतैश्च किंनरैरुपशोभितः ।
सिद्धविप्रनिवासैश्च समन्तादभिसंवृतः ॥ ३६
तस्मिन्सदसि नित्यास्तु व्यासशिष्या द्विजोत्तमाः ।
सर्वशास्त्रप्रणेतारः कुशला यज्ञकर्मसु ॥ ३७
नारदश्च बभूवात्र तुम्बुरुश्च महाद्युतिः ।
विश्वावसुश्चित्रसेनस्तथान्ये गीतकोविदाः ॥ ३८
गन्धर्वा गीतकुशला नृत्तेषु च विशारदाः ।
रमयन्ति स्म तान्विप्रान्यज्ञकर्मान्तरेष्वथ ॥ ३९

इति श्रीमहाभारते आश्वमेधिकपर्वणि
नवतितमोऽध्यायः ॥ ९० ॥

९१

वैशंपायन उवाच ।

शमयित्वा पशूनन्यान्विधिवद्द्विजसत्तमाः ।
तुरगं तं यथाशास्त्रमालभन्त द्विजातयः ॥ १
ततः संज्ञाप्य तुरगं विधिवद्याजकर्षभाः ।
उपसंवेशयन्राजंस्ततस्तां द्रुपदात्मजाम् ।
कलाभिस्तिसृभी राजन्यथाविधि मनस्विनीम् ॥ २
उद्धृत्य तु वपां तस्य यथाशास्त्रं द्विजर्षभाः ।
श्रपयामासुरव्यग्राः शास्त्रवद्भरतर्षभ ॥ ३
तं वपाधूमगन्धं तु धर्मराजः सहानुजः ।
उपाजिघ्रद्यथान्यायं सर्वपाप्मापहं तदा ॥ ४
शिष्टान्यङ्गानि यान्यासंस्तस्याश्वस्य नराधिप ।
तान्यग्नौ जुहुवुर्धीराः समस्ताः षोडशर्त्विजः ॥ ५
संस्थाप्यैवं तस्य राज्ञस्तं क्रतुं शक्रतेजसः ।
व्यासः सशिष्यो भगवान्वर्धयामास तं नृपम् ॥६
ततो युधिष्ठिरः प्रादात्सदस्येभ्यो यथाविधि ।
कोटीसहस्रं निष्काणां व्यासाय तु वसुंधराम् ॥ ७
प्रतिगृह्य धरां राजन्व्यासः सत्यवतीसुतः ।
अब्रवीद्भरतश्रेष्ठं धर्मात्मानं युधिष्ठिरम् ॥ ८
पृथिवी भवतस्त्वेषा संन्यस्ता राजसत्तम ।
निष्क्रयो दीयतां मह्यं ब्राह्मणा हि धनार्थिनः ॥ ९
युधिष्ठिरस्तु तान्विप्रान्प्रत्युवाच महामनाः ।
भ्रातृभिः सहितो धीमान्मध्ये राज्ञां महात्मनाम् ॥
अश्वमेधे महायज्ञे पृथिवी दक्षिणा स्मृता ।
अर्जुनेन जिता सेयमृत्विग्भ्यः प्रापिता मया ॥११
वनं प्रवेक्ष्ये विप्रेन्द्रा विभजध्वं महीमिमाम् ।
चतुर्धा पृथिवीं कृत्वा चातुर्होत्रप्रमाणतः ॥ १२
नाहमादातुमिच्छामि ब्रह्मस्वं मुनिसत्तमाः ।
इदं हि मे मतं नित्यं भ्रातॄणां च ममानघाः ॥१३
इत्युक्तवति तस्मिंस्ते भ्रातरो द्रौपदी च सा ।
एवमेतदिति प्राहुस्तदभूद्रोमहर्षणम् ॥ १४
ततोऽन्तरिक्षे वागासीत्साधु साध्विति भारत ।
तथैव द्विजसंघानां शंसतां विबभौ स्वनः ॥ १५
द्वैपायनस्तथोक्तस्तु पुनरेव युधिष्ठिरम् ।
उवाच मध्ये विप्राणामिदं संपूजयन्मुनिः ॥ १६
दत्तैषा भवता मह्यं तां ते प्रतिददाम्यहम् ।
हिरण्यं दीयतामेभ्यो द्विजातिभ्यो धरास्तु ते ॥१७
ततोऽब्रवीद्वासुदेवो धर्मराजं युधिष्ठिरम् ।
यथाह भगवान्व्यासस्तथा तत्कर्तुमर्हसि ॥ १८
इत्युक्तः स कुरुश्रेष्ठः प्रीतात्मा भ्रातृभिः सह ।
कोटिकोटिकृतां प्रादाद्दक्षिणां त्रिगुणां क्रतोः ॥ १९
न करिष्यति तल्लोके कश्चिदन्यो नराधिपः ।
यत्कृतं कुरुसिंहेन मरुत्तस्यानुकुर्वता ॥ २०
प्रतिगृह्य तु तद्द्रव्यं कृष्णद्वैपायनः प्रभुः ।
ऋत्विग्भ्यः प्रददौ विद्वांश्चतुर्धा व्यभजंश्च ते ॥२१
पृथिव्या निष्क्रयं दत्त्वा तद्धिरण्यं युधिष्ठिरः ।
धूतपाप्मा जितस्वर्गो मुमुदे भ्रातृभिः सह ॥ २२
ऋत्विजस्तमपर्यन्तं सुवर्णनिचयं-तदा ।

व्यभजन्त द्विजातिभ्यो यथोत्साहं यथाबलम् ॥ २३
यज्ञवाटे तु यत्किंचिद्धिरण्यमपि भूषणम् ।
तोरणानि च यूपांश्च घटाः पात्रीस्तथेष्टकाः ।
युधिष्ठिराभ्यनुज्ञाताः सर्वं तद्व्यभजन्द्विजाः ॥ २४
अनन्तरं ब्राह्मणेभ्यः क्षत्रिया जह्रिरे वसु ।
तथा विट्शूद्रसंघाश्च तथान्ये म्लेच्छजातयः ।
कालेन महता जह्रुस्तत्सुवर्णं ततस्ततः ॥ २५
ततस्ते ब्राह्मणाः सर्वे मुदिता जग्मुरालयान् ।
तर्पिता वसुना तेन धर्मराज्ञा महात्मना ॥ २६
स्वमंशं भगवान्व्यासः कुन्त्यै पादाभिवादनात् ।
प्रददौ तस्य महतो हिरण्यस्य महाद्युतिः ॥ २७
श्वशुरात्प्रीतिदायं तं प्राप्य सा प्रीतमानसा ।
चकार पुण्यं लोके तु सुमहान्तं पृथा तदा ॥ २८
गत्वा त्ववभृथं राजा विपाप्मा भ्रातृभिः सह ।
सभाज्यमानः शुशुभे महेन्द्रो दैवतैरिव ॥ २९
पाण्डवाश्च महीपालैः समेतैः संवृतास्तदा ।
अशोभन्त महाराज ग्रहास्तारागणैरिव ॥ ३०
राजभ्योऽपि ततः प्रादाद्रत्नानि विविधानि च ।
गजानश्वानलंकारान्स्त्रियो वस्त्राणि काञ्चनम् ॥ ३१
तद्धनौघमपर्यन्तं पार्थः पार्थिवमण्डले ।
विसृजञ्शुशुभे राजा यथा वैश्रवणस्तथा ॥ ३२
आनाय्य च तथा वीरं राजानं बभ्रुवाहनम् ।
प्रदाय विपुलं वित्तं गृहान्प्रास्थापयत्तदा ॥ ३३
दुःशलायाश्च तं पौत्रं बालकं पार्थिवर्षभ ।
स्वराज्ये पितृभिर्गुप्ते प्रीत्या समभिषेचयत् ॥ ३४
राज्ञश्चैवापि तान्सर्वान्सुविभक्तान्सुपूजितान् ।
प्रस्थापयामास वशी कुरुराजो युधिष्ठिरः ॥ ३५
एवं बभूव यज्ञः स धर्मराजस्य धीमतः ।
बह्वन्नधनरत्नौघः सुरामैरेयसागरः ॥ ३६
सर्पिःपङ्का ह्रदा यत्र बहवश्चान्नपर्वताः ।
रसालाकर्दमाः कुल्या बभूवुर्भरतर्षभ ॥ ३७
भक्ष्यषाण्डवरागाणां क्रियतां भुज्यतामिति ।
पशूनां वध्यतां चापि नान्तस्तत्र स्म दृश्यते ॥ ३८
मत्तोन्मत्तप्रमुदितं प्रगीतयुवतीजनम् ।
मृदङ्गशङ्खशब्दैश्च मनोरममभूत्तदा ॥ ३९
दीयतां भुज्यतां चेति दिवारात्रमवारितम् ।
तं महोत्सवसंकाशमतिहृष्टजनाकुलम् ।
कथयन्ति स्म पुरुषा नानादेशनिवासिनः ॥ ४०
वर्षित्वा धनधाराभिः कामै रत्नैर्धनैस्तथा ।
विपाप्मा भरतश्रेष्ठः कृतार्थः प्राविशत्पुरम् ॥ ४१

इति श्रीमहाभारते आश्वमेधिकपर्वणि
एकनवतितमोऽध्यायः ॥ ९१ ॥

९२

जनमेजय उवाच ।

पितामहस्य मे यज्ञे धर्मपुत्रस्य धीमतः ।
यदाश्चर्यमभूत्किंचित्तद्भवान्वक्तुमर्हति ॥ १

वैशंपायन उवाच ।

श्रूयतां राजशार्दूल महदाश्चर्यमुत्तमम् ।
अश्वमेधे महायज्ञे निवृत्ते यदभूद्विभो ॥ २
तर्पितेषु द्विजाग्र्येषु ज्ञातिसंबन्धिबन्धुषु ।
दीनान्धकृपणे चापि तदा भरतसत्तम ॥ ३
घुष्यमाणे महादाने दिक्षु सर्वासु भारत ।
पतत्सु पुष्पवर्षेषु धर्मराजस्य मूर्धनि ॥ ४
बिलान्निष्क्रम्य नकुलो रुक्मपार्श्वस्तदानघ ।
वज्राशनिसमं नादममुञ्चत विशां पते ॥ ५
सकृदुत्सृज्य तं नादं त्रासयानो मृगद्विजान् ।
मानुषं वचनं प्राह धृष्टो बिलशयो महान् ॥ ६
सक्तुप्रस्थेन वो नायं यज्ञस्तुल्यो नराधिपाः ।
उञ्छवृत्तेर्वदान्यस्य कुरुक्षेत्रनिवासिनः ॥ ७

तस्य तद्वचनं श्रुत्वा नकुलस्य विशां पते ।
विस्मयं परमं जग्मुः सर्वे ते ब्राह्मणर्षभाः ॥ ८
ततः समेत्य नकुलं पर्यपृच्छन्त ते द्विजाः ।
कुतस्त्वं समनुप्राप्तो यज्ञं साधुसमागमम् ॥ ९
किं बलं परमं तुभ्यं किं श्रुतं किं परायणम् ।
कथं भवन्तं विद्याम यो नो यज्ञं विगर्हसे ॥ १०
अविलुप्यागमं कृत्स्नं विधिज्ञैर्याजकैः कृतम् ।
यथागमं यथान्यायं कर्तव्यं च यथाकृतम् ॥ ११
पूजार्हाः पूजिताश्चात्र विधिवच्छास्त्रचक्षुषा ।
मन्त्रपूतं हुतश्चाग्निर्दत्तं देयममत्सरम् ॥ १२
तुष्टा द्विजर्षभाश्चात्र दानैर्बहुविधैरपि ।
क्षत्रियाश्च सुयुद्धेन श्राद्धैरपि पितामहाः ॥ १३
पालनेन विशस्तुष्टाः कामैस्तुष्टा वरस्त्रियः ।
अनुक्रोशैस्तथा शूद्रा दानशेषैः पृथग्जनाः ॥ १४
ज्ञातिसंबन्धिनस्तुष्टाः शौचेन च नृपस्य नः ।
देवा हविर्भिः पुण्यैश्च रक्षणैः शरणागताः ॥ १५
यदत्र तथ्यं तद्ब्रूहि सत्यसंध द्विजातिषु ।
यथाश्रुतं यथादृष्टं पृष्टो ब्राह्मणकाम्यया ॥ १६
श्रद्धेयवाक्यः प्राज्ञस्त्वं दिव्यं रूपं बिभर्षि च ।
समागतश्च विप्रैस्त्वं तत्त्वतो वक्तुमर्हसि ॥ १७
इति पृष्टो द्विजैस्तैः स प्रहस्य नकुलोऽब्रवीत् ।
नैषानृता मया वाणी प्रोक्ता दर्पेण वा द्विजाः॥
यन्मयोक्तमिदं किंचिद्युष्माभिश्चाप्युपश्रुतम् ।
सक्तुप्रस्थेन वो नायं यज्ञस्तुल्यो नराधिपाः ।
उञ्छवृत्तेर्वदान्यस्य कुरुक्षेत्रनिवासिनः ॥ १९
इत्यवश्यं मयैतद्वो वक्तव्यं द्विजपुंगवाः ।
शृणुताव्यग्रमनसः शंसतो ये द्विजर्षभाः ॥ २०
अनुभूतं च दृष्टं च यन्मयाद्भुतमुत्तमम् ।
उञ्छवृत्तेर्यथावृत्तं कुरुक्षेत्रनिवासिनः ॥ २१
स्वर्गं येन द्विजः प्राप्तः सभार्यः ससुतस्नुषः ।
यथा चार्धं शरीरस्य ममेदं काञ्चनीकृतम् ॥ २२

इति श्रीमहाभारते आश्वमेधिकपर्वणि
द्विनवतितमोऽध्यायः ॥ ९२ ॥

९३

नकुल उवाच ।

हन्त वो वर्तयिष्यामि दानस्य परमं फलम् ।
न्यायलब्धस्य सूक्ष्मस्य विप्रदत्तस्य यद्द्विजाः ॥ १
धर्मक्षेत्रे कुरुक्षेत्रे धर्मज्ञैर्बहुभिर्वृते ।
उञ्छवृत्तिर्द्विजः कश्चित्कापोतिरभवत्पुरा ॥ २
सभार्यः सह पुत्रेण सस्नुषस्तपसि स्थितः ।
वधूचतुर्थो वृद्धः स धर्मात्मा नियतेन्द्रियः ॥ ३
षष्ठे काले तदा विप्रो भुङ्क्ते तैः सह सुव्रतः ।
षष्ठे काले कदाचिच्च तस्याहारो न विद्यते ।
भुङ्क्तेऽन्यस्मिन्कदाचित्स षष्ठे काले द्विजोत्तमः ॥४
कपोतधर्मिणस्तस्य दुर्भिक्षे सति दारुणे ।
नाविद्यत तदा विप्राः संचयस्तान्निबोधत ।
क्षीणौषधिसमावायो द्रव्यहीनोऽभवत्तदा ॥ ५
काले कालेऽस्य संप्राप्ते नैव विद्येत भोजनम् ।
क्षुधापरिगताः सर्वे प्रातिष्ठन्त तदा तु ते ॥ ६
उञ्छंस्तदा शुक्लपक्षे मध्यं तपति भास्करे ।
उष्णार्तश्च क्षुधार्तश्च स विप्रस्तपसि स्थितः ।
उञ्छमप्राप्तवानेव सार्धं परिजनेन ह ॥ ७
स तथैव क्षुधाविष्टः स्पृष्ट्वा तोयं यथाविधि ।
क्षपयामास तं कालं कृच्छ्रप्राणो द्विजोत्तमः ॥ ८
अथ षष्ठे गते काले यवप्रस्थमुपार्जयत् ।
यवप्रस्थं च ते सक्तूनकुर्वन्त तपस्विनः ॥ ९
कृतजप्याह्निकास्ते तु हुत्वा वह्निं यथाविधि ।
कुडवं कुडवं सर्वे व्यभजन्त तपस्विनः ॥ १०
अथागच्छद्द्विजः कश्चिदतिथिर्भुञ्जतां तदा ।
ते तं दृष्ट्वातिथिं तत्र प्रहृष्टमनसोऽभवन् ॥ ११

तेऽभिवाद्य सुखप्रश्नं पृष्ट्वा तमतिथिं तदा ।
विशुद्धमनसो दान्ताः श्रद्धादमसमन्विताः ॥ १२
अनसूयवो गतक्रोधाः साधवो गतमत्सराः ।
त्यक्तमाना जितक्रोधा धर्मज्ञा द्विजसत्तमाः ॥ १३
सब्रह्मचर्यं स्वं गोत्रं समाख्याय परस्परम् ।
कुटीं प्रवेशयामासुः क्षुधार्तमतिथिं तदा ॥ १४
इदमर्घ्यं च पाद्यं च बृसी चेयं तवानघ ।
शुचयः सक्तवश्चेमे नियमोपार्जिताः प्रभो ।
प्रतिगृह्णीष्व भद्रं ते मया दत्ता द्विजोत्तम ॥ १५
इत्युक्तः प्रतिगृह्याथ सक्तूनां कुडवं द्विजः ।
भक्षयामास राजेन्द्र न च तुष्टिं जगाम सः ॥१६
स उञ्छवृत्तिः तं प्रेक्ष्य क्षुधापरिगतं द्विजम् ।
आहारं चिन्तयामास कथं तुष्टो भवेदिति ॥ १७
तस्य भार्याब्रवीद्राजन्मद्भागो दीयतामिति ।
गच्छत्वेष यथाकामं संतुष्टो द्विजसत्तमः ॥ १८
इति ब्रुवन्तीं तां साध्वीं धर्मात्मा स द्विजर्षभः ।
क्षुधापरिगतां ज्ञात्वा सक्तूंस्तान्नाभ्यनन्दत ॥ १९
जानन्वृद्धां क्षुधार्तां च श्रान्तां ग्लानां तपस्विनीम् ।
त्वगस्थिभूतां वेपन्तीं ततो भार्यामुवाच ताम् ॥२०
अपि कीटपतंगानां मृगाणां चैव शोभने ।
स्त्रियो रक्ष्याश्च पोष्याश्च नैवं त्वं वक्तुमर्हसि ॥२१
अनुकम्पितो नरो नार्या पुष्टो रक्षित एव च ।
प्रपतेद्यशसो दीप्तात्र च लोकानवाप्नुयात् ॥ २२
इत्युक्ता सा ततः प्राह धर्मार्थौ नौ समौ द्विज ।
सक्तुप्रस्थचतुर्भागं गृहाणेमं प्रसीद मे ॥ २३
सत्यं रतिश्च धर्मश्च स्वर्गश्च गुणनिर्जितः ।
स्त्रीणां पतिसमाधीनं काङ्क्षितं च द्विजोत्तम ॥ २४
ऋतुर्मातुः पितुर्बीजं दैवतं परमं पतिः ।
भर्तुः प्रसादात्स्त्रीणां वै रतिः पुत्रफलं तथा ॥ २५
पालनाद्धि पतिस्त्वं मे भर्तासि भरणान्मम ।
पुत्रप्रदानाद्वरदस्तस्मात्सक्तून्गृहाण मे ॥ २६
जरापरिगतो वृद्धः क्षुधार्तो दुर्बलो भृशम् ।
उपवासपरिश्रान्तो यदा त्वमपि कर्शितः ॥ २७
इत्युक्तः स तया सक्तून्प्रगृह्येदं वचोऽब्रवीत् ।
द्विज सक्तूनिमान्भूयः प्रतिगृह्णीष्व सत्तम ॥ २८
स तान्प्रगृह्य भुक्त्वा च न तुष्टिमगमद्द्विजः ।
तमुञ्छवृत्तिरालक्ष्य ततश्चिन्तापरोऽभवत् ॥ २९

पुत्र उवाच ।

सक्तूनिमान्प्रगृह्य त्वं देहि विप्राय सत्तम ।
इत्येवं सुकृतं मन्ये तस्मादेतत्करोम्यहम् ॥ ३०
भवान्हि परिपाल्यो मे सर्वयत्नैर्द्विजोत्तम ।
साधूनां काङ्क्षितं ह्येतत्पितुर्वृद्धस्य पोषणम् ॥ ३१
पुत्रार्थो विहितो ह्येष स्थाविर्ये परिपालनम् ।
श्रुतिरेषा हि विप्रर्षे त्रिषु लोकेषु विश्रुता ॥ ३२
प्राणधारणमात्रेण शक्यं कर्तुं तपस्त्वया ।
प्राणो हि परमो धर्मः स्थितो देहेषु देहिनाम् ॥ ३३

पितोवाच ।

अपि वर्षसहस्री त्वं बाल एव मतो मम ।
उत्पाद्य पुत्रं हि पिता कृतकृत्यो भवत्युत ॥ ३४
बालानां क्षुद्बलवती जानाम्येतदहं विभो ।
वृद्धोऽहं धारयिष्यामि त्वं बली भव पुत्रक ॥ ३५
जीर्णेन वयसा पुत्र न मा क्षुद्बाधतेऽपि च ।
दीर्घकालं तपस्तप्तं न मे मरणतो भयम् ॥ ३६

पुत्र उवाच ।

अपत्यमस्मि ते पुत्रस्त्राणात्पुत्रो हि विश्रुतः ।
आत्मा पुत्रः स्मृतस्तस्मात्त्राह्यात्मानमिहात्मना ॥३७

पितोवाच ।

रूपेण सदृशस्त्वं मे शीलेन च दमेन च ।
परीक्षितश्च बहुधा सक्तूनादद्मि ते ततः ॥ ३८

इत्युक्त्वादाय तान्सक्तून्प्रीतात्मा द्विजसत्तमः ।
प्रहसन्निव विप्राय स तस्मै प्रददौ तदा ॥ ३९
भुक्त्वा तानपि सक्तून्स नैव तुष्टो बभूव ह ।
उञ्छवृत्तिस्तु सव्रीडो बभूव द्विजसत्तमः ॥ ४०
तं वै वधूः स्थिता साध्वी ब्राह्मणप्रियकाम्यया ।
सक्तूनादाय संहृष्टा गुरुं तं वाक्यमब्रवीत् ॥ ४१
संतानात्तव संतानं मम विप्र भविष्यति ।
सक्तूनिमानतिथये गृहीत्वा त्वं प्रयच्छ मे ॥ ४२
तव प्रसवनिर्वृत्त्या मम लोकाः किलाक्षयाः ।
पौत्रेण तानवाप्नोति यत्र गत्वा न शोचति ॥ ४३
धर्माद्या हि यथा त्रेता वह्नित्रेता तथैव च ।
तथैव पुत्रपौत्राणां स्वर्गे त्रेता किलाक्षया ॥ ४४
पितॄंस्त्राणात्तारयति पुत्र इत्यनुशुश्रुम ।
पुत्रपौत्रैश्च नियतं साधुलोकानुपाश्नुते ॥ ४५

श्वशुर उवाच ।

वातातपविशीर्णाङ्गीं त्वां विवर्णां निरीक्ष्य वै ।
कर्शितां सुव्रताचारे क्षुधाविह्वलचेतसम् ॥ ४६
कथं सक्तून्ग्रहीष्यामि भूत्वा धर्मोपघातकः ।
कल्याणवृत्ते कल्याणि नैवं त्वं वक्तुमर्हसि ॥ ४७
षष्ठे काले व्रतवतीं शीलशौचसमन्विताम् ।
कृच्छ्रवृत्तिं निराहारां द्रक्ष्यामि त्वां कथं न्वहम् ॥
बाला क्षुधार्ता नारी च रक्ष्या त्वं सततं मया ।
उपवासपरिश्रान्ता त्वं हि बान्धवनन्दिनी ॥ ४९

स्नुषोवाच ।

गुरोर्मम गुरुस्त्वं वै यतो दैवतदैवतम् ।
देवातिदेवस्तस्मात्त्वं सक्तूनादत्स्व मे विभो ॥ ५०
देहः प्राणश्च धर्मश्च शुश्रूषार्थमिदं गुरोः ।
तव विप्र प्रसादेन लोकान्प्राप्स्याम्यभीप्सितान् ॥
अवेक्ष्या इति कृत्वा त्वं दृढभक्त्येति वा द्विज ।
चिन्त्या ममेयमिति वा सक्तूनादातुमर्हसि ॥ ५२

श्वशुर उवाच ।

अनेन नित्यं साध्वी त्वं शीलवृत्तेन शोभसे ।
या त्वं धर्मव्रतोपेता गुरुवृत्तिमवेक्षसे ॥ ५३
तस्मात्सक्तून्ग्रहीष्यामि वधूर्नार्हसि वञ्चनाम् ।
गणयित्वा महाभागे त्वं हि धर्मभृतां वरा ॥ ५४
इत्युक्त्वा तानुपादाय सक्तून्प्रादाद्द्विजातये ।
ततस्तुष्टोऽभवद्विप्रस्तस्य साधोर्महात्मनः ॥ ५५
प्रीतात्मा स तु तं वाक्यमिदमाह द्विजर्षभम् ।
वाग्मी तदा द्विजश्रेष्ठो धर्मः पुरुषविग्रहः ॥ ५६
शुद्धेन तव दानेन न्यायोपात्तेन यत्नतः ।
यथाशक्ति विमुक्तेन प्रीतोऽस्मि द्विजसत्तम ॥ ५७
अहो दानं घुष्यते ते स्वर्गे स्वर्गनिवासिभिः ।
गगनात्पुष्पवर्षं च पश्यस्व पतितं भुवि ॥ ५८
सुरर्षिदेवगन्धर्वा ये च देवपुरःसराः ।
स्तुवन्तो देवदूताश्च स्थिता दानेन विस्मिताः ॥ ५९
ब्रह्मर्षयो विमानस्था ब्रह्मलोकगताश्च ये ।
काङ्क्षन्ते दर्शनं तुभ्यं दिवं गच्छ द्विजर्षभ ॥ ६०
पितृलोकगताः सर्वे तारिताः पितरस्त्वया ।
अनागताश्च बहवः सुबहूनि युगानि च ॥ ६१
ब्रह्मचर्येण यज्ञेन दानेन तपसा तथा ।
अगह्वरेण धर्मेण तस्माद्गच्छ दिवं द्विज ॥ ६२
श्रद्धया परया यस्त्वं तपश्चरसि सुव्रत ।
तस्माद्देवास्तवानेन प्रीता द्विजवरोत्तम ॥ ६३
सर्वस्वमेतद्यस्मात्ते त्यक्तं शुद्धेन चेतसा ।
कृच्छ्रकाले ततः स्वर्गो जितोऽयं तव कर्मणा ॥ ६४
क्षुधा निर्णुदति प्रज्ञां धर्म्यां बुद्धिं व्यपोहति ।
क्षुधापरिगतज्ञानो धृतिं त्यजति चैव ह ॥ ६५
बुभुक्षां जयते यस्तु स स्वर्गं जयते ध्रुवम् ।
यदा दानरुचिर्भवति तदा धर्मो न सीदति ॥ ६६
अनवेक्ष्य सुतस्नेहं कलत्रस्नेहमेव च ।

धर्ममेव गुरुं ज्ञात्वा तृष्णा न गणिता त्वया ॥६७
द्रव्यागमो नृणां सूक्ष्मः पात्रे दानं ततः परम् ।
कालः परतरो दानाच्छ्रद्धा चापि ततः परा ॥ ६८
स्वर्गद्वारं सुसूक्ष्मं हि नरैर्मोहान्न दृश्यते ।
स्वर्गार्गलं लोभबीजं रागगुप्तं दुरासदम् ॥ ६९
तत्तु पश्यन्ति पुरुषा जितक्रोधा जितेन्द्रियाः ।
ब्राह्मणास्तपसा युक्ता यथाशक्तिप्रदायिनः ॥ ७०
सहस्रशक्तिश्च शतं शतशक्तिर्दशापि च ।
दद्यादपश्च यः शक्त्या सर्वे तुल्यफलाः स्मृताः ॥
रन्तिदेवो हि नृपतिरपः प्रादादकिंचनः ।
शुद्धेन मनसा विप्र नाकपृष्ठं ततो गतः ॥ ७२
न धर्मः प्रीयते तात दानैर्दत्तैर्महाफलैः ।
न्यायलब्धैर्यथा सूक्ष्मैः श्रद्धापूतैः स तुष्यति ॥७३
गोप्रदानसहस्राणि द्विजेभ्योऽदान्नृगो नृपः ।
एकां दत्त्वा स पारक्यां नरकं समवाप्तवान् ॥७४
आत्ममांसप्रदानेन शिबिरौशीनरो नृपः ।
प्राप्य पुण्यकृताँल्लोकान्मोदते दिवि सुव्रतः ॥ ७५
विभवे न नृणां पुण्यं स्वशक्त्या स्वर्जितं सताम् ।
न यज्ञैर्विविधैर्विप्र यथान्यायेन संचितैः ॥ ७६
क्रोधो दानफलं हन्ति लोभात्स्वर्गं न गच्छति ।
न्यायवृत्तिर्हि तपसा दानवित्स्वर्गमश्नुते ॥ ७७
न राजसूयैर्बहुभिरिष्ट्वा विपुलदक्षिणैः ।
न चाश्वमेधैर्बहुभिः फलं सममिदं तव ॥ ७८
सक्तुप्रस्थेन हि जितो ब्रह्मलोकस्त्वयानघ ।
विरजो ब्रह्मभवनं गच्छ विप्र यथेच्छकम् ॥ ७९
सर्वेषां वो द्विजश्रेष्ठ दिव्यं यानमुपस्थितम् ।
आरोहत यथाकामं धर्मोऽस्मि द्विज पश्य माम् ॥
पावितो हि त्वया देहो लोके कीर्तिः स्थिरा च ते ।
सभार्यः सहपुत्रश्च सस्नुषश्च दिवं व्रज ॥ ८१
इत्युक्तवाक्यो धर्मेण यानमारुह्य स द्विजः ।
सभार्यः ससुतश्चापि सस्नुषश्च दिवं ययौ ॥ ८२
तस्मिन्विप्रे गते स्वर्गं ससुते सस्नुषे तदा ।
भार्याचतुर्थे धर्मज्ञे ततोऽहं निःसृतो बिलात् ॥८३
ततस्तु सक्तुगन्धेन क्लेदेन सलिलस्य च ।
दिव्यपुष्पावमर्दाच्च साधोर्दानलवैश्च तैः ।
विप्रस्य तपसा तस्य शिरो मे काञ्चनीकृतम् ॥८४
तस्य सत्याभिसंधस्य सूक्ष्मदानेन चैव ह ।
शरीरार्धं च मे विप्राः शातकुम्भमयं कृतम् ।
पश्यतेदं सुविपुलं तपसा तस्य धीमतः ॥ ८५
कथमेवंविधं मे स्यादन्यत्पार्श्वमिति द्विजाः ।
तपोवनानि यज्ञांश्च हृष्टोऽभ्येमि पुनः पुनः ॥ ८६
यज्ञं त्वहमिमं श्रुत्वा कुरुराजस्य धीमतः ।
आशया परया प्राप्तो न चाहं काञ्चनीकृतः ॥ ८७
ततो मयोक्तं तद्वाक्यं प्रहस्य द्विजसत्तमाः ।
सक्तुप्रस्थेन यज्ञोऽयं संमितो नेति सर्वथा ॥ ८८
सक्तुप्रस्थलवैस्तैर्हि तदाहं काञ्चनीकृतः ।
न हि यज्ञो महानेष सदृशस्तैर्मतो मम ॥ ८९

वैशंपायन उवाच ।

इत्युक्त्वा नकुलः सर्वान्यज्ञे द्विजवरांस्तदा ।
जगामादर्शनं राजन्विप्रास्ते च ययुर्गृहान् ॥ ९०
एतत्ते सर्वमाख्यातं मया परपुरंजय ।
यदाश्चर्यमभूत्तस्मिन्वाजिमेधे महाक्रतौ ॥ ९१
न विस्मयस्ते नृपते यज्ञे कार्यः कथंचन ।
ऋषिकोटिसहस्राणि तपोभिर्ये दिवं गताः ॥ ९२
अद्रोहः सर्वभूतेषु संतोषः शीलमार्जवम् ।
तपो दमश्च सत्यं च दानं चेति समं मतम् ॥९३

इति श्रीमहाभारते आश्वमेधिकपर्वणि
त्रिनवतितमोऽध्यायः ॥ ९३ ॥

९४

जनमेजय उवाच ।

यज्ञे सक्ता नृपतयस्तपःसक्ता महर्षयः ।
शान्तिव्यवसिता विप्राः शमो दम इति प्रभो ॥ १
तस्माद्यज्ञफलैस्तुल्यं न किंचिदिह विद्यते ।
इति मे वर्तते बुद्धिस्तथा चैतदसंशयम् ॥ २
यज्ञैरिष्ट्वा हि बहवो राजानो द्विजसत्तम ।
इह कीर्तिं परां प्राप्य प्रेत्य स्वर्गमितो गताः ॥ ३
देवराजः सहस्राक्षः क्रतुभिर्भूरिदक्षिणैः ।
देवराज्यं महातेजाः प्राप्तवानखिलं विभुः ॥ ४
यथा युधिष्ठिरो राजा भीमार्जुनपुरःसरः ।
सदृशो देवराजेन समृद्ध्या विक्रमेण च ॥ ५
अथ कस्मात्स नकुलो गर्हयामास तं क्रतुम् ।
अश्वमेधं महायज्ञं राज्ञस्तस्य महात्मनः ॥ ६

वैशंपायन उवाच ।

यज्ञस्य विधिमग्र्यं वै फलं चैव नरर्षभ ।
गदतः शृणु मे राजन्यथावदिह भारत ॥ ७
पुरा शक्रस्य यजतः सर्व ऊचुर्महर्षयः ।
ऋत्विक्षु कर्मव्यग्रेषु वितते यज्ञकर्मणि ॥ ८
हूयमाने तथा वह्नौ होत्रे बहुगुणान्विते ।
देवेष्वाहूयमानेषु स्थितेषु परमर्षिषु ॥ ९
सुप्रतीतैस्तदा विप्रैः स्वागमैः सुस्वनैर्नृप ।
अश्रान्तैश्चापि लघुभिरध्वर्युवृषभैस्तथा ॥ १०
आलम्भसमये तस्मिन्गृहीतेषु पशुष्वथ ।
महर्षयो महाराज संबभूवुः कृपान्विताः ॥ ११
ततो दीनान्पशून्दृष्ट्वा ऋषयस्ते तपोधनाः ।
ऊचुः शक्रं समागम्य नायं यज्ञविधिः शुभः ॥१२
अपविज्ञानमेतत्ते महान्तं धर्ममिच्छतः ।
न हि यज्ञे पशुगणा विधिदृष्टाः पुरंदर ॥ १३
धर्मोपघातकस्त्वेष समारम्भस्तव प्रभो ।
नायं धर्मकृतो धर्मो न हिंसा धर्म उच्यते ॥ १४
आगमेनैव ते यज्ञं कुर्वन्तु यदि हेच्छसि ।
विधिदृष्टेन यज्ञेन धर्मस्ते सुमहान्भवेत् ॥ १५
यज बीजैः सहस्राक्ष त्रिवर्षपरमोषितैः ।
एष धर्मो महाञ्शक्र चिन्त्यमानोऽधिगम्यते ॥ १६
शतक्रतुस्तु तद्वाक्यमृषिभिस्तत्त्वदर्शिभिः ।
उक्तं न प्रतिजग्राह मानमोहवशानुगः ॥ १७
तेषां विवादः सुमहाञ्जज्ञे शक्रमहर्षिणाम् ।
जङ्गमैः स्थावरैर्वापि यष्टव्यमिति भारत ॥ १८
ते तु खिन्ना विवादेन ऋषयस्तत्त्वदर्शिनः ।
ततः संधाय शक्रेण पप्रच्छुर्नृपतिं वसुम् ॥ १९
महाभाग कथं यज्ञेष्वागमो नृपते स्मृतः ।
यष्टव्यं पशुभिर्मेध्यैरथो बीजैरजैरपि ॥ २०
तच्छ्रुत्वा तु वचस्तेषामविचार्य बलाबलम् ।
यथोपनीतैर्यष्टव्यमिति प्रोवाच पार्थिवः ॥ २१
एवमुक्त्वा स नृपतिः प्रविवेश रसातलम् ।
उक्त्वेह वितथं राजंश्चेदीनामीश्वरः प्रभुः ॥ २२
अन्यायोपगतं द्रव्यमतीतं यो ह्यपण्डितः ।
धर्माभिकाङ्क्षी यजते न धर्मफलमश्नुते ॥ २३
धर्मवैतंसिको यस्तु पापात्मा पुरुषस्तथा ।
ददाति दानं विप्रेभ्यो लोकविश्वासकारकम् ॥ २४
पापेन कर्मणा विप्रो धनं लब्ध्वा निरङ्कुशः ।
रागमोहान्वितः सोऽन्ते कलुषां गतिमाप्नुते ॥ २५
तेन दत्तानि दानानि पापेन हतबुद्धिना ।
तानि सत्त्वमनासाद्य नश्यन्ति विपुलान्यपि ॥ २६
तस्याधर्मप्रवृत्तस्य हिंसकस्य दुरात्मनः ।
दाने न कीर्तिर्भवति प्रेत्य चेह च दुर्मतेः ॥ २७
अपि संचयबुद्धिर्हि लोभमोहवशंगतः ।
उद्वेजयति भूतानि हिंसया पापचेतनः ॥ २८
एवं लब्ध्वा धनं लोभाद्यजते यो ददाति च ।

स कृत्वा कर्मणा तेन न सिध्यति दुरागमात् ॥ २९
उञ्छं मूलं फलं शाकमुदपात्रं तपोधनाः ।
दानं विभवतो दत्त्वा नराः स्वर्यान्ति धर्मिणः ॥३०
एष धर्मो महांस्त्यागो दानं भूतदया तथा ।
ब्रह्मचर्यं तथा सत्यमनुक्रोशो धृतिः क्षमा ।
सनातनस्य धर्मस्य मूलमेतत्सनातनम् ॥ ३१
श्रूयन्ते हि पुरा विप्रा विश्वामित्रादयो नृपाः ।
विश्वामित्रोऽसितश्चैव जनकश्च महीपतिः ।
कक्षसेनार्ष्टिषेणौ च सिन्धुद्वीपश्च पार्थिवः ॥ ३२
एते चान्ये च बहवः सिद्धिं परमिकां गताः ।
नृपाः सत्यैश्च दानैश्च न्यायलब्धैस्तपोधनाः ॥ ३३
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा ये चाश्रितास्तपः ।
दानधर्माग्निना शुद्धास्ते स्वर्गं यान्ति भारत ॥ ३४

इति श्रीमहाभारते आश्वमेधिकपर्वणि
चतुर्नवतितमोऽध्यायः ॥ ९४ ॥

९५

जनमेजय उवाच ।

धर्मागतेन त्यागेन भगवन्सर्वमस्ति चेत् ।
एतन्मे सर्वमाचक्ष्व कुशलो ह्यसि भाषितुम् ॥ १
ततोञ्छवृत्तेर्यद्वृत्तं सक्तुदाने फलं महत् ।
कथितं मे महद्ब्रह्मंस्तथ्यमेतदसंशयम् ॥ २
कथं हि सर्वयज्ञेषु निश्चयः परमो भवेत् ।
एतदर्हसि मे वक्तुं निखिलेन द्विजर्षभ ॥ ३

वैशंपायन उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
अगस्त्यस्य महायज्ञे पुरावृत्तमरिंदम ॥ ४
पुरागस्त्यो महातेजा दीक्षां द्वादशवार्षिकीम् ।
प्रविवेश महाराज सर्वभूतहिते रतः ॥ ५
तत्राग्निकल्पा होतार आसन्सत्रे महात्मनः ।
मूलाहारा निराहाराः साश्मकुट्टा मरीचिपाः ॥ ६
परिघृष्टिका वैघसिकाः संप्रक्षालास्तथैव च ।
यतयो भिक्षवश्चात्र बभूवुः पर्यवस्थिताः ॥ ७
सर्वे प्रत्यक्षधर्माणो जितक्रोधा जितेन्द्रियाः ।
दमे स्थिताश्च ते सर्वे दम्भमोहविवर्जिताः ॥ ८
वृत्ते शुद्धे स्थिता नित्यमिन्द्रियैश्चाप्यवाहिताः ।
उपासते स्म तं यज्ञं भुञ्जानास्ते महर्षयः ॥ ९
यथाशक्त्या भगवता तदन्नं समुपार्जितम् ।
तस्मिन्सत्रे तु यत्किंचिद्योग्यं तत्र नाभवत् ।
तथा ह्यनेकैर्मुनिभिर्महान्तः क्रतवः कृताः ॥ १०
एवंविधेस्त्वगस्त्यस्य वर्तमाने महाध्वरे ।
न ववर्ष सहस्राक्षस्तदा भरतसत्तम ॥ ११
ततः कर्मान्तरे राजन्नगस्त्यस्य महात्मनः ।
कथेयमभिनिर्वृत्ता मुनीनां भावितात्मनाम् ॥ १२
अगस्त्यो यजमानोऽसौ ददात्यन्नं विमत्सरः ।
न च वर्षति पर्जन्यः कथमन्नं भविष्यति ॥ १३
सत्रं चेदं महद्विप्रा मुनेर्द्वादशवार्षिकम् ।
न वर्षिष्यति देवश्च वर्षाण्येतानि द्वादश ॥ १४
एतद्भवन्तः संचिन्त्य महर्षेरस्य धीमतः ।
अगस्त्यस्यातितपसः कर्तुमर्हन्त्यनुग्रहम् ॥ १५
इत्येवमुक्ते वचने ततोऽगस्त्यः प्रतापवान् ।
प्रोवाचेदं वचो वाग्मी प्रसाद्य शिरसा मुनीन् ॥
यदि द्वादशवर्षाणि न वर्षिष्यति वासवः ।
चिन्तायज्ञं करिष्यामि विधिरेष सनातनः ॥ १७
यदि द्वादशवर्षाणि न वर्षिष्यति वासवः ।
व्यायामेनाहरिष्यामि यज्ञानन्यानतिव्रतान् ॥ १८
बीजयज्ञो मयायं वै बहुवर्षसमाचितः ।
बीजैः कृतैः करिष्ये च नात्र विघ्नो भविष्यति ॥
नेदं शक्यं वृथा कर्तुं मम सत्रं कथंचन ।
वर्षिष्यतीह वा देवो न वा देवो भविष्यति ॥२०
अथ वाभ्यर्थनामिन्द्रः कुर्यान्न त्विह कामतः ।

स्वयमिन्द्रो भविष्यामि जीवयिष्यामि च प्रजाः ॥
यो यदाहारजातश्च स तथैव भविष्यति ।
विशेषं चैव कर्तास्मि पुनः पुनरतीव हि ॥ २२
अथेह स्वर्णमभ्येतु यच्चान्यद्वसु दुर्लभम् ।
त्रिषु लोकेषु यच्चास्ति तदिहागच्छतां स्वयम् ॥ २३
दिव्याश्चाप्सरसां संघाः सगन्धर्वाः सकिंनराः ।
विश्वावसुश्च ये चान्ये तेऽप्युपासन्तु वः सदा ॥
उत्तरेभ्यः कुरुभ्यश्च यत्किंचिद्वसु विद्यते ।
सर्वं तदिह यज्ञे मे स्वयमेवोपतिष्ठतु ।
स्वर्गं स्वर्गसदश्चैव धर्मश्च स्वयमेव तु ॥ २५
इत्युक्ते सर्वमेवैतदभवत्तस्य धीमतः ।
ततस्ते मुनयो दृष्ट्वा मुनेस्तस्य तपोबलम् ।
विस्मिता वचनं प्राहुरिदं सर्वे महार्थवत् ॥ २६
प्रीताः स्म तव वाक्येन न त्विच्छामस्तपोव्ययम् ।
स्वैरेव यज्ञैस्तुष्टाः स्मो न्यायेनेच्छामहे वयम् ॥२७
यज्ञान्दीक्षास्तथा होमान्यच्चान्यन्मृगयामहे ।
तन्नोऽस्तु स्वकृतैर्यज्ञैर्नान्यतो मृगयामहे ॥ २८
न्यायेनोपार्जिताहाराः स्वकर्मनिरता वयम् ।
वेदांश्च ब्रह्मचर्येण न्यायतः प्रार्थयामहे ॥ २९
न्यायेनोत्तरकालं च गृहेभ्यो निःसृता वयम् ।
धर्मदृष्टैर्विधिद्वारैस्तपस्तप्स्यामहे वयम् ॥ ३०
भवतः सम्यगेषा हि बुद्धिर्हिंसाविवर्जिता ।
एतामहिंसां यज्ञेषु ब्रूयास्त्वं सततं प्रभो ॥ ३१
प्रीतास्ततो भविष्यामो वयं द्विजवरोत्तम ।
विसर्जिताः समाप्तौ च सत्रादस्माद्व्रजामहे ॥ ३२

वैशंपायन उवाच ।

तथा कथयतामेव देवराजः पुरंदरः ।
ववर्ष सुमहातेजा दृष्ट्वा तस्य तपोबलम् ॥ ३३
असमाप्तौ च यज्ञस्य तस्यामितपराक्रमः ।
निकामवर्षी देवेन्द्रो बभूव जनमेजय ॥ ३४
प्रसादयामास च तमगस्त्यं त्रिदशेश्वरः ।
स्वयमभ्येत्य राजर्षे पुरस्कृत्य बृहस्पतिम् ॥ ३५
ततो यज्ञसमाप्तौ तान्विससर्ज महामुनीन् ।
अगस्त्यः परमप्रीतः पूजयित्वा यथाविधि ॥ ३६

इति श्रीमहाभारते आश्वमेधिकपर्वणि
पञ्चनवतितमोऽध्यायः ॥ ९५ ॥

९६

जनमेजय उवाच ।

कोऽसौ नकुलरूपेण शिरसा काञ्चनेन वै ।
प्राह मानुषवद्वाचमेतत्पृष्टो वदस्व मे ॥ १

वैशंपायन उवाच ।

एतत्पूर्वं न पृष्टोऽहं न चास्माभिः प्रभाषितम् ।
श्रूयतां नकुलो योऽसौ यथा वागस्य मानुषी ॥ २
श्राद्धं संकल्पयामास जमदग्निः पुरा किल ।
होमधेनुस्तमागाच्च स्वयं चापि दुदोह ताम् ॥ ३
तत्क्षीरं स्थापयामास नवे भाण्डे दृढे शुचौ ।
तच्च क्रोधः स्वरूपेण पिठरं पर्यवर्तयत् ॥ ४
जिज्ञासुस्तमृषिश्रेष्ठं किं कुर्याद्विप्रिये कृते ।
इति संचिन्त्य दुर्मेधा धर्षयामास तत्पयः ॥ ५
तमाज्ञाय मुनिः क्रोधं नैवास्य चुकुपे ततः ।
स तु क्रोधस्तमाहेदं प्राञ्जलिर्मूर्तिमास्थितः ॥ ६
जितोऽस्मीति भृगुश्रेष्ठ भृगवो ह्यतिरोषणाः ।
लोके मिथ्याप्रवादोऽयं यत्त्वयास्मि पराजितः ॥ ७
सोऽहं त्वयि स्थितो ह्यद्य क्षमावति महात्मनि ।
बिभेमि तपसः साधो प्रसादं कुरु मे विभो ॥ ८

जमदग्निरुवाच ।

साक्षाद्दृष्टोऽसि मे क्रोध गच्छ त्वं विगतज्वरः ।
न ममापकृतं तेऽद्य न मन्युर्विद्यते मम ॥ ९
यानुद्दिश्य तु संकल्पः पयसोऽस्य कृतो मया ।

पितरस्ते महाभागास्तेभ्यो बुध्यस्व गम्यताम् ॥१०
इत्युक्तो जातसंत्रासः स तत्रान्तरधीयत ।
पितॄणामभिषङ्गात्तु नकुलत्वमुपागतः ॥ ११
स तान्प्रसादयामास शापस्यान्तो भवेदिति ।
तैश्चाप्युक्तो यदा धर्मं क्षेप्स्यसे मोक्ष्यसे तदा ॥
तैश्चोक्तो यज्ञियान्देशान्धर्मारण्यानि चैव ह ।
जुगुप्सन्परिधावन्स यज्ञं तं समुपासदत् ॥ १३
धर्मपुत्रमथाक्षिप्य सक्तुप्रस्थेन तेन सः ।
मुक्तः शापात्ततः क्रोधो धर्मो ह्यासीद्युधिष्ठिरः ॥१४
एवमेवत्तदा वृत्तं तस्य यज्ञे महात्मनः ।
पश्यतां चापि नस्तत्र नकुलोऽन्तर्हितस्तदा ॥ १५

इति श्रीमहाभारते आश्वमेधिकपर्वणि
षण्णवतितमोऽध्यायः ॥ ९६ ॥

आश्वमेधिकपर्व समाप्तम् ।

१५

आश्रमवासिकपर्व

१

जनमेजय उवाच ।

प्राप्य राज्यं महाभागाः पाण्डवा मे पितामहाः ।
कथमासन्महाराजे धृतराष्ट्रे महात्मनि ॥ १
स हि राजा हतामात्यो हतपुत्रो निराश्रयः ।
कथमासीद्धतैश्वर्यो गान्धारी च यशस्विनी ॥ २
कियन्तं चैव कालं ते पितरो मम पूर्वकाः ।
स्थिता राज्ये महात्मानस्तन्मे व्याख्यातुमर्हसि ॥३

वैशंपायन उवाच ।

प्राप्य राज्यं महात्मानः पाण्डवा हतशत्रवः ।
धृतराष्ट्रं पुरस्कृत्य पृथिवीं पर्यपालयन् ॥ ४
धृतराष्ट्रमुपातिष्ठद्विदुरः संजयस्तथा ।
युयुत्सुश्चापि मेधावी वैश्यापुत्रः स कौरवः ॥ ५
पाण्डवाः सर्वकार्याणि संपृच्छन्ति स्म तं नृपम् ।
चक्रुस्तेनाभ्यनुज्ञाता वर्षाणि दश पञ्च च ॥ ६
सदा हि गत्वा ते वीराः पर्युपासन्त तं नृपम् ।
पादाभिवन्दनं कृत्वा धर्मराजमते स्थिताः ।
ते मूर्ध्नि समुपाघ्राताः सर्वकार्याणि चक्रिरे ॥ ७
कुन्तिभोजसुता चैव गान्धारीमन्ववर्तत ।
द्रौपदी च सुभद्रा च याश्चान्याः पाण्डवस्त्रियः ।
समां वृत्तिमवर्तन्त तयोः श्वश्र्वोर्यथाविधि ॥ ८
शयनानि महार्हाणि वासांस्याभरणानि च ।
राजार्हाणि च सर्वाणि भक्ष्यभोज्यान्यनेकशः ।
युधिष्ठिरो महाराज धृतराष्ट्रेऽभ्युपाहरत् ॥ ९
तथैव कुन्ती गान्धार्यां गुरुवृत्तिमवर्तत ।
विदुरः संजयश्चैव युयुत्सुश्चैव कौरवः ।
उपासते स्म तं वृद्धं हतपुत्रं जनाधिपम् ॥ १०
स्यालो द्रोणस्य यश्चैको दयितो ब्राह्मणो महान् ।
स च तस्मिन्महेष्वासः कृपः समभवत्तदा ॥११
व्यासश्च भगवान्नित्यं वासं चक्रे नृपेण ह ।
कथाः कुर्वन्पुराणर्षिर्देवर्षिनृपरक्षसाम् ॥ १२
धर्मयुक्तानि कार्याणि व्यवहारान्वितानि च ।
धृतराष्ट्राभ्यनुज्ञातो विदुरस्तान्यकारयत् ॥ १३
सामन्तेभ्यः प्रियाण्यस्य कार्याणि सुगुरूण्यपि ।
प्राप्यन्तेऽर्थैः सुलघुभिः प्रभावाद्विदुरस्य वै ॥ १४
अकरोद्बन्धमोक्षांश्च वध्यानां मोक्षणं तथा ।
न च धर्मात्मजो राजा कदाचित्किंचिदब्रवीत् ॥१५
विहारयात्रासु पुनः कुरुराजो युधिष्ठिरः ।
सर्वान्कामान्महातेजाः प्रददावम्बिकासुते ॥ १६
आरालिकाः सूपकारा रागखाण्डविकास्तथा ।
उपातिष्ठन्त राजानं धृतराष्ट्रं यथा पुरा ॥ १७
वासांसि च महार्हाणि माल्यानि विविधानि च ।
उपाजह्रुर्यथान्यायं धृतराष्ट्रस्य पाण्डवाः ॥ १८
मैरेयं मधु मांसानि पानकानि लघूनि च ।
चित्रान्भक्ष्यविकारांश्च चक्रुरस्य यथा पुरा ॥ १९
ये चापि पृथिवीपालाः समाजग्मुः समन्ततः ।

उपातिष्ठन्त ते सर्वे कौरवेन्द्रं यथा पुरा ॥ २०
कुन्ती च द्रौपदी चैव सात्वती चैव भामिनी ।
उलूपी नागकन्या च देवी चित्राङ्गदा तथा ॥ २१
धृष्टकेतोश्च भगिनी जरासंधस्य चात्मजा ।
किंकराः स्मोपतिष्ठन्ति सर्वाः सुबलजां तथा ॥२२
यथा पुत्रवियुक्तोऽयं न किंचिद्दुःखमाप्नुयात् ।
इति राजान्वशाद्भ्रातॄन्नित्यमेव युधिष्ठिरः ॥ २३
एवं ते धर्मराजस्य श्रुत्वा वचनमर्थवत् ।
सविशेषमवर्तन्त भीममेकं विना तदा ॥ २४
न हि तत्तस्य वीरस्य हृदयादपसर्पति ।
धृतराष्ट्रस्य दुर्बुद्धेर्यद्वृत्तं द्यूतकारितम् ॥ २५

इति श्रीमहाभारते आश्रमवासिकपर्वणि
प्रथमोऽध्यायः ॥ १ ॥

२

वैशंपायन उवाच ।

एवं संपूजितो राजा पाण्डवैरम्बिकासुतः ।
विजहार यथापूर्वमृषिभिः पर्युपासितः ॥ १
ब्रह्मदेयाग्रहारांश्च प्रददौ स कुरूद्वहः ।
तच्च कुन्तीसुतो राजा सर्वमेवान्वमोदत ॥ २
आनृशंस्यपरो राजा प्रीयमाणो युधिष्ठिरः ।
उवाच स तदा भ्रातॄनमात्यांश्च महीपतिः ॥ ३
मया चैव भवद्भिश्च मान्य एष नराधिपः ।
निदेशे धृतराष्ट्रस्य यः स्थास्यति स मे सुहृत् ।
विपरीतश्च मे शत्रुर्निरस्यश्च भवेन्नरः ॥ ४
परिदृष्टेषु चाहःसु पुत्राणां श्राद्धकर्मणि ।
ददातु राजा सर्वेषां यावदस्य चिकीर्षितम् ॥ ५
ततः स राजा कौरव्यो धृतराष्ट्रो महामनाः ।
ब्राह्मणेभ्यो महार्हेभ्यो ददौ वित्तान्यनेकशः ॥ ६
धर्मराजश्च भीमश्च सव्यसाची यमावपि ।
तत्सर्वमन्ववर्तन्त धृतराष्ट्रव्यपेक्षया ॥ ७
कथं नु राजा वृद्धः सन्पुत्रशोकसमाहतः ।
शोकमस्मत्कृतं प्राप्य न म्रियेतेति चिन्त्यते ॥ ८
यावद्धि कुरुमुख्यस्य जीवत्पुत्रस्य वै सुखम् ।
बभूव तदवाप्नोतु भोगांश्चेति व्यवस्थिताः ॥ ९
ततस्ते सहिताः सर्वे भ्रातरः पञ्च पाण्डवाः ।
तथाशीलाः समातस्थुर्धृतराष्ट्रस्य शासने ॥ १०
धृतराष्ट्रश्च तान्वीरान्विनीतान्विनये स्थितान् ।
शिष्यवृत्तौ स्थितान्नित्यं गुरुवत्पर्यपश्यत ॥ ११
गान्धारी चैव पुत्राणां विविधैः श्राद्धकर्मभिः ।
आनृण्यमगमत्कामान्विप्रेभ्यः प्रतिपाद्य वै ॥ १२
एवं धर्मभृतां श्रेष्ठो धर्मराजो युधिष्ठिरः ।
भ्रातृभिः सहितो धीमान्पूजयामास तं नृपम् ॥१३

इति श्रीमहाभारते आश्रमवासिकपर्वणि
द्वितीयोऽध्यायः ॥ २ ॥

३

वैशंपायन उवाच ।

स राजा सुमहातेजा वृद्धः कुरुकुलोद्वहः ।
नापश्यत तदा किंचिदप्रियं पाण्डुनन्दने ॥ १
वर्तमानेषु सद्वृत्तिं पाण्डवेषु महात्मसु ।
प्रीतिमानभवद्राजा धृतराष्ट्रोऽम्बिकासुतः ॥ २
सौबलेयी च गान्धारी पुत्रशोकमपास्य तम् ।
सदैव प्रीतिमत्यासीत्तनयेषु निजेष्विव ॥ ३
प्रियाण्येव तु कौरव्यो नाप्रियाणि कुरूद्वह ।
वैचित्रवीर्ये नृपतौ समाचरति नित्यदा ॥ ४
यद्यद्ब्रूते च किंचित्स धृतराष्ट्रो नराधिपः ।
गुरु वा लघु वा कार्यं गान्धारी च यशस्विनी ॥५
तत्स राजा महाराज पाण्डवानां धुरंधरः ।
पूजयित्वा वचस्तत्तदकार्षीत्परवीरहा ॥ ६
तेन तस्याभवत्प्रीतो वृत्तेन स नराधिपः ।
अन्वतप्यच्च संस्मृत्य पुत्रं मन्दमचेतसम् ॥ ७

सदा च प्रातरुत्थाय कृतजप्यः शुचिर्नृपः ।
आशास्ते पाण्डुपुत्राणां समरेष्वपराजयम् ॥ ८
ब्राह्मणान्वाचयित्वा च हुत्वा चैव हुताशनम् ।
आयुष्यं पाण्डुपुत्राणामाशास्ते स नराधिपः ॥ ९
न तां प्रीतिं परामाप पुत्रेभ्यः स महीपतिः ।
यां प्रीतिं पाण्डुपुत्रेभ्यः समवाप तदा नृपः ॥ १०
ब्राह्मणानां च वृद्धानां क्षत्रियाणां च भारत ।
तथा विट्शूद्रसंघानामभवत्सुप्रियस्तदा ॥ ११
यच्च किंचित्पुरा पापं धृतराष्ट्रसुतैः कृतम् ।
अकृत्वा हृदि तद्राजा तं नृपं सोऽन्ववर्तत ॥ १२
यश्च कश्चिन्नरः किंचिदप्रियं चाम्बिकासुते ।
कुरुते द्वेष्यतामेति स कौन्तेयस्य धीमतः ॥ १३
न राज्ञो धृतराष्ट्रस्य न च दुर्योधनस्य वै ।
उवाच दुष्कृतं किंचिद्युधिष्ठिरभयान्नरः ॥ १४
धृत्या तुष्टो नरेन्द्रस्य गान्धारी विदुरस्तथा ।
शौचेन चाजातशत्रोर्न तु भीमस्य शत्रुहन् ॥ १५
अन्ववर्तत भीमोऽपि निष्टनन्धर्मजं नृपम् ।
धृतराष्ट्रं च संप्रेक्ष्य सदा भवति दुर्मनाः ॥ १६
राजानमनुवर्तन्तं धर्मपुत्रं महामतिम् ।
अन्ववर्तत कौरव्यो हृदयेन पराङ्मुखः ॥ १७

इति श्रीमहाभारते आश्रमवासिकपर्वणि
तृतीयोऽध्यायः ॥ ३ ॥

४

वैशंपायन उवाच ।

युधिष्ठिरस्य नृपतेर्दुर्योधनपितुस्तथा ।
नान्तरं ददृशू राजन्पुरुषाः प्रणयं प्रति ॥ १
यदा तु कौरवो राजा पुत्रं सस्मार बालिशम् ।
तदा भीमं हृदा राजन्नपध्याति स पार्थिवः ॥ २
तथैव भीमसेनोऽपि धृतराष्ट्रं जनाधिपम् ।
नामर्षयत राजेन्द्र सदैवातुष्टवद्धृदा ॥ ३
अप्रकाशान्यप्रियाणि चकारास्य वृकोदरः ।
आज्ञां प्रत्यहरच्चापि कृतकैः पुरुषैः सदा ॥ ४
अथ भीमः सुहृन्मध्ये बाहुशब्दं तथाकरोत् ।
संश्रवे धृतराष्ट्रस्य गान्धार्याश्चाप्यमर्षणः ॥ ५
स्मृत्वा दुर्योधनं शत्रुं कर्णदुःशासनावपि ।
प्रोवाचाथ सुसंरब्धो भीमः स परुषं वचः ॥ ६
अन्धस्य नृपतेः पुत्रा मया परिघबाहुना ।
नीता लोकममुं सर्वे नानाशस्त्रात्तजीविताः ॥ ७
इमौ तौ परिघप्रख्यौ भुजौ मम दुरासदौ ।
ययोरन्तरमासाद्य धार्तराष्ट्राः क्षयं गताः ॥ ८
ताविमौ चन्दनेनाक्तौ वन्दनीयौ च मे भुजौ ।
याभ्यां दुर्योधनो नीतः क्षयं ससुतबान्धवः ॥ ९
एताश्चान्याश्च विविधाः शल्यभूता जनाधिपः ।
वृकोदरस्य ता वाचः श्रुत्वा निर्वेदमागमत् ॥ १०
सा च बुद्धिमती देवी कालपर्यायवेदिनी ।
गान्धारी सर्वधर्मज्ञा तान्यलीकानि शुश्रुवे ॥ ११
ततः पञ्चदशे वर्षे समतीते नराधिपः ।
राजा निर्वेदमापेदे भीमवाग्बाणपीडितः ॥ १२
नान्वबुध्यत तद्राजा कुन्तीपुत्रो युधिष्ठिरः ।
श्वेताश्वो वाथ कुन्ती वा द्रौपदी वा यशस्विनी ॥
माद्रीपुत्रौ च भीमस्य चित्तज्ञावन्वमोदताम् ।
राज्ञस्तु चित्तं रक्षन्तौ नोचतुः किंचिदप्रियम् ॥१४
ततः समानयामास धृतराष्ट्रः सुहृज्जनम् ।
बाष्पसंदिग्धमत्यर्थमिदमाह वचो भृशम् ॥ १५

इति श्रीमहाभारते आश्रमवासिकपर्वणि
चतुर्थोऽध्यायः ॥ ४ ॥

५

धृतराष्ट्र उवाच ।

विदितं भवतामेतद्यथा वृत्तः कुरुक्षयः ।
ममापराधात्तत्सर्वमिति ज्ञेयं तु कौरवाः ॥ १

योऽहं दुष्टमतिं मूढं ज्ञातीनां भयवर्धनम् ।
दुर्योधनं कौरवाणामाधिपत्येऽभ्यषेचयम् ॥ २
यच्चाहं वासुदेवस्य वाक्यं नाश्रौषमर्थवत् ।
वध्यतां साध्वयं पापः सामात्य इति दुर्मतिः ॥ ३
पुत्रस्नेहाभिभूतश्च हितमुक्तो मनीषिभिः ।
विदुरेणाथ भीष्मेण द्रोणेन च कृपेण च ॥ ४
पदे पदे भगवता व्यासेन च महात्मना ।
संजयेनाथ गान्धार्या तदिदं तप्यतेऽद्य माम् ॥ ५
यच्चाहं पाण्डुपुत्रेण गुणवत्सु महात्मसु ।
न दत्तवाञ्श्रियं दीप्तां पितृपैतामहीमिमाम् ॥ ६
विनाशं पश्यमानो हि सर्वराज्ञां गदाग्रजः ।
एतच्छ्रेयः स परममन्यत जनार्दनः ॥ ७
सोऽहमेतान्यलीकानि निवृत्तान्यात्मनः सदा ।
हृदये शल्यभूतानि धारयामि सहस्रशः ॥ ८
विशेषतस्तु दह्यामि वर्षं पञ्चदशं हि वै ।
अस्य पापस्य शुद्ध्यर्थं नियतोऽस्मि सुदुर्मतिः ॥ ९
चतुर्थे नियते काले कदाचिदपि चाष्टमे ।
तृष्णाविनयनं भुञ्जे गान्धारी वेद तन्मम ॥ १०
करोत्याहारमिति मां सर्वः परिजनः सदा ।
युधिष्ठिरभयाद्वेत्ति भृशं तप्यति पाण्डवः ॥ ११
भूमौ शये जप्यपरो दर्भेष्वजिनसंवृतः ।
नियमव्यपदेशेन गान्धारी च यशस्विनी ॥ १२
हतं पुत्रशतं शूरं संग्रामेष्वपलायिनम् ।
नानुतप्यामि तच्चाहं क्षत्रधर्मं हि तं विदुः ।
इत्युक्त्वा धर्मराजानमभ्यभाषत कौरवः ॥ १३
भद्रं ते यादवीमातर्वाक्यं चेदं निबोध मे ।
सुखमस्म्युषितः पुत्र त्वया सुपरिपालितः ॥ १४
महादानानि दत्तानि श्राद्धानि च पुनः पुनः ।
प्रकृष्टं मे वयः पुत्र पुण्यं चीर्णं यथाबलम् ।
गान्धारी हतपुत्रेयं धैर्येणोदीक्षते च माम् ॥ १५
द्रौपद्या ह्यपकर्तारस्तव चैश्वर्यहारिणः ।
समतीता नृशंसास्ते धर्मेण निहता युधि ॥ १६
न तेषु प्रतिकर्तव्यं पश्यामि कुरुनन्दन ।
सर्वे शस्त्रजिताँल्लोकान्गतास्तेऽभिमुखं हताः ॥ १७
आत्मनस्तु हितं मुख्यं प्रतिकर्तव्यमद्य मे ।
गान्धार्याश्चैव राजेन्द्र तदनुज्ञातुमर्हसि ॥ १८
त्वं हि धर्मभृतां श्रेष्ठः सततं धर्मवत्सलः ।
राजा गुरुः प्राणभृतां तस्मादेतद्ब्रवीम्यहम् ॥ १९
अनुज्ञातस्त्वया वीर संश्रयेयं वनान्यहम् ।
चीरवल्कलभृद्राजन्गान्धार्या सहितोऽनया ।
तवाशिषः प्रयुञ्जानो भविष्यामि वनेचरः ॥ २०
उचितं नः कुले तात सर्वेषां भरतर्षभ ।
पुत्रेष्वैश्वर्यमाधाय वयसोऽन्ते वनं नृप ॥ २१
तत्राहं वायुभक्षो वा निराहारोऽपि वा वसन् ।
पत्न्या सहानया वीर चरिष्यामि तपः परम् ॥ २२
त्वं चापि फलभाक्तात तपसः पार्थिवो ह्यसि ।
फलभाजो हि राजानः कल्याणस्येतरस्य वा ॥ २३

इति श्रीमहाभारते आश्रमवासिकपर्वणि
पञ्चमोऽध्यायः ॥ ५ ॥

६

युधिष्ठिर उवाच ।

न मां प्रीणयते राज्यं त्वय्येवं दुःखिते नृप ।
धिङ्मामस्तु सुदुर्बुद्धिं राज्यसक्तं प्रमादिनम् ॥ १
योऽहं भवन्तं दुःखार्तमुपवासकृशं नृप ।
यताहारं क्षितिशयं नाविन्दं भ्रातृभिः सह ॥ २
अहोऽस्मि वञ्चितो मूढो भवता गूढबुद्धिना ।
विश्वासयित्वा पूर्वं मां यदिदं दुःखमश्नुथाः ॥ ३
किं मे राज्येन भोगैर्वा किं यज्ञैः किं सुखेन वा ।
यस्य मे त्वं महीपाल दुःखान्येतान्यवाप्तवान् ॥ ४
पीडितं चापि जानामि राज्यमात्मानमेव च ।

अनेन वचसा तुभ्यं दुःखितस्य जनेश्वर ॥ ५
भवान्पिता भवान्माता भवान्नः परमो गुरुः ।
भवता विप्रहीणा हि क नु तिष्ठामहे वयम् ॥ ६
औरसो भवतः पुत्रो युयुत्सुर्नृपसत्तम ।
अस्तु राजा महाराज यं चान्यं मन्यते भवान् ॥७
अहं वनं गमिष्यामि भवान्राज्यं प्रशास्त्विदम् ।
न मामयशसा दग्धं भूयस्त्वं दग्धुमर्हसि ॥ ८
नाहं राजा भवान्राजा भवता परवानहम् ।
कथं गुरुं त्वां धर्मज्ञमनुज्ञातुमिहोत्सहे ॥ ९
न मन्युर्हृदि नः कश्चिद्दुर्योधनकृतेऽनघ ।
भवितव्यं तथा तद्धि वयं ते चैव मोहिताः ॥ १०
वयं हि पुत्रा भवतो यथा दुर्योधनादयः ।
गान्धारी चैव कुन्ती च निर्विशेषे मते मम ॥११
स मां त्वं यदि राजेन्द्र परित्यज्य गमिष्यसि ।
पृष्ठतस्त्वानुयास्यामि सत्येनात्मानमालभे ॥ १२
इयं हि वसुसंपूर्णा मही सागरमेखला ।
भवता विप्रहीणस्य न मे प्रीतिकरी भवेत् ॥ १३
भवदीयमिदं सर्वं शिरसा त्वां प्रसादये ।
त्वदधीनाः स्म राजेन्द्र व्येतु ते मानसो ज्वरः ॥
भवितव्यमनुप्राप्तं मन्ये त्वां तज्जनाधिप ।
दिष्ट्या शुश्रूषमाणस्त्वां मोक्ष्यामि मनसो ज्वरम् ॥

धृतराष्ट्र उवाच ।

तापस्ये मे मनस्तात वर्तते कुरुनन्दन ।
उचितं हि कुलेऽस्माकमरण्यगमनं प्रभो ॥ १६
चिरमस्म्युषितः पुत्र चिरं शुश्रूषितस्त्वया ।
वृद्धं मामभ्यनुज्ञातुं त्वमर्हसि जनाधिप ॥ १७

वैशंपायन उवाच ।

इत्युक्त्वा धर्मराजानं वेपमानः कृताञ्जलिम् ।
उवाच वचनं राजा धृतराष्ट्रोऽम्बिकासुतः ॥ १८
संजयं च महामात्रं कृपं चापि महारथम् ।
अनुनेतुमिहेच्छामि भवद्भिः पृथिवीपतिम् ॥ १९
ग्लायते मे मनो हीदं मुखं च परिशुष्यति ।
वयसा च प्रकृष्टेन वाग्व्यायामेव चैव हि ॥ २०
इत्युक्त्वा स तु धर्मात्मा वृद्धो राजा कुरूद्वहः ।
गान्धारीं शिश्रिये धीमान्सहसैव गतासुवत् ॥ २१
तं तु दृष्ट्वा तथासीनं निश्चेष्टं कुरुपार्थिवम् ।
आर्तिं राजा ययौ तूर्णं कौन्तेयः परवीरहा ॥ २२

युधिष्ठिर उवाच ।

यस्य नागसहस्रेण दशसंख्येन वै बलम् ।
सोऽयं नारीमुपाश्रित्य शेते राजा गतासुवत् ॥२३
आयसी प्रतिमा येन भीमसेनस्य वै पुरा ।
चूर्णीकृता बलवता स बलार्थी श्रितः स्त्रियम् ॥
धिगस्तु मामधर्मज्ञं धिग्बुद्धिं धिक्च मे श्रुतम् ।
यत्कृते पृथिवीपालः शेतेऽयमतथोचितः ॥ २५
अहमप्युपवत्स्यामि यथैवायं गुरुर्मम ।
यदि राजा न भुङ्क्तेऽयं गान्धारी च यशस्विनी ॥

वैशंपायन उवाच ।

ततोऽस्य पाणिना राजा जलशीतेन पाण्डवः ।
उरो मुखं च शनकैः पर्यमार्जत धर्मवित् ॥ २७
तेन रत्नौषधिमता पुण्येन च सुगन्धिना ।
पाणिस्पर्शेन राज्ञस्तु राजा संज्ञामवाप ह ॥ २८

इति श्रीमहाभारते आश्रमवासिकपर्वणि
षष्ठोऽध्यायः ॥ ६ ॥

७

धृतराष्ट्र उवाच ।

स्पृश मां पाणिना भूयः परिष्वज च पाण्डव ।
जीवामीव हि संस्पर्शात्तव राजीवलोचन ॥ १
मूर्धानं च तवाघ्रातुमिच्छामि मनुजाधिप ।
पाणिभ्यां च परिस्प्रष्टुं प्राणा हि न जहुर्मम ॥ २

अष्टमो ह्यद्य कालोऽयमाहारस्य कृतस्य मे ।
येनाहं कुरुशार्दूल न शक्नोमि विचेष्टितुम् ॥ ३
व्यायामश्चायमत्यर्थं कृतस्त्वामभियाचता ।
ततो ग्लानमनास्तात नष्टसंज्ञ इवाभवम् ॥ ४
तवामृतसमस्पर्शं हस्तस्पर्शमिमं विभो ।
लब्ध्वा संजीवितोऽस्मीति मन्ये कुरुकुलोद्वह ॥ ५

वैशंपायन उवाच ।

एवमुक्तस्तु कौन्तेयः पित्रा ज्येष्ठेन भारत ।
पस्पर्श सर्वगात्रेषु सौहार्दात्तं शनैस्तदा ॥ ६
उपलभ्य ततः प्राणान्धृतराष्ट्रो महीपतिः ।
बाहुभ्यां संपरिष्वज्य मूर्ध्न्याजिघ्रत पाण्डवम् ॥ ७
विदुरादयश्च ते सर्वे रुरुदुर्दुःखिता भृशम् ।
अतिदुःखाच्च राजानं नोचुः किंचन पाण्डवाः ॥ ८
गान्धारी त्वेव धर्मज्ञा मनसोद्वहती भृशम् ।
दुःखान्यवारयद्राजन्मैवमित्येव चाब्रवीत् ॥ ९
इतरास्तु स्त्रियः सर्वाः कुन्त्या सह सुदुःखिताः ।
नेत्रैरागतविक्लेदैः परिवार्य स्थिताभवन् ॥ १०
अथाब्रवीत्पुनर्वाक्यं धृतराष्ट्रो युधिष्ठिरम् ।
अनुजानीहि मां राजंस्तापस्ये भरतर्षभ ॥ ११
ग्लायते मे मनस्तात भूयो भूयः प्रजल्पतः ।
न मामतः परं पुत्र परिक्लेष्टुमिहार्हसि ॥ १२
तस्मिंस्तु कौरवेन्द्रे तं तथा ब्रुवति पाण्डवम् ।
सर्वेषामवरोधानामार्तनादो महानभूत् ॥ १३
दृष्ट्वा कृशं विवर्णं च राजानमतथोचितम् ।
उपवासपरिश्रान्तं त्वगस्थिपरिवारितम् ॥ १४
धर्मपुत्रः स पितरं परिष्वज्य महाभुजः ।
शोकजं बाष्पमुत्सृज्य पुनर्वचनमब्रवीत् ॥ १५
न कामये नरश्रेष्ठ जीवितं पृथिवीं तथा ।
यथा तव प्रियं राजंश्चिकीर्षामि परंतप ॥ १६
यदि त्वहमनुग्राह्यो भवतो दयितोऽपि वा ।
क्रियतां तावदाहारस्ततो वेत्स्यामहे वयम् ॥ १७
ततोऽब्रवीन्महातेजा धर्मपुत्रं स पार्थिवः ।
अनुज्ञातस्त्वया पुत्र भुञ्जीयामिति कामये ॥ १८
इति ब्रुवति राजेन्द्रे धृतराष्ट्रे युधिष्ठिरम् ।
ऋषिः सत्यवतीपुत्रो व्यासोऽभ्येत्य वचोऽब्रवीत् ॥

इति श्रीमहाभारते आश्रमवासिकपर्वणि
सप्तमोऽध्यायः ॥ ७ ॥

८

व्यास उवाच ।

युधिष्ठिर महाबाहो यदाह कुरुनन्दनः ।
धृतराष्ट्रो महात्मा त्वां तत्कुरुष्वाविचारयन् ॥ १
अयं हि वृद्धो नृपतिर्हतपुत्रो विशेषतः ।
नेदं कृच्छ्रं चिरतरं सहेदिति मतिर्मम ॥ २
गान्धारी च महाभागा प्राज्ञा करुणवेदिनी ।
पुत्रशोकं महाराज धैर्येणोद्वहते भृशम् ॥ ३
अहमप्येतदेव त्वां ब्रवीमि कुरु मे वचः ।
अनुज्ञां लभतां राजा मा वृथेह मरिष्यति ॥ ४
राजर्षीणां पुराणानामनुयातु गतिं नृपः ।
राजर्षीणां हि सर्वेषामन्ते वनमुपाश्रयः ॥ ५

वैशंपायन उवाच ।

इत्युक्तः स तदा राजा व्यासेनाद्भुतकर्मणा ।
प्रत्युवाच महातेजा धर्मराजो युधिष्ठिरः ॥ ६
भगवानेव नो मान्यो भगवानेव नो गुरुः ।
भगवानस्य राज्यस्य कुलस्य च परायणम् ॥ ७
अहं तु पुत्रो भगवान्पिता राजा गुरुश्च मे ।
निदेशवर्ती च पितुः पुत्रो भवति धर्मतः ॥ ८
इत्युक्तः स तु तं प्राह व्यासो धर्मभृतां वरः ।
युधिष्ठिरं महातेजाः पुनरेव विशां पते ॥ ९
एवमेतन्महाबाहो यथा वदसि भारत ।

राजायं वृद्धतां प्राप्तः प्रमाणे परमे स्थितः ॥ १०
सोऽयं मयाभ्यनुज्ञातस्त्वया च पृथिवीपते ।
करोतु स्वमभिप्रायं मास्य विघ्नकरो भव ॥ ११
एष एव परो धर्मो राजर्षीणां युधिष्ठिर ।
समरे वा भवेन्मृत्युर्वने वा विधिपूर्वकम् ॥ १२
पित्रा तु तव राजेन्द्र पाण्डुना पृथिवीक्षिता ।
शिष्यभूतेन राजायं गुरुवत्पर्युपासितः ॥ १३
क्रतुभिर्दक्षिणावद्भिरन्नपर्वतशोभितैः ।
महद्भिरिष्टं भोगाश्च भुक्ताः पुत्राश्च पालिताः ॥१४
पुत्रसंस्थं च विपुलं राज्यं विप्रोषिते त्वयि ।
त्रयोदशसमा भुक्तं दत्तं च विविधं वसु ॥ १५
त्वया चायं नरव्याघ्र गुरुशुश्रूषया नृपः ।
आराधितः सभृत्येन गान्धारी च यशस्विनी ॥१६
अनुजानीहि पितरं समयोऽस्य तपोविधौ ।
न मन्युर्विद्यते चास्य सुसूक्ष्मोऽपि युधिष्ठिर ॥१७
एतावदुक्त्वा वचनमनुज्ञाप्य च पार्थिवम् ।
तथास्त्विति च तेनोक्तः कौन्तेयेन ययौ वनम् ॥
गते भगवति व्यासे राजा पाण्डुसुतस्ततः ।
प्रोवाच पितरं वृद्धं मन्दं मन्दमिवानतः ॥ १९
यदाह भगवान्व्यासो यच्चापि भवतो मतम् ।
यदाह स महेष्वासः कृपो विदुर एव च ॥ २०
युयुत्सुः संजयश्चैव तत्कर्तास्म्यहमञ्जसा ।
सर्वे ह्येतेऽनुमान्या मे कुलस्यास्य हितैषिणः ॥२१
इदं तु याचे नृपते त्वामहं शिरसा नतः ।
क्रियतां तावदाहारस्ततो गच्छाश्रमं प्रति ॥ २२

इति श्रीमहाभारते आश्रमवासिकपर्वणि
अष्टमोऽध्यायः ॥ ८ ॥

९

वैशंपायन उवाच ।

ततो राज्ञाभ्यनुज्ञातो धृतराष्ट्रः प्रतापवान् ।
ययौ स्वभवनं राजा गान्धार्यानुगतस्तदा ॥ १
मन्दप्राणगतिर्धीमान्कृच्छ्रादिव समुद्धरन् ।
पदातिः स महीपालो जीर्णो गजपतिर्यथा ॥ २
तमन्वगच्छद्विदुरो विद्वान्सूतश्च संजयः ।
स चापि परमेष्वासः कृपः शारद्वतस्तथा ॥ ३
स प्रविश्य गृहं राजा कृतपूर्वाह्णिकक्रियः ।
तर्पयित्वा द्विजश्रेष्ठानाहारमकरोत्तदा ॥ ४
गान्धारी चैव धर्मज्ञा कुन्त्या सह मनस्विनी ।
वधूभिरुपचारेण पूजिताभुङ्क्त भारत ॥ ५
कृताहारं कृताहाराः सर्वे ते विदुरादयः ।
पाण्डवाश्च कुरुश्रेष्ठमुपातिष्ठन्त तं नृपम् ॥ ६
ततोऽब्रवीन्महाराज कुन्तीपुत्रमुपह्वरे ।
निषण्णं पाणिना पृष्ठे संस्पृशन्नम्बिकासुतः ॥ ७
अप्रमादस्त्वया कार्यः सर्वथा कुरुनन्दन ।
अष्टाङ्गे राजशार्दूल राज्ये धर्मपुरस्कृते ॥ ८
तत्तु शक्यं यथा तात रक्षितुं पाण्डुनन्दन ।
राज्यं धर्मं च कौन्तेय विद्वानसि निबोध तत् ॥९
विद्यावृद्धान्सदैव त्वमुपासीथा युधिष्ठिर ।
शृणुयास्ते च यद्ब्रूयुः कुर्याश्चैवाविचारयन् ॥ १०
प्रातरुत्थाय तान्राजन्पूजयित्वा यथाविधि ।
कृत्यकाले समुत्पन्ने पृच्छेथाः कार्यमात्मनः ॥ ११
ते तु संमानिता राजंस्त्वया राज्यहितार्थिना ।
प्रवक्ष्यन्ति हितं तात सर्वं कौरवनन्दन ॥ १२
इन्द्रियाणि च सर्वाणि वाजिवत्परिपाल्य ।
हिताय वै भविष्यन्ति रक्षितं द्रविणं यथा ॥ १३
अमात्यानुपधातीतान्पितृपैतामहाञ्शुचीन् ।
दान्तान्कर्मसु सर्वेषु मुख्यान्मुख्येषु योजयेः ॥ १४
चारयेथाश्च सततं चारैरविदितैः परान् ।
परीक्षितैर्बहुविधं स्वराष्ट्रेषु परेषु च ॥ १५
पुरं च ते सुगुप्तं स्याद्दृढप्राकारतोरणम् ।

अट्टाट्टालकसंबाधं षट्पथं सर्वतोदिशम् ॥ १६
तस्य द्वाराणि कार्याणि पर्याप्तानि बृहन्ति च ।
सर्वतः सुविभक्तानि यन्त्रैरारक्षितानि च ॥ १७
पुरुषैरलमर्थज्ञैर्विदितैः कुलशीलतः ।
आत्मा च रक्ष्यः सततं भोजनादिषु भारत ॥ १८
विहाराहारकालेषु माल्यशय्यासनेषु च ।
स्त्रियश्च ते सुगुप्ताः स्युर्वृद्धैराप्तैरधिष्ठिताः ।
शीलवद्भिः कुलीनैश्च विद्वद्भिश्च युधिष्ठिर ॥ १९
मन्त्रिणश्चैव कुर्वीथा द्विजान्विद्याविशारदान् ।
विनीतांश्च कुलीनांश्च धर्मार्थकुशलानृजून् ॥ २०
तैः सार्धं मन्त्रयेथास्त्वं नात्यर्थं बहुभिः सह ।
समस्तैरपि च व्यस्तैर्व्यपदेशेन केनचित् ॥ २१
सुसंवृतं मन्त्रगृहं स्थलं चारुह्य मन्त्रयेः ।
अरण्ये निःशलाके वा न च रात्रौ कथंचन ॥ २२
वानराः पक्षिणश्चैव ये मनुष्यानुकारिणः ।
सर्वे मन्त्रगृहे वर्ज्या ये चापि जडपङ्गुकाः ॥ २३
मन्त्रभेदे हि ये दोषा भवन्ति पृथिवीक्षिताम् ।
न ते शक्याः समाधातुं कथंचिदिति मे मतिः ॥
दोषांश्च मन्त्रभेदेषु ब्रूयास्त्वं मन्त्रिमण्डले ।
अभेदे च गुणान्राजन्पुनः पुनररिंदम ॥ २५
पौरजानपदानां च शौचाशौचं युधिष्ठिर ।
यथा स्याद्विदितं राजंस्तथा कार्यमरिंदम ॥ २६

इति श्रीमहाभारते आश्रमवासिकपर्वणि
नवमोऽध्यायः ॥ ९ ॥

१०

धृतराष्ट्र उवाच ।

व्यवहाराश्च ते तात नित्यमाप्तैरधिष्ठिताः ।
योज्यास्तुष्टैर्हितै राजन्नित्यं चारैरनुष्ठिताः ॥ १
परिमाणं विदित्वा च दण्डं दण्ड्येषु भारत ।
प्रणयेयुर्यथान्यायं पुरुषास्ते युधिष्ठिर ॥ २
आदानरुचयश्चैव परदाराभिमर्शकाः ।
उग्रदण्डप्रधानाश्च मिथ्या व्याहारिणस्तथा ॥ ३
आक्रोष्टारश्च लुब्धाश्च हन्तारः साहसप्रियाः ।
सभाविहारभेत्तारो वर्णानां च प्रदूषकाः ।
हिरण्यदण्ड्या वध्याश्च कर्तव्या देशकालतः ॥ ४
प्रातरेव हि पश्येथा ये कुर्युर्व्ययकर्म ते ।
अलंकारमथो भोज्यमत ऊर्ध्वं समाचरेः ॥ ५
पश्येथाश्च ततो योधान्सदा त्वं परिहर्षयन् ।
दूतानां च चराणां च प्रदोषस्ते सदा भवेत् ॥ ६
सदा चापररात्रं ते भवेत्कार्यार्थनिर्णये ।
मध्यरात्रे विहारस्ते मध्याह्ने च सदा भवेत् ॥ ७
सर्वे त्वात्ययिकाः कालाः कार्याणां भरतर्षभ ।
तथैवालंकृतः काले तिष्ठेथा भूरिदक्षिणः ।
चक्रवत्कर्मणां तात पर्यायो ह्येष नित्यशः ॥ ८
कोशस्य संचये यत्नं कुर्वीथा न्यायतः सदा ।
द्विविधस्य महाराज विपरीतं विवर्जयेः ॥ ९
चारैर्विदित्वा शत्रूंश्च ये ते राज्यान्तरायिणः ।
तानाप्तैः पुरुषैर्दूराद्घातयेथाः परस्परम् ॥ १०
कर्मदृष्ट्वाथ भृत्यांस्त्वं वरयेथाः कुरूद्वह ।
कारयेथाश्च कर्माणि युक्तायुक्तैरधिष्ठितैः ॥ ११
सेनाप्रणेता च भवेत्तव तात दृढव्रतः ।
शूरः क्लेशसहश्चैव प्रियश्च तव मानवः ॥ १२
सर्वे जानपदाश्चैव तव कर्माणि पाण्डव ।
पौरोगवाश्च सभ्याश्च कुर्युर्ये व्यवहारिणः ॥ १३
स्वरन्ध्रं पररन्ध्रं च स्वेषु चैव परेषु च ।
उपलक्षयितव्यं ते नित्यमेव युधिष्ठिर ॥ १४
देशान्तरस्थाश्च नरा विक्रान्ताः सर्वकर्मसु ।
मात्राभिरनुरूपाभिरनुग्राह्या हितास्त्वया ॥ १५
गुणार्थिनां गुणः कार्यो विदुषां ते जनाधिप ।

अविचाल्याश्च ते ते स्युर्यथा मेरुर्महागिरिः ॥ १६

इति श्रीमहाभारते आश्रमवासिकपर्वणि
दशमोऽध्यायः ॥ १० ॥

११

धृतराष्ट्र उवाच ।

मण्डलानि च बुध्येथाः परेषामात्मनस्तथा ।
उदासीनगुणानां च मध्यमानां तथैव च ॥ १
चतुर्णां शत्रुजातानां सर्वेषामाततायिनाम् ।
मित्रं चामित्रमित्रं च बोद्धव्यं तेऽरिकर्शन ॥ २
तथामात्या जनपदा दुर्गाणि विषमाणि च ।
बलानि च कुरुश्रेष्ठ भवन्त्येषां यथेच्छकम् ॥ ३
ते च द्वादश कौन्तेय राज्ञां वै विविधात्मकाः ।
मन्त्रिप्रधानाश्च गुणाः षष्टिर्द्वादश च प्रभो ॥ ४
एतन्मण्डलमित्याहुराचार्या नीतिकोविदाः ।
अत्र षाड्गुण्यमायत्तं युधिष्ठिर निबोध तत् ॥ ५
वृद्धिक्षयौ च विज्ञेयौ स्थानं च कुरुनन्दन ।
द्विसप्तत्या महाबाहो ततः षाड्गुण्यचारिणः ॥ ६
यदा स्वपक्षो बलवान्परपक्षस्तथाबलः ।
विगृह्य शत्रून्कौन्तेय यायात्क्षितिपतिस्तदा ॥ ७
यदा स्वपक्षोऽबलवांस्तदा संधिं समाश्रयेत् ।
द्रव्याणां संचयश्चैव कर्तव्यः स्यान्महांस्तथा ।
यदा समर्थो यानाय नचिरेणैव भारत ॥ ८
तदा सर्वं विधेयं स्यात्स्थानं च न विभाजयेत् ।
भूमिरल्पफला देया विपरीतस्य भारत ॥ ९
हिरण्यं कुप्यभूयिष्ठं मित्रं क्षीणमकोशवत् ।
विपरीतान्न गृह्णीयात्स्वयं संधिविशारदः ॥ १०
संध्यर्थं राजपुत्रं च लिप्सेथा भरतर्षभ ।
विपरीतस्तु तेऽदेयः पुत्र कस्यांचिदापदि ।
तस्य प्रमोक्षे यत्नं च कुर्याः सोपायमन्त्रवित् ॥ ११
प्रकृतीनां च कौन्तेय राजा दीनां विभावयेत् ।
क्रमेण युगपद्द्वंद्वं व्यसनानां बलाबलम् ॥ १२
पीडनं स्तम्भनं चैव कोशभङ्गस्तथैव च ।
कार्यं यत्नेन शत्रूणां स्वराष्ट्रं रक्षता स्वयम् ॥ १३
न च हिंस्योऽभ्युपगतः सामन्तो वृद्धिमिच्छता ।
कौन्तेय तं न हिंसेत यो महीं विजिगीषते ॥ १४
गणानां भेदने योगं गच्छेथाः सह मन्त्रिभिः ।
साधुसंग्रहणाच्चैव पापनिग्रहणात्तथा ॥ १५
दुर्बलाश्चापि सततं नावष्टभ्या बलीयसा ।
तिष्ठेथा राजशार्दूल वैतसीं वृत्तिमास्थितः ॥ १६
यद्येवमभियायाच्च दुर्बलं बलवान्नृपः ।
सामादिभिरुपायैस्तं क्रमेण विनिवर्तयेत् ॥ १७
अशक्नुवंस्तु युद्धाय निष्पतेत्सह मन्त्रिभिः ।
कोशेन पौरैर्दण्डेन ये चान्ये प्रियकारिणः ॥ १८
असंभवे तु सर्वस्य यथामुख्येन निष्पतेत् ।
क्रमेणानेन मोक्षः स्याच्छरीरमपि केवलम् ॥ १९

इति श्रीमहाभारते आश्रमवासिकपर्वणि
एकादशोऽध्यायः ॥ ११ ॥

१२

धृतराष्ट्र उवाच ।

संधिविग्रहमप्यत्र पश्येथा राजसत्तम ।
द्वियोनिं त्रिविधोपायं बहुकल्पं युधिष्ठिर ॥ १
राजेन्द्र पर्युपासीथाश्छित्त्वा द्वैविध्यमात्मनः ।
तुष्टपुष्टबलः शत्रुरात्मवानिति च स्मरेत् ॥ २
पर्युपासनकाले तु विपरीतं विधीयते ।
आमर्दकाले राजेन्द्र व्यपसर्पस्ततो वरः ॥ ३
व्यसनं भेदनं चैव शत्रूणां कारयेत्ततः ।
कर्शनं भीषणं चैव युद्धे चापि बहुक्षयम् ॥ ४
प्रयास्यमानो नृपतिस्त्रिविधं परिचिन्तयेत् ।
आत्मनश्चैव शत्रोश्च शक्तिं शास्त्रविशारदः ॥ ५
उत्साहप्रभुशक्तिभ्यां मन्त्रशक्त्या च भारत ।

उपपन्नो नरो यायाद्विपरीतमतोऽन्यथा ॥ ६
आददीत बलं राजा मौलं मित्रबलं तथा ।
अटवीबलं भृतं चैव तथा श्रेणीबलं च यत् ॥ ७
तत्र मित्रबलं राजन्मौलेन च विशिष्यते ।
श्रेणीबलं भृतं चैव तुल्य एवेति मे मतिः ॥ ८
तथा चारबलं चैव परस्परसमं नृप ।
विज्ञेयं बलकालेषु राज्ञा काल उपस्थिते ॥ ९
आपदश्चापि बोद्धव्या बहुरूपा नराधिप ।
भवन्ति राज्ञां कौरव्य यास्ताः पृथगतः शृणु ॥१०
विकल्पा बहवो राजन्नापदां पाण्डुनन्दन ।
सामादिभिरुपन्यस्य शमयेत्तान्नृपः सदा ॥ ११
यात्रां यायाद्बलैर्युक्तो राजा षड्भिः परंतप ।
संयुक्तो देशकालाभ्यां बलैरात्मगुणैस्तथा ॥ १२
तुष्टपुष्टबलो यायाद्राजा वृद्ध्युदये रतः ।
आहूतश्चाप्यथो यायादनृतावपि पार्थिवः ॥ १३

स्थूणाश्मानं वाजिरथप्रधानां
ध्वजद्रुमैः संवृतकूलरोधसम् ।
पदातिनागैर्बहुकर्दमां नदीं
सपत्ननाशे नृपतिः प्रयायात् ॥ १४

अथोपपत्त्या शकटं पद्मं वज्रं च भारत ।
उशना वेद यच्छास्त्रं तत्रैतद्विहितं विभो ॥ १५
सादयित्वा परबलं कृत्वा च बलहर्षणम् ।
स्वभूमौ योजयेद्युद्धं परभूमौ तथैव च ॥ १६
लब्धं प्रशमयेद्राजा निक्षिपेद्धनिनो नरान् ।
ज्ञात्वा स्वविषयं तं च सामादिभिरुपक्रमेत् ॥ १७
सर्वथैव महाराज शरीरं धारयेदिह ।
प्रेत्येह चैव कर्तव्यमात्मनिःश्रेयसं परम् ॥ १८
एवं कुर्वञ्शुभा वाचो लोकेऽस्मिञ्शृणुते नृपः ।
प्रेत्य स्वर्गं तथाप्नोति प्रजा धर्मेण पालयन् ॥ १९
एवं त्वया कुरुश्रेष्ठ वर्तितव्यं प्रजाहितम् ।
उभयोर्लोकयोस्तात प्राप्तये नित्यमेव च ॥ २०
भीष्मेण पूर्वमुक्तोऽसि कृष्णेन विदुरेण च ।
मयाप्यवश्यं वक्तव्यं प्रीत्या ते नृपसत्तम ॥ २१
एतत्सर्वं यथान्यायं कुर्वीथा भूरिदक्षिण ।
प्रियस्तथा प्रजानां त्वं स्वर्गे सुखमवाप्स्यसि ॥२२
अश्वमेधसहस्रेण यो यजेत्पृथिवीपतिः ।
पालयेद्वापि धर्मेण प्रजास्तुल्यं फलं लभेत् ॥ २३

इति श्रीमहाभारते आश्रमवासिकपर्वणि
द्वादशोऽध्यायः ॥ १२ ॥

१३

युधिष्ठिर उवाच ।

एवमेतत्करिष्यामि यथात्थ पृथिवीपते ।
भूयश्चैवानुशास्योऽहं भवता पार्थिवर्षभ ॥ १
भीष्मे स्वर्गमनुप्राप्ते गते च मधुसूदने ।
विदुरे संजये चैव कोऽन्यो मां वक्तुमर्हति ॥ २
यत्तु मामनुशास्तीह भवानद्य हिते स्थितः ।
कर्तास्म्येतन्महीपाल निर्वृतो भव भारत ॥ ३

वैशंपायन उवाच ।

एवमुक्तः स राजर्षिर्धर्मराजेन धीमता ।
कौन्तेयं समनुज्ञातुमियेष भरतर्षभ ॥ ४
पुत्र विश्रम्यतां तावन्ममापि बलवाञ्श्रमः ।
इत्युक्त्वा प्राविशद्राजा गान्धार्या भवनं तदा ॥ ५
तमासनगतं देवी गान्धारी धर्मचारिणी ।
उवाच काले कालज्ञा प्रजापतिसमं पतिम् ॥ ६
अनुज्ञातः स्वयं तेन व्यासेनापि महर्षिणा ।
युधिष्ठिरस्यानुमते कदारण्यं गमिष्यसि ॥ ७

धृतराष्ट्र उवाच ।

गान्धार्यहमनुज्ञातः स्वयं पित्रा महात्मना ।
युधिष्ठिरस्यानुमते गन्तास्मि नचिराद्वनम् ॥ ८

अहं हि नाम सर्वेषां तेषां दुर्द्यूतदेविनाम् ।
पुत्राणां दातुमिच्छामि प्रेत्यभावानुगं वसु ।
सर्वप्रकृतिसांनिध्यं कारयित्वा स्ववेश्मनि ॥ ९

वैशंपायन उवाच ।

इत्युक्त्वा धर्मराजाय प्रेषयामास पार्थिवः ।
स च तद्वचनात्सर्वं समानिन्ये महीपतिः ॥ १०
ततो निष्क्रम्य नृपतिस्तस्मादन्तःपुरात्तदा ।
सर्वं सुहृज्जनं चैव सर्वाश्च प्रकृतीस्तथा ।
समवेतांश्च तान्सर्वान्पौरजानपदानथ ॥ ११
ब्राह्मणांश्च महीपालान्नानादेशसमागतान् ।
ततः प्राह महातेजा धृतराष्ट्रो महीपतिः ॥ १२
शृण्वन्त्वेकाग्रमनसो ब्राह्मणाः कुरुजाङ्गलाः ।
क्षत्रियाश्चैव वैश्याश्च शूद्राश्चैव समागताः ॥ १३
भवन्तः कुरवश्चैव बहुकालं सहोषिताः ।
परस्परस्य सुहृदः परस्परहिते रताः ॥ १४
यदिदानीमहं ब्रूयामस्मिन्काल उपस्थिते ।
तथा भवद्भिः कर्तव्यमविचार्य वचो मम ॥ १५
अरण्यगमने बुद्धिर्गान्धारीसहितस्य मे ।
व्यासस्यानुमते राज्ञस्तथा कुन्तीसुतस्य च ।
भवन्तोऽप्यनुजानन्तु मा वोऽन्या भूद्विचारणा ॥
अस्माकं भवतां चैव येयं प्रीतिर्हि शाश्वती ।
न चान्येष्वस्ति देशेषु राज्ञामिति मतिर्मम ॥ १७
श्रान्तोऽस्मि वयसानेन तथा पुत्रविनाकृतः ।
उपवासकृशश्चास्मि गान्धारीसहितोऽनघाः ॥ १८
युधिष्ठिरगते राज्ये प्राप्तश्चास्मि सुखं महत् ।
मन्ये दुर्योधनैश्वर्याद्विशिष्टमिति सत्तमाः ॥ १९
मम त्वन्धस्य वृद्धस्य हतपुत्रस्य का गतिः ।
ऋते वनं महाभागास्तन्मानुज्ञातुमर्हथ ॥ २०
तस्य तद्वचनं श्रुत्वा सर्वे ते कुरुजाङ्गलाः ।
बाष्पसंदिग्धया वाचा रुरुदुर्भरतर्षभ ॥ २१
तानविब्रुवतः किंचिद्दुःखशोकपरायणान् ।
पुनरेव महातेजा धृतराष्ट्रोऽब्रवीदिदम् ॥ २२

इति श्रीमहाभारते आश्रमवासिकपर्वणि
त्रयोदशोऽध्यायः ॥ १३ ॥

१४

धृतराष्ट्र उवाच ।

शंतनुः पालयामास यथावत्पृथिवीमिमाम् ।
तथा विचित्रवीर्यश्च भीष्मेण परिपालितः ।
पालयामास वस्तातो विदितं वो नसंशयः ॥ १
यथा च पाण्डुर्भ्राता मे दयितो भवतामभूत् ।
स चापि पालयामास यथावत्तच्च वेत्थ ह ॥ २
मया च भवतां सम्यक्शुश्रूषा या कृतानघाः ।
असम्यग्वा महाभागास्तत्क्षन्तव्यमतन्द्रितैः ॥ ३
यच्च दुर्योधनेनेदं राज्यं भुक्तमकण्टकम् ।
अपि तत्र न वो मन्दो दुर्बुद्धिरपराद्धवान् ॥ ४
तस्यापराधाद्दुर्बुद्धेरभिमानान्महीक्षिताम् ।
विमर्दः सुमहानासीदनयान्मत्कृतादथ ॥ ५
तन्मया साधु वापीदं यदि वासाधु वै कृतम् ।
तद्वो हृदि न कर्तव्यं मामनुज्ञातुमर्हथ ॥ ६
वृद्धोऽयं हतपुत्रोऽयं दुःखितोऽयं जनाधिपः ।
पूर्वराज्ञां च पुत्रोऽयमिति कृत्वानुजानत ॥ ७
इयं च कृपणा वृद्धा हतपुत्रा तपस्विनी ।
गान्धारी पुत्रशोकार्ता तुल्यं याचति वो मया ॥ ८
हतपुत्राविमौ वृद्धौ विदित्वा दुःखितौ तथा ।
अनुजानीत भद्रं वो व्रजावः शरणं च वः ॥ ९
अयं च कौरवो राजा कुन्तीपुत्रो युधिष्ठिरः ।
सर्वैर्भवद्भिर्द्रष्टव्यः समेषु विषमेषु च ।
न जातु विषमं चैव गमिष्यति कदाचन ॥ १०
चत्वारः सचिवा यस्य भ्रातरो विपुलौजसः ।
लोकपालोपमा ह्येते सर्वे धर्मार्थदर्शिनः ॥ ११

ब्रह्मेव भगवानेष सर्वभूतजगत्पतिः ।
युधिष्ठिरो महातेजा भवतः पालयिष्यति ॥ १२
अवश्यमेव वक्तव्यमिति कृत्वा ब्रवीमि वः ।
एष न्यासो मया दत्तः सर्वेषां वो युधिष्ठिरः ।
भवन्तोऽस्य च वीरस्य न्यासभूता मया कृताः ॥
यद्येव तैः कृतं किंचिद्व्यलीकं वा सुतैर्मम ।
यद्यन्येन मदीयेन तदनुज्ञातुमर्हथ ॥ १४
भवद्भिर्हि न मे मन्युः कृतपूर्वः कथंचन ।
अत्यन्तगुरुभक्तानामेषोऽञ्जलिरिदं नमः ॥ १५
तेषामस्थिरबुद्धीनां लुब्धानां कामचारिणाम् ।
कृते याचामि वः सर्वान्गान्धारीसहितोऽनघाः ॥
इत्युक्तास्तेन ते राज्ञा पौरजानपदा जनाः ।
नोचुर्बाष्पकलाः किंचिद्वीक्षांचक्रुः परस्परम् ॥ १७

इति महाभारते आश्रमवासिकपर्वणि
चतुर्दशोऽध्यायः ॥ १४ ॥

१५

वैशंपायन उवाच ।

एवमुक्तास्तु ते तेन पौरजानपदा जनाः ।
वृद्धेन राज्ञा कौरव्य नष्टसंज्ञा इवाभवन् ॥ १
तूष्णींभूतांस्ततस्तांस्तु बाष्पकण्ठान्महीपतिः ।
धृतराष्ट्रो महीपालः पुनरेवाभ्यभाषत ॥ २
वृद्धं मां हतपुत्रं च धर्मपत्न्या सहानया ।
विलपन्तं बहुविधं कृपणं चैव सत्तमाः ॥ ३
पित्रा स्वयमनुज्ञातं कृष्णद्वैपायनेन वै ।
वनवासाय धर्मज्ञा धर्मज्ञेन नृपेण च ॥ ४
सोऽहं पुनः पुनर्याचे शिरसावनतोऽनघाः ।
गान्धार्या सहितं तन्मां समनुज्ञातुमर्हथ ॥ ५
श्रुत्वा तु कुरुराजस्य वाक्यानि करुणानि ते ।
रुरुदुः सर्वतो राजन्समेताः कुरुजाङ्गलाः ॥ ६
उत्तरीयैः करैश्चापि संछाद्य वदनानि ते ।
रुरुदुः शोकसंतप्ता मुहूर्तं पितृमातृवत् ॥ ७
हृदयैः शून्यभूतैस्ते धृतराष्ट्रप्रवासजम् ।
दुःखं संधारयन्तः स्म नष्टसंज्ञा इवाभवन् ॥ ८
ते विनीय तमायासं कुरुराजवियोगजम् ।
शनैः शनैस्तदान्योन्यमब्रुवन्स्वमतान्युत ॥ ९
ततः संधाय ते सर्वे वाक्यानथ समासतः ।
एकस्मिन्ब्राह्मणे राजन्नावेश्योचुर्नराधिपम् ॥ १०
ततः स्वचरणे वृद्धः संमतोऽर्थविशारदः ।
साम्बाख्यो बह्वृचो राजन्वक्तुं समुपचक्रमे ॥ ११
अनुमान्य महाराजं तत्सदः संप्रभाष्य च ।
विप्रः प्रगल्भो मेधावी स राजानमुवाच ह ॥ १२
राजन्वाक्यं जनस्यास्य मयि सर्वं समर्पितम् ।
वक्ष्यामि तदहं वीर तज्जुषस्व नराधिप ॥ १३
यथा वदसि राजेन्द्र सर्वमेतत्तथा विभो ।
नात्र मिथ्या वचः किंचित्सुहृत्त्वं नः परस्परम् ॥
न जात्वस्य तु वंशस्य राज्ञां कश्चित्कदाचन ।
राजासीद्यः प्रजापालः प्रजानामप्रियो भवेत् ॥ १५
पितृवद्भ्रातृवच्चैव भवन्तः पालयन्ति नः ।
न च दुर्योधनः किंचिदयुक्तं कृतवान्नृप ॥ १६
यथा ब्रवीति धर्मज्ञो मुनिः सत्यवतीसुतः ।
तथा कुरु महाराज स हि नः परमो गुरुः ॥ १७
त्यक्ता वयं तु भवता दुःखशोकपरायणाः ।
भविष्यामश्चिरं राजन्भवद्गुणशतैर्हृताः ॥ १८
यथा शंतनुना गुप्ता राज्ञा चित्राङ्गदेन च ।
भीष्मवीर्योपगूढेन पित्रा च तव पार्थिव ॥ १९
भवद्बुद्धियुजा चैव पाण्डुना पृथिवीक्षिता ।
तथा दुर्योधनेनापि राज्ञा सुपरिपालिताः ॥ २०
न स्वल्पमपि पुत्रस्ते व्यलीकं कृतवान्नृप ।
पितरीव सुविश्वस्तास्तस्मिन्नपि नराधिपे ।
वयमास्म यथा सम्यग्भवतो विदितं तथा ॥ २१

तथा वर्षसहस्राय कुन्तीपुत्रेण धीमता ।
पाल्यमाना धृतिमता सुखं विन्दामहे नृप ॥ २२
राजर्षीणां पुराणानां भवतां वंशधारिणाम् ।
कुरुसंवरणादीनां भरतस्य च धीमतः ॥ २३
वृत्तं समनुयात्येष धर्मात्मा भूरिदक्षिणः ।
नात्र वाच्यं महाराज सुसूक्ष्ममपि विद्यते ॥ २४
उषिताः स्म सुखं नित्यं भवता परिपालिताः ।
सुसूक्ष्मं च व्यलीकं ते सपुत्रस्य न विद्यते ॥ २५
यत्तु ज्ञातिविमर्देऽस्मिन्नात्थ दुर्योधनं प्रति ।
भवन्तमनुनेष्यामि तत्रापि कुरुनन्दन ॥ २६

इति श्रीमहाभारते आश्रवासिकपर्वणि
पञ्चदशोऽध्यायः ॥ १५ ॥

१६

ब्राह्मण उवाच ।

न तद्दुर्योधनकृतं न च तद्भवता कृतम् ।
न कर्णसौबलाभ्यां च कुरवो यत्क्षयं गताः ॥ १
दैवं तत्तु विजानीमो यन्न शक्यं प्रबाधितुम् ।
दैवं पुरुषकारेण न शक्यमतिवर्तितुम् ॥ २
अक्षौहिण्यो महाराज दशाष्टौ च समागताः ।
अष्टादशाहेन हता दशभिर्योधपुंगवैः ॥ ३
भीष्मद्रोणकृपाद्यैश्च कर्णेन च महात्मना ।
युयुधानेन वीरेण धृष्टद्युम्नेन चैव ह ॥ ४
चतुर्भिः पाण्डुपुत्रैश्च भीमार्जुनयमैर्नृप ।
जनक्षयोऽयं नृपते कृतो दैवबलात्कृतैः ॥ ५
अवश्यमेव संग्रामे क्षत्रियेण विशेषतः ।
कर्तव्यं निधनं लोके शस्त्रेण क्षत्रबन्धुना ॥ ६
तैरियं पुरुषव्याघ्रैर्विद्याबाहुबलान्वितैः ।
पृथिवी निहता सर्वा सहया सरथद्विपा ॥ ७
न स राजापराध्नोति पुत्रस्तव महामनाः ।
न भवान्न च ते भृत्या न कर्णो न च सौबलः ॥ ८
यद्विनष्टाः कुरुश्रेष्ठ राजानश्च सहस्रशः ।
सर्वं दैवकृतं तद्वै कोऽत्र किं वक्तुमर्हति ॥ ९
गुरुर्मतो भवानस्य कृत्स्नस्य जगतः प्रभुः ।
धर्मात्मानमतस्तुभ्यमनुजानीमहे सुतम् ॥ १०
लभतां वीरलोकान्स ससहायो नराधिपः ।
द्विजाग्र्यैः समनुज्ञातस्त्रिदिवे मोदतां सुखी ॥ ११
प्राप्स्यते च भवान्पुण्यं धर्मे च परमां स्थितिम् ।
वेद पुण्यं च कार्त्स्न्येन सम्यग्भरतसत्तम ॥ १२
दृष्टापदानाश्चास्माभिः पाण्डवाः पुरुषर्षभाः ।
समर्थास्त्रिदिवस्यापि पालने किं पुनः क्षितेः ॥१३
अनुवर्त्स्यन्ति चापीमाः समेषु विषमेषु च ।
प्रजाः कुरुकुलश्रेष्ठ पाण्डवाञ्शीलभूषणान् ॥ १४
ब्रह्मदेयाग्रहारांश्च परिहारांश्च पार्थिव ।
पूर्वराजातिसर्गांश्च पालयत्येव पाण्डवः ॥ १५
दीर्घदर्शी कृतप्रज्ञः सदा वैश्रवणो यथा ।
अक्षुद्रसचिवश्चायं कुन्तीपुत्रो महामनाः ॥ १६
अप्यमित्रे दयावांश्च शुचिश्च भरतर्षभ ।
ऋजु पश्यति मेधावी पुत्रवत्पाति नः सदा ॥ १७
विप्रियं च जनस्यास्य संसर्गाद्धर्मजस्य वै ।
न करिष्यन्ति राजर्षे तथा भीमार्जुनादयः ॥ १८
मन्दा मृदुषु कौरव्यास्तीक्ष्णेष्वाशीविषोपमाः ।
वीर्यवन्तो महात्मानः पौराणां च हिते रताः ॥१९
न कुन्ती न च पाञ्चाली न चोलूपी न सात्वती ।
अस्मिञ्जने करिष्यन्ति प्रतिकूलानि कर्हिचित् ॥२०
भवत्कृतमिमं स्नेहं युधिष्ठिरविवर्धितम् ।
न पृष्ठतः करिष्यन्ति पौरजानपदा जनाः ॥ २१
अधर्मिष्ठानपि सतः कुन्तीपुत्रा महारथाः ।
मानवान्पालयिष्यन्ति भूत्वा धर्मपरायणाः ॥ २२
स राजन्मानसं दुःखमपनीय युधिष्ठिरात् ।
कुरु कार्याणि धर्म्याणि नमस्ते भरतर्षभ ॥ २३

वैशंपायन उवाच ।
तस्य तद्वचनं धर्म्यमनुबन्धगुणोत्तरम् ।
साधु साध्विति सर्वः स जनः प्रतिगृहीतवान् ॥
धृतराष्ट्रश्च तद्वाक्यमभिपूज्य पुनः पुनः ।
विसर्जयामास तदा सर्वास्तु प्रकृतीः शनैः ॥ २५
स तैः संपूजितो राजा शिवेनावेक्षितस्तदा ।
प्राञ्जलिः पूजयामास तं जनं भरतर्षभ ॥ २६
ततो विवेश भुवनं गान्धार्या सहितो नृपः ।
व्युष्टायां चैव शर्वर्यां यच्चकार निबोध तत् ॥ २७

इति श्रीमहाभारते आश्रमवासिकपर्वणि
षोडशोऽध्यायः ॥ १६ ॥

१७

वैशंपायन उवाच ।
व्युषितायां रजन्यां तु धृतराष्ट्रोऽम्बिकासुतः ।
विदुरं प्रेषयामास युधिष्ठिरनिवेशनम् ॥ १
स गत्वा राजवचनादुवाचाच्युतमीश्वरम् ।
युधिष्ठिरं महातेजाः सर्वबुद्धिमतां वरः ॥ २
धृतराष्ट्रो महाराज वनवासाय दीक्षितः ।
गमिष्यति वनं राजन्कार्तिकीमागतामिमाम् ॥ ३
स त्वा कुरुकुलश्रेष्ठ किंचिदर्थमभीप्सति ।
श्राद्धमिच्छति दातुं स गाङ्गेयस्य महात्मनः ॥ ४
द्रोणस्य सोमदत्तस्य बाह्लीकस्य च धीमतः ।
पुत्राणां चैव सर्वेषां ये चास्य सुहृदो हताः ।
यदि चाभ्यनुजानीषे सैन्धवापसदस्य च ॥ ५
एतच्छ्रुत्वा तु वचनं विदुरस्य युधिष्ठिरः ।
हृष्टः संपूजयामास गुडाकेशश्च पाण्डवः ॥ ६
न तु भीमो दृढक्रोधस्तद्वचो जगृहे तदा ।
विदुरस्य महातेजा दुर्योधनकृतं स्मरन् ॥ ७
अभिप्रायं विदित्वा तु भीमसेनस्य फल्गुनः ।
किरीटी किंचिदानम्य भीमं वचनमब्रवीत् ॥ ८
भीम राजा पिता वृद्धो वनवासाय दीक्षितः ।
दातुमिच्छति सर्वेषां सुहृदामौर्ध्वदेहिकम् ॥ ९
भवता निर्जितं वित्तं दातुमिच्छति कौरवः ।
भीष्मादीनां महाबाहो तदनुज्ञातुमर्हसि ॥ १०
दिष्ट्या त्वद्य महाबाहो धृतराष्ट्रः प्रयाचति ।
याचितो यः पुरास्माभिः पश्य कालस्य पर्ययम् ॥
योऽसौ पृथिव्याः कृत्स्नाया भर्ता भूत्वा नराधिप ।
परैर्विनिहतापत्यो वनं गन्तुमभीप्सति ॥ १२
मा तेऽन्यत्पुरुषव्याघ्र दानाद्भवतु दर्शनम् ।
अयशस्यमतोऽन्यत्स्यादधर्म्यं च महाभुज ॥ १३
राजानमुपतिष्ठस्व ज्येष्ठं भ्रातरमीश्वरम् ।
अर्हस्त्वमसि दातुं वै नादातुं भरतर्षभ ।
एवं ब्रुवाणं कौन्तेयं धर्मराजोऽभ्यपूजयत् ॥ १४
भीमसेनस्तु सक्रोधः प्रोवाचेदं वचस्तदा ।
वयं भीष्मस्य कुर्मेह प्रेतकार्याणि फल्गुन ॥ १५
सोमदत्तस्य नृपतेर्भूरिश्रवस एव च ।
बाह्लीकस्य च राजर्षेर्द्रोणस्य च महात्मनः ॥ १६
अन्येषां चैव सुहृदां कुन्ती कर्णाय दास्यति ।
श्राद्धानि पुरुषव्याघ्र मादात्कौरवको नृपः ॥ १७
इति मे वर्तते बुद्धिर्मा वो नन्दन्तु शत्रवः ।
कष्टात्कष्टतरं यान्तु सर्वे दुर्योधनादयः ।
यैरियं पृथिवी सर्वा घातिता कुलपांसनैः ॥ १८
कुतस्त्वमद्य विस्मृत्य वैरं द्वादशवार्षिकम् ।
अज्ञातवासगमनं द्रौपदीशोकवर्धनम् ।
क्व तदा धृतराष्ट्रस्य स्नेहोऽस्मास्वभवत्तदा ॥ १९
कृष्णाजिनोपसंवीतो हृताभरणभूषणः ।
सार्धं पाञ्चालपुत्र्या त्वं राजानमुपजग्मिवान् ।
क्व तदा द्रोणभीष्मौ तौ सोमदत्तोऽपि वाभवत् ॥
यत्र त्रयोदश समा वने वन्येन जीवसि ।
न तदा त्वा पिता ज्येष्ठः पितृत्वेनाभिवीक्षते ॥२१

किं ते तद्विस्मृतं पार्थ यदेष कुलपांसनः ।
दुर्वृत्तो विदुरं प्राह द्यूते किं जितमित्युत ॥ २२
तमेवंवादिनं राजा कुन्तीपुत्रो युधिष्ठिरः ।
उवाच भ्रातरं धीमाञ्जोषमास्वेति भर्त्सयन् ॥ २३

इति श्रीमहाभारते आश्रमवासिकपर्वणि
सप्तदशोऽध्यायः ॥ १७ ॥

१८

अर्जुन उवाच ।

भीम ज्येष्ठो गुरुर्मे त्वं नातोऽन्यद्वक्तुमुत्सहे ।
धृतराष्ट्रो हि राजर्षिः सर्वथा मानमर्हति ॥ १
न स्मरन्त्यपराद्धानि स्मरन्ति सुकृतानि च ।
असंभिन्नार्थमर्यादाः साधवः पुरुषोत्तमाः ॥ २
इदं मद्वचनात्क्षत्तः कौरवं ब्रूहि पार्थिवम् ।
यावदिच्छति पुत्राणां दातुं तावद्ददाम्यहम् ॥ ३
भीष्मादीनां च सर्वेषां सुहृदामुपकारिणाम् ।
मम कोशादिति विभो मा भूद्भीमः सुदुर्मनाः ॥४

वैशंपायन उवाच ।

इत्युक्ते धर्मराजस्तमर्जुनं प्रत्यपूजयत् ।
भीमसेनः कटाक्षेण वीक्षांचक्रे धनंजयम् ॥ ५
ततः स विदुरं धीमान्वाक्यमाह युधिष्ठिरः ।
न भीमसेने कोपं स नृपतिः कर्तुमर्हति ॥ ६
परिक्लिष्टो हि भीमोऽयं हिमवृष्ट्यातपादिभिः ।
दुःखैर्बहुविधैर्धीमानरण्ये विदितं तव ॥ ७
किं तु मद्वचनाद्ब्रूहि राजानं भरतर्षभम् ।
यद्यदिच्छसि यावच्च गृह्यतां मद्गृहादिति ॥ ८
यन्मात्सर्यमयं भीमः करोति भृशदुःखितः ।
न तन्मनसि कर्तव्यमिति वाच्यः स पार्थिवः ॥९
यन्ममास्ति धनं किंचिदर्जुनस्य च वेश्मनि ।
तस्य स्वामी महाराज इति वाच्यः स पार्थिवः ॥
ददातु राजा विप्रेभ्यो यथेष्टं क्रियतां व्ययः ।
पुत्राणां सुहृदां चैव गच्छत्वानृण्यमद्य सः ॥ ११
इदं चापि शरीरं मे तवायत्तं जनाधिप ।
धनानि चेति विद्धि त्वं क्षत्तर्नास्त्यत्र संशयः ॥१२

इति श्रीमहाभारते आश्रमवासिकपर्वणि
अष्टादशोऽध्यायः ॥ १८ ॥

१९

वैशंपायन उवाच ।

एवमुक्तस्तु राज्ञा स विदुरो बुद्धिसत्तमः ।
धृतराष्ट्रमुपेत्येदं वाक्यमाह महार्थवत् ॥ १
उक्तो युधिष्ठिरो राजा भवद्वचनमादितः ।
स च संश्रुत्य वाक्यं ते प्रशशंस महाद्युतिः ॥ २
बीभत्सुश्च महातेजा निवेदयति ते गृहान् ।
वसु तस्य गृहे यच्च प्राणानपि च केवलान् ॥ ३
धर्मराजश्च पुत्रस्ते राज्यं प्राणान्धनानि च ।
अनुजानाति राजर्षे यच्चान्यदपि किंचन ॥ ४
भीमस्तु सर्वदुःखानि संस्मृत्य बहुलान्युत ।
कृच्छ्रादिव महाबाहुरनुमन्ये विनिःश्वसन् ॥ ५
स राज्ञा धर्मशीलेन भ्रात्रा बीभत्सुना तथा ।
अनुनीतो महाबाहुः सौहृदे स्थापितोऽपि च ॥ ६
न च मन्युस्त्वया कार्य इति त्वां प्राह धर्मराट् ।
संस्मृत्य भीमस्तद्वैरं यदन्यायवन्नदाचरेत् ॥ ७
एवंप्रायो हि धर्मोऽयं क्षत्रियाणां नराधिप ।
युद्धे क्षत्रियधर्मे च निरतोऽयं वृकोदरः ॥ ८
वृकोदरकृते चाहमर्जुनश्च पुनः पुनः ।
प्रसादयाव नृपते भवान्प्रभुरिहास्ति यत् ॥ ९
प्रददातु भवान्वित्तं यावदिच्छसि पार्थिव ।
त्वमीश्वरो नो राज्यस्य प्राणानां चेति भारत ॥१०
ब्रह्मदेयाग्रहारांश्च पुत्राणां चौर्ध्वदेहिकम् ।
इतो रत्नानि गाश्चैव दासीदासमजाविकम् ॥ ११
आनयित्वा कुरुश्रेष्ठो ब्राह्मणेभ्यः प्रयच्छतु ।

दीनान्धकृपणेभ्यश्च तत्र तत्र नृपाज्ञया ॥ १२
बह्वन्नरसपानाढ्याः सभा विदुर कारय ।
गवां निपानान्यन्यच्च विविधं पुण्यकर्म यत् ॥ १३
इति मामब्रवीद्राजा पार्थश्चैव धनंजयः ।
यदत्रानन्तरं कार्यं तद्भवान्वक्तुमर्हति ॥ १४
इत्युक्तो विदुरेणाथ धृतराष्ट्रोऽभिनन्द्य तत् ।
मनश्चक्रे महादाने कार्तिक्यां जनमेजय ॥ १५

इति श्रीमहाभारते आश्रमवासिकपर्वणि
एकोनविंशोऽध्यायः ॥ १९ ॥

२०

वैशंपायन उवाच ।

विदुरेणैवमुक्तस्तु धृतराष्ट्रो जनाधिपः ।
प्रीतिमानभवद्राजा राज्ञो जिष्णोश्च कर्मणा ॥ १
ततोऽभिरूपान्भीष्माय ब्राह्मणानृषिसत्तमान् ।
पुत्रार्थे सुहृदां चैव स समीक्ष्य सहस्रशः ॥ २
कारयित्वान्नपानानि यानान्याच्छादनानि च ।
सुवर्णमणिरत्नानि दासीदासपरिच्छदान् ॥ ३
कम्बलाजिनरत्नानि ग्रामान्क्षेत्रानजाविकम् ।
अलंकारान्गजानश्वान्कन्याश्चैव वरस्त्रियः ।
आदिश्यादिश्य विप्रेभ्यो ददौ स नृपसत्तमः ॥४
द्रोणं संकीर्त्य भीष्मं च सोमदत्तं च बाह्लिकम् ।
दुर्योधनं च राजानं पुत्रांश्चैव पृथक्पृथक् ।
जयद्रथपुरोगांश्च सुहृदश्चैव सर्वशः ॥ ५
स श्राद्धयज्ञो ववृधे बहुगोधनदक्षिणः ।
अनेकधनरत्नौघो युधिष्ठिरमते तदा ॥ ६
अनिशं यत्र पुरुषा गणका लेखकास्तथा ।
युधिष्ठिरस्य वचनात्तदापृच्छन्ति तं नृपम् ॥ ७
आज्ञापय किमेतेभ्यः प्रदेयं दीयतामिति ।
तदुपस्थितमेवात्र वचनान्ते प्रदृश्यते ॥ ८
शते देये दशशतं सहस्रे चायुतं तथा ।
दीयते वचनाद्राज्ञः कुन्तीपुत्रस्य धीमतः ॥ ९
एवं स वसुधाराभिर्वर्षमाणो नृपाम्बुदः ।
तर्पयामास विप्रांस्तान्वर्षन्भूमिमिवाम्बुदः ॥ १०
ततोऽनन्तरमेवात्र सर्ववर्णान्महीपतिः ।
अन्नपानरसौघेन प्लावयामास पार्थिवः ॥ ११
सवस्त्रफेनरत्नौघो मृदङ्गनिनदस्वनः ।
गवाश्वमकरावर्तो नारीरत्नमहाकरः ॥ १२
ग्रामाग्रहारकुल्याढ्यो मणिहेमजलार्णवः ।
जगत्संप्लावयामास धृतराष्ट्रदयाम्बुधिः ॥ १३
एवं स पुत्रपौत्राणां पितॄणामात्मनस्तथा ।
गान्धार्याश्च महाराज प्रददावौर्ध्वदेहिकम् ॥ १४
परिश्रान्तो यदासीत्स ददद्दानान्यनेकशः ।
ततो निर्वर्तयामास दानयज्ञं कुरूद्वहः ॥ १५
एवं स राजा कौरव्यश्चक्रे दानमहोत्सवम् ।
नटनर्तकलास्याढ्यं बह्वन्नरसदक्षिणम् ॥ १६
दशाहमेवं दानानि दत्त्वा राजाम्बिकासुतः ।
बभूव पुत्रपौत्राणामनृणो भरतर्षभ ॥ १७

इति श्रीमहाभारते आश्रमवासिकपर्वणि
विंशोऽध्यायः ॥ २० ॥

२१

वैशंपायन उवाच ।

ततः प्रभाते राजा स धृतराष्ट्रोऽम्बिकासुतः ।
आहूय पाण्डवान्वीरान्वनवासकृतक्षणः ॥ १
गान्धारीसहितो धीमानभिनन्द्य यथाविधि ।
कार्त्तिक्यां कारयित्वेष्टिं ब्राह्मणैर्वेदपारगैः ॥ २
अग्निहोत्रं पुरस्कृत्य वल्कलाजिनसंवृतः ।
वधूपरिवृतो राजा निर्ययौ भवनात्ततः ॥ ३
ततः स्त्रियः कौरवपाण्डवानां
याश्चाप्यन्याः कौरवराजवंश्याः ।
तासां नादः प्रादुरासीत्तदानीं

वैचित्रवीर्ये नृपतौ प्रयाते ॥ ४
ततो लाजैः सुमनोभिश्च राजा
विचित्राभिस्तद्गृहं पूजयित्वा ।
संयोज्यार्थैर्भृत्यजनं च सर्वं
ततः समुत्सृज्य ययौ नरेन्द्रः ॥ ५
ततो राजा प्राञ्जलिर्वेपमानो
युधिष्ठिरः सस्वनं बाष्पकण्ठः ।
विलप्योच्चैर्हा महाराज साधो
क गन्तासीत्यपतत्तात भूमौ ॥ ६
तथार्जुनस्तीव्रदुःखाभितप्तो
मुहुर्मुहुर्निःश्वसन्भारताग्र्यः ।
युधिष्ठिरं मैवमित्येवमुक्त्वा
निगृह्याथोदीधरत्सीदमानः ॥ ७
वृकोदरः फल्गुनश्चैव वीरौ
माद्रीपुत्रौ विदुरः संजयश्च ।
वैश्यापुत्रः सहितो गौतमेन
धौम्यो विप्राश्चान्वयुर्बाष्पकण्ठाः ॥ ८
कुन्ती गान्धारीं बद्धनेत्रां व्रजन्तीं
स्कन्धासक्तं हस्तमथोद्वहन्ती ।
राजा गान्धार्याः स्कन्धदेशेऽवसज्य
पाणिं ययौ धृतराष्ट्रः प्रतीतः ॥ ९
तथा कृष्णा द्रौपदी यादवी च
बालापत्या चोत्तरा कौरवी च ।
चित्राङ्गदा याश्च काश्चित्स्त्रियोऽन्याः
सार्धं राज्ञा प्रस्थितास्ता वधूभिः ॥ १०
तासां नादो रुदतीनां तदासी-
द्राजन्दुःखात्कुररीणामिवोच्चैः ।
ततो निष्पेतुर्ब्राह्मणक्षत्रियाणां
विट्शूद्राणां चैव नार्यः समन्तात् ॥ ११
तन्निर्याणे दुःखितः पौरवर्गो
गजाह्वयेऽतीव बभूव राजन् ।
यथा पूर्वं गच्छतां पाण्डवानां
द्यूते राजन्कौरवाणां सभायाम् ॥ १२
या नापश्यंश्चन्द्रमा नैव सूर्यो
रामाः कदाचिदपि तस्मिन्नरेन्द्रे ।
महावनं गच्छति कौरवेन्द्रे
शोकेनार्ता राजमार्गं प्रपेदुः ॥ १३

इति श्रीमहाभारते आश्रमवासिकपर्वणि
एकविंशोऽध्यायः ॥ २१ ॥

२२

वैशंपायन उवाच ।

ततः प्रासादहर्म्येषु वसुधायां च पार्थिव ।
स्त्रीणां च पुरुषाणां च सुमहान्निस्वनोऽभवत् ॥ १
स राजा राजमार्गेण नृनारीसंकुलेन च ।
कथंचिन्निर्ययौ धीमान्वेपमानः कृताञ्जलिः ॥ २
स वर्धमानद्वारेण निर्ययौ गजसाह्वयात् ।
विसर्जयामास च तं जनौघं स मुहुर्मुहुः ॥ ३
वनं गन्तुं च विदुरो राज्ञा सह कृतक्षणः ।
संजयश्च महामात्रः सूतो गावल्गणिस्तथा ॥ ४
कृपं निवर्तयामास युयुत्सुं च महारथम् ।
धृतराष्ट्रो महीपालः परिदाय युधिष्ठिरे ॥ ५
निवृत्ते पौरवर्गे तु राजा सान्तःपुरस्तदा ।
धृतराष्ट्राभ्यनुज्ञातो निवर्तितुमियेष सः ॥ ६
सोऽब्रवीन्मातरं कुन्तीमुपेत्य भरतर्षभ ।
अहं राजानमन्विष्ये भवती विनिवर्तताम् ॥ ७
वधूपरिवृता राज्ञि नगरं गन्तुमर्हसि ।
राजा यात्वेष धर्मात्मा तपसे धृतनिश्चयः ॥ ८
इत्युक्ता धर्मराजेन बाष्पव्याकुललोचना ।
जगादैवं तदा कुन्ती गान्धारीं परिगृह्य ह ॥ ९
सहदेवे महाराज मा प्रमादं कृथाः क्वचित् ।

एष मामनुरक्तो हि राजंस्त्वां चैव नित्यदा ॥ १०
कर्णं स्मरेथाः सततं संग्रामेष्वपलायिनम् ।
अवकीर्णो हि स मया वीरो दुष्प्रज्ञया तदा॥११
आयसं हृदयं नूनं मन्दाया मम पुत्रक ।
यत्सूर्यजमपश्यन्त्याः शतधा न विदीर्यते ॥ १२
एवंगते तु किं शक्यं मया कर्तुमरिंदम ।
मम दोषोऽयमत्यर्थं ख्यापितो यन्न सूर्यजः ।
तन्निमित्तं महाबाहो दानं दद्यास्त्वमुत्तमम् ॥ १३
सदैव भ्रातृभिः सार्धमग्रजस्यारिमर्दन ।
द्रौपद्याश्च प्रिये नित्यं स्थातव्यमरिकर्शन ॥ १४
भीमसेनार्जुनौ चैव नकुलश्च कुरूद्वह ।
समाधेयास्त्वया वीर त्वय्यद्य कुलधूर्गता ॥ १५
श्वश्रूश्वशुरयोः पादाञ्शुश्रूषन्ती वने त्वहम् ।
गान्धारीसहिता वत्स्ये तापसी मलपङ्किनी ॥ १६
एवमुक्तः स धर्मात्मा भ्रातृभिः सहितो वशी ।
विषादमगमत्तीव्रं न च किंचिदुवाच ह ॥ १७
स मुहूर्तमिव ध्यात्वा धर्मपुत्रो युधिष्ठिरः ।
उवाच मातरं दीनश्चिन्ताशोकपरायणः ॥ १८
किमिदं ते व्यवसितं नैवं त्वं वक्तुमर्हसि ।
न त्वामभ्यनुजानामि प्रसादं कर्तुमर्हसि ॥ १९
व्यरोचयः पुरा ह्यस्मानुत्साह्य प्रियदर्शने ।
विदुराया वचोभिस्त्वमस्मान्न त्यक्तुमर्हसि ॥ २०
निहत्य पृथिवीपालान्राज्यं प्राप्तमिदं मया ।
तव प्रज्ञामुपश्रुत्य वासुदेवान्नरर्षभात् ॥ २१
क सा बुद्धिरियं चाद्य भवत्या या श्रुता मया ।
क्षत्रधर्मे स्थितिं ह्युक्त्वा तस्याश्चलितुमिच्छसि ॥२२
अस्मानुत्सृज्य राज्यं च स्नुषां चेमां यशस्विनीम् ।
कथं वत्स्यसि शून्येषु वनेष्वम्ब प्रसीद मे ॥ २३
इति बाष्पकलां वाचं कुन्ती पुत्रस्य शृण्वती ।
जगामैवाश्रुपूर्णाक्षी भीमस्तामिदमब्रवीत् ॥ २४
यदा राज्यमिदं कुन्ति भोक्तव्यं पुत्रनिर्जितम् ।
प्राप्तव्या राजधर्माश्च तदेयं ते कुतो मतिः ॥ २५
किं वयं कारिताः पूर्वं भवत्या पृथिवीक्षयम् ।
कस्य हेतोः परित्यज्य वनं गन्तुमभीप्ससि ॥ २६
वनाच्चापि किमानीता भवत्या बालका वयम् ।
दुःखशोकसमाविष्टौ माद्रीपुत्राविमौ तथा ॥ २७
प्रसीद मातर्मा गास्त्वं वनमद्य यशस्विनि ।
श्रियं यौधिष्ठिरीं तावद्भुङ्क्ष्व पार्थबलार्जिताम् ॥ २८
इति सा निश्चितैवाथ वनवासकृतक्षणा ।
लालप्यतां बहुविधं पुत्राणां नाकरोद्वचः ॥ २९
द्रौपदी चान्वयाच्छ्वश्रूं विषण्णवदना तदा ।
वनवासाय गच्छन्तीं रुदती भद्रया सह ॥ ३०
सा पुत्रान्रुदतः सर्वान्मुहुर्मुहुरवेक्षती ।
जगामैव महाप्राज्ञा वनाय कृतनिश्चया ॥ ३१
अन्वयुः पाण्डवास्तां तु सभृत्यान्तःपुरास्तदा ।
ततः प्रमृज्य साश्रूणि पुत्रान्वचनमब्रवीत् ॥ ३२

इति श्रीमहाभारते आश्रमवासिकपर्वणि
द्वाविंशोऽध्यायः ॥ २२ ॥

२३

कुन्त्युवाच ।

एवमेतन्महाबाहो यथा वदसि पाण्डव ।
कृतमुद्धर्षणं पूर्वं मया वः सीदतां नृप ॥ १
द्यूतापहृतराज्यानां पतितानां सुखादपि ।
ज्ञातिभिः परिभूतानां कृतमुद्धर्षणं मया ॥ २
कथं पाण्डोर्न नश्येत संततिः पुरुषर्षभाः ।
यशश्च वो न नश्येत इति चोद्धर्षणं कृतम् ॥ ३
यूयमिन्द्रसमाः सर्वे देवतुल्यपराक्रमाः ।
मा परेषां मुखप्रेक्षाः स्थेत्येवं तत्कृतं मया ॥ ४
कथं धर्मभृतां श्रेष्ठो राजा त्वं वासवोपमः ।
पुनर्वने न दुःखी स्या इति चोद्धर्षणं कृतम् ॥ ५

नागायुतसमप्राणः ख्यातविक्रमपौरुषः ।
नायं भीमोऽत्ययं गच्छेदिति चोद्धर्षणं कृतम् ॥ ६
भीमसेनादवरजस्तथायं वासवोपमः ।
विजयो नावसीदेत इति चोद्धर्षणं कृतम् ॥ ७
नकुलः सहदेवश्च तथेमौ गुरुवर्तिनौ ।
क्षुधा कथं न सीदेतामिति चोद्धर्षणं कृतम् ॥ ८
इयं च बृहती श्यामा श्रीमत्यायतलोचना ।
वृथा सभातले क्लिष्टा मा भूदिति च तत्कृतम् ॥ ९
प्रेक्षन्त्या मे तदा हीमां वेपन्तीं कदलीमिव ।
स्त्रीधर्मिणीमनिन्द्याङ्गीं तथा द्यूतपराजिताम् ॥ १०
दुःशासनो यदा मौर्ख्याद्दासीवत्पर्यकर्षत ।
तदैव विदितं मह्यं पराभूतमिदं कुलम् ॥ ११
विषण्णाः कुरवश्चैव तदा मे श्वशुरादयः ।
यदैषा नाथमिच्छन्ती व्यलपत्कुररी यथा ॥ १२
केशपक्षे परामृष्टा पापेन हतबुद्धिना ।
यदा दुःशासनेनैषा तदा मुह्याम्यहं नृप ॥ १३
युष्मत्तेजोविवृद्ध्यर्थं मया ह्युद्धर्षणं कृतम् ।
तदानीं विदुरावाक्यैरिति तद्वित्त पुत्रकाः ॥ १४
कथं न राजवंशोऽयं नश्येत्प्राप्य सुतान्मम ।
पाण्डोरिति मया पुत्र तस्मादुद्धर्षणं कृतम् ॥ १५
न तस्य पुत्रः पौत्रो वा कृत एव स पार्थिवः ।
लभते सुकृताँल्लोकान्यस्माद्वंशः प्रणश्यति ॥ १६
भुक्तं राज्यफलं पुत्रा भर्तुर्मे विपुलं पुरा ।
महादानानि दत्तानि पीतः सोमो यथाविधि ॥१७
साहं नात्मफलार्थं वै वासुदेवमचूचुदम् ।
विदुरायाः प्रलापैस्तैः प्लावनार्थं तु तत्कृतम् ॥१८
नाहं राज्यफलं पुत्र कामये पुत्रनिर्जितम् ।
पतिलोकानहं पुण्यान्कामये तपसा विभो ॥ १९
श्वश्रूश्वशुरयोः कृत्वा शुश्रूषां वनवासिनोः ।
तपसा शोषयिष्यामि युधिष्ठिर कलेवरम् ॥ २०
निवर्तस्व कुरुश्रेष्ठ भीमसेनादिभिः सह ।
धर्मे ते धीयतां बुद्धिर्मनस्ते महदस्तु च ॥ २१

इति श्रीमहाभारते आश्रमवासिकपर्वणि
त्रयोविंशोऽध्यायः ॥ २३ ॥

२४

वैशंपायन उवाच ।

कुन्त्यास्तु वचनं श्रुत्वा पाण्डवा राजसत्तम ।
व्रीडिताः संन्यवर्तन्त पाञ्चाल्या सहितानघाः ॥ १
ततः शब्दो महानासीत्सर्वेषामेव भारत ।
अन्तःपुराणां रुदतां दृष्ट्वा कुन्तीं तथागताम् ॥ २
प्रदक्षिणमथावृत्य राजानं पाण्डवास्तदा ।
अभिवाद्य न्यवर्तन्त पृथां तामनिवर्त्य वै ॥ ३
ततोऽब्रवीन्महाराजो धृतराष्ट्रोऽम्बिकासुतः ।
गान्धारीं विदुरं चैव समाभाष्य निगृह्य च ॥ ४
युधिष्ठिरस्य जननी देवी साधु निवर्त्यताम् ।
यथा युधिष्ठिरः प्राह तत्सर्वं सत्यमेव हि ॥ ५
पुत्रैश्वर्यं महदिदमपास्य च महाफलम् ।
का नु गच्छेद्वनं दुर्गं पुत्रानुत्सृज्य मूढवत् ॥ ६
राज्यस्थया तपस्तप्तं दानं दत्तं व्रतं कृतम् ।
अनया शक्यमद्येह श्रूयतां च वचो मम ॥ ७
गान्धारि परितुष्टोऽस्मि वध्वाः शुश्रूषणेन वै ।
तस्मात्त्वमेनां धर्मज्ञे समनुज्ञातुमर्हसि ॥ ८
इत्युक्ता सौबलेयी तु राज्ञा कुन्तीमुवाच ह ।
तत्सर्वं राजवचनं स्वं च वाक्यं विशेषवत् ॥ ९
न च सा वनवासाय देवीं कृतमतिं तदा ।
शक्नोत्युपावर्तयितुं कुन्तीं धर्मपरां सतीम् ॥ १०
तस्यास्तु तं स्थिरं ज्ञात्वा व्यवसायं कुरुस्त्रियः ।
निवृत्तांश्च कुरुश्रेष्ठान्दृष्ट्वा प्ररुरुदुस्तदा ॥ ११
उपावृत्तेषु पार्थेषु सर्वेष्वन्तःपुरेषु च ।
ययौ राजा महाप्राज्ञो धृतराष्ट्रो वनं तदा ॥ १२

पाण्डवा अपि दीनास्ते दुःखशोकपरायणाः ।
यानैः स्त्रीसहिताः सर्वे पुरं प्रविविशुस्तदा ॥ १३
तदहृष्टमिवाकूजं गतोत्सवमिवाभवत् ।
नगरं हास्तिनपुरं सस्त्रीवृद्धकुमारकम् ॥ १४
सर्वे चासन्निरुत्साहाः पाण्डवा जातमन्यवः ।
कुन्त्या हीनाः सुदुःखार्ता वत्सा इव विनाकृताः ॥
धृतराष्ट्रस्तु तेनाह्ना गत्वा सुमहदन्तरम् ।
ततो भागीरथीतीरे निवासमकरोत्प्रभुः ॥ १६
प्रादुष्कृता यथान्यायमग्नयो वेदपारगैः ।
व्यराजन्त द्विजश्रेष्ठैस्तत्र तत्र तपोधनैः ।
प्रादुष्कृताग्निरभवत्स च वृद्धो नराधिपः ॥ १७
स राजाग्नीन्पर्युपास्य हुत्वा च विधिवत्तदा ।
संध्यागतं सहस्रांशुमुपातिष्ठत भारत ॥ १८
विदुरः संजयश्चैव राज्ञः शय्यां कुशैस्ततः ।
चक्रतुः कुरुवीरस्य गान्धार्याश्चाविदूरतः ॥ १९
गान्धार्याः संनिकर्षे तु निषसाद कुशेष्वथ ।
युधिष्ठिरस्य जननी कुन्ती साधुव्रते स्थिता ॥ २०
तेषां संश्रवणे चापि निषेदुर्विदुरादयः ।
याजकाश्च यथोद्देशं द्विजा ये चानुयायिनः ॥२१
प्राधीतद्विजमुख्या सा संप्रज्वालितपावका ।
बभूव तेषां रजनी ब्राह्मीव प्रीतिवर्धनी ॥ २२
ततो रात्र्यां व्यतीतायां कृतपूर्वाह्णिकक्रियाः ।
हुत्वाग्निं विधिवत्सर्वे प्रययुस्ते यथाक्रमम् ।
उदङ्मुखा निरीक्षन्त उपवासपरायणाः ॥ २३
स तेषामतिदुःखोऽभून्निवासः प्रथमेऽहनि ।
शोचतां शोच्यमानानां पौरजानपदैर्जनैः ॥ २४

इति श्रीमहाभारते आश्रमवासिकपर्वणि
चतुर्विंशोऽध्यायः ॥ २४ ॥

२५

वैशंपायन उवाच ।

ततो भागीरथीतीरे मेध्ये पुण्यजनोचिते ।
निवासमकरोद्राजा विदुरस्य मते स्थितः ॥ १
तत्रैनं पर्युपातिष्ठन्ब्राह्मणा राष्ट्रवासिनः ।
क्षत्रविट्शूद्रसंघाश्च बहवो भरतर्षभ ॥ २
स तैः परिवृतो राजा कथाभिरभिनन्द्य तान् ।
अनुजज्ञे सशिष्यान्वै विधिवत्प्रतिपूज्य च ॥ ३
सायाह्ने स महीपालस्ततो गङ्गामुपेत्य ह ।
चकार विधिवच्छौचं गान्धारी च यशस्विनी ॥ ४
तथैवान्ये पृथक्सर्वे तीर्थेष्वाप्लुत्य भारत ।
चक्रुः सर्वाः क्रियास्तत्र पुरुषा विदुरादयः ॥ ५
कृतशौचं ततो वृद्धं श्वशुरं कुन्तिभोजजा ।
गान्धारीं च पृथा राजन्गङ्गातीरमुपानयत् ॥ ६
राज्ञस्तु याजकैस्तत्र कृतो वेदीपरिस्तरः ।
जुहाव तत्र वह्निं स नृपतिः सत्यसंगरः ॥ ७
ततो भागीरथीतीरात्कुरुक्षेत्रं जगाम सः ।
सानुगो नृपतिर्विद्वान्नियतः संयतेन्द्रियः ॥ ८
तत्राश्रमपदं धीमानभिगम्य स पार्थिवः ।
आससादाथ राजर्षिः शतयूपं मनीषिणम् ॥ ९
स हि राजा महानासीत्केकयेषु परंतपः ।
स पुत्रं मनुजैश्वर्ये निवेश्य वनमाविशत् ॥ १०
तेनासौ सहितो राजा ययौ व्यासाश्रमं तदा ।
तत्रैनं विधिवद्राजन्प्रत्यगृह्णात्कुरूद्वहम् ॥ ११
स दीक्षां तत्र संप्राप्य राजा कौरवनन्दनः ।
शतयूपाश्रमे तस्मिन्निवासमकरोत्तदा ॥ १२
तस्मै सर्वं विधिं राजन्राजाचख्यौ महामतिः ।
आरण्यकं महाराज व्यासस्यानुमते तदा ॥ १३
एवं स तपसा राजा धृतराष्ट्रो महामनाः ।
योजयामास चात्मानं तांश्चाप्यनुचरांस्तदा ॥ १४

तथैव देवी गान्धारी वल्कलाजिनवासिनी ।
कुन्त्या सह महाराज समानव्रतचारिणी ॥ १५
कर्मणा मनसा वाचा चक्षुषा चापि ते नृप ।
संनियम्येन्द्रियग्राममास्थिताः परमं तपः ॥ १६
त्वगस्थिभूतः परिशुष्कमांसो
जटाजिनी वल्कलसंवृताङ्गः ।
स पार्थिवस्तत्र तपश्चचार
महर्षिवत्तीव्रमपेतदोषः ॥ १७
क्षत्ता च धर्मार्थविदग्र्यबुद्धिः
ससंजयस्तं नृपतिं सदारम् ।
उपाचरद्घोरतपो जितात्मा
तदा कृशो वल्कलचीरवासाः ॥ १८

इति श्रीमहाभारते आश्रमवासिकपर्वणि
पञ्चविंशोऽध्यायः ॥ २५ ॥

२६

वैशंपायन उवाच ।

ततस्तस्मिन्मुनिश्रेष्ठा राजानं द्रष्टुमभ्ययुः ।
नारदः पर्वतश्चैव देवलश्च महातपाः ॥ १
द्वैपायनः सशिष्यश्च सिद्धाश्चान्ये मनीषिणः ।
शतयूपश्च राजर्षिर्वृद्धः परमधार्मिकः ॥ २
तेषां कुन्ती महाराज पूजां चक्रे यथाविधि ।
ते चापि तुतुषुस्तस्यास्तापसाः परिचर्यया ॥ ३
तत्र धर्म्याः कथास्तात चक्रुस्ते परमर्षयः ।
रमयन्तो महात्मानं धृतराष्ट्रं जनाधिपम् ॥ ४
कथान्तरे तु कस्मिंश्चिद्देवर्षिर्नारदस्तदा ।
कथामिमामकथयत्सर्वप्रत्यक्षदर्शिवान् ॥ ५
पुरा प्रजापतिसमो राजासीदकुतोभयः ।
सहस्रचित्य इत्युक्तः शतयूपपितामहः ॥ ६
स पुत्रे राज्यमासज्य ज्येष्ठे परमधार्मिके ।
सहस्रचित्यो धर्मात्मा प्रविवेश वनं नृपः ॥ ७
सगत्वा तपसः पारं दीप्तस्य स नराधिपः ।
पुरंदरस्य संस्थानं प्रतिपेदे महामनाः ॥ ८
दृष्टपूर्वः स बहुशो राजन्संपतता मया ।
महेन्द्रसदने राजा तपसा दग्धकिल्बिषः ॥ ९
तथा शैलालयो राजा भगदत्तपितामहः ।
तपोबलेनैव नृपो महेन्द्रसदनं गतः ॥ १०
तथा पृषध्रो नामासीद्राजा वज्रधरोपमः ।
स चापि तपसा लेभे नाकपृष्ठमितो नृपः ॥ ११
अस्मिन्नरण्ये नृपते मान्धातुरपि चात्मजः ।
पुरुकुत्सो नृपः सिद्धिं महतीं समवाप्तवान् ॥ १२
भार्या समभवद्यस्य नर्मदा सरितां वरा ।
सोऽस्मिन्नरण्ये नृपतिस्तपस्तप्त्वा दिवं गतः ॥ १३
शशलोमा च नामासीद्राजा परमधार्मिकः ।
स चाप्यस्मिन्वने तप्त्वा तपो दिवमवाप्तवान् ॥१४
द्वैपायनप्रसादाच्च त्वमपीदं तपोवनम् ।
राजन्नवाप्य दुष्प्रापां सिद्धिमग्र्यां गमिष्यसि ॥१५
त्वं चापि राजशार्दूल तपसोऽन्ते श्रिया वृतः ।
गान्धारीसहितो गन्ता गतिं तेषां महात्मनाम् ॥१६
पाण्डुः स्मरति नित्यं च बलहन्तुः समीपतः ।
त्वां सदैव महीपाल स त्वां श्रेयसि योक्ष्यति ॥१७
तव शुश्रूषया चैव गान्धार्याश्च यशस्विनी ।
भर्तुः सलोकतां कुन्ती गमिष्यति वधूस्तव ॥ १८
युधिष्ठिरस्य जननी स हि धर्मः सनातनः ।
वयमेतत्प्रपश्यामो नृपते दिव्यचक्षुषा ॥ १९
प्रवेक्ष्यति महात्मानं विदुरश्च युधिष्ठिरम् ।
संजयस्त्वदनुध्यानात्पूतः स्वर्गमवाप्स्यति ॥ २०
एतच्छ्रुत्वा कौरवेन्द्रो महात्मा
सहैव पत्न्या प्रीतिमान्प्रत्यगृह्णात् ।
विद्वान्वाक्यं नारदस्य प्रशस्य
चक्रे पूजां चातुलां नारदाय ॥ २१

तथा सर्वे नारदं विप्रसंघाः
संपूजयामासुरतीव राजन् ।
राज्ञः प्रीत्या धृतराष्ट्रस्य ते वै
पुनः पुनः समहृष्टास्तदानीम् ॥ २२

इति श्रीमहाभारते आश्रमवासिकपर्वणि
षड्विंशोऽध्यायः ॥ २६ ॥

२७

वैशंपायन उवाच ।

नारदस्य तु तद्वाक्यं प्रशशंसुर्द्विजोत्तमाः ।
शतयूपस्तु राजर्षिर्नारदं वाक्यमब्रवीत् ॥ १
अहो भगवता श्रद्धा कुरुराजस्य वर्धिता ।
सर्वस्य च जनस्यास्य मम चैव महाद्युते ॥ २
अस्ति काचिद्विवक्षा तु मम तां गदतः शृणु ।
धृतराष्ट्रं प्रति नृपं देवर्षे लोकपूजित ॥ ३
सर्ववृत्तान्ततत्त्वज्ञो भवान्दिव्येन चक्षुषा ।
युक्तः पश्यसि देवर्षे गतीर्वै विविधा नृणाम् ॥ ४
उक्तवान्नृपतीनां त्वं महेन्द्रस्य सलोकताम् ।
न त्वस्य नृपतेर्लोकाः कथितास्ते महामुने ॥ ५
स्थानमस्य क्षितिपतेः श्रोतुमिच्छाम्यहं विभो ।
त्वत्तः कीदृक्कदा वेति तन्ममाचक्ष्व पृच्छतः ॥ ६
इत्युक्तो नारदस्तेन वाक्यं सर्वमनोनुगम् ।
व्याजहार सतां मध्ये दिव्यदर्शी महातपाः ॥ ७
यदृच्छया शक्रसदो गत्वा शक्रं शचीपतिम् ।
दृष्टवानस्मि राजर्षे तत्र पाण्डुं नराधिपम् ॥ ८
तत्रेयं धृतराष्ट्रस्य कथा समभवन्नृप ।
तपसो दुश्चरस्यास्य यदयं तप्यते नृपः ॥ ९
तत्राहमिदमश्रौषं शक्रस्य वदतो नृप ।
वर्षाणि त्रीणि शिष्टानि राज्ञोऽस्य परमायुषः ॥१०
ततः कुबेरभवनं गान्धारीसहितो नृपः ।
विहर्ता धृतराष्ट्रोऽयं राजराजाभिपूजितः ॥ ११
कामगेन विमानेन दिव्याभरणभूषितः ।
ऋषिपुत्रो महाभागस्तपसा दग्धकिल्बिषः ॥ १२
संचरिष्यति लोकांश्च देवगन्धर्वरक्षसाम् ।
स्वच्छन्देनेति धर्मात्मा यन्मां त्वं परिपृच्छसि ॥
देवगुह्यमिदं प्रीत्या मया वः कथितं महत् ।
भवन्तो हि श्रुतधनास्तपसा दग्धकिल्बिषाः ॥ १४
इति ते तस्य तच्छ्रुत्वा देवर्षेर्मधुरं वचः ।
सर्वे सुमनसः प्रीता बभूवुः स च पार्थिवः ॥१५
एवं कथाभिरन्वास्य धृतराष्ट्रं मनीषिणः ।
विप्रजग्मुर्यथाकामं ते सिद्धगतिमास्थिताः ॥ १६

इति श्रीमहाभारते आश्रमवासिकपर्वणि
सप्तविंशोऽध्यायः ॥ २७ ॥

२८

वैशंपायन उवाच ।

वनं गते कौरवेन्द्रे दुःखशोकसमाहताः ।
बभूवुः पाण्डवा राजन्मातृशोकेन चार्दिताः ॥ १
तथा पौरजनः सर्वः शोचन्नास्ते जनाधिपम् ।
कुर्वाणाश्च कथास्तत्र ब्राह्मणा नृपतिं प्रति ॥ २
कथं नु राजा वृद्धः स वने वसति निर्जने ।
गान्धारी च महाभागा सा च कुन्ती पृथा कथम् ॥
सुखार्हः स हि राजर्षिर्न सुखं तन्महावनम् ।
किमवस्थः समासाद्य प्रज्ञाचक्षुर्हतात्मजः ॥ ४
सुदुष्करं कृतवती कुन्ती पुत्रानपश्यती ।
राज्यश्रियं परित्यज्य वनवासमरोचयत् ॥ ५
विदुरः किमवस्थश्च भ्रातुः शुश्रूषुरात्मवान् ।
स च गावल्गणिर्धीमान्भर्तृपिण्डानुपालकः ॥ ६
आकुमारं च पौरास्ते चिन्ताशोकसमाहताः ।
तत्र तत्र कथाश्चक्रुः समासाद्य परस्परम् ॥ ७
पाण्डवाश्चैव ते सर्वे भृशं शोकपरायणाः ।
शोचन्तो मातरं वृद्धामूषुर्नातिचिरं पुरे ॥ ८

तथैव पितरं वृद्धं हतपुत्रं जनेश्वरम् ।
गान्धारीं च महाभागां विदुरं च महामतिम् ॥ ९
नैषां बभूव संप्रीतिस्तान्विचिन्तयतां तदा ।
न राज्ये न च नारीषु न वेदाध्ययने तथा ॥ १०
परं निर्वेदमगमंश्चिन्तयन्तो नराधिपम् ।
तच्च ज्ञातिवधं घोरं संस्मरन्तः पुनः पुनः ॥ ११
अभिमन्योश्च बालस्य विनाशं रणमूर्धनि ।
कर्णस्य च महाबाहोः संग्रामेष्वपलायिनः ॥ १२
तथैव द्रौपदेयानामन्येषां सुहृदामपि ।
वधं संस्मृत्य ते वीरा नातिप्रमनसोऽभवन् ॥ १३
हतप्रवीरां पृथिवीं हतरत्नां च भारत ।
सदैव चिन्तयन्तस्ते न निद्रामुपलेभिरे ॥ १४
द्रौपदी हतपुत्रा च सुभद्रा चैव भामिनी ।
नातिप्रीतियुते देव्यौ तदास्तामप्रहृष्टवत् ॥ १५
वैराट्यास्तु सुतं दृष्ट्वा पितरं ते परिक्षितम् ।
धारयन्ति स्म ते प्राणांस्तव पूर्वपितामहाः ॥ १६

इति श्रीमहाभारते आश्रमवासिकपर्वणि
अष्टाविंशोऽध्यायः ॥ २८ ॥

२९

वैशंपायन उवाच ।

एवं ते पुरुषव्याघ्राः पाण्डवा मातृनन्दनाः ।
स्मरन्तो मातरं वीरा बभूवुर्भृशदुःखिताः ॥ १
ये राजकार्येषु पुरा व्यासक्ता नित्यशोऽभवन् ।
ते राजकार्याणि तदा नाकार्षुः सर्वतः पुरे ॥ २
आविष्टा इव शोकेन नाभ्यनन्दन्त किंचन ।
संभाष्यमाणा अपि ते न किंचित्प्रत्यपूजयन् ॥ ३
ते स्म वीरा दुराधर्षा गाम्भीर्ये सागरोपमाः ।
शोकोपहतविज्ञाना नष्टसंज्ञा इवाभवन् ॥ ४
अनुस्मरन्तो जननीं ततस्ते कुरुनन्दनाः ।
कथं नु वृद्धमिथुनं वहत्यद्य पृथा कृशा ॥ ५
कथं च स महीपालो हतपुत्रो निराश्रयः ।
पत्न्या सह वसत्येको वने श्वापदसेविते ॥ ६
सा च देवी महाभागा गान्धारी हतबान्धवा ।
पतिमन्धं कथं वृद्धमन्वेति विजने वने ॥ ७
एवं तेषां कथयतामौत्सुक्यमभवत्तदा ।
गमने चाभवद्बुद्धिर्धृतराष्ट्रदिदृक्षया ॥ ८
सहदेवस्तु राजानं प्रणिपत्येदमब्रवीत् ।
अहो मे भवतो दृष्टं हृदयं गमनं प्रति ॥ ९
न हि त्वा गौरवेणाहमशकं वक्तुमात्मना ।
गमनं प्रति राजेन्द्र तदिदं समुपस्थितम् ॥ १०
दिष्ट्या द्रक्ष्यामि तां कुन्तीं वर्तयन्तीं तपस्विनीम् ।
जटिलां तापसीं वृद्धां कुशकाशपरिक्षताम् ॥ ११
प्रासादहर्म्यसंवृद्धामत्यन्तसुखभागिनीम् ।
कदा नु जननीं श्रान्तां द्रक्ष्यामि भृशदुःखिताम् ॥
अनित्याः खलु मर्त्यानां गतयो भरतर्षभ ।
कुन्ती राजसुता यत्र वसत्यसुखिनी वने ॥ १३
सहदेववचः श्रुत्वा द्रौपदी योषितां वरा ।
उवाच देवी राजानमभिपूज्याभिनन्द्य च ॥ १४
कदा द्रक्ष्यामि तां देवीं यदि जीवति सा पृथा ।
जीवन्त्या ह्यद्य नः प्रीतिर्भविष्यति नराधिप ॥ १५
एषा तेऽस्तु मतिर्नित्यं धर्मे ते रमतां मनः ।
योऽद्य त्वमस्मान्राजेन्द्र श्रेयसा योजयिष्यसि ॥ १६
अग्रपादस्थितं चेमं विद्धि राजन्वधूजनम् ।
काङ्क्षन्तं दर्शनं कुन्त्या गान्धार्याः श्वशुरस्य च ॥
इत्युक्तः स नृपो देव्या पाञ्चाल्या भरतर्षभ ।
सेनाध्यक्षान्समानाय्य सर्वानिदमथाब्रवीत् ॥ १८
निर्यातयत मे सेनां प्रभूतरथकुञ्जराम् ।
द्रक्ष्यामि वनसंस्थं च धृतराष्ट्रं महीपतिम् ॥ १९
स्त्र्यध्यक्षांश्चाब्रवीद्राजा यानानि विविधानि मे ।
सज्जीक्रियन्तां सर्वाणि शिबिकाश्च सहस्रशः ॥ २०

शकटापणवेशाश्च कोशशिल्पिन एव च ।
निर्यान्तु कोशपालाश्च कुरुक्षेत्राश्रमं प्रति ॥ २१
यश्च पौरजनः कश्चिद्द्रष्टुमिच्छति पार्थिवम् ।
अनावृतः सुविहितः स च यातु सुरक्षितः ॥ २२
सूदाः पौरोगवाश्चैव सर्वं चैव महानसम् ।
विविधं भक्ष्यभोज्यं च शकटैरुह्यतां मम ॥ २३
प्रयाणं घुष्यतां चैव श्वोभूत इति मा चिरम् ।
क्रियन्तां पथि चाप्यद्य वेश्मानि विविधानि च ॥
एवमाज्ञाप्य राजा स भ्रातृभिः सह पाण्डवः ।
श्वोभूते निर्ययौ राजा सस्त्रीबालपुरस्कृतः ॥ २५
स बहिर्दिवसानेवं जनौघं परिपालयन् ।
न्यवसन्नृपतिः पञ्च ततोऽगच्छद्वनं प्रति ॥ २६

इति श्रीमहाभारते आश्रमवासिकपर्वणि
एकोनत्रिंशोऽध्यायः ॥ २९ ॥

३०

वैशंपायन उवाच ।

आज्ञापयामास ततः सेनां भरतसत्तमः ।
अर्जुनप्रमुखैर्गुप्तां लोकपालोपमैर्नरैः ॥ १
योगो योग इति प्रीत्या ततः शब्दो महानभूत् ।
क्रोशतां सादिनां तत्र युज्यतां युज्यतामिति ॥ २
केचिद्यानैर्नरा जग्मुः केचिदश्वैर्मनोजवैः ।
रथैश्च नगराकारैः प्रदीप्तज्वलनोपमैः ॥ ३
गजेन्द्रैश्च तथैवान्ये केचिदुष्ट्रैर्नराधिप ।
पदातिनस्तथैवान्ये नखरप्रासयोधिनः ॥ ४
पौरजानपदाश्चैव यानैर्बहुविधैस्तथा ।
अन्वयुः कुरुराजानं धृतराष्ट्रदिदृक्षया ॥ ५
स चापि राजवचनादाचार्यो गौतमः कृपः ।
सेनामादाय सेनानी प्रययावाश्रमं प्रति ॥ ६
ततो द्विजैर्वृतः श्रीमान्कुरुराजो युधिष्ठिरः ।
संस्तूयमानो बहुभिः सूतमागधबन्दिभिः ॥ ७
पाण्डुरेणातपत्रेण ध्रियमाणेन मूर्धनि ।
रथानीकेन महता निर्ययौ कुरुनन्दनः ॥ ८
गजैश्चाचलसंकाशैर्भीमकर्मा वृकोदरः ।
सज्जयन्त्रायुधोपेतैः प्रययौ मारुतात्मजः ॥ ९
माद्रीपुत्रावपि तथा हयारोहैः सुसंवृतौ ।
जग्मतुः प्रीतिजननौ संनद्धकवचध्वजौ ॥ १०
अर्जुनश्च महातेजा रथेनादित्यवर्चसा ।
वशी श्वेतैर्हयैर्दिव्यैर्युक्तेनान्वगमन्नृपम् ॥ ११
द्रौपदीप्रमुखाश्चापि स्त्रीसंघाः शिबिकागताः ।
स्त्र्यध्यक्षयुक्ताः प्रययुर्विसृजन्तोऽमितं वसु ॥ १२
समृद्धनरनागाश्वं वेणुवीणानिनादितम् ।
शुशुभे पाण्डवं सैन्यं तत्तदा भरतर्षभ ॥ १३
नदीतीरेषु रम्येषु सरस्सु च विशां पते ।
वासान्कृत्वा क्रमेणाथ जग्मुस्ते कुरुपुंगवाः ॥ १४
युयुत्सुश्च महातेजा धौम्यश्चैव पुरोहितः ।
युधिष्ठिरस्य वचनात्पुरगुप्तिं प्रचक्रतुः ॥ १५
ततो युधिष्ठिरो राजा कुरुक्षेत्रमवातरत् ।
क्रमेणोत्तीर्य यमुनां नदीं परमपावनीम् ॥ १६
स ददर्शाश्रमं दूराद्राजर्षेस्तस्य धीमतः ।
शतयूपस्य कौरव्य धृतराष्ट्रस्य चैव ह ॥ १७
ततः प्रमुदितः सर्वो जनस्तद्वनमञ्जसा ।
विवेश सुमहानादैरापूर्य भरतर्षभ ॥ १८

इति श्रीमहाभारते आश्रमवासिकपर्वणि
त्रिंशोऽध्यायः ॥ ३० ॥

३१

वैशंपायन उवाच ।

ततस्ते पाण्डवा दूरादवतीर्य पदातयः ।
अभिजग्मुर्नरपतेराश्रमं विनयानताः ॥ १
स च पौरजनः सर्वो ये च राष्ट्रनिवासिनः ।
स्त्रियश्च कुरुमुख्यानां पद्भिरेवान्वयुस्तदा ॥ २

आश्रमं ते ततो जग्मुर्धृतराष्ट्रस्य पाण्डवाः ।
शून्यं मृगगणाकीर्णं कदलीवनशोभितम् ॥ ३
ततस्तत्र समाजग्मुस्तापसा विविधव्रताः ।
पाण्डवानागतान्द्रष्टुं कौतूहलसमन्विताः ॥ ४
तानपृच्छत्ततो राजा क्वासौ कौरववंशभृत् ।
पिता ज्येष्ठो गतोऽस्माकमिति बाष्पपरिप्लुतः ॥ ५
तमूचुस्ते ततो वाक्यं यमुनामवगाहितुम् ।
पुष्पाणामुदकुम्भस्य चार्थे गत इति प्रभो ॥ ६
तैराख्यातेन मार्गेण ततस्ते प्रययुस्तदा ।
ददृशुश्चाविदूरे तान्सर्वानथ पदातयः ॥ ७
ततस्ते सत्वरा जग्मुः पितुर्दर्शनकाङ्क्षिणः ।
सहदेवस्तु वेगेन प्राधावद्येन सा पृथा ॥ ८
सस्वनं प्ररुदन्धीमान्मातुः पादावुपस्पृशन् ।
सा च बाष्पाविलमुखी प्रददर्श प्रियं सुतम् ॥ ९
बाहुभ्यां संपरिष्वज्य समुन्नाम्य च पुत्रकम् ।
गान्धार्याः कथयामास सहदेवमुपस्थितम् ॥ १०
अनन्तरं च राजानं भीमसेनमथार्जुनम् ।
नकुलं च पृथा दृष्ट्वा त्वरमाणोपचक्रमे ॥ ११
सा ह्यग्रेऽगच्छत तयोर्दंपत्योर्हतपुत्रयोः ।
कर्षन्ती तौ ततस्ते तां दृष्ट्वा संन्यपतन्भुवि ॥ १२
तान्राजा स्वरयोगेन स्पर्शेन च महामनाः ।
प्रत्यभिज्ञाय मेधावी समाश्वासयत प्रभुः ॥ १३
ततस्ते बाष्पमुत्सृज्य गान्धारीसहितं नृपम् ।
उपतस्थुर्महात्मानो मातरं च यथाविधि ॥ १४
सर्वेषां तोयकलशाञ्जगृहुस्ते स्वयं तदा ।
पाण्डवा लब्धसंज्ञास्ते मात्रा चाश्वासिताः पुनः ॥
ततो नार्यो नृसिंहानां स च योधजनस्तदा ।
पौरजानपदाश्चैव ददृशुस्तं नराधिपम् ॥ १६
निवेदयामास तदा जनं तं नामगोत्रतः ।
युधिष्ठिरो नरपतिः स चैनान्प्रत्यपूजयत् ॥ १७
स तैः परिवृतो मेने हर्षबाष्पाविलेक्षणः ।
राजात्मानं गृहगतं पुरेव गजसाह्वये ॥ १८
अभिवादितो वधूभिश्च कृष्णाद्याभिः स पार्थिवः ।
गान्धार्या सहितो धीमान्कुन्त्या च प्रत्यनन्दत ॥१९
ततश्चाश्रममागच्छत्सिद्धचारणसेवितम् ।
दिदृक्षुभिः समाकीर्णं नभस्तारागणैरिव ॥ २०

इति श्रीमहाभारते आश्रमवासिकपर्वणि
एकत्रिंशोऽध्यायः ॥ ३१ ॥

३२

वैशंपायन उवाच ।

स तैः सह नरव्याघ्रैर्भ्रातृभिर्भरतर्षभ ।
राजा रुचिरपद्माक्षैरासांचक्रे तदाश्रमे ॥ १
तापसैश्च महाभागैर्नानादेशसमागतैः ।
द्रष्टुं कुरुपतेः पुत्रान्पाण्डवान्पृथुवक्षसः ॥ २
तेऽब्रुवञ्ज्ञातुमिच्छामः कतमोऽत्र युधिष्ठिरः ।
भीमार्जुनयमाश्चैव द्रौपदी च यशस्विनी ॥ ३
तानाचख्यौ तदा सूतः सर्वान्नामाभिनामतः ।
संजयो द्रौपदीं चैव सर्वाश्चान्याः कुरुस्त्रियः ॥ ४

य एष जाम्बूनदशुद्धगौर-
तनुर्महासिंह इव प्रवृद्धः ।
प्रचण्डघोणः पृथुदीर्घनेत्र-
स्ताम्रायतास्यः कुरुराज एषः ॥ ५
अयं पुनर्मत्तगजेन्द्रगामी
प्रतप्तचामीकरशुद्धगौरः ।
पृथ्वायतांसः पृथुदीर्घबाहु-
र्वृकोदरः पश्यत पश्यतैनम् ॥ ६
यस्त्वेष पार्श्वेऽस्य महाधनुष्मा-
ञ्श्यामो युवा वारणयूथपाभः ।
सिंहोन्नतांसो गजखेलगामी
पद्मायताक्षोऽर्जुन एष वीरः ॥ ७

कुन्तीसमीपे पुरुषोत्तमौ तु
यमाविमौ विष्णुमहेन्द्रकल्पौ ।
मनुष्यलोके सकले समोऽस्ति
ययोर्न रूपे न बले न शीले ॥ ८
इयं पुनः पद्मदलायताक्षी
मध्यं वयः किंचिदिव स्पृशन्ती ।
नीलोत्पलाभा पुरदेवतेव
कृष्णा स्थिता मूर्तिमतीव लक्ष्मीः ॥ ९
अस्यास्तु पार्श्वे कनकोत्तमाभा
यैषा प्रभा मूर्तिमतीव गौरी ।
मध्ये स्थितैषा भगिनी द्विजाग्र्या
चक्रायुधस्याप्रतिमस्य तस्य ॥ १०
इयं स्वसा राजचमूपतेस्तु
प्रवृद्धनीलोत्पलदामवर्णा ।
पस्पर्ध कृष्णेन नृपः सदा यो
वृकोदरस्यैष परिग्रहोऽग्र्यः ॥ ११
इयं च राज्ञो मगधाधिपस्य
सुता जरासंध इति श्रुतस्य ।
यवीयसो माद्रवतीसुतस्य
भार्या मता चम्पकदामगौरी ॥ १२
इन्दीवरश्यामतनुः स्थिता तु
यैषापरासन्नमहीतले च ।
भार्या मता माद्रवतीसुतस्य
ज्येष्ठस्य सेयं कमलायताक्षी ॥ १३
इयं तु निष्टप्तसुवर्णगौरी
राज्ञो विराटस्य सुता सपुत्रा ।
भार्याभिमन्योर्निहतो रणे यो
द्रोणादिभिस्तैर्विरथो रथस्थैः ॥ १४
एतास्तु सीमन्तशिरोरुहा याः
शुक्लोत्तरीया नरराजपत्न्यः ।
राज्ञोऽस्य वृद्धस्य परंशताख्याः
स्नुषा विवीरा हतपुत्रनाथाः ॥ १५
एता यथामुख्यमुदाहृता वो
ब्राह्मण्यभावादृजुबुद्धिसत्त्वाः ।
सर्वा भवद्भिः परिपृच्छ्यमाना
नरेन्द्रपत्न्यः सुविशुद्धसत्त्वाः ॥ १६
एवं स राजा कुरुवृद्धवर्यः
समागतस्तैर्नरदेवपुत्रैः ।
पप्रच्छ सर्वान्कुशलं तदानीं
गतेषु सर्वेष्वथ तापसेषु ॥ १७
योधेषु चाप्याश्रममण्डलं तं
मुक्त्वा निविष्टेषु विमुच्य पत्रम् ।
स्त्रीवृद्धबाले च सुसंनिविष्टे
यथार्हतः कुशलं पर्यपृच्छत् ॥ १८

इति श्रीमहाभारते आश्रमवासिकपर्वणि
द्वात्रिंशोऽध्यायः ॥ ३२ ॥

३३

धृतराष्ट्र उवाच ।

युधिष्ठिर महाबाहो कच्चित्तात कुशल्यसि ।
सहितो भ्रातृभिः सर्वैः पौरजानपदैस्तथा ॥ १
ये च त्वामुपजीवन्ति कच्चित्तेऽपि निरामयाः ।
सचिवा भृत्यवर्गाश्च गुरवश्चैव ते विभो ॥ २
कच्चिद्वर्तसि पौराणीं वृत्तिं राजर्षिसेविताम् ।
कच्चिद्दायाननुच्छिद्य कोशस्तेऽभिप्रपूर्यते ॥ ३
अरिमध्यस्थमित्रेषु वर्तसे चानुरूपतः ।
ब्राह्मणानग्रहारैर्वा यथावदनुपश्यसि ॥ ४
कच्चित्ते परितुष्यन्ति शीलेन भरतर्षभ ।
शत्रवो गुरवः पौरा भृत्या वा स्वजनोऽपि वा ॥ ५
कच्चिद्यजसि राजेन्द्र श्रद्धावान्पितृदेवताः ।
अतिथींश्चान्नपानेन कच्चिदर्चसि भारत ॥ ६

कच्चिच्च विषये विप्राः स्वकर्मनिरतास्तव ।
क्षत्रिया वैश्यवर्गा वा शूद्रा वापि कुटुम्बिनः ॥ ७
कच्चित्स्त्रीबालवृद्धं ते न शोचति न याचते ।
जामयः पूजिताः कच्चित्तव गेहे नरर्षभ ॥ ८
कच्चिद्राजर्षिवंशोऽयं त्वामासाद्य महीपतिम् ।
यथोचितं महाराज यशसा नावसीदति ॥ ९

वैशंपायन उवाच ।

इत्येवंवादिनं तं स न्यायवित्प्रत्यभाषत ।
कुशलप्रश्नसंयुक्तं कुशलो वाक्यकर्मणि ॥ १०
कच्चित्ते वर्धते राजंस्तपो मन्दश्रमस्य ते ।
अपि मे जननी चेयं शुश्रूषुर्विगतक्लमा ।
अप्यस्याः सफलो राजन्वनवासो भविष्यति ॥११
इयं च माता ज्येष्ठा मे वीतवाताध्वकर्शिता ।
घोरेण तपसा युक्ता देवी कच्चिन्न शोचति ॥ १२
हतान्पुत्रान्महावीर्यान्क्षत्रधर्मपरायणान् ।
नापध्यायति वा कच्चिदस्मान्पापकृतः सदा ॥ १३
क्व चासौ विदुरो राजन्नैनं पश्यामहे वयम् ।
संजयः कुशली चायं कच्चिन्नु तपसि स्थितः ॥१४
इत्युक्तः प्रत्युवाचेदं धृतराष्ट्रो जनाधिपम् ।
कुशली विदुरः पुत्र तपो घोरं समास्थितः ॥ १५
वायुभक्षो निराहारः कृशो धमनिसंततः ।
कदाचिद्दृश्यते विप्रैः शून्येऽस्मिन्कानने क्वचित् ॥
इत्येवं वदतस्तस्य जटी वीटामुखः कृशः ।
दिग्वासा मलदिग्धाङ्गो वनरेणुसमुक्षितः ॥ १७
दूरादालक्षितः क्षत्ता तत्राख्यातो महीपतेः ।
निवर्तमानः सहसा जनं दृष्ट्वाश्रमं प्रति ॥ १८
तमन्वधावन्नृपतिरेक एव युधिष्ठिरः ।
प्रविशन्तं वनं घोरं लक्ष्यालक्ष्यं क्वचित्क्वचित् ॥१९
भो भो विदुर राजाहं दयितस्ते युधिष्ठिरः ।
इति ब्रुवन्नरपतिस्तं यत्नादभ्यधावत ॥ २०
ततो विविक्त एकान्ते तस्थौ बुद्धिमतां वरः ।
विदुरो वृक्षमाश्रित्य कंचित्तत्र वनान्तरे ॥ २१
तं राजा क्षीणभूयिष्ठमाकृतीमात्रसूचितम् ।
अभिजज्ञे महाबुद्धिं महाबुद्धिर्युधिष्ठिरः ॥ २२
युधिष्ठिरोऽहमस्मीति वाक्यमुक्त्वाग्रतः स्थितः ।
विदुरस्याश्रवे राजा स च प्रत्याह संज्ञया ॥ २३
ततः सोऽनिमिषो भूत्वा राजानं समुदैक्षत ।
संयोज्य विदुरस्तस्मिन्दृष्टिं दृष्ट्या समाहितः ॥२४
विवेश विदुरो धीमान्गात्रैर्गात्राणि चैव ह ।
प्राणान्प्राणेषु च दधदिन्द्रियाणीन्द्रियेषु च ॥ २५
स योगबलमास्थाय विवेश नृपतेस्तनुम् ।
विदुरो धर्मराजस्य तेजसा प्रज्वलन्निव ॥ २६
विदुरस्य शरीरं तत्तथैव स्तब्धलोचनम् ।
वृक्षाश्रितं तदा राजा ददर्श गतचेतनम् ॥ २७
बलवन्तं तथात्मानं मेने बहुगुणं तदा ।
धर्मराजो महातेजास्तच्च सस्मार पाण्डवः ॥ २८
पौराणमात्मनः सर्वं विद्यावान्स विशां पते ।
योगधर्मं महातेजा व्यासेन कथितं यथा ॥ २९
धर्मराजस्तु तत्रैनं संचस्कारयिषुस्तदा ।
दग्धुकामोऽभवद्विद्वानथ वै वागभाषत ॥ ३०
भो भो राजन्न दग्धव्यमेतद्विदुरसंज्ञकम् ।
कलेवरमिहैतत्ते धर्म एष सनातनः ॥ ३१
लोकाः संतानका नाम भविष्यन्त्यस्य पार्थिव ।
यतिधर्ममवाप्तोऽसौ नैव शोच्यः परंतप ॥ ३२
इत्युक्तो धर्मराजः स विनिवृत्य ततः पुनः ।
राज्ञो वैचित्रवीर्यस्य तत्सर्वं प्रत्यवेदयत् ॥ ३३
ततः स राजा द्युतिमान्स च सर्वो जनस्तदा ।
भीमसेनादयश्चैव परं विस्मयमागताः ॥ ३४
तच्छ्रुत्वा प्रीतिमान्राजा भूत्वा धर्मजमब्रवीत् ।
आपो मूलं फलं चैव ममेदं प्रतिगृह्यताम् ॥ ३५

यदन्नो हि नरो राजंस्तदन्नोऽस्यातिथिः स्मृतः ।
इत्युक्तः स तथेत्येव प्राह धर्मात्मजो नृपम् ।
फलं मूलं च बुभुजे राज्ञा दत्तं सहानुजः ॥ ३६
ततस्ते वृक्षमूलेषु कृतवासपरिग्रहाः ।
तां रात्रिं न्यवसन्सर्वे फलमूलजलाशनाः ॥ ३७

इति श्रीमहाभारते आश्रमवासिकपर्वणि
त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

३४

वैशंपायन उवाच ।

एवं सा रजनी तेषामाश्रमे पुण्यकर्मणाम् ।
शिवा नक्षत्रसंपन्ना सा व्यतीयाय भारत ॥ १
तत्र तत्र कथाश्चासंस्तेषां धर्मार्थलक्षणाः ।
विचित्रपदसंचारा नानाश्रुतिभिरन्विताः ॥ २
पाण्डवास्त्वभितो मातुर्धरण्यां सुषुपुस्तदा ।
उत्सृज्य सुमहार्हाणि शयनानि नराधिप ॥ ३
यदाहारोऽभवद्राजा धृतराष्ट्रो महामनाः ।
तदाहारा नृवीरास्ते न्यवसंस्तां निशां तदा ॥ ४
व्यतीतायां तु शर्वर्यां कृतपूर्वाह्णिकक्रियः ।
भ्रातृभिः सह कौन्तेयो ददर्शाश्रममण्डलम् ॥ ५
सान्तःपुरपरीवारः सभृत्यः सपुरोहितः ।
यथासुखं यथोद्देशं धृतराष्ट्राभ्यनुज्ञया ॥ ६
ददर्श तत्र वेदीश्च संप्रज्वलितपावकाः ।
कृताभिषेकैर्मुनिभिर्हुताग्निभिरुपस्थिताः ॥ ७
वानेयपुष्पनिकरैराज्यधूमोद्गमैरपि ।
ब्राह्मेण वपुषा युक्ता युक्ता मुनिगणैश्च ताः ॥ ८
मृगयूथैरनुद्विग्नैस्तत्र तत्र समाश्रितैः ।
अशङ्कितैः पक्षिगणैः प्रगीतैरिव च प्रभो ॥ ९
केकाभिर्नीलकण्ठानां दात्यूहानां च कूजितैः ।
कोकिलानां च कुहरैः शुभैः श्रुतिमनोहरैः ॥ १०
प्राधीतद्विजघोषैश्च क्वचित्क्वचिदलंकृतम् ।
फलमूलसमुद्राहैर्महद्भिश्चोपशोभितम् ॥ ११
ततः स राजा प्रददौ तापसार्थमुपाहृतान् ।
कलशान्काञ्चनान्राजंस्तथैवौदुम्बरानपि ॥ १२
अजिनानि प्रवेणीश्च स्रुक्स्रुवं च महीपतिः ।
कमण्डलूंस्तथा स्थालीः पिठराणि च भारत ॥ १३
भाजनानि च लौहानि पात्रीश्च विविधा नृप ।
यद्यदिच्छति यावच्च यदन्यदपि काङ्क्षितम् ॥ १४
एवं स राजा धर्मात्मा परीत्याश्रममण्डलम् ।
वसु विश्राण्य तत्सर्वं पुनरायान्महीपतिः ॥ १५
कृताह्णिकं च राजानं धृतराष्ट्रं मनीषिणम् ।
ददर्शासीनमव्यग्रं गान्धारीसहितं तदा ॥ १६
मातरं चाविदूरस्थां शिष्यवत्प्रणतां स्थिताम् ।
कुन्तीं ददर्श धर्मात्मा सततं धर्मचारिणीम् ॥ १७
स तमभ्यर्च्य राजानं नाम संश्राव्य चात्मनः ।
निषीदेत्यभ्यनुज्ञातो बृस्यामुपविवेश ह ॥ १८
भीमसेनादयश्चैव पाण्डवाः कौरवर्षभम् ।
अभिवाद्योपसंगृह्य निषेदुः पार्थिवाज्ञया ॥ १९
स तैः परिवृतो राजा शुशुभेऽतीव कौरवः ।
बिभ्रद्ब्राह्मीं श्रियं दीप्तां देवैरिव बृहस्पतिः ॥ २०
तथा तेषूपविष्टेषु समाजग्मुर्महर्षयः ।
शतयूपप्रभृतयः कुरुक्षेत्रनिवासिनः ॥ २१
व्यासश्च भगवान्विप्रो देवर्षिगणपूजितः ।
वृतः शिष्यैर्महातेजा दर्शयामास तं नृपम् ॥ २२
ततः स राजा कौरव्यः कुन्तीपुत्रश्च वीर्यवान् ।
भीमसेनादयश्चैव समुत्थायाभ्यपूजयन् ॥ २३
समागतस्ततो व्यासः शतयूपादिभिर्वृतः ।
धृतराष्ट्रं महीपालमास्यतामित्यभाषत ॥ २४
नवं तु विष्टरं कौश्यं कृष्णाजिनकुशोत्तरम् ।
प्रतिपेदे तदा व्यासस्तदर्थमुपकल्पितम् ॥ २५
ते च सर्वे द्विजश्रेष्ठा विष्टरेषु समन्ततः ।

द्वैपायनाभ्यनुज्ञाता निषेदुर्विपुलौजसः ॥ २६

इति श्रीमहाभारते आश्रमवासिकपर्वणि
चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

३५

वैशंपायन उवाच ।

तथा समुपविष्टेषु पाण्डवेषु महात्मसु ।
व्यासः सत्यवतीपुत्रः प्रोवाचामन्त्र्य पार्थिवम् ॥ १
धृतराष्ट्र महाबाहो कच्चित्ते वर्धते तपः ।
कच्चिन्मनस्ते प्रीणाति वनवासे नराधिप ॥ २
कच्चिद्धृदि न ते शोको राजन्पुत्रविनाशजः ।
कच्चिज्ज्ञानानि सर्वाणि प्रसन्नानि तवानघ ॥ ३
कच्चिद्बुद्धिं दृढां कृत्वा चरस्यारण्यकं विधिम् ।
कच्चिद्वधूश्च गान्धारी न शोकेनाभिभूयते ॥ ४
महाप्रज्ञा बुद्धिमती देवी धर्मार्थदर्शिनी ।
आगमापायतत्त्वज्ञा कच्चिदेषा न शोचति ॥ ५
कच्चित्कुन्ती च राजंस्त्वां शुश्रूषुरनहंकृता ।
या परित्यज्य राज्यं स्वं गुरुशुश्रूषणे रता ॥ ६
कच्चिद्धर्मसुतो राजा त्वया प्रीत्याभिनन्दितः ।
भीमार्जुनयमाश्चैव कच्चिदेतेऽपि सान्त्विताः ॥ ७
कच्चिन्नन्दसि दृष्ट्वैतान्कच्चित्ते निर्मलं मनः ।
कच्चिद्विशुद्धभावोऽसि जातज्ञानो नराधिप ॥ ८
एतद्धि त्रितयं श्रेष्ठं सर्वभूतेषु भारत ।
निर्वैरता महाराज सत्यमद्रोह एव च ॥ ९
कच्चित्ते नानुतापोऽस्ति वनवासेन भारत ।
स्वदते वन्यमन्नं वा मुनिवासांसि वा विभो ॥ १०
विदितं चापि मे राजन्विदुरस्य महात्मनः ।
गमनं विधिना येन धर्मस्य सुमहात्मनः ॥ ११
माण्डव्यशापाद्धि स वै धर्मो विदुरतां गतः ।
महाबुद्धिर्महायोगी महात्मा सुमहामनाः ॥ १२
बृहस्पतिर्वा देवेषु शुक्रो वाप्यसुरेषु यः ।
न तथा बुद्धिसंपन्नो यथा स पुरुषर्षभः ॥ १३
तपोबलव्ययं कृत्वा सुमहच्चिरसंभृतम् ।
माण्डव्येनर्षिणा धर्मो ह्यभिभूतः सनातनः ॥ १४
नियोगाद्ब्रह्मणः पूर्वं मया स्वेन बलेन च ।
वैचित्रवीर्यके क्षेत्रे जातः स सुमहामतिः ॥ १५
भ्राता तव महाराज देवदेवः सनातनः ।
धारणाच्छ्रेयसो ध्यानाद्यं धर्मं कवयो विदुः ॥१६
सत्येन संवर्धयति दमेन नियमेन च ।
अहिंसया च दानेन तपसा च सनातनः ॥ १७
येन योगबलाज्जातः कुरुराजो युधिष्ठिरः ।
धर्म इत्येष नृपते प्राज्ञेनामितबुद्धिना ॥ १८
यथा ह्यग्निर्यथा वायुर्यथापः पृथिवी यथा ।
यथाकाशं तथा धर्म इह चामुत्र च स्थितः ॥ १९
सर्वगश्चैव कौरव्य सर्वं व्याप्य चराचरम् ।
दृश्यते देवदेवः स सिद्धैर्निर्दग्धकिल्बिषैः ॥ २०
यो हि धर्मः स विदुरो विदुरो यः स पाण्डवः ।
स एष राजन्वश्यस्ते पाण्डवः प्रेष्यवत्स्थितः ॥२१
प्रविष्टः स स्वमात्मानं भ्राता ते बुद्धिसत्तमः ।
दिष्ट्या महात्मा कौन्तेयं महायोगबलान्वितः ॥२२
त्वां चापि श्रेयसा योक्ष्ये नचिराद्भरतर्षभ ।
संशयच्छेदनार्थं हि प्राप्तं मां विद्धि पुत्रक ॥ २३
न कृतं यत्पुरा कैश्चित्कर्म लोके महर्षिभिः ।
आश्चर्यभूतं तपसः फलं संदर्शयामि वः ॥ २४
किमिच्छसि महीपाल मत्तः प्राप्तुममानुषम् ।
द्रष्टुं स्प्रष्टुमथ श्रोतुं वद कर्तास्मि तत्तथा ॥ २५

इति श्रीमहाभारते आश्रमवासिकपर्वणि
पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

॥ समाप्तमाश्रमवासपर्व ॥

३६

जनमेजय उवाच ।

वनवासं गते विप्र धृतराष्ट्रे महीपतौ ।
सभार्ये नृपशार्दूले वध्वा कुन्त्या समन्विते ॥ १
विदुरे चापि संसिद्धे धर्मराजं व्यपाश्रिते ।
वसत्सु पाण्डुपुत्रेषु सर्वेष्वाश्रममण्डले ॥ २
यत्तदाश्चर्यमिति वै करिष्यामीत्युवाच ह ।
व्यासः परमतेजस्वी महर्षिस्तद्वदस्व मे ॥ ३
वनवासे च कौरव्यः कियन्तं कालमच्युतः ।
युधिष्ठिरो नरपतिर्न्यवसत्सजनो द्विज ॥ ४
किमाहाराश्च ते तत्र ससैन्या न्यवसन्प्रभो ।
सान्तःपुरा महात्मान इति तद्ब्रूहि मेऽनघ ॥ ५

वैशंपायन उवाच ।

तेऽनुज्ञातास्तदा राजन्कुरुराजेन पाण्डवाः ।
विविधान्यन्नपानानि विश्रम्यानुभवन्ति ते ॥ ६
मासमेकं विजह्रुस्ते ससैन्यान्तःपुरा वने ।
अथ तत्रागमद्व्यासो यथोक्तं ते मयानघ ॥ ७
तथा तु तेषां सर्वेषां कथाभिर्नृपसंनिधौ ।
व्यासमन्वासतां राजन्नाजग्मुर्मुनयोऽपरे ॥ ८
नारदः पर्वतश्चैव देवलश्च महातपाः ।
विश्वावसुस्तुम्बुरुश्च चित्रसेनश्च भारत ॥ ९
तेषामपि यथान्यायं पूजां चक्रे महामनाः ।
धृतराष्ट्राभ्यनुज्ञातः कुरुराजो युधिष्ठिरः ॥ १०
निषेदुस्ते ततः सर्वे पूजां प्राप्य युधिष्ठिरात् ।
आसनेष्वथ पुण्येषु बर्हिष्केषु वरेषु च ॥ ११
तेषु तत्रोपविष्टेषु स तु राजा महामतिः ।
पाण्डुपुत्रैः परिवृतो निषसाद कुरूद्वहः ॥ १२
गान्धारी चैव कुन्ती च द्रौपदी सात्वती तथा ।
स्त्रियश्चान्यास्तथान्याभिः सहोपविविशुस्ततः ॥ १३
तेषां तत्र कथा दिव्या धर्मिष्ठाश्चाभवन्नृप ।
ऋषीणां च पुराणानां देवासुरविमिश्रिताः ॥ १४
ततः कथान्ते व्यासस्तं प्रज्ञाचक्षुषमीश्वरम् ।
प्रोवाच वदतां श्रेष्ठः पुनरेव स तद्वचः ।
प्रीयमाणो महातेजाः सर्ववेदविदां वरः ॥ १५
विदितं मम राजेन्द्र यत्ते हृदि विवक्षितम् ।
दह्यमानस्य शोकेन तव पुत्रकृतेन वै ॥ १६
गान्धार्याश्चैव यद्दुःखं हृदि तिष्ठति पार्थिव ।
कुन्त्याश्च यन्महाराज द्रौपद्याश्च हृदि स्थितम् ॥
यच्च धारयते तीव्रं दुःखं पुत्रविनाशजम् ।
सुभद्रा कृष्णभगिनी तच्चापि विदितं मम ॥ १८
श्रुत्वा समागममिमं सर्वेषां वस्ततो नृप ।
संशयच्छेदनायाहं प्राप्तः कौरवनन्दन ॥ १९
इमे च देवगन्धर्वाः सर्वे चैव महर्षयः ।
पश्यन्तु तपसो वीर्यमद्य मे चिरसंभृतम् ॥ २०
तदुच्यतां महाबाहो कं कामं प्रदिशामि ते ।
प्रवणोऽस्मि वरं दातुं पश्य मे तपसो बलम् ॥२१
एवमुक्तः स राजेन्द्रो व्यासेनामितबुद्धिना ।
मुहूर्तमिव संचिन्त्य वचनायोपचक्रमे ॥ २२
धन्योऽस्म्यनुगृहीतोऽस्मि सफलं जीवितं च मे ।
यन्मे समागमोऽद्येह भवद्भिः सह साधुभिः ॥२३
अद्य चाप्यवगच्छामि गतिमिष्टामिहात्मनः ।
भवद्भिर्ब्रह्मकल्पैर्यत्समेतोऽहं तपोधनाः ॥ २४
दर्शनादेव भवतां पूतोऽहं नात्र संशयः ।
विद्यते न भयं चापि परलोकान्ममानघाः ॥ २५
किं तु तस्य सुदुर्बुद्धेर्मन्दस्यापनयैर्भृशम् ।
दूयते मे मनो नित्यं स्मरतः पुत्रगृद्धिनः ॥ २६
अपापाः पाण्डवा येन निकृताः पापबुद्धिना ।
घातिता पृथिवी चेयं सहसा सनरद्विपा ॥ २७
राजानश्च महात्मानो नानाजनपदेश्वराः ।
आगम्य मम पुत्रार्थे सर्वे मृत्युवशं गताः ॥ २८

ये ते पुत्रांश्च दारांश्च प्राणांश्च मनसः प्रियान् ।
परित्यज्य गताः शूराः प्रेतराजनिवेशनम् ॥ २९
का नु तेषां गतिर्ब्रह्मन्मित्रार्थे ये हता मृधे ।
तथैव पुत्रपौत्राणां मम ये निहता युधि ॥ ३०
दूयते मे मनोऽभीक्ष्णं घातयित्वा महाबलम् ।
भीष्मं शांतनवं वृद्धं द्रोणं च द्विजसत्तमम् ॥ ३१
मम पुत्रेण मूढेन पापेन सुहृदद्विषा ।
क्षयं नीतं कुलं दीप्तं पृथिवीराज्यमिच्छता ॥ ३२
एतत्सर्वमनुस्मृत्य दह्यमानो दिवानिशम् ।
न शान्तिमधिगच्छामि दुःखशोकसमाहतः ।
इति मे चिन्तयानस्य पितः शर्म न विद्यते ॥ ३३

इति श्रीमहाभारते आश्रमवासिकपर्वणि
षट्त्रिंशोऽध्यायः ॥ ३६ ॥

३७

वैशंपायन उवाच ।

तच्छ्रुत्वा विविधं तस्य राजर्षेः परिदेवितम् ।
पुनर्नवीकृतः शोको गान्धार्या जनमेजय ॥ १
कुन्त्या द्रुपदपुत्र्याश्च सुभद्रायास्तथैव च ।
तासां च वरनारीणां वधूनां कौरवस्य ह ॥ २
पुत्रशोकसमाविष्टा गान्धारी त्विदमब्रवीत् ।
श्वशुरं बद्धनयना देवी प्राञ्जलिरुत्थिता ॥ ३
षोडशेमानि वर्षाणि गतानि मुनिपुंगव ।
अस्य राज्ञो हतान्पुत्राञ्शोचतो न शमो विभो ॥४
पुत्रशोकसमाविष्टो निःश्वसन्ह्येष भूमिपः ।
न शेते वसतीः सर्वा धृतराष्ट्रो महामुने ॥ ५
लोकानन्यान्समर्थोऽसि स्रष्टुं सर्वांस्तपोबलात् ।
किमु लोकान्तरगतान्राज्ञो दर्शयितुं सुतान् ॥ ६
इयं च द्रौपदी कृष्णा हतज्ञातिसुता भृशम् ।
शोचत्यतीव साध्वी ते स्नुषाणां दयिता स्नुषा ॥ ७
तथा कृष्णस्य भगिनी सुभद्रा भद्रभाषिणी ।
सौभद्रवधसंतप्ता भृशं शोचति भामिनी ॥ ८
इयं च भूरिश्रवसो भार्या परमदुःखिता ।
भर्तृव्यसनशोकार्ता न शेते वसतीः प्रभो ॥ ९
यस्यास्तु श्वशुरो धीमान्बाह्लीकः स कुरूद्वहः ।
निहतः सोमदत्तश्च पित्रा सह महारणे ॥ १०
श्रीमच्चास्य महाबुद्धेः संग्रामेष्वपलायिनः ।
पुत्रस्य ते पुत्रशतं निहतं यद्रणाजिरे ॥ ११
तस्य भार्याशतमिदं पुत्रशोकसमाहतम् ।
पुनः पुनर्वर्धयानं शोकं राज्ञो ममैव च ।
तेनारम्भेण महता मामुपास्ते महामुने ॥ १२
ये च शूरा महात्मानः श्वशुरा मे महारथाः ।
सोमदत्तप्रभृतयः का नु तेषां गतिः प्रभो ॥ १३
तव प्रसादाद्भगवन्विशोकोऽयं महीपतिः ।
कुर्यात्कालमहं चैव कुन्ती चेयं वधूस्तव ॥ १४
इत्युक्तवत्यां गान्धार्यां कुन्ती व्रतकृशानना ।
प्रच्छन्नजातं पुत्रं तं सस्मारादित्यसंभवम् ॥ १५
तामृषिर्वरदो व्यासो दूरश्रवणदर्शनः ।
अपश्यद्दुःखितां देवीं मातरं सव्यसाचिनः ॥ १६
तामुवाच ततो व्यासो यत्ते कार्यं विवक्षितम् ।
तद्ब्रूहि त्वं महाप्राज्ञे यत्ते मनसि वर्तते ॥ १७
ततः कुन्ती श्वशुरयोः प्रणम्य शिरसा तदा ।
उवाच वाक्यं सव्रीडं विवृण्वाना पुरातनम् ॥ १८

इति श्रीमहाभारते आश्रमवासिकपर्वणि
सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

३८

कुन्त्युवाच ।

भगवञ्श्वशुरो मेऽसि दैवतस्यापि दैवतम् ।
स मे देवातिदेवस्त्वं शृणु सत्यां गिरं मम ॥ १
तपस्वी कोपनो विप्रो दुर्वासा नाम मे पितुः ।
भिक्षामुपागतो भोक्तुं तमहं पर्यतोषयम् ॥ २

शौचेन त्वागसस्त्यागैः शुद्धेन मनसा तथा ।
कोपस्थानेष्वपि महत्स्वकुप्यं न कदाचन ॥ ३
स मे वरमदात्प्रीतः कृतमित्यहमब्रुवम् ।
अवश्यं ते ग्रहीतव्यमिति मां सोऽब्रवीद्वचः ॥ ४
ततः शापभयाद्विप्रमवोचं पुनरेव तम् ।
एवमस्त्विति च प्राह पुनरेव स मां द्विजः ॥ ५
धर्मस्य जननी भद्रे भवित्री त्वं वरानने ।
वशे स्थास्यन्ति ते देवा यांस्त्वमावाहयिष्यसि ॥ ६
इत्युक्त्वान्तर्हितो विप्रस्ततोऽहं विस्मिताभवम् ।
न च सर्वास्ववस्थासु स्मृतिर्मे विप्रणश्यति ॥ ७
अथ हर्म्यतलस्थाहं रविमुद्यन्तमीक्षती ।
संस्मृत्य तदृषेर्वाक्यं स्पृहयन्ती दिवाकरम् ।
स्थिताहं बालभावेन तत्र दोषमबुध्यती ॥ ८
अथ देवः सहस्रांशुर्मत्समीपगतोऽभवत् ।
द्विधा कृत्वात्मनो देहं भूमौ च गगनेऽपि च ।
तताप लोकानेकेन द्वितीयेनागमच्च माम् ॥ ९
स मामुवाच वेपन्तीं वरं मत्तो वृणीष्व ह ।
गम्यतामिति तं चाहं प्रणम्य शिरसावदम् ॥ १०
स मामुवाच तिग्मांशुर्वृथाह्वानं न ते क्षमम् ।
धक्ष्यामि त्वां च विप्रं च येन दत्तो वरस्तव ॥ ११
तमहं रक्षती विप्रं शापादनपराधिनम् ।
पुत्रो मे त्वत्समो देव भवेदिति ततोऽब्रुवम् ॥ १२
ततो मां तेजसाविश्य मोहयित्वा च भानुमान् ।
उवाच भविता पुत्रस्तवेत्यभ्यगमद्दिवम् ॥ १३
ततोऽहमन्तर्भवने पितुर्वृत्तान्तरक्षिणी ।
गूढोत्पन्नं सुतं बालं जले कर्णमवासृजम् ॥ १४
नूनं तस्यैव देवस्य प्रसादात्पुनरेव तु ।
कन्याहमभवं विप्र यथा प्राह स मामृषिः ॥ १५
स मया मूढया पुत्रो ज्ञायमानोऽप्युपेक्षितः ।
तन्मां दहति विप्रर्षे यथा सुविदितं तव ॥ १६
यदि पापमपापं वा तदेतद्विवृतं मया ।
तन्मे भयं त्वं भगवन्व्यपनेतुमिहार्हसि ॥ १७
यच्चास्य राज्ञो विदितं हृदिस्थं भवतोऽनघ ।
तं चायं लभतां काममद्यैव मुनिसत्तम ॥ १८
इत्युक्तः प्रत्युवाचेदं व्यासो वेदविदां वरः ।
साधु सर्वमिदं तथ्यमेवमेव यथात्थ माम् ॥ १९
अपराधश्च ते नास्ति कन्याभावं गता ह्यसि ।
देवाश्चैश्वर्यवन्तो वै शरीराण्याविशन्ति वै ॥ २०
सन्ति देवनिकायाश्च संकल्पाज्जनयन्ति ये ।
वाचा दृष्ट्या तथा स्पर्शात्संघर्षेणेति पञ्चधा ॥ २१
मनुष्यधर्मो दैवेन धर्मेण न हि दुष्यते ।
इति कुन्ति व्यजानीहि व्येतु ते मानसो ज्वरः ॥
सर्वं बलवतां पथ्यं सर्वं बलवतां शुचि ।
सर्वं बलवतां धर्मः सर्वं बलवतां स्वकम् ॥ २३

इति श्रीमहाभारते आश्रमवासिकपर्वणि
अष्टात्रिंशोऽध्यायः ॥ ३८ ॥

३९

व्यास उवाच ।

भद्रे द्रक्ष्यसि गान्धारि पुत्रान्भ्रातॄन्सखींस्तथा ।
वधूश्च पतिभिः सार्धं निशि सुप्तोत्थिता इव ॥ १
कर्णं द्रक्ष्यति कुन्ती च सौभद्रं चापि यादवी ।
द्रौपदी पञ्च पुत्रांश्च पितॄन्भ्रातॄंस्तथैव च ॥ २
पूर्वमेवैष हृदये व्यवसायोऽभवन्मम ।
यथास्मि चोदितो राज्ञा भवत्या पृथयैव च ॥ ३
न ते शोच्या महात्मानः सर्व एव नरर्षभाः ।
क्षत्रधर्मपराः सन्तस्तथा हि निधनं गताः ॥ ४
भवितव्यमवश्यं तत्सुरकार्यमनिन्दिते ।
अवतेरुस्ततः सर्वे देवभागैर्महीतलम् ॥ ५
गन्धर्वाप्सरसश्चैव पिशाचा गुह्यराक्षसाः ।
तथा पुण्यजनाश्चैव सिद्धा देवर्षयोऽपि च ॥ ६

देवाश्च दानवाश्चैव तथा ब्रह्मर्षयोऽमलाः ।
त एते निधनं प्राप्ताः कुरुक्षेत्रे रणाजिरे ॥ ७
गन्धर्वराजो यो धीमान्धृतराष्ट्र इति श्रुतः ।
स एव मानुषे लोके धृतराष्ट्रः पतिस्तव ॥ ८
पाण्डुं मरुद्गणं विद्धि विशिष्टतममच्युतम् ।
धर्मस्यांशोऽभवत्क्षत्ता राजा चायं युधिष्ठिरः ॥ ९
कलिं दुर्योधनं विद्धि शकुनिं द्वापरं तथा ।
दुःशासनादीन्विद्धि त्वं राक्षसाञ्शुभदर्शने ॥ १०
मरुद्गणाद्भीमसेनं बलवन्तमरिंदमम् ।
विद्धि च त्वं नरमृषिमिमं पार्थं धनंजयम् ।
नारायणं हृषीकेशमश्विनौ यमजावुभौ ॥ ११
द्विधा कृत्वात्मनो देहमादित्यं तपतां वरम् ।
लोकांश्च तापयानं वै विद्धि कर्णं च शोभने ।
यश्च वैरार्थमुद्भूतः संघर्षजननस्तथा ॥ १२
यश्च पाण्डवदायादो हतः षड्भिर्महारथैः ।
स सोम इह सौभद्रो योगादेवाभवद्द्विधा ॥ १३
द्रौपद्या सह संभूतं धृष्टद्युम्नं च पावकात् ।
अग्नेर्भागं शुभं विद्धि राक्षसं तु शिखण्डिनम् ॥ १४
द्रोणं बृहस्पतेर्भागं विद्धि द्रौणिं च रुद्रजम् ।
भीष्मं च विद्धि गाङ्गेयं वसुं मानुषतां गतम् ॥ १५
एवमेते महाप्राज्ञे देवा मानुष्यमेत्य हि ।
ततः पुनर्गताः स्वर्गं कृते कर्मणि शोभने ॥ १६
यच्च वो हृदि सर्वेषां दुःखमेतच्चिरं स्थितम् ।
तदद्य व्यपनेष्यामि परलोककृताद्भयात् ॥ १७
सर्वे भवन्तो गच्छन्तु नदीं भागीरथीं प्रति ।
तत्र द्रक्ष्यथ तान्सर्वान्ये हतास्मिन्रणाजिरे ॥ १८

वैशंपायन उवाच ।

इति व्यासस्य वचनं श्रुत्वा सर्वो जनस्तदा ।
महता सिंहनादेन गङ्गामभिमुखो ययौ ॥ १९
धृतराष्ट्रश्च सामात्यः प्रययौ सह पाण्डवैः ।
सहितो मुनिशार्दूलैर्गन्धर्वैश्च समागतैः ॥ २०
ततो गङ्गां समासाद्य क्रमेण स जनार्णवः ।
निवासमकरोत्सर्वो यथाप्रीति यथासुखम् ॥ २१
राजा च पाण्डवैः सार्धमिष्टे देशे सहानुगः ।
निवासमकरोद्धीमान्सस्त्रीवृद्धपुरःसरः ॥ २२
जगाम तदहश्चापि तेषां वर्षशतं यथा ।
निशां प्रतीक्षमाणानां दिदृक्षूणां मृतान्नृपान् ॥ २३
अथ पुण्यं गिरिवरमस्तमभ्यगमद्रविः ।
ततः कृताभिषेकास्ते नैशं कर्म समाचरन् ॥ २४

इति श्रीमहाभारते आश्रमवासिकपर्वणि
एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

४०

वैशंपायन उवाच ।

ततो निशायां प्राप्तायां कृतसायाह्निकक्रियाः ।
व्यासमभ्यगमन्सर्वे ये तत्रासन्समागताः ॥ १
धृतराष्ट्रस्तु धर्मात्मा पाण्डवैः सहितस्तदा ।
शुचिरेकमनाः सार्धमृषिभिस्तैरुपाविशत् ॥ २
गान्धार्या सह नार्यस्तु सहिताः समुपाविशन् ।
पौरजानपदश्चापि जनः सर्वो यथावयः ॥ ३
ततो व्यासो महातेजाः पुण्यं भागीरथीजलम् ।
अवगाह्याजुहावाथ सर्वाँल्लोकान्महामुनिः ॥ ४
पाण्डवानां च ये योधाः कौरवाणां च सर्वशः ।
राजानश्च महाभागा नानादेशनिवासिनः ॥ ५
ततः सुतुमुलः शब्दो जलान्तर्जनमेजय ।
प्रादुरासीद्यथा पूर्वं कुरुपाण्डवसेनयोः ॥ ६
ततस्ते पार्थिवाः सर्वे भीष्मद्रोणपुरोगमाः ।
ससैन्याः सलिलात्तस्मात्समुत्तस्थुः सहस्रशः ॥ ७
विराटद्रुपदौ चोभौ सपुत्रौ सहसैनिकौ ।
द्रौपदेयाश्च सौभद्रो राक्षसश्च घटोत्कचः ॥ ८
कर्णदुर्योधनौ चोभौ शकुनिश्च महारथः ।

दुःशासनादयश्चैव धार्तराष्ट्रा महारथाः ॥ ९
जारासंधिर्भगदत्तो जलसंधश्च पार्थिवः ।
भूरिश्रवाः शलः शल्यो वृषसेनश्च सानुजः ॥ १०
लक्ष्मणो राजपुत्रश्च धृष्टद्युम्नस्य चात्मजाः ।
शिखण्डिपुत्राः सर्वे च धृष्टकेतुश्च सानुजः ॥ ११
अचलो वृषकश्चैव राक्षसश्चाप्यलायुधः ।
बाह्लीकः सोमदत्तश्च चेकितानश्च पार्थिवः ॥ १२
एते चान्ये च बहवो बहुत्वाद्ये न कीर्तिताः ।
सर्वे भासुरदेहास्ते समुत्तस्थुर्जलात्ततः ॥ १३
यस्य वीरस्य यो वेषो यो ध्वजो यच्च वाहनम् ।
तेन तेन व्यदृश्यन्त समुपेता नराधिपाः ॥ १४
दिव्याम्बरधराः सर्वे सर्वे भ्राजिष्णुकुण्डलाः ।
निर्वैरा निरहंकारा विगतक्रोधमन्यवः ॥ १५
गन्धर्वैरुपगीयन्तः स्तूयमानाश्च बन्दिभिः ।
दिव्यमाल्याम्बरधरा वृताश्चाप्सरसां गणैः ॥ १६
धृतराष्ट्रस्य च तदा दिव्यं चक्षुर्नराधिप ।
मुनिः सत्यवतीपुत्रः प्रीतः प्रादात्तपोबलात् ॥ १७
दिव्यज्ञानबलोपेता गान्धारी च यशस्विनी ।
ददर्श पुत्रांस्तान्सर्वान्ये चान्येऽपि रणे हताः ॥१८
तदद्भुतमचिन्त्यं च सुमहद्रोमहर्षणम् ।
विस्मितः स जनः सर्वो ददर्शानिमिषेक्षणः ॥१९
तदुत्सवमदोदग्रं हृष्टनारीनराकुलम् ।
ददृशे बलमायान्तं चित्रं पटगतं यथा ॥ २०
धृतराष्ट्रस्तु तान्सर्वान्पश्यन्दिव्येन चक्षुषा ।
मुमुदे भरतश्रेष्ठ प्रसादात्तस्य वै मुनेः ॥ २१

इति श्रीमहाभारते आश्रमवासिकपर्वणि
चत्वारिंशोऽध्यायः ॥ ४० ॥

४१

वैशंपायन उवाच ।

ततस्ते भरतश्रेष्ठाः समाजग्मुः परस्परम् ।
विगतक्रोधमात्सर्याः सर्वे विगतकल्मषाः ॥ १
विधिं परममास्थाय ब्रह्मर्षिविहितं शुभम् ।
संप्रीतमनसः सर्वे देवलोक इवामराः ॥ २
पुत्रः पित्रा च मात्रा च भार्या च पतिना सह ।
भ्राता भ्रात्रा सखा चैव सख्या राजन्समागताः ॥
पाण्डवास्तु महेष्वासं कर्णं सौभद्रमेव च ।
संप्रहर्षात्समाजग्मुर्द्रौपदेयांश्च सर्वशः ॥ ४
ततस्ते प्रीयमाणा वै कर्णेन सह पाण्डवाः ।
समेत्य पृथिवीपालाः सौहृदेऽवस्थिताभवन् ॥ ५
ऋषिप्रसादात्तेऽन्ये च क्षत्रिया नष्टमन्यवः ।
असौहृदं परित्यज्य सौहृदे पर्यवस्थिताः ॥ ६
एवं समागताः सर्वे गुरुभिर्बान्धवैस्तथा ।
पुत्रैश्च पुरुषव्याघ्राः कुरवोऽन्ये च मानवाः ॥ ७
तां रात्रिमेकां कृत्स्नां ते विहृत्य प्रीतमानसाः ।
मेनिरे परितोषेण नृपाः स्वर्गसदो यथा ॥ ८
नात्र शोको भयं त्रासो नारतिर्नायशोऽभवत् ।
परस्परं समागम्य योधानां भरतर्षभ ॥ ९
समागतास्ताः पितृभिर्भ्रातृभिः पतिभिः सुतैः ।
मुदं परमिकां प्राप्य नार्यो दुःखमथात्यजन् ॥ १०
एकां रात्रिं विहृत्यैवं ते वीरास्ताश्च योषितः ।
आमन्त्र्यान्योन्यमाश्लिष्य ततो जग्मुर्यथागतम् ॥ ११
ततो विसर्जयामास लोकांस्तान्मुनिपुंगवः ।
क्षणेनान्तर्हिताश्चैव प्रेक्षतामेव तेऽभवन् ॥ १२
अवगाह्य महात्मानः पुण्यां त्रिपथगां नदीम् ।
सरथाः सध्वजाश्चैव स्वानि स्थानानि भेजिरे ॥१३
देवलोकं ययुः केचित्केचिद्ब्रह्मसदस्तथा ।
केचिच्च वारुणं लोकं केचित्कौबेरमाप्नुवन् ॥ १४
तथा वैवस्वतं लोकं केचिच्चैवाप्नुवन्नृपाः ।
राक्षसानां पिशाचानां केचिच्चाप्युत्तरान्कुरून् ॥१५
विचित्रगतयः सर्वे या अवाप्यामरैः सह ।

आजग्मुस्ते महात्मानः सवाहाः सपदानुगाः ॥१६
गतेषु तेषु सर्वेषु सलिलस्थो महामुनिः ।
धर्मशीलो महातेजाः कुरूणां हितकृत्सदा ।
ततः प्रोवाच ताः सर्वाः क्षत्रिया निहतेश्वराः॥१७
या याः पतिकृताँल्लोकानिच्छन्ति परमस्त्रियः ।
ता जाह्नवीजलं क्षिप्रमवगाहन्त्वतन्द्रिताः ॥ १८
ततस्तस्य वचः श्रुत्वा श्रद्दधाना वराङ्गनाः ।
श्वशुरं समनुज्ञाप्य विविशुर्जाह्नवीजलम् ॥ १९
विमुक्ता मानुषैर्देहैस्ततस्ता भर्तृभिः सह ।
समाजग्मुस्तदा साध्व्यः सर्वा एव विशां पते ॥
एवं क्रमेण सर्वास्ताः शीलवत्यः कुलस्त्रियः ।
प्रविश्य तोयं निर्मुक्ता जग्मुर्भर्तृसलोकताम् ॥ २१
दिव्यरूपसमायुक्ता दिव्याभरणभूषिताः ।
दिव्यमाल्याम्बरधरा यथासां पतयस्तथा ॥ २२
ताः शीलसत्त्वसंपन्ना वितमस्का गतक्लमाः ।
सर्वाः सर्वगुणैर्युक्ताः स्वं स्वं स्थानं प्रपेदिरे ॥२३
यस्य यस्य च यः कामस्तस्मिन्कालेऽभवत्तदा ।
तं तं विसृष्टवान्व्यासो वरदो धर्मवत्सलः ॥ २४
तच्छ्रुत्वा नरदेवानां पुनरागमनं नराः ।
जहृषुर्मुदिताश्चासन्नन्यदेहगता अपि ॥ २५
प्रियैः समागमं तेषां य इमं शृणुयान्नरः ।
प्रियाणि लभते नित्यमिह च प्रेत्य चैव ह ॥ २६
इष्टबान्धवसंयोगमनायासमनामयम् ।
य इमं श्रावयेद्विद्वान्संसिद्धिं प्राप्नुयात्पराम् ॥ २७
स्वाध्याययुक्ताः पुरुषाः क्रियायुक्ताश्च भारत ।
अध्यात्मयोगयुक्ताश्च धृतिमन्तश्च मानवाः ।
श्रुत्वा पर्व त्विदं नित्यमवाप्स्यन्ति परां गतिम् ॥२८

इति श्रीमहाभारते आश्रमवासिकपर्वणि
एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

४२

सूत उवाच ।

एतच्छ्रुत्वा नृपो विद्वान्हृष्टोऽभूज्जनमेजयः ।
पितामहानां सर्वेषां गमनागमनं तदा ॥ १
अब्रवीच्च मुदा युक्तः पुनरागमनं प्रति ।
कथं नु त्यक्तदेहानां पुनस्तद्रूपदर्शनम् ॥ २
इत्युक्तः स द्विजश्रेष्ठो व्यासशिष्यः प्रतापवान् ।
प्रोवाच वदतां श्रेष्ठस्तं नृपं जनमेजयम् ॥ ३
अविप्रणाशः सर्वेषां कर्मणामिति निश्चयः ।
कर्मजानि शरीराणि तथैवाकृतयो नृप ॥ ४
महाभूतानि नित्यानि भूताधिपतिसंश्रयात् ।
तेषां च नित्यसंवासो न विनाशो वियुज्यताम् ॥ ५
अनाशाय कृतं कर्म तस्य चेष्टः फलागमः ।
आत्मा चैभिः समायुक्तः सुखदुःखमुपाश्नुते ॥ ६
अविनाशी तथा नित्यं क्षेत्रज्ञ इति निश्चयः ।
भूतानामात्मभावो यो ध्रुवोऽसौ संविजानताम् ॥७
यावन्न क्षीयते कर्म तावदस्य स्वरूपता ।
संक्षीणकर्मा पुरुषो रूपान्यत्वं नियच्छति ॥ ८
नानाभावास्तथैकत्वं शरीरं प्राप्य संहताः ।
भवन्ति ते तथा नित्याः पृथग्भावं विजानताम् ॥ ९
अश्वमेधे श्रुतिश्चेयमश्वसंज्ञपनं प्रति ।
लोकान्तरगता नित्यं प्राणा नित्या हि वाजिनः ॥१०
अहं हितं वदाम्येतत्प्रियं चेत्तव पार्थिव ।
देवयाना हि पन्थानः श्रुतास्ते यज्ञसंस्तरे ॥ ११
सुकृतो यत्र ते यज्ञस्तत्र देवा हितास्तव ।
यदा समन्विता देवाः पशूनां गमनेश्वराः ।
गतिमन्तश्च तेनेष्ट्वा नान्ये नित्या भवन्ति ते ॥ १२
नित्येऽस्मिन्पञ्चके वर्गे नित्ये चात्मनि यो नरः ।
अस्य नानासमायोगं यः पश्यति वृथामतिः ॥१३
वियोगे शोचतेऽत्यर्थं स बाल इति मे मतिः ।

वियोगे दोषदर्शी यः संयोगमिह वर्जयेत् ।
असङ्गे संगमो नास्ति दुःखं भुवि वियोगजम् ॥ १४
परापरज्ञस्तु नरो नाभिमानादुदीरितः ।
अपरज्ञः परां बुद्धिं स्पृष्ट्वा मोहाद्विमुच्यते ॥ १५
अदर्शनादापतितः पुनश्चादर्शनं गतः ।
नाहं तं वेद्मि नासौ मां न च मेऽस्ति विरागता ॥
येन येन शरीरेण करोत्ययमनीश्वरः ।
तेन तेन शरीरेण तदवश्यमुपाश्नुते ।
मानसं मनसाप्नोति शारीरं च शरीरवान् ॥ १७

इति श्रीमहाभारते आश्रमवासिकपर्वणि
द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

४३

वैशंपायन उवाच ।

अदृष्ट्वा तु नृपः पुत्रान्दर्शनं प्रतिलब्धवान् ।
ऋषिप्रसात्पुत्राणां स्वरूपाणां कुरूद्वह ॥ १
स राजा राजधर्मांश्च ब्रह्मोपनिषदं तथा ।
अवाप्तवान्नरश्रेष्ठो बुद्धिनिश्चयमेव च ॥ २
विदुरश्च महाप्राज्ञो ययौ सिद्धिं तपोबलात् ।
धृतराष्ट्रः समासाद्य व्यासं चापि तपस्विनम् ॥ ३

जनमेजय उवाच ।

ममापि वरदो व्यासो दर्शयेत्पितरं यदि ।
तद्रूपवेषवयसं श्रद्दध्यां सर्वमेव ते ॥ ४
प्रियं मे स्यात्कृतार्थश्च स्यामहं कृतनिश्चयः ।
प्रसादादृषिपुत्रस्य मम कामः समृध्यताम् ॥ ५

सूत उवाच ।

इत्युक्तवचने तस्मिन्नृपे व्यासः प्रतापवान् ।
प्रसादमकरोद्धीमानानयच्च परिक्षितम् ॥ ६
ततस्तद्रूपवयसमागतं नृपतिं दिवः ।
श्रीमन्तं पितरं राजा ददर्श जनमेजयः ॥ ७
शमीकं च महात्मानं पुत्रं तं चास्य शृङ्गिणम् ।
अमात्या ये बभूवुश्च राज्ञस्तांश्च ददर्श ह ॥ ८
ततः सोऽवभृथे राजा मुदितो जनमेजयः ।
पितरं स्नापयामास स्वयं सस्नौ च पार्थिवः ॥ ९
स्नात्वा च भरतश्रेष्ठः सोऽऽस्तीकमिदमब्रवीत् ।
यायावरकुलोत्पन्नं जरत्कारुसुतं तदा ॥ १०
आस्तीक विविधाश्चर्यो यज्ञोऽयमिति मे मतिः ।
यदद्यायं पिता प्राप्तो मम शोकप्रणाशनः ॥ ११

आस्तीक उवाच ।

ऋषिर्द्वैपायनो यत्र पुराणस्तपसो निधिः ।
यज्ञे कुरुकुलश्रेष्ठ तस्य लोकावुभौ जितौ ॥ १२
श्रुतं विचित्रमाख्यानं त्वया पाण्डवनन्दन ।
सर्पाश्च भस्मसान्नीता गताश्च पदवीं पितुः ॥ १३
कथंचित्तक्षको मुक्तः सत्यत्वात्तव पार्थिव ।
ऋषयः पूजिताः सर्वे गतिं दृष्ट्वा महात्मनः ॥ १४
प्राप्तः सुविपुलो धर्मः श्रुत्वा पापविनाशनम् ।
विमुक्तो हृदयग्रन्थिरुदारजनदर्शनात् ॥ १५
ये च पक्षधरा धर्मे सद्वृत्तरुचयश्च ये ।
यान्दृष्ट्वा हीयते पापं तेभ्यः कार्या नमस्क्रियाः ॥

सूत उवाच ।

एतच्छ्रुत्वा द्विजश्रेष्ठात्स राजा जनमेजयः ।
पूजयामास तमृषिमनुमान्य पुनः पुनः ॥ १७
पप्रच्छ तमृषिं चापि वैशंपायनमच्युतम् ।
कथावशेषं धर्मज्ञो वनवासस्य सत्तम ॥ १८

इति श्रीमहाभारते आश्रमवासिकपर्वणि
त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

४४

जनमेजय उवाच ।

दृष्ट्वा पुत्रांस्तथा पौत्रान्सानुबन्धाञ्जनाधिपः ।

धृतराष्ट्रः किमकरोद्राजा चैव युधिष्ठिरः ॥ १

वैशंपायन उवाच ।

तद्दृष्ट्वा महदाश्चर्यं पुत्राणां दर्शनं पुनः ।
वीतशोकः स राजर्षिः पुनराश्रममागमत् ॥ २
इतरस्तु जनः सर्वस्ते चैव परमर्षयः ।
प्रतिजग्मुर्यथाकामं धृतराष्ट्राभ्यनुज्ञया ॥ ३
पाण्डवास्तु महात्मानो लघुभूयिष्ठसैनिकाः ।
अनुजग्मुर्महात्मानं सदारं तं महीपतिम् ॥ ४
तमाश्रमगतं धीमान्ब्रह्मर्षिर्लोकपूजितः ।
मुनिः सत्यवतीपुत्रो धृतराष्ट्रमभाषत ॥ ५
धृतराष्ट्र महाबाहो शृणु कौरवनन्दन ।
श्रुतं ते ज्ञानवृद्धानामृषीणां पुण्यकर्मणाम् ॥ ६
ऋद्धाभिजनवृद्धानां वेदवेदाङ्गवेदिनाम् ।
धर्मज्ञानां पुराणानां वदतां विविधाः कथाः ॥ ७
मा स्म शोके मनः कार्षीर्दिष्टेन व्यथते बुधः ।
श्रुतं देवरहस्यं ते नारदाद्देवदर्शनात् ॥ ८
गतास्ते क्षत्रधर्मेण शस्त्रपूतां गतिं शुभाम् ।
यथा दृष्टास्त्वया पुत्रा यथाकामविहारिणः ॥ ९
युधिष्ठिरस्त्वयं धीमान्भवन्तमनुरुध्यते ।
सहितो भ्रातृभिः सर्वैः सदारः ससुहृज्जनः ॥१०
विसर्जयैनं यात्वेष स्वराज्यमनुशासताम् ।
मासः समधिको ह्येषामतीतो वसतां वने ॥ ११
एतद्धि नित्यं यत्नेन पदं रक्ष्यं परंतप ।
बहुप्रत्यर्थिकं ह्येतद्राज्यं नाम नराधिप ॥ १२
इत्युक्तः कौरवो राजा व्यासेनामितबुद्धिना ।
युधिष्ठिरमथाहूय वाग्मी वचनमब्रवीत् ॥ १३
अजातशत्रो भद्रं ते शृणु मे भ्रातृभिः सह ।
त्वत्प्रसादान्महीपाल शोको नास्मान्प्रबाधते ॥ १४
रमे चाहं त्वया पुत्र पुरेव गजसाह्वये ।
नाथेनानुगतो विद्वन्प्रियेषु परिवर्तिना ॥ १५
प्राप्तं पुत्रफलं त्वत्तः प्रीतिर्मे विपुला त्वयि ।
न मे मन्युर्महाबाहो गम्यतां पुत्र मा चिरम् ॥ १६
भवन्तं चेह संप्रेक्ष्य तपो मे परिहीयते ।
तपोयुक्तं शरीरं च त्वां दृष्ट्वा धारितं पुनः ॥ १७
मातरौ ते तथैवेमे शीर्णपर्णकृताशने ।
मम तुल्यव्रते पुत्र नचिरं वर्तयिष्यतः ॥ १८
दुर्योधनप्रभृतयो दृष्टा लोकान्तरं गताः ।
व्यासस्य तपसो वीर्याद्भवतश्च समागमात् ॥ १९
प्रयोजनं चिरं वृत्तं जीवितस्य च मेऽनघ ।
उग्रं तपः समास्थास्ये त्वमनुज्ञातुमर्हसि ॥ २०
त्वय्यद्य पिण्डः कीर्तिश्च कुलं चेदं प्रतिष्ठितम् ।
श्वो वाद्य वा महाबाहो गम्यतां पुत्र मा चिरम् ॥२१
राजनीतिः सुबहुशः श्रुता ते भरतर्षभ ।
संदेष्टव्यं न पश्यामि कृतमेतावता विभो ॥ २२
इत्युक्तवचनं तात नृपो राजानमब्रवीत् ।
न मामर्हसि धर्मज्ञ परित्यक्तुमनागसम् ॥ २३
कामं गच्छन्तु मे सर्वे भ्रातरोऽनुचरास्तथा ।
भवन्तमहमन्विष्ये मातरौ च यतव्रते ॥ २४
तमुवाचाथ गान्धारी मैवं पुत्र शृणुष्व मे ।
त्वय्यधीनं कुरुकुलं पिण्डश्च श्वशुरस्य मे ॥ २५
गम्यतां पुत्र पर्याप्तमेतावत्पूजिता वयम् ।
राजा यदाह तत्कार्यं त्वया पुत्र पितुर्वचः ॥ २६
इत्युक्तः स तु गान्धार्या कुन्तीमिदमुवाच ह ।
स्नेहबाष्पाकुले नेत्रे प्रमृज्य रुदतीं वचः ॥ २७
विसर्जयति मां राजा गान्धारी च यशस्विनी ।
भवत्यां बद्धचित्तस्तु कथं यास्यामि दुःखितः ॥ २८
न चोत्सहे तपोविघ्नं कर्तुं ते धर्मचारिणि ।
तपसो हि परं नास्ति तपसा विन्दते महत् ॥ २९
ममापि न तथा राज्ञि राज्ये बुद्धिर्यथा पुरा ।
तपस्येवानुरक्तं मे मनः सर्वात्मना तथा ॥ ३०

शून्येयं च मही सर्वा न मे प्रीतिकरी शुभे ।
बान्धवा नः परिक्षीणा बलं नो न यथा पुरा ॥ ३१
पाञ्चालाः सुभृशं क्षीणाः कन्यामात्रावशेषिताः ।
न तेषां कुलकर्तारं कंचित्पश्याम्यहं शुभे ॥ ३२
सर्वे हि भस्मसान्नीता द्रोणेनैकेन संयुगे ।
अवशेषास्तु निहता द्रोणपुत्रेण वै निशि ॥ ३३
चेदयश्चैव मत्स्याश्च दृष्टपूर्वास्तथैव नः ।
केवलं वृष्णिचक्रं तु वासुदेवपरिग्रहात् ।
यं दृष्ट्वा स्थातुमिच्छामि धर्मार्थं नान्यहेतुकम् ॥ ३४
शिवेन पश्य नः सर्वान्दुर्लभं दर्शनं तव ।
भविष्यत्यम्ब राजा हि तीव्रमारप्स्यते तपः ॥ ३५
एतच्छ्रुत्वा महाबाहुः सहदेवो युधां पतिः ।
युधिष्ठिरमुवाचेदं बाष्पव्याकुललोचनः ॥ ३६
नोत्सहेऽहं परित्यक्तुं मातरं पार्थिवर्षभ ।
प्रतियातु भवान्क्षिप्रं तपस्तप्स्याम्यहं वने ॥ ३७
इहैव शोषयिष्यामि तपसाहं कलेवरम् ।
पादशुश्रूषणे युक्तो राज्ञो मात्रोस्तथानयोः ॥ ३८
तमुवाच ततः कुन्ती परिष्वज्य महाभुजम् ।
गम्यतां पुत्र मैवं त्वं वोचः कुरु वचो मम ॥ ३९
आगमा वः शिवाः सन्तु स्वस्था भवत पुत्रकाः ।
उपरोधो भवेदेवमस्माकं तपसः कृते ॥ ४०
त्वत्स्नेहपाशबद्धा च हीयेयं तपसः परात् ।
तस्मात्पुत्रक गच्छ त्वं शिष्टमल्पं हि नः प्रभो ॥ ४१
एवं संस्तम्भितं वाक्यैः कुन्त्या बहुविधैर्मनः ।
सहदेवस्य राजेन्द्र राज्ञश्चैव विशेषतः ॥ ४२
ते मात्रा समनुज्ञाता राज्ञा च कुरुपुंगवाः ।
अभिवाद्य कुरुश्रेष्ठमामन्त्रयितुमारभन् ॥ ४३
राजन्प्रतिगमिष्यामः शिवेन प्रतिनन्दिताः ।
अनुज्ञातास्त्वया राजन्गमिष्यामो विकल्मषाः ॥ ४४
एवमुक्तः स राजर्षिर्धर्मराज्ञा महात्मना ।
अनुजज्ञे जयाशीर्भिरभिनन्द्य युधिष्ठिरम् ॥ ४५
भीमं च बलिनां श्रेष्ठं सान्त्वयामास पार्थिवः ।
स चास्य सम्यङ्मेधावी प्रत्यपद्यत वीर्यवान् ॥ ४६
अर्जुनं च समाश्लिष्य यमौ च पुरुषर्षभौ ।
अनुजज्ञे स कौरव्यः परिष्वज्याभिनन्द्य च ॥ ४७
गान्धार्या चाभ्यनुज्ञाताः कृतपादाभिवन्दनाः ।
जनन्या समुपाघ्राताः परिष्वक्ताश्च ते नृपम् ।
चक्रुः प्रदक्षिणं सर्वे वत्सा इव निवारणे ॥ ४८
पुनः पुनर्निरीक्षन्तः प्रजग्मुस्ते प्रदक्षिणम् ।
तथैव द्रौपदी साध्वी सर्वाः कौरवयोषितः ॥ ४९
न्यायतः श्वशुरे वृत्तिं प्रयुज्य प्रययुस्ततः ।
श्वश्रूभ्यां समनुज्ञाताः परिष्वज्याभिनन्दिताः ।
संदिष्टाश्चेतिकर्तव्यं प्रययुर्भर्तृभिः सह ॥ ५०
ततः प्रजज्ञे निनदः सूतानां युज्यतामिति ।
उष्ट्राणां क्रोशतां चैव हयानां हेषतामपि ॥ ५१
ततो युधिष्ठिरो राजा सदारः सहसैनिकः ।
नगरं हास्तिनपुरं पुनरायात्सबान्धवः ॥ ५२

इति श्रीमहाभारते आश्रमवासिकपर्वणि
चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

॥ समाप्तं पुत्रदर्शनपर्व ॥

४५

वैशंपायन उवाच ।

द्विवर्षोपनिवृत्तेषु पाण्डवेषु यदृच्छया ।
देवर्षिर्नारदो राजन्नाजगाम युधिष्ठिरम् ॥ १
तमभ्यर्च्य महाबाहुः कुरुराजो युधिष्ठिरः ।
आसीनं परिविश्वस्तं प्रोवाच वदतां वरः ॥ २
चिरस्य खलु पश्यामि भगवन्तमुपस्थितम् ।
कच्चित्ते कुशलं विप्र शुभं वा प्रत्युपस्थितम् ॥ ३
के देशाः परिदृष्टास्ते किं च कार्यं करोमि ते ।

तद्ब्रूहि द्विजमुख्य त्वमस्माकं च प्रियोऽतिथिः ॥४

नारद उवाच ।

चिरदृष्टोऽसि मे राजन्नागतोऽस्मि तपोवनात् ।
परिदृष्टानि तीर्थानि गङ्गा चैव मया नृप ॥ ५

युधिष्ठिर उवाच ।

वदन्ति पुरुषा मेऽद्य गङ्गातीरनिवासिनः ।
धृतराष्ट्रं महात्मानमास्थितं परमं तपः ॥ ६
अपि दृष्टस्त्वया तत्र कुशली स कुरूद्वहः ।
गान्धारी च पृथा चैव सूतपुत्रश्च संजयः ॥ ७
कथं च वर्तते चाद्य पिता मम स पार्थिवः ।
श्रोतुमिच्छामि भगवन्यदि दृष्टस्त्वया नृपः ॥ ८

नारद उवाच ।

स्थिरीभूय महाराज शृणु सर्वं यथातथम् ।
यथा श्रुतं च दृष्टं च मया तस्मिंस्तपोवने ॥ ९
वनवासनिवृत्तेषु भवत्सु कुरुनन्दन ।
कुरुक्षेत्रात्पिता तुभ्यं गङ्गाद्वारं ययौ नृप ॥ १०
गान्धार्या सहितो धीमान्वध्वा कुन्त्या समन्वितः ।
संजयेन च सूतेन साग्निहोत्रः सयाजकः ॥ ११
आतस्थे स तपस्तीव्रं पिता तव तपोधनः ।
वीटां मुखे समाधाय वायुभक्षोऽभवन्मुनिः ॥ १२
वने स मुनिभिः सर्वैः पूज्यमानो महातपाः ।
त्वगस्थिमात्रशेषः स षण्मासानभवन्नृपः ॥ १३
गान्धारी तु जलाहारा कुन्ती मासोपवासिनी ।
संजयः षष्ठभक्तेन वर्तयामास भारत ॥ १४
अग्नींस्तु याजकास्तत्र जुहुवुर्विधिवत्प्रभो ।
दृश्यतोऽदृश्यतश्चैव वने तस्मिन्नृपस्य ह ॥ १५
अनिकेतोऽथ राजा स बभूव वनगोचरः ।
ते चापि सहिते देव्यौ संजयश्च तमन्वयुः ॥ १६
संजयो नृपतेर्नेता समेषु विषमेषु च ।
गान्धार्यास्तु पृथा राजंश्चक्षुरासीदनिन्दिता ॥ १७
ततः कदाचिद्गङ्गायाः कच्छे स नृपसत्तमः ।
गङ्गायामाप्लुतो धीमानाश्रमाभिमुखोऽभवत् ॥ १८
अथ वायुः समुद्भूतो दावाग्निरभवन्महान् ।
ददाह तद्वनं सर्वं परिगृह्य समन्ततः ॥ १९
दह्यत्सु मृगयूथेषु द्विजिह्वेषु समन्ततः ।
वराहाणां च यूथेषु संश्रयत्सु जलाशयान् ॥ २०
समाविद्धे वने तस्मिन्प्राप्ते व्यसन उत्तमे ।
निराहारतया राजा मन्दप्राणविचेष्टितः ।
असमर्थोऽपसरणे सुकृशौ मातरौ च ते ॥ २१
ततः स नृपतिर्दृष्ट्वा वह्निमायान्तमन्तिकात् ।
इदमाह ततः सूतं संजयं पृथिवीपते ॥ २२
गच्छ संजय यत्राग्निर्न त्वां दहति कर्हिचित् ।
वयमत्राग्निना युक्ता गमिष्यामः परां गतिम् ॥२३
तमुवाच किलोद्विग्नः संजयो वदतां वरः ।
राजन्मृत्युरनिष्टोऽयं भविता ते वृथाग्निना ॥ २४
न चोपायं प्रपश्यामि मोक्षणे जातवेदसः ।
यदत्रानन्तरं कार्यं तद्भवान्वक्तुमर्हति ॥ २५
इत्युक्तः संजयेनेदं पुनराह स पार्थिवः ।
नैष मृत्युरनिष्टो नो निःसृतानां गृहात्स्वयम् ॥ २६
जलमग्निस्तथा वायुरथ वापि विकर्शनम् ।
तापसानां प्रशस्यन्ते गच्छ संजय माचिरम् ॥ २७
इत्युक्त्वा संजयं राजा समाधाय मनस्तदा ।
प्राङ्मुखः सह गान्धार्या कुन्त्या चोपाविशत्तदा ॥
संजयस्तं तथा दृष्ट्वा प्रदक्षिणमथाकरोत् ।
उवाच चैनं मेधावी युङ्क्ष्वात्मानमिति प्रभो ॥ २९
ऋषिपुत्रो मनीषी स राजा चक्रेऽस्य तद्वचः ।
संनिरुध्येन्द्रियग्राममासीत्काष्ठोपमस्तदा ॥ ३०
गान्धारी च महाभागा जननी च पृथा तव ।
दावाग्निना समायुक्ते स च राजा पिता तव ॥३१

संजयस्तु महामात्रस्तस्माद्दावादमुच्यत ।
गङ्गाकूले मया दृष्टस्तापसैः परिवारितः ॥ ३२
स तानामन्त्र्य तेजस्वी निवेद्यैतच्च सर्वशः ।
प्रययौ संजयः सूतो हिमवन्तं महीधरम् ॥ ३३
एवं स निधनं प्राप्तः कुरुराजो महामनाः ।
गान्धारी च पृथा चैव जनन्यौ ते नराधिप ॥ ३४
यदृच्छयानुव्रजता मया राज्ञः कलेवरम् ।
तयोश्च देव्योरुभयोर्दृष्टानि भरतर्षभ ॥ ३५
ततस्तपोवने तस्मिन्समाजग्मुस्तपोधनाः ।
श्रुत्वा राज्ञस्तथा निष्ठां न त्वशोचन्गतिं च ते ॥ ३६
तत्राश्रौषमहं सर्वमेतत्पुरुषसत्तम ।
यथा च नृपतिर्दग्धो देव्यौ ते चेति पाण्डव ॥ ३७
न शोचितव्यं राजेन्द्र स्वन्तः स पृथिवीपतिः ।
प्राप्तवानग्निसंयोगं गान्धारी जननी च ते ॥ ३८

वैशंपायन उवाच ।

एतच्छ्रुत्वा तु सर्वेषां पाण्डवानां महात्मनाम् ।
निर्याणं धृतराष्ट्रस्य शोकः समभवन्महान् ॥ ३९
अन्तःपुराणां च तदा महानार्तस्वरोऽभवत् ।
पौराणां च महाराज श्रुत्वा राज्ञस्तदा गतिम् ॥ ४०
अहो धिगिति राजा तु विक्रुश्य भृशदुःखितः ।
ऊर्ध्वबाहुः स्मरन्मातुः प्ररुरोद युधिष्ठिरः ।
भीमसेनपुरोगाश्च भ्रातरः सर्व एव ते ॥ ४१
अन्तःपुरेषु च तदा सुमहान्रुदितस्वनः ।
प्रादुरासीन्महाराज पृथां श्रुत्वा तथागताम् ॥ ४२
तं च वृद्धं तथा दग्धं हतपुत्रं नराधिपम् ।
अन्वशोचन्त ते सर्वे गान्धारीं च तपस्विनीम् ॥ ४३
तस्मिन्नुपरते शब्दे मुहूर्तादिव भारत ।
निगृह्य बाष्पं धैर्येण धर्मराजोऽब्रवीदिदम् ॥ ४४

इति श्रीमहाभारते आश्रमवासिकपर्वणि
पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

४६

युधिष्ठिर उवाच ।

तथा महात्मनस्तस्य तपस्युग्रे च वर्ततः ।
अनाथस्येव निधनं तिष्ठत्स्वस्मासु बन्धुषु ॥ १
दुर्विज्ञेया हि गतयः पुरुषाणां मता मम ।
यत्र वैचित्रवीर्योऽसौ दग्ध एवं दवाग्निना ॥ २
यस्य पुत्रशतं श्रीमदभवद्बाहुशालिनः ।
नागायुतबलो राजा स दग्धो हि दवाग्निना ॥ ३
यं पुरा पर्यवीजन्त तालवृन्तैर्वरस्त्रियः ।
तं गृध्राः पर्यवीजन्त दावाग्निपरिकालितम् ॥ ४
सूतमागधसंघैश्च शयानो यः प्रबोध्यते ।
धरण्यां स नृपः शेते पापस्य मम कर्मभिः ॥ ५
न तु शोचामि गान्धारीं हतपुत्रां यशस्विनीम् ।
पतिलोकमनुप्राप्तां तथा भर्तृव्रते स्थिताम् ॥ ६
पृथामेव तु शोचामि या पुत्रैश्वर्यमृद्धिमत् ।
उत्सृज्य सुमहद्दीप्तं वनवासमरोचयत् ॥ ७
धिग्राज्यमिदमस्माकं धिग्बलं धिक्पराक्रमम् ।
क्षत्रधर्मं च धिग्यस्मान्मृता जीवामहे वयम् ॥ ८
सुसूक्ष्मा किल कालस्य गतिर्द्विजवरोत्तम ।
यत्समुत्सृज्य राज्यं सा वनवासमरोचयत् ॥ ९
युधिष्ठिरस्य जननी भीमस्य विजयस्य च ।
अनाथवत्कथं दग्धा इति मुह्यामि चिन्तयन् ॥ १०
वृथा संतोषितो वह्निः खाण्डवे सव्यसाचिना ।
उपकारमजानन्स कृतघ्न इति मे मतिः ॥ ११
यत्रादहत्स भगवान्मातरं सव्यसाचिनः ।
कृत्वा यो ब्राह्मणच्छद्म भिक्षार्थी समुपागतः ।
धिगग्निं धिक्च पार्थस्य विश्रुतां सत्यसंधताम् ॥ १२
इदं कष्टतरं चान्यद्भगवन्प्रतिभाति मे ।
वृथाग्निना समायोगो यदभूत्पृथिवीपतेः ॥ १३
तथा तपस्विनस्तस्य राजर्षेः कौरवस्य ह ।

कथमेवंविधो मृत्युः प्रशास्य पृथिवीमिमाम् ॥ १४
तिष्ठत्सु मन्त्रपूतेषु तस्याग्निषु महावने ।
वृथाग्निना समायुक्तो निष्ठां प्राप्तः पिता मम ॥१५
मन्ये पृथा वेपमाना कृशा धमनिसंतता ।
हा तात धर्मराजेति समाक्रन्दन्महाभये ॥ १६
भीम पर्याप्नुहि भयादिति चैवाभिवाशती ।
समन्ततः परिक्षिप्ता माता मेऽभूद्दवाग्निना ॥ १७
सहदेवः प्रियस्तस्याः पुत्रेभ्योऽधिक एव तु ।
न चैनां मोक्षयामास वीरो माद्रवतीसुतः ॥ १८
तच्छ्रुत्वा रुरुदुः सर्वे समालिङ्ग्य परस्परम् ।
पाण्डवाः पञ्च दुःखार्ता भूतानीव युगक्षये ॥ १९
तेषां तु पुरुषेन्द्राणां रुदतां रुदितस्वनः ।
प्रासादाभोगसंरुद्धो अन्वरौत्सीत्स रोदसी ॥ २०

इति श्रीमहाभारते आश्रमवासिकपर्वणि
षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

४७

नारद उवाच ।

नासौ वृथाग्निना दग्धो यथा तत्र श्रुतं मया ।
वैचित्रवीर्यो नृपतिस्तत्ते वक्ष्यामि भारत ॥ १
वनं प्रविशता तेन वायुभक्षेण धीमता ।
अग्नयः कारयित्वेष्टिमुत्सृष्टा इति नः श्रुतम् ॥ २
याजकास्तु ततस्तस्य तानग्नीन्निर्जने वने ।
समुत्सृज्य यथाकामं जग्मुर्भरतसत्तम ॥ ३
स विवृद्धस्तदा वह्निर्वने तस्मिन्नभूत्किल ।
तेन तद्वनमादीप्तमिति मे तापसाब्रुवन् ॥ ४
स राजा जाह्नवीकच्छे यथा ते कथितं मया ।
तेनाग्निना समायुक्तः स्वेनैव भरतर्षभ ॥ ५
एवमावेदयामासुर्मुनयस्ते समानघ ।
ये ते भागीरथीतीरे मया दृष्टा युधिष्ठिर ॥ ६
एवं स्वेनाग्निना राजा समायुक्तो महीपते ।
मा शोचिथास्त्वं नृपतिं गतः स परमां गतिम् ॥ ७
गुरुशुश्रूषया चैव जननी तव पाण्डव ।
प्राप्ता सुमहतीं सिद्धिमिति मे नात्र संशयः ॥ ८
कर्तुमर्हसि कौरव्य तेषां त्वमुदकक्रियाम् ।
भ्रातृभिः सहितः सर्वैरेतदत्र विधीयताम् ॥ ९

वैशंपायन उवाच ।

ततः स पृथिवीपालः पाण्डवानां धुरंधरः ।
निर्ययौ सह सोदर्यैः सदारो भरतर्षभ ॥ १०
पौरजानपदाश्चैव राजभक्तिपुरस्कृताः ।
गङ्गां प्रजग्मुरभितो वाससैकेन संवृताः ॥ ११
ततोऽवगाह्य सलिलं सर्वे ते कुरुपुंगवाः ।
युयुत्सुमग्रतः कृत्वा ददुस्तोयं महात्मने ॥ १२
गान्धार्याश्च पृथायाश्च विधिवन्नामगोत्रतः ।
शौचं निवर्तयन्तस्ते तत्रोषुर्नगराद्बहिः ॥ १३
प्रेषयामास स नरान्विधिज्ञानाप्तकारिणः ।
गङ्गाद्वारं कुरुश्रेष्ठो यत्र दग्धोऽभवन्नृपः ॥ १४
तत्रैव तेषां कुल्यानि गङ्गाद्वारेऽन्वशात्तदा ।
कर्तव्यानीति पुरुषान्दत्तदेयान्महीपतिः ॥ १५
द्वादशेऽहनि तेभ्यः स कृतशौचो नराधिपः ।
ददौ श्राद्धानि विधिवद्दक्षिणावन्ति पाण्डवः ॥ १६
धृतराष्ट्रं समुद्दिश्य ददौ स पृथिवीपतिः ।
सुवर्णं रजतं गाश्च शय्याश्च सुमहाधनाः ॥ १७
गान्धार्याश्चैव तेजस्वी पृथायाश्च पृथक्पृथक् ।
संकीर्त्य नामनी राजा ददौ दानमनुत्तमम् ॥ १८
यो यदिच्छति यावच्च तावत्स लभते द्विजः ।
शयनं भोजनं यानं मणिरत्नमथो धनम् ॥ १९
यानमाच्छादनं भोगान्दासीश्च परिचारिकाः ।
ददौ राजा समुद्दिश्य तयोर्मात्रोर्महीपतिः ॥ २०
ततः स पृथिवीपालो दत्त्वा श्राद्धान्यनेकशः ।
प्रविवेश पुनर्धीमान्नगरं वारणाह्वयम् ॥ २१

ते चापि राजवचनात्पुरुषा ये गताभवन् ।
संकल्प्य तेषां कुल्यानि पुनः प्रत्यागमंस्ततः ॥ २२
माल्यैर्गन्धैश्च विविधैः पूजयित्वा यथाविधि ।
कुल्यानि तेषां संयोज्य तदाचख्युर्महीपतेः ॥ २३
समाश्वास्य च राजानं धर्मात्मानं युधिष्ठिरम् ।
नारदोऽप्यगमद्राजन्परमर्षिर्यथेप्सितम् ॥ २४
एवं वर्षाण्यतीतानि धृतराष्ट्रस्य धीमतः ।
वनवासे तदा त्रीणि नगरे दश पञ्च च ॥ २५
हतपुत्रस्य संग्रामे दानानि ददतः सदा ।
ज्ञातिसंबन्धिमित्राणां भ्रातृणां स्वजनस्य च ॥ २६
युधिष्ठिरस्तु नृपतिर्नातिप्रीतमनास्तदा ।
धारयामास तद्राज्यं निहतज्ञातिबान्धवः ॥ २७

इति श्रीमहाभारते आश्रमवासिकपर्वणि
सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

नारदागमनपर्व समाप्तम् ॥

॥ समाप्तमाश्रमवासिकं पर्व ॥

१६

मौसलपर्व

१

वैशंपायन उवाच ।

षट्त्रिंशे त्वथ संप्राप्ते वर्षे कौरवनन्दनः ।
ददर्श विपरीतानि निमित्तानि युधिष्ठिरः ॥ १
ववुर्वाताः सनिर्घाता रूक्षाः शर्करवर्षिणः ।
अपसव्यानि शकुना मण्डलानि प्रचक्रिरे ॥ २
प्रत्यगूहुर्महानद्यो दिशो नीहारसंवृताः ।
उल्काश्चाङ्गारवर्षिण्यः प्रपेतुर्गगनाद्भुवि ॥ ३
आदित्यो रजसा राजन्समवच्छन्नमण्डलः ।
विरश्मिरुदये नित्यं कबन्धैः समदृश्यत ॥ ४
परिवेषाश्च दृश्यन्ते दारुणाः चन्द्रसूर्ययोः ।
त्रिवर्णाः श्यामरूक्षान्तास्तथा भस्मारुणप्रभाः ॥ ५
एते चान्ये च बहव उत्पाता भयशंसिनः ।
दृश्यन्तेऽहरहो राजन्हृदयोद्वेगकारकाः ॥ ६
कस्यचित्त्वथ कालस्य कुरुराजो युधिष्ठिरः ।
शुश्राव वृष्णिचक्रस्य मौसले कदनं कृतम् ॥ ७
विमुक्तं वासुदेवं च श्रुत्वा रामं च पाण्डवः ।
समानीयाब्रवीद्भ्रातॄन्किं करिष्याम इत्युत ॥ ८
परस्परं समासाद्य ब्रह्मदण्डबलात्कृतान् ।
वृष्णीन्विनष्टांस्ते श्रुत्वा व्यथिताः पाण्डवाभवन् ॥
निधनं वासुदेवस्य समुद्रस्येव शोषणम् ।
वीरा न श्रद्दधुस्तस्य विनाशं शार्ङ्गधन्वनः ॥ १०
मौसलं ते परिश्रुत्य दुःखशोकसमन्विताः ।
विषण्णा हतसंकल्पाः पाण्डवाः समुपाविशन् ॥ ११

इति श्रीमहाभारते मौसलपर्वणि
प्रथमोऽध्यायः ॥ १ ॥

२

जनमेजय उवाच ।

कथं विनष्टा भगवन्नन्धका वृष्णिभिः सह ।
पश्यतो वासुदेवस्य भोजाश्चैव महारथाः ॥ १

वैशंपायन उवाच ।

षट्त्रिंशेऽथ ततो वर्षे वृष्णीनामनयो महान् ।
अन्योन्यं मुसलैस्ते तु निजघ्नुः कालचोदिताः ॥ २

जनमेजय उवाच ।

केनानुशप्तास्ते वीराः क्षयं वृष्ण्यन्धका ययुः ।
भोजाश्च द्विजवर्य त्वं विस्तरेण वदस्व मे ॥ ३

वैशंपायन उवाच ।

विश्वामित्रं च कण्वं च नारदं च तपोधनम् ।
सारणप्रमुखा वीरा ददृशुर्द्वारकागतान् ॥ ४
ते वै साम्बं पुरस्कृत्य भूषयित्वा स्त्रियं यथा ।
अब्रुवन्नुपसंगम्य दैवदण्डनिपीडिताः ॥ ५
इयं स्त्री पुत्रकामस्य बभ्रोरमिततेजसः ।
ऋषयः साधु जानीत किमियं जनयिष्यति ॥ ६
इत्युक्तास्ते तदा राजन्विप्रलम्भप्रधर्षिताः ।
प्रत्यब्रुवंस्तान्मुनयो यत्तच्छृणु नराधिप ॥ ७

वृष्ण्यन्धकविनाशाय मुसलं घोरमायसम् ।
वासुदेवस्य दायादः साम्बोऽयं जनयिष्यति ॥ ८
येन यूयं सुदुर्वृत्ता नृशंसा जातमन्यवः ।
उच्छेत्तारः कुलं कृत्स्नमृते रामजनार्दनौ ॥ ९
समुद्रं यास्यति श्रीमांस्त्यक्त्वा देहं हलायुधः ।
जरा कृष्णं महात्मानं शयानं भुवि भेत्स्यति ॥१०
इत्यब्रुवन्त ते राजन्प्रलब्धास्तैर्दुरात्मभिः ।
मुनयः क्रोधरक्ताक्षाः समीक्ष्याथ परस्परम् ॥ ११
तथोक्त्वा मुनयस्ते तु ततः केशवमभ्ययुः ॥ १२
अथाब्रवीत्तदा वृष्णीञ्श्रुत्वैवं मधुसूदनः ।
अन्तज्ञो मतिमांस्तस्य भवितव्यं तथेति तान् ॥१३
एवमुक्त्वा हृषीकेशः प्रविवेश पुनर्गृहान् ।
कृतान्तमन्यथा नैच्छत्कर्तुं स जगतः प्रभुः ॥ १४
श्वोभूतेऽथ ततः साम्बो मुसलं तदसूत वै ।
वृष्ण्यन्धकविनाशाय किंकरप्रतिमं महत् ॥ १५
प्रसूतं शापजं घोरं तच्च राज्ञे न्यवेदयन् ।
विषण्णरूपस्तद्राजा सूक्ष्मं चूर्णमकारयत् ॥ १६
प्राक्षिपन्सागरे तच्च पुरुषा राजशासनात् ।
अघोषयंश्च नगरे वचनादाहुकस्य च ॥ १७
अद्य प्रभृति सर्वेषु वृष्ण्यन्धकगृहेष्विह ।
सुरासवो न कर्तव्यः सर्वैर्नगरवासिभिः ॥ १८
यश्च नोऽविदितं कुर्यात्पेयं कश्चिन्नरः क्वचित् ।
जीवन्स शूलमारोहेत्स्वयं कृत्वा सबान्धवः ॥ १९
ततो राजभयात्सर्वे नियमं चक्रिरे तदा ।
नराः शासनमाज्ञाय तस्य राज्ञो महात्मनः ॥ २०

इति श्रीमहाभारते मौसलपर्वणि
द्वितीयोऽध्यायः ॥ २ ॥

३

वैशंपायन उवाच ।

एवं प्रयतमानानां वृष्णीनामन्धकैः सह ।
कालो गृहाणि सर्वेषां परिचक्राम नित्यशः ॥ १
करालो विकटो मुण्डः पुरुषः कृष्णपिङ्गलः ।
गृहाण्यवेक्ष्य वृष्णीनां नादृश्यत पुनः क्वचित् ॥२
उत्पेदिरे महावाता दारुणाश्च दिने दिने ।
वृष्ण्यन्धकविनाशाय बहवो रोमहर्षणाः ॥ ३
विवृद्धमूषका रथ्या विभिन्नमणिकास्तथा ।
चीचीकूचीति वाश्यन्त्यः सारिका वृष्णिवेश्मसु ।
नोपशाम्यति शब्दश्च स दिवारात्रमेव हि ॥ ४
अनुकुर्वन्नुलूकानां सारसा विरुतं तथा ।
अजाः शिवानां च रुतमन्वकुर्वत भारत ॥ ५
पाण्डुरा रक्तपादाश्च विहगाः कालचोदिताः ।
वृष्ण्यन्धकानां गेहेषु कपोता व्यचरंस्तदा ॥ ६
व्यजायन्त खरा गोषु करभाश्वतरीषु च ।
शुनीष्वपि बिडालाश्च मूषका नकुलीषु च ॥ ७
नापत्रपन्त पापानि कुर्वन्तो वृष्णयस्तदा ।
प्राद्विषन्ब्राह्मणांश्चापि पितॄन्देवांस्तथैव च ॥ ८
गुरूंश्चाप्यवमन्यन्त न तु रामजनार्दनौ ।
पत्न्यः पतीन्व्युच्चरन्त पत्नीश्च पतयस्तथा ॥ ९
विभावसुः प्रज्वलितो वामं विपरिवर्तते ।
नीललोहितमाञ्जिष्ठा विसृजन्नर्चिषः पृथक् ॥ १०
उदयास्तमने नित्यं पुर्यां तस्यां दिवाकरः ।
व्यदृश्यतासकृत्पुंभिः कबन्धैः परिवारितः ॥ ११
महानसेषु सिद्धेऽन्ने संस्कृतेऽतीव भारत ।
आहार्यमाणे कृमयो व्यदृश्यन्त नराधिप ॥ १२
पुण्याहे वाच्यमाने च जपत्सु च महात्मसु ।
अभिधावन्तः श्रूयन्ते न चादृश्यत कश्चन ॥ १३
परस्परं च नक्षत्रं हन्यमानं पुनः पुनः ।
ग्रहैरपश्यन्सर्वे ते नात्मनस्तु कथंचन ॥ १४
नदन्तं पाञ्चजन्यं च वृष्ण्यन्धकनिवेशने ।
समन्तात्प्रत्यवाश्यन्त रासभा दारुणस्वराः ॥ १५

एवं पश्यन्हृषीकेशः संप्राप्तं कालपर्ययम् ।
त्रयोदश्याममावास्यां तान्दृष्ट्वा प्राब्रवीदिदम् ॥ १६
चतुर्दशी पञ्चदशी कृतेयं राहुणा पुनः ।
तदा च भारते युद्धे प्राप्ता चाद्य क्षयाय नः ॥१७
विमृशन्नेव कालं तं परिचिन्त्य जनार्दनः ।
मेने प्राप्तं स षट्त्रिंशं वर्षं वै केशिसूदनः ॥ १८
पुत्रशोकाभिसंतप्ता गान्धारी हतबान्धवा ।
यदनुव्याजहारार्ता तदिदं समुपागतम् ॥ १९
इदं च तदनुप्राप्तमब्रवीद्यद्युधिष्ठिरः ।
पुरा व्यूढेष्वनीकेषु दृष्ट्वोत्पातान्सुदारुणान् ॥ २०
इत्युक्त्वा वासुदेवस्तु चिकीर्षन्सत्यमेव तत् ।
आज्ञापयामास तदा तीर्थयात्रामरिंदम ॥ २१
अघोषयन्त पुरुषास्तत्र केशवशासनात् ।
तीर्थयात्रा समुद्रे वः कार्येति पुरुषर्षभाः ॥ २२

इति श्रीमहाभारते मौसलपर्वणि
तृतीयोऽध्यायः ॥ ३ ॥

४

वैशंपायन उवाच ।

काली स्त्री पाण्डुरैर्दन्तैः प्रविश्य हसती निशि ।
स्त्रियः स्वप्नेषु मुष्णन्ती द्वारकां परिधावति ॥ १
अलंकाराश्च छत्रं च ध्वजाश्च कवचानि ।
ह्रियमाणान्यदृश्यन्त रक्षोभिः सुभयानकैः ॥ २
तच्चाग्निदत्तं कृष्णस्य वज्रनाभमयस्मयम् ।
दिवमाचक्रमे चक्रं वृष्णीनां पश्यतां तदा ॥ ३
युक्तं रथं दिव्यमादित्यवर्णं
हयाहरन्पश्यतो दारुकस्य ।
ते सागरस्योपरिष्टादवर्त-
न्मनोजवाश्चतुरो वाजिमुख्याः ॥ ४
तालः सुपर्णश्च महाध्वजौ तौ
सुपूजितौ रामजनार्दनाभ्याम् ।
उच्चैर्जह्रुरप्सरसो दिवानिशं
वाचश्चोचुर्गम्यतां तीर्थयात्रा ॥ ५
ततो जिगमिषन्तस्ते वृष्ण्यन्धकमहारथाः ।
सान्तःपुरास्तदा तीर्थयात्रामैच्छन्नरर्षभाः ॥ ६
ततो भोज्यं च भक्ष्यं च पेयं चान्धकवृष्णयः ।
बहु नानाविधं चक्रुर्मद्यं मांसमनेकशः ॥ ७
ततः सीधुषु सक्ताश्च निर्ययुर्नगराद्बहिः ।
यानैरश्वैर्गजैश्चैव श्रीमन्तस्तिग्मतेजसः ॥ ८
ततः प्रभासे न्यवसन्यथोद्देशं यथागृहम् ।
प्रभूतभक्ष्यपेयास्ते सदारा यादवास्तदा ॥ ९
निविष्टांस्तान्निशम्याथ समुद्रान्ते स योगवित् ।
जगामामन्त्र्य तान्वीरानुद्धवोऽर्थविशारदः ॥ १०
तं प्रस्थितं महात्मानमभिवाद्य कृताञ्जलिम् ।
जानन्विनाशं वृष्णीनां नैच्छद्वारयितुं हरिः ॥ ११
ततः कालपरीतास्ते वृष्ण्यन्धकमहारथाः ।
अपश्यन्नुद्धवं यान्तं तेजसावृत्य रोदसी ॥ १२
ब्राह्मणार्थेषु यत्सिद्धमन्नं तेषां महात्मनाम् ।
तद्वानरेभ्यः प्रददुः सुरागन्धसमन्वितम् ॥ १३
ततस्तूर्यशताकीर्णं नटनर्तकसंकुलम् ।
प्रावर्तत महापानं प्रभासे तिग्मतेजसाम् ॥ १४
कृष्णस्य संनिधौ रामः सहितः कृतवर्मणा ।
अपिबद्युयुधानश्च गदो बभ्रुस्तथैव च ॥ १५
ततः परिषदो मध्ये युयुधानो मदोत्कटः ।
अब्रवीत्कृतवर्माणमवहस्यावमन्य च ॥ १६
कः क्षत्रियो मन्यमानः सुप्तान्हन्यान्मृतानिव ।
न तन्मृष्यन्ति हार्दिक्य यादवा यत्त्वया कृतम् ॥
इत्युक्ते युयुधानेन पूजयामास तद्वचः ।
प्रद्युम्नो रथिनां श्रेष्ठो हार्दिक्यमवमन्य च ॥ १८
ततः परमसंक्रुद्धः कृतवर्मा तमब्रवीत् ।
निर्दिशन्निव सावज्ञं तदा सव्येन पाणिना ॥ १९

भूरिश्रवाश्छिन्नबाहुर्युद्धे प्रायगतस्त्वया ।
वधेन सुनृशंसेन कथं वीरेण पातितः ॥ २०
इति तस्य वचः श्रुत्वा केशवः परवीरहा ।
तिर्यक्सरोषया दृष्ट्या वीक्षांचक्रे स मन्युमान् ॥ २१
मणिः स्यमन्तकश्चैव यः स सत्राजितोऽभवत् ।
तां कथां स्मारयामास सात्यकिर्मधुसूदनम् ॥ २२
तच्छ्रुत्वा केशवस्याङ्कमगमद्रुदती तदा ।
सत्यभामा प्रकुपिता कोपयन्ती जनार्दनम् ॥ २३
तत उत्थाय सक्रोधः सात्यकिर्वाक्यमब्रवीत् ।
पञ्चानां द्रौपदेयानां धृष्टद्युम्नशिखण्डिनोः ॥ २४
एष गच्छामि पदवीं सत्येन च तथा शपे ।
सौप्तिके ये च निहताः सुप्तानेन दुरात्मना ॥ २५
द्रोणपुत्रसहायेन पापेन कृतवर्मणा ।
समाप्तमायुरस्याद्य यशश्चापि सुमध्यमे ॥ २६
इतीदमुक्त्वा खड्गेन केशवस्य समीपतः ।
अभिद्रुत्य शिरः क्रुद्धश्चिच्छेद कृतवर्मणः ॥ २७
तथान्यानपि निघ्नन्तं युयुधानं समन्ततः ।
अभ्यधावद्धृषीकेशो विनिवारयिषुस्तदा ॥ २८
एकीभूतास्ततः सर्वे कालपर्यायचोदिताः ।
भोजान्धका महाराज शैनेयं पर्यवारयन् ॥ २९
तान्दृष्ट्वा पततस्तूर्णमभिक्रुद्धाञ्जनार्दनः ।
न चुक्रोध महातेजा जानन्कालस्य पर्ययम् ॥ ३०
ते तु पानमदाविष्टाश्चोदिताश्चैव मन्युना ।
युयुधानमथाभ्यघ्नन्नुच्छिष्टैर्भाजनैस्तदा ॥ ३१
हन्यमाने तु शैनेये क्रुद्धो रुक्मिणिनन्दनः ।
तदन्तरमुपाधावन्मोक्षयिष्यञ्शिनेः सुतम् ॥ ३२
स भोजैः सह संयुक्तः सात्यकिश्चान्धकैः सह ।
बहुत्वान्निहतौ तत्र उभौ कृष्णस्य पश्यतः ॥ ३३
हतं दृष्ट्वा तु शैनेयं पुत्रं च यदुनन्दनः ।
एरकाणां तदा मुष्टिं कोपाज्जग्राह केशवः ॥ ३४
तदभून्मुसलं घोरं वज्रकल्पमयोमयम् ।
जघान तेन कृष्णस्तान्येऽस्य प्रमुखतोऽभवन् ॥ ३५
ततोऽन्धकाश्च भोजाश्च शैनेया वृष्णयस्तथा ।
जघ्नुरन्योन्यमाक्रन्दे मुसलैः कालचोदिताः ॥ ३६
यस्तेषामेरकां कश्चिज्जग्राह रुषितो नृप ।
वज्रभूतेव सा राजन्नदृश्यत तदा विभो ॥ ३७
तृणं च मुसलीभूतमपि तत्र व्यदृश्यत ।
ब्रह्मदण्डकृतं सर्वमिति तद्विद्धि पार्थिव ॥ ३८
आविध्याविध्य ते राजन्प्रक्षिपन्ति स्म यत्तृणम् ।
तद्वज्रभूतं मुसलं व्यदृश्यत तदा दृढम् ॥ ३९
अवधीत्पितरं पुत्रः पिता पुत्रं च भारत ।
मत्ताः परिपतन्ति स्म पोथयन्तः परस्परम् ॥ ४०
पतंगा इव चाग्नौ ते न्यपतन्कुकुरान्धकाः ।
नासीत्पलायने बुद्धिर्वध्यमानस्य कस्यचित् ॥ ४१
तं तु पश्यन्महाबाहुर्जानन्कालस्य पर्ययम् ।
मुसलं समवष्टभ्य तस्थौ स मधुसूदनः ॥ ४२
साम्बं च निहतं दृष्ट्वा चारुदेष्णं च माधवः ।
प्रद्युम्नं चानिरुद्धं च ततश्चुक्रोध भारत ॥ ४३
गदं वीक्ष्य शयानं च भृशं कोपसमन्वितः ।
स निःशेषं तदा चक्रे शार्ङ्गचक्रगदाधरः ॥ ४४
तं निघ्नन्तं महातेजा बभ्रुः परपुरंजयः ।
दारुकश्चैव दाशार्हमूचतुर्यन्निबोध तत् ॥ ४५
भगवन्संहृतं सर्वं त्वया भूयिष्ठमच्युत ।
रामस्य पदमन्विच्छ तत्र गच्छाम यत्र सः ॥ ४६

इति श्रीमहाभारते मौसलपर्वणि
चतुर्थोऽध्यायः ॥ ४ ॥

५

वैशंपायन उवाच ।

ततो ययुर्दारुकः केशवश्च
बभ्रुश्च रामस्य पदं पतन्तः ।

अथापश्यन्राममनन्तवीर्यं
वृक्षे स्थितं चिन्तयानं विविक्ते ॥ १
ततः समासाद्य महानुभावः
कृष्णस्तदा दारुकमन्वशासत् ।
गत्वा कुरूञ्शीघ्रमिमं महान्तं
पार्थाय शंसस्व वधं यदूनाम् ॥ २
ततोऽर्जुनः क्षिप्रमिहोपयातु
श्रुत्वा मृतान्यादवान्ब्रह्मशापात् ।
इत्येवमुक्तः स ययौ रथेन
कुरूंस्तदा दारुको नष्टचेताः ॥ ३
ततो गते दारुके केशवोऽथ
दृष्ट्वान्तिके बभ्रुमुवाच वाक्यम् ।
स्त्रियो भवान्रक्षतु यातु शीघ्रं
नैता हिंस्युर्दस्यवो वित्तलोभात् ॥ ४
स प्रस्थितः केशवेनानुशिष्टो
मदातुरो ज्ञातिवधार्दितश्च ।
तं वै यान्तं संनिधौ केशवस्य
त्वरन्तमेकं सहसैव बभ्रुम् ।
ब्रह्मानुशप्तमवधीन्महद्वै
कूटोन्मुक्तं मुसलं लुब्धकस्य ॥ ५
ततो दृष्ट्वा निहतं बभ्रुमाह
कृष्णो वाक्यं भ्रातरमग्रजं तु ।
इहैव त्वं मां प्रतीक्षस्व राम
यावत्स्त्रियो ज्ञातिवशाः करोमि ॥ ६
ततः पुरीं द्वारवतीं प्रविश्य
जनार्दनः पितरं प्राह वाक्यम् ।
स्त्रियो भवान्रक्षतु नः समग्रा
धनंजयस्यागमनं प्रतीक्षन् ।
रामो वनान्ते प्रतिपालयन्मा-
मास्तेऽद्याहं तेन समागमिष्ये ॥ ७
दृष्टं मयेदं निधनं यदूनां
राज्ञां च पूर्वं कुरुपुंगवानाम् ।
नाहं विना यदुभिर्यादवानां
पुरीमिमां द्रष्टुमिहाद्य शक्तः ॥ ८
तपश्चरिष्यामि निबोध तन्मे
रामेण सार्धं वनमभ्युपेत्य ।
इतीदमुक्त्वा शिरसास्य पादौ
संस्पृश्य कृष्णस्त्वरितो जगाम ॥ ९
ततो महान्निनदः प्रादुरासी-
त्सस्त्रीकुमारस्य पुरस्य तस्य ।
अथाब्रवीत्केशवः संनिवर्त्य
शब्दं श्रुत्वा योषितां क्रोशतीनाम् ॥ १०
पुरीमिमामेष्यति सव्यसाची
स वो दुःखान्मोचयिता नराग्र्यः ।
ततो गत्वा केशवस्तं ददर्श
रामं वने स्थितमेकं विविक्ते ॥ ११
अथापश्यद्योगयुक्तस्य तस्य
नागं मुखान्निःसरन्तं महान्तम् ।
श्वेतं ययौ स ततः प्रेक्ष्यमाणो
महार्णवो येन महानुभावः ॥ १२
सहस्रशीर्षः पर्वताभोगवर्ष्मा
रक्ताननः स्वां तनुं तां विमुच्य ।
सम्यक्च यं सागरः प्रत्यगृह्णा-
न्नागा दिव्याः सरितश्चैव पुण्याः ॥ १३
कर्कोटको वासुकिस्तक्षकश्च
पृथुश्रवा वरुणः कुञ्जरश्च ।
मिश्री शङ्खः कुमुदः पुण्डरीक-
स्तथा नागो धृतराष्ट्रो महात्मा ॥ १४
ह्रादः क्राथः शितिकण्ठोऽग्रतेजा-
स्तथा नागौ चक्रमन्दातिषण्डौ ।

नागश्रेष्ठो दुर्मुखश्चाम्बरीषः
स्वयं राजा वरुणश्चापि राजन् ।
प्रत्युद्गम्य स्वागतेनाभ्यनन्दं-
स्तेऽपूजयंश्चार्घ्यपाद्यक्रियाभिः ॥ १५
ततो गते भ्रातरि वासुदेवो
जानन्सर्वा गतयो दिव्यदृष्टिः ।
वने शून्ये विचरंश्चिन्तयानो
भूमौ ततः संविवेशाग्र्यतेजाः ॥ १६
सर्वं हि तेन प्राक्तदा वित्तमासी-
द्गान्धार्या यद्वाक्यमुक्तः स पूर्वम् ।
दुर्वाससा पायसोच्छिष्टलिप्ते
यच्चाप्युक्तं तच्च सस्मार कृष्णः ॥ १७
स चिन्तयानोऽन्धकवृष्णिनाशं
कुरुक्षयं चैव महानुभावः ।
मेने ततः संक्रमणस्य कालं
ततश्चकारेन्द्रियसंनिरोधम् ॥ १८
स संनिरुद्धेन्द्रियवाङ्मनास्तु
शिश्ये महायोगमुपेत्य कृष्णः ।
जराथ तं देशमुपाजगाम
लुब्धस्तदानीं मृगलिप्सुरुग्रः ॥ १९
स केशवं योगयुक्तं शयानं
मृगाशङ्की लुब्धकः सायकेन ।
जराविध्यत्पादतले त्वरावां-
स्तं चाभितस्तज्जिघृक्षुर्जगाम ।
अथापश्यत्पुरुषं योगयुक्तं
पीताम्बरं लुब्धकोऽनेकबाहुम् ॥ २०
मत्वात्मानमपराद्धं स तस्य
जग्राह पादौ शिरसा चार्तरूपः ।
आश्वासयत्तं महात्मा तदानीं
गच्छन्नूर्ध्वं रोदसी व्याप्य लक्ष्म्या ॥ २१
दिवं प्राप्तं वासवोऽथाश्विनौ च
रुद्रादित्या वसवश्चाथ विश्वे
प्रत्युद्ययुर्मुनयश्चापि सिद्धा
गन्धर्वमुख्याश्च सहाप्सरोभिः ॥ २२
ततो राजन्भगवानुग्रतेजा
नारायणः प्रभवश्चाव्ययश्च ।
योगाचार्यो रोदसी व्याप्य लक्ष्म्या
स्थानं प्राप स्वं महात्माप्रमेयम् ॥ २३
ततो देवैर्ऋषिभिश्चापि कृष्णः
समागतश्चारणैश्चैव राजन् ।
गन्धर्वाग्र्यैरप्सरोभिर्वराभिः
सिद्धैः साध्यैश्चानतैः पूज्यमानः ॥ २४
ते वै देवाः प्रत्यनन्दन्त राज-
न्मुनिश्रेष्ठा वाग्भिरानर्चुरीशम् ।
गन्धर्वाश्चाप्युपतस्थुः स्तुवन्तः
प्रीत्या चैनं पुरुहूतोऽभ्यनन्दत् ॥ २५

इति श्रीमहाभारते मौसलपर्वणि
पञ्चमोऽध्यायः ॥ ५ ॥

६

वैशंपायन उवाच ।

दारुकोऽपि कुरून्गत्वा दृष्ट्वा पार्थान्महारथान् ।
आचष्ट मौसले वृष्णीनन्योन्येनोपसंहृतान् ॥ १
श्रुत्वा विनष्टान्वार्ष्णेयान्सभोजककुरान्धकान् ।
पाण्डवाः शोकसंतप्ता वित्रस्तमनसोऽभवन् ॥ २
ततोऽर्जुनस्तानामन्त्र्य केशवस्य प्रियः सखा ।
प्रययौ मातुलं द्रष्टुं नेदमस्तीति चाब्रवीत् ॥ ३
स वृष्णिनिलयं गत्वा दारुकेण सह प्रभो ।
ददर्श द्वारकां वीरो मृतनाथामिव स्त्रियम् ॥ ४
याः स्म ता लोकनाथेन नाथवत्यः पुराभवन् ।
तास्त्वनाथास्तदा नाथं पार्थं दृष्ट्वा विचुक्रुशुः ॥ ५

षोडशस्त्रीसहस्राणि वासुदेवपरिग्रहः ।
तासामासीन्महान्नादो दृष्ट्वैवार्जुनमागतम् ॥ ६
तास्तु दृष्ट्वैव कौरव्यो बाष्पेण पिहितोऽर्जुनः ।
हीनाः कृष्णेन पुत्रैश्च नाशकत्सोऽभिवीक्षितुम् ॥७
तां स वृष्ण्यन्धकजलां हयमीनां रथोडुपाम् ।
वादित्ररथघोषौघां वेश्मतीर्थमहाग्रहाम् ॥ ८
रत्नशैवलसंघाटां वज्रप्राकारमालिनीम् ।
रथ्यास्रोतोजलावर्तां चत्वरस्तिमितह्रदाम् ॥ ९
रामकृष्णमहाग्राहां द्वारकासरितं तदा ।
कालपाशग्रहां घोरां नदीं वैतरणीमिव ॥ १०
तां ददर्शार्जुनो धीमान्विहीनां वृष्णिपुंगवैः ।
गतश्रियं निरानन्दां पद्मिनीं शिशिरे यथा ॥ ११
तां दृष्ट्वा द्वारकां पार्थस्ताश्च कृष्णस्य योषितः ।
सस्वनं बाष्पमुत्सृज्य निपपात महीतले ॥ १२
सात्राजिती ततः सत्या रुक्मिणी च विशां पते ।
अभिपत्य प्ररुरुदुः परिवार्य धनंजयम् ॥ १३
ततस्ताः काञ्चने पीठे समुत्थायोपवेश्य च ।
अब्रुवन्त्यो महात्मानं परिवार्योपतस्थिरे ॥ १४
ततः संस्तूय गोविन्दं कथयित्वा च पाण्डवः ।
आश्वास्य ताः स्त्रियश्चापि मातुलं द्रष्टुमभ्यगात् ॥

इति श्रीमहाभारते मौसलपर्वणि
षष्ठोऽध्यायः ॥ ६ ॥

७

वैशंपायन उवाच ।

तं शयानं महात्मानं वीरमानकदुन्दुभिम् ।
पुत्रशोकाभिसंतप्तं ददर्श कुरुपुंगवः ॥ १
तस्याश्रुपरिपूर्णाक्षो व्यूढोरस्को महाभुजः ।
आर्तस्यार्ततरः पार्थः पादौ जग्राह भारत ॥ २
समालिङ्ग्यार्जुनं वृद्धः स भुजाभ्यां महाभुजः ।
रुदन्पुत्रान्स्मरन्सर्वान्विललाप सुविह्वलः ।
भ्रातॄन्पुत्रांश्च पौत्रांश्च दौहित्रांश्च सखीनपि ॥ ३

वसुदेव उवाच ।

यैर्जिता भूमिपालाश्च दैत्याश्च शतशोऽर्जुन ।
तान्दृष्ट्वा नेह पश्यामि जीवाम्यर्जुन दुर्मरः ॥ ४
यौ तावर्जुन शिष्यौ ते प्रियौ बहुमतौ सदा ।
तयोरपनयात्पार्थ वृष्णयो निधनं गताः ॥ ५
यौ तौ वृष्णिप्रवीराणां द्वावेवातिरथौ मतौ ।
प्रद्युम्नो युयुधानश्च कथयन्कत्थसे च यौ ॥ ६
नित्यं त्वं कुरुशार्दूल कृष्णश्च मम पुत्रकः ।
तावुभौ वृष्णिनाशस्य मुखमास्तां धनंजय ॥ ७
न तु गर्हामि शैनेयं हार्दिक्यं चाहमर्जुन ।
अक्रूरं रौक्मिणेयं च शापो ह्येवात्र कारणम् ॥ ८
केशिनं यस्तु कंसं च विक्रम्य जगतः प्रभुः ।
विदेहावकरोत्पार्थ चैद्यं च बलगर्वितम् ॥ ९
नैषादिमेकलव्यं च चक्रे कालिङ्गमागधान् ।
गान्धारान्काशिराजं च मरुभूमौ च पार्थिवान् ॥
प्राच्यांश्च दाक्षिणात्यांश्च पार्वतीयांस्तथा नृपान् ।
सोऽभ्युपेक्षितवानेतमनयं मधुसूदनः ॥ ११
ततः पुत्रांश्च पौत्रांश्च भ्रातॄनथ सखीनपि ।
शयानान्निहतान्दृष्ट्वा ततो मामब्रवीदिदम् ॥ १२
संप्राप्तोऽद्यायमस्यान्तः कुलस्य पुरुषर्षभ ।
आगमिष्यति बीभत्सुरिमां द्वारवतीं पुरीम् ॥ १३
आख्येयं तस्य यद्वृत्तं वृष्णीनां वैशसं महत् ।
स तु श्रुत्वा महातेजा यदूनामनयं प्रभो ।
आगन्ता क्षिप्रमेवेह न मेऽत्रास्ति विचारणा ॥१४
योऽहं तमर्जुनं विद्धि योऽर्जुनः सोऽहमेव तु ।
यद्ब्रूयात्तत्तथा कार्यमिति बुध्यस्व माधव ॥ १५
स स्त्रीषु प्राप्तकालं वः पाण्डवो बालकेषु च ।
प्रतिपत्स्यति बीभत्सुर्भवतश्चौर्ध्वदेहिकम् ॥ १६
इमां च नगरीं सद्यः प्रतियाते धनंजये ।

प्राकाराट्टालकोपेतां समुद्रः प्लावयिष्यति ॥ १७
अहं हि देशे कस्मिंश्चित्पुण्ये नियममास्थितः ।
कालं कर्ता सद्य एव रामेण सह धीमता ॥ १८
एवमुक्त्वा हृषीकेशो मामचिन्त्यपराक्रमः ।
हित्वा मां बालकैः सार्धं दिशं कामप्यगात्प्रभुः ॥
सोऽहं तौ च महात्मानौ चिन्तयन्भ्रातरौ तव ।
घोरं ज्ञातिवधं चैव न भुञ्जे शोककर्शितः ॥ २०
न च भोक्ष्ये न जीविष्ये दिष्ट्या प्राप्तोऽसि पाण्डव ।
यदुक्तं पार्थ कृष्णेन तत्सर्वमखिलं कुरु ॥ २१
एतत्ते पार्थ राज्यं च स्त्रियो रत्नानि चैव ह ।
इष्टान्प्राणानहं हीमांस्त्यक्ष्यामि रिपुसूदन ॥ २२

इति श्रीमहाभारते मौसलपर्वणि
सप्तमोऽध्यायः ॥ ७ ॥

८

वैशंपायन उवाच ।

एवमुक्तः स बीभत्सुर्मातुलेन परंतपः ।
दुर्मना दीनमनसं वसुदेवमुवाच ह ॥ १
नाहं वृष्णिप्रवीरेण मधुभिश्चैव मातुल ।
विहीनां पृथिवीं द्रष्टुं शक्तश्चिरमिह प्रभो ॥ २
राजा च भीमसेनश्च सहदेवश्च पाण्डवः ।
नकुलो याज्ञसेनी च षडेकमनसो वयम् ॥ ३
राज्ञः संक्रमणे चापि कालोऽयं वर्तते ध्रुवम् ।
तमिमं विद्धि संप्राप्तं कालं कालविदां वर ॥ ४
सर्वथा वृष्णिदारांस्तु बालवृद्धांस्तथैव च ।
नयिष्ये परिगृह्याहमिन्द्रप्रस्थमरिंदम ॥ ५
इत्युक्त्वा दारुकमिदं वाक्यमाह धनंजयः ।
अमात्यान्वृष्णिवीराणां द्रष्टुमिच्छामि माचिरम् ॥
इत्येवमुक्त्वा वचनं सुधर्मां यादवीं सभाम् ।
प्रविवेशार्जुनः शूरः शोचमानो महारथान् ॥ ७
तमासनगतं तत्र सर्वाः प्रकृतयस्तथा ।
ब्राह्मणा नैगमाश्चैव परिवार्योपतस्थिरे ॥ ८
तान्दीनमनसः सर्वान्निभृतान्गतचेतसः ।
उवाचेदं वचः पार्थः स्वयं दीनतरस्तदा ॥ ९
शक्रप्रस्थमहं नेष्ये वृष्ण्यन्धकजनं स्वयम् ।
इदं तु नगरं सर्वं समुद्रः प्लावयिष्यति ॥ १०
सज्जीकुरुत यानानि रत्नानि विविधानि च ।
वज्रोऽयं भवतां राजा शक्रप्रस्थे भविष्यति ॥ ११
सप्तमे दिवसे चैव रवौ विमल उद्गते ।
बहिर्वत्स्यामहे सर्वे सज्जीभवत मा चिरम् ॥ १२
इत्युक्तास्तेन ते पौराः पार्थेनाक्लिष्टकर्मणा ।
सज्जमाशु ततश्चक्रुः स्वसिद्ध्यर्थं समुत्सुकाः ॥ १३
तां रात्रिमवसत्पार्थः केशवस्य निवेशने ।
महता शोकमोहेन सहसाभिपरिप्लुतः ॥ १४
श्वोभूतेऽथ ततः शौरिर्वसुदेवः प्रतापवान् ।
युक्त्वात्मानं महातेजा जगाम गतिमुत्तमाम् ॥ १५
ततः शब्दो महानासीद्वसुदेवस्य वेश्मनि ।
दारुणः क्रोशतीनां च रुदतीनां च योषिताम् ॥ १६
प्रकीर्णमूर्धजाः सर्वा विमुक्ताभरणस्रजः ।
उरांसि पाणिभिर्घ्नन्त्यो व्यलपन्करुणं स्त्रियः ॥ १७
तं देवकी च भद्रा च रोहिणी मदिरा तथा ।
अन्वारोढुं व्यवसिता भर्तारं योषितां वराः ॥ १८
ततः शौरिं नृयुक्तेन बहुमाल्येन भारत ।
यानेन महता पार्थो बहिर्निष्क्रामयत्तदा ॥ १९
तमन्वयुस्तत्र तत्र दुःखशोकसमाहताः ।
द्वारकावासिनः पौराः सर्व एव नरर्षभ ॥ २०
तस्याश्वमेधिकं छत्रं दीप्यमानाश्च पावकाः ।
पुरस्तात्तस्य यानस्य याजकाश्च ततो ययुः ॥ २१
अनुजग्मुश्च तं वीरं देव्यस्ता वै स्वलंकृताः ।
स्त्रीसहस्रैः परिवृता वधूभिश्च सहस्रशः ॥ २२
यस्तु देशः प्रियस्तस्य जीवतोऽभून्महात्मनः ।

तत्रैनमुपसंकल्प्य पितृमेधं प्रचक्रिरे ॥ २३
तं चिताग्निगतं वीरं शूरपुत्रं वराङ्गनाः ।
ततोऽन्वारुरुहुः पत्न्यश्चतस्रः पतिलोकगाः ॥ २४
तं वै चतसृभिः स्त्रीभिरन्वितं पाण्डुनन्दनः ।
अदाहयच्चन्दनैश्च गन्धैरुच्चावचैरपि ॥ २५
ततः प्रादुरभूच्छब्दः समिद्धस्य विभावसोः ।
सामगानां च निर्घोषो नराणां रुदतामपि ॥ २६
ततो वज्रप्रधानास्ते वृष्णिवीरकुमारकाः ।
सर्वं एवोदकं चक्रुः स्त्रियश्चैव महात्मनः ॥ २७
अलुप्तधर्मस्तं धर्मं कारयित्वा स फल्गुनः ।
जगाम वृष्णयो यत्र विनष्टा भरतर्षभ ॥ २८
स तान्दृष्ट्वा निपतितान्कदने भृशदुःखितः ।
बभूवातीव कौरव्यः प्राप्तकालं चकार च ॥ २९
यथाप्रधानतश्चैव चक्रे सर्वाः क्रियास्तदा ।
ये हता ब्रह्मशापेन मुसलैरेरकोद्भवैः ॥ ३०
ततः शरीरे रामस्य वासुदेवस्य चोभयोः ।
अन्विष्य दाहयामास पुरुषैराप्तकारिभिः ॥ ३१
स तेषां विधिवत्कृत्वा प्रेतकार्याणि पाण्डवः ।
सप्तमे दिवसे प्रायाद्रथमारुह्य सत्वरः ।
अश्वयुक्तै रथैश्चापि गोखरोष्ट्रयुतैरपि ॥ ३२
स्त्रियस्ता वृष्णिवीराणां रुदत्यः शोककर्शिताः ।
अनुजग्मुर्महात्मानं पाण्डुपुत्रं धनंजयम् ॥ ३३
भृत्यास्त्वन्धकवृष्णीनां सादिनो रथिनश्च ये ।
वीरहीनं वृद्धबालं पौरजानपदास्तथा ।
ययुस्ते परिवार्याथ कलत्रं पार्थशासनात् ॥ ३४
कुञ्जरैश्च गजारोहा ययुः शैलनिभैस्तथा ।
सपादरक्षैः संयुक्ताः सोत्तरायुधिका ययुः ॥ ३५
पुत्राश्चान्धकवृष्णीनां सर्वे पार्थमनुव्रताः ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव महाधनाः॥३६
दश षट् च सहस्राणि वासुदेवावरोधनम् ।
पुरस्कृत्य ययुर्वज्रं पौत्रं कृष्णस्य धीमतः ॥ ३७
बहूनि च सहस्राणि प्रयुतान्यर्बुदानि च ।
भोजवृष्ण्यन्धकस्त्रीणां हतनाथानि निर्ययुः ॥ ३८
तत्सागरसमप्रख्यं वृष्णिचक्रं महर्धिमत् ।
उवाह रथिनां श्रेष्ठः पार्थः परपुरंजयः ॥ ३९
निर्याते तु जने तस्मिन्सागरो मकरालयः ।
द्वारकां रत्नसंपूर्णां जलेनाप्लावयत्तदा ॥ ४०
तदद्भुतमभिप्रेक्ष्य द्वारकावासिनो जनाः ।
तूर्णात्तूर्णतरं जग्मुरहो दैवमिति ब्रुवन् ॥ ४१
काननेषु च रम्येषु पर्वतेषु नदीषु च ।
निवसन्नानयामास वृष्णिदारान्धनंजयः ॥ ४२
स पञ्चनदमासाद्य धीमानतिसमृद्धिमत् ।
देशे गोपशुधान्याढ्ये निवासमकरोत्प्रभुः ॥ ४३
ततो लोभः समभवद्दस्यूनां निहतेश्वराः ।
दृष्ट्वा स्त्रियो नीयमानाः पार्थेनैकेन भारत ॥ ४४
ततस्ते पापकर्माणो लोभोपहतचेतसः ।
आभीरा मन्त्रयामासुः समेत्याशुभदर्शनाः ॥ ४५
अयमेकोऽर्जुनो योद्धा वृद्धबालं हतेश्वरम् ।
नयत्यस्मानतिक्रम्य योधाश्चेमे हतौजसः ॥ ४६
ततो यष्टिप्रहरणा दस्यवस्ते सहस्रशः ।
अभ्यधावन्त वृष्णीनां तं जनं लोप्त्रहारिणः ॥४७
महता सिंहनादेन द्रावयन्तः पृथग्जनम् ।
अभिपेतुर्धनार्थं ते कालपर्यायचोदिताः ॥ ४८
ततो निवृत्तः कौन्तेयः सहसा सपदानुगः ।
उवाच तान्महाबाहुरर्जुनः प्रहसन्निव ॥ ४९
निवर्तध्वमधर्मज्ञा यदि स्थ न मुमूर्षवः ।
नेदानीं शरनिर्भिन्नाः शोचध्वं निहता मया॥ ५०
तथोक्तास्तेन वीरेण कदर्थीकृत्य तद्वचः ।
अभिपेतुर्जनं मूढा वार्यमाणाः पुनः पुनः ॥ ५१
ततोऽर्जुनो धनुर्दिव्यं गाण्डीवमजरं महत् ।

आरोपयितुमारेभे यत्नादिव कथंचन ॥ ५२
चकार सज्यं कृच्छ्रेण संभ्रमे तुमुले सति ।
चिन्तयामास चास्त्राणि न च सस्मार तान्यपि ॥५३
वैकृत्यं तन्महद्दृष्ट्वा भुजवीर्ये तथा युधि ।
दिव्यानां च महास्त्राणां विनाशाद्व्रीडितोऽभवत् ॥
वृष्णियोधाश्च ते सर्वे गजाश्वरथयायिनः ।
न शेकुरावर्तयितुं ह्रियमाणं च तं जनम् ॥ ५५
कलत्रस्य बहुत्वात्तु संपतत्सु ततस्ततः ।
प्रयत्नमकरोत्पार्थो जनस्य परिरक्षणे ॥ ५६
मिषतां सर्वयोधानां ततस्ताः प्रमदोत्तमाः ।
समन्ततोऽवकृष्यन्त कामाच्चान्याः प्रवव्रजुः ॥ ५७
ततो गाण्डीवनिर्मुक्तैः शरैः पार्थो धनंजयः ।
जघान दस्यून्सोद्वेगो वृष्णिभृत्यैः सह प्रभुः ॥५८
क्षणेन तस्य ते राजन्क्षयं जग्मुरजिह्मगाः ।
अक्षया हि पुरा भूत्वा क्षीणाः क्षतजभोजनाः ॥५९
स शरक्षयमासाद्य दुःखशोकसमाहतः ।
धनुष्कोट्या तदा दस्यूनवधीत्पाकशासनिः ॥ ६०
प्रेक्षतस्त्वेव पार्थस्य वृष्ण्यन्धकवरस्त्रियः ।
जग्मुरादाय ते म्लेच्छाः समन्ताज्जनमेजय ॥ ६१
धनंजयस्तु दैवं तन्मनसाचिन्तयत्प्रभुः ।
दुःखशोकसमाविष्टो निःश्वासपरमोऽभवत् ॥ ६२
अस्त्राणां च प्रणाशेन बाहुवीर्यस्य संक्षयात् ।
धनुषश्चाविधेयत्वाच्छराणां संक्षयेण च ॥ ६३
बभूव विमनाः पार्थो दैवमित्यनुचिन्तयन् ।
न्यवर्तत ततो राजन्नेदमस्तीति चाब्रवीत् ॥ ६४
ततः स शेषमादाय कलत्रस्य महामतिः ।
हृतभूयिष्ठरत्नस्य कुरुक्षेत्रमवातरत् ॥ ६५
एवं कलत्रमानीय वृष्णीनां हृतशेषितम् ।
न्यवेशयत कौरव्यस्तत्र तत्र धनंजयः ॥ ६६
हार्दिक्यतनयं पार्थो नगरं मार्तिकावतम् ।
भोजराजकलत्रं च हृतशेषं नरोत्तमः ॥ ६७
ततो वृद्धांश्च बालांश्च स्त्रियश्चादाय पाण्डवः ।
वीरैर्विहीनान्सर्वांस्ताञ्शक्रप्रस्थे न्यवेशयत् ॥ ६८
यौयुधानिं सरस्वत्यां पुत्रं सात्यकिनः प्रियम् ।
न्यवेशयत धर्मात्मा वृद्धबालपुरस्कृतम् ॥ ६९
इन्द्रप्रस्थे ददौ राज्यं वज्राय परवीरहा ।
वज्रेणाक्रूरदारास्तु वार्यमाणाः प्रवव्रजुः ॥ ७०
रुक्मिणी त्वथ गान्धारी शैब्या हैमवतीत्यपि ।
देवी जाम्बवती चैव विविशुर्जातवेदसम् ॥ ७१
सत्यभामा तथैवान्या देव्यः कृष्णस्य संमताः ।
वनं प्रविविशू राजंस्तापस्ये कृतनिश्चयाः ॥ ७२
द्वारकावासिनो ये तु पुरुषाः पार्थमन्वयुः ।
यथार्हं संविभज्यैनान्वज्रे पर्यददज्जयः ॥ ७३
स तत्कृत्वा प्राप्तकालं बाष्पेणापिहितोऽर्जुनः ।
कृष्णद्वैपायनं राजन्ददर्शासीनमाश्रमे ॥ ७४

इति श्रीमहाभारते मौसलपर्वणि
अष्टमोऽध्यायः ॥ ८ ॥

९

वैशंपायन उवाच ।

प्रविशन्नर्जुनो राजन्नाश्रमं सत्यवादिनः ।
ददर्शासीनमेकान्ते मुनिं सत्यवतीसुतम् ॥ १
स तमासाद्य धर्मज्ञमुपतस्थे महाव्रतम् ।
अर्जुनोऽस्मीति नामास्मै निवेद्याभ्यवदत्ततः ॥ २
स्वागतं तेऽस्त्विति प्राह मुनिः सत्यवतीसुतः ।
आस्यतामिति चोवाच प्रसन्नात्मा महामुनिः ॥ ३
तमप्रतीतमनसं निःश्वसन्तं पुनः पुनः ।
निर्विण्णमनसं दृष्ट्वा पार्थं व्यासोऽब्रवीदिदम् ॥ ४
अवीरजोऽभिघातस्ते ब्राह्मणो वा हतस्त्वया ।
युद्धे पराजितो वासि गतश्रीरिव लक्ष्यसे ॥ ५
न त्वा प्रत्यभिजानामि किमिदं भरतर्षभ ।

श्रोतव्यं चेन्मया पार्थ क्षिप्रमाख्यातुमर्हसि ॥ ६

अर्जुन उवाच ।

यः स मेघवपुः श्रीमान्बृहत्पङ्कजलोचनः ।
स कृष्णः सह रामेण त्यक्त्वा देहं दिवं गतः ॥७
मौसले वृष्णिवीराणां विनाशो ब्रह्मशापजः ।
बभूव वीरान्तकरः प्रभासे रोमहर्षणः ॥ ८
ये ते शूरा महात्मानः सिंहदर्पा महाबलाः ।
भोजवृष्ण्यन्धका ब्रह्मन्नन्योन्यं तैर्हतं युधि ॥ ९
गदापरिघशक्तीनां सहाः परिघबाहवः ।
त एरकाभिर्निहताः पश्य कालस्य पर्ययम् ॥ १०
हतं पञ्चशतं तेषां सहस्रं बाहुशालिनाम् ।
निधनं समनुप्राप्तं समासाद्येतरेतरम् ॥ ११
पुनः पुनर्न मृश्यामि विनाशममितौजसाम् ।
चिन्तयानो यदूनां च कृष्णस्य च यशस्विनः ॥१२
शोषणं सागरस्येव पर्वतस्येव चालनम् ।
नभसः पतनं चैव शैत्यमग्नेस्तथैव च ॥ १३
अश्रद्धेयमहं मन्ये विनाशं शार्ङ्गधन्वनः ।
न चेह स्थातुमिच्छामि लोके कृष्णविनाकृतः ॥१४
इतः कष्टतरं चान्यच्छृणु तद्वै तपोधन ।
मनो मे दीर्यते येन चिन्तयानस्य वै मुहुः ॥ १५
पश्यतो वृष्णिदाराश्च मम ब्रह्मन्सहस्रशः ।
आभीरैरनुसृत्याजौ हृताः पञ्चनदालयैः ॥ १६
धनुरादाय तत्राहं नाशकं तस्य पूरणे ।
यथा पुरा च मे वीर्यं भुजयोर्न तथाभवत् ॥ १७
अस्त्राणि मे प्रनष्टानि विविधानि महामुने ।
शराश्च क्षयमापन्नाः क्षणेनैव समन्ततः ॥ १८
पुरुषश्चाप्रमेयात्मा शङ्खचक्रगदाधरः ।
चतुर्भुजः पीतवासा श्यामः पद्मायतेक्षणः ॥ १९
यः स याति पुरस्तान्मे रथस्य सुमहाद्युतिः ।
प्रदहन्रिपुसैन्यानि न पश्याम्यहमद्य तम् ॥ २०
येन पूर्वं प्रदग्धानि शत्रुसैन्यानि तेजसा ।
शरैर्गाण्डीवनिर्मुक्तैरहं पश्चाद्व्यनाशयम् ॥ २१
तमपश्यन्विषीदामि घूर्णामीव च सत्तम ।
परिनिर्विण्णचेताश्च शान्तिं नोपलभेऽपि च ॥ २२
विना जनार्दनं वीरं नाहं जीवितुमुत्सहे ।
श्रुत्वैव हि गतं विष्णुं ममापि मुमुहुर्दिशः ॥ २३
प्रनष्टज्ञातिवीर्यस्य शून्यस्य परिधावतः ।
उपदेष्टुं मम श्रेयो भवानर्हति सत्तम ॥ २४

व्यास उवाच ।

ब्रह्मशापविनिर्दग्धा वृष्ण्यन्धकमहारथाः ।
विनष्टाः कुरुशार्दूल न ताञ्शोचितुमर्हसि ॥ २५
भवितव्यं तथा तद्धि दिष्टमेतन्महात्मनाम् ।
उपेक्षितं च कृष्णेन शक्तेनापि व्यपोहितुम् ॥ २६
त्रैलोक्यमपि कृष्णो हि कृत्स्नं स्थावरजङ्गमम् ।
प्रसहेदन्यथा कर्तुं किमु शापं मनीषिणाम् ॥ २७
रथस्य पुरतो याति यः स चक्रगदाधरः ।
तव स्नेहात्पुराणर्षिर्वासुदेवश्चतुर्भुजः ॥ २८
कृत्वा भारावतरणं पृथिव्याः पृथुलोचनः ।
मोक्षयित्वा जगत्सर्वं गतः स्वस्थानमुत्तमम् ॥ २९
त्वया त्विह महत्कर्म देवानां पुरुषर्षभ ।
कृतं भीमसहायेन यमाभ्यां च महाभुज ॥ ३०
कृतकृत्यांश्च वो मन्ये संसिद्धान्कुरुपुंगव ।
गमनं प्राप्तकालं च तद्धि श्रेयो मतं मम ॥ ३१
बलं बुद्धिश्च तेजश्च प्रतिपत्तिश्च भारत ।
भवन्ति भवकालेषु विपद्यन्ते विपर्यये ॥ ३२
कालमूलमिदं सर्वं जगद्बीजं धनंजय ।
काल एव समादत्ते पुनरेव यदृच्छया ॥ ३३
स एव बलवान्भूत्वा पुनर्भवति दुर्बलः ।
स एवेशश्च भूत्वेह परैराज्ञाप्यते पुनः ॥ ३४
कृतकृत्यानि चास्त्राणि गतान्यद्य यथागतम् ।

पुनरेष्यन्ति ते हस्तं यदा कालो भविष्यति ॥ ३५
कालो गन्तुं गतिं मुख्यां भवतामपि भारत ।
एतच्छ्रेयो हि वो मन्ये परमं भरतर्षभ ॥ ३६
एतद्वचनमास्थाय व्यासस्यामिततेजसः ।
अनुज्ञातो ययौ पार्थो नगरं नागसाह्वयम् ॥ ३७
प्रविश्य च पुरीं वीरः समासाद्य युधिष्ठिरम् ।
आचष्ट तद्यथावृत्तं वृष्ण्यन्धकजनं प्रति ॥ ३८

इति श्रीमहाभारते मौसलपर्वणि

नवमोऽध्यायः ॥ ९ ॥

॥ मौसलपर्व समाप्तम् ॥

१७

महाप्रस्थानिकपर्व

१

जनमेजय उवाच ।

एवं वृष्ण्यन्धककुले श्रुत्वा मौसलमाहवम् ।
पाण्डवाः किमकुर्वन्त तथा कृष्णे दिवं गते ॥ १

वैशंपायन उवाच ।

श्रुत्वैव कौरवो राजा वृष्णीनां कदनं महत् ।
प्रस्थाने मतिमाधाय वाक्यमर्जुनमब्रवीत् ॥ २
कालः पचति भूतानि सर्वाण्येव महामते ।
कर्मन्यासमहं मन्ये त्वमपि द्रष्टुमर्हसि ॥ ३
इत्युक्तः स तु कौन्तेयः कालः काल इति ब्रुवन् ।
अन्वपद्यत तद्वाक्यं भ्रातुर्ज्येष्ठस्य वीर्यवान् ॥ ४
अर्जुनस्य मतं ज्ञात्वा भीमसेनो यमौ तथा ।
अन्वपद्यन्त तद्वाक्यं यदुक्तं सव्यसाचिना ॥ ५
ततो युयुत्सुमानाय्य प्रव्रजन्धर्मकाम्यया ।
राज्यं परिददौ सर्वं वैश्यापुत्रे युधिष्ठिरः ॥ ६
अभिषिच्य स्वराज्ये तु तं राजानं परिक्षितम् ।
दुःखार्तश्चाब्रवीद्राजा सुभद्रां पाण्डवाग्रजः ॥ ७
एष पुत्रस्य ते पुत्रः कुरुराजो भविष्यति ।
यदूनां परिशेषश्च वज्रो राजा कृतश्च ह ॥ ८
परिक्षिद्धास्तिनपुरे शक्रप्रस्थे तु यादवः ।
वज्रो राजा त्वया रक्ष्यो मा चाधर्मे मनः कृथाः ॥९
इत्युक्त्वा धर्मराजः स वासुदेवस्य धीमतः ।
मातुलस्य च वृद्धस्य रामादीनां तथैव च ॥ १०
मातृभिः सह धर्मात्मा कृत्वोदकमतन्द्रितः ।
श्राद्धान्युद्दिश्य सर्वेषां चकार विधिवत्तदा ॥ ११
ददौ रत्नानि वासांसि ग्रामानश्वान्रथानपि ।
स्त्रियश्च द्विजमुख्येभ्यो गवां शतसहस्रशः ॥ १२
कृपमभ्यर्च्य च गुरुमर्थमानपुरस्कृतम् ।
शिष्यं परिक्षितं तस्मै ददौ भरतसत्तमः ॥ १३
ततस्तु प्रकृतीः सर्वाः समानाय्य युधिष्ठिरः ।
सर्वमाचष्ट राजर्षिश्चिकीर्षितमथात्मनः ॥ १४
ते श्रुत्वैव वचस्तस्य पौरजानपदा जनाः ।
भृशमुद्विग्नमनसो नाभ्यनन्दन्त तद्वचः ॥ १५
नैवं कर्तव्यमिति ते तदोचुस्ते नराधिपम् ।
न च राजा तथाकार्षीत्कालपर्यायधर्मवित् ॥ १६
ततोऽनुमान्य धर्मात्मा पौरजानपदं जनम् ।
गमनाय मतिं चक्रे भ्रातरश्चास्य ते तदा ॥ १७
ततः स राजा कौरव्यो धर्मपुत्रो युधिष्ठिरः ।
उत्सृज्याभरणान्यङ्गाज्जगृहे वल्कलान्युत ॥ १८
भीमार्जुनौ यमौ चैव द्रौपदी च यशस्विनी ।
तथैव सर्वे जगृहुर्वल्कलानि जनाधिप ॥ १९
विधिवत्कारयित्वेष्टिं नैष्ठिकीं भरतर्षभ ।
समुत्सृज्याप्सु सर्वेऽग्नीन्प्रतस्थुर्नरपुंगवाः ॥ २०
ततः प्ररुरुदुः सर्वाः स्त्रियो दृष्ट्वा नरर्षभान् ।
प्रस्थितान्द्रौपदीषष्ठान्पुरा द्यूतजितान्यथा ॥ २१
हर्षोऽभवच्च सर्वेषां भ्रातॄणां गमनं प्रति ।

युधिष्ठिरमतं ज्ञात्वा वृष्णिक्षयमवेक्ष्य च ॥ २२
भ्रातरः पञ्च कृष्णा च षष्ठी श्वा चैव सप्तमः ।
आत्मना सप्तमो राजा निर्ययौ गजसाह्वयात् ।
पौरैरनुगतो दूरं सर्वैरन्तःपुरैस्तथा ॥ २३
न चैनमशकत्कश्चिन्निवर्तस्वेति भाषितुम् ।
न्यवर्तन्त ततः सर्वे नरा नगरवासिनः ॥ २४
कृपप्रभृतयश्चैव युयुत्सुं पर्यवारयन् ।
विवेश गङ्गां कौरव्य उलूपी भुजगात्मजा ॥ २५
चित्राङ्गदा ययौ चापि मणिपूरपुरं प्रति ।
शिष्टाः परिक्षितं त्वन्या मातरः पर्यवारयन् ॥ २६
पाण्डवाश्च महात्मानो द्रौपदी च यशस्विनी ।
कृतोपवासाः कौरव्य प्रययुः प्राङ्मुखास्ततः ॥ २७
योगयुक्ता महात्मानस्त्यागधर्ममुपेयुषः ।
अभिजग्मुर्बहून्देशान्सरितः पर्वतांस्तथा ॥ २८
युधिष्ठिरो ययावग्रे भीमस्तु तदनन्तरम् ।
अर्जुनस्तस्य चान्वेव यमौ चैव यथाक्रमम् ॥ २९
पृष्ठतस्तु वरारोहा श्यामा पद्मदलेक्षणा ।
द्रौपदी योषितां श्रेष्ठा ययौ भरतसत्तम ॥ ३०
श्वा चैवानुययावेकः पाण्डवान्प्रस्थितान्वने ।
क्रमेण ते ययुर्वीरा लौहित्यं सलिलार्णवम् ॥ ३१
गाण्डीवं च धनुर्दिव्यं न मुमोच धनंजयः ।
रत्नलोभान्महाराज तौ चाक्षय्यौ महेषुधी ॥ ३२
अग्निं ते ददृशुस्तत्र स्थितं शैलमिवाग्रतः ।
मार्गमावृत्य तिष्ठन्तं साक्षात्पुरुषविग्रहम् ॥ ३३
ततो देवः स सप्तार्चिः पाण्डवानिदमब्रवीत् ।
भो भो पाण्डुसुता वीराः पावकं मां विबोधत ॥
युधिष्ठिर महाबाहो भीमसेन परंतप ।
अर्जुनाश्विसुतौ वीरौ निबोधत वचो मम ॥ ३५
अहमग्निः कुरुश्रेष्ठा मया दग्धं च खाण्डवम् ।
अर्जुनस्य प्रभावेण तथा नारायणस्य च ॥ ३६
अयं वः फल्गुनो भ्राता गाण्डीवं परमायुधम् ।
परित्यज्य वनं यातु नानेनार्थोऽस्ति कश्चन ॥ ३७
चक्ररत्नं तु यत्कृष्णे स्थितमासीन्महात्मनि ।
गतं तच्च पुनर्हस्ते कालेनैष्यति तस्य ह ॥ ३८
वरुणादाहृतं पूर्वं मयैतत्पार्थकारणात् ।
गाण्डीवं कार्मुकश्रेष्ठं वरुणायैव दीयताम् ॥ ३९
ततस्ते भ्रातरः सर्वे धनंजयमचोदयन् ।
स जले प्राक्षिपत्तत्तु तथाक्षय्यौ महेषुधी ॥ ४०
ततोऽग्निर्भरतश्रेष्ठ तत्रैवान्तरधीयत ।
ययुश्च पाण्डवा वीरास्ततस्ते दक्षिणामुखाः ॥ ४१
ततस्ते तूत्तरेणैव तीरेण लवणाम्भसः ।
जग्मुर्भरतशार्दूल दिशं दक्षिणपश्चिमाम् ॥ ४२
ततः पुनः समावृत्ताः पश्चिमां दिशमेव ते ।
ददृशुर्द्वारकां चापि सागरेण परिप्लुताम् ॥ ४३
उदीचीं पुनरावृत्य ययुर्भरतसत्तमाः ।
प्रादक्षिण्यं चिकीर्षन्तः पृथिव्या योगधर्मिणः ॥ ४४

इति श्रीमहाभारते महाप्रस्थानिकपर्वणि
प्रथमोऽध्यायः ॥ १ ॥

२

वैशंपायन उवाच ।

ततस्ते नियतात्मान उदीचीं दिशमास्थिताः ।
ददृशुर्योगयुक्ताश्च हिमवन्तं महागिरिम् ॥ १
तं चाप्यतिक्रमन्तस्ते ददृशुर्वालुकार्णवम् ।
अवैक्षन्त महाशैलं मेरुं शिखरिणां वरम् ॥ २
तेषां तु गच्छतां शीघ्रं सर्वेषां योगधर्मिणाम् ।
याज्ञसेनी भ्रष्टयोगा निपपात महीतले ॥ ३
तां तु प्रपतितां दृष्ट्वा भीमसेनो महाबलः ।
उवाच धर्मराजानं याज्ञसेनीमवेक्ष्य ह ॥ ४
नाधर्मश्चरितः कश्चिद्राजपुत्र्या परंतप ।
कारणं किं नु तद्राजन्यत्कृष्णा पतिता भुवि ॥ ५

युधिष्ठिर उवाच ।

पक्षपातो महानस्या विशेषेण धनंजये ।
तस्यैतत्फलमद्यैषा भुङ्क्ते पुरुषसत्तम ॥ ६

वैशंपायन उवाच ।

एवमुक्त्वानवेक्ष्यैनां ययौ धर्मसुतो नृपः ।
समाधाय मनो धीमान्धर्मात्मा पुरुषर्षभः ॥ ७
सहदेवस्ततो धीमान्निपपात महीतले ।
तं चापि पतितं दृष्ट्वा भीमो राजानमब्रवीत् ॥ ८
योऽयमस्मासु सर्वेषु शुश्रूषुरनहंकृतः ।
सोऽयं माद्रवतीपुत्रः कस्मान्निपतितो भुवि ॥ ९

युधिष्ठिर उवाच ।

आत्मनः सदृशं प्राज्ञं नैषोऽमन्यत कंचन ।
तेन दोषेण पतितस्तस्मादेष नृपात्मजः ॥ १०

वैशंपायन उवाच ।

इत्युक्त्वा तु समुत्सृज्य सहदेवं ययौ तदा ।
भ्रातृभिः सह कौन्तेयः शुना चैव युधिष्ठिरः ॥ ११
कृष्णां निपतितां दृष्ट्वा सहदेवं च पाण्डवम् ।
आर्तो बन्धुप्रियः शूरो नकुलो निपपात ह ॥ १२
तस्मिन्निपतिते वीरे नकुले चारुदर्शने ।
पुनरेव तदा भीमो राजानमिदमब्रवीत् ॥ १३
योऽयमक्षतधर्मात्मा भ्राता वचनकारकः ।
रूपेणाप्रतिमो लोके नकुलः पतितो भुवि ॥ १४
इत्युक्तो भीमसेनेन प्रत्युवाच युधिष्ठिरः ।
नकुलं प्रति धर्मात्मा सर्वबुद्धिमतां वरः ॥ १५
रूपेण मत्समो नास्ति कश्चिदित्यस्य दर्शनम् ।
अधिकश्चाहमेवैक इत्यस्य मनसि स्थितम् ॥ १६
नकुलः पतितस्तस्मादागच्छ त्वं वृकोदर ।
यस्य यद्विहितं वीर सोऽवश्यं तदुपाश्नुते ॥ १७
तांस्तु प्रपतितान्दृष्ट्वा पाण्डवः श्वेतवाहनः ।
पपात शोकसंतप्तस्ततोऽनु परवीरहा ॥ १८
तस्मिंस्तु पुरुषव्याघ्रे पतिते शक्रतेजसि ।
म्रियमाणे दुराधर्षे भीमो राजानमब्रवीत् ॥ १९
अनृतं न स्मराम्यस्य स्वैरेष्वपि महात्मनः ।
अथ कस्य विकारोऽयं येनायं पतितो भुवि ॥ २०

युधिष्ठिर उवाच ।

एकाह्ना निर्दहेयं वै शत्रूनित्यर्जुनोऽब्रवीत् ।
न च तत्कृतवानेष शूरमानी ततोऽपतत् ॥ २१
अवमेने धनुर्ग्राहानेष सर्वांश्च फल्गुनः ।
यथा चोक्तं तथा चैव कर्तव्यं भूतिमिच्छता ॥ २२

वैशंपायन उवाच ।

इत्युक्त्वा प्रस्थितो राजा भीमोऽथ निपपात ह ।
पतितश्चाब्रवीद्भीमो धर्मराजं युधिष्ठिरम् ॥ २३
भो भो राजन्नवेक्षस्व पतितोऽहं प्रियस्तव ।
किंनिमित्तं च पतनं ब्रूहि मे यदि वेत्थ ह ॥ २४

युधिष्ठिर उवाच ।

अतिभुक्तं च भवता प्राणेन च विकत्थसे ।
अनवेक्ष्य परं पार्थ तेनासि पतितः क्षितौ ॥ २५

वैशंपायन उवाच ।

इत्युक्त्वा तं महाबाहुर्जगामानवलोकयन् ।
श्वा त्वेकोऽनुययौ यस्ते बहुशः कीर्तितो मया ॥ २६

इति श्रीमहाभारते महाप्रस्थानिकपर्वणि
द्वितीयोऽध्यायः ॥ २ ॥

३

वैशंपायन उवाच ।

ततः संनादयञ्छक्रो दिवं भूमिं च सर्वशः ।
रथेनोपययौ पार्थमारोहेत्यब्रवीच्च तम् ॥ १
स भ्रातॄन्पतितान्दृष्ट्वा धर्मराजो युधिष्ठिरः ।
अब्रवीच्छोकसंतप्तः सहस्राक्षमिदं वचः ॥ २
भ्रातरः पतिता मेऽत्र आगच्छेयुर्मया सह ।

न विना भ्रातृभिः स्वर्गमिच्छे गन्तुं सुरेश्वर ॥ ३
सुकुमारी सुखार्हा च राजपुत्री पुरंदर ।
सास्माभिः सह गच्छेत तद्भवाननुमन्यताम् ॥ ४

इन्द्र उवाच ।

भ्रातॄन्द्रक्ष्यसि पुत्रांस्त्वमग्रतस्त्रिदिवं गतान् ।
कृष्णया सहितान्सर्वान्मा शुचो भरतर्षभ ॥ ५
निक्षिप्य मानुषं देहं गतास्ते भरतर्षभ ।
अनेन त्वं शरीरेण स्वर्गं गन्ता न संशयः ॥ ६

युधिष्ठिर उवाच ।

अयं श्वा भूतभव्येश भक्तो मां नित्यमेव ह ।
स गच्छेत मया सार्धमानृशंस्या हि मे मतिः ॥७

इन्द्र उवाच ।

अमर्त्यत्वं मत्समत्वं च राज-
न्श्रियं कृत्स्नां महतीं चैव कीर्तिम् ।
संप्राप्तोऽद्य स्वर्गसुखानि च त्वं
त्यज श्वानं नात्र नृशंसमस्ति ॥ ८

युधिष्ठिर उवाच ।

अनार्यमार्येण सहस्रनेत्र
शक्यं कर्तुं दुष्करमेतदार्य ।
मा मे श्रिया संगमनं तयास्तु
यस्याः कृते भक्तजनं त्यजेयम् ॥ ९

इन्द्र उवाच ।

स्वर्गे लोके श्ववतां नास्ति धिष्ण्य-
मिष्टापूर्तं क्रोधवशा हरन्ति ।
ततो विचार्य क्रियतां धर्मराज
त्यज श्वानं नात्र नृशंसमस्ति ॥ १०

युधिष्ठिर उवाच ।

भक्तत्यागं प्राहुरत्यन्तपापं
तुल्यं लोके ब्रह्मवध्याकृतेन ।
तस्मान्नाहं जातु कथंचनाद्य
त्यक्ष्याम्येनं स्वसुखार्थी महेन्द्र ॥ ११

इन्द्र उवाच ।

शुना दृष्टं क्रोधवशा हरन्ति
यद्दत्तमिष्टं विवृतमथो हुतं च ।
तस्माच्छुनस्त्यागमिमं कुरुष्व
शुनस्त्यागात्प्राप्स्यसे देवलोकम् ॥ १२
त्यक्त्वा भ्रातॄन्दयितां चापि कृष्णां
प्राप्तो लोकः कर्मणा स्वेन वीर ।
श्वानं चैनं न त्यजसे कथं नु
त्यागं कृत्स्नं चास्थितो मुह्यसेऽद्य ॥ १३

युधिष्ठिर उवाच ।

न विद्यते संधिरथापि विग्रहो
मृतैर्मर्त्यैरिति लोकेषु निष्ठा ।
न ते मया जीवयितुं हि शक्या
तस्मात्त्यागस्तेषु कृतो न जीवताम् ॥ १४
प्रतिप्रदानं शरणागतस्य
स्त्रियो वधो ब्राह्मणस्वापहारः ।
मित्रद्रोहस्तानि चत्वारि शक्र
भक्तत्यागश्चैव समो मतो मे ॥ १५

वैशंपायन उवाच ।

तद्धर्मराजस्य वचो निशम्य
धर्मस्वरूपी भगवानुवाच ।
युधिष्ठिरं प्रीतियुक्तो नरेन्द्रं
श्लक्ष्णैर्वाक्यैः संस्तवसंप्रयुक्तैः ॥ १६
अभिजातोऽसि राजेन्द्र पितृवृत्तेन मेधया ।
अनुक्रोशेन चानेन सर्वभूतेषु भारत ॥ १७
पुरा द्वैतवने चासि मया पुत्र परीक्षितः ।
पानीयार्थे पराक्रान्ता यत्र ते भ्रातरो हताः ॥ १८
भीमार्जुनौ परित्यज्य यत्र त्वं भ्रातरावुभौ ।
मात्रोः साम्यमभीप्सन्वै नकुलं जीवमिच्छसि ॥

अयं श्वा भक्त इत्येव त्यक्तो देवरथस्त्वया ।
तस्मात्स्वर्गे न ते तुल्यः कश्चिदस्ति नराधिप ॥२०
अतस्तवाक्षया लोकाः स्वशरीरेण भारत ।
प्राप्तोऽसि भरतश्रेष्ठ दिव्यां गतिमनुत्तमाम् ॥ २१
ततो धर्मश्च शक्रश्च मरुतश्चाश्विनावपि ।
देवा देवर्षयश्चैव रथमारोप्य पाण्डवम् ॥ २२
प्रययुः स्वैर्विमानैस्ते सिद्धाः कामविहारिणः ।
सर्वे विरजसः पुण्याः पुण्यवाग्बुद्धिकर्मिणः ॥ २३
स तं रथं समास्थाय राजा कुरुकुलोद्वहः ।
ऊर्ध्वमाचक्रमे शीघ्रं तेजसावृत्य रोदसी ॥ २४
ततो देवनिकायस्थो नारदः सर्वलोकवित् ।
उवाचोच्चैस्तदा वाक्यं बृहद्वादी बृहत्तपाः ॥ २५
येऽपि राजर्षयः सर्वे ते चापि समुपस्थिताः ।
कीर्तिं प्रच्छाद्य तेषां वै कुरुराजोऽधितिष्ठति ॥ २६
लोकानावृत्य यशसा तेजसा वृत्तसंपदा ।
स्वशरीरेण संप्राप्तं नान्यं शुश्रुम पाण्डवात् ॥ २७
नारदस्य वचः श्रुत्वा राजा वचनमब्रवीत् ।
देवानामन्त्र्य धर्मात्मा स्वपक्षांश्चैव पार्थिवान् ॥२८
शुभं वा यदि वा पापं भ्रातृणां स्थानमद्य मे ।
तदेव प्राप्तुमिच्छामि लोकानन्यान्न कामये ॥ २९
राज्ञस्तु वचनं श्रुत्वा देवराज पुरंदरः ।
आनृशंस्यसमायुक्तं प्रत्युवाच युधिष्ठिरम् ॥ ३०
स्थानेऽस्मिन्वस राजेन्द्र कर्मभिर्निर्जिते शुभैः ।
किं त्वं मानुष्यकं स्नेहमद्यापि परिकर्षसि ॥ ३१
सिद्धिं प्राप्तोऽसि परमां यथा नान्यः पुमान्क्वचित् ।
नैव ते भ्रातरः स्थानं संप्राप्ताः कुरुनन्दन ॥ ३२
अद्यापि मानुषो भावः स्पृशते त्वां नराधिप ।
स्वर्गोऽयं पश्य देवर्षीन्सिद्धांश्च त्रिदिवालयान् ॥
युधिष्ठिरस्तु देवेन्द्रमेवंवादिनमीश्वरम् ।
पुनरेवाब्रवीद्धीमानिदं वचनमर्थवत् ॥ ३४
तैर्विना नोत्सहे वस्तुमिह दैत्यनिबर्हण ।
गन्तुमिच्छामि तत्राहं यत्र मे भ्रातरो गताः ॥३५
यत्र सा बृहती श्यामा बुद्धिसत्त्वगुणान्विता ।
द्रौपदी योषितां श्रेष्ठा यत्र चैव प्रिया मम ॥ ३६

इति श्रीमहाभारते महाप्रस्थानिकपर्वणि
तृतीयोऽध्यायः ॥ ३ ॥

॥ महाप्रस्थानिकपर्व समाप्तम् ॥

१८

स्वर्गारोहणपर्व

१

जनमेजय उवाच ।

स्वर्गं त्रिविष्टपं प्राप्य मम पूर्वपितामहाः ।
पाण्डवा धार्तराष्ट्रश्च कानि स्थानानि भेजिरे ॥ १
एतदिच्छाम्यहं श्रोतुं सर्ववित्बासि मे मतः ।
महर्षिणाभ्यनुज्ञातो व्यासेनाद्भुतकर्मणा ॥ २

वैशंपायन उवाच ।

स्वर्गं त्रिविष्टपं प्राप्य तव पूर्वपितामहाः ।
युधिष्ठिरप्रभृतयो यदकुर्वत तच्छृणु ॥ ३
स्वर्गं त्रिविष्टपं प्राप्य धर्मराजो युधिष्ठिरः ।
दुर्योधनं श्रिया जुष्टं ददर्शासीनमासने ॥ ४
भ्राजमानमिवादित्यं वीरलक्ष्म्याभिसंवृतम् ।
देवैर्भ्राजिष्णुभिः साध्यैः सहितं पुण्यकर्मभिः ॥ ५
ततो युधिष्ठिरो दृष्ट्वा दुर्योधनममर्षितः ।
सहसा संनिवृत्तोऽभूच्छ्रियं दृष्ट्वा सुयोधने ॥ ६
ब्रुवन्नुच्चैर्वचस्तान्वै नाहं दुर्योधनेन वै ।
सहितः कामये लोकाँल्लुब्धेनादीर्घदर्शिना ॥ ७
यत्कृते पृथिवी सर्वा सुहृदो बान्धवास्तथा ।
हतास्माभिः प्रसह्याजौ क्लिष्टैः पूर्वं महावने ॥ ८
द्रौपदी च सभामध्ये पाञ्चाली धर्मचारिणी ।
परिक्लिष्टानवद्याङ्गी पत्नी नो गुरुसंनिधौ ॥ ९
स्वस्ति देवा न मे कामः सुयोधनमुदीक्षितुम् ।
तत्राहं गन्तुमिच्छामि यत्र ते भ्रातरो मम ॥ १०
मैवमित्यब्रवीत्तं तु नारदः प्रहसन्निव ।
स्वर्गे निवासो राजेन्द्र विरुद्धं चापि नश्यति ॥ ११
युधिष्ठिर महाबाहो मैवं वोचः कथंचन ।
दुर्योधनं प्रति नृपं शृणु चेदं वचो मम ॥ १२
एष दुर्योधनो राजा पूज्यते त्रिदशैः सह ।
सद्भिश्च राजप्रवरैर्य इमे स्वर्गवासिनः ॥ १३
वीरलोकगतिं प्राप्तो युद्धे हुत्वात्मनस्तनुम् ।
यूयं सर्वे सुरसमा येन युद्धे समासिताः ॥ १४
स एष क्षत्रधर्मेण स्थानमेतदवाप्तवान् ।
भये महति योऽभीतो बभूव पृथिवीपतिः ॥ १५
न तन्मनसि कर्तव्यं पुत्र यद्द्यूतकारितम् ।
द्रौपद्याश्च परिक्लेशं न चिन्तयितुमर्हसि ॥ १६
ये चान्येऽपि परिक्लेशा युष्माकं द्यूतकारिताः ।
संग्रामेष्वथ वान्यत्र न तान्संस्मर्तुमर्हसि ॥ १७
समागच्छ यथान्यायं राज्ञा दुर्योधनेन वै ।
स्वर्गोऽयं नेह वैराणि भवन्ति मनुजाधिप ॥ १८
नारदेनैवमुक्तस्तु कुरुराजो युधिष्ठिरः ।
भ्रातॄन्पप्रच्छ मेधावी वाक्यमेतदुवाच ह ॥ १९
यदि दुर्योधनस्यैते वीरलोकाः सनातनाः ।
अधर्मज्ञस्य पापस्य पृथिवीसुहृदद्रुहः ॥ २०
यत्कृते पृथिवी नष्टा सहया सरथद्विपा ।
वयं च मन्युना दग्धा वैरं प्रतिचिकीर्षवः ॥ २१
ये ते वीरा महात्मानो भ्रातरो मे महाव्रताः ।

सत्यप्रतिज्ञा लोकस्य शूरा वै सत्यवादिनः ॥ २२
तेषामिदानीं के लोका द्रष्टुमिच्छामि तानहम् ।
कर्णं चैव महात्मानं कौन्तेयं सत्यसंगरम् ॥ २३
धृष्टद्युम्नं सात्यकिं च धृष्टद्युम्नस्य चात्मजान् ।
ये च शस्त्रैर्वधं प्राप्ताः क्षत्रधर्मेण पार्थिवाः ॥ २४
क नु ते पार्थिवा ब्रह्मन्नैतान्पश्यामि नारद ।
विराटद्रुपदौ चैव धृष्टकेतुमुखांश्च तान् ॥ २५
शिखण्डिनं च पाञ्चाल्यं द्रौपदेयांश्च सर्वशः ।
अभिमन्युं च दुर्धर्षं द्रष्टुमिच्छामि नारद ॥ २६

इति श्रीमहाभारते स्वर्गारोहणपर्वणि
प्रथमोऽध्यायः ॥ १ ॥

२

युधिष्ठिर उवाच ।

नेह पश्यामि विबुधा राधेयममितौजसम् ।
भ्रातरौ च महात्मानौ युधामन्यूत्तमौजसौ ॥ १
जुहुवुर्ये शरीराणि रणवह्नौ महारथाः ।
राजानो राजपुत्राश्च ये मदर्थे हता रणे ॥ २
क ते महारथाः सर्वे शार्दूलसमविक्रमाः ।
तैरप्ययं जितो लोकः कच्चित्पुरुषसत्तमैः ॥ ३
यदि लोकानिमान्प्राप्तास्ते च सर्वे महारथाः ।
स्थितं वित्त हि मां देवाः सहितं तैर्महात्मभिः ॥४
कच्चिन्न तैरवाप्तोऽयं नृपैर्लोकोऽक्षयः शुभः ।
न तैरहं विना वत्स्ये ज्ञातिभिर्भ्रातृभिस्तथा ॥ ५
मातुर्हि वचनं श्रुत्वा तदा सलिलकर्मणि ।
कर्णस्य क्रियतां तोयमिति तप्यामि तेन वै ॥ ६
इदं च परितप्यामि पुनः पुनरहं सुराः ।
यन्मातुः सदृशौ पादौ तस्याहममितौजसः ॥ ७
दृष्ट्वैव तं नानुगतः कर्णं परबलार्दनम् ।
न ह्यस्मान्कर्णसहिताञ्जयेच्छक्रोऽपि संयुगे ॥ ८
तमहं यत्रतत्रस्थं द्रष्टुमिच्छामि सूर्यजम् ।
अविज्ञातो मया योऽसौ घातितः सव्यसाचिना ॥
भीमं च भीमविक्रान्तं प्राणेभ्योऽपि प्रियं मम ।
अर्जुनं चेन्द्रसंकाशं यमौ तौ च यमोपमौ ॥ १०
द्रष्टुमिच्छामि तां चाहं पाञ्चालीं धर्मचारिणीम् ।
न चेह स्थातुमिच्छामि सत्यमेतद्ब्रवीमि वः ॥ ११
किं मे भ्रातृविहीनस्य स्वर्गेण सुरसत्तमाः ।
यत्र ते स मम स्वर्गो नायं स्वर्गो मतो मम ॥१२

देवा ऊचुः ।

यदि वै तत्र ते श्रद्धा गम्यतां पुत्र माचिरम् ।
प्रिये हि तव वर्तामो देवराजस्य शासनात् ॥ १३

वैशंपायन उवाच ।

इत्युक्त्वा तं ततो देवा देवदूतमुपादिशन् ।
युधिष्ठिरस्य सुहृदो दर्शयेति परंतप ॥ १४
ततः कुन्तीसुतो राजा देवदूतश्च जग्मतुः ।
सहितौ राजशार्दूल यत्र ते पुरुषर्षभाः ॥ १५
अग्रतो देवदूतस्तु ययौ राजा च पृष्ठतः ।
पन्थानमशुभं दुर्गं सेवितं पापकर्मभिः ॥ १६
तमसा संवृतं घोरं केशशैवलशाद्वलम् ।
युक्तं पापकृतां गन्धैर्मांसशोणितकर्दमम् ॥ १७
दंशोत्थानं सझिल्लीकं मक्षिकामशकावृतम् ।
इतश्चेतश्च कुणपैः समन्तात्परिवारितम् ॥ १८
अस्थिकेशसमाकीर्णं कृमिकीटसमाकुलम् ।
ज्वलनेन प्रदीप्तेन समन्तात्परिवेष्टितम् ॥ १९
अयोमुखैश्च काकोलैर्गृध्रैश्च समभिद्रुतम् ।
सूचीमुखैस्तथा प्रेतैर्विन्ध्यशैलोपमैर्वृतम् ॥ २०
मेदोरुधिरयुक्तैश्च छिन्नबाहूरुपाणिभिः ।
निकृत्तोदरपादैश्च तत्र तत्र प्रवेरितैः ॥ २१
स तत्कुणपदुर्गन्धमशिवं रोमहर्षणम् ।
जगाम राजा धर्मात्मा मध्ये बहु विचिन्तयन् ॥
ददर्शोष्णोदकैः पूर्णां नदीं चापि सुदुर्गमाम् ।

असिपत्रवनं चैव निशितक्षुरसंवृतम् ॥ २३
करम्भवालुकास्तप्ता आयसीश्च शिलाः पृथक् ।
लोहकुम्भीश्च तैलस्य क्वाथ्यमानाः समन्ततः ॥२४
कूटशाल्मलिकं चापि दुःस्पर्शं तीक्ष्णकण्टकम् ।
ददर्श चापि कौन्तेयो यातनाः पापकर्मिणाम् ॥२५
स तं दुर्गन्धमालक्ष्य देवदूतमुवाच ह ।
कियदध्वानमस्माभिर्गन्तव्यमिदमीदृशम् ॥ २६
क च ते भ्रातरो मह्यं तन्ममाख्यातुमर्हसि ।
देशोऽयं कश्च देवानामेतदिच्छामि वेदितुम् ॥ २७
स संनिववृते श्रुत्वा धर्मराजस्य भाषितम् ।
देवदूतोऽब्रवीच्चैनमेतावद्गमनं तव ॥ २८
निवर्तितव्यं हि मया तथास्म्युक्तो दिवौकसैः ।
यदि श्रान्तोऽसि राजेन्द्र त्वमथागन्तुमर्हसि ॥ २९
युधिष्ठिरस्तु निर्विण्णस्तेन गन्धेन मूर्छितः ।
निवर्तने धृतमनाः पर्यावर्तत भारत ॥ ३०
स संनिवृत्तो धर्मात्मा दुःखशोकसमन्वितः ।
शुश्राव तत्र वदतां दीना वाचः समन्ततः ॥ ३१
भो भो धर्मज राजर्षे पुण्याभिजन पाण्डव ।
अनुग्रहार्थमस्माकं तिष्ठ तावन्मुहूर्तकम् ॥ ३२
आयाति त्वयि दुर्धर्षे वाति पुण्यः समीरणः ।
तव गन्धानुगस्तात येनास्मान्सुखमागतम् ॥ ३३
ते वयं पार्थ दीर्घस्य कालस्य पुरुषर्षभ ।
सुखमासादयिष्यामस्त्वां दृष्ट्वा राजसत्तम ॥ ३४
संतिष्ठस्व महाबाहो मुहूर्तमपि भारत ।
त्वयि तिष्ठति कौरव्य यातनास्मान्न बाधते ॥ ३५
एवं बहुविधा वाचः कृपणा वेदनावताम् ।
तस्मिन्देशे स शुश्राव समन्ताद्वदतां नृप ॥ ३६
तेषां तद्वचनं श्रुत्वा दयावान्दीनभाषिणाम् ।
अहो कृच्छ्रमिति प्राह तस्थौ स च युधिष्ठिरः ॥
स ता गिरः पुरस्ताद्वै श्रुतपूर्वाः पुनः पुनः ।
ग्लानानां दुःखितानां च नाभ्यजानत पाण्डवः ॥
अबुध्यमानस्ता वाचो धर्मपुत्रो युधिष्ठिरः ।
उवाच के भवन्तो वै किमर्थमिह तिष्ठथ ॥ ३९
इत्युक्तास्ते ततः सर्वे समन्तादवभाषिरे ।
कर्णोऽहं भीमसेनोऽहमर्जुनोऽहमिति प्रभो ॥ ४०
नकुलः सहदेवोऽहं धृष्टद्युम्नोऽहमित्युत ।
द्रौपदी द्रौपदेयाश्च इत्येवं ते विचुक्रुशुः ॥ ४१
ता वाचः स तदा श्रुत्वा तद्देशसदृशीर्नृप ।
ततो विममृशे राजा किं न्विदं दैवकारितम् ॥ ४२
किं नु तत्कलुषं कर्म कृतमेभिर्महात्मभिः ।
कर्णेन द्रौपदेयैर्वा पाञ्चाल्या वा सुमध्यया ॥ ४३
य इमे पापगन्धेऽस्मिन्देशे सन्ति सुदारुणे ।
न हि जानामि सर्वेषां दुष्कृतं पुण्यकर्मणाम् ॥
किं कृत्वा धृतराष्ट्रस्य पुत्रो राजा सुयोधनः ।
तथा श्रिया युतः पापः सह सर्वैः पदानुगैः ॥ ४५
महेन्द्र इव लक्ष्मीवानास्ते परमपूजितः ।
कस्येदानीं विकारोऽयं यदिमे नरकं गताः ॥ ४६
सर्वधर्मविदः शूराः सत्यागमपरायणाः ।
क्षात्रधर्मपराः प्राज्ञा यज्वानो भूरिदक्षिणाः ॥४७
किं नु सुप्तोऽस्मि जागर्मि चेतयानो न चेतये ।
अहो चित्तविकारोऽयं स्याद्वा मे चित्तविभ्रमः ॥४८
एवं बहुविधं राजा विममर्श युधिष्ठिरः ।
दुःखशोकसमाविष्टश्चिन्ताव्याकुलितेन्द्रियः ॥ ४९
क्रोधमाहारयच्चैव तीव्रं धर्मसुतो नृपः ।
देवांश्च गर्हयामास धर्मं चैव युधिष्ठिरः ॥ ५०
स तीव्रगन्धसंतप्तो देवदूतमुवाच ह ।
गम्यतां भद्र येषां त्वं दूतस्तेषामुपान्तिकम् ॥ ५१
न ह्यहं तत्र यास्यामि स्थितोऽस्मीति निवेद्यताम् ।
मत्संश्रयादिमे दूत सुखिनो भ्रातरो हि मे ॥ ५२
इत्युक्तः स तदा दूतः पाण्डुपुत्रेण धीमता ।

जगाम तत्र यत्रास्ते देवराजः शतक्रतुः ॥ ५३
निवेदयामास च तद्धर्मराजचिकीर्षितम् ।
यथोक्तं धर्मपुत्रेण सर्वमेव जनाधिप ॥ ५४

इति श्रीमहाभारते स्वर्गारोहणपर्वणि
द्वितीयोऽध्यायः ॥ २ ॥

३

वैशंपायन उवाच ।

स्थिते मुहूर्तं पार्थे तु धर्मराजे युधिष्ठिरे ।
आजग्मुस्तत्र कौरव्य देवाः शक्रपुरोगमाः ॥ १
स्वयं विग्रहवान्धर्मो राजानं प्रसमीक्षितुम् ।
तत्राजगाम यत्रासौ कुरुराजो युधिष्ठिरः ॥ २
तेषु भास्वरदेहेषु पुण्याभिजनकर्मसु ।
समागतेषु देवेषु व्यगमत्तत्तमो नृप ॥ ३
नादृश्यन्त च तास्तत्र यातनाः पापकर्मिणाम् ।
नदी वैतरणी चैव कूटशाल्मलिना सह ॥ ४
लोहकुम्भ्यः शिलाश्चैव नादृश्यन्त भयानकाः ।
विकृतानि शरीराणि यानि तत्र समन्ततः ।
ददर्श राजा कौन्तेयस्तान्यदृश्यानि चाभवन् ॥ ५
ततो वायुः सुखस्पर्शः पुण्यगन्धवहः शिवः ।
ववौ देवसमीपस्थः शीतलोऽतीव भारत ॥ ६
मरुतः सह शक्रेण वसवश्चाश्विनौ सह ।
साध्या रुद्रास्तथादित्या ये चान्येऽपि दिवौकसः ॥
सर्वे तत्र समाजग्मुः सिद्धाश्च परमर्षयः ।
यत्र राजा महातेजा धर्मपुत्रः स्थितोऽभवत् ॥ ८
ततः शक्रः सुरपतिः श्रिया परमया युतः ।
युधिष्ठिरमुवाचेदं सान्त्वपूर्वमिदं वचः ॥ ९
युधिष्ठिर महाबाहो प्रीता देवगणास्तव ।
एह्येहि पुरुषव्याघ्र कृतमेतावता विभो ।
सिद्धिः प्राप्ता त्वया राजँल्लोकाश्चाप्यक्षयास्तव ॥ १०
न च मन्युस्त्वया कार्यः शृणु चेदं वचो मम ।
अवश्यं नरकस्तात द्रष्टव्यः सर्वराजभिः ॥ ११
शुभानामशुभानां च द्वौ राशी पुरुषर्षभ ।
यः पूर्वं सुकृतं भुङ्क्ते पश्चान्निरयमेति सः ।
पूर्वं नरकभाग्यस्तु पश्चात्स्वर्गमुपैति सः ॥ १२
भूयिष्ठं पापकर्मा यः स पूर्वं स्वर्गमश्नुते ।
तेन त्वमेवं गमितो मया श्रेयोर्थिना नृप ॥ १३
व्याजेन हि त्वया द्रोण उपचीर्णः सुतं प्रति ।
व्याजेनैव ततो राजन्दर्शितो नरकस्तव ॥ १४
यथैव त्वं तथा भीमस्तथा पार्थो यमौ तथा ।
द्रौपदी च तथा कृष्णा व्याजेन नरकं गताः ॥ १५
आगच्छ नरशार्दूल मुक्तास्ते चैव किल्बिषात् ।
स्वपक्षाश्चैव ये तुभ्यं पार्थिवा निहता रणे ।
सर्वे स्वर्गमनुप्राप्तास्तान्पश्य पुरुषर्षभ ॥ १६
कर्णश्चैव महेष्वासः सर्वशस्त्रभृतां वरः ।
स गतः परमां सिद्धिं यदर्थं परितप्यसे ॥ १७
तं पश्य पुरुषव्याघ्रमादित्यतनयं विभो ।
स्वस्थानस्थं महाबाहो जहि शोकं नरर्षभ ॥ १८
भ्रातॄंश्चान्यांस्तथा पश्य स्वपक्षांश्चैव पार्थिवान् ।
स्वं स्वं स्थानमनुप्राप्तान्व्येतु ते मानसो ज्वरः ॥ १९
अनुभूय पूर्वं त्वं कृच्छ्रमितःप्रभृति कौरव ।
विहरस्व मया सार्धं गतशोको निरामयः ॥ २०
कर्मणां तात पुण्यानां जितानां तपसा स्वयम् ।
दानानां च महाबाहो फलं प्राप्नुहि पाण्डव ॥ २१
अद्य त्वां देवगन्धर्वा दिव्याश्चाप्सरसो दिवि ।
उपसेवन्तु कल्याणं विरजोम्बरवाससः ॥ २२
राजसूयजिताँल्लोकानश्वमेधाभिवर्धितान् ।
प्राप्नुहि त्वं महाबाहो तपसश्च फलं महत् ॥ २३
उपर्युपरि राज्ञां हि तव लोका युधिष्ठिर ।
हरिश्चन्द्रसमाः पार्थ येषु त्वं विहरिष्यसि ॥ २४
मान्धाता यत्र राजर्षिर्यत्र राजा भगीरथः ।

द्यौःपन्तियत्र भरतस्तत्र त्वं विहरिष्यसि ॥ २५
एषा देवनदी पुण्या पार्थ त्रैलोक्यपावनी ।
आकाशगङ्गा राजेन्द्र तत्राप्लुत्य गमिष्यसि ॥ २६
अत्र स्नातस्य ते भावो मानुषो विगमिष्यति ।
गतशोको निरायासो मुक्तवैरो भविष्यसि ॥ २७
एवं ब्रुवति देवेन्द्रे कौरवेन्द्रं युधिष्ठिरम् ।
धर्मो विग्रहवान्साक्षादुवाच सुतमात्मनः ॥ २८
भो भो राजन्महाप्राज्ञ प्रीतोऽस्मि तव पुत्रक ।
मद्भक्त्या सत्यवाक्येन क्षमया च दमेन च ॥ २९
एषा तृतीया जिज्ञासा तव राजन्कृता मया ।
न शक्यसे चालयितुं स्वभावात्पार्थ हेतुभिः ॥ ३०
पूर्वं परीक्षितो हि त्वमासीर्द्वैतवनं प्रति ।
अरणीसहितस्यार्थे तत्र निस्तीर्णवानसि ॥ ३१
सोदर्येषु विनष्टेषु द्रौपद्यां तत्र भारत ।
श्वरूपधारिणा पुत्र पुनस्त्वं मे परीक्षितः ॥ ३२
इदं तृतीयं भ्रातॄणामर्थे यत्स्थातुमिच्छसि ।
विशुद्धोऽसि महाभाग सुखी विगतकल्मषः ॥ ३३
न च ते भ्रातरः पार्थ नरकस्था विशां पते ।
मायैषा देवराजेन महेन्द्रेण प्रयोजिता ॥ ३४
अवश्यं नरकस्तात द्रष्टव्यः सर्वराजभिः ।
ततस्त्वया प्राप्तमिदं मुहूर्तं दुःखमुत्तमम् ॥ ३५
न सव्यसाची भीमो वा यमौ वा पुरुषर्षभौ ।
कर्णो वा सत्यवाक्शूरो नरकार्हाश्चिरं नृप ॥ ३६
न कृष्णा राजपुत्री च नरकार्हा युधिष्ठिर ।
एह्येहि भरतश्रेष्ठ पश्य गङ्गां त्रिलोकगाम् ॥ ३७
एवमुक्तः स राजर्षिस्तव पूर्वपितामहः ।
जगाम सह धर्मेण सर्वैश्च त्रिदशालयैः ॥ ३८
गङ्गां देवनदीं पुण्यां पावनीमृषिसंस्तुताम् ।
अवगाह्य तु तां राजा तनुं तत्याज मानुषीम् ॥ ३९
ततो दिव्यवपुर्भूत्वा धर्मराजो युधिष्ठिरः ।
निर्वैरो गतसंतापो जले तस्मिन्समाप्लुतः ॥ ४०
ततो ययौ वृतो देवैः कुरुराजो युधिष्ठिरः ।
धर्मेण सहितो धीमान्स्तूयमानो महर्षिभिः ॥ ४१

इति श्रीमहाभारते स्वर्गारोहणपर्वणि
तृतीयोऽध्यायः ॥ ३ ॥

४

वैशंपायन उवाच ।

ततो युधिष्ठिरो राजा देवैः सर्षिमरुद्गणैः ।
पूज्यमानो ययौ तत्र यत्र ते कुरुपुंगवाः ॥ १
ददर्श तत्र गोविन्दं ब्राह्मेण वपुषान्वितम् ।
तेनैव दृष्टपूर्वेण सादृश्येनोपसूचितम् ॥ २
दीप्यमानं स्ववपुषा दिव्यैरस्त्रैरुपस्थितम् ।
चक्रप्रभृतिभिर्घोरैर्दिव्यैः पुरुषविग्रहैः ॥ ३
उपास्यमानं वीरेण फल्गुनेन सुवर्चसा ।
अपरस्मिन्नथोद्देशे कर्णं शस्त्रभृतां वरम् ।
द्वादशादित्यसहितं ददर्श कुरुनन्दनः ॥ ४
अथापरस्मिन्नुद्देशे मरुद्गणवृतं प्रभुम् ।
भीमसेनमथापश्यत्तेनैव वपुषान्वितम् ॥ ५
अश्विनोस्तु तथा स्थाने दीप्यमानौ स्वतेजसा ।
नकुलं सहदेवं च ददर्श कुरुनन्दनः ॥ ६
तथा ददर्श पाञ्चालीं कमलोत्पलमालिनीम् ।
वपुषा स्वर्गमाक्रम्य तिष्ठन्तीमर्कवर्चसम् ॥ ७
अथैनां सहसा राजा प्रष्टुमैच्छद्युधिष्ठिरः ।
ततोऽस्य भगवानिन्द्रः कथयामास देवराट् ॥ ८
श्रीरेषा द्रौपदीरूपा त्वदर्थे मानुषं गता ।
अयोनिजा लोककान्ता पुण्यगन्धा युधिष्ठिर ॥ ९
द्रुपदस्य कुले याता भवद्भिश्चोपजीविता ।
रत्यर्थं भवतां ह्येषा निर्मिता शूलपाणिना ॥ १०
एते पञ्च महाभागा गन्धर्वाः पावकप्रभाः ।
द्रौपद्यास्तनया राजन्युष्माकममितौजसः ॥ ११

पश्य गन्धर्वराजानं धृतराष्ट्रं मनीषिणम् ।
एनं च त्वं विजानीहि भ्रातरं पूर्वजं पितुः ॥ १२
अयं ते पूर्वजो भ्राता कौन्तेयः पावकद्युतिः ।
सूर्यपुत्रोऽग्रजः श्रेष्ठो राधेय इति विश्रुतः ।
आदित्यसहितो याति पश्यैनं पुरुषर्षभ ॥ १३
साध्यानामथ देवानां वसूनां मरुतामपि ।
गणेषु पश्य राजेन्द्र वृष्ण्यन्धकमहारथान् ।
सात्यकिप्रमुखान्वीरान्भोजांश्चैव महारथान् ॥ १४
सोमेन सहितं पश्य सौभद्रमपराजितम् ।
अभिमन्युं महेष्वासं निशाकरसमद्युतिम् ॥ १५
एष पाण्डुर्महेष्वासः कुन्त्या माद्र्या च संगतः ।
विमानेन सदाभ्येति पिता तव ममान्तिकम् ॥१६
वसुभिः सहितं पश्य भीष्मं शांतनवं नृपम् ।
द्रोणं बृहस्पतेः पार्श्वे गुरुमेनं निशामय ॥ १७
एते चान्ये महीपाला योधास्तव च पाण्डव ।
गन्धर्वैः सहिता यान्ति यक्षैः पुण्यजनैस्तथा ॥१८
गुह्यकानां गतिं चापि केचित्प्राप्ता नृसत्तमाः ।
त्यक्त्वा देहं जितस्वर्गाः पुण्यवाग्बुद्धिकर्मभिः ॥

इति श्रीमहाभारते स्वर्गारोहणपर्वणि
चतुर्थोऽध्यायः ॥ ४ ॥

५

जनमेजय उवाच ।

भीष्मद्रोणौ महात्मानौ धृतराष्ट्रश्च पार्थिवः ।
विराटद्रुपदौ चोभौ शङ्खश्चैवोत्तरस्तथा ॥ १
धृष्टकेतुर्जयत्सेनो राजा चैव स सत्यजित् ।
दुर्योधनसुताश्चैव शकुनिश्चैव सौबलः ॥ २
कर्णपुत्राश्च विक्रान्ता राजा चैव जयद्रथः ।
घटोत्कचादयश्चैव ये चान्ये नानुकीर्तिताः ॥ ३
ये चान्ये कीर्तितास्तत्र राजानो दीप्तमूर्तयः ।
स्वर्गे कालं कियन्तं ते तस्थुस्तदपि शंस मे ॥ ४
आहो स्विच्छाश्वतं स्थानं तेषां तत्र द्विजोत्तम ।
अन्ते वा कर्मणः कां ते गतिं प्राप्ता नरर्षभाः ।
एतदिच्छाम्यहं श्रोतुं प्रोच्यमानं त्वया द्विज ॥ ५

सूत उवाच ।

इत्युक्तः स तु विप्रर्षिरनुज्ञातो महात्मना ।
व्यासेन तस्य नृपतेराख्यातुमुपचक्रमे ॥ ६

वैशंपायन उवाच ।

गन्तव्यं कर्मणामन्ते सर्वेण मनुजाधिप ।
शृणु गुह्यमिदं राजन्देवानां भरतर्षभ ।
यदुवाच महातेजा दिव्यचक्षुः प्रतापवान् ॥ ७
मुनिः पुराणः कौरव्य पाराशर्यो महाव्रतः ।
अगाधबुद्धिः सर्वज्ञो गतिज्ञः सर्वकर्मणाम् ॥ ८
वसूनेव महातेजा भीष्मः प्राप महाद्युतिः ।
अष्टावेव हि दृश्यन्ते वसवो भरतर्षभ ॥ ९
बृहस्पतिं विवेशाथ द्रोणो ह्यङ्गिरसां वरम् ।
कृतवर्मा तु हार्दिक्यः प्रविवेश मरुद्गणम् ॥ १०
सनत्कुमारं प्रद्युम्नः प्रविवेश यथागतम् ।
धृतराष्ट्रो धनेशस्य लोकान्प्राप दुरासदान् ॥ ११
धृतराष्ट्रेण सहिता गान्धारी च यशस्विनी ।
पत्नीभ्यां सहितः पाण्डुर्महेन्द्रसदनं ययौ ॥ १२
विराटद्रुपदौ चोभौ धृष्टकेतुश्च पार्थिवः ।
निशठाक्रूरसाम्बाश्च भानुः कम्पो विडूरथः ॥ १३
भूरिश्रवाः शलश्चैव भूरिश्च पृथिवीपतिः ।
उग्रसेनस्तथा कंसो वसुदेवस्य वीर्यवान् ॥ १४
उत्तरश्च सह भ्रात्रा शङ्खेन नरपुंगवः ।
विश्वेषां देवतानां ते विविशुर्नरसत्तमाः ॥ १५
वर्चा नाम महातेजाः सोमपुत्रः प्रतापवान् ।
सोऽभिमन्युर्नृसिंहस्य फल्गुनस्य सुतोऽभवत् ॥१६
स युद्ध्वा क्षत्रधर्मेण यथा नान्यः पुमान्क्वचित् ।
विवेश सोमं धर्मात्मा कर्मणोऽन्ते महारथः ॥१७

आविवेश रविं कर्णः पितरं पुरुषर्षभ ।
द्वापरं शकुनिः प्राप धृष्टद्युम्नस्तु पावकम् ॥ १८
धृतराष्ट्रात्मजाः सर्वे यातुधाना बलोत्कटाः ।
ऋद्धिमन्तो महात्मानः शस्त्रपूता दिवं गताः ।
धर्ममेवाविशत्क्षत्ता राजा चैव युधिष्ठिरः ॥ १९
अनन्तो भगवान्देवः प्रविवेश रसातलम् ।
पितामहनियोगाद्धि यो योगाद्गामधारयत् ॥ २०
षोडशस्त्रीसहस्राणि वासुदेवपरिग्रहः ।
न्यमज्जन्त सरस्वत्यां कालेन जनमेजय ।
ताश्चाप्यप्सरसो भूत्वा वासुदेवमुपागमन् ॥ २१
हतास्तस्मिन्महायुद्धे ये वीरास्तु महारथाः ।
घटोत्कचादयः सर्वे देवान्यक्षांश्च भेजिरे ॥ २२
दुर्योधनसहायाश्च राक्षसाः परिकीर्तिताः ।
प्राप्तास्ते क्रमशो राजन्सर्वलोकाननुत्तमान् ॥ २३
भवनं च महेन्द्रस्य कुबेरस्य च धीमतः ।
वरुणस्य तथा लोकान्विविशुः पुरुषर्षभाः ॥ २४
एतत्ते सर्वमाख्यातं विस्तरेण महाद्युते ।
कुरूणां चरितं कृत्स्नं पाण्डवानां च भारत ॥ २५

सूत उवाच ।

एतच्छ्रुत्वा द्विजश्रेष्ठात्स राजा जनमेजयः ।
विस्मितोऽभवदत्यर्थं यज्ञकर्मान्तरेष्वथ ॥ २६
ततः समापयामासुः कर्म तत्तस्य याजकाः ।
आस्तीकश्चाभवत्प्रीतः परिमोक्ष्य भुजंगमान् ॥ २७
ततो द्विजातीन्सर्वांस्तान्दक्षिणाभिरतोषयत् ।
पूजिताश्चापि ते राज्ञा ततो जग्मुर्यथागतम् ॥ २८
विसर्जयित्वा विप्रांस्तान्राजापि जनमेजयः ।
ततस्तक्षशिलायाः स पुनरायाद्गजाह्वयम् ॥ २९
एतत्ते सर्वमाख्यातं वैशंपायनकीर्तितम् ।
व्यासाज्ञया समाख्यातं सर्पसत्रे नृपस्य ह ॥ ३०
पुण्योऽयमितिहासाख्यः पवित्रं चेदमुत्तमम् ।
कृष्णेन मुनिना विप्र नियतं सत्यवादिना ॥ ३१
सर्वज्ञेन विधिज्ञेन धर्मज्ञानवता सता ।
अतीन्द्रियेण शुचिना तपसा भावितात्मना ॥ ३२
ऐश्वर्ये वर्तता चैव सांख्ययोगविदा तथा ।
नैकतन्त्रविबुद्धेन दृष्ट्वा दिव्येन चक्षुषा ॥ ३३
कीर्तिं प्रथयता लोके पाण्डवानां महात्मनाम् ।
अन्येषां क्षत्रियाणां च भूरिद्रविणतेजसाम् ॥ ३४
य इदं श्रावयेद्विद्वान्सदा पर्वणि पर्वणि ।
धूतपाप्मा जितस्वर्गो ब्रह्मभूयाय गच्छति ॥ ३५
यश्चेदं श्रावयेच्छ्राद्धे ब्राह्मणान्पादमन्ततः ।
अक्षय्यमन्नपानं वै पितॄंस्तस्योपतिष्ठते ॥ ३६
अह्ना यदेनः कुरुते इन्द्रियैर्मनसापि वा ।
महाभारतमाख्याय पश्चात्संध्यां प्रमुच्यते ॥ ३७
धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित् ॥ ३८
जयो नामेतिहासोऽयं श्रोतव्यो भूतिमिच्छता ।
राज्ञा राजसुतैश्चापि गर्भिण्या चैव योषिता ॥ ३९
स्वर्गकामो लभेत्स्वर्गं जयकामो लभेज्जयम् ।
गर्भिणी लभते पुत्रं कन्यां वा बहुभागिनीम् ॥ ४०
अनागतं त्रिभिर्वर्षैः कृष्णद्वैपायनः प्रभुः ।
संदर्भं भारतस्यास्य कृतवान्धर्मकाम्यया ॥ ४१
नारदोऽश्रावयद्देवानसितो देवलः पितॄन् ।
रक्षो यक्षाञ्शुको मर्त्यान्वैशंपायन एव तु ॥ ४२
इतिहासमिमं पुण्यं महार्थं वेदसंमितम् ।
श्रावयेद्यस्तु वर्णांस्त्रीन्कृत्वा ब्राह्मणमग्रतः ॥ ४३
स नरः पापनिर्मुक्तः कीर्तिं प्राप्येह शौनक ।
गच्छेत्परमिकां सिद्धिमत्र ते नास्ति संशयः ॥ ४४
भारताध्ययनात्पुण्यादपि पादमधीयतः ।
श्रद्दधानस्य पूयन्ते सर्वपापान्यशेषतः ॥ ४५
महर्षिर्भगवान्व्यासः कृत्वेमां संहितां पुरा ।

श्लोकैश्चतुर्भिर्भगवान्पुत्रमध्यापयच्छुकम् ॥ ४६
मातापितृसहस्राणि पुत्रदारशतानि च ।
संसारेष्वनुभूतानि यान्ति यास्यन्ति चापरे ॥ ४७
हर्षस्थानसहस्राणि भयस्थानशतानि च ।
दिवसे दिवसे मूढमाविशन्ति न पण्डितम् ॥ ४८
ऊर्ध्वबाहुर्विरौम्येष न च कश्चिच्छृणोति मे ।
धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते ॥ ४९
न जातु कामान्न भयान्न लोभा-
द्धर्मं त्यजेज्जीवितस्यापि हेतोः ।
नित्यो धर्मः सुखदुःखे त्वनित्ये
जीवो नित्यो हेतुरस्य त्वनित्यः ॥ ५०
इमां भारतसावित्रीं प्रातरुत्थाय यः पठेत् ।
स भारतफलं प्राप्य परं ब्रह्माधिगच्छति ॥ ५१
यथा समुद्रो भगवान्यथा च हिमवान्गिरिः ।
ख्यातावुभौ रत्ननिधी तथा भारतमुच्यते ॥ ५२
महाभारतमाख्यानं यः पठेत्सुसमाहितः ।
स गच्छेत्परमां सिद्धिमिति मे नास्ति संशयः ॥
द्वैपायनोष्ठपुटनिःसृतमप्रमेयं
पुण्यं पवित्रमथ पापहरं शिवं च ।
यो भारतं समधिगच्छति वाच्यमानं
किं तस्य पुष्करजलैरभिषेचनेन ॥ ५४

इति श्रीमहाभारते स्वर्गारोहणपर्वणि
पञ्चमोऽध्यायः ॥ ५ ॥

॥ इति स्वर्गारोहणपर्व समाप्तम् ॥

॥ इति श्रीमहाभारतं संपूर्णम् ॥